बं॰नं॰ ९९
७

B.N. 99
7

अथ"

(श्रीशंकराचार्यभगवत्प्रणीतम्)

ग्रन्थनामः - "शारीरकमीमांसाभाष्यम्" ("रत्नप्रभा सहितम्)

व्याख्यातृनामः - गोविन्दभगवत्पादाः"

विषयः - अद्वैतवेदान्तशास्त्रम्

Sharirik Mimamsa Bhashyam.

871

शारीरकसूत्रभाष्यप्रथमाध्यायद्वितीयपादारंभः

ब्र॰भा॰१ श्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः ॥ श्रीरामं सिद्धमन्त्रार्थं गुहाशायिनमंतरं । अंतर्यामिणमज्ञेयं वैश्वानरमहं भजे १ एवं पा-
देनोत्तरपादयोः संगतिं वक्तुं वृत्तमनुवदति । प्रथम इति । जगत्कारणत्वस्यापि पिल्वादिकमन्यथासिद्धं । तदुपजीव्योत्तरपादद्वयं प्रवर्त्तत
१ इति हेतुहेतुमद्भावः संगतिः । कथं पादभेद इत्याशंक्य पादानामवांतरभेदमाह । अर्थांतरेति । आकाशादिशब्दानां स्पष्टब्रह्मलिंगैर्ब्रह्मणि
समन्वयोक्तिः । अस्पष्टब्रह्मलिंगवाक्यसमन्वयः पादद्वयेनोच्यते ॥ प्रायेणोपास्यज्ञेयब्रह्मभेदात्पादयोरवांतरभेद इति भावः । छांदो-

ॐ नमः प्रथमे पादे जन्माद्यस्य यत इत्याकाशादेः समस्तस्य जगतो जन्मादिकारणं ब्रह्मेत्युक्तं । तस्य समस्तजगत्कारणस्य ब्रह्मणो व्यापित्वं नित्यत्वं सर्वज्ञत्वं सर्वात्मत्वमित्येवंजातीयका धर्मा उक्ता एव भवंति । अर्थांतरप्रसिद्धानां केषांचिच्छब्दानां ब्रह्मविषयत्वे हेतुप्रतिपादनेन कानिचिद्वाक्यानि संदिह्यमानानि ब्रह्मपरतया निर्णीतानि । पुनरप्यन्यानि वाक्यान्यस्पष्टब्रह्मलिंगानि संदिह्यंते । किं परं ब्रह्म प्रतिपादयंति । आहोस्विदर्थांतरं किंचिदिति । तन्निर्णयाय द्वितीयतृतीयौ पादावारभ्येते ॥ सर्वत्रप्रसिद्धोपदेशात् । इदमाम्नायते । सर्वं खल्विदं ब्रह्म तज्जलानिति शांत उपासीत ॥

ग्यमुदाहरति । इदमिति । तस्माज्जायत इति तज्जं । तस्मिंल्लीयत इति तल्लं । तस्मिन्ननिति चेष्टत इति तदनं तज्जं च तत् तल्लं च तदनं चेति तज्ज- १
लान् । कर्मधारयेस्मिन्नेकशेषाभावेन मध्यमपदस्य तच्छब्दस्य लोपः । तज्जलानमिति वाच्ये छांदसोऽवयवलोपः । इति शब्दो हेतौ । सर्व-
मिदं जगद्ब्रह्मैव तद्विवर्त्तत्वादित्यर्थः ब्रह्मणि मित्रामित्रभेदाभावाच्च शांतो रागादिरहितो भवेदिति गुणविधिः ॥ ॥ ॥

सक्रतुमुपासनं कुर्वीतेति विहितोपासनस्योपासीतेत्यनुवादस्य फलमाह। अथेति। क्रतुमयः संकल्पविकार इत्यर्थः पुरुषस्य ध्या
नविकारत्वं स्फुटयति। प्रेत्येति। इह यथा प्रतिमृत्वा ध्यानमहिम्ना तद्धर्मरूपेण जायत इत्यर्थः। क्रतुमयः संकल्पप्रधान इति वार्थः।
क्रतोर्विषयमाह। मन इति। अस्ते स्वपक्रमान्मनोमयं प्राणशरीरभारूपं सत्यसंकल्पमंतर्हृदये ध्येयमित्यर्थः। एवं च ब्रह्मलिंगैरब्र
ह्मलिंगैर्वा धट्टकः। न तत्पेरोपक्रमे ब्रह्मलिंगमस्ति। किंतु प्रकरणं तच्च शांतिगुणविधानार्थमन्यथासिद्धं। अतो जीवलिंगं बलीय

अथ खलु क्रतुमयः पुरुषो यथाक्रतुरस्मिंल्लोके पुरुषो भवति तथेतः प्रेत्य भवति स क्रतुं कुर्वीत। मनोमयः प्राणशरीर इत्या
दि तत्र संशयः किमिह मनोमयत्वादिभिर्धर्मैः शारीर आत्मोपास्यत्वेनोपदिश्यते। आहोस्वित्परं ब्रह्मेति। किं तावत्प्राप्तं। शारीर इ
ति। कुतः तस्य हि कार्यकरणाधिपतेः प्रसिद्धो मन आदिभिः संबंधो न परस्य ब्रह्मणः। अप्राणो ह्यमनाः शुभ्र इत्यादिश्रुतिभ्यः। ननु
सर्वं खल्विदं ब्रह्मेति स्वशब्देनैव ब्रह्मोपात्तं। कथमिह शारीर आत्मोपास्य आशंक्यते। नैष दोषः। नेदं वाक्यं ब्रह्मोपासनविधिपरं
किं तर्हि शमविधिपरं। यत्कारणं सर्वं खल्विदं ब्रह्म तज्जलानिति शांत उपासीतेत्याह। एतदुक्तं भवति। यस्मात्सर्वमिदं विकारजातं
ब्रह्मैव तज्जत्वात्तल्लत्वात्तदनत्वाच्च। न च सर्वस्यैकात्मत्वे रागादयः संभवंति। तस्माच्छांत उपासीतेति॥ ॥ ॥

इति प्रत्युदाहरणेन पूर्वपक्षयति॥ शारीर इत्यादिना। श्रुतिमाशंक्याप्रसिद्ध्या परिहरति। नैष दोष इति। शमविधिपरत्वे हेतुमा
ह॥ यत्कारणमिति॥ यत एवमाह तस्माच्छमविधिपरमिति संबंधः

सू॰ भा॰ १ न ब्रह्मेति। ब्रह्मध्यानयोर्विधीयमानभेदापत्तेरित्यर्थः। जन्मपरंपरया जीवस्यापि सर्वकर्मत्वादिसंभवमाह। सर्वकर्मेति सर्ववाक्

२

न॰ च शमविधिपरत्वे सत्येतेन वाक्येन ब्रह्मोपासनं नियन्तुं शक्यते। उपासनं तु स क्रतुं कुर्वीतेत्येतेन विधीयते। क्रतुः संकल्पो
ध्यानमित्यर्थः। तस्य च विषयत्वेन श्रूयते मनोमयः प्राणशरीर इति जीवलिंगमतो ब्रूमो जीवविषयमेतदुपासनमिति। सर्वक
र्मा सर्वकाम इत्याद्यपि श्रूयमाणं पर्यायेण जीवविषयमुपपद्यते॥ एष म आत्मान्तर्हृदयेऽणीयान्व्रीहेर्वा यवाद्वेति च हृदयायत
नत्वमणीयस्त्वं चाराग्रमात्रस्य जीवस्यावकल्पते॥ नापरिच्छिन्नस्य ब्रह्मणः ननु ज्यायान्पृथिव्या इत्याद्यपि परिच्छिन्नेऽवकल्प
त इत्यत्र ब्रूमो न तावदणीयस्त्वं ज्यायस्त्वं चोभयमेकस्मिन्समाश्रयितुं शक्यं विरोधादन्यतराश्रयणे च प्रथमश्रुतत्वादणी
यस्त्वं युक्तमाश्रयितुं ज्यायस्त्वं तु ब्रह्मभावापेक्षया भविष्यतीति। निश्चिते च जीवविषयत्वे यदन्ते ब्रह्मसंकीर्तनमेतद्ब्रह्मेति तदपि प्रकृ
तपरामर्शार्थत्वाज्जीवविषयमेव। तस्मान्मनोमयत्वादिभिर्धर्मैर्जीव उपास्य इत्येवं प्राप्ते ब्रूमः। परमेव ब्रह्मेह मनोमयत्वादि २
भिर्धर्मैरुपास्यं कुतः॥ ॥

मो॰ प्रियस्य सर्वकामा भोग्या यस्य सर्वगंधः सर्वरस इत्यादिश्रुत्यर्थः॥ आराग्रमात्रस्येति॥ तोत्रप्रोतायः शलाकाग्रपरिमाणस्येत्यर्थः॥

सर्वत्रप्रसिद्धब्रह्मलक्षणस्यात्रोपास्यत्वेनोपदेशान्न जीवउपास्य इति सूत्रार्थमाह । सर्वत्रेति । यत्र फलं तोऽप्येतत्र पूर्वोत्तरस्य सिद्धिः
फलमितिमंतव्यं यद्यपि निराकांक्षब्रह्मतयापि मनः प्रचुरमुपाधिरस्यप्राणः शरीरमस्येति समासांतर्गत सर्वनाम्नः सन्निहितविशे
ष्याकांक्षत्वात ब्रह्म संबध्यते । स्योनंतेसदनंकरोमीतिसंस्कारपात्रनस्यनिराकांक्षस्यापितस्मिन्सीदेतिसाकांक्षसतच्छब्देनपरामर्शद
र्शनादित्याह । अत्रोच्यत इति । स्योनं पात्रंते पुरोडाशस्येति श्रुत्यर्थः । जीवो दिविलिंगात्सन्निहित इत्यत आह । नीवस्त्विति । इदं हि लिंगद्वयं

सर्वत्रप्रसिद्धोपदेशात् सर्वे वेदांतेषु प्रसिद्धं ब्रह्मलक्षणस्यालंबनं जगत्कारणमिह सर्वं खल्विदं ब्रह्मेति वाक्योपक्रमे श्रुतं तत
देवमनोमयत्वादिधर्मविशिष्टं उपदिश्यत इति युक्तमेवं च प्रकृतहानाप्रकृतप्रक्रियेन भविष्यतः । ननु वाक्योपक्रमे शमविधिवि
वक्षया ब्रह्मनिर्दिष्टं न स्वविवक्षयेत्युक्तं । अत्रोच्यते । यद्यपि शमविधिविवक्षया ब्रह्मनिर्दिष्टं तथापि मनोमयत्वादिषु पादिश्यमानेषु
तदेव सन्निहितं भवति । जीवस्तु न संनिहितो न च स्वशब्देनोपात्त इति वैषम्यं ॥ विवक्षितगुणोपपत्तेश्च ॥ वक्तुमिष्टा विवक्षिताः । यद्यप्य
पौरुषेये वेदे वक्तुरभावान्नेच्छार्थः संभवति । तथाप्युपादानेन फलेनोपचर्यते । लोकेपि पच्छब्दाभिहितमुपादेयं भवति तद्विवक्षित
मित्युच्यते । यत्तु पादेयं तदविवक्षितमिति । तद्वद्वेदेप्युपादेयत्वेनाभिहितं विवक्षितं भवतीतरदविवक्षितं ॥ २ ॥ ॥ २ ॥

लोकसिद्धं जीवं न संनिधापयति । दुःखित्वउपास्यस्योपास्यत्वास्फलाभावाच्च । अतो विशिष्टजिज्ञासायेन सर्वमभिलषितमानंदरूपं ब्रह्मैवोपास
नाकिंपानुबंधीतिभावः । किं चतुल्यपदश्रुत्या लिंगं बाधत इत्याह । न चेति । अस्मत्तया कासाशुरुहीनं फलवत्त्वकरणेविफलेलिंगाद्बलीय इति
समुदायार्थः । वस्तुतो विवक्षार्थाः फलमुपादानं स्वीकारः स च प्रकृते श्रुत्यैव सुलेति विवक्षोपचार इत्याह । तथाप्युपादानेनेति ॥ ६ ॥

स.भा नन्विदं ग्राह्यमिदं साज्यमिति धीर्विधिस्वाधीनैव देवकृतःस्यादित्यत आह। उपादानानुपादाने त्विति॥ तात्पर्यं नाम फलवदर्थप्रतीत्यनुकू
३ लेच्छा धर्मः उपक्रमादिना तस्य लाभाभावयोरवगम इत्यर्थः। तदिहेति। तत्तस्मात्सर्वमित्यादिपदार्थः। सर्वात्मत्वे प्रमाणमाह। तथा चेतिजी विष २
उपादानानुपादाने तु वेदस्य तात्पर्यातात्पर्याभ्यामवगम्येते। तदिह ये विवक्षिता गुणाः उपासनायामुपादेयत्वेनोपदिष्टाः सत्य
संकल्पप्रभृतयः। ते परस्मिन्ब्रह्मण्युपपद्यन्ते। सत्यसंकल्पत्वं हि सृष्टिस्थितिसंहारेष्वप्रतिहतशक्तित्वात्परमात्मन एवावकल्पते।
परमात्मगुणत्वेन च य आत्मापहतपाप्मेत्यत्र सत्यकामः सत्यसंकल्प इति श्रुतमाकाशात्मेत्याकाशवदात्मास्येत्यर्थः। सर्वगत
त्वादिभिर्धर्मैः संभवत्याकाशेन साम्यं ब्रह्मणो ज्यायान्पृथिव्या इत्यादिना चैतदेव दर्शयति। यदप्याकाश आत्मा यस्येति व्याख्यायते
। तदपि संभवति सर्वजगत्कारणस्य सर्वात्मनो ब्रह्मण आकाशात्मत्वमत एव सर्वकर्मेत्यादि। एवमिहोपास्यतया विवक्षिता गुणा ब्र
ह्मण्युपपद्यन्ते। यत्तूक्तं मनोमयः प्राणशरीर इति जीवलिंगं न तद्ब्रह्मण्युपपद्यत इति। तदपि ब्रह्मण्युपपद्यत इति ब्रूमः। सर्वात्मत्वा
द्धि ब्रह्मणो जीवसंबन्धीनि मनोमयत्वादीनि ब्रह्मसंबन्धीनि भवन्ति। तथा च ब्रह्मविषये श्रुतिस्मृती भवतः। त्वं स्त्री त्वं पुमानसि त्वं कुमार उ
त वा कुमारी त्वं जीर्णो दण्डेन वंचसि त्वं जातो भवसि विश्वतोमुख इति। सर्वतःपाणिपादं तत्सर्वतोऽक्षिशिरोमुखं। सर्वतःश्रुतिमल्लोके सर्वमावृ
त्य तिष्ठतीति च। अप्राणो ह्यमनाः शुभ्र इति श्रुतिः शुद्धब्रह्मविषया। इयं तु मनोमयः प्राणशरीर इति सगुणब्रह्मविषयेति विशेषः। अतो वि २
वक्षितगुणोपपत्तेः परमेव ब्रह्मेहोपास्यत्वेनोपदिष्टमिति गम्यते॥ २ एवं स्तुतिविशेषाद् दण्डेन वंचतीति गच्छति सोऽपि त्वमेव यो जातो बालः सत्त्व
मेव। सर्वतः सर्वासु दिक्षु श्रुतमः श्रोत्रमस्येति सर्वतःश्रुतिमत सर्वज्ञं तेनां प्रोक्तः प्राणापानवदस्येति सकोमलोक्तिः॥ ॥ ॥

ननु जीवधर्मोऽप्येद्रूपत्वाभिप्रायोऽयं न तर्हि ब्रह्मधर्मा एव ते जीवे किमिति निषेध्यंते तत्राह। अनुपपत्तेरिति। स एतं मा चेष्टेऽ एवं वैशेति। सर्वात्मत्वा
दिरूपत्वापः कल्पितस्य धर्मो अधिष्ठाने संबध्यते। न त्वधिष्ठानधर्माः कल्पित इति भावः। वागेव वाकः सोऽस्यास्तीति वाकी। न वाकी अ

अनुपपत्तेस्तु न शारीरः॥ पूर्वेण सूत्रेण ब्रह्मणि विवक्षितानां गुणानामुपपत्तिरुक्ता। अनेन शारीरे तेषामनुपपत्तिरुच्यते। तुश
ब्दोऽवधारणार्थः। ब्रह्मैवोक्तेन न्यायेन मनोमयत्वादिगुणं। न तु शारीरो जीवो मनोमयत्वादिगुणः। यत्कारणं सत्यसंकल्प आकाशा
त्मावाक्यनादरो ज्यायान्पृथिव्या इति चैवंजातीयका गुणा न शारीरे आंजस्येनोपपद्यंते। शारीर इति शरीरे भव इत्यर्थः। नन्वी
श्वरोऽपि शरीरे भवति। सत्यं। शरीरे भवति। न तु शरीर एव भवति। ज्यायान्पृथिव्या ज्यायानंतरिक्षादाकाशवत्सर्वगतश्च नित्य
इति च व्यापित्वश्रवणात्॥ जीवस्तु शरीर एव भवति तस्य भोगाधिष्ठानाच्छरीरादन्यत्र वृत्त्यभावात्। कर्मकर्तृव्यपदेशाच्च॥ इत
श्च न शारीरो मनोमयत्वादिगुणः। यस्मात्कर्मकर्तृव्यपदेशो भवति। एतमितः प्रेत्याभिसंभवितास्मीति। एतमिति प्रकृतं मनो
मयत्वादिगुणमुपास्यमात्मानं कर्मत्वेन प्राप्यत्वेन व्यपदिशति। अभिसंभवितास्मीति शारीरमुपासकं कर्तृत्वेन प्रापकत्वेना
भिसंभवितास्मीति प्राप्तास्मीत्यर्थः। न च सति संभवे एकस्य कर्मकर्तृव्यपदेशो युक्तः॥ ॥ ॥ ॥

वाकी अनिंद्रिय इत्यर्थः। कुत्राप्यादरः कामो यस्य नास्तीत्यनादरः। नित्यतृप्त इत्यर्थः। ज्यायस्त्वाद्यनुपपत्तौ शारीर इति परिच्छेदो हेतुः
स्फोरितः। ननु जीवस्येवेश्वरस्य साह। समभिसादिना प्राप्यकत्वेन व्यपदिशतीति संबंधः॥ ॥ ॥

ब्र॰भा॰१ कर्मकर्तृव्यपदेशपरस्माद्वाक्यान्तरमाह। तयोपास्येति। एककार्यत्वं प्रकरणस्य समानत्वं। अन्तरालस्थितिविभक्तिलोपश्चाद्वन्द्वः। शब्दविशे
४ षोविभक्तिभेदः। तस्मात्तयोरपि भेद इति सूत्रार्थः। स्मृतौ तु हृदिस्थस्य जीवाद्भेदोक्तेरपि हृदिस्थो मनोमय ईश्वर इत्याह। स्मृतेश्चेति। म

तयोरुपास्योपासकभावोऽपि भेदाधिष्ठान एव। तस्मादपि न शारीरो मनोमयत्वादिविशिष्टः॥ शब्दविशेषात्। इतश्च शारीरादन्यो मनोमयत्वादिगुणः यस्माच्छब्दविशेषो भवति। समानप्रकरणे श्रुत्यन्तरे। यथा व्रीहिर्वा यवो वा श्यामाको वा श्यामाकतण्डुलो वैवमयमन्तरात्मन् पुरुषो हिरण्मय इति शारीरस्यात्मनोऽन्यः शब्दोऽभिधायकः सप्तम्यन्तोऽन्तरात्मन्निति। तस्माद्विशिष्टोऽयमः प्रथमान्तः पुरुषशब्दो मनोमयत्वादिविशिष्टस्यात्मनोऽभिधायकः। तस्मात्तयोर्भेदोऽधिगम्यते॥ स्मृतेश्च॥ स्मृतिश्च शारीरपरमात्मनोर्भेदं दर्शयति ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति। भ्रामयन्सर्वभूतानि यन्त्रारूढानि मायया। इत्येवमाद्या। अत्राह। कः पुनरयं शारीरो नाम परमात्मनोऽन्यो यः प्रतिषिध्यते। अनुपपन्नस्तु न शारीर इत्यादिना। श्रुतिस्तु नान्योऽतोऽस्ति द्रष्टा नान्योऽतोऽस्ति श्रोता इत्येवंजातीयका परमात्मनोऽन्यमात्मानं वारयति। तथा स्मृतिरपि। क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत इत्येवंजातीयका इति। अत्रोच्यते॥ ६॥

रत्नप्रभा

तानि जीवान्यं चं शारीरं। अत्र सूत्रकृतात्मभेदकृत इति भ्रान्तिनिरासापेक्षसाधिकरणेनिरस्तमपि बोधसुदृढ्यनिरस्यति। अत्रत्या ४

तदुक्तरीत्या वस्तुत एकत्वमेव भेदस्तु कल्पितः स त्वत्रैवानुपपद्यत इत्याह। सत्यमिति। अर्भकमोको यस्य सोऽर्भकौकाः तस्य भावस्तत्त्वं तस्मा
दार्थिकमल्पत्वं अणीयानित्यल्पत्वव्यपदेशाच्च नापि श्रुतिविरोध इत्याह॥ स्वशब्देनेति॥ नायं देशः स्वतः संगत्यविरोधोऽस्ति। ननु वदिति। कथमपि ब्रह्म

स एव चैतन्यस्वरूप आत्मा देहेन्द्रियमनोबुद्ध्युपाधिभिः परिच्छिद्यमानो बालैः शारीर इत्युपचर्यते। यथा घटकरकाद्युपाधिवशादपरि
च्छिन्नमपि नभः परिच्छिन्नवदवभासते तद्वत् तदपेक्षया चकर्मकर्तृत्वादिभेदव्यवहारो न विरुध्यते। प्राक् तत्त्वमसीत्यात्मैकत्वो
पदेशग्रहणात्। तावद्धि तेनात्मनैकत्वेन धर्माधर्मादिसर्वव्यवहारपरिसमाप्तिरेवास्मात्॥ अर्भकौकस्त्वात् तद्व्यपदेशाच्च नेति चेन्न नि
चाय्यत्वादेवं व्योमवच्च॥ अर्भकमल्पमोको नीडं स्थानमात्मनां तद्व्यपदेश इति परिच्छिन्नाभिप्रायेण स्यात्। स्वशब्देन चाणीमान् व्रीहेर्वा यवा
द्वेत्यणीयस्त्वव्यपदेशात्। शारीरश्चाङ्गुष्ठमात्रो जीव इहोपदिश्यते न सर्वगतः परमात्मेति। यदुक्तं तत्परिहर्तव्यं। अत्रोच्यते। नायं
दोषः न तावत्परिच्छिन्नदेशस्य सर्वगतत्वव्यपदेशः कथमप्युपपद्यते। सर्वगतस्य तु सर्वदेशेषु विद्यमानत्वात् परिच्छिन्नदेशव्य
पदेशोऽपि कयाचिदपेक्षया संभवति॥

आकापेक्षयापीत्यर्थः। परिच्छेदत्यागं विना ब्रह्मत्वासंभवात् तत्त्यागे च ब्रह्मण एवोपास्यत्वमायातीति भावः॥ ॥ ॥ ॥

सू॰भा॰ विभोः परिच्छेदोक्तौ दृष्टान्तमाह। यथा समस्तेति। सर्वेश्वरस्यायोध्यायां स्थित्यपेक्षया परिच्छेदोक्तिवद्धृदि ध्येयत्वेन तद्योक्तिरित्यर्थः।
५ ननु किमिति हृदयमेव ब्रह्मोपलब्धिस्थानमुच्यते तत्राह। तत्रेति। हृदये परमात्मनो बुद्धिवृत्तिर्ग्राहिका भवति। अत ईश्वराभिव्यक्तिस्थानत्वात्तद्धृदि स्थिति

यथा समस्तवसुधाधिपतिरपि हि सन्नयोध्याधिपतिः इति व्यपदिश्यते। कथं पुनरेकस्य सर्वगतस्य सत ईश्वरस्य अर्भकौकस्त्वमणी
यस्त्वं च व्यपदिश्यत इति। निचाय्यत्वादेवमिति ब्रूमः। एवमणीयस्त्वादिगुणगणोपेत ईश्वरस्तत्र हृदयपुण्डरीके निचाय्यो द्रष्टव्य उ
पदिश्यते। यथा शालग्रामे हरिस्तत्रास्य बुद्धिविज्ञानं ग्राहकं। सर्वगतोपीश्वरस्तत्रोपास्यमानः प्रसीदति। व्योमवच्चैतद्द
ष्टव्यं। यथा सर्वगतमपि सद्व्योम सूचीपाशाद्यपेक्षयाऽर्भकौकोऽणीयश्च व्यपदिश्यते। एवं ब्रह्मापि। तदेवं निचाय्यत्वापेक्षं ब्रह्म
णोऽर्भकौकस्त्वमणीयस्त्वं च न पारमार्थिकं। तत्र यदाशंक्यते हृदयायतनत्वात् ब्रह्मणो हृदयायतनानां च प्रतिशरीरं भिन्नत्वात् भिन्नायत
नानां च शुकादीनामनेकत्वसावयवत्वानित्यत्वादिदोषदर्शनात् ब्रह्मणोपि तत्प्रसङ्ग इति तदपि परिहृतं भवति। संभोगप्रा
प्तिरिति चेन्न वैशेष्यात्॥ ५

र्थः॥ व्योमदृष्टान्तासिनाल्पिकाल्पनापि काचित्छिन्नेत्याह। तत्र यदाशंक्यत इत्यादिनाभिन्नायतनत्वेपि व्योम्नः सत्त्वभेदाद्यभावादिति भावः॥

ब्रह्मणो हार्दत्वेनिष्टसंभोगापत्तेर्जीववद्वा देहपातस्येति शंकां व्याचष्टे। व्योमवदिति। ब्रह्मणोऽस्मात् हार्दत्वे सति चेतनत्वाज्जीववन्नि
त्यात्जीववदित्युक्तं निरस्यति। न वैशेष्यादिति। धर्माधर्मवत्त्वमुपाधिरित्यर्थः॥ अयमेव विशेषो वैशेष्यं तस्मात् व्यंजयत्यपः। विशेषप्राप्ति

व्योमवत्सर्वगतस्य ब्रह्मणः सर्वप्राणिहृदयसंबंधाच्चिद्रूपत्वाच्च शारीरादविशिष्टत्वात्सुखदुःखादिसंभोगोऽप्यविशिष्टः प्रसज्येत।
एकत्वाच्च न हि परस्मादात्मनोऽन्यः कश्चिदात्मा संसारी विद्यते। नान्योऽतोऽस्ति विज्ञातेत्यादिश्रुतिभ्यः तस्मात्परस्यैव संसारसंभोगप्राप्तिरि
ति चेत् न वैशेष्यात्। न तावत्सर्वप्राणिहृदयसंबंधाच्छारीरवत् ब्रह्मणः संभोगप्रसंगो वैशेष्यात्। विशेषो हि भवति शारीरपर
मेश्वरयोः एकः कर्ता भोक्ता धर्माधर्मसाधनः सुखदुःखादिमांश्च। एकस्तद्विपरीतोऽपहतपाप्मत्वादिगुणः। एतस्मादनयोर्विशेषा
देकस्य भोगो नेतरस्य। यदि च सन्निधानमात्रेण वस्तुशक्तिमनाश्रित्य कार्यसंबंधोऽभ्युपगम्येत आकाशादीनामपि दाहादिप्रसंगः। सर्वगता
नेकात्मवादिनामपि समावेतौ चोद्यपरिहारौ। यदप्येकत्वात् ब्रह्मण आत्मांतराभावात् शारीरस्य भोगेन ब्रह्मणो भोगप्रसंगः इत्यत्र वदा
मः। इदं तावद्देवानांप्रियः प्रष्टव्यः कथमयं त्वयात्मांतराभावोऽध्यवसित इति। तत्त्वमस्यहं ब्रह्मास्मि नान्योऽतोऽस्ति विज्ञातेत्यादिशास्त्रेभ्य
इति चेत्॥

उपाधेर्वा धर्मादेः साक्षाद्भोगफलहेतुत्वमतिशयः तस्मादिति सूत्रार्थः। किंच विभवो बहव आत्मान इति वादिनामेकस्मिन्देहे सर्वात्मनां भोगप्र
संगः स्वकर्मार्जित एव देहे भोग इति परिहारस्तु तुल्य इति न वयं पर्यनुयोज्या इत्याह। सर्वगतेति। वस्तुतस्तेषामेव भोगसांकर्यमिति वक्ष्यते॥

स॰ भा॰ ६

त्यैर

ब्रह्मणो जीवाद्भिन्नत्वं श्रुत्या निश्चितं तेन भोक्तृत्वानुमानेऽपजीवश्रुतिर्वा धर्मादपरा स्यादिमिति। अङ्गुष्ठमात्रं जरस्मात् रूपाः कामपतेनां
गानीति सोपमं धजरतीयन्यायः स चात्र न युक्तः। न तु भेदमङ्गीकृत्य भोक्तृत्वं निर्दिष्टं कुत्र श्रुत्यैवाभेदोक्तेः भेदे भोक्तृत्वात् रागादित्याह। शास्त्रं चे
ति। नन्वेकत्वमपास्तं स्यात्तत गृहीतं यन्नैकपजीव्यबाधः स्यात्तु किन्तु त्वदुक्ता गृहीतमिसाद्वैकाविं वसति येयमोः कल्पितभेदेन भोक्तृत्वा भोक्तृ
त्वव्यवस्थोपपत्तेर प्रयोजको हेतुरित्याह। स्वयमगृहीतमित्यादिना। कल्पितासंगित्वमधिष्ठानस्य वैशेष्यान्निस्यास्ति ज्ञेयेऽपि सत्त्वं योऽस्ति। न
पृथग्जास्त्रं तत् हिंसा स्त्रीमोक्षः प्रतिपत्तव्यो न तत्राहं जरतीयं लभ्यं। शास्त्रेचित्तत्वमसील्य पहतपाप्मत्वादिविशेषणां ब्रह्मशारीरस्यात्म
त्वेनोपदिष्टत्वात् शारीरस्यैव तावदुपभोक्तृत्वं वारयति। कुतस्तदुपभोगेन ब्रह्मणाऽप्युपभोगप्रसंगः। अथ गृहीतं शारीरस्य ब्रह्मणैकत्वं
तदा मिथ्याज्ञाननिमित्तः शारीरस्योपभोगो न तेन परमार्थरूपस्य ब्रह्मणः संस्पर्शो नहि बालैस्तलमलिनतादिभिर्व्योम्नि विकल्प्य
मानैस्तलमलिनतादिविशिष्टमेव परमार्थतो व्योम भवति। तदाह। न वैशेष्यादिति नैकत्वेऽपि शारीरस्योपभोगेन ब्रह्मणाऽप्युपभोगप्रसं
गो वैशेष्यात्। विशेषो हि भवति मिथ्याज्ञानसम्यक्ज्ञानयोः मिथ्याज्ञानकल्पितउपभोगः सम्यक्ज्ञानदृष्टमेकत्वं। न च मिथ्याज्ञान
कल्पितेनोपभोगेन सम्यक्ज्ञानदृष्टं वस्तु संस्पृश्यते तस्मान्नोपभोगगन्धोऽपि शक्य ईश्वरस्य कल्पयितुं॥ अत्ता चराचरग्रहणात्॥ कठ
वल्लीषु पठ्यते। यस्य ब्रह्म च क्षत्रं चोभे भवत ओदनः। मृत्युर्यस्योपसेचनं क इत्था वेद यत्र स इत्यत्र ईश्वरस्य कल्पयितुं॥ अत्ता चराचरग्रह ६
णात् इति। अत्र कश्चिदोदनोपसेचनसूचितोऽत्ता प्रतीयते। तत्राग्निर्जीवः स्यात् उत जीवोऽथवा परमात्मेति संशयः॥ ॥
होहेति। ब्रह्मणो हाईत्वबाधकस्य भोक्तृत्वशङ्कोऽस्मिन्विषये वाक्यं ब्रह्मण्येवोपास्ये समन्वितमिति सिद्धं॥ अत्ता चराचरग्रहणात् यस्य ब्रह्म च क्षत्रं चादि
जगदोदनो मृत्युः सर्वप्राणिमारकोऽपि यस्योपसेचनमोदनसंस्कारकघृतस्थानीयः स अत्ता यत्र यस्मिन्निर्विकल्पे स्वरूपे वर्तते तत्कोऽहं विवेदेत्यर्थः
इत्थं इत्थं ईश्वरस्याप्यधिष्ठानभूतं को वेद चित्तशुद्ध्याद्युपायं विना कोऽपि न जानातीत्यर्थः॥

संशयबीजमाह। विशेषेति। सत्वमग्निंप्रब्रूहीत्यग्नेः। येयंप्रेते विचिकित्सेति जीवस्य। अन्यत्र धर्मादिति ब्रह्मणः प्रश्नः। लोकादिमग्निं तमुवाचे
त्यग्नेः। हंत त इदं प्रवक्ष्यामीति तयोः प्रतिवचनमुपलभ्यत इत्यर्थः। एवं ब्रह्मणो भोक्तृत्वेनास्तीत्युक्तं तदुपजीव्य पूर्वपक्षयति। किं तावदिति।
अग्निप्रकरणमतीतमित्यभि[illegible]ाहे जीवो वेति। पूर्वपक्षे जीवोपास्तिः सिद्धांते निर्विशेषब्रह्मज्ञानमिति फलभेदः। ओदनशब्दो भोग्यवाचीति
विशेषानवधारणात्। त्रयाणामेवाग्निजीवपरमात्मनामस्मिन्ग्रंथे प्रश्नोपन्यासोपलंभेः। किं तावत्प्राप्तं अग्निरत्तेति। कुतोऽग्निरन्नाद
इति श्रुतिप्रसिद्धिभ्यां जीवो वा। तस्य भोक्तृत्वात्। पिप्पलं स्वाद्वत्तीति दर्शनात्। न परमात्मा। अनश्नन्नन्योऽभिचाकशीतीति दर्शनादित्येवं
प्राप्ते ब्रूमः। अत्ता त्र परमात्मा भवितुमर्हति। कुतः चराचरग्रहणात्। चराचरं हि स्थावरजंगमं मृत्यूपसेचनमिहाद्यत्वेन प्रतीयते। तादृ
शस्य चाद्यस्य न परमात्मनोऽन्यः कार्त्स्न्येनात्ता संभवति। परमात्मा तु विकारजातमुपसंहरन्सर्वमत्तीत्युपपद्यते। नन्विह चराचरग्रहणं
नोपलभ्यते। कथं सिद्धवच्चराचरग्रहणं हेतुत्वेनोपादीयते। नैष दोषः। मृत्यूपसेचनत्वेन सर्वस्य प्राणिनिकायस्य प्रतीयमानत्वात् ब्रह्म
क्षत्रयोश्च प्राधान्यात्प्रदर्शनार्थत्वोपपत्तेः। यत्तु परमात्मनोऽपि नात्तृत्वं संभवति अनश्नन्नन्योऽभिचाकशीतीति दर्शनादिति। अत्रोच्यते।
कर्मफलभोगस्य प्रतिषेधकमेतद्दर्शनं। तस्य सन्निहितत्वात्। न विकारसंहारस्य प्रतिषेधकं सर्ववेदांतेषु सृष्टिस्थितिसंहारकारणत्वे
न ब्रह्मणः प्रसिद्धत्वात्। तस्मात्परमात्मैवेहात्ता भवितुमर्हति। प्रकरणाच्च। इतश्च परमात्मैवेहात्ता भवितुमर्हति। यत्कारणं प्रकरणमि
दं परमात्मनः। न जायते म्रियते वा विपश्चिदित्यादि प्रकृतं ग्रहणं चैतस्य क इत्था वेद यत्र स इति च दुर्विज्ञानत्वं परमात्मलिंगं॥ ॥
र्वपक्षः। सिद्धांतं तु ब्रह्म स्वशब्दे हे रूपस्थापितकार्यमात्रे गौणः ओदनशब्दः। गुणश्चात्र मृत्यूपसेचनपदेन सन्निधापितं प्रसिद्धौदनग
तं विनाश्यत्वं गम्यते भोग्यत्वस्य सन्निहितगुणाग्रहित्वात् तथा च सर्वस्य विनाश्यत्वेन भानान्निंगात्वेऽश्च सत्ते साह। नैष इति। तस्मात्संनिहितता

सू॰भा॰
७

अत्तृवाक्यानंतरवाक्यस्यापि तत्रैवात्मनि समन्वयमाह॥ गुहामिति। ऋतमवश्यंभावि कर्मफलं पिबंतौ भुंजानौ सुकृतस्य कर्मणो लोके कार्ये देहे॥ परस्य ब्रह्मणोऽर्धं स्थानमर्हतीति परार्धं हृदयं परं श्रेष्ठं तस्मिन्नपि गुहा नभोरूपा बुद्धिरूपा वा तां प्रविश्य स्थितौ छायातपवत् मिथो विरुद्धौ तौ च ब्रह्मविदः कर्मिणश्च वदंति। त्रिर्नाचिकेतोऽग्निश्चितो यैस्ते त्रिणाचिकेताः। तेऽपि वदंतीत्यर्थः। नाचिकेतवाक्यनामध्ययनं तदर्थज्ञानं तद्

गुहां प्रविष्टावात्मानौ हि तद्दर्शनात्॥ कठवल्लीष्वेव पठ्यते। ऋतं पिबंतौ सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्धे छायातपौ ब्रह्मविदो वदंति पंचाग्नयो ये च त्रिणाचिकेता इति। तत्र संशयः। किमिह बुद्धिजीवौ निर्दिष्टावुत जीवपरमात्मानाविति। यदि बुद्धिजीवौ ततो बुद्धिप्रधानात् कार्यकरणसंघातात् विलक्षणो जीवः प्रतिपादितो भवति। तदपीह प्रतिपादयितव्यं। येयं प्रेते विचिकित्सा मनुष्ये। अस्तीत्येके नायमस्तीति चैके। एतद्विद्यामनुशिष्टस्त्वयाहं वराणामेष वरस्तृतीय इति पृष्टत्वात्। अथ जीवपरमात्मानौ ततो जीवाद्विलक्षणः परमात्मा प्रतिपादितो भवति। तदपीह प्रतिपादयितव्यं। अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात् कृताकृतात्। अन्यत्र भूताच्च भव्याच्च यत्तत्पश्यसि तद्वदेति पृष्टत्वात्। अत्राहाक्षेप्ता। उभावप्येतौ पक्षौ न संभवतः। कस्मात्। ऋतपानं कर्मफलोपभोगः। सुकृतस्य लोक इति लिंगात्। तच्चेतनस्य क्षेत्रज्ञस्य संभवति। नाचेतनायाः बुद्धेः। पिबंताविति च द्विवचनेन द्वयोः पानं दर्शयति श्रुतिः। अतो बुद्धिक्षेत्रज्ञपक्षस्तावन्न संभवति। अत एव क्षेत्रज्ञपरमात्मपक्षोऽपि न संभवति। चेतनेऽपि परमात्मनि ऋतपानासंभवात्। अनश्नन्नन्यो अभिचाकशीतीति मंत्रवर्णादिति॥

उक्तानं चेति त्रितयं बोध्यं। बुध्यवच्छिन्नजीवस्य परमात्मनः स्वप्रकृतत्वात् संशयमाह। तत्रेति। उभयोर्जीवपरमात्मनोः फलं पक्षयमेवाह। यदीत्यादिना। तदपि जीवस्य बुद्धिवैलक्षण्यमपीत्यर्थः। मनुष्ये प्रेते मृते सति येयं विचिकित्सा संशयः परलोकभोक्ता अस्तीत्येके नास्तीत्यन्ये तन्निरूपणाय अनुशिष्टोऽहमेतदात्मतत्त्वं जानीयामित्यर्थः। तदपि परमात्मस्वरूपमपीत्यर्थः। उभयोर्भोक्तृत्वायोगेन संशयमाक्षिपति अत्राहेति॥ ७

छत्रिपदेन गंतार इव पिबत्पदेनाजहल्लक्षणया प्रविष्टावुच्येते इत्याह। अत्रोच्यत इति। पानकर्तृत्वाभिप्रायेण पानानुकूलत्वं वा लक्ष्यमि
त्याह। पक्षेति। नियन्तृत्वभाविकृत्निमित्तरूपमनुकूलत्वं कर्तृकारयित्रोः साधारणम्। यः कारयति स करोत्येवेति न्यायादित्यर्थः। अत्र पक्षे

अत्रोच्यते। नैष दोषः। छत्रिणो गच्छंतीत्येकेनापि छत्रिणा बहूनां छत्रित्वोपचारदर्शनात्। एवमेकेनापि पिबता द्वौ पिबंतावुच्येतां
यद्वा जीवस्तावत् पिबति ईश्वरस्तु पाययति पाययन्नपि पिबतीत्युच्यते। पाचयितर्यपि पक्तृत्वप्रसिद्धिदर्शनात्। बुद्धिक्षेत्रज्ञपरि
ग्रहो वा संभवति। करणे कर्तृत्वोपचारात्। एधांसि पचंतीति प्रयोगदर्शनात्। न चाध्यात्माधिकारेऽन्यौ कौचिदृतं पिबंतौ संभव
तः। तस्माद्बुद्धिजीवौ स्यातां जीवपरमात्मानौ वेति संशयः॥

तिर्मुख्यार्थासम्भवेन लक्षणेति श्वास्तु कृतिः प्रसज्यापीति मुख्यः। पक्षे साजहल्लक्षणया पाययन्तं लक्षयितुमित्याह। द्वयं पक्षे पिबंताविति कर्तृ
त्वाचित्रात् असम्भवेन बुद्धिजीवसाधारणं कारकत्वं लक्षयतीत्याह। बुद्धीति। एधांसि काष्ठानि पचंतीत्याख्यातेन कारकत्वं लक्ष्यं कृति
स्तु मुख्यैवेति भावः। मुख्यपानासंभवे प्रसिद्धपक्षद्वयासम्भवात् इत्याह। न चेति॥

ब्रह्मलक्ष्यत्वपदस्य सन्निहितमङ्गपदात् अनित्यवस्तुपरत्ववदिहापि पिबत्पदस्य सन्निहितगुहापदाद्बुद्धिजीवपरतेति दृष्टांतेन प्र

किं तावत्प्राप्तं। बुद्धिक्षेत्रज्ञाविति। कुतः। गुहां प्रविष्टाविति विशेषणात्। यदि शरीरं गुहा यदि वा हृदयं उभयथापि बुद्धिक्षेत्र
ज्ञौ गुहां प्रविष्टावुपपद्येते। न च सति संभवे सर्वगतस्य ब्रह्मणो विशिष्टदेशत्वं युक्तं कल्पयितुं। सुकृतस्य लोक इति च कर्मगोच
रानतिक्रमं दर्शयति। परमात्मा तु न सुकृतस्य वा दुष्कृतस्य वा गोचरे वर्तते। न कर्मणा वर्द्धते नो कनीयानिति श्रुतेः। छायात
पाविति च चेतनाचेतनयोर्निर्देश उपपद्यते। छायातपवत्परस्परविलक्षणत्वात्। तस्माद्बुद्धिक्षेत्रज्ञाविहोच्येयातामिति एवं प्रा
प्ते ब्रूमः। विज्ञानात्मपरमात्मानाविहोच्येयातां। कस्मात् आत्मानौ हि तावुभावपि चेतनौ समानस्वभावौ॥ ॥

वेपस्यपतिर्विज्ञातवदिति गोचरः फलं॥ ॥ ॥ ॥ ॥ ॥ ॥

एकस्मिन् जातिमति कृते सजातीयमेव द्वितीयं प्राप्त्यं। व्यक्तिमात्रग्रहे लाघवात्। न विजातीयं जातिमत्तु उभयकल्पनागौरवात्।
न चात्मत्वकारकत्वेन सजातीया बुद्धिरेव जीवस्य द्वितीयेति वाच्यं। चेतनत्वस्य जीवस्वभावस्याकारकत्वादंतरंगत्वात्। तथा च लोके द्विती
यस्यां तत्र जातिमत्त्वदर्शनात् जीवस्य द्वितीयमन्वेष्टव्यं तत एवेति सूत्रार्थमाह॥ संख्याश्रवणे चेति। गुहायां बुद्धौ स्थितं गह्वरेऽनेकानर्थसंकु

संख्याश्रवणे च समानस्वभावेष्वेव लोके प्रतीतिर्दृश्यते। अस्य गोर्द्वितीयोऽन्वेष्टव्य इत्युक्ते गौरेव द्वितीयोऽन्विष्यते नाश्वः पुरुषो
वा। तदिह ऋतपानेन लिंगेन निश्चिते विज्ञानात्मनि द्वितीयेऽन्विष्यमाणे समानस्वभावश्चेतनः परमात्मैव प्रतीयते। ननूक्तं गु
हाहितत्वदर्शनान्न परमात्मा प्रत्येतव्य इति। गुहाहितत्वदर्शनादेव परमात्मा प्रत्येतव्य इति वदामः। गुहाहितत्वं तु श्रुतिस्मृ
तिष्वसकृत् परमात्मन एव दृश्यते। गुहाहितं गह्वरेष्ठं पुराणं। यो वेद निहितं गुहायां परमे व्योमन्। आत्मानमन्विच्छ गुहां
प्रविष्टमित्याद्यासु सर्वगतस्यापि ब्रह्मण उपलब्ध्यर्थो देशविशेषोपदेशो न विरुध्यत इत्येतदप्युक्तमेव। सुकृतलोकवर्तित्वं तु छ
त्रित्ववदेकस्मिन्नपि वर्तमानमुभयोरविरुद्धं। छायातपावित्यप्यविरुद्धं। छायातपवत्परस्परविलक्षणत्वात् संसारित्वासंसारि
त्वयोरविद्याकृतत्वात् संसारित्वस्य पारमार्थिकत्वाच्चासंसारित्वस्य। तस्माद्विज्ञानात्मपरमात्मानौ गुहां प्रविष्टौ गृह्येते॥ कुत
श्च विज्ञानात्मपरमात्मानौ गृह्येते॥

ले देहे स्थितं पुराणमनादिपुरुषं विदित्वा हर्षशोकौ जहातीति परमे प्रकृष्टे व्योमन् हार्दाकाशे या गुहा बुद्धिः तस्यां निहितं ब्रह्म यो वेद सोऽश्नुते
सर्वान्कामानित्यन्वयः। अन्विच्छ विचारयेत्यर्थः॥

विशेषणांगं तगं तमुत्तारादिकं लिंगमाह। विशेषणस्य चेति सः जीवो य पुनः संसारमार्गस्य परमं पारं किं तत् विष्णोः सर्वव्यापनशीलस्य परमात्म
नः परं स्वरूपमाप्नोतीत्यर्थः॥ दुर्दर्शं दृशतीनं। तत्र हेतुर्दुर्दर्शमप्याद्यं तं मांस्यमनुप्रविष्टं प्रज्ञात् गुहाहितं गुहा हानाग हरेष्ठं स्वदेहगतमात्मा
नमध्यात्मयोगः स्थूलसूक्ष्मकारणदेहत्रयं कर्मेण प्रत्यगात्मनि चित्तसमाधानं तेनाधिगमो महायोगकजाव त्रिंतयाविदित्वेत्यर्थः। ऋतप

विशेषणस्य। विशेषणांश्च विज्ञानात्मपरमात्मनोरेव भवति। आत्मानं रथिनं विद्धि शरीरं रथमेव च इत्यादिनापेरणांपेन रथिरथा
दिरूपककल्पनया विज्ञानात्मानं रथिनं संसारमोक्षयोर्गन्तारं कल्पयति। सोऽध्वनः पारमाप्नोतीति। तद्विष्णोः परमं पदमिति परमा
त्मानं गंतव्यं कल्पयति। तथा तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणं। अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ
जहातीति पूर्वस्मिन्नपि ग्रन्थे मंतृमंतव्यत्वेनैतावेव विशेषितौ। प्रकरणं चेदं परमात्मनः। ब्रह्मविदो वदंतीति च वक्तृविशेषोपादाने
परमात्मपरिग्रहे घटते। तस्मादिह जीवपरमात्मानावुच्येयातां। एष एव न्यायो द्वा सुपर्णा सयुजा सखायेत्येवमादिष्वपि। न ह्यध्य
ध्यात्माधिकारात् न प्राकृतौ सुपर्णावुच्येते॥ तयोरन्यः पिप्पलं स्वाद्वत्तीति अदनलिंगाद्विज्ञानात्मा भवति। अनश्नन्नन्योऽभिचा
कशीतीत्यनश्नंश्चेतनत्वात् परमात्मा॥

अनंतरे जीवानुवादेन वाक्यार्थज्ञानात् पततस्त्रारणे ब्रह्मप्रतिपादयितुं स्वरूपं संहरति। तस्मादिहेति। उत्तरमन्त्रमवतारयति। एष इति। ह्वौ द्वौ छंद
सो द्विवचनस्याकारः। सुपर्णौ विवस्वते ... निपातकश्चावेनेति सयुजौ। सख्यापौ चेतनत्वेन तुल्यस्वभावौ। समानमेकं वृक्षं सं
हृदनयोप्यंकृरीरमाश्रित्य साक्षेत्तौ विस्रष्टः। गुहां प्रविष्टाविति पाश्वत्। एतावात्मानौ नदहि निं ग दर्शनादिसाह। तयोरन्य इति॥ ९

विशेषणार्थमाह। अनंतरे चेति। अनीशया स्वस्येश्वरत्वाप्रतीत्या देहे निमग्नः पुरुषो जीवः शोचति। तिमन्त्रपदार्थमाह। मुह्यमानइ
तिनष्टोहमिति भ्रांत इत्यर्थः। जुष्टं ध्यानादिना सेवितं यदा ध्यानपरिपाकदशायामीशमन्यं विशिष्टरूपाद्भिन्नं शोधितं स्वात्मत्वेन प्रत्यक्त्वेन
पश्यति तदास्य महिमानं स्वरूपमिति प्राप्नोतीव। ततो वीतशोको भवतीत्यर्थः। द्वा सुपर्णेति मंत्रं जीवेश्वरपरकं व्याख्यातं। अधुना

नद्र३

अनंतरे च मंत्रे तावेव द्रष्टृत्वभावेन विशिनष्टि। समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः। जुष्टं यदा पश्यत्यन्यमी
शमस्य महिमानमिति वीतशोक इति। अपर आह। द्वा सुपर्णेति नेयमृगस्याधिकरणस्य सिद्धांतं भजते। पैंगिरहस्यब्राह्मणेना
न्यथा व्याख्यातत्वात्। तयोरन्यः पिप्पलं स्वाद्वत्तीति सत्त्वमनश्नन्नन्योऽभिचाकशीतीत्यनश्नन्नन्योऽभिपश्यति ज्ञस्तावेतौ सत्त्वक्षे
त्रज्ञाविति। सत्त्वशब्दो जीवः क्षेत्रज्ञशब्दः परमात्मेति यदुच्यते। तन्न। सत्त्वक्षेत्रज्ञशब्दयोरंतःकरणशारीरपरतया प्रसिद्धत्वा
त्। तत्रैव च व्याख्यातत्वात्। तदेतत्सत्त्वं येन स्वप्नं पश्यत्यथ योऽयं शारीर उपद्रष्टा स क्षेत्रज्ञस्तावेतौ सत्त्वक्षेत्रज्ञौ इति। नाप्यस्याधिक
रणस्य पूर्वपक्षं भजते। न ह्यत्र शारीरः क्षेत्रज्ञः कर्तृत्वभोक्तृत्वादिना संसारधर्मेणोपेतो विवक्ष्यते। कथं तर्हि सर्वसंसारधर्मातीतो
ब्रह्मस्वभावश्चैतन्यमात्रस्वरूपोऽनश्नन्नन्योऽभिचाकशीतीत्यनश्नन्नन्योऽभिपश्यति ज्ञ इति वचनात्। तत्त्वमसि क्षेत्रज्ञं चापि
मां विद्धीत्यादिश्रुतिस्मृतिभ्यश्च ॥

कृत्वा चिंतामुद्भावयति। अपर इति। अन्यथा व्याख्यातत्वादिति। सत्त्वक्षेत्रज्ञपदयोर्जीवपरत्वेनेत्यर्थः। सत्त्वं बुद्धिरिति शंकते। सत्त्वशब्द इति। बुद्धिजीवोऽचेतन
र्वपक्षार्थः स्यादित्यत आह। नापीति। एवं पक्षार्थेन तदस्यात्पक्षत्रबुद्धिभिन्नः संसारी प्रतिपाद्यते। न ह्यत्र संसारी विवक्ष्यते। किं तु शोधित

सं॰ भा॰

१०

तावतामंत्रयमुख्यमात्रेण। एवमेव जीवस्य ब्रह्मत्वं तावदेव। न हि जीवो बुद्धिभिन्न इति विवेकमात्रेणोपसंहारो युक्तः। भेदज्ञानस्याप्रां
निवाहेतुफलत्वादेतिभावः। अविद्याविरुद्धपितिक्रिमाणाप्रत्यक्षार्थं नाध्वंसते तेन संपादयामि। ज्ञानाग्निनाशस्य एव यद्दग्धत्वादित्यर्थः। अविद्यानां
गच्छतीतितात्पर्यः। जीवस्य ब्रह्मत्वपरामि दंष्ट्रामसमितिपसेडंकृतेकथमिति। बुद्धेर्भोक्तृत्वौपाधिकतासर्वांतमनाज्ञपुर्षिं चिंतमात्मनः खेदनीप

तावतापविद्योपसंहारदर्शनमेवमेवावकल्पते। तावेतौ सत्वक्षेत्रज्ञौ। न ह वा एवंविदि किंचन रज आध्वंसत इत्यादि। कथं पु
नरस्मिन्पक्षेतपोरन्यः पिप्पलं स्वाद्वत्तीति ज्ञिसत्वमिसचेतनेमसत्वे भोक्तृत्वकृचनमिति। उच्यते। नेयं श्रुतिरचेतनस्य सत्वस्य भोक्
त्वं वक्ष्यामीति प्रवृत्ता। किं तर्हि चेतनस्य क्षेत्रज्ञस्य भोक्तृत्वं ब्रह्मस्वभावतां वक्ष्यामीति। तदर्थं सुखादिविक्रियावति सत्वे भोक्तृत्व
मध्यारोपयति। इदं हि कर्तृत्वं भोक्तृत्वं सत्वक्षेत्रज्ञयोरितरेतरस्वभावाविवेककृतं कल्प्यते परमार्थतस्तु नान्यतरस्यापि संभव
ति अचेतनत्वात्सत्वस्याविक्रियत्वाच्च क्षेत्रज्ञस्य। अविद्याप्रत्युपस्थापितस्वभावत्वाच्च सत्वस्य सुतरां न संभवति। तथा च श्रुतिः
। यत्र वा अन्यदिव स्यात्तत्रान्योन्यत्पश्येदित्यादिना स्वप्नदृष्टहस्त्यादिव्यवहारवदविद्याविषय एव कर्तृत्वादिव्यवहारं दर्शयति
। यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येदित्यादिना च विवेकिनः कर्तृत्वादिव्यवहाराभावं दर्शयति ॥ १२

मित्याह। उच्यत इति। तदर्थं ब्रह्मत्वबोधनार्थं भोक्तृत्वमुपाधिमस्तके निक्षिपतीत्यर्थः। वस्तुतो जीवस्याभोक्तृत्वे भोक्तृत्वधीः कथं मित्य
त आह। इदं हीति। चिज्जडात्मनोः कल्पितात्बुद्धेः सुखादिरूपेण परिणमनाद्बुध्यविवेकाच्चिदात्मनः सुखादिरूपक्रियावच्चैतन्यव
त्वं भोक्तृत्वं भातीत्यर्थः। भोक्तृत्वमाविद्यकं न वस्तु तत्त्वज्ञानमाह। तथा चेति। यत्राविद्याकाले चैतन्यं भिन्नमिव भवति तद्दृष्ट्यादिकं न

वस्तुनि ज्ञाते इत्यर्थः॥ तस्माद्यत्रापि वंगवितिवाक्यमेव
गुहाधिकरणे विषयं इति स्थितं॥

१०

अंतर उपपत्तेः। उपकोसलविद्यावाक्यमुदाहरति। य एष इति। तद्दृष्टिस्थानमसंगित्वेन ब्रह्मणोनुरूपं यतोस्मिन्वस्थितं वर्त्मनीमवस्मनी
स्य गच्छतीत्यर्थः। दर्शनस्य लौकिकत्वशास्त्रीयत्वाभ्यां संशयमाह। तत्रेति। पूर्ववदपि बुद्धाविति प्रथमश्रुतचेतनत्वानुसारेण चरमश्रुताः गु-
णा अपवेशादयो नीताः तद्वदिहापि दृश्यत इति चाक्षुषत्वानुसारेणामृतत्वादयो ध्यानार्थं कल्पितत्वेन नेया इति दृष्टांतेन पूर्वपक्षयति॥ छाया-

अंतर उपपत्तेः॥ य एषोक्षिणि पुरुषो दृश्यत एष आत्मेति होवाचैतदमृतमभयमेतद्ब्रह्मेति। तद्यद्यप्यस्मिन्सर्पिर्वोद-
कं वा सिंचति वर्त्मनी एव गच्छतीत्यादि श्रूयते। तत्र संशयः। किमयं प्रतिबिंबात्माक्ष्यधिकरणो निर्दिश्यते। अथ विज्ञानात्मा उत दे-
वतात्मेंद्रियस्याधिष्ठाता अथवेश्वर इति। किं तावत्प्राप्तं छायात्मा पुरुषप्रतिरूप इति कुतः तस्य दृश्यमानत्वप्रसिद्धेः य एषोक्षिणि पु-
रुषो दृश्यत इति च प्रसिद्धवदुपदेशात्। विज्ञानात्मनो वायं निर्देश इति युक्तं। स हि चक्षुषा रूपं पश्यंश्चक्षुषि संनिहितो भवति।
आत्मशब्दश्चास्मिन्पक्षेनुकूलो भवति। आदित्यपुरुषो वा चक्षुषोनुग्राहकः प्रतीयते। रश्मिभिरेषोस्मिन्प्रतिष्ठित इति श्रुतेः। अ-
मृतत्वादीनां देवतात्मन्यपि कथंचित्संभवात्। नेश्वरः स्थानविशेषनिर्देशादित्येवं प्राप्ते ब्रूमः॥ ॥ ॥ ॥

त्मेति। पूर्वपक्षे प्रतिबिंबोपास्तिः सिद्धांते ब्रह्मोपास्तिरिति फलं। प्रसिद्धवदिति चाक्षुषत्वेनेत्यर्थः। संभावनामात्रेण पक्षांतरमाह।
विज्ञानात्मन इत्यादिना। मनो ब्रह्मेतिवदेतत्तद्ब्रह्मेतीति वाक्यस्यापि दृष्टिपरत्वात्तस्यापि परत्वमिति पूर्वपक्षः॥ ॥

सू.भा.
२१

मनो ब्रह्मेत्युपासीतेत्यत्र इति पदस्य प्रत्ययपरत्वात् । इह च ब्रह्मेत्यवाचेस्यन्वयेनेति पदस्याकांक्षितसंबंधिनो ध्येयपरत्वाद्वैषम्यमिति ।
सिद्धांतयति । परमेश्वर एवेति । बहुप्रमाणसंवादस्तासमीनुग्राहक इति न्यायानुगृहीताभ्यामात्मामृतश्रुतिभ्यां दुर्बलस्य लिंगं बाध्यमित्या
ह । संयद्वामेति वामानि कर्मफलान्येतमक्षिपुरुषमभिलक्ष्य संयंति । उपयंति । सर्वफलोदयहेतुरित्यर्थः । लोकान्फलदानाय प्रापयते वे

परमेश्वर एवाक्षिण्यभ्यंतरः पुरुष इहोपदिष्ट इति । कस्मादुपपत्तेः । उपपद्यते हि परमेश्वरे गुणजातमिहोपदिश्यमानमात्मत्वं
तावन्मुख्यया वृत्त्या परमेश्वर उपपद्यते । स आत्मा तत्त्वमसीति श्रुतेः । अमृतत्वाभयत्वे च तस्मिन्नसकृच्छ्रुतौ श्रूयेते तथा पर
मेश्वरानुरूपमेतदक्षिस्थानं यथा हि परमेश्वरः सर्वदोषैरलिप्तः । अपहतपाप्मत्वादिश्रवणात् । तथाक्षिस्थानं सर्वलेपरहितमुप
दिष्टं तद्यद्यप्यस्मिन्सर्पिर्वोदकं वा सिंचति वर्त्मनी एव गच्छतीति श्रुतेः । संयद्वामादिगुणोपदेशश्च तस्मिन्नवकल्पते एतं संयद्वा
म इत्याचक्षते । एतं हि सर्वाणि वामान्यभिसंयंति । एष उ एव वामनीः । एष हि सर्वाणि वामानि नयति । एष उ एव भामनीः । एष हि सर्वे
षु लोकेषु भातीति च । अत उपपत्तेरंतरः परमेश्वरः ॥ स्थानादिव्यपदेशाच्च ॥ कथं पुनराकाशवत्सर्वगतस्य ब्रह्मणोऽक्ष्यल्पं स्था
नमुपपद्यत इत्यत्रोच्यते । भवेदेषानवक्लृप्तिः यद्येतदेकमेव स्थानमस्य निर्दिष्टं भवेत् । संति ह्यन्यान्यपि पृथिव्यादीनि स्थानान्य
स्य निर्दिष्टानि । यः पृथिव्यां तिष्ठन्नित्यादिना । तेषु हि चक्षुरपि निर्दिष्टं । यश्चक्षुषि तिष्ठन्निति ॥ स्थानादिव्यपदेशादित्यादिग्रहणेने
तद्दर्शयति । न केवलं स्थानमेवैकमनुचितं ब्रह्मणो निर्दिश्यमानं दृश्यते किं तर्हि नामरूपमित्येवंजातीयकमप्यनामरूपस्य ब्रह्मणोऽनुचितं निर्दि
साहो वामनीरिति । नयति फलानि लोकान्प्रापयतीत्यर्थः । भामानि भानानि नयति ॥ श्यमानं दृश्यते तस्योदिति नाम हिरण्यश्मश्रुरित्यादि
त्यवनीत्याह भामनीरिति । सर्वोऽपि प्रकाशक इत्यर्थः । स्थाननामरूपाणां ध्यानार्थत्वसंभवात्तदुपदेशाद्विशिष्टस्थानलोकि रचनदोष इति सूत्रयोजना ।

अनवक्लृप्तिः अक्लृप्तकल्पना तदा भवेद्यद्यक्ष्णेव निर्दिष्टं भवेदित्यन्वयः
२१

ऽत्वनुचितत्वात्क्लृप्तोक्तिरसमाधानमित्याशंक्य सूक्तिमाह। निर्गुणमपीति। प्रकरणादपि ब्रह्मग्रहमित्याह। सुखविशिष्टेति। अभिधानार्थभेदक ल्पनया सुखगुणविशिष्टस्य ब्रह्मणः प्रकृतस्य परामर्शः इति सर्वनाम्नाभिधानादितरः परमात्मा इति सूत्रार्थः। ननु प्रकरणान्तरबलेन इदंपदबलि गेनोपस्थापितः छायात्मा सर्वनाम्नार्थ इत्यत आह। आचार्यस्त्विति। उपकोसलो नाम कामलायनो ब्रह्मचारी जाबालस्याचार्यस्याग्नीन् द्वादश वर्षाणि न परिचचार तमनुपदिश्य देशान्तरं गते जाबाले गार्हपत्याद्यग्निभिर्दयया प्राणो ब्रह्मेत्यात्मविद्यामुपदिश्योक्तं आचार्यस्त्विति। तवास्मद्विद्याफला

निर्गुणमपि सत् ब्रह्म नामरूपगतैर्गुणैः सगुणमुपासनार्थं तत्र तत्रोपदिश्यत इत्येतदप्युक्तमेव। सर्वगतस्यापि ब्रह्मण उपलब्ध्यर्थं स्थानविशेषो न विरुध्यते शालग्राम इव विष्णोरित्येतदप्युक्तमेव। सुखविशिष्टाभिधानादेव च॥ अपि च नैवात्र विवदितव्यं। किं ब्रह्मास्मिन्वाक्येऽभिधीयते न वेति। सुखविशिष्टाभिधानादेव ब्रह्मत्वं सिद्धं। सुखविशिष्टं हि ब्रह्म यद्वाक्योपक्रमे प्रक्रान्तं प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मेति तदेवेहाभिहितं। प्रकृतपरिग्रहस्य न्याय्यत्वात्। आचार्यस्तु ते गतिं वक्तेति च गतिमात्राभिधानप्रतिज्ञानात्। कथं पुनर्वाक्योपक्रमे सुख विशिष्टं ब्रह्म विज्ञायत इत्युच्यते। प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मेत्येतदग्नीनां वचनं श्रुत्वोपकोसल उवाच। विजानाम्यहं यत्प्राणो ब्रह्म कं च तु खं च न विजानामीति। तत्रेदं प्रतिवचनं यद्वाव कं तदेव खं यदेव खं तदेव कमिति॥ ॥ ॥ ॥

वाक्यमेवार्थं विशदयति किं विवदिष्यतीत्यर्थः। पश्चादाचार्येण गत्यपरपर्यायोऽर्चिरादिका गतिरुक्ता। तथा चाग्निभिरुक्तात्मविद्यावाक्य स्य गतिवाक्येनैकवाक्यत्वाच्च सर्वनाम्ना प्रकृतात्मग्रहे निर्वहति लौकिकवाक्यतानिर्वाहकं प्रकरणं वाक्यभेदकाल्लिङ्गाद्बलवदिति भावः। श्रुतिं व्याचष्टे उच्यत इति। प्राणः सूत्रात्मा इहरेणोक्तत्वेन पतत्वेन ज्ञानात् किं विजानामि सुखं खं च भक्त्या काशं ब्रह्मत्वेन ज्ञातुं न शक्नोमीत्यर्थः। यत्कं तदेव खमिति सुखेन विशेषितस्य खस्य भूताकाशत्वनिरासः॥ ॥ ॥ ॥ ॥ ॥

छां॰भा॰ तथा कं कुर्पं भूतं पतत्वं तदेव कमिति विशेषणेन विशेषितस्य कस्य जन्यत्वनिरासद्वारा तद्व्यतिरेकमुखेनाह। तत्र खमित्यादिना आत्मविद्येति श्रुति
१२ विरोधात् लौकिकध्यानमेवात्र निष्टमिति भावः। सामर्थ्यमिति। आमयादोषः साधनमात्रतेषामनित्यत्वादिः। तत्सहितत इत्यर्थः। प्रत्येकग्रहणे दोषमुक्त्वा
द्वयोर्ग्रहणे फलितमाह। इतरेतरेति। विशेषितार्थकावित्यर्थः। नन्वेकं ब्रह्मैवात्र ध्येयं चेत् ब्रह्मपदेनैव तत्किमर्थं भिन्नत्वमत आह तत्रेति। विशेषणत्वेन
खस्य भूतत्वव्यावृत्तिकत्वेनेत्यर्थः। ब्रह्मशब्दः शिरोधर्मोत्तमत्वमिति विग्रहः। अध्येयत्वे को दोषस्तत्राह। दृष्टं हीति। मार्गे गतासगुणविद्यात्वावगय
तत्र खंशब्दो भूताकाशे निरूढो लोके। यदि तस्य विशेषणत्वेन कंशब्दः सुखवाची नोपादीयेत। तथा सति केवले भूताकाशे ब्रह्मदृष्टिनस्या
दित्थं प्रतीकाभिप्रायेण प्रयुक्त इति प्रतीतिः स्यात्। तथा कंशब्दस्यापि विषयेंद्रियसंपर्कजनिते सामये सुखे प्रसिद्धत्वात् यदि तस्य खंशब्दो
विशेषणत्वेन नोपादीयेत लौकिकं सुखं ब्रह्मेति प्रतीतिः स्यात्। इतरेतरविशेषितौ तु कं खं शब्दौ सुखात्मकं ब्रह्म गमयतः। तत्र द्वितीये ब्रह्म य३
शब्दोऽनुपादीयमाने कं खं ब्रह्मेत्येवोच्यमाने कंशब्दस्य विशेषणत्वेनैवोपयुक्तत्वात् सुखस्य गुणस्य ध्येयत्वं स्यात् तन्माभूदित्येतदुभयोः कं
खंशब्दयोः ब्रह्मशब्दशिरस्कत्वं कं ब्रह्म खं ब्रह्मेति। दृष्टं हि सुखस्यापि गुणस्य गुणिवद्ध्येयत्वं। तदेव वाक्योपक्रमे सुखविशिष्टं ब्रह्मोपदिष्टं
प्रत्येकं च ग्रहणप्रसाद्योऽग्नयः स्वस्य महिमानमुपदिदिक्षवा सोम्य ते सर्वविद्यात्मविद्या चेत्युपसंहरतः सर्वत्र ब्रह्म निर्दिष्टमिति ज्ञापयन्ति॥

दितिभावः। आत्मविद्यापदेनोपसंहारादपि प्रकृतं ब्रह्मेत्याह। प्रत्येकं चेति। एभिरग्निभिरत्र माहिम्न इति मन्त्रवतस्तन्नवो विद्युतिरितिगार्हप १२
त्याद्युपदिदेश॥ आपो दिशो नक्षत्राणि चंद्रमा इत्यन्वाहार्यपचनदवाच्याणि आकाशो द्यौर्विद्युदिति स्वमहिमानमाहवनीयो जगादेति भावः
इयमस्माकमग्नीनां विद्या प्रत्येकमुक्ता आत्मविद्या तु पूर्वेनस्माप्तिमिलिखाऽपरोक्षब्रह्मलोकफलेत्यर्थः॥ ॥ ॥ ॥

धु २

उच्यता मग्निभिर्ब्रह्मलोकप्राप्त्यानुगुरूणोऽयं तां कृत्स्ने दर्शितेत्याह। आचार्यास्त्विति। एकवाक्यतानिश्चयपाठक्रमभेदेऽपि नार्थभेद इत्यर्थः। श्रुताव
नुष्ठितादुपनिषद्गृहस्थस्य सगुणब्रह्मोपासनानन्तरं येन तस्य मार्गगतिः श्रुतौ स्पष्टतो न प्रसिद्धा तस्मात्तत्राभिधाना तल्लिङ्गादिति स्पष्टार्थमाह। इतश्चेति
। यस्मादुपन्तेनस्मादिहैवान्वयः। श्रुतिमाह। अथेति। देहपातानन्तरमित्यर्थः। स्वधर्मस्तपः तपो ब्रह्मचर्यश्रद्धाविद्याभिः आत्मानं ध्यात्वा

आचार्यास्तु ते गतिं वक्ष्यति लिङ्गगतिमात्राभिधानप्रतीतानन्तरमर्थान्तरविवक्षां आरभ्यते तथा पुष्करपलाश आपो न श्लिष्यन्त एवमेवं
विदि पापं कर्म न श्लिष्यत इति चाक्षिस्थाने पुरुषं विजानतः पापेनानुपघातं ब्रुवन्नक्षिस्थानस्य पुरुषस्य ब्रह्मत्वं दर्शयति। तस्मा
त्प्रकृतस्यैव ब्रह्मणोऽक्षिस्थानतां संयद्वामादिगुणतां चोक्त्वाऽर्चिरादिकां तद्विदो गतिं वक्ष्यामीत्युपक्रमते य एषोऽक्षिणि पुरुषो द्
श्यत एष आत्मेति होवाचेति॥ श्रुतोपनिषत्कगत्यभिधानाच्च॥ इतश्चाक्षिस्थानः पुरुषः परमेश्वरो यस्मात् श्रुतोपनिषत्कस्य
श्रुतरहस्यविज्ञानस्य ब्रह्मविदो या गतिर्देवयानाख्या प्रसिद्धा श्रुतौ यथोत्तरेण तपसा ब्रह्मचर्येण श्रद्धया विद्ययाऽऽत्मानमन्विष्यादि
त्यमभिजयन्ते। एतद्वै प्राणानामायतनमेतदमृतमभयमेतत्परायणमेतस्मान्न पुनरावर्तन्त इति। स्मृतावपि अग्निर्ज्योतिरहः
शुक्लः षण्मासा उत्तरायणम्॥ तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जना इति सैवेहाक्षिपुरुषविदोऽभिधीयमाना दृश्यते॥ ॥

या ध्यानविषयो ज्ञानं देवयानमार्गं प्राप्यते तेनोत्तरेण पथा आदित्यद्वारा सगुणब्रह्मस्थानं गच्छन्तीति एतद्वै प्राणानां समष्टिरूपा
णामायतनं लिङ्गात्मकं हिरण्यगर्भरूपं वस्तु तस्यैतदमृतादिरूपं निर्गुणस्य सङ्गच्छते नो। अतः कार्यब्रह्मप्राप्य तत्स्वरूपं निर्गुणं ज्ञात्वा
मुच्यत इत्यर्थः। अग्निर्ज्योतिरिति देवता एव महत्त्वाद्देवतात्वेनोक्ताः॥ ॥ ॥ ॥

अस्मिन्नुपासके मृते सति यदि पुत्रादयः शव्यं शवसंस्कारादिकं कुर्वंति यदि च न कुर्वंति उभयथाप्यस्ति महिम्नाऽर्चिरादिदेवाः क्रमेण
गच्छंति। अर्चिषमग्निं ततोऽहरहः शुक्लपक्षं तत उत्तरायणं तस्मात्संवत्सरं ततो देवलोकं ततो वायोरादित्यं ततश्चंद्रं चंद्राद्विद्युतं गत्वा तत्र वि

अथ यदु चैवास्मिन्छव्यं कुर्वंति यदि च नार्चिषमेवाभिसंभवंतीत्युपक्रम्यादित्याच्चंद्रमसं चंद्रमसो विद्युतं तत्पुरुषोऽमानवः स एना
न्ब्रह्म गमयत्येष देवपथो ब्रह्मपथ एतेन प्रतिपद्यमाना इमं मानवमावर्तं नावर्तंत इति। तदिह ब्रह्मविद्विषयया प्रसिद्ध्या गत्या
क्षिस्थानस्य ब्रह्मत्वं निश्चीयते॥ अनवस्थितेरसंभवाच्च नेतरः॥ यत्पुनरुक्तं छायात्मा विज्ञानात्मा देवतात्मा वा स्यादक्षिस्थान
इत्यत्रोच्यते। न छायात्मादिरितर इह ग्रहणमर्हति। कस्मादनवस्थितेः। न तावच्छायात्मनश्चक्षुषि नित्यमवस्थानं संभव
ति॥

द्युल्लोके स्थितानुपासकानमानवः पुरुषो ब्रह्मलोकादागत्य कार्यं ब्रह्मलोकं प्रापयति। एषोऽर्चिरादिभिर्देवैर्विशिष्टो देवपथः
गंतव्येन ब्रह्मणा योगाद्ब्रह्मपथश्च। एतेन कार्यं ब्रह्म प्रतिपद्यमाना उपासका इमं मानवं मनोः सर्गमावर्तं जन्ममरणावृत्तियुक्तं ना

चक्षुष्यासीदतीति। उपगच्छतीत्यर्थः। अनवस्थितत्वोपास्यत्वं सदा न सिध्यतीति भावः। किं वा व्यवधानात्स्वाक्षिस्थ उपास्यः। न च
तस्य स्वचक्षुषा दर्शनं संभवतीत्याह। यएषइति। अस्तु तर्हि परेण दृश्यमानस्योपास्तिरित्यत आह। न चैतिकल्पनागौरवादित्यर्थः। यु

गपदेव हि कश्चित्पुरुषः चक्षुष्यासीदति तदा चक्षुषि पुरुषच्छाया दृश्यते। अपगते तस्मिन्न दृश्येत। पुरुषो ऽक्षिणि पुरुष इति चक्षु
तिः संनिधानात्स्वचक्षुषि दृश्यमानं पुरुषमुपास्यत्वेनोपदिशतीति न च स उपासनाकाले छायाकरं कंचित्पुरुषं चक्षुःसमीपे संनि
धाप्योपास्त इति युक्तं कल्पयितुं। अस्यैव शरीरस्य नाशमन्वेष नश्यतीति च श्रुतिश्च छायात्मनो ऽनवस्थितत्वं दर्शयति। असंभ
वाच्च तस्मिन्नमृतत्वादीनां गुणानां न छायात्मेति प्रतीतिः। तथा विज्ञानात्मनो ऽपि साधारणे कृत्स्नशरीरे ऽप्यसंबंधेनेति च क्षुष्ये
वावस्थितत्वं वक्तुं न शक्यं। अक्षिणस्तु व्यापिनो ऽपि दृष्ट्युपलब्धार्थो हृदयादिदेशविशेषसंबंधः समानश्च विज्ञानात्मन्यप्यमृतत्वा
दीनां गुणानामसंभवः। यद्यपि विज्ञानात्मा परमात्मनो ऽनन्य एव। तथाप्यविद्याकामकर्मकृतं तस्मिन्मर्त्यत्वमध्यारोपितं भय
चेत्यमृतत्वाभयत्वे नोपपद्येते। संयद्वामत्वादयश्चैतस्मिन्ननैश्वर्यादनुपपन्ना एवादेवतात्मनस्तु रश्मिभिरेषो ऽस्मिन्प्रतिष्ठित इति
श्रुतेः यद्यपि चक्षुष्यवस्थानं स्यात्। तथाप्यात्मत्वं तावन्न संभवति। पराग्रूपत्वात्। अमृतत्वादयो ऽपि न संभवंति उत्पत्तिप्रलयश्र
वणात् ॥
ति सिद्धानवस्थितत्वे श्रुतिमाह। असौ ऽति छायाकरस्याविद्यमानत्वाद्दर्शनमनुपश्येदेव छायात्मानं पश्यतीत्यर्थः। जीवं निरस्यति तस्ये
ति। जातार्थस्याप्यह्नि लविशेषणजीवस्याक्षिप्रके ऽश्यु सुरे वस्थानमित्यपुरुषमित्यर्थः इदं इति। श्रुत्यार्थितिरिषः॥ ॥

स्‌ः भा१
१४

ननु च स्तोः सर्वो अजायत तस्मै तत्त्वमेतीति क्वचित्कर्मं अमरा देवा इति प्रसिद्धिबाधितमित्याशङ्क्याह। अमरत्वमपीति। भीषा भयेनास्मादी-
श्वराद्वायुश्चलति। अग्निश्चेन्द्रश्च स्वस्वकार्यं कुरुतः। उक्तापेक्षया पंचमो मृत्युः समाप्तायुषां मृत्युकाले धावतीत्यर्थः। ईश्वरपक्षे दृष्टान्तद्वयमु

अमरत्वमपि देवानां चिरकालावस्थानापेक्षमैश्वर्यमपि परमेश्वरायत्तं तस्माभाविकं। भीषास्माद्वातः पवते भीषोदेति सूर्यः। भीषा-
स्मादग्निश्चेन्द्रश्च मृत्युर्धावति पञ्चम इति मन्त्रवर्णात्। तस्मात्परमेश्वरस्यायमधिष्ठिस्थानः प्रसेतव्यः। अस्मिंश्च पक्षे दृष्टान्त इति प्र-
सिद्धवदुपादानं शास्त्रोपदेशविद्वद्विषयं प्राणिचलार्थमिति व्याख्येयं। अन्तर्याम्यधिदैवादिषु तद्धर्मव्यपदेशात्। परमं च लोकं परं च
लोकं सर्वाणि भूतानि यो अन्तरो यमयतीत्युपक्रम्य श्रूयते॥ यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः
पृथिवीमन्तरो यमयत्येष त आत्मान्तर्याम्यमृत इत्यादि॥

कं तत्राह। अस्मिन्निति। दर्शनमनुभवः। तस्य शास्त्रोऽस्य तस्य शास्त्रमेव करणं स्यात्संनिधानात्। तथा च शास्त्रकरणको विद्वदनुभव
उपासनास्तु सर्वेऽस्मत्सदृशाः। तस्मादुपक्रमे सर्वविद्यावाक्यानुपास्य ब्रह्मणि समन्वितमिति सिद्धं। अन्तर्याम्यधिदैवादिषु तद्धर्मव्यपदे

शात्। उदाहरणपकमुदाहरति। यइति॥
१५

अंतर्यामिब्राह्मणे जगतो यमनकार्यमाह सूत्रेति। यः पृथिव्यामित्यादिना देवताः पृथिव्याद्या अधिकृत्य यमयिता श्रूयते। तथा यः स-
र्वेषु लोकेष्वित्यधिलोकं। यः सर्वेषु वेदेष्वित्यधिवेदं। यः सर्वेषु यज्ञेष्वित्यधियज्ञं। यः सर्वेषु भूतेष्वित्यधिभूतं। यः प्राणे तिष्ठन्नि-
त्यादिष्वात्मनीत्यंतमध्यात्मं चेति विभागः। अशरीरस्यापि नियंतृत्वसंभवात्संदेहबीजं स्फुटं। पूर्वलोकेश्वरस्याप्यधिष्ठानत्वसिद्धवत् पृथिव्या के ३

अत्राधिदैवतमधिलोकमधिवेदमधियज्ञमधिभूतमध्यात्मं च कश्चिदंतरवस्थितो यमयितांतर्यामीति श्रूयते। स किमधिदै-
वाद्यभिमानी देवतात्मा कश्चित्। किं वा प्राप्ताणिमाद्यैश्वर्यः कश्चिद्योगी। किं वा परमात्मा। किं वार्थांतरं किंचिदित्यपूर्वसंज्ञादर्शनात्सं-
शयः। किं तावन्नः प्रतिभाति। संज्ञाया अप्रसिद्धत्वात्संज्ञिनाप्यप्रसिद्धेनार्थांतरेण केनचिद्भवितव्यमिति॥ अथवा नानिरूपित-
रूपमर्थांतरं शक्यमस्त्यभ्युपगंतुं। अंतर्यामिशब्दश्चांतर्यमनयोगेन प्रवृत्तो नात्यंतमप्रसिद्धः। तस्मात्पृथिव्याद्यभिमानी क-
श्चिद्देवोंतर्यामी स्यात्। तथा च श्रूयते। पृथिव्येव यस्यायतनमग्निर्लोको मनो ज्योतिरित्यादि। स च कार्यकरणवत्त्वात्पृथिव्यादीनं-
तस्तिष्ठन्यमयतीति युक्तं देवतात्मनो यमयितृत्वं॥

दिस्थो न निर्देशो दृष्टांतः तदुक्तं स्तस्य दृष्टांतत्वासंभवेऽक्षरपरत्वमत्रापि तत्समाधी यत इत्याक्षेपसंगतिः। अतः पूर्वफले नास्य फलवत्त्वं।
अर्थांतरफलं तु पूर्वपक्षे नीश्वरोपास्तिः। सिद्धांते प्रत्यक्ब्रह्मज्ञानमिति मंतव्यं। स्वयमेवारुचिबीजं स्फुटयन्नाह। अथवेति। अप्रसि-
द्धिनार्थांतरकल्पनायोगेन फलस्य वेदत्वेऽप्यनुपयोगादिति भावः। तथा च श्रूयते। यस्यैव देवस्यायतनं शरीरं लोकस्तेन तेनेति लोकश्चक्षुर्ज्योतिरिति सर्वोप-

सू.भा.
१५

दुपक्रमादीनां तयोर्मध्ये कुत्रचित्स्वपादनेन देवपक्षो न युक्त इत्यत उच्यते आह। योगिनो वेति। आगंतुकसिद्ध्यपेक्षं तपोमिलेः सिद्धसाधनकल्पना
गौरवात् निमित्तसिद्धएवं तपो मीति सिद्धं नपाति। एवं प्राप्त इति। देवतानिरासे हेत्वंतरमाह। यः पृथिव्यामिति। ईश्वरो नानियंता शरीरत्वात् घट
वदित्यनुमानं निरस्यति। नैष दोष इति। नियम्यातिरिक्तशरीरस्याभावस्य हेतुः॥ शरीरासंबंधित्वं आद्यस्य देहनियंतृत्वं जीवे व्यभिचरति हि

योगिनो वा कस्यचित्सिद्धस्य सर्वांतु प्रवेशेन यमयितृत्वं स्यात्। न तु परमात्मन्यतीयेतादृक्कार्यकरणवत्त्वादित्येवं प्राप्त इदमुच्यते योऽं
तर्यामी अधिदैवादिषु श्रूयते स परमात्मैव स्यात् नान्य इति कुतः तस्य इहैव व्यपदेशात्। तस्य हि परमात्मनो धर्मा इह निर्दिश्यमाना दृश्यंते।
पृथिव्यादितावदधिदैवादिभेदभिन्नं समस्तं विकारजातमंतस्तिष्ठन्यमयतीति परमात्मनो यमयितृत्वं धर्म उपपद्यते। सर्वविका
रकारणत्वे सति सर्वशक्त्युपपत्तेः। एष त आत्मांतर्याम्यमृत इति चात्मत्वामृतत्वे मुख्ये परमात्मन उपपद्येते॥ यं पृथिवी न वेदेति च पृ
थिवी देवताया अविज्ञेयमंतर्यामिणं ब्रुवन् देवतात्मनोऽन्यमंतर्यामिणं दर्शयति पृथिवी देवता ह्यहमस्मि पृथिवीत्यात्मानं विजानी
यात्। तथाऽदृष्टोऽश्रुत इत्यादिव्यपदेशो रूपादिविहीनत्वात्परमात्मन उपपद्यत इति। यत्त्वकार्यकरणस्य परमात्मनो यमयितृत्वं नोप
पद्यत इति। नैष दोषः। यान्नियच्छति तत्कार्यकरणैरेव तस्य कार्यकरणवत्त्वोपपत्तेः

तीयमस्तु सिद्धः। ईश्वरस्य स्वाविद्योपार्जितसर्वसंबंधित्वादित्याह। यान्नियच्छतीति। स शरीरेण नियंतेति लोकदृष्टिमनुसृत्यैतदुक्तं। वस्तु १५
तस्तु चेतनसान्निध्याज्जडस्य व्यापारेण नियमनं न तच्छरीरित्वेन तन्नियंतृत्वं। तथाचाचिंत्यमायाशक्तेः शरीरं विनैवोपपत्तेः॥

ननु देहनियंतुर्जीवस्यात्मनो नियंता चेत् तस्याप्यन्य इत्यनवस्थेत्यत आह। तस्यापीति। निरंकुशं सर्वनियंतृत्वं ईश्वरस्य श्रुतं। तस्मान्नि-
यंत्रंतराऽनुमानं श्रुतिबाधितमिति नानवस्थेत्यर्थः। यद्वा ईश्वरादेरेकत्वात्तत्परो जीवस्यान्नियंतृत्वं लोके: न सम्भेदाभावात् तेनानवस्थेत्यर्थः।
प्रधानं महदादिरूपेण कुतः संभवत्वित्यत इति तत्र स्वाभिप्रायमाह।। अनुतत्वाच्चेति। रूपादिहीनं तस्या दृष्टिनैमित्तसर्वतो दृष्टस्य सुतरां
तस्याप्यन्यो नियंतेत्यनवस्थादोषश्च न संभवति। भेदाभावात्। भेदे हि सत्यनवस्थादोषो यथापतति। तस्मात्परमात्मैवांत-
र्यामी।। न च स्मार्तमतस्य धर्माभिलापात्।। स्यादेतत् दृष्टत्वादयो धर्माः सांख्यस्मृतिकल्पितस्य प्रधानस्यानुपपद्यंते। रूपादि-
हीनतया तस्यैतैरभ्युपगमात्। अमृतत्वं न विरुद्धं यस्माद्भवन्ति सर्वे तदितिहि स्मरंति। तस्मादपि नियंतृत्वं सर्वविकारकारण-
त्वादुपपद्यते। तस्मात्प्रधानमंतर्याम्यस्तु इत्यस्मात्। ईक्षतेर्नाशब्दमित्यत्र निराकृतमपि सत्प्रधानमिहादृष्टत्वादिव्यपदेशसं-
भवेन पुनराशंक्यते। अत उत्तरमुच्यते।। न च स्मार्तं प्रधानमंतर्यामिशब्दं भवितुमर्हति। कस्मात् तद्धर्माभिलापात्। यद्यप्य-
दृष्टत्वादिव्यपदेशः प्रधानस्य संभवति। तथापि न दृष्टत्वादिव्यपदेशः संभवति। प्रधानस्याचेतनत्वेन तैरभ्युपगमात्। अदृ-
ष्टो द्रष्टा श्रुतः श्रोता मतो मंता विज्ञातो विज्ञातेति हि वाक्यशेषः इह भवति आत्मत्वमपि न प्रधानस्योपपद्यते। यदि प्रधा-
नमात्मत्वदृष्टत्वाद्यसंभवान्नांतर्याम्यभ्युपगम्यते। शारीरस्तर्ह्यंतर्यामी भवतु। शारीरो हि चेतनत्वात् द्रष्टा श्रोता मंता विज्ञाता च
भुवलात्माच्च प्रपत्ता न
वतिष्ठति जडत्वादित्यर्थः अत एतत्प्रधानं चेतनं तस्य धर्माणामभिधानादिति हेत्वर्थः उत्तरस्य सूत्रस्याशंकामाह। यदि प्रधान

[illegible]

स०भा०१

१६

अमूर्तश्चेति। विनाऽपि नोदेहं तत्र भोगानुपपत्तेरित्यर्थः। यथा देवदत्तकर्तृकगमनक्रियायाः ग्रामः कर्म न तु देवदत्तस्तथात्मकर्तृकदर्श-
नादिक्रियायाफलं अनात्मविषयकं न त्वात्मनि क्रियायाः। कर्तृविषयत्वाप्रयोगादित्याह। कर्त्तरीति। क्रियायां गुणः कर्ता प्रधानं कर्मेतत्रैकस्यां क्रि-
यायामेकस्य गुणत्वप्रधानत्वयोर्विरोधात् न कर्तुः कर्मत्वमित्यर्थः। इदं हि आत्मा आत्मानं तथा द्रष्टा द्रष्टारं न विषयीकुर्यादित्याह। श्रुतेश्च

अमूर्तस्य धर्माधर्मफलोपभोगोपपत्तेः। अदृष्टत्वादयश्च धर्माः शारीरे प्रसिद्धाः दर्शनादिक्रियायाः कर्त्तरि प्रयुक्तिविरोधात्।
न दृष्टेर्द्रष्टारं पश्येरित्यादिश्रुतिभ्यश्च। तस्य च कार्यकरणसंघातमन्तर्यामिपदं तदशीलं भोक्तृत्वात्। तस्माच्छारीरोऽन्तर्यामी सन्तद्रष्टा-
रं पठति॥ शारीरश्चोभयेऽपि हि भेदेनैनमधीयते॥ नेति पूर्वसूत्रादनुवर्तते शारीरश्चान्तर्यामी प्राप्ते। कस्माद्यद्यपि दृष्टत्वादयो
धर्मास्तस्य संभवन्ति तथापि घटाकाशवदुपाधिपरिच्छिन्नत्वात् न कार्त्स्न्येन पृथिव्यादिष्वन्तरवस्थातुं नियन्तुं च शक्नोति। अपि चो-
भयेऽपि हि शाखिनः काण्वा माध्यन्दिनाश्चान्तर्यामिणो भेदेनैनं शारीरं पृथिव्यादिवदधिष्ठानत्वेन नियम्यत्वेन चाधीयते। यो वि-
ज्ञाने तिष्ठन्निति काण्वाः। य आत्मनि तिष्ठन्निति माध्यन्दिनाः। य आत्मनि तिष्ठन्नित्यस्मिंस्तावत्पाठे भवत्यात्मशब्दः शारीरस्य वाचकः
। यो विज्ञाने तिष्ठन्नित्यस्मिन्नपि पाठे विज्ञानशब्देन शारीर उच्यते। विज्ञानमयो हि शारीरः। तस्माच्छारीरादन्य ईश्वरोऽन्तर्यामी-
ति सिद्धं। कथं पुनरेकस्मिन्देहे द्वौ द्रष्टारावुपपद्येते। यश्चायमीश्वरो यश्चायमितरः शारीरः॥
दृष्टत्वादिधर्मकः शारीरस्येत्याह। नेति। अपि चेत्यनुसूचितं हेतुमुक्त्वा कण्ठोक्तं हेतुमाह॥ अपि चोभयेऽपीति। भेदेनेति स्वतात्त्विकभेद

१६

नन्वत्रैको भोक्ता जीवः ईश्वरस्त्वभोक्तेति न विरोध इति शंक्यते। का पुनरिति। तयोर्भेदः श्रुतिविरुद्ध इति स्पष्टयन्नाह। नान्य इति। स एव स्व
रूपं कुतः। अत्रेति। अत्र श्रुतेर्जीवेतरस्माद्द्रष्टृत्वं निषेधति। निषेधेनेतरसादिना। न केवलमप्रसक्तप्रतिषेधः। किं त्वद्वितीयत्वमुक्तं द्रष्टान्तरावि
षधश्रुतेर्जीवेतरनिषेधार्थत्वादध्यवसायविशेषेति। तस्मात्तत्त्वे पश्चात्मनि तिष्ठन्निति श्रुतौ च द्वयमेवोक्तमिति पुनः। नान्य इति
का पुनरिहानुपपत्तिः नान्योऽतोऽस्ति द्रष्टेत्यादिश्रुतिवचनं विरुध्येत। अत्र द्रष्टृप्रकरणाद्देवतयोर्मिथो भेदः द्रष्टारं श्रोतारं मन्तारं विज्ञाता
रं चात्मानं प्रतिषेधति। निमित्तं जीवेतरप्रतिषेधार्थमेतद्वचनमिति चेत् न निमित्तेतरप्रसंगात् अविशेषश्रवणात् च। अत्रोच्यते।
अविद्याप्रत्युपस्थापितकार्यकरणोपाधिनिमित्तोऽयं शारीरेश्वरयोर्भेदः मिथ्याभेदप्रत्ययो न पारमार्थिकः। एको हि प्रत्यगात्मा
भवति न द्वौ प्रत्यगात्मानौ संभवतः। एकस्यैव तु भेदव्यवहार उपाधिकृतः। यथा घटाकाशो महाकाश इति। ततश्च तत्त्वमस्यादि
भेदश्रुतयः प्रत्यक्षादीनि च प्रमाणानि संसारानुभवो विधिप्रतिषेधशास्त्रं चेति सर्वमेतदुपपद्यते। तथा च श्रुतिः यत्र हि द्वै
तमिव भवति तदितर इतरं पश्यतीत्यविद्याविषये व्यवहारं दर्शयति। यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येदिति विद्यावि
षये सर्वव्यवहारं वारयतीति॥ अदृश्यत्वादिगुणको धर्मोक्तेः॥ सांबसदाशिव॥

नाकस्यैव भेदनिरासादिति माले भेद उपाधिकल्पितः श्रुतिसूत्राभ्यामनूद्यत इति समाधत्तेऽत्रोच्यत इति। भेदः सत्यः किं न स्यादि
त्याह एको हीति। गौरवेणाद्वयोर्हि धीगोचरत्वासंभवादेक एवात्र अन्तरः तद्गोचरस्य घटवद्देहात्मत्वान्नात्मभेदः सत्य इत्यर्थः।
ततश्चेति। कल्पितभेदांगीकाराद्दृष्टापेक्षसर्वमुपपन्नमित्यर्थः। तस्माद्देवतयोर्मिथ आत्मत्वं द्रष्टेत्वमन्वितमिति सिद्धं॥ अदृश्यत्वा

सं॰ भा

१७

मुंडकवाक्यमुदाहरति। अथेति। कर्मविधारूपापराविद्योक्त्यनंतरं परा निर्गुणं ज्ञानं तेन परा सोच्यते तामेव विषयो गता निर्दिशति। य
दिति। अद्रेश्यं अदृश्यं ज्ञानेन्द्रियैः अग्राह्यं कर्मेन्द्रियैः अगोत्रं वंशः। वर्णा ब्राह्मणत्वादिजातिः चक्षुःश्रोत्रं च अस्य न चक्षुःश्रोत्रं। पाणि
पादं च अस्य न पाणि पादं ज्ञानकर्मेन्द्रियविकलं नित्यमविनाशि। विभुं प्रभुं सुसूक्ष्मं दुर्ज्ञेयत्वात् नित्यत्वापपदोपनाशापक्षयप्रकारो निरासः। भू
तानां योनिं प्रकृतिं पश्यन्ति धीराः पंडिताः तदक्षरं तद्विद्या परेत्यन्वयः। अदृश्यत्वादिगुणानां ब्रह्मप्रधानसाधारण्याद्वा संशयः। पूर्व
अथ परा यया तदक्षरमधिगम्यते यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुःश्रोत्रं तदपाणिपादं नित्यं विभुं सर्वगतं सुसूक्ष्मं
तदव्ययं यद्भूतयोनिं परिपश्यन्ति धीरा इति श्रूयते। तत्र संशयः। किमयमद्रेश्यत्वादिगुणको भूतयोनिः प्रधानं स्यादुत
शारीर आहोस्वित्परमेश्वर इति॥ तत्र प्रधानमचेतनं भूतयोनिरिति युक्तं। अचेतनानामेव तस्य दृष्टान्तत्वेनोपादानात्। य
थोर्णनाभिः सृजते गृह्णते च यथा पृथिव्यामोषधयः संभवन्ति यथा सतः पुरुषात्केशलोमानि तथाक्षरात्संभवतीह विश्व
मिति। ननु ऊर्णनाभिः पुरुषश्च चेतनाविह दृष्टान्तत्वेनोपात्तौ नेति ब्रूमः। न हि केवलस्य चेतनस्य तत्र सूत्रयोनित्वं केशलोमयो
नित्वं चास्ति। चेतनाधिष्ठितं ह्यचेतनमूर्णनाभिशरीरं सूत्रस्य योनिः पुरुषशरीरं च केशलोम्नामिति प्रसिद्धं। अपि च पूर्वत्राद्र
ष्टृत्वाद्यभिलापसंभवेऽपि द्रष्टृत्वाद्यभिलापासंभवान्न प्रधानमभ्युपगतं। इह त्वद्रेश्यत्वादयो धर्माः प्रधाने संभवन्ति न चात्र
विरुध्यमानो धर्मः कश्चिदभिलप्यते॥ ॥ बुद्धत्वादीनां चेतनधर्माणामश्रुतेः अनुप
लब्धमिति पक्षस्य उदाहरणेन पूर्वपक्षमाह। तत्रेति। पूर्वपक्षे प्रधानाद्युपास्तिः। सिद्धांते निर्गुणधीरिति फलं। ऊर्णनाभिर्लूताकीटः
तंतून्स्वदेहात्सृजति उपसंहरति चेत्यर्थः। सतो जीवतः॥ ननु पूर्वं निरस्तं प्रधानं कथमुत्थाप्यते तत्राह। अपि चेति। अत्र प्रधानविरुद्धधर्मानो

अथ प्रधाने विरुध्यमानोऽसंभावितो वाक्यशेषः श्रुतद्युतिं संकुरुते । ननु पद्यत इति । पंचम्यन्ताक्षरश्रुतेः भूतप्रकृतेः प्रसभिहानात्प्रथमान्त
परज्ञानेऽग्न्यसमगान्मितेश्वरस्य सर्वज्ञत्वादि कुम्भिस्याह । अत्रोच्यत इति । संदिग्धं तु वाक्यशेषादिति न्यायेन सिद्धान्तयति । एवं प्राप्त इति ।
चेतनाचेतनत्वेन संदिग्धो भूत

ननु यः सर्वज्ञः सर्वविदित्ययं वाक्यशेषोऽचेतनप्रधानेन न संभवति । कथं प्रधानं भूतयोनिः प्रतिज्ञायत इत्यत्रोच्यते । यथा तदक्षर
मधिगम्यते यत्तदद्रेश्यमित्यक्षरशब्देनादृश्यत्वादिगुणकं भूतयोनिमभिधाय पुनरन्ते अक्षरात्परतः पर इति । तत्र यः
परोऽक्षरात् स श्रुतः स सर्वज्ञः सर्वविद्भविष्यति । प्रधानमेवाक्षरशब्दनिर्दिष्टं भूतयोनिः । यदा तु योनिशब्दो निमित्तवाची तदा शारी
रोऽपि भूतयोनिः स्यात् । धर्माधर्माभ्यां भूतजातस्योपार्जनादिति । एवं प्राप्तेऽभिधीयते । योऽयमदृश्यत्वादिगुणको भूतयोनिः स परमेश्व
र एव स्यान्नान्य इति । कथमेतदवगम्यते । धर्मोक्तेः परमेश्वरस्य हि धर्म इहोच्यमानो दृश्यते । यः सर्वज्ञः सर्वविदिति । न हि प्रधानस्याचेत
नस्य शारीरस्य वोपाधिपरिच्छिन्नदृष्टेः सर्वज्ञत्वं सर्वविद्त्वं वा संभवति । नन्वक्षरशब्दनिर्दिष्टात् भूतयोनेः परस्यैव तत्सर्वज्ञत्वं सर्व
विद्त्वं च न भूतयोनिविषयमित्युक्तं ॥
चेतनाचेतनत्वेन संदिग्धो भूतयोनिर्नौमः सर्वज्ञत्वप्रतिपादकवाक्यशेषादीश्वरत्वनिर्णय इत्यमुक्तं वाक्यशेषे भूतयोनेः असंभावितात्मकाभावादिति शंकते ॥
नन्विति ॥

सू० भा० १ जनिकर्तुः प्रकृतिरिति सूत्रेण प्रकृतेरपादानसंज्ञायां पंचमीस्मरणाद् अक्षरात्संभवतीति प्रकृतित्वेनोक्तस्याक्षरस्य भूतयोनेर्वाक्यशेषे तस्मादि-
तिप्रकृतित्वलिंगेन प्रत्यभिज्ञानमस्तीति समाधत्ते। अत्रोच्यत इति। एतत्कार्यं ब्रह्म सूक्ष्मात्मकं नामरूपं स्थूलं तत्तेनान्नं व्रीह्यादीत्यर्थः। यदु-
१८ क्तं पंचम्यंताक्षरस्य भूतयोनेः प्रत्यभिज्ञानादेतन्न तत्त्वमिति तत्राह। अक्षरात्परत इति। वाक्यस्याक्षरे भूतयोनिं परामृश्य निपरविद्याधि

अत्रोच्यते। नैवं संभवति यत्कारणम् अक्षरात्संभवतीह विश्वमिति प्रकृतं भूतयोनिमिह जायमानप्रकृतित्वेन निर्दिश्यानंतरमपि जा-
यमानप्रकृतित्वेनैव सर्वज्ञं निर्दिशति। यः सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तपः तस्मादेतद्ब्रह्म नामरूपमन्नं च जायत इति। तस्मान्निर्देश-
साम्येन प्रत्यभिज्ञायमानत्वात् प्रकृतस्यैवाक्षरस्य भूतयोनेः सर्वज्ञत्वं सर्ववित्त्वं च धर्म उच्यत इति गम्यते। अक्षरात्परतः पर इत्यत्रापि न
प्रकृताद्भूतयोनेरक्षरात्परः कश्चिदभिधीयते। कथमेतदवगम्यते। येनाक्षरं पुरुषं वेद सत्यं प्रोवाच तां तत्त्वतो ब्रह्मविद्यामिति प्रकृत-
स्यैवाक्षरस्य भूतयोनेरदृश्यत्वादिगुणकस्य वक्तव्यत्वेन प्रतिज्ञातत्वात्। कथं तर्ह्यक्षरात्परतः पर इति व्यपदिश्यत इत्युत्तरसूत्रे वक्ष्यामः॥

गम्यत्वेनोक्तस्याक्षरस्य भूतयोनेरक्षरं पुरुषं वेदेत्यक्षरश्रुत्या वेद्यत्वलिंगवत्या पूर्वमेव ब्रह्मत्वेन परामृष्टत्वादित्याह येनेति येन ज्ञानेनाक्षरं भू- १८
तयोनिं सर्वज्ञं पुरुषं वेद तां ब्रह्मविद्यां योग्याय प्रब्रूयादित्युपक्रम्याप्राणो ह्यमना: शुभ्रो ह्यक्षरात्परतः पर इत्युच्यमानः परो भूतयो-
निरिति गम्यत इत्यर्थः। तर्हि पंचम्यंताक्षरशब्दार्थः क इत्याशंक्य ज्ञानमिति वक्ष्यत इत्याह। कथमिति। ॥ ॥ ॥

परविद्येति समाख्यापि तद्विषयस्य ब्रह्मत्वमित्याह। अपि चेति। ननु प्रधानविद्यापि कारणविषयत्वात्परैवेत्यत आह परापरविभागो हीति। अनित्यफलत्वेनापरविद्यां निन्दित्वा मुमुक्षोर्ब्रह्मविद्यां मोक्षं चेति नामरूपे अविद्याकृते इत्यर्थः। अस्तु प्रधानविद्यापि मुक्तिफलत्वेन परैवेत्यत आह। नवेति। ननु यः सर्वज्ञ इत्यत्रापरविद्याविषय उच्यते अद्रेश्यत्वादिके ननु प्रधानविद्यैवात इत्यत आह इति स्मृत्वेति। इतश्च म

अपि चात्र द्वे विद्ये वेदितव्ये उक्ते परा चैवापरा चेति। तत्रापरा ऋग्वेदादिलक्षणा विद्योक्ता तथैव परा यया तदक्षरमधिगम्यत इत्यादि तत्र परस्य दपनिःश्रेयसफलतया परिकल्प्यते। न च प्रधानविद्या निःश्रेयसफला केनचिदभ्युपगम्यते। तिस्रश्च विद्याः प्रतिज्ञायेरन् त्वन्मते अक्षरात्पूतयोनेः परस्य परमात्मनः प्रतिपाद्यमानत्वात्तु द्वे एव तु विद्ये वेदितव्ये इह निर्दिष्टे॥ कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवतीति चैकविज्ञानेन सर्वविज्ञानापेक्षणात् सर्वात्मके ब्रह्मणि विवक्ष्यमाणे ऽवकल्पते। नाचेतनमात्रैकायतने प्रधाने भोग्यव्यतिरिक्ते वा भोक्तरि॥ ॥ ॥ ॥ ॥

तपोत्ते ब्रह्मत्वमित्याह। कस्मिन्निति। अचेतनमात्रस्यैकायतनमुपादानं तत्त्वात्तत्कार्यज्ञानेऽपि तदकार्याणामात्मनां ज्ञानं न भवति। एवं जीवे ज्ञाते तदकार्यस्य भोग्यस्याज्ञानं न भवतीत्यर्थः॥ ॥ ॥ ॥ ॥

मु० भा० ब्रह्मविद्यायाः श्लाघ्यत्वमुक्तं तपोनिर्वृत्तेत्याह अपि चेति । स ब्रह्मविद्यां सर्वविद्यानां प्रतिष्ठां समाप्तिमभिप्रेत्य ब्रह्मविद्यामनुवाच । ब्रह्मणि स-
१२ र्ववेद्यानां विद्याफलानां चान्तर्भावात् ब्रह्मविद्या सर्वविद्याप्रतिष्ठा । ननु परविद्यापरस्य कर्मणः किमर्थमुक्तेत्यत आह । अपरेति । स्वर्गं ते ग-
च्छन्तीति तत्त्वादिना विनाशिनः । श्रेष्ठाः नित्यफलसंपादनासमर्थाः । षोडश ऋत्विजः पत्नी यजमानश्चेत्यष्टादश । यज्ञेनान्यमनिमित्तेन निरूप्य

अपि च स ब्रह्मविद्यां सर्वविद्याप्रतिष्ठामथर्वाय ज्येष्ठपुत्राय प्राहेति । ब्रह्मविद्यां प्राधान्येनोपक्रम्य परापरविभागेन परां विद्याम-
सनाधिगमनीं दर्शयित्वा तस्या ब्रह्मविद्यात्वं दर्शयति सा च ब्रह्मविद्या समाप्या तदधिगमसाधनस्य ब्रह्मत्वेनाभिधित्सातुः । अप-
रत्र वेदादिलक्षणा कर्मविद्या ब्रह्मविद्योपक्रमे उपन्यस्तेत ब्रह्मविद्याप्रशंसार्थेति । प्लवा ह्येते अदृढा यज्ञरूपा अष्टादशोक्तम-
वरं येषु कर्म एतत् श्रेयो येऽभिनन्दन्ति मूढा जरामृत्युं ते पुनरेवापि यन्तीत्येवमादिनिन्दावचनात् । निन्दिताच्चापरां विद्यां ततो वि-
रक्तस्य परविद्याधिकारं दर्शयति । परीक्ष्य लोकान्कर्मचितान्ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन तद्विज्ञानार्थं स गुरुमेवा-
भिगच्छेत्समित्पाणिः ॥

तद्दृति यज्ञरूपाः । तथा हि ऋत्विग्भिः पाययंति यज्ञं कारयंतीति ऋत्विजः । यजत इति यजमानः । पत्न्यन्तो यज्ञसंयोग इति सूत्रेण पतिशब्दस्य १९
नकारोऽन्तादेशो यज्ञसंयोगे विहित इति पत्नी । एवमृत्विगादिनामप्रवृत्तिनिमित्तेष्वपि तद्रूपा यज्ञरूपाः । येऽन्ये वस्तुनि नित्यफलके कर्मं
श्रेष्ठं कं एतदेव कर्म श्रेयो नान्यदात्मज्ञानमिति ये मूढास्तुष्यन्ति ते पुनः पुनर्जन्ममरणमापद्यंती त्यर्थः । तद्विज्ञानार्थमित्यत्र ज्ञानार्थं गु-

ब्रह्मनिष्ठस्याप्यनधीतवेदस्य गुरुत्वं वारयति। श्रोत्रियमिति। कार्यमुपादानाभिन्नमित्यंशे दृष्टान्तः सर्वांशसाम्येऽनिष्टापत्तेरि
त्याह। अपि च स्थूला इति। विशेषणान्तर्गतो भेदोक्तेर्न प्रधानमिति हेतुद्वयं विभज्य व्याचष्टे विशिनष्टीत्यादिना दिव्यो द्योतनात्मकः स्व

श्रोत्रियं ब्रह्मनिष्ठमिति। यत्तूक्तमचेतनानां पृथिव्यादीनां दृष्टान्तत्वेनोपादानात् दार्ष्टान्तिकेनाप्यचेतनेन भूतयोनिना भवि
तव्यमिति। तदयुक्तं। नहि दृष्टान्तदार्ष्टान्तिकयोरत्यन्तसाम्येन भवितव्यमिति नियमोऽस्ति। अपि च स्थूलाः पृथिव्यादयो दृष्टान्त
त्वेनोपात्ता इति न स्थूल एव दार्ष्टान्तिको भूतयोनिरभ्युपगम्यते। तस्माददृश्यत्वादिगुणको भूतयोनिः परमेश्वर एव। विशेषण
भेदव्यपदेशाभ्यां च नेतरौ॥ इतश्च परमेश्वर एव भूतयोनिः नेतरौ शारीरः प्रधानं वा कस्माद्विशेषणभेदव्यपदेशाभ्यां। विशिन
ष्टि हि प्रकृतं भूतयोनिं शारीराद्विलक्षणत्वेन दिव्यो ह्यमूर्तः पुरुषः सबाह्याभ्यन्तरो ह्यजः। अप्राणो ह्यमनाः शुभ्र इति। न ह्येतद्दि
व्यत्वादिविशेषणमविद्याप्रत्युपस्थापितनामरूपपरिच्छेदाभिमानिनः तद्धर्मान्स्वात्मनि कल्पयतः शारीरस्योपपद्यते। तस्मा
त्साक्षादौपनिषदः पुरुष इहोच्यते। तथा प्रधानादपि प्रकृतं भूतयोनिं भेदेन व्यपदिशति। अक्षरात्परतः पर इति॥ ॥

यंज्योतिरमूर्तः पूर्णः पुरुषः पुरिशयः सह बाह्यं स्थूलमाभ्यन्तरं सूक्ष्मकारणं तत्र स्वमन्ताभ्यां सहाधिष्ठानत्वेन तिष्ठतीति सबाह्याभ्यन्त
रः हि तथा श्रुतिषु प्रसिद्ध इत्यर्थः। अविद्याकृतं नामरूपात्मकं शरीरं तेन परिच्छेदात्मत्वं। तस्य शरीरस्य धर्मान् जाड्यमूर्तत्वादीनित्यर्थः॥

स॰भा नन्वक्षरशब्देन प्रधानोक्तावप्युक्तं प्रधानस्य मतिरस्तु तं बाध्येत। तत्राह। अक्षरमव्याकृतमिति। अश्नोति व्याप्नोति स्वविकारजात
२० मित्यक्षरं अव्याकृतं नामरूपाद्यनादीति यावत्। नामरूपयोर्बीजमीश्वरः तस्य शक्तिरूपं परतन्त्रत्वादुपादानमपि शक्तिरित्युक्तं। भूता
नां सूक्ष्माः संस्काराः यत्र तद्भूतसूक्ष्मं। ईश्वराश्रितत्वात्तं आश्रयो यस्य तत्तथा। तस्यैव चिन्मात्रस्य जीवेश्वरभेदोपाधिभूतं यत्तु ईश्वरस्या
श्रयो विषयो यस्येति नानाजीववादिनां व्याख्यानं तच्चाध्यवहिर्भूतं। एतस्मिन्नेव खल्वक्षरे आकाश ओतश्च प्रोतश्चेत्योतप्रोतभावेनाव्या
कृतस्य चिदध्यस्तत्वश्रुतेः आश्रयपदलक्षणोपान्निर्मूलत्वात्। नहि मूलप्रकृतेर्भेदो क्वचिन्मन्यमस्ति। न चेंद्रो मायाभिरिति श्रुतिर्मा
नं। अजामेकामित्यादिनेकश्रुतिबलेन तल्लाघवतर्कसहायेन तस्याः श्रुतेर्बुद्धिभेदेन मायाभेदानुवादित्वात्। तदुक्तं सुरेश्वराचार्यैः स्वतत्त्व

अक्षरमव्याकृतं नामरूपबीजशक्तिरूपं भूतसूक्ष्ममीश्वराश्रयं तस्यैवोपाधिभूतं सर्वस्माद्विकारात्परः यः

विद्याभेदो जन्मनाशयोर्निषिध्यत इति। सांख्ययोगाचार्यैः पुराणेतिहासकर्तृभिश्च मूलप्रकृत्यैक्यं वदंति। नन्वविद्यैक्ये बंधमुक्ति
व्यवस्था कथं न च व्यवस्था नास्तीति वाच्यं। श्रवणे प्रवृत्त्यभावापत्तेरिति चेत्। उच्यते। ये अविद्यानानात्वमिच्छंति तैरपि परिच्छि २०
न्नेन सांशत्वमविद्याया अंगीकार्यं तथा चानर्थात्मकस्य संघातात्मनापरिणतस्यांशस्य विद्यांशोपहितजीवभेदाद्व्यवस्था सिध्यति।
यस्य ज्ञानमंतःकरणे जायते तस्यांतःकरणपरिणतस्याज्ञानांशस्य नाशो मुक्तिरिति। एवं च श्रोतुः स्वरूपानंदप्राप्तिः श्रवणादौ प्रवृत्तिर्वि
द्वदनुभवो जीवन्मुक्तिशास्त्रं चेति सर्वमव्याहतं भवति। न चैवं नानाजीववपक्षादविशेषः मूलप्रकृतिनानात्वाभावादित्यलं॥

परत्वे हेतुः। अविकार इति। ननु सूत्रकृता अतो प्रधानाद्भेदः किं व्यपदिश्यते तत्राह। नाचेति। कापिलतन्त्रप्रसिद्धं यत इति प्रधानमक्षरान
मेव। ततोऽन्यस्याप्रामाणिकत्वादिति भावः। अतोऽक्षरान्नमेव भूतयोनिरिति सर्वपक्षं कृत्वा निरस्यते तेन निरासेनार्थात्सांख्यकल्पितप्रधान
निरास इति मंतव्यं। वृत्तिकृन्मतेनाक्षरस्य सूत्रं व्याचष्टे। अपि चेत्यादिना। प्राणो मनः सर्वेन्द्रियाणि च। खं वायुर्ज्योतिरापः पृथिवीति श्रुतिः

अविकारस्तस्मात्परतः पर इति भेदेन व्यपदेशात्परमात्मानमिह विवक्षितं दर्शयति। नात्र प्रधानं नाम किंचित्स्वतंत्रं तत्त्वमभ्युप
गम्य तस्माद्भेदव्यपदेश उच्यते। किं तर्हि यदि प्रधानमपि कल्प्यमानं श्रुत्यविरोधेनाव्याकृतादिशब्दवाच्यं भूतसूक्ष्मं परिकल्प्येत। क
ल्प्यतां तस्माद्भेदव्यपदेशात्परमेश्वरो भूतयोनिरित्येतदिह प्रतिपाद्यते। कुतश्च परमेश्वरो भूतयोनिः॥ रूपोपन्यासाच्च। अपि चा
क्षरात्परतः पर इत्यस्यानंतरम् एतस्माज्जायते प्राण इति प्राणप्रभृतीनां पृथिवीपर्यन्तानां तत्त्वानां सर्गमुक्त्वा तस्यैव भूतयोनेः स
र्वविकारात्मकं रूपमुपन्यस्यमानं पश्यामः। अग्निर्मूर्धा चक्षुषी चन्द्रसूर्यौ दिशः श्रोत्रे वाग्विवृताश्च वेदाः। वायुः प्राणो हृदयं विश्व
मस्य पद्भ्यां पृथिवी ह्येष सर्वभूतान्तरात्मा इति॥ तच्च परमेश्वरस्यैवोचितं सर्वविकारकारणत्वात्। न शारीरस्य तनुमहिम्नो नापि प्रधान
स्यायं रूपोपन्यासः संभवति। सर्वभूतान्तरात्मत्वासंभवात्। तस्मात्परमेश्वर एव भूतयोनिर्नेतराविति गम्यते। कथं पुनर्भूतयो
नेरयं रूपोपन्यास इति गम्यते प्रकरणात् य इति च प्रकृतानुकर्षणात्। भूतयोनिं हि प्रकृत्य एतस्माज्जायते प्राण एष सर्वभूतान्तरा
त्मेति। अयं तु भूतयोनिविषयमेव भवति। यथोपाध्यायं प्रकृत्येतस्याध्येष वेदाध्यायतीति वचनमुपाध्यायविषयमेव भवति तद्व
त्। कथं पुनरदृश्यत्वादिगुणकस्य भूतयोनेर्विग्रहवद्रूपं संभवति। सर्वात्मत्वविवक्षयेदमुच्यते। न तु विग्रहवत्त्वविवक्षयेति दोषः।
अग्निर्द्युलोकः असौ वाव लोको गौतमाग्निरिति श्रुतेः। विवृताः वेदा वागिन्द्रियम। पद्भ्यां पादाविति यस्यैष रूपं स एव सर्वप्राणिनामन्त

सं. भा.

२१

यथा कश्चित्तत्त्ववित्स्वस्य सर्वात्मत्वप्रकटनार्थमहं मनुरभवमिति सा नृगा मतिर्नत्वब्रह्मादिकमात्मनो विवक्षति। अफलत्वात्तथेहापीत्याहुश्च
हमत्र मिति। वज्रिकुम्भारत्नं हरिष्यति। अन्ये पुनरिति। एष सर्वभूतात्मा सूत्रात्मा एतस्माद्भूतयोनेर्जायत इति श्रुतेः तस्मिन्नन्वये न हिरण्यग
र्भस्यात्र जायमानत्वेनोपन्यासादिर्विरोधः॥ निरूढः सूत्रात्मा चरितः सर्पः अग्निर्भूलोकः पश्वामिद्रूपः सर्पः सोपि घुलोकाभिव्यक्तस्मात्प्रजापतेस्त
र्पः। तस्मादिदम् एवमस्मिदिति श्रुतेः संगतम्। अतो नमद्योपि सह छिरे यथाञ्जा नरूपमिति भावः। यद्वा भग्निर्मूर्द्धे स्वत्नुभूतयोनेः सर्वात्मत्वं विवक्षि
तमिति तत्रैव हसर्वात्मत्वमप्यौति। ननु हिरण्यगर्भस्य जन्मान्तरानुरूपकमन्त्रवाक्यं तत्राऽस्तु इति चेत्। अग्रे समवर्तताजन्मान्यत्रानुरूपक
श्रहमत्रमहमन्नादइत्यादिवत्। अन्ये पुनर्मन्यन्ते। नायं भूतयोनेरूपोपन्यासः जायमानत्वेनोपन्यासात् एतस्माज्जायते प्राणो मनः
सर्वेन्द्रियाणि च। खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणीति हि पञ्चेन्द्रियाणि दिषु। भिन्नं तत्त्वजातं जायमानं निरदिक्षत्। अपि
च तस्मादग्निः समिधो यस्य सूर्यः इत्येवमाघुतश्च सर्व ॐ षधयो रसाश्चेत्येवमन्तं जायमानत्वेनैव निर्दिष्यते। हेयकभूमकस्माद्दृत
एतेभूतयोनेरूपमुपन्यसेत्। सर्वात्मत्वमपि सद्धि परिसमाप्या पदेश्यति पुरुषएवेदं विश्वं कर्मेत्यादिना श्रुतिः स्मृतिस्मृतौ लोका
शरीरस्य प्रजापतेर्जन्म निर्दिश्यमानमुपलभामहे हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्। स दाधार पृथिवीं द्या
मुतेमां कस्मै देवाय हविषा विधेमेति समवर्त्ततेत्यजायतेत्यर्थः। तथा स वै शरीरी प्रथमः स वै पुरुष उच्यते। आदिकर्ता स भूतानां ब्र
धमन्त्रवाक्यं तत्राह श्रुतीति। अग्रे समवर्तत जातः सन्भूतस्यात्मस्यैकः पतिरीश्वरप्रसादादभवत्स सञ्जातात्मा इमां पृथिवीं द्युस्थूलं सर्व
मधारयत्। कस्मै इति प्रजापतिः कशब्दः सर्वनामत्वाभावेन स्मादेशाभावः कारलोपेन कस्मै देवायप्रमाणात्मकहविषा विधेम परिचरेमेति
प्रीत्येमं। कतमएकोदेवइति प्राण इति स ब्रह्मेति श्रुतेः। यद्वा प्रजापतेरेकस्य एकस्मै देवायेत्यर्थः एको देवः सर्वभूतेषु गूढ इति श्रुतेः तत्रात २१

ननु तस्य भूतांतरात्मत्वं कथं तत्राह। विकारेति। एवं कर्मकृष्टोपासनाकर्मसमुच्चयानुष्ठानादस्मिन्काले सर्वप्राणिव्यष्टिलिंगानां
व्यापकं सर्वप्राणपंतर्गतं तन्नाम कर्मेंद्रियप्राणात्मकं समष्टिलिंगशरीरं जायते तद्भूतस्य सूत्रात्मनः सर्वभूतांतरात्मत्वं युक्तमित्यर्थः। स्व
पक्षे संगत्यमाह। अस्मिन्नध्याय इति। कर्म सफलं श्रौतस्मार्तादिकं तत्पञ्चपुरुषविद्येति सर्वांतरत्वरूपोपन्यासश्च भूतयोनौ ब्रह्मण्येवाक्यं सम
न्वितमित्यर्थः। वैश्वानरः। छंदोगश्रुतिमुदाहरति॥ को नइति। प्राचीनशाल सत्ययज्ञ इंद्रद्युम्न जनबुडिला मिलित्वा मीमांसां चक्रुः। को न आ

विकारपुरुषस्यापि सर्वभूतांतरात्मत्वं संभवति प्राणात्मना सर्वभूतानामध्यात्ममवस्थानात्। अस्मिन्नप्यध्याये पुरुष एवेदं
विश्वं कर्मेत्यादि सर्वरूपोपन्यासः परमेश्वरप्रतिपत्तिहेतुरित्याम्नेयम्॥ वैश्वानरः साधारणशब्दविशेषात्॥ को न आ
त्मा किं ब्रह्मेति। आत्मानमेवेमं वैश्वानरं संप्रत्यध्येषि तमेव नो ब्रूहीति इति चोपक्रम्य द्युसूर्यवाय्वाकाशवारिपृथिवीनां सुते
जस्त्वादिगुणयोगमेकैकोपासननिंदया च मूर्द्धादिभावमुपदिश्याम्नायते॥ ॥ ॥ ॥

त्मा किं ब्रह्मेति। आत्मैव ब्रह्मेति ज्ञापनार्थं पदद्वयं। ते पंचापि निश्चयमप्राप्य उद्दालकमाजग्मुः सोपि सम्यक् न वेदेति तेनोद्दालकेन
सह षडप्यश्वपतिं कैकेयं राजानमागत्योचुः। आत्मानमिति। अध्येषि स्मरसि। तमेव नो ब्रूहीति। राजा तु तेषां भ्रांतिनिरासार्थं त्व
प्रत्येकं पप्रच्छ त्वं कं त्वमात्मानमुपास्स इति। ते च प्राचीनशालादयः क्रमेण प्रत्येकमूचुः दिवमेवाहं वैश्वानरं भगवो राजन्नुपासे
वाहं वे भगवो पुनः वय्वाकाशमेवा आप एव। पृथिवीमेवाहं वे प्रीति॥ ॥ ॥ ॥ ॥

छा॰भा॰

२२

न तो न जा द्युमूर्धादीनां च लोकानामाक्रमेण सुतेजस्त्वविश्वरूपत्वपृथग्वर्त्मात्मत्वबहुलत्वरयित्वप्रतिष्ठात्वगुणान् विधाय भवंतो
यदि मामप्यच्छ तर्हि द्युमूर्धादि भगवतो वैश्वानरस्यांगेष्वेवमेते केवैश्वानरत्वदृष्ट्या भवेयुस्तदाक्रमेण मूर्धपातो व्यतस्यात्ततो ऽकृमणो देह
विद्या णीत्वबन्ति भेदस्य दर्शोपाभवतां द्युरिति भस्ते ऽप्यासनं निंदितं सुतेजस्त्वगुणको द्युलोकोऽस्मादात्मनो वैश्वानरस्य मूर्द्धा विश्वरू
पत्वगुणकः सूर्यो ऽस्य चक्षुरित्येवं द्युमूर्धादीनां मूर्धादिभावमुपदिश्य समस्तवैश्वानरध्यानविधित्सया ऽऽह। यस्त्वेतमिति। आ
भिमुख्येन प्रदेशमात्रं विश्वं तिमी तेजानातीत्य भिविमानः। तं सर्वज्ञं। स तदुपासकः सर्वं चभोग्यं भुंक्त इत्यर्थः। लोकाभूतादयो भूता

यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते स सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मस्वन्नमत्तीति तस्य ह वा
एतस्यात्मनो वैश्वानरस्य मूर्धैव सुतेजाश्चक्षुर्विश्वरूपः प्राणः पृथग्वर्त्मात्मा संदेहो बहुलो बस्तिरेव रयिः पृथिव्येव पा
दावुर एव वेदिर्लोमानि बर्हिर्हृदयं गार्हपत्यो मनो ऽन्वाहार्यपचन आस्यमाहवनीयः इत्यादितत्रसंशयः॥ किं वैश्वानर
शब्देन जाठरोऽग्निरुपदिश्यते उत भूताग्निरथवा तदभिमानिनी देवता। अथवा शारीर आहोस्वित्परमेश्वर इति। किं पुनरत्र
संशयकारणं वैश्वानर इति जाठरभूताग्निदेवतानां साधारणशब्दप्रयोगादात्मेति च शारीरपरमेश्वरयोस्तत्रकस्योपा
दानं न्याय्यं कस्य वा हानमिति भवति संशयः॥ ॥
निरूपणायाह। जीवा इति भेदः। सुष्ठु तेजः कांतिर्यस्य द्युलोकस्य स सुतेजाः। विश्वानि रूपाणि अस्य सूर्यस्य। एष प्रकृष्ट एष २२
नील इति श्रुतेः। एवमनेकानाविधवर्त्म गमनं आत्मा स्वभावो यस्य वायोः स नानागति त्वगुणको ऽस्य प्राणः बहुलत्वमापि त्वतद्गुण
आकाशो ऽस्य संदेहो देहमध्यं रयित्वं धनत्वं तद्गुणम्बापो ऽस्य बस्तिर्मूत्रस्थानं प्रतिष्ठा तद्गुणा पृथिवी तस्य पादौ तस्य ह। गाथा

पूर्वमुपक्रमस्थाद्द्युपलादिसाधारणधर्मस्य वाक्यशेषस्थसर्वज्ञत्वादिलिंगेन ग्रहणे निष्ठत्वमनुक्तं तद्वदत्राप्युपक्रमस्थसाधारण
वैश्वानरशब्दस्य वाक्यशेषस्थहोमाधारत्वलिंगेन जाठरनिष्ठत्वमिति दृष्टांतेन पूर्वेण प्रसंगति। किं तावद्दिव्यादिना। पूर्वोत्तरपक्षयोः जाठ
रब्रह्मलोकधर्मो नेकफलं। प्रदर्शनेन तत्संप्रतिपद्यते सोयं पुरुषेवंरीतिरस्तीत्यर्थः। पक्षांतरमाह॥ अभिमानं वेति विश्वस्मै भुवनाय वैश्वान

किं तावत्प्राप्तं जाठरोग्निरिति कुतस्तत्र हि विशेषेण क्वचित्प्रयोगोपलभ्यते। अयमग्निर्वैश्वानरो योयमंतः पुरुषे येनेदमन्नं
पच्यते यदिदमद्यते इत्यादौ॥ अग्निमात्रं वास्य लक्षणया स्वेनाप्रियप्रयोगदर्शनात्। विश्वस्मा अग्निं भुवनाय देवा वैश्वानरं के
तुमह्नामकृण्वन्नित्यादौ। अग्निशरीरा वा देवता स्यात्। तस्यामपि प्रयोगदर्शनात्। वैश्वानरस्य सुमतौ स्याम राजा हि कं भुव
नानामभिश्रीरित्येवमाद्यायाः श्रुतेर्दैवतायामैश्वर्याद्युपेतायां संभवात्॥

रमग्निमह्नां केतुं चिह्नं सूर्यं देवा अकृण्वन् कृतवंतः सूर्योदये दिनव्यवहारादित्यर्थः। स्यात् वैश्वानर इत्यनुषंगः। हि यस्मात्कं सु
खप्रदो भुवनानां राजा वैश्वानरोऽभिमुखः श्रीरस्य स अभिश्रीरीश्वरः॥ तस्मात्तस्य वैश्वानरस्य सुमतौ वयं स्याम तस्यास्त्वं वयमा

कृष्णमिश्रैर्विलिखितम्॥

स्०भा
२३

पक्षत्रयेप्यरुचिं द्योतयन्कल्पांतरमाह। अथवेत्यादिना। आत्मा वैश्वानर इति श्रुतेरित्यर्थः केवलं वैश्वानरशब्दश्रवणस्यास्यान्यत्र जाठरे वैश्वा-
नर इति मुख्यः पूर्वपक्षः। आत्माग्निर्हि देहेको साधारणलिंगात्। तस्य देहव्यापित्वादात्मत्वं। श्रुतो मूर्धत्वादिकल्पनया ... इत्याह कृत्स्न ...

अथवात्मशब्दसामानाधिकरण्यात्। उपक्रमे च कोन आत्मा किं ब्रह्मेति केवलात्मशब्दप्रयोगात्। आत्मशब्देन वैश्वानरश-
ब्दः परिणेयः इत्युक्तं भवेत॥ तथा च शारीर आत्मा ... स्यात्। तस्य भोक्तृत्वेन वैश्वानरत्वे निकटवर्तित्वात्। देहमात्रमिति च विशेषणं तस्मि-
न्नुपाधिपरिच्छिन्ने संभवात्। तस्मान्नेश्वरो वैश्वानर इत्येवं प्राप्ते। ततः इदमुच्यते। वैश्वानरः परमात्मा भवितुमर्हतीति। कु-
तः साधारणशब्दविशेषात्। साधारणशब्दयोर्विशेषः साधारणशब्दविशेषः। यद्यप्येतावुभावप्यात्मवैश्वानरशब्दौ साधारण-
शब्दौ वैश्वानरशब्दस्तु त्रयस्य साधारणः आत्मशब्दश्च द्वयस्य तथापि विशेषो दृश्यते। येन परमेश्वरपरत्वं तयोरभ्युपगम्यते।
तस्य ह वा एतस्यात्मनो वैश्वानरस्य मूर्धैव सुतेजा इत्यादिः अत्र हि परमेश्वर एव द्युमूर्धत्वादिविशिष्टो ऽवस्थांतरगतः प्रत्य-
गात्मत्वेनोपन्यस्त आध्यानायेति गम्यते॥

मितिध्येयं। लिंगं तत्परं। तत इदमिति। साधारणशब्दस्योपक्रमस्थयोर्विशेषात् प्रथमश्रुतमुख्यत्रैलोक्यशरीरलिंगात् सर्वात्मके-
श्वरपरत्वं युक्तं। न चारम्भश्रुतकल्पितदेहसाधारणलिंगेन जाठरपरत्वमित्यर्थः ननु निर्विशेषस्य कुतो विशेषः इत्यत आह। अत्रहीति। २३

जाठरस्यापि ध्यानार्थं विशेषकल्पनेति चेत्तन। अस्य सकलस्यनापत्तेः। ईश्वरस्य तूपादानत्वाद्विशेषः सन्नेव ध्यानार्थं उपास्यतामिस्याद्

कारणत्वात्। कारणस्य हि सर्वाभिः कार्यगताभिरवस्थाभिरवस्थावत्वात् द्युलोकाद्यवयवत्वमुपपद्यते। स सर्वेषु लोके
षु भूतेषु सर्वेष्वात्मस्वन्नमत्तीति च सर्वलोकाद्याश्रयं फलं श्रूयमाणं परमकारणपरिग्रहे संभवति। एवं हास्य सर्वे पाप्मा
नः प्रदूयन्त इति तद्विदः सर्वपापप्रदाहश्रवणं। को न आत्मा किं ब्रह्मेति चात्मब्रह्मशब्दाभ्यामुपक्रम इत्येवमेतानि ब्रह्मलिंगा
नि परमेश्वरमेव गमयंति। तस्मात्परमेश्वर एव वैश्वानरः। स्मर्यमाणमनुमानं स्यादिति। इतश्च परमेश्वर एव वैश्वानरः। य
स्मात्परमेश्वरस्यैव ह्यग्निरास्यं द्यौर्मूर्द्धेतीदृशं त्रैलोक्यात्मकं रूपं स्मर्यते। यस्याग्निरास्यं द्यौर्मूर्द्धा खं नाभिश्चरणौ क्षितिः। सूर्यश्च
क्षुर्दिशः श्रोत्रं तस्मै लोकात्मने नम इति। तस्य यत्स्मर्यमाणं रूपं मूलभूतां श्रुतिमनुमापयत् अस्य वैश्वानरशब्दस्य परमेश्व
रपरत्वेऽनुमानं लिंगं गमकं स्यादित्यर्थः। इतिशब्दो हेत्वर्थो यस्मादिदं गमकं तस्मादपि वैश्वानरः परमात्मैवेत्यर्थः। यद्यपि
स्तुतिरियं तस्मै लोकात्मने नम इति॥

कारणत्वादिति। लिंगांतरापेक्षा हि। सत्तवैश्विसादिना। यथाग्निः श्लिष्टमिषीकातूलं दीप्यते एवं हास्य विदुषः सर्वे। नन्वसदा
तेषेण विस्तु। तस्संभवान्मूलश्रुत्यपेक्षस्याह। यद्यपि स्तुतिरिति॥

सू०भा तथापीति पदमर्थतः पठति स्तुतित्वमपीति। द्युमूर्द्धत्वादिरूपेण स्तुतिर्निरपेक्षेण कर्तुमशक्या विनाश्रुतिविनिर्देशः। सता रूपेण स्तुतिसं
भवान्न सर्वरूपपद इति भावः। शब्दादीनां गतिं न कृत्वा मुक्तसिद्धान्तमाक्षिप्य समाधत्ते। शब्दादिभ्य इति। स एषोऽग्निर्वैश्वानर इत्यग्निरहस्ये वैश्वा
२४ नरविद्यायां श्रुतोऽग्निशब्दः ईश्वरे न संभवतीत्यन्वयः। तत्र स्तुत्यादिशब्दार्थमाह हृदयमित्यादिना। भक्तमन्नं होमीयं होमसाधनं तेन प्राणाग्निहो
वे स्तुतिलिंगं विना सति मूलभूते ईश्वराक्षे संपत्कुर्वद्दर्शनरूपेण स्तुतिः संभवति। द्यां मूर्द्धानं यस्य विप्रा वदन्ति खं वै नाभिं चन्द्रसूर्यौ च नेत्रे।
दिशः श्रोत्रे विद्धि पादौ क्षितिं च सोऽचिन्त्यात्मा सर्वभूतप्रणेतेत्येवंजातीयका च स्मृतिरिहोदाहर्तव्या।। शब्दादिभ्योऽन्तःप्रतिष्ठाना
च्च नेति चेन्न तथा दृष्ट्युपदेशादसम्भवात्पुरुषमपि चैनमधीयते।। अत्राह न परमेश्वरो वैश्वानरो भवितुमर्हति। कुतः शब्दादिभ्योऽन्
तःप्रतिष्ठानाच्च। शब्दस्तावद्वैश्वानरशब्दो न परमेश्वरे संभवति। अर्थान्तरे रूढत्वात्। तथाग्निशब्दः स एषोऽग्निर्वैश्वानर इति। आ
दिशब्दात् हृदयं गार्हपत्य इत्याद्यग्नित्रेताप्रकल्पनं। तद्यद्भक्तं प्रथममागच्छेत्तद्धोमीयमित्यादिना च प्राणाहुत्यधिकरणतासंकी
र्तनं। एतेभ्यो हेतुभ्यो जाठरो वैश्वानरः प्रत्येतव्यः। तथान्तःप्रतिष्ठानमपि श्रूयते। पुरुषेऽन्तःप्रतिष्ठितं वेदेति तच्च जाठरे संभवति।
यदप्युक्तं मूर्द्धैव सुतेजा इत्यादेर्विशेषात्कारणात् परमात्मा वैश्वानर इत्यत्र ब्रूमः। कुतो ह्येष निर्णयो यदुभयथापि विशेषप्रतिभा २४
ने सति परमेश्वरविषय एव विशेष आश्रयणीयो न जाठरविषय इति।।
शंकार्थमित्यर्थः। वाजसनेयिनामग्निरहस्ये सप्तपंचांके वैश्वानरविद्यायां श्रूयते स यो हैतमग्निं वैश्वानरं पुरुषविधं पुरुषेऽन्तःप्रतिष्ठितं वेद स
सर्वत्रान्नमत्तीत्युक्तं देहान्तस्थत्वं जाठरे संभवति श्रुतिरूढिरिति भावः। तथेति। अत्र सूत्रे आदिपदेनैवान्तःप्रतिष्ठानस्य ग्रहे संभवति पृथगुक्तिः
साधारणलिंगत्वद्योतनार्था। शब्दादिबलादिदमपि जाठरगमकमित्यभ्युच्चयः।। ॥ ॥ ॥

यद्यपि द्युमूर्द्धत्वादिविशेषैरीश्वरपरत्वप्रतीतिः होमाधारत्वादिना जाठरपक्षप्रतीतिरिति प्रतिभानं समं तथापि पारमेश्वरो विशेषो जाठरे न संभवतीति बलवानित्युक्तमाह। अथवेति। एवं द्युमूर्द्धत्वादिनिर्देश इत्यस्यार्थः। इमां पृथिवीं द्यामपि तेज एव व्याप्य दिवि ज्योती रोदसी तमो मध्यममंतरिक्षं च यो भूताग्निर्भानुरूपेणाततान तस्याप्यवान्तरस्थानत्वमित्यर्थः। जडमात्रस्य न ध्येयत्वमित्यत आह अथवेति। परमेश्वरदृष्ट्योपास्यजाठराग्निप्रतीकत्वाच्च

अथवा भूताग्नेरंतर्बहिश्चावर्तमानस्यैष निर्देशो भविष्यति। तस्यापि हि द्युलोकादिसंबंधो मंत्रवर्णादवगम्यते। यो भानुना पृथिवीं द्यामुतेमामाततान रोदसी अंतरिक्षमित्यादौ। अथवा तच्छरीराया देवताया ऐश्वर्ययोगात् द्युलोकाद्यवयवत्वं भविष्यति। तस्मान्न परमेश्वरो वैश्वानर इत्यत उच्यते॥ न तथा दृष्ट्युपदेशादिति न शब्दादिभ्यः कारणेभ्यः परमेश्वरस्य प्रत्याख्यानं युक्तं। कुतः तथा जाठरापरित्यागेन दृष्ट्युपदेशात्। परमेश्वरदृष्टिर्हि जाठरे वैश्वानर इहोपदिश्यते। मनो ब्रह्मेत्युपासीतेत्यादिवत्। अथवा जाठरवैश्वानरोपाधिः परमेश्वर इह द्रष्टव्यत्वेनोपदिश्यते। मनोमयः प्राणशरीरो भारूप इत्यादिवत्। यदि चेह परमेश्वरो न विवक्ष्येत केवल एव जाठरोऽग्निर्विवक्ष्येत। ततो मूर्द्धैव सुतेजा इत्यादेर्विशेषस्यासंभव एव स्यात्। यथा तु देवताभूताग्निव्यपाश्रयेणाप्ययं विशेष उपपादयितुं न शक्यते। तथोत्तरत्रैव वक्ष्यामः॥

काभ्यां अग्निवैश्वानरशब्दाभ्यां द्युमूर्द्धत्वादिमानीश्वरो लक्ष्य इत्युक्त्वा कल्पांतरमाह। अथवा जाठर इति। अस्मिन्पक्षे शाखान्यायेनेश्वर उपास्यता पूर्वत्र गुणतेति भेदः। उपाधिवाचिभ्यां पदाभ्यामुपहितो लक्ष्य इत्यर्थः। लक्षणाबीजमसंभवं चाचष्टे। यदि चेति॥ ॥

सू.भा.
२५

पुरुषमपीत्यादिसूत्रशेषं व्याचष्टे। यदि चेत्केवल इति। ईश्वरप्रतीकत्वोपाधिस्वभूतस्य सर्वथ्यो विवक्ष्येतेतरेतिशेषः। मतप्यः पुरुषः स्यात्ः
स एषोऽग्निर्वैश्वानरश्च इति जाठरोपाधिक इति श्रुत्यर्थः। यो वेद स सर्वेषु भुंक्त इत्यर्थः। पुरुषत्वं पुरुषत्वं स्वचेतनस्य जाठरस्यानेस्तु हृत्प्रान्तरे
पुरुषविधत्वं देहाकारत्वं तस्यानेसाह। येत्विति। ननु जाठरस्यापि देहव्यापित्वात्तद्विधत्वं स्यादित्यत आह पुरुषविधत्वं च प्रकरणादिति न दे

यदि चैकेवलमेव जाठरो विवक्ष्येत पुरुषेऽन्तःप्रतिष्ठितत्वं केवलं तस्य स्यात् न तु पुरुषत्वं पुरुषमपि चैनमधीयते वाजसनेयिनः
स एषोऽग्निर्वैश्वानरो यत्पुरुषः स यो हैतमेवमग्निं वैश्वानरं पुरुषविधं पुरुषेऽन्तःप्रतिष्ठितं वेदेति॥ परमेश्वरस्य तु सर्वात्मत्वात्पुरु
षत्वं पुरुषेऽन्तःप्रतिष्ठितत्वं चोभयमुपपद्यते। ये तु पुरुषविधमपि चैनमधीयत इति सूत्रावयवं पठन्ति तेषामेषोऽर्थः। केवलजाठ
रपरिग्रहे पुरुषेऽन्तःप्रतिष्ठितत्वं केवलं स्यात्। न पुरुषविधत्वं पुरुषविधमपि चैनमधीयते वाजसनेयिनः। पुरुषविधं पुरुषेऽन्तःप्र
तिष्ठितं वेदेति पुरुषविधत्वं च प्रकरणात् यदधिदैवतं द्युमूर्धत्वादि पृथिवीप्रतिष्ठितत्वान्तं यच्चाध्यात्मं प्रसिद्धं मूर्धादि चुबुकप्र
तिष्ठितत्वान्तं तत्परिगृह्यते॥ अत एव न देवता भूतं च॥ यत्पुनरुक्तं भूताग्नेरपि मन्त्रवर्णे द्युलोकादिसंबंधदर्शनान्मूर्धैव सुतेजा इ
त्याद्यवयवकल्पनं तस्यैव भविष्यतीति। तत्रोच्यते। एतस्माद्देवतापि ऐश्वर्ययोगादिति तत्परिहर्तुमसमीच्यते॥ अत एवोक्तेभ्यो हेतुभ्यो न देव २५
ता वैश्वानरः तथा भूताग्निरपि न वैश्वानरः॥

हव्यापित्वं पुरुषविधत्वं किं तु विराड्देहाकारत्वमधिदैवं पुरुषविधत्वमध्यात्मं चोपासकमूर्धादिचुबुकान्तेष्वंगेषु संपन्नत्वमीश्वरस्य पुरुष
विधत्वमित्यर्थः। ईश्वरस्यांगेषु संपत्तिर्विवक्ष्यते। एवं जाठरनिरासपक्षद्वयं निरस्यति। अत एवेति सूत्रं व्याचष्टे। यत्पुनरित्यादिना॥ ७ ॥

मुमूर्धत्वादिः सर्वलोकफलभाक्त्वं सर्वपापप्रदाहः स्वात्मब्रह्मशब्दौ चोपक्रमः उक्तं हेतवस्तानेव स्मारयति। नहि भूताग्नेरित्यादिना॥ पोष्म
नुनेति मंत्रे लोकेश्वरत्वं हृष्यमहिमोक्त इति भावः। एवमप्येवैश्वानरशब्दो वीश्वरलिङ्गकाविलक्षणं अधुना भूतीकोपाधिपरिहारेणैवाकारद्यु
तृषाकृतस्य भगवतो वैश्वानरस्याध्यानं मूर्धादि चुबुकान्तेषु सं पादोपास्यत्वं गौकाद्देविनशब्दादिभ्यः शब्दादिभ्यो विश्वरूपोगच्छत्यानुरूप्य
त्वादंतः स्थत्वादीनां चतनत्वसंभवादित्याह। शब्दादिभ्यो। शब्दादिभ्योऽन्तः प्रतिष्ठानाच्च नेति चेन्न तथा दृष्ट्युपदेशादसंभवात् पुरुषमपि चैनमधीयते॥ ब्र
नहि भूताग्नेरुपकाशमात्रात्मकस्य द्युमूर्धत्वादिकल्पनेोपपद्यते। विकारस्य विकारान्तरात्मत्वासंभवात् तथा देवतायाः सम
पैश्वर्ययोगेन द्युमूर्धत्वादिकल्पनासंभवेत्यकारणत्वात्। परमेश्वरस्याधीनत्वमेवात् स्वात्मब्रह्मशब्दसंभवश्च सर्वे हेतुपपत्तेरुपस्थित
त्वन॥ साक्षादप्यविरोधं जैमिनिः॥ पूर्वं जाठराग्निप्रतीकोपाधिको परमेश्वरउपास्य इत्युक्तं मंतः प्रतिष्ठितत्वाद्यनुरो
धेन। इदानीं तु विनैव प्रतीकोपाधिकल्पनया साक्षादपि परमेश्वरोपासनपरिग्रहे न कश्चिद्विरोध इति जैमिनिराचार्यो मन्यते। न
नु जाठराग्न्यपरिग्रहे तः प्रतिष्ठितत्ववचनं शब्दादीनि च कारणानि विरुध्येरन्निति। अत्रोच्यते॥ अंतः प्रतिष्ठितत्ववचनं तावन्न
विरुध्यते। न हीह पुरुषविधं पुरुषेंतः प्रतिष्ठितं वेदेति जाठराग्न्यभिप्रायेणेदमुच्यते॥ तस्य प्रकृतत्वादसंशब्दितत्वाच्च। कथमेत
हि प्रकृतं मूर्धादिचुबुकान्तेषु पुरुषावयवेषु पुरुषविधत्वं कल्पितं तदभिप्रायेणेदमुच्यते। पुरुषविधं पुरुषेंतः प्रतिष्ठि
तं वेदेति। यथा वृक्षे शाखां प्रतिष्ठितां पश्यतीति तद्वत्॥
विरोधं जैमिनिर्मन्यतइत्यर्थः। इदमंतस्थत्वमुदरस्थत्वरूपं नोच्यते। किंतु तत्त्वादिशिखान्तावयवसमुदायात्मकपुरुषशरीरे मूर्धा
दिचुबुकान्तानिवक्षस्थानत्वेन स्थितत्वानि। तेषु पुरुषेषु वैश्वानरः पुरुषेंतः प्रतिष्ठित इत्युच्यते अतो पक्षात्रायो स्तस्य पक्षिप्रत्ययत्वस्य
तस्थत्वं तथा वैश्वानरस्य पुरुषांतस्थत्वमित्याह। नहीह पुरुषविधमित्यादिना। अस्मादिह पुरुषस्थत्वं उपाधिसाक्षाज्जाठराग्नेरसंशब्दितत्वं। अन्ये

पक्षांतरमाह। अथवेति। पुरुषविधत्वं पूर्ववत् अंतःस्थं च माध्यंदिनाः समामनंति। स्वमंतस्थत्वमीश्वरस्य रूपादरादीनि व्याच
ष्टे। निश्चिते चेति। विश्वश्चासौ नरश्चेति वा विश्वेषां वा विकारः एवं वा नरः कर्ता विश्वे सर्वे नरा जीवा अस्यात्मत्वेन नेतव्यत्वेन वा सर्वं तीति
वान्तरः रक्षः एव राक्षस इति वत् स्वार्थे तद्धितः। तच्छब्दः॥ नरे तेनान्यावृत्ति पूर्वपदस्य दीर्घता। अग्निधार्मेर्ण स्वर्णे सति समस्यांतःसह रूपस्य शिवि ति।

अथवाम्यःशक्तः परमात्मनोऽध्यात्ममधिदैवतं च पुरुषविधत्वोपाधिः तस्य चक्षुरूपं साधिरूपं तदभिप्रायेणोच्यते पुरुषेंतः प्रति
ष्ठितं वेदेति। निश्चिते च पूर्वोपात्तो चत्वार्ये परमात्मपरिग्रहे तद्विषय एव वैश्वानरशब्दः केन प्रकारेणावतिष्ठत इत्याशंक्यं न रुद्र
ति। विश्वेषां वायं नरो विश्वे वा नरा अस्येति विश्वानरः परमात्मा सर्वात्मत्वात् विश्वानर एव वैश्वानरस्तद्धितोऽनन्यार्थे सत्ताम साहित
त्यग्निशब्दोऽप्यग्रणीत्वादियोगाश्रयणेन परमात्मविषय एव भविष्यति। गार्हपत्यादिकल्पनं प्राणाहुत्यधिकरणत्वं च परमात्मनो
पि सर्वात्मत्वादुपपद्यते। कथं पुनः परमेश्वरपरिग्रहे प्रादेशमात्रश्रुतिरुपपद्यत इति तां व्याख्यातुमारभते॥ अभिव्यक्तेरित्याश्मर
थ्यः॥ अतिमात्रस्यापि परमेश्वरस्य प्रादेशमात्रत्वमभिव्यक्तिनिमित्तं स्यात् अभिव्यज्यते किल प्रादेशमात्रपरिमाणः परमेश्वर उपासकानां
कृते। प्रदेशेषु वा हृदयादिषूपलब्धिस्थानेषु विशेषेणाभिव्यज्यते। अतः परमेश्वरेऽपि प्रादेशमात्रश्रुतिरभिव्यक्तेरुपपद्यत इत्याश्मर
थ्य आचार्यो मन्यते॥

अंगपतिगमनसुखं कर्मणः फलं प्राप्नोतीति। अग्निरग्रणीरूपः। अभिनीतोऽग्रत इति वा अग्निः वैश्वानरे पासकस्यात्मनि भोजनात्सर्वं प्राणा
ग्निहोत्रं विधांगत्वेन विहितं। तदर्थमग्निशब्दो नादिकल्पनं प्रधानाविरोधेन नेतव्यमिति साहचर्याद्गार्हपत्येति। मात्रापरिमाणमतिक्रांतो अतिमात्रः तस्या
भिव्यक्तिरूपः। उपासकानां कृते अनुग्रहाय प्रादेशमात्रो भिव्यक्ततेजः प्रदेशेषु वा मीयतेऽभिव्यज्यत इति प्रादेशमात्रः॥ ॥ ॥

मरतांतरमाह॥ अनुस्मृतेरिति। प्रादेशेति मनःस्थमितः प्रादेशमात्रं इत्यर्थः यथा कश्चिदिति मनस्थः प्रादेशमात्रत्वं स्मृतिद्वार

अनुस्मृतेर्हरिः॥ प्रादेशमात्रहृदयप्रतिष्ठेनवाप्यनन्यस्यानुस्मर्यते तेन प्रादेशमात्र इत्युच्यते यथा प्रस्थमितापरः प्रस्थादुच्यते
ध्यते तेन हृत। यद्यपि च प्रवेषु स्वगतमेव परिमाणं महत् सर्वधामन्यते नचेह परमेश्वरगतं किंचित्परिमाणमस्तिमन् इदमसंवं
धातव्यमेतत्। तथापि प्रयुक्ताभ्यः प्रादेशमात्रश्रुतिः संभवति यथा कथंचिदनुस्मरणमालंबनतनिरूच्यते। प्रादेशमात्रत्वेन वा स्म
मप्रादेशमात्रोप्यनुस्मरणीयः प्रादेशमात्रश्रुत्यपवित्रापेण्यमनुस्मृतिनिमित्ता परमेश्वरे प्रादेशमात्रश्रुतिरिति। तिस्रा दर्शयति चायमेन
न्यते॥ संपत्तेरिति जैमिनिस्तथाहि दर्शयति॥ संपत्तिनिमित्ता वा स्यात् प्रादेशमात्रश्रुतिः कुतः तथाहि समानप्रकरणं वाजसने
यिब्राह्मणं द्युप्रभृतीन् पृथिवीपर्यंतान् त्रैलोक्यात्मनो वैश्वानरस्याध्यवयवान् अध्यात्मं मूर्धप्रभृतिषु चिबुकपर्यंतेषु देहावयवेषु सं
पादयन् प्रादेशमात्रसंपत्तिं परमेश्वरस्य दर्शयति॥

स्वर्गमारोकस्मिन्नश्रुतेरवलंबनमित्यर्थः अस्यास्यार्थांतरमाह। प्रादेशेति। संपत्तिमुक्तं प्रादेशमात्रश्रुतेर्गतिमाह॥ संपत्तेरिति॥

छं·भा·१
२८

आत्मत्वेनं पश्यन्ति । प्रादेशमात्रमिवेति । अपरिछिन्नमपीश्वरं प्रादेशमात्रत्वेन संपन्ना कल्पितं सम्यग्विदितवन्तो देवास्तमेवेश्वरमभिम
पेक्ष्य न संपन्नाः । सामस्त्येनतो हवै पूर्वं कालेन तेषां पृष्ठमन्तथापृप्रश्नतो नैवपश्चान्वक्ष्यामि । यथा प्रादेशमात्रं प्रादेशपरिमाणमनतिक्रम्य मू
र्द्धादिष्वंगेषु वैश्वानरं संपादयिष्यामीति प्राचीनशालादीन्प्रति राजा प्रतिज्ञापरवशी मूर्द्धानमुपदिशन्करेणास्पृशन्नुवाच । एष वै नेमू

प्रादेशमात्रमिव ह वै देवाः सुविदिता अभिसंपन्नास्तथा तु व एनान्वक्ष्यामि यथा प्रादेशमात्रमेवाभिसंपादयिष्यामीति स होवाच
मूर्द्धानमुपदिशन्नुवाचैष वा अतिष्ठा वैश्वानर इति चक्षुषी उपदिशन्नुवाचैष वै सुतेजा वैश्वानर इति नासिके उपदिशन्नुवाचैष
वै पृथग्वर्त्मा वैश्वानर इति मुख्यमाकाशमुपदिशन्नुवाचैष वै बहुलो वैश्वानर इति मुख्या अप उपदिशन्नुवाचैष वै रयिर्वै
श्वानर इति चुबुकमुपदिशन्नुवाचैष वै प्रतिष्ठा वैश्वानर इति चुबुकमित्यधरं मुखफलकमुच्यते ॥ ॥ ॥

र्द्धमूर्द्धा द्युलोकानतीत्य उपरि तिष्ठतीत्यतिष्ठा सो द्युलोको वैश्वानरः तस्य मूर्द्धेति यावत् । अध्यात्ममूर्द्धभेदेनाधिदैवमूर्द्धसं २०
पादयितव्य इत्यर्थः । एवं चक्षुरादिषूहनीयं । चक्षुषी उपदिश्य एष वै सुतेजाः सूर्यो वैश्वानरस्य चक्षुषी उक्ता च । नासिकापदेन त
न्निष्ठः प्राणो लक्ष्यते । तस्मिन्वायौ पृथग्वर्त्मात्मकसालेऽपि दृष्टिमाह । नासिके इति । अत्र सर्वत्र वैश्वानरशब्दस्तदंगपरः । मुखे
ऽकाशमुख्यं तस्मिन्नधिदैवं बहुलाकाशदृष्टिः मुखस्थजलात्मकापास्य सुरयिसंस्थितनदीपर्यन्तस्थोदकदृष्टिः चुबुके प्रतिष्ठापादरूपा पृथिवीदृष्टिरुक्ता ॥

ननु गुणभेदेष्वेषां विद्याभेदात् अग्निरहस्यश्रुत्यनुसारेण छांदोग्यस्थ प्रादेशमात्रश्रुतिः कथं व्याख्येयेत्याशंक्याह । यद्यपीत्यादिना स्तावतास्य
वैषम्येण बहुतरप्रसिद्धिशास्त्रि इदि विशेषं न हि । यतेः शाखाभेदेऽपि सर्वशाखानुप्रवृत्ती समानं वैश्वानरगुणपसंनेक किं निमित्तमायस्य च स्वप्रमाणत्वाच्चश्रु

यद्यपि वाजसनेयके द्यौरतिष्ठात्वगुणः समाम्नायते । आदित्यश्च सुतेजस्त्वगुणः छांदोग्ये पुनर्द्यौः सुतेजस्त्वगुणः समाम्नायते आदित्य
श्च विश्वरूपत्वगुणस्तथापि नैतावता विशेषेण किंचिद्धीयते प्रादेशमात्रश्रुतेरविशेषात् । सर्वशाखाप्रत्ययत्वाच्च संपत्तिनिमित्तां प्रादेश
मात्रश्रुतिं युक्ततरां जैमिनिराचार्यो मन्यते ॥ आमनंति चैनमस्मिन् ॥ आमनंति चैनं परमेश्वरमस्मिन्मूर्धचुबुकांतराले जाबालाः । य एषो
नंतोऽव्यक्त आत्मा सोऽविमुक्ते प्रतिष्ठित इति सोऽविमुक्तः कस्मिन्प्रतिष्ठित इति वरणायां नास्यां च मध्ये प्रतिष्ठित इति का वै वरणा का च ना
सीति । तत्रेमामेव नासिकां वरणां नासीति निरुच्य च सर्वाणींद्रियकृतानि पापानि निवारयतीति सा वरणा सर्वाणींद्रियकृतानि पापानि नाशयतीति सा
नासीति पुनरपि मनंति । कतमच्चास्य स्थानं भवतीति भ्रुवोर्घ्राणस्य च यः संधिः स एष द्युलोकस्य परस्य च संधिर्भवतीति तस्मादुपपन्ना प
रमेश्वरे प्रादेशमात्रश्रुतिः । अभिविमानश्रुतिः प्रत्यगात्मत्वाभिप्राया । प्रत्यगात्मतया सर्वैः प्राणिभिरभिविमीयत इत्यभिविमानः । अ
भिगतो वा प्रत्यगात्मत्वाद्विमानश्च मानवियोगादित्यभिविमानः । अभिविमिमीते वा सर्वं जगत्कारणत्वादित्यभिविमानस्तस्मात्परमे
श्वरो वैश्वानर इति सिद्धं ॥ इति श्रीमच्छंकरभगवत्पूज्यपादकृतौ शारीरकमीमांसाभाष्ये प्रथमाध्यायस्य द्वितीयः पादः ॥ ॥ ॥

तिष्ठात्वगुणश्छांदोग्ये उपसंहृतस्य । विश्वरूपत्वगुणश्च वाजिभिर्ग्रस्तस्तथा च पुनः स्थिरयोः सुतेजस्त्वं समवृत्तिस्वाद्विश्वरूपत्वयोर्व्यव

संनेपि

स्या। महत्त्वाद्गुणाद्वा भेदेन गुणस्यैव स्यात्तु न विधाभेद इति भावः। आदेशत्वस्य संपत्तिप्रयुक्तत्वे श्रुत्यंतरं संवादयति। पश्चैव नंतोऽपरिच्छि
न्नैः। अतोऽस्य क्रतोर्दुर्विज्ञेयत्वं कथं जानीयामित्यत्रेः प्रश्ने याज्ञवल्क्यस्योत्तरं स ईश्वरोऽविमुक्ते कामादिविवर्जिते जीवे भेदकल्पनया प्रतिष्ठित
इत्यास्यः पुनरत्रिप्रश्नः स कुत्र तरं वरणायामिति। एवं प्रश्नोत्तरेऽत्रेर्विज्ञेये तत्र च श्रुतौ इमामेव भ्रूसहितां नासिकां निरूप्येति भाष्ये प्र
जना। सर्वाणींद्रियकृतान्दोषान्वारयतीति वरणा भ्रूः सर्वान्दोषान्नाशयतीति नासी नासिकेति निर्वचनं॥ नासाभ्रुवोर्जीवेश्वरस्थानत्व
ध्यानात् पापवारकत्वं इति मंतव्यं। तमो मिथ्येपि हि शिष्यजीवस्य स्थानं पृच्छति। कतमदिति। भ्रुवोरित्युत्तरं प्राणस्येति पाठे प्राणस्ये
त्यर्थः। स एष संधिर्द्युलोकस्य स्वर्गस्य परस्य च ब्रह्मलोकस्य संधिरित्येन ध्येयमाह॥ स एष इति॥ आभिमुख्येनाहं ब्रह्मेति विमीयते ज्ञा
प्यतेऽस्मिन्निति विमानः प्रत्यगात्मा अभिगतश्चासौ विमानश्च सर्वस्वरूपत्वेन मानं सांतं मानमपरिमाणं। अभिविमिमीते निर्मिमीते। तस्मा
द्वैश्वानरवाक्यं उपास्ये ब्रह्मणि समन्वितमिति सिद्धं॥ इति श्रीमच्छारीरकव्याख्यायां भाष्यरत्नप्रभायां प्रथमाध्यायस्य द्वितीयः पादः॥

शारीरकसूत्रभाष्यप्रथमाध्यायतृतीयपादारंभः

सू॰ भा॰
१

श्रीगणेशाय नमः। श्रीसरस्वत्यै नमः॥ ॐ॥ द्युभ्वादिकमपदमक्षरमीक्षणीयं श्रीराममममलं हृदि मांतमधीशितारं इन्द्रादिवेद्यमखिल
प्रचयस्य शासितारं ज्योतिर्नभः पदमनिदमजं भजे हं १ एवं स्फुटिबहुलानां प्रायेण सविशेषवाक्यानां समन्वयो द्वितीयपादे दर्शितः। अधुना यौ-
गिकपदबहुलानां निर्विशेषप्रधानानां वाक्यानां समन्वयं वक्तुं तृतीयपाद आरभ्यते। अतोऽत्राधिकरणानां श्रुत्यध्यायपादसंगतयः। तत्र पूर्वमु-
पक्रमस्थसाधारणशब्दस्य वाक्यशेषस्थद्युमूर्धत्वादिना ब्रह्मपरत्वमुक्तं तद्वदत्राप्युपक्रमस्थसाधारणायतनत्वस्य वाक्यशेषस्थसेतुश्रुत्याव॰

द्युभ्वाद्यायतनं स्वशब्दात्॥ इदं श्रूयते यस्मिन् द्यौः पृथिवी चान्तरिक्षमोतं मनः सह प्राणैश्च सर्वैः। तमेवैकं जानथ आत्मानमन्या वाचो विमु-
ञ्चथ अमृतस्यैष सेतुरिति अत्र यदेतद् द्युप्रभृतीनामोतत्ववचनादायतनं किंचिदवगम्यते॥ तत्किं परं ब्रह्म स्यादाहोस्विदर्थान्तरमिति संदि-
ह्यते॥ तत्रार्थान्तरं किमप्यायतनं स्यादिति प्राप्तं॥ कस्मात्॥

स्कृतः परिच्छिन्नप्रधानादेरप्यवस्थेति दृष्टान्तलक्षणाधिकरणसंगतिः। पूर्वपक्षे प्रधानाद्युपास्तिः। सिद्धान्ते निर्विशेषब्रह्मधीरिति फलं। मुण्ड-
कवाक्यमुदाहरन्ति॥ इदमिति। यस्मिन्लोकत्रयात्मा विराट् प्राणैः सर्वैः सह मनः सूत्रात्मकं च कारणाद्व्याकृतं कारणं चोतं कल्पितं तदपवादेन
तमेवाधिष्ठानात्मानं असङ्गमित्यं जानथ श्रवणादिना। अन्यांश्चानात्मवाचो विमुञ्चथ। विशेषेण निःशेषं त्यजत एष वाग्विमोकः पूर्वोक्तात्मसाक्षा-
त्कारो अमृतस्य मोक्षस्य संसारपारं दुर्वारसंसारवारिधेः परपारस्य सेतुरिव सेतुः प्रापक इति मान्त्रवत् श्रुतिर्मुमुक्षून् उपदिशति। तत्रायतनत्व

साधारणधर्मस्य दर्शनात्संशयमाह॥ तत्किमिति।
१

अमृतस्य ब्रह्मणः सेतुरिति षष्ठ्या ब्रह्मणो भिन्नत्वेन सेतोः श्रुतत्वादेषशब्दपरामृष्टं द्युभ्वाद्यायतनमब्रह्मैव सेतुरित्याह॥ अमृतस्येति। भे
दश्रवणात् सेतुरिति श्रवणाच्चेत्यर्थः। तत्र भेदश्रवणं व्याख्यातं सेतुश्रवणं स्वयं विवृणोति। पारवानिति। अनंतकालतः। अपारदेशतः ज
लविधारकमुख्यसेतोर्ग्रहणासंभवात् गौणसेतुग्रहे कर्त्तव्ये मुख्यसेतुत्वाविनाभूतपारवत्त्वगुणवानेव कश्चित्स ग्राह्यः। न तु मुख्यस्य नियत

अमृतस्यैष सेतुरिति श्रवणात् पारवान् हि लोके सेतुः प्रख्यातः। न च परस्य ब्रह्मणः पारवत्त्वं शक्यमभ्युपगंतुमनंतमपारमिति श्रव
णात्। अर्थांतरे चायतने परिगृह्यमाणे स्मृतिप्रसिद्धं प्रधानं परिग्रहीतव्यं। तस्य कारणत्वादायतनत्वोपपत्तेः श्रुतिप्रसिद्धो वा वा
युः स्यात्। वायुर्वै गौतम तत्सूत्रं वायुना वै गौतम सूत्रेणायं च लोकः परश्च लोकः सर्वाणि च भूतानि संदृब्धानि भवंतीति वायोरपि विधा
रणश्रवणात्। शारीरो वा स्यात्। तस्यापि भोक्तृत्वाद्भोग्यप्रपंचं प्रत्यायतनत्वोपपत्तेरित्येवं प्राप्त इदमाह। द्युभ्वाद्यायतनमिति द्यौश्च भूश्च
द्युभुवौ द्युभुवावादी यस्य तदिदं द्युभ्वादि यदेतस्मिन्वाक्ये द्यौः पृथिव्यंतरिक्षं मनः प्राणा इत्येवमात्मकं जगदोतत्वेन निर्दिष्टं तस्यायतनं
परं ब्रह्म भवितुमर्हति। कुतः स्वशब्दादात्मशब्दादित्यर्थः। आत्मशब्दो हीह भवति। तमेवैकं जानथ आत्मानमिति॥ छ ॥

विधारणगुणवानीश्वर इति भावः। यथा लोके मणयः सूत्रेण ग्रथिताः एवं हे गौतम समष्टिलिंगात्मकवायुना स्थूलानि सर्वाणि संदृब्धानि
ग्रथितानि भवंतीति श्रुत्यर्थः। आत्मशब्दात् परस्य रूपमप्युक्तमित्यत आह। शारीरो वेति। सद्वितीयत्वेन सेतुशब्दोपपत्तेरित्यर्थः ॥

सू०भा०१ नन्वात्मशब्देन जीवे संभवतीत्यत आह। आत्मशब्दश्चेति। उपाधिपरिच्छिन्नस्य जीवस्य सर्ववस्तुप्रत्यक्त्वं मुख्यं नास्तीत्यर्थः। उपक्रमस्थब्रह्मा
२ धारणायतनस्य गौणत्वे तु लिंगात्मत्वं श्रुतात्मश्रुत्या अस्य बलवन्निश्चय इति भावः। स्वशब्दादित्यस्यार्थान्तरमाह। क्वचिच्चेति। अन्नानामुत्पत्तौ सदेव मू
लं स्थितावायतनं लये प्रतिष्ठेति त्रेधा वाचि सत्शब्देन छान्दोग्ये ब्रह्मण आयतनत्वश्रुतेरत्रापि तथेत्यर्थः। अर्थान्तरमाह। स्वशब्देनैवेति। यस्मिन्

आत्मशब्दश्च परमात्मपरिग्रहे सम्यगवकल्पते। नार्थान्तरपरिग्रहे। क्वचिच्च स्वशब्देनैव ब्रह्मण आयतनत्वं श्रूयते सन्मूलाः सोम्येमाः
सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठा इति। स्वशब्देनैव चेह पुरस्तादुपरिष्टाच्च ब्रह्म संकीर्त्यते। पुरुष एवेदं विश्वं कर्म तपो ब्रह्म परामृ
तमिति। ब्रह्मैवेदममृतं पुरस्ताद्ब्रह्म पश्चाद्ब्रह्म दक्षिणतश्चोत्तरेणेति च। तत्र त्वायतनायतनवद्भावश्रवणात् सर्वं ब्रह्मेति च सामानाधि
करण्यात् यथानेकात्मको वृक्षः शाखा स्कन्धो मूलं चेत्येवं नानारसो विचित्र आत्मेत्याशंका संभवति तां निवर्तयितुं सावधारणमाह।
तमेवैकं जानथ आत्मानमिति। एतदुक्तं भवति। न कार्यप्रपंचविशिष्टो विचित्र आत्मा विज्ञेयः। किं तर्हि अविद्याकृतं कार्यप्रपंचं विद्यया
प्रविलापयन्तस्तमेवैकमायतनभूतमात्मानं जानथैकरसमिति। यथा यस्मिन्नास्ते देवदत्तः तदायतनमानयेत्युक्ते आसनमेवानयति न देव
दत्तं। तद्वदायतनभूतस्यैवैकरसस्यात्मनो विज्ञेयत्वमुपदिश्यते॥ ॥ २

द्यौरित्यादिवाक्यस्य पूर्वोत्तरवाक्ययोः पुरुषब्रह्मादिशब्देन ब्रह्मसंकीर्तनान्मध्येऽपि ब्रह्मण्यायतनमित्यर्थः। पुरुष इति पूर्ववाक्यं ब्रह्मैवेत्युत्तरवाक्यं सर्वासु
दिक्षु स्थितं सर्वं ब्रह्मैवेत्यर्थः। उत्तरेण तस्मादित्यादिना उदाहृतवाक्यस्याविशिष्टब्रह्मपरत्वमाशंक्य वाक्यशेषमाचष्टे। तत्रेत्यादिना सामानाधिकरण्या

यस्मिन्सर्वमोतं तमेवैकमित्येवकारैकशब्दाभ्यां निर्विशेषं तेषामित्युक्त्वा हेत्वंतरमाह। विकाराणां तेति। विकारेषु नतेकल्पिते अभिसंधौ भिमा
नोपस्य तस्मानर्थभाक्त्वे नानिंदाश्रुतेश्च कूटस्थस्य तत्त्वं तेषामित्यर्थः। कथं तर्हि सामानाधिकरण्यं तत्राह। सर्वं ब्रह्मेति। यश्चोरः स स्थाणुरितिवत्
यत्सर्वं तद्ब्रह्मेति सर्वो ह्येष न ब्रह्मत्वविधानात् तद्बाधनार्थं न तु यद्ब्रह्म तत्सर्वमिति निनानारससार्थ। तत्र नियामकमाह। स यथेति। लवणपिंडे
ऽन्तर्बहिश्चरसांतरशून्यः सर्वो लवणैकरसो यथा। एवमरे मैत्रेयि पिंडैकरस आत्मेत्यर्थः। यद्यपि पारवत्वसावयवत्वादिकं मुख्यहेत्व

विकारान्ताभिसंधस्याचापवादः श्रूयते मन्वोः समस्तमाप्नोतीत्यतो इह नानेव पश्यतीति। सर्वं ब्रह्मेति तु सामानाधिकरण्यं प्रपं
चविलापनार्थं नानेकरसताप्रतिपादनार्थं। स यथा सैंधवघनो नंतरो बाह्यः कृत्स्नो रसघन एवैवं वा अरेयमात्मानंतरोबाह्यः कृ
त्स्नः प्रज्ञानघन एवेत्येकरसताश्रवणात्। तस्मादुभयाघापत्तनं ब्रह्मपत्तकं सेतुश्रुतेः सेतोश्च पारवत्तोपपत्तेः अन्यारणांतरे
णमुभयाघापत्तनेन भवितव्यमिति। अत्रोच्यते। विधारणत्वमात्रमेव सेतुश्रुत्या विवक्ष्यते। न पारवत्त्वादि न हि मृद्दारुमयो लोके सेतु
रिह दृष्टान्तोपि मृद्दारुमय एव सेतुरभ्युपगम्यते। सेतुशब्दार्थो विधारणत्वमात्रमेव न पारवत्त्वादि। विज्ञो बंधनकर्मणः सेतुश

भिचारितयापि सेतोर्जलादिबंधनरूपं यद्विधारणं तदेवाव्यभिचारित्वेपि सेतुपदार्थैकदेशलाक्षणिकत्वेन ग्राह्यं न तु पदार्थबहिर्भूते पारव
त्वादिकमित्याह। अत्रोक्तमस्मिन्दृष्टत्वात्तद्ब्रह्मेति प्रसंगमाह। नहीति। अत्र श्रुतौ परेणेति शेषः। विधारणस्य शब्दार्थत्वं स्फुटयति। विज्ञ इति
सिनोतिर्बध्नातीति सेतुपदार्थैकदेशो विधारणमित्यर्थः। तथाच अमृतपदस्याभावप्रधानत्वादमृतत्वस्य सेतुर्विधारकं ब्रह्मास्येत्यमृतत्वं नान्यत्वेनेत्यर्थः

बृ॰ टी॰

स॰भा
२

यद्दु द्युभ्वाद्याधारे ब्रह्मणि सेतुश्रुत्या भेदार्थः। किंतद्व्यवहितं स्थानमित्याह। अपर इति। कल्पितमाह। तत्र यदुक्तमिति ज्ञाने सेतौ गृहीते सतीत्यर्थः। मुक्तैरुपसृप्यं प्रसक्तेन प्राप्यं यद्ब्रह्म तस्मादन्योऽकेऽरितिसूत्रार्थः। मुक्तिं प्रति भोगिनं बंधं दर्शयति। देहादिष्विति। तद्विपर्ययेणेति। उक्तं पंचकं

अपर आह। तमेवैकं जानथ आत्मानमिति। यदेतत्संकीर्तितमात्मज्ञानं। यच्चैतद्वाचा विमुंचथेति वाग्विमोचनं तदत्रामृतत्वसाधनत्वादमृतस्यैष सेतुरिति सेतुश्रुत्या संकीर्त्यते। न तु द्युभ्वाद्यायतनं। तत्र यदुक्तं सेतुश्रुतेः ब्रह्मणोऽर्थांतरेण द्युभ्वाद्यायतनेन भाव्यमित्येतदयुक्तं॥ मुक्तोपसृप्यव्यपदेशात्॥ इतश्च परमेव ब्रह्म द्युभ्वाद्यायतनं यस्मान्मुक्तोपसृप्यतास्य व्यपदिश्यमाना दृश्यते। मुक्तैरुपसृप्यं मुक्तोपसृप्यं। देहादिष्वनात्मस्वहमस्मीत्यात्मबुद्धिरविद्या। ततस्तत्पूजनादौ रागस्तत्परिभवादौ द्वेषः। तदुच्छेददर्शनाद्भयं मोहश्चेत्येवमयमनंतभेदोऽनर्थव्रातः संततः सर्वेषां नः प्रत्यक्षः। तद्विपर्ययेणाविद्यारागद्वेषादिदोषमुक्तैरुपसृप्यं गम्यमेतदिति द्युभ्वाद्यायतनं प्रकृत्य व्यपदेशो भवति। कथं। भिद्यते हृदयग्रंथिश्छिद्यंते सर्वसंशयाः। क्षीयंते चास्य कर्माणि तस्मिन्दृष्टे परावरे इत्युक्त्वा ब्रवीति। तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यमिति॥ ॥ ॥ ॥ ॥

रूपात्मकं बंधं तिरस्याऽत्मनास्थितमित्यर्थः। यथा नद्यो गाधाः नामरूपे विहाय समुद्रात्मना तिष्ठंति तथा ब्रह्मात्मविदपि कल्पितं विहाय प

रात्कारणात्स्वप्रकाशं परं स्वयंज्योतिरानंदं प्रत्यक्
नप्राप्नोति तिष्ठतीत्याह। तथा विद्वानिति॥

इदं प्रधानादेः किन्नस्यादत आह। ब्रह्मणश्चेति। अस्य मुमुक्षोः हृदीति पदेनात्मधर्मत्वं कामानां निरस्तं पराकामनिवृत्तिरस्य तदा अमृतो भव
ति मरणहेत्वभावात् केवलमनर्थनिवृत्तिः किं त्वत्र देहे तिष्ठन्नेव ब्रह्मानंदमश्नुत इत्यर्थः। लिंगांतरमाह। अपि चेति। धीरो विवेकी तमेकात्मानं वि
ज्ञाय विशुद्धं लक्ष्यपदार्थं तत्त्वाचार्यात् ज्ञात्वा कुर्वीत तावृत्तिं ज्ञानप्रतिबंधककर्मकांडादेर्वैमुख्यमाह। नेति। बहून् निरुक्त्वा शब्दान्त्वे दांत
ब्रह्मणश्च मुक्तोपसृप्यत्वं प्रसिद्धं श्रूयते यदा सर्वे प्रमुच्यंते कामा येस्य हृदि श्रिताः। अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुत इत्येवं
बूमादौ प्रधानादीनां तु न कचिन्मुक्तोपसृप्यत्वमस्ति प्रसिद्धं। अपि च तमेवैकं जानथ आत्मानमन्या वाचो विमुंचथेति वाग्विमोकपू
र्वकं विदितव्यत्वमिह द्युभ्वाद्यायतनस्योच्यते। तच्चान्यत्र ब्रह्मणो दृष्टं। तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः। नानुध्यायाद्बहूञ्छ
ब्दान्वाचो विग्लापनं हि तदिति। तस्मादपि द्युभ्वाद्यायतनं परं ब्रह्म॥ नानुमानमतच्छब्दात्। यथा ब्रह्मणः प्रतिपादको वैशेषिको हेतु
रुक्तो नैवमर्थांतरस्य वैशेषिको हेतुः प्रतिपादकोस्तीत्याह। नानुमानिकं सांख्यस्मृतिपरिकल्पितं प्रधानमिह द्युभ्वाद्यायतनत्वेन प्रति
पत्तव्यं। कस्मात् अतच्छब्दात्। तस्याचेतनस्य प्रधानस्य प्रतिपादकः शब्दस्तच्छब्दो न तच्छब्दो अतच्छब्दः। न तत्राचेतनस्य प्रधानस्य प्र
तिपादकः कश्चिच्छब्दोस्ति। येनाचेतनं प्रधानं कारणत्वेनायतनत्वेन वावगम्येत। तद्विपरीतस्य चेतनस्य प्रतिपादकः शब्दोस्ति। यः स
र्वज्ञः सर्वविदित्यादिः अत एव न वायुरपि द्युभ्वाद्यायतनत्वेनाश्रीयते॥
स्थानं गमीकरोति। अष्टौ स्थानानि वर्णानामुरः कंठः शिरस्तथा। जिह्वामूलं च दंताश्च नासिकोष्ठौ च तालु चेति। एतानि चाभिद्रियग्रहणलात्वा कुशब्दे
नोच्यंते तेषां श्रोत्रग्रहणमात्रमनात्मशब्दोच्चारणफलं तत्त्वानात्मनसोड्लानिमात्रमित्यर्थः। वैशेषिक इति। असाधारणमात्मशब्दादिरित्यर्थः। अत

स॰भा॰१ प्राणभृच्चेति सूत्रे चकारः पूर्वसूत्रस्थनञोऽनुकर्षणार्थः। सर्वज्ञपदसमानाधिकरणात्मशब्दान्न जीववाचीत्यतच्छब्दस्तस्मादित्यर्थः। ननु नानुमा
४ नप्राणभृत्तावत्तच्छब्दादिलिंगमेवसूत्रे किमर्थं न कृतं। उभयनिरासहेतोरेकत्वादित्यत आह। पृथगिति। योगः सूत्रं उत्तरसूत्रस्थहेतूनां जीव
मात्रनिरासेनान्वयोपि सुबोधार्थं प्राणभृच्चेति पृथक्सूत्रकरणमित्यर्थः। तानेव हेतूनाकांक्षाद्वारा व्याचष्टे। कुतश्चेत्यादिना। यद्यपित्युक्तः प्रत्य

प्राणभृच्च॥ यद्यपि प्राणभृतो विज्ञानात्मन आत्मत्वं चेतनत्वं च संभवति। तथाप्युपाधिपरिच्छिन्नज्ञानस्य सर्वज्ञत्वाद्यसंभवे सत्यस्मादे
वातच्छब्दात्प्राणभृदपि न द्युभ्वाद्यायतनत्वेनाश्रयितव्यः। न चोपाधिपरिच्छिन्नस्याविभोः प्राणभृतो द्युभ्वाद्यायतनत्वमपि सम्यक् संभवति।
पृथग्योगकरणमुत्तरार्थं। कुतश्च न प्राणभृद्द्युभ्वाद्यायतनत्वेनाश्रयितव्यः। भेदव्यपदेशात्॥ भेदव्यपदेशश्चेह भवति तमेवैकं जानथ
आत्मानमिति ज्ञेयज्ञातृभावेन। तत्र प्राणभृत्तावन्मुमुक्षुत्वात् ज्ञाता परिशेषादात्मशब्दवाच्यं ब्रह्म ज्ञेयं द्युभ्वाद्यायतनमिति गम्यते। न प्राण
भृत्। कुतश्च न प्राणभृद्द्युभ्वाद्यायतनत्वेनाश्रयितव्यः। प्रकरणात्॥ प्रकरणं चेदं परमात्मनः कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भ
वतीत्येकविज्ञानेन सर्वविज्ञानापेक्षणात्। परमात्मनि हि सर्वात्मके विज्ञाते सर्वमिदं विज्ञातं स्यात्। न केवले प्राणभृति। कुतश्च न प्राणभृ
द्द्युभ्वाद्यायतनत्वेनाश्रयितव्यः॥ स्थित्यदनाभ्यां च॥ द्युभ्वाद्यायतनं प्रकृत्य द्वा सुपर्णा सयुजा सखायेत्यत्र स्थित्यदने निर्दिश्येते। तयोरन्यः ४
पिप्पलं स्वाद्वत्तीति कर्मफलाशनं। अनश्नन्नन्योऽभिचाकशीतीत्यौदासीन्येनावस्थानं च। ताभ्यां च स्थित्यदनाभ्यामीश्वरक्षेत्रज्ञौ तत्र गृह्येते ॥

गात्मैवात्ररेफः तथापि जीवत्वाकारेणाहानुष्ठेयमाद्भेदात् न ज्ञेयरूपत्वमित्यर्थः। एवं च जीवत्वलिंगविशिष्टत्वेन जीवस्य द्युभ्वादिवाक्यार्थत्वं निरस्यते न तु

ननु स्थितेऽप्येश्वरस्यादनाज्जीवस्य द्वा सुपर्णेत्यत्रोक्तावपि ईश्वरस्यापतनतायासेन किमर्थं ग्रह इत्यत आह। यदि चेश्वर इति। अत्र चेश्वरः स्फुटचिन्मात्रो
ग्राह्यः। न सर्वं तत्वादिविशिष्टः। तस्यात्राप्रतिपाद्यत्वात्। तथा चात्रप्रतिपाद्यायाः स्मा कुस्मात्मत्वे वचनासंभवात्। आगमवाक्येन ग्रहणं कार्यमित्यभिसंधिः। न
मताऽस्वीकृते। ननु तथापीति। जलस्वरूपप्रतिपादनार्थमकस्मात्प्रकृतस्यापि लोकप्रसिद्धस्य जीवस्यानुवादस्तं न वदतीति परिहरति। नेति। ननु द्वासुप

र्णास्त्विश्वरो घुभ्वाद्यायतनत्वेन विवक्षितः न तस्य स्वप्रकृतस्येश्वरस्य क्षेत्रज्ञात्पृथग्वचनमवकल्पते। अन्यथा ह्यप्रकृतवचनमाकस्मिकमसंबद्धं
स्यात्। ननु तथापि क्षेत्रज्ञस्येश्वरात्पृथग्वचनमाकस्मिकमेव प्रसज्येत। न तस्याविवक्षितत्वात्। क्षेत्रज्ञो हि कर्तृत्वेन भोक्तृत्वेन च प्रतिशरीरं बुद्ध्युपा
धिसंबद्धो लोकत एव प्रसिद्धो नासौ श्रुत्या तात्पर्येण विवक्ष्यते। ईश्वरस्तु लोकतोऽप्रसिद्धत्वात् श्रुत्या तात्पर्येण विवक्ष्यत इति न तस्याकस्मिकं वचनं यु
क्तं। गुहां प्रविष्टावात्मानौ हि तद्दर्शनात्। द्वा सुपर्णेत्यस्यामृचीश्वरक्षेत्रज्ञावुच्येते इति। यदापि पैङ्ग्युपनिषत्कृतेन व्याख्यानेन नास्यामृचि सत्त्वक्षेत्र
ज्ञावुच्येते। तदापि न विरोधः कश्चित्। कथं। प्राणभृद्धि घटादिच्छिद्रवत्सत्त्वाद्युपाध्यभिमानित्वेन प्रतिशरीरं गृह्यमाणो घुभ्वाद्यायतनं न भवतीति
निषिध्यते॥

तोस्यत्रर्षु द्विजीययोरुक्तेः कथमिदं सूत्रमित्यत आह। गुहामिति। स्थितमदनाभ्यामीश्वरक्षेत्रज्ञयोरनुवादेनैकं दर्शितं इत्यर्थः। न च त्वत्र जीवेशौ नानुवाद्यौ
पैङ्गिव्याख्याविरोधादतः सूत्रासंगतिरित्यत आह। यदापीति तदापीति सूत्रस्यासंगतिर्नास्तीत्यर्थः। अदनवाक्ये ननु द्विमन्त्रस्थितिवाक्येन बुध्यादिचिल
क्षणशुद्धमसकृत्सूक्ष्मतोऽल्पसाक्षी घुभ्वादिवाक्येन देवग्राह्यं। ननु घुभ्वाद्यायतनो जीव इति सूत्रसंगतिमाह॥ कथमित्यादिना॥ ॥ ॥

नन्वत्रानुपहितो जीव उक्तो न परं ब्रह्मेत्यत आह। यद्वेति। पौनरुक्त्यं शंकते। तदेतदिति द्युभ्वाद्यायतनस्य ब्रह्मपरत्वमित्यर्थः समाधत्ते प्रपंचा
र्थमिति सेतुशब्दव्याख्यानेन भूतयोनेः प्रत्यगात्मत्वस्फुटीकरणार्थमित्यर्थः। तस्मान्मुंडकोपनिषत्सु ब्रह्मणि समन्वितेति सिद्धं। भूमा। छांदोग्यमुदाहरति

वस्तु सर्वज्ञ ईश्वर उपाधिभिर्विनोपलक्ष्यते पर एव स भवति। यथा घटादिच्छिद्राणि घटादिच्छिद्राणि घटादिभिरुपाधिभिर्विनोपलक्ष्यमाणानि म
हाकाश एव भवंति तद्वत्प्राणभृतः परस्मादन्यत्वानुपपत्तेः प्रतिषेधो नोपपद्यते। तस्मात्स्वात्माभिमानिन एव द्युभ्वाद्यायतनस्य प्रतिषेधः। तस्मा
त्परमेव ब्रह्म द्युभ्वाद्यायतनं। तदेतद् अदृश्यत्वादिगुणको धर्मोक्तेः इत्यनेनैव सिद्धं। तस्मिन्नेव हि भूतयोनिवाक्यस्य मध्ये इदं पठितं। यस्मिन् द्यौः पृथि
वी चांतरिक्षमिति। प्रपंचार्थं तु पुनरुपन्यस्तं॥ भूमा संप्रसादादध्युपदेशात्॥ इदं समामनंति। भूमा त्वेव विजिज्ञासितव्य इति भूमानं भगवो वि
जिज्ञास इति। यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा अथ यत्रान्यत्पश्यत्यन्यच्छृणोत्यन्यद्विजानाति तदल्पमिति। तत्र संश
यः किं प्राणो भूमा स्यादाहो स्वित्परमात्मेति॥

।इदमिति। नाल्पे सुखमस्ति भूमैव सुखं तस्मान्निरतिशयसुखार्थिना भूमैव विचार्य इति नारदं प्रति सनत्कुमारेणोक्ते सति नारदो ब्रूते। भूमानमिति। भू ५
म्नो लक्षणं महिमस्थितित्वमाह। यत्रेति। भूम्नः स्वरूपं परिच्छिन्नलक्षणोक्त्या स्फुटयति। अथेति॥ ॥ ॥ ॥

अत्र संशयबीजं प्रश्नपूर्वकमाह। कुत इत्यादिना। वहो भीव इति विग्रहे ए ध्यादिभ्य इम निजि ति इमनृ प्रत्यये कृते वहोर्लोपो भूच वहोरिति सूत्रेण वहोः
परस्येमनि च प्रत्ययस्यादेरिकारस्य लोपः स्यात् वहोः स्थाने भू इत्यादेश इष्ठस्यादि लुक् च भूमन् इति शब्दो निष्पन्नः तस्य भाववाच्यके मन्प्रत्ययान्तत्वाद् इकर्तृ
वाच्यं। तत्किं धर्मिक मिसाकांक्षायां सन्निहित प्रकरणस्थः प्राणो धर्मी भाति। वाक्योपक्रमस्य आत्मापि रूप प्रतिपादनापेक्षो धर्मित्वेन भाती ति सन्निहित

कुतः संशयः। भूमेति तावत् बहुत्वमभिधीयते। वहोर्लोपो भू च वहोरिति भूमशब्दस्य भावप्रत्ययान्त त्वास्मरणात्। किमात्मकं पुनस्तद् इत्यभि
ति विशेषाकांक्षायां प्राणो वा अन्नप्राप्या भूयानिति सन्निधानात् प्राणो भूमेति प्रतिभाति। तथाश्रुतं ह्येव मे भगवद् दृशेभ्य स्तरति शोकमात्मविदिति सोऽहं
भगवः शोचामि तं मा भगवान् शोकस्य पारं तारयत्विति प्रकरणोत्थानात् परमात्मा भूमेत्यपि प्रतिभाति। तत्र कस्योपादानं कस्य वा हानमिति
भवति संशयः। किं तावत् प्राप्तं प्राणो भूमेति। कस्मात्। भूयः प्रश्नप्रतिवचनदर्शनात्। यथा ह्यस्ति भगवो नाम्नो भूय इति। वाग्वाव नाम्नो भूयसी
ति तथास्ति भगवो वाचो भूय इति मनो वाव वाचो भूय इति च नामादिभ्यो ह्याप्राणात् भूयः प्रश्नप्रतिवचनप्रवाहः प्रवृत्तो नैवं प्राणात् परं भूयः
प्रश्नप्रतिवचनं दृश्यते। अस्ति भगवः प्राणाद् भूय इति अदो वाव प्राणाद् भूय इति॥ ॥ ॥ ॥

व्यवहित प्रकरणस्थां संख्या परस्यार्थः पूर्वमात्मशब्दात् घुप्रणामय तनं ब्रह्मलक्ष्कं तत्सुकृतं तरति शोकमात्मविदित्व ब्रह्मरूप पात्मशब्द प्रयोगादि सा
क्षेपसंगमात् पूर्वपक्षयति। प्राणो भूमेति। धर्मधर्मिणोरभेदात् सामानाधिकरण्यं द्रष्टव्यं। पूर्वोक्त एव स्मो प्राणो नास्तिः ब्रह्मज्ञानं च फलं कर्मेणमंत
र्थं। अत्र ध्यापे भूयः प्रश्नोत्तरभेदादर्थभेदो दृश्यते। भूमा तु प्राणात् परं भूयः प्रश्नं विनैवोक्तत्वल्लिंगेन प्राणादभिन्न इत्याह। कस्मादित्यादिना। प्राण

नन्वेषतु का अतिवदतीति तुशब्देन प्राणप्रकरणविच्छेदात् न प्राणो भूमेत्युत आह। प्राणमेवेति। नामाद्याशान्तानुपास्यानतीत्य प्राणं श्रेष्ठं वदतीत्यतिवा
दी प्राणवित् तं चेदतिवाद्यसीति केनचित्पृष्टः अस्मीति ब्रूयात् नाहमतिवादीत्यपह्नवं न कुर्यादित्युक्तं प्राणविदं एष तु इति परमसत्यसत्यवचनध्या
नमननश्रद्धादिधर्मपरंपरां विधाय भूमोपदेशान्न प्रकरणविच्छेदः तुशब्दो नामाद्युपासकस्यातिवादित्वनिरासार्थ इत्यर्थः। भूम्नो लक्षणवचनं सुखत्व
प्राणमेव तु नामादिभ्य आशान्तेभ्यो भूयांसं प्राणो वा आशाया भूयानित्यादिना स्वरूपं च मुख्यप्राणदर्शिन अतिवादित्वमतिवाद्यसीत्यतिवाद्य
स्मीति ब्रूयान्नापह्नुवीतेत्यादिनानुज्ञाप्य एष तु वा अतिवदति यः सत्येनातिवदतीति प्राणमन्तमतिवादित्वमनूद्य प्राणपरिसमाप्तेरेवं प्राणं सत्यादिपरंपर
या भूमानमवतारयन् प्राणमेव भूमानं मन्यते इति गम्यते। कथं पुनः प्राणे भूमत्वमाख्यायमानेऽपि अन्यस्य स्युरिति चेत् न भूम्नो लक्षणपरिवचनेना
ख्यायते इत्युच्यते। सुषुप्तावस्थायां प्राणग्रस्तेषु करणेषु दर्शनादिव्यवहारनिवृत्तिदर्शनात् संभवति प्राणस्य यत्र नान्यत्पश्यतीत्यादिलक्षणं। तथा
न च श्रुतिः न शृणोति न पश्यतीत्यादिना सर्वकरणव्यापारोपरमरूपं सुषुप्तावस्थामुक्त्वा प्राणाग्नय एवैतस्मिन्पुरे जाग्रतीति तस्मिन्नवस्था
यां प्रवृत्तेः प्राणस्य जागरणं ब्रुवती प्राणप्रधानां सुषुप्त्यवस्थां दर्शयति। यच्चोक्तं भूम्नः सुखत्वं श्रुतौ यो वै भूमा तत्सुखमिति तदप्यविरुद्धं। यत्रै
ष देवः स्वप्नान्न पश्यत्यथ यदैतस्मिन्शरीरे सुखं भवतीति सुषुप्तावस्थायामेव सुखश्रवणात्। यच्च यो वै भूमा तदमृतमिति तदपि प्राणस्याविरु
द्धं प्राणो वा अमृतमिति श्रुतेः। कथं पुनः प्राणं भूमानं मन्यमानस्य तरति शोकमात्मविदित्यात्मविविदिषया प्रकरणस्योत्थानं उपपद्यते॥ ॥

समन्तत्वं यथा प्राणेऽस्य अर्थं सर्वं समोर्पयति। कथं पुनरित्यादिना प्राणग्रस्तेषु प्राणे लीने चक्षुरादौ न शृणोति सुषुप्तपुरुष इति शेषः। गार्हपत्यो ह वा एषोऽपानो व्यानोऽन्वा
हार्यपचनः आहवनीयः प्राण इति श्रुतेः प्राणाग्नय इह पुरे शरीरे जाग्रति सव्यापारा एव तिष्ठंतीत्यर्थः देवो जीवः अत्र तदा स्वप्नादर्शनकाले सुखश्रवणा

[illegible]

६९

आत्मपदेनोपक्रमविरोधं परिहरति। प्राण एवेति। प्राणस्यात्मत्वं कथमित्याशंक्य श्रुतत्वादित्याह। तथा हीति। सर्वं समर्पितमिति च सर्वाधिष्ठानं
प्राणं स्वीकरोतीति श्रुतिरित्यन्वयः। अत आत्मत्वं प्राणेऽपि मुख्यमिति भावः। भूमरूपत्वं योजयति। सर्वात्मत्वेति। संप्रसादशब्देन प्राणं लक्षयित्वा मुख्या
र्थं दर्शयति। संप्रसाद इति। स वा एष एतस्मिन्संप्रसादे स्थित्वा पुनरेव द्रवतीति योगाद्यत्नस्तु सुषुप्तिका च रूढिरित्याह बृहदिति। वाक्यार्थसंबन्धात्प्राणो

प्राण एवेहात्मा विवक्षित इति भूमा। तथा हि। प्राणो ह पिता प्राणो माता प्राणो भ्राता प्राणः स्वसा प्राण आचार्यः प्राणो ब्राह्मण इति प्राणमेव
सर्वात्मानं करोति। यथा वा अरा नाभौ समर्पिता एवमस्मिन्प्राणे सर्वं समर्पितमिति च। सर्वात्मकत्वारनाभिनिदर्शनाभ्यां च संभवति वैपुल्यात्मिका भू
मरूपता प्राणस्य॥ तस्मात्प्राणो भूमेत्येवं प्राप्तं। तत इदमुच्यते। परमात्मैवेह भूमा भवितुमर्हति। न प्राणः। कस्मात् संप्रसादादध्युपदेशात्। संप्र
साद इति सुषुप्तस्थानमुच्यते। सम्यक्प्रसीदत्यस्मिन्निति निर्वचनात्। बृहदारण्यके च स्वप्नजागरितस्थानाभ्यां सह पाठात्। तस्यां च संप्रसादावस्था
यां प्राणो जागर्तीति प्राणोऽत्र संप्रसादोऽभिप्रेयते। प्राणादूर्ध्वं भूम्न उपदिश्यमानत्वादित्यर्थः। प्राण एव चेद्भूमा स्यात् स एव तस्मादूर्ध्वमुपदिश्ये
तेत्यश्लिष्टमेवैतत्स्यात्। न हि नाम्नैव नाम्नो भूय इति नाम्न ऊर्ध्वमुपदिष्टं। किं तर्हि नाम्नोऽन्यदर्थान्तरमुपदिष्टं वागाख्यं वाग्वाव नाम्नो भूयसीति। तथा
वागादिभ्योऽप्या प्राणादर्थान्तरमेव तत्र तत्रोर्ध्वमुपदिष्टं तद्वत्प्राणादूर्ध्वमुपदिश्यमानो भूमा प्राणादर्थान्तरभूतो भवितुमर्हति॥ ॥

लक्षयित्वाह। तस्यां चेति। अत्रत्यस्त्वित्यर्थः। भूमा प्राणाद्भिन्नः। अत्राध्याये तस्मादूर्ध्वमुपदिष्टत्वात् नामादेरूर्ध्वमुपदिष्टवागादिवदित्यर्थः। वि
पक्षे हेतुच्छेदं बाधकमाह। प्राण एव चेदिति। स्वस्यैव स्वस्मादूर्ध्वमुपदिष्टत्वमयुक्तं नामादिष्वदृष्टं चेत्यर्थः॥ ॥ ॥

छां॰ भा॰
७

हेत्वसिद्धिं शंकते। नन्विहेति प्रकृतप्राणविज्ञानमहिमैकदेशो न भवति। तस्य पच्छब्दपरतंत्रत्वेन समातिवादित्वाविशेषात्। अतः प्राणप्रकरणं वि
च्छिन्नमिति हेतुसिद्धिरित्याह। अत्रोच्यत इति। सत्येनातिवादित्वविशेषः तद्वतोपर एव स्युक्तेनैरर्थक्यानुकर्ष इत्यर्थः। स एष प्राणविदतिवदतीत्यनुषक्त
संवदेदिति विधानात् न प्राणप्रकरणविच्छेदः इति दृष्टांतेन शंकते। नन्विति। सत्यशब्दो ह्यबाधितरूढो ब्रह्मवाचकः। तदन्यस्य मिथ्यात्वात्। सत्यवच
नन्विह नास्ति प्रश्नोस्ति भगवः प्राणात् भूय इति। नापि प्रतिवचनमस्ति प्राणाद्वाव भूयोस्तीति। कथं प्राणादधिभूमोपदिश्यत इत्युच्यते। प्रा
णविषयमेवातिवादित्वमुत्तरत्रानुकृष्यमाणं पश्यामः। एष तु वा अतिवदति यः सत्येनातिवदतीति तस्मान्नास्ति प्राणाद्भूय उपदेश इति। अ
त्रोच्यते॥ न तावत्प्राणविषयस्यैवातिवादित्वस्य तदनुकर्षणमिति शक्यं वक्तुं। विद्वत्प्रवादश्च सत्येनातिवदतीति। ननु विद्वत्प्रवादोऽप्ययं प्राण
विषय एव भविष्यति। कथं यथैवाग्निहोत्री यः सत्यं वदतीत्युक्ते न सत्यवदनेनाग्निहोत्रित्वं किं तर्हि। अग्निहोत्रेणैव सत्यवदनं त्वग्निहोत्रि
णो विशेष उच्यते। तथैव एष तु वा अतिवदति यः सत्येनातिवदतीत्युक्ते न सत्यवदनेनातिवादित्वं किं तर्हि प्रकृतेन प्राणविज्ञानेनैव सत्यवद
नं तु प्राणविदो विशेषो विवक्ष्यत इति नेति ब्रूमः। श्रुत्यर्थपरित्यागप्रसंगात्। श्रुत्या ह्यत्र सत्यवदनेनातिवादित्वं प्रतीयते। यः सत्येनातिवदति
सोऽतिवदतीति नात्र प्राणविज्ञानस्य संकीर्तनमस्ति प्रकरणात्तु प्राणविज्ञानं संबध्येत। तत्र प्रकरणानुरोधेन श्रुतिः परित्यक्ता स्यात्॥
तेत्वबाधितार्थसंबंधात्तद्व्याख्यानिक इति नात्रत्यस्य वचनविधिरित्याह। नेति ब्रूम इति किं च सत्येन ब्रह्मणातिवदतीति तत्तीर्थ्या श्रुत्या ब्रह्मप्रकरणक्रमति
वादित्वं श्रुतं तस्य प्रकरणेन बाधो न युक्त इत्याह। श्रुत्या हीत्यादिना। नान्येति सत्यवाक्य इत्यर्थः॥

राम॰
७

एवं सत्येनेति श्रुत्या प्रकरणं बाध्यमित्युक्त्वा तु शब्देनापि वाधमाह। प्रकृतेति विवृतिः तस्य सत्यलिंगाच्च पूर्वोक्ताद्भिन्नमित्याह। सत्यं त्वेवेति। प्रकरणावि
च्छेदं दृष्टांतमाह। तस्मादिति। श्रुतिलिंगबलाद् इतः सर्वं प्रकृतात्मा प्राणात् साधर्म्येण भिन्नं द्रष्टव्यमित्यर्थः। एवमितियादित्वस्यात्र सत्संबंधोक्ता प्राणलिंगत्व
निरस्तं। न तु प्रश्नं विनोक्तलिंगात् तस्य प्राणत्वं इति तत्र तस्य प्रयोजनकत्वं दिशाह॥ नचेति। प्रश्नभेदाद् अर्थभेद इति नन्वियमनः एकस्यात्मनो मैत्रेय्या

प्रकृतत्वाच्च सर्वश्वेतुकश्चेन्नसंगच्छेतैव तु याज्ञवल्क्य इति वदतीति। सत्यं त्वेवविजिज्ञासितव्यमिति च प्रयत्नांतरकरणमर्थांतरविवक्षां सूचयति। त
स्माद्धैकवेदप्रकरणमप्रकृतो मानेन तु महाभाष्ये पश्चतुरो वेदानधीत्य इत्येकवेदेभ्यो ऽर्थांतरभूतश्चतुर्वेदः संप्रश्यते॥ ताद्रूप्येणात् इष्टव्यं
। नच प्रश्नप्रतिवचनरूपयैवार्थांतरविवक्षया भवितव्यमिति नियमोऽस्ति। प्रकृतसंबंधासंभवकारितत्वादर्थांतरविवक्षायाः तत्र प्राणा
त्मनुशासनं श्रुत्वा तूष्णींभूतं नारदं स्वयमेव सनत्कुमार उपदिशति। प्राणविज्ञानेन विकारान्ततद्विषयेणातिवादित्वमनतिवादित्वमेवेत
दैवतु वा अतिवदति यः सत्येनातिवदतीति। तत्र सत्यमिति परं ब्रह्मोच्यते परमार्थरूपत्वात् सत्यज्ञानमनंतं ब्रह्मेति श्रुतेः। सत्त्वेन तथाभूतादि
त्यन्तरादात्मा सोऽहं भगवः सत्येनातिवदानीत्येवं प्रवृत्तायविज्ञानादिसाधनपरंपरया तत्त्वानमुपदिशति॥ ॥ ॥

बहुशः प्रत्यक्षत्वात्प्रश्नं विनोक्तचतुर्वेदस्य प्रकृतैकवेदाद्भिन्नत्वदर्शनाच्चेत्यर्थः। तत्र यथा चतुर्वेदत्वस्य प्रकृतासंबंधाद् अर्थभेद एवमिहापीतिस्फु
टयति। तत्त्वेत्यादिना सत्यपदेन प्राणोक्तिरित्याशंक्याह। तत्र सत्यमिति विज्ञानं निदिध्यासनं आदिपदान्मतिः श्रद्धा श्रवणमननः शुद्धिनिष्ठा तद्धेतुक
र्मीति। संतः तस्मात्स्वपि श्रवणादीनि शेषस्य सत्यस्य ब्रह्मत्वे लिंगानि॥

एवं श्रुतिलिंगैः आत्मस्याकांतरप्रकरणं बाधित्वा प्रस्तुतं सत्यं ब्रह्म भूमपदोक्तं यद्गुणत्वधर्मीत्याह। तत्र यथेति। किंच सन्निहितादपि व्यवहितं सां
कांक्षं बलीय इति न्यायेन सन्निहितं निराकांक्षं प्राणं हित्वा आकांक्षस्य आत्मा स्वप्रतिपादनाय भूमानं वाक्यापेक्षः इह भूमा ग्राह्य इत्याह। एवं चेति।
किंच शोकस्य पारमित्युपक्रम्य तमसः पारमित्युपसंहारात् शोकस्य मूलोच्छेदं विनातरणायोगाच्च शोकपदेन मूलतमो गृह्यते तेन निवर्तकज्ञानग

तत्र यथा प्राणादधि सत्यं वाच्यं प्रतिज्ञातं तदेवेह भूमेत्युच्यत इति गम्यते। तस्मादस्ति प्राणादधि भूम्न उपदेश इत्यतः प्राणादन्यः परमात्मा
भूमा भवितुमर्हति। एवं चेहात्मविविदिषया प्रकरणस्योत्थानमुपपन्नं भविष्यति। प्राण एवेहात्मा विवक्षित इत्येतदपि नोपपद्यते। नहि प्रा
णस्य मुख्यया वृत्त्यात्मत्वमस्ति। न चान्यत्र परमात्मज्ञानाच्छोकविनिवृत्तिरस्ति नान्यः पन्था विद्यतेऽयनायेति श्रुत्यन्तरात्। तं मा भगवाञ्छोक
स्य पारं तारयत्विति चोपक्रम्योपसंहरति। तस्मै मृदितकषायाय तमसः पारं दर्शयति भगवान्सनत्कुमार इति। तम इति शोकादिकारण
मविद्योच्यते। प्राणान्ते चानुशासने न प्राणस्यान्यायत्ततोच्येत। आत्मनः प्राण इति च ब्राह्मणं। प्रकरणान्ते परमात्मविवक्षा भविष्यति भूमा त्वत्र प्राण एवे
ति चेन्न। स भगवः कस्मिन्प्रतिष्ठित इति स्वे महिम्नीत्यादिना भूम्न एवा प्रकरणसमाप्तेरनुकर्षणात्। वैपुल्यात्मिका च भूमरूपता सर्वकारणत्वा
त्परमात्मनः सुतरामुपपद्यते॥

म्यत्वलिंगात् भूमात्मा ब्रह्मेत्याह। न चान्यत्रेति। आत्मनः प्राणायत्तत्वं प्राणस्य वदतीति संबंधः। नन्विदं चरमं ब्राह्मणं ब्रह्मपरमस्तु ततः प्राक् को भू ८
मा प्राण इति शंकते। प्रकरणान्त इति। तच्छब्देन भूमानुकर्षणात् नैवमित्याह। वैति॥ ॥ ॥ ॥

भूम्नो ब्रह्मत्वे लिंगांतरमाह ॥ धर्मेति सूत्रं । यदुक्तं भूम्नो लक्षणं सुखत्वममृतत्वं च प्राणे सुषुप्तौ च यमिति तदनुपपन्नं यद्यपि घटयति योप्यसाविति वादिना ।
सति बुध्याद्युपाधावात्मनो दुःखत्वादिसत्त्वे भावे सुषुप्तौ तदभावइत्यसंगत्वस्य नार्थब्रह्मोपनिषदि दृष्टत्वं शोतिनपश्यतीति परमात्मानमभूत्सोक्तं ।
तथापि तत्रैवात्मनः सुखत्वमुक्तं न प्राणस्य पतः अत एव तत्परमात्मन एव सुखत्वमाह तस्मादित्यर्थः । अमृतमो नाम्नादिदोषः तन्माहितं तामयमात्मेन्तश्च
धर्मोपपत्तेश्च ॥ अपि च ये भूम्नि श्रूयंते धर्मास्ते परमात्मन्युपपद्यंते ॥ यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमेति दर्श
नादिव्यवहाराभावं भूम्नि अवगमयति परमात्मनि चायं दर्शनादिव्यवहाराभावो वगतो यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येदित्यादेः श्रुतेः
तरात्र । सोप्यसौ सुषुप्त्यवस्थायां दर्शनादिव्यवहाराभाव उक्तः सोप्यात्मन एवासंगत्वविवक्षया उक्तो न प्राणस्वभावविवक्षया । परमात्मप्रकर
णात् । यदपि तस्यामेवावस्थायां सुखमुक्तं तदप्यात्मन एव सुखरूपत्वविवक्षयोक्तं । यत आह । एषोस्य परमानंद एतस्यैवानंदस्यान्यानि भू
तानि मात्रामुपजीवंतीति । इहापि यो वै भूमा तत्सुखं नाल्पे सुखमस्ति । भूमैव सुखमिति । सामयसुखनिराकरणेन ब्रह्मैव सुखं भूमानं दर्श
यति । यो वै भूमा तदमृतमिति अमृतत्वमपीह श्रूयमाणं परमकारणं गमयति । विकाराणाममृतत्वस्यापेक्षिकत्वात् । अतोन्यदार्त्तमिति च श्रुतं
तरात्तो तथा च सत्यत्वं स्वमहिम्नि प्रतिष्ठितत्वं सर्वगतत्वं सर्वात्मत्वमिति चैते धर्माः श्रूयमाणाः परमात्मन्येवोपपद्यंते नान्यत्र । तस्मात् भूमा प
रमात्मेति सिद्धं
रं स एवाधस्तात्स उपरिष्टादिति सर्वगतत्वं स एवेदं सर्वमिति सर्वात्मत्वं च श्रुतं तस्माद्भूमाधिकरणं निर्गुणे समन्वित इति सिद्धं ॥ ॥

स०भा० अक्षरं। बृहदारण्यकं पठति। कस्मिन्निति। यदूर्ध्वं भवच्च भविष्यच्चेत तत्सर्वं कस्मिन्नोतमिति गार्ग्या पृष्टेन मुनिना याज्ञवल्क्येनाव्याकृताकाशः कार्य
९ मात्राश्रय उक्तः। आकाशः कस्मिन्नोत इति द्वितीयप्रश्ने स मुनिरुवाच। तदस्याव्याकृतस्याधिकरणमेतद्वै तदक्षरं अस्थूलादिरूपमित्यर्थः। उभयप्रश्नाक्षर
इदमोंकारसंज्ञयः। पृष्टासनपृष्टो ब्रह्मणोरूढः इति प्रश्नमनूद्य मेलकं। तथाक्षरस्यात्र ब्रह्मणोरूढ इति दृष्टान्तेन पूर्वपक्षः। तत्रोंकारो पाक्षिकः फलं सिद्धं
तेनिर्गुणब्रह्मधीरितिविवेकः। ननु न क्षरतीत्यचलत्वान्नात्रिल्ययोगात् अक्षरशब्दो मुख्य इत्यत आह। प्रसिध्यतिक्रमस्येति। रूढिर्योगमप

अक्षरमंबरांतधृतेः। कस्मिन्नु खल्वाकाश ओतश्च प्रोतश्चेति स होवाचैतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्त्यस्थूलमनण्वित्यादि श्रूयते। त
त्र संशयः। किमक्षरशब्देन वर्ण उच्यते। किं वा परमेश्वर इति। तत्राक्षरसमाम्नाय इत्यादावक्षरशब्दस्य वर्णे प्रसिद्धत्वात् प्रसिद्ध्यतिक्रमस्य
चायुक्तत्वात्। ओंकार एवेदं सर्वमित्यादौ श्रुत्यन्तरे वर्णस्याप्युपास्यत्वेन सर्वात्मकत्वावधारणात् वर्ण एवाक्षरशब्द इत्येवं प्राप्ते उच्यते। पर
एवात्माक्षरशब्दवाच्यः। कस्मात् अंबरान्तधृतेः। पृथिव्यादेराकाशान्तस्य विकारजातस्य धारणात्। तत्र हि पृथिव्यादेः समस्तविकारजातस्य का
लत्रयविभक्तस्याकाश एव तदोतं च प्रोतं च आकाशे प्रतिष्ठितत्वमुक्त्वा कस्मिन्नु खल्वाकाश ओतश्च प्रोतश्चेत्यनेन प्रश्नेन इदमक्षरमवता
रितं तथा चोपसंहृतमेतस्मिन्नु खल्वक्षरे गार्ग्याकाश ओतश्च प्रोतश्चेति। न चेयमंबरान्तधृतिर्ब्रह्मणोऽन्यत्र संभवति। यदप्योंकार एवेदं सर्वमि ९
ति तदपि ब्रह्मप्रतिपत्तिसाधनत्वात्स्तुत्यर्थं द्रष्टव्यं। तस्मान्न क्षरत्यश्नुते वेति नित्यत्वव्याप्तिभ्यामक्षरं परमेव ब्रह्म॥ ॥ ॥

हरतीतिन्यायादित्यर्थः। वर्णस्योंकारस्य सर्वात्मत्वकथनमिदं ध्यानार्थमिदं यथाश्रुतं तरेसर्पोऽस्य वक्तिसाह। ओंकार इति। प्रश्नप्रतिवचनाभ्यामाका
शांतजगदाधारत्वेनात्मसमर्पणनिश्चयान्न ध्यानार्थता। ततश्च श्रुतिं बलाद्बाधित्वा योगवृत्तिर्ग्राह्येति सिद्धान्तयति एवमित्यादिना॥ ॥

आकाशं भूतं कृत्स्नं कृते। स्यादेतदिति। चेतनकर्तृकृशिक्षापात्रश्रुते मैत्रमिसाह। साचेति। सूत्रं व्याचष्टे। साचेति। चकारस्त्वाकाशस्यम्
तत्त्वनिरासार्थः। भूताकाशस्य कार्यत्वात् पातिनः श्रुतसर्वकार्याश्रयत्वायोगात्। अव्याकृतमत्र नामैवाकाशः प्रधानस्यापि तद्वृत्तितदाश्रयत्वात्

स्यादेतत्। तथापि स्वचेतनकारणाधीनत्वं अंबरान्तधृतिरभ्युपगम्यते। प्रधानकारणवादिनोपीयमनुपपद्यते कथमंबरान्तधृतेर्ब्रह्मत्वप्रतिपत्तिः
अतउत्तरं पठति॥ सा च प्रशासनात्। सा चांबरान्तधृतिः परमेश्वरस्यैव कर्म कस्मात् प्रशासनात्। प्रशासनं हि श्रूयते। एतस्य वा अक्षरस्य
प्रशासने गार्गि सूर्याचंद्रमसौ विधृतौ तिष्ठत इत्यादि। प्रशासनं च पारमेश्वरं कर्म नाचेतनस्य प्रशासनं संभवति। नह्यचेतनानां घटादिका
रणानां मृदादीनां घटादिविषयं प्रशासनमस्ति। अन्यभावव्यावृत्तेश्च॥ अन्यभावव्यावृत्तेश्च कारणात् ब्रह्मैवाक्षरशब्दवाच्यं तस्यैवांबरान्त
धृतिः कर्म नान्यस्य कस्यचित्। किमिदमन्यभावव्यावृत्तेरिति॥ अन्यस्य भावोऽन्यभावस्तस्माद्व्यावृत्तिरन्यभावव्यावृत्तिरिति। एतदुक्तं भव
ति। यदन्यद्ब्रह्मणोऽक्षरशब्दवाच्यमिहाशंक्यते तद्भावादिदमंबरान्तविधारणमक्षरं व्यावर्तयति श्रुतिः। तद्वा अक्षरं गार्ग्यदृष्टं द्रष्टृ अश्रुतं श्रो
तृ अमतं मन्तृ अविज्ञातं विज्ञातृ इति। तत्रादृष्टत्वादिव्यपदेशः प्रधानस्यापि संभवति। द्रष्टृत्वादिव्यपदेशस्तु न संभवत्यचेतनत्वात्॥

क्षरं न प्रधानमित्यर्थः। विधृतौ विषयत्वेन धृतौ। प्रश्नपूर्वकं सूत्रं व्याकरोति। किमिदमिति निघट्टत्वात् व्यावृत्तेरिति भ्रान्तिं निरस्यति। एतदि
ति। अंबरान्तस्याधारमक्षरं श्रुतिरचेतनत्वाद्व्यावर्तयतीत्यर्थः॥ ॥ ॥ ॥ ॥

जीवघनात्परत्वेनापि स्वत्वं योजयति। तथेति। अस्य भावो भेदः तन्निषेधादिति सूत्रार्थः। तर्हि शोधितो जीव एवास्त्वीक्षणकर्म न पर इत्यत आह। न हीति। शोधिते जीवत्वं नास्तीत्यर्थः। तस्मात्सार्वज्ञ्यसर्वगुणनिर्गुणत्वस्वरूपेण समन्वितमिति सिद्धम्। ईक्षतिकर्मव्यपदेशात्सः। प्रश्नोपनिषदमुदाहरति। एतदिति। पिप्पलादो गुरुः सत्यकामेन पृष्टो ब्रूते हे सत्यकाम परं निर्गुणमपरं सगुणं ब्रह्मैतदेव यदोंकारः स हि प्रतिमेव विष्णोस्तस्य प्रतीकत्वात्स्थानमेवं ब्रह्मात्मना विद्वानेतेनैवोंकारध्यानेनायतनेन प्राप्तिसाधनेन यथाध्यानं परमपरं वान्वेति प्राप्नोतीति प्रकृत मध्ये एकमात्रद्विमात्रोंकारध्यानमुक्त्वा ब्रवीति।

तथा नान्यदतोऽस्ति द्रष्टृ नान्यदतोऽस्तीमं तन्नान्यदतोऽस्ति विज्ञात्रित्यात्मभेदप्रतिषेधात्। न शरीरस्योपाधिमतोऽक्षरशब्दवाच्यत्वं कथञ्चिदुप-मन्त्रोऽत्र भवागमनः स्पृष्टोपाधिमत्त्वप्रतिषेधात्। नहि निरुपाधिकः शरीरो भवति। तस्मात्परमेव ब्रह्माक्षरमिति निश्चयः॥ ईक्षतिकर्मव्यपदेशात्सः॥ एतद्वै सत्यकाम परं चापरं च ब्रह्म यदोंकारस्तस्माद्विद्वानेतेनैवायतनेनैकतरमन्वेतीति प्रकृत्य श्रूयते। यः पुनरेतं त्रिमात्रेणोमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीतेति। किमस्मिन्वाक्ये परं ब्रह्माभिध्यातव्यमुपदिश्यते आहोस्विदपरमिति एतेनैवायतनेन परमपरं चैकतरमन्वेतीति प्रकृतत्वात्संशयः।

यः पुनरिति। इत्थंभावे तृतीया ब्रह्मोंकारयोरभेदोपक्रमात्। यो ह्यकारादिमात्रात्रये एकस्या मात्राया अकारस्य ऋग्वेदादिकं जाग्रदादिविभूतिं जानाति तेन सम्यक् ज्ञाता एकमात्रा यस्यौंकारस्य स एकमात्रः एवं मात्राद्वयस्य सम्यग्विभूतिज्ञानेन द्विमात्रस्तथा त्रिमात्रस्तमोंकारं पुरुषं योऽभिध्यायीत स ओंकारविभूतित्वेन ध्यातैः सामभिः सूर्यद्वारा ब्रह्मलोकं गत्वा परमात्मानं पुरुषमीक्षत इत्यर्थः॥ संशयं तद्बीजं चाह। किमित्यादिना। अस्मि- १०

पर्येवं पूर्वपक्षे नेतोक्तेः ओंकारे वु द्विस्थूलं ध्यातव्यमिति श्रीमत इति प्रसंगसंगतिः। यद्यपि पूर्वत्र वर्णो रूढस्याक्षरसूत्रस्य लिंगात् ब्रह्मणो हृदिस्थितस्ततश्च ह्रस्वा
पि ब्रह्मलोकप्राप्तिलिंगात् परब्रह्म स्याहिरण्यगर्भस्य विरिति ह्यं तेन पूर्वपक्षस्य स्थितत्वात् परमिति। कार्यपरब्रह्मणो ह्यापत्तिरूपमत्रफलं सउपासकः। स
र्वैतं पत्रः प्रविष्टः। ननु वस्तुतान ईश्वर इति ध्यानात्सर्वं द्वैतवस्त्विसल्य मपिफलं ब्रह्मोपासकस्य स्तुतमिल्यत आह नहीति। अल्पत्वतथात्वेपि अत्र परवि

तत्रापरमिदं ब्रह्मेति प्राप्तं कस्मात् स तेजसि सूर्ये संपन्नः स सामभिरुन्नीयते ब्रह्मलोकमिति च तद्विदो देशपरिच्छिन्नस्य फलस्योच्यमानत्वा
त्। न हि परब्रह्मविद् देशपरिच्छिन्नं फलमश्नुवीतेति युक्तं। सर्वगतत्वात् परस्य ब्रह्मणः। नन्वपरब्रह्मपरिग्रहे परं पुरुषमिति विशेषणं नोपपद्य
ते। नैष दोषः। पिंडापेक्षया प्राणस्य परत्वोपपत्तेः इत्येवं प्राप्तेऽभिधीयते। परमेव ब्रह्मेहाभिध्यातव्यमुपदिश्यते कस्मात्। ईक्षतिकर्मव्यपदेशात्।
ईक्षतिः दर्शनं दर्शनव्याप्यमीक्षतिकर्म ईक्षतिकर्मत्वेनास्याभिध्यातव्यस्य पुरुषस्य वाक्यशेषे व्यपदेशो भवति स एतस्माज्जीवघनात्परात्परं पुरु
शयं पुरुषमीक्षत इति॥

त्परमपरविद् परमत्वेतीत्युपक्रमात् परविदो परप्राप्तिरपक्रमादुपक्रमविरोधात् न चात्र परप्राप्तिरेवोक्तेति वाच्यं। परस्य सर्वगतत्वात् अत्रैव प्राप्तिः स्यात्।
भवेन सत्ये ह्यण्गतिवैयर्थ्यात्। उपक्रमानुग्रहीत्वाद् परप्राप्तिरूपात् लिंगात् परं पुरुषमिति परश्रुतिर्बाध्येत्यर्थः। परश्रुतेर्गतिं पृच्छति। नन्विति पिं
डः स्थूलो विराट् तदपेक्षया सूत्रस्य परत्वमिति समाधत्ते। सत्रे मतद्द ईश्वरपर इति प्रतिज्ञा वेनं तस्याचष्टे परमेवेति सउपासकः एतस्माद्धिरण्यगर्भात्.

ईक्षतिकर्मव्यपदेशात्सः॥

प्र· भा· ११

नन्वीक्षणविषयोप्यपरोक्तस्तत्राह। तत्राभिध्यायतेरिति। नन्वीक्षणस्य प्रमात्वाद्विषयसत्तामपेक्ष्य तदिति भवतु स सः परं ईक्षणीयः ध्यातव्यस्तु स
सोपरः किं न स्यादित्यत आह। स एवेति। श्रुतिः। यं प्रत्यभिज्ञानात्स एवायमिति सौत्रः सशब्दो व्याख्यातः। अत्रैवं सत्र योजना ओंकारेण ध्येयः सपर
एवात्मा वाक्यशेषे ईक्षणीयत्वेनोक्तः श्रुतिप्रत्यभिज्ञानात्स एवायमिति। ननु शब्दभेदात्तन्न प्रत्यभिज्ञेति शंक्यते। नन्विति। परात्परमिति शब्दभे
दश्च गीरूपश्रुतिभ्यां पुरुषप्रत्यभिज्ञाया अविरोधमाह। अत्रेति। नन्वेतस्माज्जीवघनात्परादित्येतत्पदेनोपक्रांतध्यातव्यपरामर्शादीक्षणीयः परा

तत्राभिध्यायतेरतथाभूतमपि वस्तु कर्म भवति मनोरथकल्पितस्यापि अभिध्यायतिकर्मत्वात्। ईक्षतेस्तु तथाभूतमेव वस्तु लोके कर्म दृष्ट
मित्यतः परमात्मैवायं सम्यग्दर्शनविषयभूत ईक्षतिकर्मत्वेन व्यपदिष्ट इति गम्यते। स एव चेह परपुरुषशब्दाभ्यामभिध्यातव्यः प्रत्यभिज्ञा
यते। नन्वभिध्याने परः पुरुष उक्त ईक्षणे तु परात्परः कथमितर इतरत्र प्रत्यभिज्ञायत इत्यत्रोच्यते। परपुरुषशब्दौ तावदुभयत्र साधारणौ।
न चात्र जीवघनशब्देन प्रकृतोभिध्यातव्यः परः पुरुषः परामृश्यते येन तस्मात्परात्परोयमीक्षितव्यः पुरुषोन्यः स्यात्। कस्तर्हि जीवघन इत्यु
च्यते घनो मूर्तिर्जीवलक्षणो घनो जीवघनः। सैंधवखिल्यवत् यः परमात्मनो जीवघनरूपः खिल्यभाव उपाधिकृतः परश्च विषयेंद्रियेभ्यः
सोत्र जीवघन इति॥ ॥

त्माध्येयादन्य इत्यत आह। न चात्रेति। ध्यानस्य तत्फलेक्षणस्य च लोके समानविषयत्वाद्ध्येय एवेक्षणीय एवं चोपक्रमोपसंहारयोरेकवाक्यता भवती ११
तिभावः। स सामभिरुन्नीयते ब्रह्मलोकं स एतस्माज्जीवघनादित्येतत्पदेन संनिहिततरो ब्रह्मलोकस्वामी परामृश्यत इति प्रश्नपूर्वकं व्याचष्टे। कस्तर्हीत्या
दिना मूर्तौ घन इति सूत्रादिति भावः। सैंधवखिल्यो लवणपिंडः खिल्यवद्रूपी भावः परिच्छेदोपस्थितः खिल्यभावः॥ ॥ ॥५

एतस्मादेव ब्रह्मलोकोवापरात्परं पश्यते इत्याह। औं। अपर इति जीवघनात् स ब्रह्मलोके लक्षणं द्रक्ष्यति। जीवानां हीति। व्यष्टिकरणाभिमानिनां जी
वानां घनः संघातो यस्मिन् सर्वकरणाभिमानिनि स जीवघनः तत्स्वार्णीकलात्परंपरं सर्वं धेनलोको लक्ष्य इत्यर्थः। तस्मात्परः सर्वलोकातीतः शुद्ध इत्य
र्थः। परं पुरुषमद्वैतं परमात्मनि मुख्यत्वाद्य एव ध्येय इत्याह। परमिति। यस्मात्परं ब्रह्म परं नास्ति किंचित्स एव मुख्यः परः न तु पिंडात्मनः सूत्रात्मे
अपर आह। स सामभिरुन्नीयते ब्रह्मलोकमित्यतीतानंतरवाक्यनिर्दिष्टो यो ब्रह्मलोकः परस्थलोकांतरे भूः सोऽत्र जीवघन इत्युच्यते। जीवानां हि
सर्वेषां करणपरिवृतानां सर्वकरणात्मनि हिरण्यगर्भे ब्रह्मलोकनिवासिनि संघातोपपत्तेः भवति ब्रह्मलोको जीवघनः तस्मात्परः यः परमात्मे
स एकमभूतः स एवाभिध्याने फिकर्मी भवत इति गम्यते। परं पुरुषमिति च विशेषणं परमात्मपरिग्रहे एवावकल्पते। परो हि पुरुषः परमात्मै
व भवति यस्मात्परं किंचिदन्यन्नास्ति पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिरिति च श्रुतेः तत्। परं चापरं च ब्रह्म यदोंकार इति च विभज्यानं
तरमोमोंकारेण परं पुरुषमभिध्यातव्यं ब्रुवत् परमेव ब्रह्म परं पुरुषं गमयति। यथा पादोदरस्त्वचा विनिर्मुच्यते एवं ह वै स पाप्मना विनिर्मु
च्यत इति पाप्मविनिर्मोकफलवचनं परमात्मानमिहाभिध्यातव्यं सूचयति। अथ यदुक्तं परमात्माभिध्यायिनो नदेश्यपरिच्छिन्नं फलं युज्यत
इति। अत्रोच्यते त्रिमात्रेणोंकारेणालंबनेन परमात्मानमभिध्यायतः फलं ब्रह्मलोकप्राप्तिः क्रमेण च सम्यग्दर्शनोत्पत्तिरिति क्रममुक्त्यभिप्रायमे
तत् भविष्यतीत्यदोषः
संर्थः। किंच परशब्देनोपक्रमे निश्चितं परं ब्रह्मैवात्र वाक्यशेषेऽप्यभिध्यातव्यमभिप्रेत्याह। परं चापरं चेति। पाप्मनिवृत्तिलिंगाच्चेत्याह। यथेति पादोदरः सर्पः उंकारेण
रब्रह्मोपासनया स एव हारब्रह्मलोकं गत्वा परब्रह्मणि स्थित्वा तदेव शांतमभयं प्राप्नोतीत्यविरोधमाह। अत्रोच्यत इति॥ एवमेकवाक्यतासमर्थप्रकरणानुगृ
हीतं परं पुरुषं श्रुतिः परब्रह्मप्रभित्यपाय ब्रह्मलोकप्राप्तिलिंगबाधित्वात् कंपरा व ध्येये ब्रह्मणि समन्वितमिति सिद्धं॥
॥

स॰भा॰ दहर उत्तरेभ्यः ॥ छांदोग्यमुदाहरति अथेति । भूमविद्यानंतरं दहरविद्याप्रारंभार्थोथशब्दः ब्रह्मणो नित्यसिद्धत्वात् ब्रह्मपुरं शरीरं तस्मिन्नस्म
१२ स्मिन्निदं दहरमल्पं हृत्पद्मं । तस्मिन्हृदयपद्मे दहराकाशछिद्रं ब्रह्म तदन्वेष्टव्यं विचार्यमित्यर्थः । अत्राकाशो जिज्ञास्यस्तदंतरस्थं वेति संशयः कल्प्यः

दहर उत्तरेभ्यः ॥ अथ यदिदमस्मिन्ब्रह्मपुरे दहरं पुंडरीकं वेश्म दहरोस्मिन्नंतर आकाशस्तस्मिन्यदंतस्तदन्वेष्टव्यं तद्वाव विजिज्ञासितव्यं इत्यादि
वाक्यं समाम्नायते । तत्रायमस्मिन् दहरे हृदये पुंडरीके दहर आकाशः श्रुतः ॥ स किं भूताकाशोथवा विज्ञानात्मा अथवा परमात्मेति संशय्यते । कुतः सं
शयः । आकाशब्रह्मपुरशब्दाभ्यामाकाशशब्दो ह्ययं भूताकाशे परस्मिंश्च प्रयुज्यमानो दृश्यते । तत्र किं भूताकाश एव दहरः स्यात् किं वा पर इ
ति संशयः । तथा ब्रह्मपुरमिति किं जीवो ब्रह्मनामा ॥ तस्येदं पुरं शरीरं ब्रह्मपुरमथवा परस्यैव ब्रह्मण एव पुरं ब्रह्मपुरमिति तत्र जीवस्य परस्य वान्यत
रस्य पुरस्वामिनो दहराकाशत्वे संशयः

तत्र यथाकाशं तदा संशयद्वयं तत्राकाशशब्दादेकं संशयमुक्त्वा ब्रह्मपुरशब्दसंशयांतरमाह । तथा ब्रह्मपुरमितीति अत्र शब्दे जीवस्य ब्रह्मणो १२
वा पुरमिति संशयः तत्र तस्मिन्संशये सतीति योजना

परपुरुषशब्दस्य ब्रह्मणि मुख्यत्वात्ब्रह्म ध्येयमित्युक्तं। तथैवाकाशपदस्य भूताकाशे रूढत्वाद्भूताकाशो ध्येय इति दृष्टांतेन पूर्वपक्षयति। तत्रा
काशेसादिना। दहरवाक्यस्यानंतरप्रजापतिवाक्यस्य च सगुणनिर्गुणत्वे च समन्वयोक्तेः अस्मादिसंगतयः पूर्वपक्षे भूताकाशगुणास्तिः। सिद्धांते सगु
णब्रह्मोपास्त्या निर्गुणधीरिति फलभेदः। न चाकाशस्तल्लिंगादित्यनेनास्य पुनरुक्तता शंकनीया अत्र तस्मिन्यदंतस्तदन्वेष्टव्यमित्याकाशांतःस्थ

तत्राकाशशब्दस्य भूताकाशे रूढत्वाद्भूताकाशस्य दहरशब्द इति प्राप्तं तस्य च दहरपतनापेक्षमाद्दहरत्वं यावान्वा अयमाकाशस्तावानेषों
तर्हृदय आकाश इति च बाह्याभ्यंतरभावकृतभेदस्योपमानोपमेयभावो द्यावापृथिव्यादि च तस्मिन्नंतः समाहितमथकाशात्मनाकाशस्ये
कत्वात्। अथवा जीवो दहर इति प्राप्तं ब्रह्मपुरशब्दात् जीवस्य हीदं पुरं स्वशरीरं ब्रह्मपुरमित्युच्यते। तस्य स्वकर्मणोपार्जितत्वात् भक्तत्वाच
तस्य ब्रह्मशब्दवाच्यत्वं॥

स्यान्वेष्टव्यत्वादिलिंगान्वयेन दहराकाशस्य ब्रह्मत्वे स्थूललिंगाभावात् ननु भूताकाशं एवं स्यात्स्वत्वं कथमेकस्योपमानत्वमुपमेयत्वं च कथं उभे
अस्मिन्द्यावापृथिवी अंतरेव समाहिते इत्याधारत्वाग्निश्च वायुश्चेत्यादिना अक्षतसर्वाश्रयत्वं च कथमित्याशंकाक्रमेण परिहरति। तस्येत्यादिना हृदयापेक्षया
ऽल्पत्वं ध्यानार्थं कल्पितमेव तस्माद्दहरः। स्वतएकत्वात्सर्वाश्रयत्वमित्यर्थः। नन्वेष आत्मेत्यात्मशब्दो भूते न युक्त इत्यरुचेराह॥ अथवेति॥ भक्तो ति चैतन्मगु

॥ [illegible]

स॰भा॰२ पुरत्वं ब्रह्मणः घटतामित्यत आह। नहीति। अस्तु पुरस्वामी जीवो हृदयस्याकाशस्तु ब्रह्मेत्यत आह। तत्रेति। पुरस्वामिन एव तदंतस्थत्वसंभवात् नान्यापे
क्षेत्यर्थः। व्यापिनो तस्य तत्वं कथमित्यत आह। मनइति। आकाशपदेन दहरमनुरूप्योक्तो यनादिकं ब्रह्माभेदविवक्षया भविष्यतीत्याह। आकाशेति। ननु
१२ जीवस्याकाशपदार्थत्वमयुक्तमित्याशंक्यातर्हि तदाकाश एव दहरोस्तु तस्मिन्नंतस्थं किंचिद्ध्येयमिति पक्षांतरमाह। नचात्रेति। परमंतस्थं वस्तु तद्धि शोधये
त्वेनाधारत्वेन दहराकाशस्य तच्छब्देनोपादानादित्यर्थः यद्वा अन्वेष्यत्वादिलिंगात् दहरस्य ब्रह्मत्वनिश्चयात् दहराकाशस्य तल्लिंगादित्यनेन गतार्थत्वमिति

नहि परस्य ब्रह्मणः शरीरेण स्वस्वामिभावः संबंधोस्ति। तत्र पुरस्वामिनः पुरैकदेशे वेश्मानं दृष्टं यथा राज्ञो मनउपाधिकस्य जीवो मनस्थप्राये
ण हृदये प्रतिष्ठितमित्यतो जीवस्यैव दहृदयं तत्स्थानं स्यात्। दहरत्वमपि तस्यैवाराग्रोपमितत्वादुपकल्पते। आकाशोपमितत्वादि च ब्रह्मा
भेदविवक्षया भविष्यति। नचात्र दहरस्याकाशस्यान्वेष्टव्यत्वं विजिज्ञासितव्यत्वं च श्रूयते तस्मिन्यदंतरिति परविशेषणत्वेनोपादानादित्यत
उत्तरं ब्रूमः परमेश्वर एव दहराकाशो भवितुमर्हति न भूताकाशो जीवो वा। कस्मादुत्तरेभ्यो वाक्यशेषगतेभ्यो हेतुभ्यः। तथा हि ईष्टव्यतया विहित
स्य दहरस्याकाशस्य। तं चेद्ब्रूयुरित्युपक्रम्य किं तदत्र विद्यते यदन्वेष्टव्यं यद्वाव विजिज्ञासितव्यमित्याक्षेपपूर्वकं प्रतिसमाधानवचनं भवति।
स ब्रूयाद्यावान्वा अयमाकाशस्तावानेषोंतर्हृदय आकाश उभे अस्मिन्द्यावापृथिवी अंतरेव समाहिते इत्यादि॥ ॥

शंकां अत्र निरस्यति। मा अन्वेष्यत्वादेः परविशेषणत्वेन ग्रहणात् दहरस्य ब्रह्मत्वे लिंगं नास्तीत्यर्थः। अपहतपाप्मत्वादिलिंगोपेतात्मश्रुत्यपेक्षकेवलाकाशश्रु १३
तिर्यत्वेति सिद्धांतयति। परमेश्वरस्याद्विना आकाशस्याक्षेपपूर्वकमिति संबंधः। तमाचार्यं प्रतिपदिशुः सुर्दद्म एवं तावदल्पं तत्रस्याकाशेयमत्र तरः किं त
दत्रान्वेष्यते हि चार्ये प्रत्युपमितितरस्य आचार्यो ब्रूयादाकाशसाम्यतानिवृत्तिमित्यर्थः॥ ॥ ॥ ॥ ॥

वाक्यस्य तात्पर्यमाह। तत्रेति। निवर्तयति। आचार्य इति शेषः। नन्वाकाशशब्देन रूढ्या भूताकाशस्य भानात् कथं तन्निवृत्तिरित्याशंक्याह। यद्य-
पीति। ननु रामरावणयोर्युद्धं रामरावणयोरिवेत्यभेदेप्युपमा दृष्टेति चेत्। तत्राभेदे सादृश्यस्यानन्वयेनानुक्तस्य निरूपकत्वे तात्पर्यात् अनन्वयालंका-
र इति काव्यविदः। एवं च प्रकृते न ध्वनिरस्येति। नन्वित्यादि। कासीता श्लिष्टइवाभातीति कोदंडश्रमणमानुषइत्यादौ प्रभायोगसीताश्लेषरूपविशेषणभेदादेकरत्र
तत्र पुंडरीकदहरत्वेन साम्याद्दहरत्वस्याकाशस्य प्रसिद्धाकाशोपम्येन दहरत्वनिवर्तनेन भूताकाशत्वं दहरस्याकाशस्य निवर्तयतीति गम्यते। यद्य-
प्याकाशशब्देन भूताकाशे रूढत्वमुपपादितं नैवतत्सोपमानं तेनोपपद्यत इति भूताकाशशंकानिवर्तिता भवति। नन्वेकस्याप्याकाशस्य बाह्याभ्यंत-
रत्वकल्पितेन भेदेनोपमानोपमेयभावः संभवतीत्यत आह नैवमिति। अवकाशभेदेन कल्पितेनापि अभेदस्याश्रयणमपि च कस्यचिद्भेदमुप-
मानोपमेयभावं वर्णितः परिच्छिन्नत्वादभ्यंतराकाशस्य न बाह्याकाशपरिमाणत्वमुपपद्यते। ननु परमेश्वरस्यापि ज्यायानाकाशादिति श्रुत्यंत-
रान्नैवाकाशपरिमाणत्वमुपपद्यते। नैष दोषः। पुंडरीकवेष्टनप्राप्तदहरत्वनिवृत्तिपरत्वाद्बाह्याकाशस्य नतावत्त्वप्रतिपादनपरत्वं। उभयप्रतिपादके
हि वाक्यं भिद्येत॥
अपरोक्षमेकस्यैवश्रीरामस्योपमानोपमेयभावसिद्ध्यर्थमगत्या कल्पितमनुदाहरणं दृष्टमेव नैव मन्त्राश्रयणं युक्तं बाह्यस्याल्पत्वनिवृत्तिपरत्वेनयति
सद्भावात्। किंच हार्दाकाशस्यांतरत्वास्याशेषमपत्वेन व्यापकत्वं बाह्याकाशसादृश्यं न युक्तमित्याह। अपि चेति। आंतरत्वलाभेतु असंताभेदान्न सादृश्यमि-
ति भावः। ननु हार्दाकाशस्याल्पत्वनिवृत्तौ तावत्वेच तात्पर्यं किं न स्यादित्यत आह उभयेति। अतोल्पत्वनिवृत्तावेव तात्पर्यमिति भावः॥ ॥

सू॰भा॰१ एवमाकाशोपमितत्वाद्दहराकाशो न भूतमित्युक्तं सर्वाश्रयत्वादिलिंगैर्भक्ष्यतयेत्याह। न चेत्यादिना विगता जिघत्सा जग्धुमिच्छा यस्य सोयं विजिघत्सः बुभु
सान्नस्पृहेत्यर्थः। अथ यमस्कृत ब्रह्मशब्देन तत्सापेक्षचरमश्रुत नभश्छीदि भन्नसर्वः संबंधो नेयः न तु ब्रह्मणः पुरमिति षष्ठ्यर्थः स्वस्वामिभावो ग्राह्यः। निरपेक्षे
१४ ण तत्सापेक्षं वाच्यमिति मत्वा पादित्याह। अत्र भ्रम इति। शरीरस्य ब्रह्मणस्तदुपलब्धिस्थानत्वरूपेणैवं धेमानमाहस्यदिति। पुर्षु शरीरेषु पुरि हृदये शय इति पु

नवकल्पितभेदे पुंडरीकवेष्टिते आकाशैकदेशे द्यावापृथिव्यादीनामंतःसमाधानमुपपद्यते॥ एष आत्मापहतपाप्मा विजरो विमृत्युर्विशोको विजिघ
त्सोऽपिपासः सत्यकामः सत्यसंकल्प इति चात्मत्वापहतपाप्मत्वादयश्च गुणा न भूताकाशे संभवंति। यद्यप्यात्मशब्दो जीवे संभवति। तथापीतरेभ्यः
कारणेभ्यो जीवाशंकापि निवर्तिता भवति। नह्युपाधिपरिच्छिन्नस्याराग्रोपमितस्य पुंडरीकवेष्टनकृतं दहरत्वं शक्यं निवर्तयितुं॥ ब्रह्माभेदविव
क्षया जीवस्य सर्वगतत्वादि विवक्ष्यत इति चेत्। यदात्मतया जीवस्य सर्वगतत्वादि विवक्ष्येत तस्यैव ब्रह्मणः साक्षात्सर्वगतत्वादि विवक्ष्यतामिति यु
क्तं। यदप्युक्तं ब्रह्मपुरमिति जीवेन पुरस्योपलक्षितत्वाद्राज इव जीवस्यैवेदं पुरस्वामिनः पुरैकदेशवर्तित्वमस्त्विति अत्र ब्रूमः। परस्यैवेदं ब्रह्मणः पुरं
सत् शरीरं ब्रह्मपुरमित्युच्यते। ब्रह्मशब्दस्य तस्मिन्मुख्यत्वात्। तस्याप्यस्ति पुरेणानेन संबंध उपलब्ध्यधिष्ठानत्वात्। स एतस्माज्जीवघनात्परात्परं
पुरिशयं पुरुषमीक्षते। स वा अयं पुरुषः सर्वासु पूर्षु पुरिशय इत्यादिश्रुतिभ्यः। अथवा जीवपुर एवास्मिन्ब्रह्म सन्निहितमुपलभ्यते। यथा शालग्रा
मे विष्णुः सन्निहित इति तद्वत्॥ १४

रूप इत्यन्वयः। ननु ब्रह्मशब्दस्य जीवे प्रयोगादिना शरीरवद्धि हेतौ मुख्यत्वान्न षष्ठ्यर्थः कथंचित्तत्रेप्यत आह। अथवेति। यं हप्पति देहमिति ब्रह्मजीवः।
तत्स्वामिके पुरे हृदयं ब्रह्मवेश्म भवतु एतत्पुरे मैत्रस्य सद्मवदित्यर्थः॥ ॥ ॥ ॥ ॥ ॥

अनंतफललिंगादपि दहरः परमात्मैवेत्याह। तद्यथेति। अथ कृतफलाद्धेतुप्यानंतरमिह जीवदशायामात्मानं दहरं तदाश्रितांश्च सत्यकामादिगु
णान् आचार्योपदेशमननविद्याध्यानेनानुभूय परलोकं गच्छंति तेषां सर्वलोकेषु अनंतमैश्वर्यं स्वेच्छया संचलनादिकं भवतीत्यर्थः। दहरे इत्युक्तलिंगान
न्यथासिद्धानि तेषां तदंतस्थगुणसादिस्तुत्युक्तं स्मारयित्वा दूषयति। यद्यपीत्यादिना। उक्तरत्याकाशस्वरूपप्रतिपादनान्यथानुपपत्त्या पूर्वोक्तस्यान्वेष्ट

तद्यथेह कर्मचितो लोकः क्षीयते। एवमेवामुत्र पुण्यचितो लोकः क्षीयत इति च कर्मणामंतवत्फलत्वमुक्त्वाथ य इहात्मानमनुविद्य व्रजंत्ये
तांश्च सत्यान्कामान् तेषां सर्वेषु लोकेषु कामचारो भवतीति प्रकृतदहराकाशविज्ञानस्यानंतफलत्वं वदन्परमात्मत्वमस्य सूचयति। यद
प्येतदुक्तं। न दहरस्याकाशस्यान्वेष्टव्यत्वं विजिज्ञासितव्यत्वं च श्रुतं परविशेषणत्वेनोपादानादिति तत्र ब्रूमः। यद्याकाशो नान्वेष्टव्यत्वेनोक्तः
स्यात् यावान्वा अयमाकाशस्तावानेषोंतर्हृदय आकाश इत्याद्याकाशस्वरूपप्रदर्शनं नोपपद्येत। नन्वेतदप्यंतर्वर्तिवस्तुसद्भावदर्शनायै
व प्रदर्श्यते। तं चेद्ब्रूयुः यदिदमस्मिन्ब्रह्मपुरे दहरं पुंडरीकं वेश्म दहरोस्मिन्नंतराकाशः किं तत्र विद्यते यदन्वेष्टव्यं यद्वाव विजिज्ञासि
तव्यमित्याक्षिप्य परिहारावसरे आकाशौपम्यपूर्वकं द्यावापृथिव्यादीनामंतःसमाहितत्वदर्शनात्। नैतदेवं एवं हि सति यदंतःस
माहितं द्यावापृथिव्यादि तदन्वेष्टव्यं विजिज्ञासितव्यं चोक्तं स्यात्॥

त्वादिकं सिद्धमित्यन्यथोपपत्तिं शंकते। नन्विति। एतदाकाशस्वरूपं आक्षेपबीजमाकाशस्याल्पत्वमुपमया निरस्यांतस्थवस्तुकैस्तदंत
स्यमेव ध्येयमिति सत्यं तर्हि जगदेव ध्येयं स्यादित्याह नैतदेवमिति॥ ॥ ॥ ॥

ऽस्तु कोऽसौ दोषस्तत्राह। तत्रेति। सर्वनामसंसारहरस्याकाशस्य मा कृष्णात्मलालादिगुणैरनुरक्ता गुरौः सह तस्मैव बध्येमर्त्या कश्चिदेवो ब्रूते तदिदं धरत्यर्थः।
तस्मिन्यदंतरिति तत्र यदिदं नस्य अहितमपि हृदये योऽयमपतमायाद्यमिसाह। तस्मादिति। पठा आकाशस्तस्मिन्यदंतस्तदुभयमत्वेष्टव्यमितिपोजनोस

तत्र वाकाशेषो नोपपद्यते तास्मिन्कामाः समाहिताः एष आत्मापहतपाप्मेति हि प्रकृतं यथा वा पृथिव्यादि समाधानाधारमाकाशमाकृ
ष्य परिहारमाह। लानमनुविधमर्जलेतां ब्रह्मस्तान्कामानिति तिसमुच्चयार्थे न चशब्देनालानं च कामाधारमाश्रितांश्च कामान्विष्टेपान्वाक्ये
षोदर्श्यति। तस्मा हृदयोपक्रमेपि दहरस्याकाशो हृदयपुंडरीकाधिष्ठानः सहांतः समाहितैः पृथिव्यादिभिः सत्यैश्च कामैर्भक्तिस्तेपठ
कृइतिगम्यते। स चोक्तः स्मोहेतुमसः परमेश्वर इति॥ गतिशब्दाभ्यां तथा हि दृष्टं लिंगं च॥ दहरः परमेश्वर उत्तरेभ्यो हेतुभ्य इत्युक्तं। तए
वोत्तरे हेतवः दहराचीनी प्रपंच्यंते। इतश्च परमेश्वर एव दहरो भवितुमर्हति यस्मात् दहरवाक्यशेषे परमेश्वरस्यैव प्रतिपादके गतिशब्दौ भवतः। इमाः
सर्वाः प्रजा अहरहर्गच्छंत्य एतं ब्रह्मलोकं न विदंतीति तत्रैव प्रकृतं दहरं ब्रह्मलोकशब्देनाभिधाय तद्विषया गतिः प्रजाशब्दवाच्यानां जी
वानामभिधीयमाना दहरस्य ब्रह्मतां गमयति॥

चयति। सहांतस्थैरिति। दहराकाशस्य ब्रह्मत्वे हेत्वंतरमाह गतीति प्रजा जीवा एतं हृदयस्थं दहरं ब्रह्मस्वरूपं लोकमहरहः प्रलये स्वापे गच्छंत
स्तत्र लीनाः स्थिताः अप्युत ताशाने नावृता हतं न जानंतीत्यतः पुनरुत्तिष्ठंती सर्पः॥ ॥ ॥ ॥ १५

नन्वेतत्पदपरामृष्टदहरस्य स्वापे जीवगमनेपि ब्रह्मलोके किमायातमित्याशंक्य तथा हि दृष्टमिति व्याचष्टे। तथाहीति लोकेपि दृष्टमित्यर्थः। तर
माह। लोकेपीति। गति लिंगं व्याख्याय शब्दं व्याचष्टे। तथेति। जीवभूताकाशाशंको ब्रह्मलोकशब्दस्याप्रसिद्धेरिति भावः। ब्रह्म एव पतत्स्या प्रसिद्धिं शंक
ते। नन्विति। निषादस्थपतिमात्रेन समाधत्ते गमयेदिति। षष्ठीं चिंतितं। स्थपतिं निषादः शब्दसामर्थ्यात्। रौद्रीमिष्टिं विधाय एतया निषादस्थपतिं याज
येदित्याम्नायते। तत्र निषादानां स्थपतिः स्वामीति षष्ठीतत्पुरुषेण त्रैवर्णिको ग्राह्यः अग्निविद्यादिसामर्थ्यात् नतु निषादश्चासौ स्थपतिरिति कर्मधा

तथा ह्यहरहर्जीवानां सुषुप्तावस्थायां ब्रह्मविषयं गमनं दृष्टं श्रुत्यंतरे। सता सोम्य तदा संपन्नो भवतीत्येवमादौ। लोकेपि किल गाढं सुषुप्तमाच
क्षते ब्रह्मीभूतो ब्रह्मतां गत इति। तथा ब्रह्मलोकशब्दोपि प्रकृते दहरे प्रयुज्यमानो जीवभूताकाशाशंकां निवर्तयन् ब्रह्मतामस्य गमयति।
ननु कमलासनलोकमपि ब्रह्मलोकशब्दो गमयेत्। गमयेद्यदि ब्रह्मणो लोक इति षष्ठीसमासवृत्त्या व्युत्पाद्येत। सामानाधिकरण्यवृत्त्या तु
व्युत्पाद्यमानो ब्रह्मैव लोको ब्रह्मलोक इति परमेव ब्रह्म गमयिष्यति। एतदेव चाहरहर्ब्रह्मलोकगमनं दृष्टं ब्रह्मलोकशब्दस्य सामानाधिकरण्य
वृत्तिपरिग्रहे लिंगं न ह्यहरहरिमाः प्रजाः कार्यब्रह्मलोकं सत्यलोकाख्यं गच्छंतीति शक्यं कल्पयितुं॥ ॥ ॥ ॥

रयेन निषादो ग्राह्यो ऽसामर्थ्यादिति प्राप्ते सिद्धांतः। निषाद एव स्थपतिः स्यात् निषादशब्दस्य निषादे शक्तत्वात् तस्याश्रुतषष्ठ्यर्थसंबं
धलक्षकत्वकल्पनायोगात्। श्रुतेर्द्वितीयाविभक्तेः पूर्वपदसंबंधकल्पनायां लाघवात्। अतो निषादस्येष्टिसामर्थ्यं मान्त्रं कल्प्यमिति तद्वद् ब्रह्म
लोकशब्दे कर्मधारय इत्यर्थः। कर्मधारये लिंगं चास्तीति व्याचष्टे। एतदेवेति। स्त्रवेचक्रार ऽकल्पामतमुद्रापार्थः॥ ॥

स॰भा॰१ सर्वजगत्कारणलिंगाच्च दहरः पर इत्याह। धृतेरिति। नन्वथशब्दाद्दहरप्रकरणं विच्छिद्य श्रुता धृतिर्न दहरलिंगमिति शंकते। कथमिति। य
२६ आत्मेति प्रकृताकर्षणात् अथशब्दो दहरस्य धृत्यादिगुणविधिसारंभार्थ इत्याह। दहरोऽस्मिन्नित्यादिना। श्रुतौ विधृतिशब्दः कर्तृवाचित्वात्किम
तः। सूत्रे तु महिम्नः शब्दसामानाधिकरण्यात् धृतिः शब्दः। किंतत्तो विधारणं ब्रूते॥ स्वरूपात्किंत्रित्तिभावे किंतेनाविधानादिति विभागः। सेतुरसंकर

धृतेश्च महिम्नोऽस्यास्मिन्नुपलब्धेः॥ धृतेश्च हेतोः परमेश्वर एवायं दहरः। कथं। दहरोऽस्मिन्नन्तराकाश इति हि प्रकृत्याकाशोपम्यपूर्वकं
तस्मिन्सर्वसमाधानमुक्त्वा तस्मिन्नेव चात्मशब्दमपहतपाप्मत्वादिगुणयोगं चोपदिश्य तमेवानतिवृत्तप्रकरणं निर्दिशत्यथ
य आत्मा स सेतुर्विधृतिरेषां लोकानामसंभेदायेति। तत्र विधृतिरित्यात्मशब्दसामानाधिकरण्याद्विधारयितोच्यते॥ क्तिचः कर्तरि स्मरणा
त्। यथोदकसंतानस्य विधारयिता लोके सेतुः क्षेत्रसंपदामसंभेदायैवमयमात्मा एषामध्यात्मादिभेदभिन्नानां लोकानां वर्णाश्रमादी
नां च विधारयिता सेतुरसंभेदाय सर्वसंकरायेति। एवमिह प्रकृते दहरे विधारणलक्षणं महिमानं दर्शयत्ययं च महिमा परमेश्वर एव श्रु
तत्वादुपपद्यते। एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठत इत्यादेः॥ ॥ ॥ ॥

हेतुः विधृतिस्तु स्थितिहेतुरित्यपौनरुक्त्यमाह। यथोदकेति। सूत्रं योजयति। एवमिहेति। धृतेश्च दहरः परः अस्य धृतिरूपस्य नियमन
स्य च महिम्नोऽस्मिन्परमात्मन्येव श्रुत्यंतर उपलब्धेरिति सूत्रार्थः॥ धृतेश्चेति चकारः सेतुपरोक्तनियामकत्वलिंगग्राहकत्वमिति मंतव्यं २६

६८ तौ तामाह। तथेति। आ समंतात्काशते दीप्यते इति स्वयंज्योतिर्ब्रह्मैवाकाशशब्दस्य विभुत्वगुणयोगात्प्रसिद्धिः प्रयोगप्राचुर्यं। यदि पर एवात्म
पहतपाप्मत्वादिवाक्यशेषबलेन दहरः परः तर्हि जीवोपीत्याशंक्य निषेधति। इतरेति। जीवस्यात्मशब्दविषयमाह। स्वप्नेति। दहरोऽनंतरं मुक्तोप
स्पृष्टं शुद्धं प्रलोच्यते पर एव संप्रसादो जीवोस्माल्लोमेकरणसंघातात्सम्यगुत्थाय आत्मानं तस्माद्विविच्य विविच्य आत्मानं स्वेन ब्रह्मरूपेणाभि

तथान्यत्रापि निर्विशिष्टे परमेश्वरवाक्ये श्रूयते। एष सर्वेश्वर एष भूताधिपतिरेष भूतपाल एष सेतुर्विधरण एषां लोकानामसंभेदायेति
वं धृतेश्च हेतोः परमेश्वर एवायं दहरः॥ प्रसिद्धेश्च॥ इतश्च परमेश्वर एव दहरोऽस्मिन्नंतर आकाश इत्युच्यते। यत्कारणमाकाशशब्दः प
रमेश्वरे प्रसिद्धः। आकाशो वै नाम नामरूपयोर्निर्वहिता। सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यंत इत्यादिप्रयोगदर्शनात्। जीवे
तु न क्वचिदाकाशशब्दः प्रयुज्यमानो दृश्यते। भूताकाशस्तु सत्यामप्याकाशशब्दप्रसिद्धौ उपमानोपमेयभावाद्यसंभवान्न ग्रहीतव्य इ
त्युक्तं॥ इतरपरामर्शात्स इति चेन्नासंभवात्॥ यदि वाक्यशेषबलेन दहर इति परमेश्वरः परिगृह्येतास्तीतरस्यापि जीवस्य वाक्यशेषे परा
मर्शः। अथ य एष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते। एष आत्मेति होवाचेति। अत्र हि संप्रसाद
शब्दः श्रुत्यंतरे सुषुप्त्यवस्थायां दृष्टत्वात्तदवस्थावंतं जीवं शक्नोत्युपस्थापयितुं नार्थांतरं। तथा शरीरव्यपाश्रयस्यैव जीवस्य शरीरात्समु
त्थानं संभवति॥

निष्पद्य साक्षात्कृत्य तदेवमसकृत्परं ज्योतिरुपसंपद्यते प्राप्नोतीति व्याख्येयं यथा सुखं स्वप्यादाय स्वपितीति वा कं सुखमुखं व्याददातीति व्याख्याय
ति न इत ज्योतिषो नानात्वं निरस्यति। एवमिति। संप्रसादेरर्थं च दृष्टेति श्रुत्यंतरं अवस्थावदुत्थानमपि जीवस्य लिंगमित्याह। तथेति॥

स॰भा॰
१०

तदाश्रितत्वात्तस्मात्समुत्थानेन दृष्टान्तः पर्येति। ननु कस्मादाकाशशब्दो जीवेन दह्र इत्याशंक्य मोक्षावस्थो स्वानलिंगबलात्कल्प्य इत्याह। यथा चेति। निष्प
मकाभावाज्जीवो दहरः किं तस्मादिति शंके निषेधमक्रमाह। नैतदित्यादिना दहरे श्रुतधर्माणामसंभवात्तत्र जीवो दहर इत्यर्थः तर्हि पुनः किमस्त
त्राह। अतिरेकेति। उत्तरश्चेदधिकाशंकानिरासार्थमित्यर्थः। कथं तर्हि जीवपरामर्शस्य गतिस्तत्राह। पठिष्यतीति जीवस्य स्वापस्थानभूतत्र
यथाकाशव्यपाश्रयाणां घटादीनामाकाशात्समुत्थानं तद्वत्। यथा चादृष्टोऽपि लोके परमेश्वरा। विषयश्चाकाशशब्दः परमेश्वरधर्मत्सम
भिन्नाद्दहराकाशो वेत्यत्र नामरूपयोर्निर्वहिते तेलेवमादौ परमेश्वरविषयो भ्युपगतः एवं जीवविषयोऽपि भविष्यति। तस्मादितरपरामर्शा
त दहरोऽस्मिन्नेतराकाश इत्यत्र सत्वजीव उच्यते इति चेन्नैतदेवं स्यात्। कस्मात् असंभवात्। नहि जीवो बुद्ध्याद्युपाधिपरिच्छेदाभिमानी
सन्नाकाशेनोपमीयेत। न चोपाधिधर्मान् अभिमन्यमानस्यापहतपाप्मत्वादयो धर्माः संभवन्ति। प्रपंचितं चैतत्प्रथमसूत्रे। अतिरेका
शंकापरिहाराय तु पुनरुपन्यस्तं। पठिष्यति चोपरिष्टात् इत्यर्थश्च परामर्श इति। उत्तराच्चेदाविर्भूतस्वरूपस्तु॥ इतरपरामर्शाद्या जी
वाशंका जाता साऽसंभवात् निराकृता। अथेदानीं मृतस्येवामृतसेकः पुनः समुत्थानं जीवाशंकायाः क्रियते उत्तरस्मात्प्राजापत्याद्वा
क्यात्। तत्र हि य आत्मापहतपाप्मेत्यपहतपाप्मत्वादिगुणकं आत्मानमन्वेष्टव्यं विजिज्ञासितव्यं च प्रतिज्ञाय य एषोऽक्षिणि पुरुषो दृश्यते
(एष आत्मेति श्रुतं न्नसिद्धं)
स्तानानार्थीयं परामर्श इति वक्ष्यते। असंभवादिति हेतोरसिद्धिमाशंक्य परिहरति। उत्तराच्चेत्यादिसूत्रं॥ निराकृतायाः जीवाशंकायाः प्रजापतिवाक्य
बलात्पुनः पुनः समुत्थानं क्रियते तत्र जीवस्यैवापहतपाप्मत्वादिग्रहणेनासंभवासिद्धिरित्यर्थः। कथं तत्र जीवोऽस्ति तत्राह। तत्रेत्यादिना। वध्यत्व
क्रमेण जीवस्य शोनास्ति तत्रापहतपाप्मत्वादिगुणकमात्मानमुपक्रम्य तस्य जाग्रदाद्यवस्थात्रयोपन्यासात् अवस्थालिंगेन जीवनिश्चयात्तस्य एते गुणाः

एष आत्मेति श्रुत्वन्तरसिद्धं
भवंतीति समुदाहार्यः। इंद्रप्रजापति... एष इति॥
१०

प्राधान्यादस्थिग्रहणं सर्वैरिंद्रियैर्विषयदर्शनरूपजाग्रदवस्थापन्नमित्याह। द्रष्टारमिति। महीयमानः वासनामयैर्विषयैः पूज्यमान इति
स्वप्नपर्याये। तद्यत्रेति तु सुषुप्तिपर्याये चतुर्थो वमेव प्रजापतिर्माचष्टे इत्यन्वयः। यत्रकाले तदेतत्स्वपनं यथा स्यात् तथा सुप्तं० सम्यक् अस्तो निरस्तः
करणग्रामो यस्य स समस्तः अत एवोपसंहृतकरणग्रामत्वात्कृतकालुष्यहीनः संप्रसन्नः स्वप्नप्रपंचमज्ञानमात्रत्वेन विलापयति श्रुतेः श्रा
न्तत्वात् मुक्ताद्विलक्षणः प्राज्ञः एष स्वचैतन्येन कारणशरीरसाक्षी तस्य सा स्वस्वसत्तास्फूर्तिप्रदत्वादात्मेत्यर्थः। चतुर्थपर्याये प्रश्नोक्तेः
द्रष्टारं जीवमात्मानं निर्दिशति। एतं त्वेव ते भूयोऽनुव्याख्यास्यामीति च तमेव पुनः पुनः परामृश्य य एष स्वप्ने महीयमानश्चरत्येष आत्मेति
। तद्यत्रैतत्सुप्तः समस्तः संप्रसन्नः स्वप्नं न विजानात्येष आत्मेति च जीवमेवावस्थात्रयगतमाचष्टे। तस्यैवापहतपाप्मत्वादि दर्शयत्येतद
मृतमभयमेतद्ब्रह्मेति। नाह खल्वयमेवं संप्रत्यात्मानं जानात्ययमहमस्मीति नो एवेमानि भूतानीति च सुषुप्त्यवस्थायां दोषमुपल
भ्य एतं त्वेव ते भूयोऽनुव्याख्यास्यामि नो एवान्यत्रैतस्मादिति चोपक्रम्य शरीरसंबंधनिंदापूर्वकमेष संप्रसादोऽस्माच्छरीरात्समुत्थाय प
रंज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते स उत्तमः पुरुष इति जीवमेव शरीरात्समुत्थितं उत्तमं पुरुषं दर्शयति ॥ ॥

तस्यैवापहतपाप्मत्वादिगुणाद्युपासकं तस्यापि पर्यायस्य जीवत्वमाह। नाहेति। अहेति निपातः खेदार्थे विद्यमानो हि इंद्रवाच न खलु सुप्तः
पुमानयं संप्रति सुषुप्त्यवस्थायामयं देवदत्तोऽहमस्मीत्येवमात्मानं जानाति। नो एव नैवेमानि भूतानि जानाति किंतु विनाशमेवापीतो भवति। नाहमत्र भो
ग्यं पश्यामि इति दोषमुपलभ्य पुनः प्रजापतिमुपससाद तं दोषं श्रुत्वा प्रजापतिराह। एतमिति एतस्मात्प्रकृतादात्मनोऽन्यत्रात्मानं व्याख्यास्यामीत्यु
पक्रम्य मघवन्मर्त्यं वा इदं शरीरमिति निंदापूर्वकं जीवमेव दर्शयतीत्यर्थः ॥

स्र·भा· तस्मात्प्रजापतिवाक्यादेतौ संभवावित्यर्थः ॥ सिद्धं तपतीति । तं पतीति । अवस्थात्रयात्पृथक्त्वेनाविर्भूतं शोधितत्वमर्थस्य वा । एषो संप्रसादोऽस्माच्छरीरात्समुत्थायेत्यभिप्रायेणाह

१८ यश्चेतसि स्थितो पुरुषो मन्त्रजीवोक्तिः कथं ज्ञानेन जीवस्य स्वरूपनिवृत्त्यभावादित्यत आह । मृत एवेति । ज्ञानात्स्वर्गमविघात कार्यप्रतिबिंबितत्वरूपं जीवत्वमस्त

दिति हृत्सावधानानन्तरं ब्रह्मरूपोऽपि जीवनाम्नाऽच्युत इत्यर्थः । विश्वतैजसप्राज्ञतुरीयपर्याय चतुष्टयात्मक प्रजापतिवाक्यस्यतात्पर्यमाह । एतदिति । जन्म

नाशवत्त्वात्मनि विविधवृद्धिं देहोनाऽमेति तापनार्थं प्रजापतिरिदं विरोचनेभ्यश्च वाचोदशायं व्यात्मानमवेक्ष्य पदात्मनोऽनुविजानीयस्तन्मे ब्रूतमित्यादि

तस्मादस्ति संभवे जीवे पारमेश्वराणां धर्माणामतो दहरो स्मिन्नन्तराकाश इति जीव एवोक्त इति चेत्तत्रेदं ब्रूयात् । तं प्रति प्रसादाविर्भूतस्वरूपत्वि

ति । तुशब्दः पक्षव्यावृत्त्यर्थो नो तस्मादपि वाक्यादिह जीवस्याशंका संभवतीत्यर्थः । कस्माद्यतस्तत्रापि आविर्भूतस्वरूपो जीवो विवक्ष्यते । आवि

र्भूतं स्वरूपमस्येत्याविर्भूतस्वरूपः भूत एवेति गत्याजीवत्वेऽपि चूर्णं । एतदुक्तं भवति । य एषोऽक्षिणि लक्ष्यते तं द्रष्टारं निर्दिश्योपादश य एष आत्मेति

वं शरीरात्मता पा समुत्थायैतं प्रेतदिति पुनः पुनरस्त मेव व्याख्याय वेनाहमस्वप्न सुषुप्तोऽप्यस्यायमस्तमेताय ज्योतिरुपसंपद्यत्वम्यक्तं तत्तत्सर्वं ब्रह्म

तद्वाप हतपाप्मत्वादिधर्मकं ॥ ॥

आत्मानेनेसाहे दर्श एवेति । इदं कृपोर्णोशरीरेवप्रतिबिंबात्मानं देहं दृष्ट्वाऽस्वस्मात्तत्पर्जन्यश्चैवाच्यमिसरू कृ सर्थः । व्युत्थाप्य विचार्य इति निष्प्रप

ते इत्यत्रैतदुक्तं भवतीति संबंधः । किमुक्तमित्यत्राह । यद्रस्येति । जीवस्वरूपेण जीवं नयाचष्टे लोकसिद्धत्वात् । किंतु तमनन्यपरस्यस्याभिचारि १८

णी भोवद्ब्रह्मोविनिपत्रस्तुस्वरूपं बोधयतीत्यतोपकृतमतदेवापहतपाप्मत्वादिधर्मकं न जीवदृष्टं भवतीत्शोधितस्वब्रह्माभेदेन तदुक्तौ रस

र्थः एवमवस्थापन्नात्मस्यविवेकार्थमित्याजीवलिंग त्वं तत्तमेतदुक्तेति लिंगोपेतस्य तिरोधादितिमंतव्यम् ॥ ॥ ॥

ननुजीवत्वब्रह्मत्वविरुद्धधर्मवतोः कथमभेदस्तत्राह। तदेवेति। अन्वयव्यतिरेकाभ्यांजीवत्वस्याविद्याकल्पितत्वादविरोधः इतिमत्वा दृष्टान्तेना-
न्वयमाह। यावदितिव्यतिरेकमाह। यदेति। अविद्यापांससांजीवत्वंघटाकोस्यप्रबोधात्निवृत्तौ। तन्निवृत्तिरित्याविद्यकंतदित्यर्थः संसारित्वस्य कल्पि-

तदेव च जीवस्य पारमार्थिकं स्वरूपं तत्त्वमसीत्यादिश्रुतिभ्यो नेतरदुपाधिकल्पितं। यावदेव हि स्थाणाविव पुरुषबुद्धिं द्वैतलक्षणामविद्यां नि-
वर्तयन् कूटस्थनित्यदृक्स्वरूपमात्मानमहं ब्रह्मास्मीति न प्रतिपद्यते तावज्जीवस्य जीवत्वं। यदा तु देहेन्द्रियमनोबुद्धिसंघातात् व्युत्थाप्य श्रुत्या
प्रतिबोध्यते। नासि त्वं देहेन्द्रियमनोबुद्धिसंघातः। नासि संसारी। किं तर्हि तद्यत्सत्यं स आत्मा चैतन्यमात्रस्वरूपस्तत्त्वमसीति। तदा कूटस्थनित्यदृ-
क्स्वरूपमात्मानं प्रबुध्यास्माच्छरीराद्यभिमानात्समुत्तिष्ठन् स एव कूटस्थनित्यदृक्स्वरूप आत्मा भवतीति। स यो ह वै तत्परमं ब्रह्म वेद ब्रह्मैव भव-
तीत्यादिश्रुतिभ्यः। तदेव चास्य पारमार्थिकं स्वरूपं येन शरीरात्समुत्थाय स्वेन रूपेणाभिनिष्पद्यते। कथं पुनः स्वं च रूपं स्वेनैव निष्पद्यत इति संभ-
वति कूटस्थनित्यस्य सुवर्णादीनां तु द्रव्यान्तरसंपर्कादभिभूतस्वरूपाणामनभिव्यक्तासाधारणविशेषाणां क्षारप्रक्षेपादिभिः शोध्यमानानां
स्वरूपेणाभिनिष्पत्तिः स्यात् तथा नक्षत्रादीनामहन्यभिभूतप्रकाशानामभिभावकवियोगे रात्रौ स्वरूपेणाभिनिष्पत्तिः स्यात्। न तु तथा चै-
तन्यज्योतिषो नित्यस्य केनचिदभिभवः संभवेदसंसर्गित्वात् व्योम्न इव॥

तत्त्वेसिद्धं निगमयति। तदेव चास्येति। समुत्थाय स्वेन रूपेणाभिनिष्पद्यत इति श्रुतिं व्याख्यातुमाक्षिपति। कथं पुनरित्यादिना कूटस्थनित्यस्य स्वरू-
पाभिलत्वयः। मलसंगिनो हि किंचिन्मलनाशादभिव्यक्ति ननु कूटस्थस्यासंगिन इत्याह। सुवर्णेति। द्रव्यान्तरं पार्थिवो मलः अभिभूतेत्यस्य व्याख्यान-
मनभिव्यक्तेति। असाधारणो भास्वरत्वादिः। अभिभावकः सौरालोकः॥ ॥ ॥ ॥ ॥

सू॰भा॰ १९ जीवस्वरूपस्याभिभवे बाधकमाह। दृष्टेति। विज्ञानमय एवेति श्रुत्या चिन्मात्रस्ता वदात्मा तच्चैतन्यं च स्वरूपादिजन्यवृत्तिव्यक्तं दृष्ट्यादिपदवाच्यं सत्तव्य
वहारांगं जीवस्य स्वरूपं भवति। तस्याभिभूतत्वे दृष्टो व्यवहारो विरुध्येत तेह स्वभावाद्व्यवहारो न स्यादित्यर्थः। अतस्तस्यापि स्वरूपं वृत्तिषु व्यक्तमिति संगीकार्यं
व्यवहारदर्शनादित्याह। तच्चेति॥ अन्यथेत्यस्य स्फुटयति। तद्वदिति स्वरूपं चेत् ज्ञानिन एव व्यज्येत ज्ञानात् सर्वव्यवहारोच्छित्तिरित्यर्थः। अतः सदैव व्यक्त

दृष्टिविरोधाच्च। दृष्टिश्रुतिमतिविज्ञातयो हि जीवस्य स्वरूपं॥ तच्च शरीरात्समुत्थितस्यापि जीवस्य सतो निष्पन्नमेव दृश्यते। सर्वो हि जीवः प
श्यन् शृण्वन् मन्वानो विजानन् व्यवहरत्यन्यथा व्यवहारानुपपत्तेः। तच्चेत् शरीरात्समुत्थितस्य निष्पद्येत प्राक्समुत्थानात् दृष्टो व्यवहारो विरुध्येत
। अतः किमात्मकमिदं शरीरात्समुत्थानं। किमात्मिका वा स्वरूपेणाभिनिष्पत्तिरित्युच्यते। प्राक् विवेकविज्ञानोत्पत्तेः शरीरेन्द्रियमनोबुद्धिवि
षयवेदनोपाधिभिरविविक्तमिव जीवस्य दृष्ट्यादिज्योतिःस्वरूपं भवति। यथा शुद्धस्य स्फटिकस्य स्वाच्छ्यं शौक्ल्यं च स्वरूपं प्राक् विवेकग्रहणाद्रक्तनीला
द्युपाधिभिरविविक्तमिव भवति प्रमाणजनितविवेकग्रहणात्तु पराचीनः स्फटिकः स्वाच्छ्येन शौक्ल्येन च स्वेन रूपेणाभिनिष्पद्यत इत्युच्यते। प्रागपि तथै
व सन्। तथा देहाद्युपाध्यविविक्तस्यैव सतो जीवस्य श्रुतिकृतं विवेकविज्ञानं शरीरात्समुत्थानं विवेकविज्ञानफलं स्वरूपेणाभिनिष्पत्तिः॥ ॥ १९

स्वरूपत्वादित्यर्थः। सदा व्यक्तिषु व्यक्तस्य वस्तुतोऽसंगस्यात्मनः आविद्यकदेहाद्यविवेकरूपस्य मलसंगस्य सत्त्वात्तद्विवेकापेक्षया समुत्थानादिश्रुतिरि
ति तात्पर्यमाह। अत इति वेदनाहर्षशोकादिः अविविक्तमिवेति तादात्म्यस्यासंगस्य कल्पितत्वमुक्तं तत्कल्पितसंगे दृष्टान्तो यथेति। श्रुतिकृतमिति तत्त्वंपदार्थ
श्रुत्यायं विज्ञानमयः प्राणेष्विति श्रुत्या यथासिद्धमित्यर्थः॥

प्रमाणादिभिन्न शुद्धत्वं पदार्थज्ञानस्य वाक्यार्थसाक्षात्कारः फलमित्याह। केवलेति। सशरीरत्वस्य सत्यत्वात् समुत्थानमुत्क्रान्तिरित्याख्येयं नविवेक
इत्याशंक्याह। न याविवेकेति। उक्तश्रुत्यनुसारेणोक्तोऽर्थः। शरीरेष्वशरीरमनवस्थितमिति श्रुतेः। अविवेकमात्रकल्पितं सशरीरत्वं अतो विवेकएव समुत्थान
मित्यर्थः। ननु स्वकर्मार्जितशरीरे भोगस्यापरिहार्यत्वात् कथं जीवत एव स्वरूपाविर्भाव इत्यत आह। शरीरस्थापीति। अशरीरवत् शरीरस्थस्यापि बंधा
केवलात्मस्वरूपावगतिस्तथाविवेकाविवेकमात्रेणैवात्मनोऽशरीरत्वं सशरीरत्वं च भेदेन वर्णनात् अशरीरं शरीरेष्विति। शरीरस्थोऽपि कौन्तेय न क
रोति न लिप्यत इति च सशरीरत्वाशरीरत्वविशेषाभावस्मरणात्। तस्माद्विवेकविज्ञानाभावादनाविर्भूतस्वरूपः सन् विवेकज्ञानादाविर्भूत
स्वरूपः स्वरूपसम्पन्न इत्युच्यते। न त्वन्यागन्तुकाविर्भावानाविर्भावौ स्वरूपस्य संभवतः स्वरूपत्वादेव। एवं मिथ्याज्ञानकृत एव जीवपरमेश्वरयोर्भेदो न व
स्तुकृतः श्रीमवद्संगताविशेषात्। कुतश्चैतदेवं प्रतिपत्तव्यं। यतोपरश्लोकेति पुरुषो दृश्यत इत्युपदिश्यैतदमृतमभयमेतद्ब्रह्मेत्युप
दिशति। योऽक्षिणि प्रतिष्ठितः इत्युपदिश्यत्वेन विभाव्यते। सोऽमृताभयलक्षणगत ब्रह्मणोऽन्यश्चेत्स्यात्ततो मर्त्याभयब्रह्मसमानाधिकरण्यं न स्यात्॥ ॥
भावस्फुटतेजीवतो मुक्तिमुपेत्यर्थः। अविरहेऽद्भुतस्पष्टेस्तत्त्वरोपोपपद्यत इत्याह। तस्मादिति। अन्या इत्यैसमाविस्मर्थः ज्ञानाज्ञानकृता वाविर्भावितिरोभा
वाविति स्थिते भेदोऽप्यज्ञानकृतो निरस्त इत्याह। एवमिति। अंशाशिरूपत्वमसंगतं आत्मा द्व्यवसायाप्यजातिश्रुत्याः विभुत्वात् आत्मा वदितस्मैभक्तिसिद्धे
भेदो मिथ्येत्यर्थः॥ प्रजापतिवाक्याच्च भेदो मिथ्येत्याकांक्षापूर्वकमाह। कुतश्चेत्यादिना। एतद्देहस्य सत्यत्वमेव नास्तीति कुत इत्यन्वयः॥ ॥

स॰भा॰१

२० छायामयी ब्रह्मदृष्टिं परामिदं वाक्यं नाभेदपरमिति तत्राह। नापीति। यस्य ज्ञानात् कृतकृत्यता सर्वकामप्राप्तिस्तमात्मानमन्विच्छाव इति प्रवृत्तयोरिंद्रवि
रोचनयोर्यद्यतात्तच्छायां प्रजापतिर्ब्रूयात्तदा मृषावादी स्यादित्यर्थः॥ प्रथमवत् द्वितीयादिपर्यायेष्वात्मावस्थात्रयमनुसृत्यात्मावलंबेनोक्त इत्या

नापि प्रतिच्छायात्माऽयमक्षिणि लक्षितो निर्दिश्यते। प्रजापतेर्मृषावादित्वप्रसंगात्। तथा द्वितीये पिपर्याये य एष स्वप्ने महीयमानश्चरतीति न प्रथम
पर्यायेनिर्दिष्टा दक्षिपुरुषात् द्रष्टुरन्यो निर्दिष्टः॥ एतं त्वेव ते भूयोनुव्याख्यास्यामीत्युपक्रमात्। किंचाहमद्य स्वप्ने हस्तिनमद्राक्षं नेदानीं तं प
श्यामीति दृष्टमेव प्रतिबुद्धः प्रत्याचष्टे। द्रष्टारं तु तमेव प्रत्यभिजानाति य एवाहं स्वप्नमद्राक्षं स एवाहं जागरितं पश्यामीति। तथा तृतीयपर्या
येनाह खल्वयमेवं संप्रत्यात्मानं जानात्ययमहमस्मीति नो एवेमानि भूतानीति सुषुप्तावस्थायां विशेषविज्ञानाभावमेव दर्शयति। न विज्ञाता
रं प्रतिषेधति। यत्तु तत्र विनाशमेवापीतो भवतीति। तदपि विशेषविज्ञानविनाशाभिप्रायमेव। न विज्ञातृविनाशाभिप्रायं नहि विज्ञातुर्विज्ञाते
र्विपरिलोपो विद्यतेऽविनाशित्वादिति श्रुत्यंतरात्॥

ह। तथेति। अवस्थाभेदेप्यनुस्यूतं पुरुषमाह। किंचेति। सुषुप्तौ ज्ञातुर्व्यभिचारमाशंक्याह। तथा तृतीयइति। सुषुप्तौ निर्विकल्पज्ञानरूपत्वमात्मास्तीत २०
त्रैव हृदारण्यकश्रुतिमाह॥ नहीति। बुद्धेः साक्षित्वेनाशेनास्ति नाशकाभावादित्यर्थः॥ ॥ ॥ ॥ ॥

एवमवस्थात्रितयसंगत्वेनोक्तस्यात्मैव तुरीयोऽपि ब्रह्मत्वेनोक्त इत्याह ॥ तथेति । श्रुतेरेकदेशिव्याख्यां दूषयति । केचिदिति । जीवपरयोर्भेदाद्भेद इति भावः । श्रु
तिबाधान्नैवमित्याह ॥ तेषामिति । सन्निहितो जीव एव सर्वनामार्थ इत्यर्थः । उक्तस्य पुनरुक्तौ न प्रयोजनमिति युज्यते न तत्पक्षे तु परमात्मनस्तु तुरीयत्वोक्तेः सत्त्वाद्

तथा च तुर्येऽपि पर्याये एतं त्वेव ते भूयोऽनुव्याख्यास्यामीति नोऽपचारमन्त्रैश्चैतस्मादिति रूपक्रम्य मघवन्मर्त्यं वा इदं शरीरमित्यादिना प्रपञ्चेन शरीरा
द्युपाधिसंबन्धशून्यत्वेन संप्रसादः शरीरादिति जीवं स्वेन रूपेणाभिनिष्पद्यत इति ब्रह्मस्वरूपापन्नं दर्शयन्न तु परस्माद्ब्रह्मणोऽन्यत्वाभय
स्वरूपादन्यं जीवं दर्शयतीति । केचित्तु परमात्मविषयत्वाद्याप्येतं त्वेव त इति जीवाकर्षणमस्याव्यम् अन्यमानाएतमेव वाक्योपक्रमे सूचितमपहतपाप्म
त्वादिगुणकमात्मानं तेभ्योऽनुव्याख्यास्यामीति कस्यचित्तेषामेतमिति सन्निहितत्वबलं बिना सर्वनामश्रुतिर्विप्रकृष्येत तत्पक्षे श्रुतिश्चोपरुध्येत ।
पर्यायान्तरविहितस्य पर्यायान्तरेणानभिधीयमानत्वात् एतं त्वेवत इति च प्रतिपाप्याकृष्य चतुर्थे पर्याये व्याख्यास्यमानस्य चाज्ञापत्तेः सततारूपत्वं
प्रसक्ते तत्तस्माद्धि युक्तस्वरूपपस्कापितमपारमार्थिकं जीवं कर्तृ भोक्तृ रागद्वेषादिदोषकलुषितमनेकानर्थयोगि तद्विलक्षणेन तद्विपरीतमपहत
पाप्मत्वादिगुणकं पारमैश्वर्यं स्वरूपेण निष्पादयति प्रत्ययवतीदृशीविलयनेनैव रज्ज्वादौ ने ॥
घ इत्याह । अभय इति । लोकसिद्धजीवानुवादेन ब्रह्मत्वं बोध्यत इति स्वमतमुपसंहरति । तस्मादिति । व्याख्यानान्तरासंभवादित्यर्थः । विलयनं शोधनं
विद्यया महावाक्येनेति यावत् ॥

सू॰भा॰

२१ येतु संसारस्य मिथ्यात्वं तितेषामिदं शारीरकमेवोत्तरमित्याह। अपरे त्विति वादिना। शारीरकस्यापि संक्षेपेणोपदिशति। एक एवेति। अविद्यामायमो भेदं निरसितुं सामानाधिकरण्यं। आवरणविक्षेपशक्तिरूपा दृश्यक्तिनिमित्तभेदात्सह प्रयोगः। ब्रह्मैवाविद्यया संसरति न ततोऽन्योजीव इति शारीरकार्थ इत्य

अपरे तु वादिनः पारमार्थिकमेव जैवं रूपमिति मन्यंते। अस्मदीयाश्च केचित्। तेषां सर्वेषामात्मैकत्वसम्यग्दर्शनप्रतिपक्षभूतानां प्रतिबोधायेदं शारीरकमारब्धमेक एव परमेश्वरः कूटस्थनित्यो विज्ञानधातुरविद्यया मायया मायाविवदनेकधा विभाव्यते। नान्यो विज्ञानधातुरस्तीति। यत्विदं परमेश्वरवाक्ये जीवमाशंक्य प्रतिषेधति सूत्रकारः नासंभवादित्यादिना। तत्रायमभिप्रायः। नित्यशुद्धबुद्धमुक्तस्वभावे कूटस्थनित्यैकस्मिन्नसंगे परमात्मनि तद्विपरीतं जैवं रूपं व्योम्नीव तलमलादि परिकल्पितं। तदात्मैकत्वप्रतिपादनपरैर्वाक्यैर्न्यायोपेतैर्द्वैतवादप्रतिषेधैश्चापनेष्यामीति परमात्मनो जीवादन्यत्वं दृढयति। जीवस्य तु न परस्मादन्यत्वं प्रतिपिपादयिषति। किं त्वनुवदत्येवाविद्याकल्पितं लोकप्रसिद्धं जीवभेदं। एवं हि स्वाभाविककर्तृत्वभोक्तृत्वानुवादेन प्रवृत्ताः कर्मविधयो न विरुध्यंत इति मन्यते॥ ॥

र्थः। तर्हि सूत्रकारः किमिति भेदं ब्रवीतीत्यत्राह। यत्त्विति। परमात्मनोऽसंसारित्वसिध्यर्थं जीवाद्भेदं दृढयति। तस्मात्संसारित्वनिश्चयाभावे तद्भेदो ज्ञातुमपि जी २१
वस्य संसारित्वानपायादित्यर्थः॥ अविद्याकल्पितान्नेदं पि कल्पितस्याधिष्ठानात्पृथक्त्वमित्याह। जीवस्येति। कल्पितभेदानुवादस्य फलमा

सत्रेधभेदो नोक्त इति भ्रांतिं निरस्यति। प्रतिपाद्यमिति। आलोकेति तूपगच्छंतीत्यादि सूत्राणि आदिपदार्थः। न त्वद्वैतस्य शास्त्रार्थत्वे द्वैतापेक्षविधिवि
रोधः स्यात्तत्राह वर्णितश्चेति। अद्वैतमजानतः कल्पितद्वैताश्रयविधयो न विदुष इति सर्वमुपपन्नमित्यर्थः। एवं प्रजापतिवाक्ये जीवानुवादेन ब्रह्मण एवाप
प्रतिपाद्यं तु शास्त्रार्थमात्मैकत्वमेव दर्शयति। शास्त्रदृष्ट्या तूपदेशो वामदेववदित्यादिना वर्णितश्चास्माभिर्विद्वदविद्वद्भेदेन कर्मविधिविरोधप
रिहारः अस्यार्थस्य प्रपञ्चार्थः॥ अथ यो दहरवाक्यशेषे जीवपरामर्शो दर्शितः अथ य एष संप्रसाद इत्यादिः स दहरे परमेश्वरे साक्ष्यात् समानत्वेन
जीवोपासनोपदेशो न प्रकृतविशेषोपदेश इत्यनर्थकः प्राप्नोतीत्यत आह। अन्यार्थोऽयं जीवपरामर्शः। न जीवस्वरूपपर्यवसायी किंतर्हि परमे
श्वरस्वरूपपर्यवसायी। कथं संप्रसादशब्दोदितो जीवो जागरिते व्यवहारे देहेन्द्रियपंजराध्यक्षो भूत्वा तद्वासनानिर्मितान् स्वप्नान्नाडीचरोऽनु
भूय श्रांतः शरणं प्रेप्सुरुभयरूपादपि शरीराभिमानात्समुत्थाय सुषुप्तावस्थायां परं ज्योतिराकाशशब्दितं परं ब्रह्मोपसंपद्य विशेषविज्ञान
वत्त्वं परित्यज्य स्वेन रूपेणाभिनिष्पद्यते। परस्योपसंपत्तव्यं परं ज्योतिः येन स्वेन रूपेणायमभिनिष्पद्यते। एष आत्मापहतपाप्मत्वादिगु
णः स उपास्य इत्येवमयमर्थो जीवपरामर्शः परमेश्वरवादिनोऽप्युपपद्यते॥ अल्पश्रुतेरिति चेत्तदुक्तं। यदप्युक्तं दहरोऽस्मिन्नंतराकाश इत्याकाश-
स्याल्पत्वं श्रूयमाणं परमेश्वरे नोपपद्यते। जीवस्य त्वाराग्रोपमितस्याल्पत्वमवकल्पत इति तस्य परिहारो वक्तव्यः। उक्तो ह्यस्य परिहारः परमे
श्वरस्यापेक्षिकमल्पत्वमवकल्पत इत्यर्भकौकस्त्वात्तद्व्यपदेशाच्च नेति चेन्न निचाय्यत्वादेवं व्योमवच्चेत्यत्र स एवेह परिहारोऽनुसंधातव्य इति सूचय
ति॥
हतपाप्मत्वादिगुणके जीवे दहरस्यासंभवान्न जीवो दहर इत्युक्तं तर्हि जीवपरामर्शस्य का गतिरित्यत आह। अन्यार्थश्चेति। सूत्रं व्याचष्टे। अथेत्यादिना। प्रकृतेस्य
रोविशेषगुणकस्य उपदेशोऽपि नेत्यर्थः। तत्र दहरवाक्यशेषरूपं तं संप्रसादवाक्यमाशंकापूर्वकं दहरब्रह्मपरत्वेन व्याचष्टे कथमित्यादिना॥ ॥

सू॰भा॰ दुपास्यत्वादल्पत्वमुक्तमिति व्याख्याय प्रसक्तं निरस्तमिति सर्वोत्तरमाह॥ श्रुत्यैव चेदमिति। एवं दहरवाक्यं प्रजापतिवाक्यं च सगुणे निर्गुणे च समन्वित
२२ मिति सिद्धं ॥ अनुकृतेस्तस्य च ॥ मुंडकवाक्यमुदाहरति। न तत्रेति। तस्मिन्ब्रह्मणि विषये न भातीति तन्न भासयतीति यावत्। यदर्थं द्भास्करादिर्न भासयति
तदाऽत्मदीप्तेरग्रः का कथेत्याह कुत इति। किं च सर्वस्य सर्वोदेस्त प्रकाश्यत्वात्तत्प्रकाशकत्वमिति साहतमेवेति॥ अनुगमस्त्ववदनुमानस्यागतमिति शंकां
निरस्यति। तस्येति। तत्रेति समस्याः सति विषये च साधारण्यां संगमयमाह। तत्रेति। पूर्वत्रात्मश्रुत्यादिबलादाकाशशब्दस्य रूढित्यागादौ श्वैरवृत्ति

श्रुत्यैव चेदमल्पत्वं प्रत्युक्तं प्रसिद्धेनाकाशेनोपमिमानया यावान्वा अयमाकाशस्तावानेषोऽन्तर्हृदय आकाश इति ॥ अनुकृतेस्तस्य च ॥ न तत्र सूर्यो भाति न चंद्रतारकं नेमा विद्युतो भांति कुतोऽयमग्निः। तमेव भांतमनुभाति सर्वं तस्य भासा सर्वमिदं विभातीति समामनंति। तत्र यं भांतमनुभाति सर्वं यस्य च भासा सर्वमिदं विभाति। स किं तेजोधातुः कश्चिदुत प्राज्ञ आत्मेति विचिकित्सायां तेजोधातुरिति तावत्प्राप्तं। कुतः। तेजोधातूनामेव सूर्यादीनां भानप्रतिषेधात्। तेजःस्वभावकं हि चंद्रतारकादि तेजःस्वभावक एव सूर्ये भासमानेऽहनि न भासत इति प्रसिद्धं। तथा सह सूर्येण सर्वमिदं चंद्रतारकादि यस्मिन्न भासते सोऽपि तेजःस्वभावक एव कश्चिदिति गम्यते॥ ॥ ॥ ॥ ॥

रश्मितादात्म्येऽहापि सति सूर्यदीप्तिबलात् वर्तमानान्यपि लयोगेन यस्मिन्सति सूर्यादयो न भास्यन्ति स तेजोविशेष उपास्य इति न विषयार्थे वृत्तिरस्त्य यशी माश्च २२
धुना भासमानेन सूर्यादौ न भातीति विरोधात् इति दृष्टान्तेन पूर्वपक्षयति। तेजोधातुरिति। तेजोध्यानं निर्गुणस्वयंज्योतिष्ट्वज्ञानमिति भेदः पूर्वपक्षफलं।
तेजोधातुत्वे लिंगमाह। तेजोधातूनामिति। यत्तेजसोऽभिभावकं तत्तेज इति व्याप्तिमाह। तेजःस्वभावकमिति॥ ॥ ॥ ॥

यस्मिन्सति यन्न भाति तत्तद्भानीति विरुद्धमित्यत आह। अनुभानमिति। ततो निकृष्टभानं विवक्षितमिति भावः। मुख्यसंभवे विवक्षानुपपत्तेः मुख्यानु
भानलिंगात् सर्वभासकः परमात्मा स्वप्रकाशो ऽत्र ग्राह्यः इति सिद्धांतमाह। प्राज्ञ इति। प्राज्ञत्वं स्वप्रकाशत्वं भासकत्वापेक्षमुक्तं तत्र श्रुतिमाह भारूप इति माना
भावाच्च तेजोधातुर्न ग्राह्य इत्याह। नेति। किंच स्वरूपादपकृष्टे तेजोंतरभानमनुभानं तितेजस्त्वात् प्रदीपवदित्याह। समत्वाच्चेति। योयमनुकृतेति सति तज्जातीय

अनुभानमपि तेजःस्वभावक एवोपपद्यते समानस्वभावकेष्वनुकारदर्शनात्। गच्छंतमनुगच्छतीतिवत्। तस्मात्तेजोधातुः कश्चिदित्येवं प्राप्ते ब्रू
मः। प्राज्ञ एवायमात्मा भवितुमर्हति। कस्मात् अनुकृतेः। अनुकरणमनुकृतिः। पदे तमेव भांतमनुभाति सर्वमिति यदनुभानं तत् प्राज्ञपरिग्रहे ऽवकल्प ना२
ते। भारूपः सत्यसंकल्प इति हि प्राज्ञमात्मानमामनंति। न तु तेजोधातुकं चित्तस्य सूर्यादयो ऽनुभांतीति प्रसिद्धं। समत्वाच्च तेजोधातूनां सूर्यादीनां न ते
जोधातुमन्यमपेक्ष्यास्ति यं भांतमनुभायुः। नहि प्रदीपः प्रदीपांतरमनुभाति। यदप्युक्तं समानस्वभावकेष्वनुकारो दृश्यते इति। नायमेकांतो
भिन्नस्वभावकेष्वपि ह्ययं अनुकारो दृश्यते। सुतप्तो ऽयःपिंडो ऽग्न्यनुकृतिरग्निं दहंतमनुदहति। भौमं वा रजो वायुं वहंतमनुवहतीति। अनुकृतेरि
त्यनुभानमसूसुचत्। तस्य चेति चतुर्थं पादमस्य श्लोकस्य सूचयति। तस्य भासा सर्वमिदं विभातीति च तद्धेतुकं भानं सूर्यादेरुच्यमानं प्राज्ञ
मात्मानं गमयति॥

इति नियमो नास्तीत्याह। नायमेकांत इति। पौनरुक्त्यमाशंक्य श्रुत्यनुवादपूर्वकं सूत्रोक्तं हेत्वंतरं व्याचष्टे। अनुकृतेरिति। तमेव भांतमित्येवकारोक्तं तद्भा
नं विना स्वेषां स्वप्रभानाभावरूपं अनुभानमनुकृतेरित्यनेनोक्तं। तस्य चेति सर्वभासकत्वमुक्तमिति न पौनरुक्त्यमित्यर्थः॥ ॥

आत्मनः स्वर्गादिभासकत्वं श्रुत्यंतरप्रसिद्धमविरुद्धं चेत्याह। तद्देवा इति। सर्वशब्दः प्रकृतस्वर्गादिवाचकत्वेन व्याख्यातः। संप्रति तस्याऽसंकुच-
द्वृत्तितां मत्वाऽर्थांतरमाह। अथवेति। तत्रेति सर्वनाम्नश्रुत्या प्रकृतं ब्रह्म ग्राह्यमित्याह। न तत्र सूर्य इति। किं च स्पष्टब्रह्मपर एवं मंत्राकांक्षापूरक-
त्वादयं मंत्रोऽत्र ब्रह्मपर इत्याह॥ अनंतरं चेति। हिरण्मये ज्योतिर्मये उत्तमयाऽघपेस्यापरे कोशे आनंदमयाख्ये पुच्छश्रुतिं ब्रह्म विरजं आगंतुकमल

तद्देवा ज्योतिषां ज्योतिरायुर्होपासतेऽमृतमिति हि वाजसनेयका आमनंति। तेजोंतरेण तु सूर्यादितेजो विभातीत्यप्रसिद्धं। विरुद्धं च। तेजोंतरेणाते-
जोंतरस्य प्रतिघातात्। अथवा न स्वर्गादीनामेव श्लोकपरिपठितानामिदं तद्धेतुकं विभानमुच्यते। किं तर्हि सर्वमिदमित्यविशेषश्रुतेः सर्वस्ये-
वास्य नामरूपक्रियाकारकफलजातस्याभिव्यक्तिः ब्रह्मज्योतिःसत्तानिमित्ता। यथा सूर्यज्योतिःसत्तानिमित्ता सर्वस्य रूपजातस्याभिव्य-
क्तिस्तद्वत्॥ न तत्र सूर्यो भातीति न तत्र शब्दमाहरन् प्रकृतब्रह्मणो दर्शयति। प्रकृतं च ब्रह्म यस्मिन् द्यौः पृथिवी चांतरिक्षमोतमित्यादिना अनंत-
रं च हिरण्मये परे कोशे विरजं ब्रह्म निष्कलं तच्छुभ्रं ज्योतिषां ज्योतिस्तद्यदात्मविदो विदुरिति। कथं तज्ज्योतिषां ज्योतिरित्यत इदमुक्तं। न त-
त्र सूर्यो भातीति। यदमुष्मिन् सूर्यादीनां तेजसां भानप्रतिबंधस्तेजोधातावेवास्मिन्न चकल्प्यते। सूर्येद्वेतरेषामिति। तत्र तु स एव तेजोधातुरन्यो २३
नसं भवतीत्युपपादितं।

अन्यंतिष्कलं निरवयवं शुभ्रं नैसर्गिकमलशून्यं सूर्यादिप्रकाशिमत्तं ब्रह्मविल्प्यासिद्धमित्यर्थः। एतिसप्तमीपक्षमनुवदति। यदपीति। सूर्याद्यभि-
भावके तेजोधातौ शाल्मलिके तस्मे हस्यग्रहणशंका स्यात्। न तत्र प्रमाणमस्तीत्याह। तत्रेति॥

सिद्धांतेनतन्नेतिराकार्यः कथमित्याशंक्याह। ब्रह्मण्यपि नीतिसति समनीपस्थेन भातीति श्रुतं वर्तमानत्वेसकाले तस्मिन्सतितद्भासं ती स्मश्रुतं भविष्य
त्वंकल्पनीयं प्रसक्तत्रिगिधनिराहाय विषयस्य समनीपस्थेतु न भासयती स्मश्रुतगिजध्याहारमात्रंकल्प्यं न श्रुतस्याभाइति लाघवं। अतो ब्रह्मणि विषयेस
मीदेभासकसन्निधेन ब्रह्मभास्यत्वमुच्यतइत्यर्थः। येनान्यभास्यत्वेन हेतुनासूर्यादयस्तस्मिन्ब्रह्मणिविषयेभासकाः स्युः तथा तु ब्रह्मणोन्येनतेनोपल

ब्रह्मणयपि चैषांभानप्रतिषेधोवकल्पते। यतो यदुपलभ्यते तत्सर्वं ब्रह्मणैव ज्योतिषोपलभ्यते ब्रह्मतु नान्येनज्योतिषोपलभ्यते स्वयंज्योतिःस्व
रूपत्वात्। येनसूर्यादयस्तस्मिन्भायुः ब्रह्मह्यन्यत्प्रकाशं नतुब्रह्मणान्येनप्रकाश्यते। आत्मनैवायंज्योतिषास्ते। अगृह्योनहिगृह्यतइत्यादिश्रु
तिभ्यः। अपि च स्मर्यते। अपि चेद्दग्रूपं शास्त्रस्यैवात्मनः स्मर्यते भगवद्गीतासु। नतद्भासयते सूर्योनशशांकोनपावकः॥ यद्गत्वाननिवर्तं
ते तद्धाम परमं ममेति। यदादित्यगतंतेजोजगद्भासयतेखिलं। यच्चंद्रमसि यच्चाग्नौ तत्तेजोविद्धिमामकमिति च॥ २३॥ शब्दादेवप्रमितः॥ अं
गुष्ठमात्रः पुरुषोमध्यआत्मनितिष्ठतीतिश्रूयते। तथांगुष्ठमात्रः पुरुषोज्योतिरिवाधूमकः॥ ॥ ॥

भ्यते स्वप्रकाशत्वादितियोजना॥ उक्तमेवस्फुटंतरेणद्रढयती॥ येनेति। स्वप्रकाशत्वेः स्याभास्यत्वेच श्रुती ह्यंप्रहणायोग्यत्वाद्याह्यइत्यर्थः। णिज
ध्याहारपक्षेस्वत्रितिबलनमप्यस्तीत्याह। अपि चेति। सूत्रंप्याचष्टे। अपि चेति। अभास्यत्वे सर्वभासकत्वेचस्लोकद्वयंद्रष्टव्यं। तस्मादनुभानमं
तोब्रह्मणि समन्वितइतिसिद्धं॥ शब्दादेवप्रमितः। कावककार्यपठति। अंगुष्ठेति। पुरुषः पूर्णोयात्मनि देहमध्ये अंगुष्ठमात्रे हृदये तिष्ठतीसं
गुष्ठमात्रउच्यते। तस्यैवपरमात्मत्वसाधिकांतरमाह। तथेति। अधूमकमितिपठनीयं॥

स०का०
२४

योऽंगुष्ठमात्रो जीवः स एव स्तुतोऽस्ति धूमज्योतिर्वैतिनिर्मलप्रकाशरूप इत्यर्थं संशयो ध्वनस्य ब्रह्मत्वमाह । ईशान इति । तस्याद्वितीयत्वमाह । स एवेति । का
लत्रयेपि स एवास्ति नान्यत् किंचित् एतत् नचिकेतसा पृष्टं ब्रह्म तदेतदेवेत्यर्थः । परिमाणे शास्त्रस्य संशयमाह । तत्रेति । यस्यानुभावाद् द्विलिंगात्
अध्याहारेणास्य योगो चरित्र स्तेस्फ ऽत्र यावदप्रयत्नश्रुतपरिमाणलिंगात् जीवस्यैतावद्व्यापीति ध्यानं व्यापीति वि ध्यान ध्याहारेण ध्यानपरत्वावगमिति
पूर्वपक्षयति । तत्र परिमाणेति । पूर्वपक्षे ब्रह्मदृष्ट्या जीवोपास्तिः सिद्धांते तु प्रत्यग्ब्रह्मैक्यज्ञानं फलमिति मंतव्यं । आयामो दैर्घ्यं विस्तारो महत्वमिति

इशानो भूतभव्यस्य स एवाद्य स उ श्व एतद्वै तदिति च । तत्रयोयमंगुष्ठमात्रः पुरुषः श्रूयते । स किं विज्ञानात्मा किं परमात्मेति संशयः । तत्र परि
माणोपदेशात्तावद्विज्ञानात्मेति प्राप्तं । तच्चनंतस्यायामविस्तारस्य परमात्मनोंगुष्ठपरिमाणमुपपद्यते । विज्ञानात्मनस्तूपाधिमत्तः संभवति
कयाचित्कल्पनयांगुष्ठमात्रत्वं । स्मृतेश्च । अथ सत्यवतः कायात् पाशबद्धं वशं गतं । अंगुष्ठमात्रं पुरुषं निश्चकर्ष यमो बलादिति । नहि परमे
श्वरो बलाद्यमेन निष्क्रष्टुं शक्यः । तेन तत्र संसार्यंगुष्ठमात्रो निश्चितः । स एवेहापीत्येवं प्राप्ते ब्रूमः । परमात्मैवायमंगुष्ठमात्रपरिमितः पुरुषो भ
वितुमर्हति । कस्मात् शब्दात् । ईशानो भूतभव्यस्येति । नह्यन्यः परमेश्वराद् भूतभव्यस्य निरंकुशमीशिता । एतद्वै तदिति च प्रकृतं पृष्टमिहा
नुसंदधाति । एतद्वै तद्यत् पृष्टं ब्रह्मेत्यर्थः । पृष्टं चेह ब्रह्म अन्यत्र धर्मादन्यत्राधर्मादित्यत्रास्मात्कृताकृतादन्यत्र भूताच्च भव्याच्च यत्तत्पश्यसि तद्वदे
ति ॥
भेदः । कयाचिदिति । अंगुष्ठमात्रहृदयस्थविज्ञानरूपोपाधिस्तद्वृत्त्या भेदाध्यासकल्पनमेत्यर्थः । स्मृतिसंवादार्थमंगुष्ठमात्रो जीव इत्याह । स्मृतेश्चे
ति । अथ मरणानंतरं पशोर्बवाशे बद्धं कर्मवशं प्राप्तमित्यर्थः । तत्रापीश्वरः किं न स्यादित्यत आह । न हीति । प्रभवति संयमनेन मनापि यिं दृष्टिरिति परमेश्वर
श्वरानि यम त्वस्मरणादिति भावः । भूतभव्यस्येश्वरपदात् ब्रह्मधर्मात्वात् ईशानश्रुतिः स्वलक्षणा निरंकुशमीशितृत्वात् निश्चलसालिंगवाध्यानमिति सिद्धांत

२४

शब्दो वाक्यं लिंगं दुर्बलमित्याशंक्याह। शब्दादिति। कः पुनः सकुनिष्ठः। कः स्मरति? मुख्याङ्गुष्ठमात्रो जीवो गम्यतां किं गौणग्रहणेनेत्यत आह तत्राप्य
इति। सति संभवे मुख्यग्रहो न्याय्यः अत्र तु श्रुतिविरोधादसंभव इति गौणग्रह इत्यर्थः। मनुष्यानेवेति त्रैवर्णिकानेवेत्यर्थः शक्तत्वादिसंनेतृनप
श्वादीनां देवानामृषीणां चाधिकारो वारितः। तत्र पश्वादीनां शास्त्रार्थज्ञानादिसामर्थ्याभावात्कर्मस्वशक्तिः इन्द्रादेः स्वदेवताकेषु कर्मणि त्यागो ह्ये
न द्रव्यस्य त्यागो योगात् अशक्तिः ऋषीणामार्षेयवरणे ऋष्यन्तराभावादशक्तिः। आर्षेत्यादिग्रन्थेनेन निष्कामानां मुमुक्षूणां स्वाध्यायवतां अधिकारो वा

शब्दादेवेसन्निधानश्रुतेरेवेशान इति परमेश्वरोपगम्यत इत्यर्थः। कथं पुनः सर्वगतस्य परमात्मनः परिमाणोपदेश उपपद्यत इत्यत्राह। हृदपे
क्षयातु मनुष्याधिकारत्वात्॥ सर्वगतस्यापि परमात्मनो हृदयेऽवस्थानमपेक्ष्याङ्गुष्ठमात्रत्वमिदमुच्यते आकाशस्येव वंशपर्वापेक्षम
रत्निमात्रत्वं। न ह्यञ्जसातिमात्रस्य परमात्मनोऽङ्गुष्ठमात्रत्वमुपपद्यते। न चान्यः परमात्मनः इह ग्रहणमर्हति। ईशानशब्दादिभ्य इत्युक्तं। ननु
प्रतिप्राणिभेदं हृदयानामनवस्थितत्वात्तदपेक्षमप्यङ्गुष्ठमात्रत्वं नोपपद्यत इत्यत उत्तरमुच्यते। मनुष्याधिकारत्वादिति। शास्त्रं ह्यविशे
षप्रवृत्तमपि मनुष्यानेवाधिकरोति। शक्तत्वादर्थित्वात्। अपर्युदस्तत्वादुपनयनादिशास्त्राच्चेति॥ ॥ ॥ ॥

रितः। तत्र मुमुक्षूणां पुंसामर्थित्वेन नित्यादिष्वधिकारेण काम्येषु शुद्धचित्तानां मोक्षार्थित्वेन श्रवणादिषु यज्ञकेष्वधिकारेण कर्मस्विति मंतव्यं।
शूद्रस्याधिकारं निरस्यति। अपर्युदस्तत्वादिति। शूद्रो यज्ञेऽनवक्लृप्त इति पर्युदासात्। उपनयीत तमध्यापयीतेति शास्त्राच्छूद्रस्य वैदिके क
र्मण्यधिकारः। तस्यैकजातित्वस्मृतेरुपनयनमप्रसक्तेर्हि तस्यार्थेन वेदाध्ययनाभावात्॥

सू॰ भा॰ अत्राशेषितो न्यायः षष्ठाध्याये वर्णितः इत्याह। वर्णितमिति। स्वर्गकामो यजेतेत्यादिशास्त्रस्याविशेषेण सर्वान्फलार्थिनः प्रतिप्रवृत्तत्वात्
श्रवणमात्रस्य तु सार्थित्वाच्च फलार्थ्ये कर्मणि पश्वादीनामप्यधिकार इत्याशंक्य कोन्नेतीसांतेषां शक्त्याद्यभावात् स्वर्गकामपदं मनुष्यपरतयासंको
२५ च मनुष्याधिकारत्वे स्थापिते चातुर्वर्ण्याधिकारमाशंक्य वसंते ब्राह्मणोऽग्नीनादधीत ग्रीष्मे राजन्यः शरदि वैश्य इति त्रयाणामेवाग्निसंबंधश्रव

वर्णितमेतदधिकारलक्षणे मनुष्याणां च नियतपरिमाणः कायः औचित्येन नियतपरिमाणमेव चैषामंगुष्ठमात्रं हृदयं अतो मनुष्याधि
कारत्वाच्छास्त्रस्य मनुष्यहृदयावस्थानापेक्षमंगुष्ठमात्रत्वमुपपन्नं परमात्मनः॥ यदप्युक्तं परिमाणोपदेशात् स्मृतेश्च संसार्येवाय
मंगुष्ठमात्रः प्रत्येतव्य इति तत्प्रत्युच्यते। स आत्मा तत्त्वमसीत्यादिवत् संसारिण एव सतोंगुष्ठमात्रस्य ब्रह्मत्वमिदमुपदिश्यत इति द्विरू
पा हि वेदान्तवाक्यानां प्रवृत्तिः। क्वचित्परमात्मस्वरूपनिरूपणपरा क्वचिद्विज्ञानात्मनः परमात्मैकत्वोपदेशपरा। तदत्र विज्ञानात्मनः प
रमात्मनैकत्वमुपदिश्यते न। अंगुष्ठमात्रत्वं कस्यचित्॥

णात्तेषामेवाधिकार इति वर्णितमित्यर्थः। अस्तु यस्तु ते किमापातं तत्राह। मनुष्याणां चेति प्रायेण सप्तवितस्तिपरिमितो मनुष्यदेहस्त ॥[illegible]॥ २५
र्थः। एवमंगुष्ठशब्दो हृत्परिमाणवाचकः तत्र हृत्स्थब्रह्मलक्ष्यत्वेनोक्तं संप्रति तद्देशेनांगुष्ठमात्रजीवमनूद्य यमोऽयं सनातन इति ब्रह्माभेदो बोध्यइ
तिवक्तुं उक्तमनुवदति। यदपीति। प्रतिपाद्याभेदविरोधात् अनुवाद्यांगुष्ठमात्रत्वं बाध्यं तात्पर्याविषयत्वेनाबलत्वादित्याह। तदिति। क्वचिदस्मत्प्रत्ययालम्बि

एकवाक्यार्थे वाक्यद्वयमनुकलयति। एतमिति। श्रुतिर्यमो वाक्कर्ता द्रष्टव्यः। तं जीवं प्रवृहेत् पृथक्कुर्यात् धैर्येणावलवादिन्द्रियनिग्रहादिनात्मं
विविक्तमात्मानं मुञ्जस्वरूपकोशमध्यगतं कूटस्थं ब्रह्मजानीयादित्यर्थः। तस्मात्कठवाक्ये प्रकृतं ब्रह्मणि ज्ञेयं सम्बन्धितमिति सिद्धम्। शास्त्रस्य मनु
ष्याधिकारत्वे देवादीनां ब्रह्मविद्यायामप्यनधिकारः स्यादित्याशंक्याह। तदुपर्यपि सम्भवात्। ननु सम्बन्धपाध्याये धिकारचिन्तानसंगतेत्यत
आह। अङ्गुष्ठेति। स्मृतत्वापेक्षानहं तत्प्रसंगः। अत्र मनुष्याधिकारत्वाच्छास्त्रस्य तेषां देवादीनां वेदान्तश्रवणादावधिकारोऽस्ति न वेति संदेहे भोगास

एतमेवार्थं परेण स्फुटीकरिष्यति। अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मा सदा जनानां हृदये सन्निविष्टः। तं स्वाच्छरीरात्प्रवृहेत् मुञ्जादिवेषीकां धै
र्येण तं विद्याच्छुक्रममृतमिति॥ तदुपर्यपि बादरायणः सम्भवात्। अङ्गुष्ठमात्रश्रुतिर्मनुष्यहृदयापेक्षया मनुष्याधिकारत्वाच्छास्त्र
स्येत्युक्तं। तत्प्रसंगेनेदमुच्यते॥ वाढं मनुष्यानधिकरोति शास्त्रं न तु मनुष्यानेवेतीह ब्रह्मज्ञाने नियमोऽस्ति। तेषां मनुष्याणामुपरिष्टा
द्ये देवादयस्तानप्यधिकरोति शास्त्रमिति बादरायण आचार्यो मन्यते। कस्मात्सम्भवात्। सम्भवति हि तेषामप्यर्थित्वाद्यधिकारणं॥
तत्रार्थित्वं तावन्मोक्षविषयं देवादीनामपि सम्भवति। विकारविषयविभूत्यनित्यत्वालोचनादिनिमित्तं॥ ॥ २ ॥

क्तानां वैराग्याद्यसम्भवान्नेति प्राप्ते सिद्धान्तमाह बाढमिति। एवमधिकारविचारात्मकाधिकरणद्वयस्य प्रासंगिकी संगतिः। अत्र पूर्वपक्षे दे
वानां ज्ञानानधिकारात् देवलप्राप्तिद्वारा क्रममुक्तिफलासु दहरसगुणसत्त्वासु क्रममुमुक्षु अर्थिनां मनुष्याणां प्रवृत्तिः फलसिद्धं ते तु प्रवृ
त्तिः उपासनासिद्धे देवलप्राप्तानां श्रवणादिना ज्ञानान्मुक्तिसम्भवादिति सफलोऽयं विचारः। ननु भोगासक्तानां तेषां मोक्षार्थित्वाभावात्राधिकार इत्य
त आह। अर्थित्वं तावदिति विकारत्वेनानित्यविषयसुखस्य स्वर्गादेरपि हेयत्वात् निरतिशयसुखमोक्षार्थित्वसम्भवात् तेषां देवानां सम्भवतीत्यर्थः॥ ॥

सं॰भा॰ २६

तर्हि द्वापरस्यादेः सार्द्धचतुर्थ्यैतरशूद्रातिरिक्ता विग्रहवती देवता नास्ति शूद्रस्य चासामर्थ्यान्नाधिकार इत्यत आह। तयेति। अर्थित्वचदित्यर्थः।
अपर्युदस्तत्वमाह। नचेतेषामिति। शूद्रोयज्ञेनवकृप्त इतिवत् देवादीनां विद्याधिकारनिषेधो नास्तीत्यर्थः। ननु विग्रहवत्वेन दृष्टसामर्थ्यं सलभ्यु
पलभ्यमानाभावात् तेषां स्त्रीयं सामर्थ्यं नास्तीत्यत आह। नचेति जन्मांतरीयध्यानवलात् स्वयमेवप्रतिभातः स्मृता वेदा येषां तेन भात द्वापरादित्यर्थः।
बालादिषु प्रविष्टपिशाचादीनां वेदोद्घोषदर्शनात्। देवर्षीनां तां जन्मांतरस्मरणमस्तीति इतिस्मृतवेदानामर्थविचारो युक्त इत्यर्थः। देवानां

तथा सामर्थ्यमपि तेषां संभवति। मंत्रार्थवादेतिहासपुराणलोकेभ्यो विग्रहवत्वाद्यवगमात्। नचतेषां कश्चित्प्रतिषेधोस्ति। नचोपन
यनशास्त्रेणैषामधिकारो निवर्त्येतोपनयनस्य वेदाध्ययनार्थत्वात् तेषां च स्वयंप्रतिभातवेदत्वात्। अपि चैषां विद्याग्रहणार्थं ब्रह्मच
र्यादि दर्शयति। एकशतं ह वै वर्षाणि मघवान्प्रजापतौ ब्रह्मचर्यमुवास। भृगुर्वै वारुणिः। वरुणं पितरमुपससार। अधीहि भगवो ब्रह्मे
ति। यदपि कर्मस्वनधिकारकारणमुक्तं। न देवानां देवतांतराभावात्। न ऋषीणामार्षेयांतराभावादिति। न तद्विद्यास्वस्ति। न हींद्रादीनां विद्या
स्वधिक्रियमाणानामिंद्राद्युद्देशेन किंचित्कृत्यमस्ति। न भृग्वादीनां भृग्वादिसगोत्रतया। तस्माद्देवादीनामपि विद्यास्वधिकारः केन वार्यते॥ ॥

येऋषीणां च विद्याधिकारे कारणमर्थित्वादिकमुक्त्वा श्रौतं गुरुकुलवासादिलिंगमाह॥ अपि चेति। ननु ब्रह्मविद्या देवादीन्नाधिकरोति वेदार्थ
त्वात्। अग्निहोत्रवदित्यत आह। यदपीति। देवानां कर्मसु नाधिकारः देवतांतरणामुद्देश्यानामभावादिति प्रथमसूत्रार्थः। ऋषीणामनधिकारः। आर्षे
यांतराभावात्। अतो वियुक्ते कर्मण्येषां कोरिति द्वितीयसूत्रार्थः। असामर्थ्यमुपाधिरिति परिहरति न तद्विति। असामर्थ्यरूपं कारणमित्यर्थः।

नह्यस्ति येनासामर्थ्यं स्यादिति। [illegible] तयोः [illegible] देवानां प्रसङ्ग
ध्यानसम्पत्तद्भवत्तत्पथि [illegible] वाक्यवाधो [illegible] मान
[illegible]

२६

ननु देवादीनामङ्गुष्ठमात्रश्रुतिः कथं तेषां महादेहत्वेन हृदयस्याङ्गुष्ठमात्रत्वाभावात्। अतः श्रुतिषु तेषां नाधिकारः इत्यत आह देवाद्यधि
कारेऽपीति। ननु मंत्रादीनां मतोपमानविग्रहवत्त्वे तात्पर्यकल्पनाऽपि देवादीनामधिकार उक्तः। स चायुक्तः। अन्यपराणां तेषां प्रत्यक्षादिविरोधेन
स्वार्थे तात्पर्यकल्पनानुपपत्तेरित्याशङ्क्य सूत्रद्वयेन परिहरति। विरोधः कर्मणीत्यादिना। वर्ण्ये तत्र हीतिशेषः॥ स्वरूपं विग्रहः। अभ्युप

देवाद्यधिकारेऽप्यङ्गुष्ठमात्रश्रुतिः स्वाङ्गुष्ठापेक्षया न विरुध्यते॥ विरोधः कर्मणीति चेन्नानेकप्रतिपत्तेर्दर्शनात्॥ स्यादेतत्। यदि वि
ग्रहवत्त्वाद्यभ्युपगमेन देवादीनां विद्यास्वधिकारो वर्ण्येत विग्रहवत्त्वात् ऋत्विगादिवदिन्द्रादीनामपि स्वरूपसंनिधानेन कर्माङ्गभा
वोऽभ्युपगम्येत। तदा च विरोधः कर्मणि स्यात्। न हीन्द्रादीनां स्वरूपसन्निधानेन यागाङ्गभावो दृश्यते। न च संभवति। बहुषु यागेषु
युगपदेकस्येन्द्रस्य स्वरूपसन्निधानानुपपत्तेरिति चेत्। नायमस्ति विरोधः॥ ॥ ॥ ॥

यागे प्रत्यक्षेण देवतादर्शनं न च दृश्यते। अतो योग्यानुपलब्ध्या देवताया विग्रहवत्त्वस्याभावात् संप्रदानकारकाभावेन कर्मनिष्पत्तिर्न स्यादित्या
ह॥ तदा चेति। विग्रहस्याङ्गत्वे अनुपलब्धिबाधितं पुनस्तद् न संभवतीत्याह॥ न चेति॥ तस्माद्दर्शोपहितशब्दस्यैव देवतात्वं स्याच्चेत्तन्नान्न
विद्याधिकार इति शंकार्थः। परिहरति। नायमिति॥

स.भा. २७

एकस्यापि देवस्य योगबलादनेकदेहप्राप्तिः श्रुतिस्मृतिदर्शनात्संभवति। अतो न कर्मणि विरोध इति व्याचष्टे। कस्मादित्यादिना वैश्वदेवशस्त्रे शस्य
मानदेवाः कतीति शाकल्येन पृष्टो याज्ञवल्क्यो निविदा त्रयश्च त्री च शतादिरूपयोत्तरं ददौ। निविन्नाम शस्यमानदेवसंख्यावाचकः शब्दः। षडधिकानि
त्रीणि शतानि त्रीणि सहस्राणीति संख्येयः। संख्येयस्वरूपप्रश्ने महिमानो विभूतयः सर्वे देवा एषां त्रयस्त्रिंशद्देवानां। अतोऽष्टौ वसवः एकादश रु
द्राः द्वादशादित्याः इंद्रः प्रजापतिश्चेति त्रयस्त्रिंशद्देवदेवास्ते विभवा अग्निपृथिवीवाय्वंतरिक्षादित्यद्यौर्महिमानस्तेऽपि षट्सु देवेष्वंतर्भवंति।
कस्मादनेकप्रतिपत्तेरेकस्यापि देवतात्मनो युगपदनेकस्वरूपप्रतिपत्तिः संभवति। कथमेतदवगम्यते। दर्शनात्। तथा हि कति देवा इत्युपक्र
म्य त्रयश्च त्री च शता त्रयश्च त्री च सहस्रेति निरुच्य। कतमे त इत्यस्यां पृच्छायां महिमान एवैषामेते त्रयस्त्रिंशत्त्वेव देवा इति ब्रुवती श्रुतिरेकैक
स्य देवतात्मनो युगपदनेकरूपतां दर्शयति। तथा त्रयस्त्रिंशतोऽपि षडाद्यंतर्भावक्रमेण कतम एको देव इति प्राण इति प्राणैकरूपतां देवतानां द
र्शयति। तस्यैवैकस्य प्राणस्य युगपदनेकरूपतां दर्शयति॥ तथा स्मृतिरपि आत्मनो वै शरीराणि बहूनि भरतर्षभ॥ योगी कुर्याद्बलं प्राप्य तैश्च सर्वै
र्महीं चरेत्। प्राप्नुयाद्विषयान्कैश्चित्कैश्चिदुग्रं तपश्चरेत्। संक्षिपेच्च पुनस्तानि सूर्यो रश्मिगणानिवेत्येवंजातीयका प्राप्ताणिमाद्यैश्वर्याणां योगिना
मपि युगपदनेकशरीरयोगं दर्शयति। किमु वक्तव्यमाजानसिद्धानां देवानामनेकरूपप्रतिपत्तिसंभवाच्चैकैका देवता बहुभी रूपैरात्मानं प्रविभज्य बहुषु
यागेषु युगपदंगभावं गच्छतीति। परैश्च न दृश्यतेऽन्तर्धानादिक्रियायोगादित्युपपद्यते॥ ॥ षट्देवा इत्युक्तौ केषु त्रयस्त्रयः ऽध्यर्धो द्वौ च एकस्मिन्नस्मा
णे हिरण्यगर्भेऽन्तर्भवंतीति दर्शितमित्यर्थः। त्रयस्त्रिंशतोऽपि देवतानामिति संबंधः। दर्शनं श्रौतं स्मार्तं चास्मत्सामान्यमाचष्टे। तथा स्मृतिरिति। बलं प्राप्य अणिमाद्यैश्व
णिमा महिमा गरिमा लघिमा प्राप्तिरीशिता। प्राकाम्यं वशित्वं यत्र कामावसायितेत्यष्टैश्वर्याणि। तेन अणुर्महान् लघुर्गुरुश्च भवति योगी। अंगुल्या चंद्र
स्य स्पर्शः प्राप्तिः। ईशिता सृष्टिशक्तिः। प्राकाम्यमिच्छानभिघातः। वशित्वं नियमनशक्तिः। संकल्पमात्रादिष्टलाभो यत्र कामावसायिता इति भेदः॥ आजाना इति २७

फलितमाह। अनेकेति। अनेकेषु कर्तृष्वेकस्य प्रतिपत्तिरंगभावः न स्याल्लौकिके दर्शनादिति चकारं व्यतिरेकमाह ॥ क्वचिदेक इति। प्रकृतोपयुक्तम
न्वयदृष्टान्तमाह। क्वचिच्चेति। कर्मण्यपि विरोधमंगीकृत्य शङ्कते। नाप्येवं विरोधमार्गमपरिहरति। शब्दस्तु नियच्छदिति। मायमेनिमसक्तो नामूत्रा मे स्वर्यः
औत्पत्तिकस्य शब्दार्थयोरन्वयोः संबन्धस्यानादित्वाद्दृष्टस्यार्थे मानान्तरानपेक्षत्वेनाप्रामाण्यमनुक्तं। इदानीं अनित्यविग्रहव्याद्यभ्युपगमे तत्सं
अनेकप्रतिपत्तेर्दर्शनादिसत्त्वापराख्याविग्रहवत्तामपि कर्मांगभावश्चोद्यतास्यनेकप्रतिपत्तिर्दृश्यते। क्वचिदेकोपि विग्रहवाननेकत्र युगपदं
गभावं न गच्छति। यथा बहुभिर्भोजयद्भिर्नैको ब्राह्मणो युगपद्भोज्यते। क्वचिदेकोपि विग्रहवाननेकत्र युगपदंगभावं गच्छति। यथा बहुभिर्नम
स्कुर्वाणैरेको ब्राह्मणो युगपन्नमस्क्रियते। तद्दिहोदाहरिष्यामात्मकत्वात् यागस्य विग्रहवतीमप्येकां देवतामुद्दिश्य बहवः स्वं स्वं द्रव्यं युगपत्त्य
क्ष्यन्तीति विग्रहवत्त्वेपि देवानां न किंचित्कर्म विरुध्यते शब्द इति चेन्नातः प्रभवात्मकस्य प्रमाणानुमानाभ्यां ॥ नानाप्यविग्रहवत्त्वे देवादीना
मभ्युपगम्यमाने कर्मणीक क्वचिद्विरोधः प्रसक्तः। शब्देतु विरोधः प्रसज्येत। कथं। औत्पत्तिके हि शब्दस्यार्थेन संबन्धः प्रामाण्यं सानपेक्षत्वादितिवे
दस्य प्रामाण्यं स्थापितं इदानीं तु विग्रहवती देवताभ्युपगम्यमाना पचापेक्ष्य ऐश्वर्ययोगाद्युगपदनेककर्मसंबन्धीति हवींषि भुंजीत तथापि विग्रहयोगा
दस्मदादिवज्जननमरणवत्वेन नित्यस्य शब्दस्यानित्येनार्थेन नित्यसंबन्धे प्रविलीयमाने मेदिदिकेशब्देऽप्रामाण्यं स्थितं तस्य विरोधः स्यादिति चेत्।
वंधस्याप्यनित्यत्वात् मानान्तरेणाव्यक्तिं ज्ञात्वा शब्दस्य प्रणेतृतः पुंसा कर्तव्यः इति मानान्तरापेक्षत्वात् प्रामाण्यस्य विरोधः स्यादित्याह। कथमित्यादिना ॥

सू॰ भा॰ किंशब्दानामनित्यतया संबंधस्य कार्यत्वमापाद्यते । उतार्थानामनित्यतयेत्याह । नायमपीति । कर्मण्यपि विरोधवत् इत्यपेरर्थः । देवादिव्यक्तिहेतु
२८ त्वेन प्रागेव शब्दानां सत्त्वात् नानित्यत्वमिति भावः । अत्र पूर्वापरविरोधं शंकते ॥ नन्विति ॥ शब्दस्य निमित्तत्वेन जगत्सहकारित्वादविरोध इत्याशंक्य द्वितीय
कल्पमुपपादयति ॥ अपिचेति । अनित्यत्वे सादित्वं व्यक्तिरूपार्थानामनित्यतया शब्दानां संबंधस्यानित्यत्वं दुर्वारं । तस्मात्सौत्पत्तिकेपि संबंधस्य पेक्षत्वान्मा एप

नायमप्यस्ति विरोधः । कस्मादतः प्रभवात् । अत एव हि वैदिकाच्छब्दाद्देवादिकं जगत्प्रभवति ॥ ननु जन्माद्यस्य यत इत्यत्र ब्रह्मप्रभवत्वं जगतोऽवधारि
तं कथमिह शब्दप्रभवत्वमुच्यते । अपि च यदि नाम वैदिकाच्छब्दादस्य प्रभवोऽभ्युपगतः कथमेतावता विरोधः शब्दे परिहृतो यावता वसवो रुद्रा आदित्या
विश्वेदेवा मरुत इत्येतेऽर्था अनित्या एवोत्पत्तिमत्त्वात् तदनित्यत्वे च तद्वाचिनां वैदिकानां वस्वादिशब्दानामनित्यत्वं केन निवार्यते । प्रसिद्धं हि लोके दे
वदत्तस्य पुत्र उत्पन्ने यज्ञदत्त इति तस्य नाम क्रियत इति । तस्माद्विरोध एव शब्द इति चेत् न गवादिशब्दार्थसंबंधनित्यत्वदर्शनात् । न हि गवादिव्यक्तीनां
उत्पत्तिमत्त्वे तदाकृतीनामप्युत्पत्तिमत्त्वं स्यात् । द्रव्यगुणकर्मणां हि व्यक्तय एवोत्पद्यंते । नाकृतयः । आकृतिभिश्च शब्दानां संबंधो न व्यक्तिभिः ॥ ॥

विरोध इत्यर्थः ॥ न च व्यक्तीनामनित्यत्वेपि घटत्वादिजातिसमवायवत् शब्दसंबंधोपि नित्यः स्यादिति वाच्यं । उभयाश्रितसंबंधस्याश्रयनाशे स्थित्ययो २८
गेन दृष्टांतासिद्धेरिति भावः । यथा गोत्वादयो गवादिशब्दवाच्याः तथा वसुत्वाद्याकृतयो वस्वादिशब्दार्थाः न व्यक्तय इति परिहरति । नित्यादिना । शब्दानां तदर्थी
नां जातीनां च नित्यत्वात्तत्संबंधोपि नित्य इति प्रतिपादयति । न हीत्यादिना ॥
॥ ॥ ॥ ॥

व्यक्तीनामानंत्यादिति। नच गोत्वावच्छेदेन व्यक्तिषु शक्तिः स्यादेहतिवाच्यं सामान्यस्याप्रत्यासत्तित्वेन सर्वव्यक्त्युपस्थित्यभावात् गोत्वस्य शक्यतावच्छेदकत्वमिति
यदापेक्षया गोत्वस्य शक्यमिति लाघवात्। निरूढलक्षणया व्यक्तेर्लाभेनानन्यलभ्यत्वाभावाच्चेति भावः। यद्वा केवलव्यक्तिषु शक्तिरत्र निरस्यते ऽनुप
पत्तिज्ञानं विनैव व्यक्तेः शाब्दप्रमाप्रकारीभूतज्ञानविषयत्वेनुद्भवप्रकारे वक्तृपक्षत्वात्। तथाच निरजातितादात्म्येन व्यक्तेरनादित्वात्तत्संबंधोप्य
नादिः। तत्कार्ष्यवादात्॥ अतएव वाक्यवृत्तौ तत्त्वमस्यादिवाक्ये भागलक्षणोक्ता पुत्र तेन केवलसामान्यस्य वाच्यत्वे स्वं इत्यर्थस्य वाच्यैकदेशत्वाभावात्।
अत उभयादित्ययमस्वारस्याद्वा केवलव्यक्तिनिरास इति गम्यते। केवलव्यक्तिवचनाः खलु डित्थादिशब्दाः अर्थानंतरभाविनः सांकेतिकाः गवादि

व्यक्तीनामानंत्यात्संबंधग्रहणानुपपत्तेः। व्यक्तिषु तु नष्टमानाद्यपि आकृतीनां नित्यत्वाद्गवादिशब्देषु शक्तिर्विरोध इष्यते। तथा देवादिव्य
क्तिप्रभवाभ्युपगमेप्याकृतिनित्यत्वान्न कश्चिद्दृत्त्यादिशब्देषु विरोध इति द्रष्टव्यं। आकृतिविशेषस्तु देवादीनां मंत्रार्थवादादिभ्यो विग्रहवत्त्वाध
वगमादवगंतव्यः॥

शब्दास्तु व्यक्तिप्रभवहेतुत्वेन प्रागेव संतीति न व्यक्तिमात्रवचनाः सांकेतिकाः किंतु स्वस्वलक्ष्यस्वभावे नानुस्यूतव्यक्त्यविनाभूतसामान्यवचना इति
मंतव्यं। न चैवं डित्थादिव्यक्तेरेकत्वेन जात्यसंभवादाकाशशब्दवत् इन्द्रचंद्रादिशब्दाः केवलव्यक्तिवचना इति सांप्रतं। अतीतानागतव्यक्तिभेदेन जात्युपपत्ते
रित्यलं प्रपंचेन दृष्टांतमुपसंहृत्य दार्ष्टांतिकमाह। व्यक्तिः पिंडादिः। आकृतिर्जातिः। ननु का सा व्यक्तिः पर्यनुगतेंद्रत्वादिजातिः शचीपतेः स्यादित्यत आह।
आकृतिविशेषस्त्विति। वज्रहस्तः पुरंदर इत्यादिभ्य इत्यर्थः॥

स॰भा॰ २९

इंद्रादिशब्दानां जातिः इंद्रादिषु प्रवृत्तिनिमित्तमित्युक्त्वा उपाधिनिमित्तत्वमाह । स्थानेति व्यक्तिप्रलयेपि स्थानस्यास्थायित्वात् तच्छब्दार्थसंबंधनित्यत्वेत्याह ।
तत्स्थेति । उक्तं पूर्वापरविरोधं परिहरति । न चेति । शब्दो निमित्तमित्यविरोधं मत्वा स्वत्रश्लोकमवतारयति । कथं पुनरिति । स्वसाध्यप्रमाणापार्थं प्र
त्यक्षश्रुतिरनुमीयतइत्यनुमानं स्मृतिः । एते असृग्रमिंदवस्तिरः पवित्रमाशवः । विश्वान्यभिसौभगेत्येतन्मंत्रस्थैः पदैः सृष्ट्वा ब्रह्मादेवादीनसृजत ।
तन्नैतइति पदं सर्वनाम । त्वा देवानां स्मारकं असृग्रमिति प्रधानैर्देहैः रमंतइति असृग्या मनुष्याः चंद्रस्थानां पितॄणां इंदुशब्दः स्मारकः पवित्रे सोमं स्वांत

स्यानभिरोधसंबंधनिमित्ताश्चेंद्रादिशब्दाः सेनापत्यादिशब्दवत् । ततश्च योपस्तत्स्थानमधिरोहति स स इंद्रादिशब्देनाभिधीयतइति न दोषोभ
वति । नवेंद्रशब्दप्रभवत्वं ब्रह्मप्रभवत्वं वा उपादानकारणाभिप्रायेणोच्यते । कथं तर्हि । स्थिते वाचकात्मना नित्यशब्देन नित्यार्थसंबंधिनि शब्दव्यव =
हारयोग्यार्थव्यक्तिनिष्पत्तिरतः प्रभवइत्युच्यते । कथं पुनरवगम्यते शब्दात्प्रभवति जगदिति । प्रत्यक्षानुमानाभ्यां । प्रत्यक्षं श्रुतिः प्रामाण्यं प्रत्य
नपेक्षत्वात् । अनुमानं स्मृतिः । प्रामाण्यं प्रति सापेक्षत्वात् । तेहि शब्दपूर्विकां सृष्टिं दर्शयतः । एतइति वै प्रजापतिर्देवानसृजत असृग्रमिति मनुष्यान्
इंदवइति पितॄन् तिरःपवित्रमिति ग्रहान् आशवइति स्तोत्रं विश्वानीति शस्त्रं अभिसौभगेत्यन्याः प्रजाइति श्रुतिः । तथान्यत्रापि मनसा वाचं मिथुनं स
मभवत् इत्यादिना तत्र तत्र शब्दपूर्विका सृष्टिः श्रूयते ॥ स्मृतिरपि । अनादिनिधना नित्या वागुत्सृष्टा स्वयंभुवा । आदौ वेदमयी दिव्या यतः सर्वाः

स्तिरस्कुर्वतां ग्रहाणां तिरःपवित्रशब्दः ऋत्विक्षु वर्तमानस्तोत्रभागं गीतिरूपाणामाशुशब्दः । ऋच्यध्यूढं सामेति श्रुतेः स्तोत्रानंतरं प्रयोगं विशतां शस्त्रा २९
णां विश्वशब्दः सर्वत्र सौभाग्ययुक्तानामभिसौभगशब्दः स्मारक इति छंदोगब्राह्मणवाक्यार्थः । स प्रजापतिः मनसा वाचं मिथुनं समभवत् । मनोवाङ्
मिथुनं संभावितवान् मनसा त्रयीप्रकाशितां सृष्टिमालोचितवानित्यर्थः । रश्मिरित्येवादित्यमसृजत तेषां च श्रुतिरादिशब्दाः ॥ ॥

संप्रदायो गुरुशिष्यपरंपराध्ययनं। संस्था अवस्थाः प्रजापतिसृष्टिः शब्दपूर्विका सृष्टित्वात्। प्रत्यक्षघटादिवदिति प्रत्यक्षानुमानाभ्यामि
सस्यार्थांतरमाह। अपि चेति। अतः प्रभवत्वप्रसंगात् शब्दस्वरूपं वर्णरूपं हुतं नास्ति पतिकिमात्मकमिति। वर्णरूपं तद्व्यतिरिक्तस्फोटरूपं वेति
किंरूपशब्दः तत्र वर्णानामनित्यत्वात् स्फोटस्य चामूर्तत्वात् न जगद्धेतुत्वं इत्याक्षेपे द्वितीयपक्षं वैयाकरणा गृह्णाति। स्फोटमिति। स्फुटं भवत्येवार्थो ऽ

उत्सर्गोऽस्ययं वाचः संप्रदायप्रवर्तनात्मको दृष्टः श्रुतादिनिधनात्मा अस्माच्छब्दस्य उत्सर्गस्या संभवात् तथा नामरूपे च भूतानां कर्मणां च
प्रवर्तते न वेदशब्देभ्य एवादौ निर्ममे स महेश्वर इति। सर्वेषां तु स नामानि कर्माणि च पृथक् पृथक् वेदशब्देभ्य एवादौ पृथक् संस्थाश्च
निर्ममे इति च अपि च। चिकीर्षितमर्थमनुतिष्ठन्तस्य वाचकं शब्दं पूर्वं स्मृत्वा पश्चात्तमर्थमनुतिष्ठतीति सर्वेषां नः प्रत्यक्षमेतत् तथा
प्रजापतेरपि स्रष्टुः सृष्टेः पूर्वं वैदिकाः शब्दा मनसि प्रादुर्बभूवुः पश्चात्तदनुगतानर्थान्ससर्जेति गम्यते। तथा च श्रुतिः स भूरिति व्याहरत्
स भूमिमसृजतेत्येवमादिका भूरादिशब्देभ्य एव मनसि प्रादुर्भूतेभ्यो भूरादिलोकान्सृष्टान्दर्शयति किमात्मकं पुनः शब्दमभिप्रेत्येदं शब्द
प्रभवत्वमुच्यते स्फोटमित्याह वर्णपक्षे हि तेषामुत्पन्नप्रध्वंसित्वान्नित्येभ्यः शब्देभ्यो देवादिव्यक्तीनां प्रभव इत्यनुपपन्नं स्यात्॥ ५॥

उपत इति स्फोटो वर्णाभिव्यंग्योऽर्थस्य व्यंजको गवादिशब्दो नित्यः तमभिप्रेत्येदमुच्यते इति पूर्वेणान्वयः स एव चाचष्टे दर्शयति। वर्णेति॥

सू.भा. सोऽयं गकार इति प्रत्यभिज्ञया वर्णनित्यत्वसिद्धेर्नानुपपत्तिरित्यत आह। उत्पन्नेति। तारत्वमंद्रत्वादिविरुद्धधर्मवत्त्वेन तारो गकारो मंद्रो गकार इ
३० ति प्रतीयमानगकारस्य भेदानुमानात् प्रत्यभिज्ञा गत्वजातिविषयेत्यर्थः। ननु विरुद्धधर्मज्ञानं ध्वन्युपाधिकं भ्रम इत्यत आह। न चेति। तथा च
वर्णानामनित्यत्वात्तज्जन्यत्वं तु स्वमिति भावः। किं च तेषामर्थबोधकत्वायोगात् स्फोटो गौः कार्य इत्याह। न च वर्णेभ्य इत्यादिना। व्यभिचारात्। एकस्मा
द्वर्णादप्रतीत्यदर्शनात्। वर्णातिरिक्तस्यैव पदप्रसंगाच्चेत्यर्थः। तर्हि वर्णानां समुदायो बोधक इत्याशंक्य क्षणिकानां समुदायो नास्तीत्याह। न चेति। वर्णानां त्वतः

उत्पन्नप्रध्वंसिनश्च वर्णाः प्रत्युच्चारणमन्यथा चान्यथा च प्रतीयमानत्वात् तथा ह्यश्रूयमाणोऽपि पुरुषविशेषोऽध्ययनध्वनिश्रवणादे
वविशेषतो निर्धार्यते। देवदत्तोऽयमधीते यज्ञदत्तोऽयमधीत इति न चायं वर्णविषयोऽन्यथाप्रत्ययो मिथ्याज्ञानं बाधकप्रत्ययाभावात् न च
वर्णेभ्योऽर्थावगतिर्युक्ता न ह्येकैको वर्णोऽर्थं प्रत्याययेत् व्यभिचारात् न च वर्णसमुदायप्रत्ययोऽस्ति क्रमवर्तित्वाद्वर्णानां पूर्वपूर्ववर्णानु
भवजनितसंस्कारसहितोऽन्त्यो वर्णोऽर्थं प्रत्याययिष्यतीति यद्युच्येत। तत्र संबंधग्रहणापेक्षो हि शब्दः स्वयं प्रतीयमानोऽर्थं प्रत्याययेत् धू
मादिवत्। न च पूर्वपूर्ववर्णानुभवजनितसंस्कारसहितस्यान्त्यवर्णस्य प्रतीतिरस्त्यप्रत्यक्षत्वात्संस्काराणाम्॥ ॥ ॥

साहित्याभावेऽपि संस्कारलक्षणापूर्वद्वारा साहित्यमाग्नेयादियागानामिवेति शंक्यते। पूर्वेति। किमयं संस्कारो वर्णैर्जनितापूर्वाख्यः कश्चित् उतव ३०
र्णानुभवजनितो भावनाख्यः नाद्यो मानाभावात्। किं चायमज्ञातो ज्ञातो वार्थधीहेतुः नाद्य इत्याह। तत्रेति। संस्कारसहितः शब्दो ज्ञातः सन्नर्थधीहेतुः
संबंधग्रहणमपेक्ष्य बोधकत्वात् धूमादिवदित्यर्थः। द्वितीयेऽपि किं प्रत्यक्षेण ज्ञात उत तत्कार्यलिंगेन नाद्य इत्याह॥ न चेति॥ ॥

द्वितीयं शंकते। कार्येति। कार्यमर्थधीस्तस्यां जातायां संस्कारप्रलयः तस्मिन् सति सेति परस्पराश्रयेण दूषयतीत्येनेति। पदार्थस्मरणस्यापि पदज्ञाना
नंतरभावित्वात्तेन संस्कारसहितो सवर्णात्मकपदस्मरतानंतर पुरुषमिति स्वस्मरणार्थः। अपि तु इष्टः परस्पराश्रयद्योतनार्थः। एतेन भावनासंस्कारपक्षो
पि निरस्तः तत्स्ववर्णस्मृतिमात्रे हेतुत्वेनार्थधीहेतुत्वायोगात् तत्र चांत्यवर्णसाहित्यादर्थधीहेतुत्वे केवलसंस्कारस्य तु वर्णस्मृतिहेतुत्वमिति वाच्यं अ
र्थधीपूर्वकाले भावनाया ज्ञानाभावेनार्थधीहेतुत्वायोगात्। न च वर्णस्मरणेनानुमिताया अंत्यवर्णसहिताः अर्थधीहेतुरिति वाच्यं तत्कार्यस्य क्रमिकस्य
वर्णस्मरणस्याप्यंत्यवर्णानुभवानंतरभावित्वेन तेनानुमितभावनाया अंत्यवर्णसाहित्याभावादिति भावः धर्मिणा नामर्थबोधकत्वानंगीकारे फलमाह। तस्मा
दिति स्फोटे किं मानमित्याशंक्यैकं पदमिति प्रत्ययं प्रमाणमित्याह। एकं चेति। यथा रत्नतत्त्वं बहुभिरभ्यासैः स्फुटं भासते तथा गवादिपदस्फोटो

कार्यस्यापितैः संस्कारैः सहितोन्त्यवर्णः प्रत्याययिष्यतीति चेत् न। संस्कारकार्यस्यापि स्मरणस्य क्रमवर्त्तित्वात्। तथा स्मात्स्फोट एव शब्दः
स चैकैकवर्णप्रत्ययाहितसंस्कारबीजे स्ववर्णप्रत्ययजनितपरिपाके प्रत्ययिन्येकप्रत्ययविषयतया झटिति प्रत्यवभासते। न चायमेकप्रत्य
योवर्णविषया स्मृतिः। वर्णानामनेकत्वादेकप्रत्ययविषयत्वानुपपत्तेः॥

गकारादेकैकवर्णकृतप्रत्ययैः स्फोटविषयैः आहिताः संस्कारा बीजे यस्मिन् चित्ते तस्मिन्नंत्यवर्णकृतप्रत्ययेन जनितः परिपाको यस्य संस्कारे
यस्मिन् तस्मिन् प्रत्ययिनि चित्ते एकं गौरिति पदमिति प्रत्ययः प्रत्यक्षः तद्विषयतया स्फुटं अवभासत इत्यर्थः। अनेन वर्णात्प्रत्ययव्यतिरेकमेः स्फो
टसत्ते [illegible] सिद्धिः। न चैकस्माद्वर्णात्प्रत्ययः स्फोटाभिव्यक्तिः येन वर्णान्तरवैयर्थ्यं किंतु रत्नवत् पूर्वपूर्वप्रत्ययसंस्कृते चित्ते [illegible] स्फोटाभिव्यक्ति
रित्यर्थः भवति। नन्वेकं पदमेकं वाक्यमिति प्रत्ययः पदवाक्यस्फोटयोर्न प्रमाणं तस्य वर्णसमूहालंबनस्मृतित्वादित्याशंकानिषेधति। न चेति॥

स्फोटस्य जगद्धेतुत्वार्थं नित्यत्वमाह। तस्य चेति। तस्य चेति। ननु तदेवेदं पदमिति प्रत्यभिज्ञाभ्रमः उदात्तादिभेदप्रत्ययादित्यत आह। भेदेति। आ
चार्यसंमतमोक्षिपृथ्व्येकं शिक्षेतयति। वर्णाभिवेति। वर्णातिरिक्तस्फोटात्मकशब्दस्यानुभयानारोहादित्यर्थः। सादृश्यदोषादिपं भ्रांतिरिति शंकते। सा
दृश्यादित्ति। वयमार्तंतरं तएवेमेके शब्दा इति धीभ्रांतिरितिपुरुः। भेदधीविरोधात्। सत्रवायं वर्ण इति धीस्तु प्रमैव बाधकाभावादित्याह। नेति। गोत्वादिप्रत्यभि

तस्य च प्रत्यक्षोच्चारणं प्रत्यभिज्ञाप्रमाणत्वान्नित्यत्वं। भेदप्रत्ययस्य वर्णविषयत्वात्। तस्मात् नित्याच्छब्दात् स्फोटरूपात् अभिधायकात् क्रियाकारक
फलत्वस्वरूपं जगदभिधेयम् अभूत् प्रभवतीति॥ वर्ण एव तु शब्द इति भगवानुपवर्षः॥ ननु तस्य प्रध्वंसित्वं वर्णानामुक्तं। तत्र॥ तस्येति प्रत्यभिज्ञा
ता सादृश्यात्प्रत्यभिज्ञानं केशादिष्विवेति चेत्तन्न। प्रत्यभिज्ञा न स्वप्रमाणान्तरेण बाधानुपपत्तेः। प्रत्यभिज्ञानमाकृतिनिमित्तमिति चेत् न व्यक्ति
प्रत्यभिज्ञानात्। यदि हि प्रत्यक्षोच्चारणं गवादिव्यक्तिवदभ्यासे वर्णव्यक्तयः प्रतीयेरंस्ततस्त्वाकृतिनिमित्तं प्रत्यभिज्ञानं स्यात्। न त्वेतदस्ति॥ वर्ण
व्यक्तयः एव हि प्रत्यभिज्ञायन्ते। द्विर्गोशब्द उच्चारित इति हि प्रतिपत्तिर्न तु द्वौ गोशब्दाविति। ननु वर्णा अप्युच्चारणभेदेन भिन्नाः प्रतीयन्ते देवदत्तय
ज्ञदत्तयोः अध्ययनध्वनिश्रवणादेव भेदप्रतीतेरित्युक्तं॥

तावत् वर्णेषु प्रत्यभिज्ञा गत्वादिविषयेति शंकते। प्रत्यभिज्ञानमिति व्यक्तिभेदे सिद्धे प्रत्यभिज्ञाया जातिविषयत्वं स्यात् यत्त्वपापीतं ज्ञात्वा तदेवमपा
पीतमित्यादौ। तत एव व्यक्तिभेदः सिद्धः इति परिहरति। नव्यक्तीति। न त्वेतदिति। प्रत्यक्षत्वेन प्रत्यभिज्ञानमित्यर्थः। उदात्तत्वादिविरुद्धधर्मवत्त्वात् व्यक्ति
भेदोऽनुमानसिद्ध इत्यनुवदति। नन्विति॥

भेदप्रत्ययस्य कुंभकुंभकाराद्भेदप्रत्ययवदौपाधिकभेदविषयत्वादन्यथासिद्धेः अनन्यथासिद्धस्यैकत्वप्रत्यभिज्ञानिरपेक्षस्वरूपालं
बनया बाध इत्युत्तरमाह अत्रेति तालवादिदेशैः कोष्ठस्थवायुसंयोगविभागाभ्यां विचित्राभ्यां व्यंग्यत्वात् वर्णेषु वैचित्र्यधीरित्यर्थः कल्पतां गौर
वाद्यवर्णेषु स्वतो भेदो नास्तीत्याह । अपि चेति । अनंताः गकारादिव्यक्तयस्तासु प्रत्यभिज्ञानार्थं गत्वादिजातयस्तासु चोदात्तत्वादिभेदस्यौपाधिक
त्वमिति कल्पनाद्वरं वर्णैक्यमिति । भेदमात्रस्यौपाधिकत्वकल्पनमिति व्यक्त्यानंत्यस्य जातीनां च कल्पनमयुक्तमित्यर्थः । ननु भेदस्य बाधकाभावा
त्प्राभिधीयते । स्वतिवर्णविषये निश्चिते प्रत्यभिज्ञाने संयोगविभागाभिव्यंग्यत्वाद्वर्णानामभिव्यंजकवैचित्र्यनिमित्तोयं वर्णविषयो विचि
त्रः प्रत्ययो न स्वरूपनिमित्तः । अपि च वर्णव्यक्तिभेदवादिनापि प्रत्यभिज्ञानसिद्धये वर्णकृतयः कल्पयितव्याः । तासु परोपाधिको भेदप्रत्य
य इत्यभ्युपगंतव्यं । तद्वरं वर्णव्यक्तिष्वेव परोपाधिको भेदप्रत्ययः स्वरूपनिमित्तं च प्रत्यभिज्ञानमिति कल्पनालाघवं एवं सर्वस्य च वर्णविषय
स्य भेदप्रत्ययस्य बाधकः प्रत्येकं प्रत्यभिज्ञानं । कथं तर्ह्येकस्मिन्काले बहूनामुच्चारयतामेकरूपस्य सतः गकारो युगपदनेकरूपः स्यात् । उदा
त्तश्चानुदात्तश्च स्वरितश्च सानुनासिकश्च निरनुनासिकश्चेति । अपर्यायनिष्कृतोयं प्रत्ययभेदो न वर्णकृत इत्यदोषः ॥ छ ॥
ननौपाधिकत्वमित्यत आह ॥ एकत्व इति । अस्तु तर्हि प्रत्ययद्वयप्रामाण्याय भेदाभेदयोः सत्यत्वं तत्राह । कथं हीति । उभयोरेकत्राविरोधात् भेदस्यौपा
धिकत्वमेवेत्यर्थः । ननु वायुसंयोगादेरतींद्रियत्वात् तत्कृतवैचित्र्यस्योदात्तत्वादेर्वर्णेषु प्रत्यक्षारोपः संभवतीत्यरुचिबीजं स्पष्टयन् स्वमतमाह । अथवे
ति । ध्वनिधर्मा उदात्तत्वादयो भ्रमभेदाध्यासाद्वर्णेषु भांतीत्यर्थः

स्फ़.भा.

३२ प्रसङ्गादेकं ध्वनिस्वरूपमाह। क इति। अवतरति सध्वनिरिति शेषः। वर्णातिरिक्तः शब्दो ध्वनिरित्यर्थः। समीपं गतस्य पुंसः स्फारत्वं दूराद्ध्वनिमात्र
स्वगतान्त्रीषु स्वरवतो वर्णानुपलभते इत्याह। प्रत्यासीदतः श्रोतुः आदिपदं विवृणोति। तदिति। नन्वस्मिन्पक्षे वर्णस्वरूपध्वनिर्नातिरिक्त इत्यत आह। वृणानामिति
सुवर्णाशे वर्णाश्चानुवर्तन्ते ध्वनिरभिव्यज्यत इति भेदइत्यर्थः। अन्यथा वाचिके जपे वर्णोपांशु अश्रवणेपि ध्वनिबुद्धिः स्यात्। इदं धात्वादिध्वनौ शब्दत्वमात्रेण ग्रहणमा
त्रेण गमको वर्णादिरिति धीः स्यादिति मंतव्यं। एवं ध्वनेरुपाधिकं स्वरूपमतेन तत्र स्वरत्वं सोपाधिकत्वेन नोक्तम् इदं दर्शयति। एवं चेत्यादिना। अस्तु को

ऽपि ध्वनिर्नामयो दूरादाकर्ण्यते वर्णविवेकमप्रतिपद्यमानस्य कर्णपथमवतरति। प्रत्यासीदतश्च पटुस्फुटा स्फुटभेदवर्णाशंसनपति
तन्निबंधनाश्चौदात्तादयो विशेषा न वर्णस्वरूपनिबंधनाः। वर्णानां प्रत्युच्चारणं प्रत्यभिज्ञायमानत्वात्। एवं च सति सालंबनादात्तादिभ्रमा
भविष्यंति। इतरथाहि वर्णानां प्रत्यभिज्ञायमानानां तिभेदत्वात् संयोगविभागकृतत्वाद्दात्तादिविशेषाः कल्प्येरन्। संयोगविभागानां चाप्रत्यक्षत्वात्
न तद्गतधर्माविशेषाः वर्णेष्वध्यवसितुं शक्यंते इत्यतो निरालंबना एवैते दात्तादिप्रत्ययाः स्युः। अपिचनैवैते तद्भिन्निबंधना उदात्तादिभेदेन व
र्णानां प्रत्यभिज्ञायमानानां भेदो भवेदिति। नह्यन्यस्य भेदेऽन्यस्याभिद्यमानस्य भेदो भवितुमर्हति। नहि व्यक्तिभेदेन जातिर्भिन्ना भवेत्॥ ॥

दृष्टान्तमाह॥ संयोगेति॥ वायुसंयोगादेरुदात्तादित्यर्थः। तस्मात् वर्णध्वनिरेवोदात्तत्वादिरूपोपाधिरिति भावः। एवं विरुद्धधर्मकध्वनीनां भे ३२
देऽपि तद्गतधर्मा वर्णेष्वारोप्यन्त इत्याह। तदेवं दर्शयन्नुपपादयति। अपिचेति। यथा एवं दृष्टांतश्च विरुद्धनैकरूपत्वं ध्वनिसंयोगत्वं तथा ध्वनिषु वर्णाश्रमिव
एवेत्यर्थः। उदात्तादिध्वनिस्तद्भेदेन हेतुना वर्णानां भवतीति यो ज्ञानात्प्रत्यभिज्ञा विरोधादिरुक्तेत्यर्थः। यद्वा उदात्तत्वादिभेदे विशिष्टतया प्रत्यभिज्ञायमाना न त्वा

हणिनां भेद इत्याशंक्य दृष्टान्तेन निरस्यति। अपिचेति

वर्णानां स्थापितत्वं ब्रह्मणाध्याते षामेव वाचकत्वं वक्तुं स्फोटं विघटयति। वर्णेभ्यश्चेति। कल्पना न स्यादनुमानः शंकते नेति। यस्तु पादर्वणप्रयुक्तायां बुद्धौ
मुखवत् श्रोत्रेण वर्णप्रयुक्तायां बुद्धौ विनैव हेत्वंतरं स्फोटः प्रत्यक्षः इत्याह। स्फुटितीति॥ अस्यां संविदि पौर्वापर्यं भासते सा तत्र प्रमाणी। एकं पदमिति बुद्धौ व
र्णा एव स्फुरंति नातिरिक्तः स्फोट इति न त्वा स्फोटे प्रमाणाभिलाह॥ नास्याश्चपीत्यादिना। ननु गौरयं बुद्धेः स्फोटो विषयो गकारादीनां तु व्यंजकत्वा

वर्णेभ्यश्चार्थप्रतीतेः संभवात् स्फोटकल्पनानर्थिका। नकल्पयाम्यहं स्फोटं प्रत्यक्षमेवत्वेनमवगच्छामि। एकैकवर्णग्रहणाहितसंस्कारायां
बुद्धौ स्फुटिति प्रत्यवभासनादिति चेत् न। अस्या अपि बुद्धेर्वर्णविषयत्वात्। एकैकवर्णग्रहणोत्तरकालीना हि यमेका बुद्धिर्गौरिति समस्त
वर्णविषया नार्थांतरविषया। कथमेतदवगम्यते। यतोस्यामपि बुद्धौ गकारादयो वर्णा अनुगम्यंते न तु दकारादयः। यदि ह्यस्याः बुद्धेर्गकारादि
भ्योर्थांतरं स्फोटो विषयः स्यात् ततो दकारादय इव गकारादयोप्यस्या बुद्धेर्व्यावर्तेरन्। तस्मादियमेकबुद्धिर्वर्णविषयैव स्मृतिः। नन्वनेकत्वाद्व
र्णानां नैकबुद्धिविषयतोपपद्यत इत्यत आह। प्रतिभानः। संभवत्यनेकस्याप्येकबुद्धिविषयत्वं। पंक्तिर्वनं सेनादशशतं सहस्रमित्यादिदर्शना
त्॥

दनुवर्तितिरिस्पत आह। यदि हीति। व्यंग्यवद्धि बुद्धौ व्यंजकधर्मस्यानुवृत्तेरदृष्टो नादित्यर्थः। वर्णसमूहालंबनत्वोपपत्तेर्न स्फोटः कल्पनीयः।
पदेर्थांतरकल्पना गौरवादित्याह। तस्मादिति। अनेकस्याप्यौपाधिकमैकत्वमुक्तमित्याह। संभवतीति॥ ॥ ॥

ननु तत्रैकदेशादिरूपाधिरस्ति प्रकृते क उपाधिरित्यत आह। पातिति। एकार्थप्रत्यायकत्वेनैकपदं प्रधानार्थोपस्थितौ एकस्मिन्नर्थे तात्पर्यमेव देकं वाक्यमिति लोकानां संबंधादे
कलोपचारः सर्व्वः। नन्वेकं रूपदलत्वे प्रत्येकार्थज्ञानजनकत्वमित्युच्यते तदिलन्तो मार्ग्यपद इतिवाच्यं। इत्तमध्यस्थानां क्रमेणी स्वरूपेण श्रवणानंतरं बालस्यैकस्फ
ोटरूपाननामधानत्व इत्युक्तमपचसादिलिंगानुमितेनकार्यधीहेतुत्वनिश्चये सत्येकपदवाक्यत्वनिश्चयमात। वर्णाश्चापि पदभेदद्दष्टेवर्णातिरिक्तं पदं स्फोटाख्य

मानुमौ रिसेकोपदशाद्य इति वुद्धिः सा वस्तुष्वेवगतौ गुरुकार्याव्यवच्छेदनिबंधनोपचारिकी। वनसेनादिवुद्धिवदेव। अत्राह। यदि वर्णा एव सामस्त्ये
नैकवुद्धिविषयतामापद्यमानाः पदं स्युः ततो जारारा जाकपिः पिकइत्यादिषु पदविशेषप्रतिपत्तिर्नस्यात्। तएव हि वर्णा इतरत्र चेतरत्र च समस्त
वुभाः सत्त्व इत्यत्र व हानः। समस्तपि समस्तवर्णानुभवजन्यसंस्कारपर्यायाः क्रमानुरोधित्वएव पिपीलिकाः पंक्तिवुद्धिमारोहंत्सेवं क्रमानुरोधिन एव वर्णाः पद
वुद्धिमारोहंतीति न त्ववर्णानामविशेषोपि क्रमविशेषकृता पदविशेषप्रतिपत्तिर्नविरुध्यते। लोकव्यवहारे चेमे वर्णाः क्रमानुगृहीता गृहीतार्थवि
शेषसंबंधाः संतः स्वव्यवहारेष्वेकैकवर्णग्रहणानंतरं समस्तव्यवमर्शिन्यां वुद्धौ तादृशा एव प्रत्यवभासमानाः तं तमर्थमव्यभिचारेण प्रत्याययि
ष्यंतीति। ३२

संगीकार्यमितिशंकते। अन्यथेति। क्रमभेदादृष्टौ वेवपदभेदद्दष्टिरितिपरिहरति। अत्रेति। ननु निरवयवानां वर्णानां क्रमः कथं वा पदत्व
स्य ज्ञाने नार्थधीहेतुत्वं तत्राह। बुद्धेति। उत्पत्तिदशायामनुच्चारणक्रमेणोपलब्धिक्रममनुपलभ्यमाना वर्णाः पश्चात्तेषु तेषु वर्णेषु तत्क्रमेणैव तत्संस्कारवंतएत
द्रूपेणज्ञाता इति गृहीताः संतः श्रोतुः प्रवृत्तिकाले तथैव स्मृत्यारूढाः स्वस्वार्थं वोधयंतीत्यर्थः।

स्फोटापि वर्णवादमुपसंहरति। वर्णेति। इत्थं वर्णानामर्थबोधकत्वं अदृष्टः स्फोटः। संप्रति वर्णानामस्थिरत्वमंगीकृत्य प्रौढिवादेन स्फोटं विघटयति
अथापीति। स्थिराणि गत्वा दिसामान्यानि क्रमविशेषवन्ति गृहीतसंगतिकान्यर्थबोधकानीति कुत्रैवसामान्येषु शक्तिः संचारयितव्या॥ ननु कृतः
कल्पनीयद्वस्यर्थः। वर्णानां स्थायित्ववाचकत्वयोः सिद्धौ फलितमाह। ततश्चेति। एवं तंत्रकृतानुवादपूर्वकं सूत्रं व्याचष्टे। कर्तुरित्यादिना एवं तंत्रसिद्ध
वर्णवादिनो लघीयसी कल्पना। स्फोटवादिनस्तु दृष्टहानिरदृष्टकल्पना॥ वर्णाश्चैते क्रमेणाभ्यस्यमानाः स्फोटं व्यंजयंति॥ स स्फोटोऽर्थं व्यनक्ती-
ति गौरवमती कल्पनास्मात्। अथापि नाम स्फुटोच्चारणमन्ये नैव वर्णाः स्युस्तथापि प्रत्यभिज्ञालंबनभावेन वर्णसामान्यानामवश्यमभ्युपगंतव्यत्वात्
ना वर्णो पूर्वं प्रतिपादनशक्तिः संचारयितव्या॥ ततश्चानित्येभ्यः शब्देभ्यो देवादिव्यक्तीनां प्रभवइत्यविरुद्धं॥ अत एव च नित्यत्व
स्य तंत्रस्य कर्तुरस्मरणादिभिः स्थिते वेदस्य नित्यत्वे देवादिव्यक्तिप्रभवाभ्युपगमे तत्स्य विरोधमाशंक्यातः प्रभवादिति परिहृत्येदानीं तदेव वेद
नित्यत्वं स्थितं द्रढयति अत एव च नित्यत्वमिति। अत एव नियतानुकृतेर्देवादेर्जगतो वेदशब्दप्रभवत्वादेव वेदशब्दनित्यत्वमपि प्रत्येतव्यं। तथा च मंत्र-
वर्णः। यज्ञेन वाचः पदवीयमायन्। तामन्वविंदन्नृषिषु प्रविष्टामिति। स्थितामेव वाचमनुविन्नां दर्शयति। वेदव्यासस्तथैव मेव स्मरति। यु-
गांतेंतर्हितान्वेदान्सेतिहासान्महर्षयः। लेभिरे तपसा पूर्वमनुज्ञाताः स्वयंभुवा इति॥ ॥ ॥ ॥ ॥

ननु वेदस्य नित्यत्वं देवादिव्यक्तिसृष्टौ तद्वाचकशब्दस्यापि सृष्टेरसिद्धमित्यादौ स्वनित्यतापि तद्वाचकाच्छब्दात् व्यक्तिजन्मेत्यसांकेतिकत्वं निरस्य
वेदोऽवांतरप्रलयाव्यवस्थायी जगद्धेतुत्वादित्यवेदित्यनुमानेन द्रढयतीत्यर्थः। यज्ञेनेत्युक्तेन वाचो वेदस्य तामागमोपपत्ताः संतोपासिका
तामृषिषु स्थितां लब्धवंत इति मंत्रार्थः। अनुविन्नामुपलब्धां पूर्वमवांतरकल्पादौ॥ ॥ ॥ ॥

स॰भा॰ ननु महाप्रलये जातेरप्यसत्त्वात् शब्दार्थसंबंधानित्यत्वं इत्याशंकामाह। समानेति। सत्र निरसनाशंकामाह। अथापीति। व्यक्तिसंततजातीनां अवां
तरप्रलयेसत्त्वात् संबंधस्तिष्ठति व्यवहाराविच्छेदात् ज्ञायते चेति किंतु सानपेक्षत्वेन प्रामाण्येन कश्चिद्विरोधः स्यात्। निर्लेपप्रलये तु संबंधनाशात् पुनः
३४ सृष्टौ केनचित्पुंसा संकेतः कर्तव्य इति पुरुषबुद्धिसापेक्षत्वेन वेदस्य प्रामाण्यं अध्यापकस्याप्यभावस्य नाशादाश्रितस्यानित्यत्वं च प्राप्नोति सर्वैः। महा
प्रलयेपि निर्लेपप्रलयोऽसिद्धः सत्कार्यवादात्। तथा च संस्काराणां अनाशाच्छब्दार्थतत्संबंधानां सतामेव पुनः सृष्टावभिव्यक्तेर्नित्यत्वं। अभिव्यक्तानामपि
समाननामरूपत्वाच्चावृत्तावप्यविरोधो दर्शनात्स्मृतेश्च॥ अथापि सत्त्वात्। यदि पश्वादिव्यक्तिवत् देवादिव्यक्तयोपि संततैवोत्पद्येरन् निरुध्ये
रंश्च ततोभिधानाभिधेयाभिधातृव्यवहाराविच्छेदात्संबंधनित्यत्वेनाविरोधः शब्दे परिह्रियेत। यदा तु खलु सकलं त्रैलोक्यं परित्यक्तनामरूपं
निर्लेपं प्रलीयते प्रभवति चाभिनवमिति श्रुतिस्मृतिवादा वदंति। तदा कथमविरोध इति॥ तत्रेदमभिधीयते। समाननामरूपत्वादिति। त
दापि संसारस्यानादित्वं तावदभ्युपगंतव्यं। प्रतिपादयिष्यति चाचार्यः। संसारस्यानादित्वमुपपद्यते चाप्युपलभ्यते चेति। अनादौ च संसारे यथा
स्वापप्रबोधयोः प्रलयप्रभवश्रवणेपि पूर्वप्रबोधवदुत्तरप्रबोधेपि व्यवहारान्न कश्चिद्विरोधः। एवं कल्पांतरप्रभवप्रलययोरपीति द्रष्टव्यं ॥
वैकल्पीयनामरूपसमानत्वात् तत्संकेतः केनचित्कार्यः विषमसृष्टौ हि संकेतापेक्षा न तु तुल्यसृष्टाविति परिहरति। तत्रेदमित्यादिना। नन्वाद्य ३४
सृष्टौ संकेतः कार्य इत्यत आह। तदापीति। महासर्गेप्युत्तमावृत्तावपीत्यर्थः। तत्त्वस्त्वनादिसंसारे संबंधस्यानादित्वं तथापि महाप्रलये व्यव
धानात् अस्मरणे कथं वेदार्थव्यवहारस्तत्राह अनादौ चेति न कश्चिद्विरोधः शब्दार्थसंबंधस्मरणादिरिति शेषः ॥ ॥

स्वापप्रबोधयोर्लयसर्गासिद्धिमाशंक्य श्रुतिमाह। स्वापेति। अथ यदा सुषुप्तौ प्राणे परमात्मनि जीव एकीभवति एनं प्राणं सजीवस्तदेतिशेषः।
एतस्मात्प्राणात्मनः आयतनं गोलकं आनंतर्ये पंचमी प्राणे एवेडाघा द्रष्टव्या। स्वप्नवत्कल्पितस्याप्यात्मसत्त्वाभावात् दर्शनं स एव शिष्टः अदर्शनं ल

स्वापप्रबोधयोश्च प्रलयप्रभवौ श्रूयेते। यदा सुप्तः स्वप्नं न कंचन पश्यत्यथास्मिन्प्राण एवैकधा भवति। तदैनं वाक् सर्वैर्नामभिः स
हाप्येति चक्षुः सर्वै रूपैः सहाप्येति। श्रोत्रं सर्वैः शब्दैः सहाप्येति मनः सर्वैर्ध्यातैः सहाप्येति। श्रोत्रं सर्वैः शब्दैः सहाप्येति मनः सर्वैर्ध्यातैः स
हाप्येति। स यदा प्रतिबुध्यते यथाग्नेर्ज्वलतः सर्वा दिशो विस्फुलिंगा विप्रतिष्ठेरन्नेवमेवैतस्मादात्मनः सर्वे प्राणा यथायतनं विप्रतिष्ठंते प्रा
णेभ्यो देवा देवेभ्यो लोकाः इति। स्यादेतत्। स्वापे पुरुषांतरव्यवहाराविच्छेदात् स्वयं च सुप्तप्रबुद्धस्य पूर्वप्रबोधव्यवहारानुसंधानसंभवाद्वि
रुद्धं। महाप्रलये तु सर्वव्यवहारोच्छेदात् जन्मांतरव्यवहारवच्च कल्पांतरव्यवहारस्याननुसंधातुमशक्यत्वात् वैषम्यं इति। नैष दोषः सत्यपि
सर्वव्यवहारोच्छेदे निमहाप्रलये परमेश्वरानुग्रहादीश्वराणां हिरण्यगर्भादीनां कल्पांतरव्यवहारानुसंधानोपपत्तेः। यद्यपि प्राकृताः प्रा
णिनो न जन्मांतरव्यवहारमनुसंदधानाः दृश्यंत इति॥ तथापि न प्राकृतवदीश्वराणां भवितव्यं॥ ॥ ॥ ॥

यः इति दृष्टिसृष्टिपक्षः श्रुत्यभिप्रेत इति भावः। दृष्टांतवैषम्यमाशंक्य परिहरति। स्यादित्यादिना। अविरुद्धमनुसंधानादिकमिति शेषः। हिरण्य
गर्भादयः एव कल्पानुसंधानसमर्थाः संसारिणां दृष्टादि विहत्याशंक्याह। यद्यपीति। इति यद्यपि तथापि न प्राकृतवदिति योजना॥ ॥

स्कं॰ भा॰

३५ ज्ञानादेर्निकृष्टवद्बलकर्मोपपत्तिः कार्यः बाधाभावादिति मायानुगृहीतश्रुत्यादिभिः स्वमात्मनो दृष्टानुमानं वा ध्यमिसाह। यथाहीत्यादिनाननुत याधिपूर्वकल्पेश्वराणां सुकृतादृष्टम्लिन् कल्पे को नुसंधाते मत आह। तत श्चेति ज्ञानाद्युत्कर्षादित्यर्थः। प्रकृत्यो स्येनुसंधाता इति भावः परमेश्व रानुगृहीतानां ज्ञानातिशये श्रुतिस्मृतिवादानाह। तथा चेति। एवं कल्पादौ सृजति तस्मै ब्रह्माणी प्रहिणोति गमयति तस्य बुद्धौ वेदानाविर्भाव

यथा हि प्राणिनां विशेषेपि मनुष्यादित्वं नृपर्यंतेषु ज्ञानैश्वर्यादिप्रतिर्बंधः परे णापरेण भूयान् भवन् दृश्यते। तथा मनुष्यादिष्वेव हिरण्य गर्भपर्यंतेषु ज्ञानैश्वर्याभिव्यक्तिरपि परेणापरेण भूयसी भवतीत्येतत् श्रुतिस्मृतिवादेष्वसकृदनुश्रूयमाणं न शक्यं नास्तीति वदितुं ॥ ततश्चातीतकल्पानुष्ठितप्रकृष्टज्ञानकर्मणामीश्वराणां हिरण्यगर्भादीनां वर्तमानकल्पादौ प्रादुर्भवतां परमेश्वरानुगृहीतानां सुप्तप्र तिबुद्धवत्कल्पांतरव्यवहारानुसंधानोपपत्तिः॥ तथा च श्रुतिः॥ यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै तं ह देवमात्मबु द्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये इति। स्मरंति च शौनकादयो मधुच्छंदःप्रभृतिभिर्ऋषिभिर्दाशतय्यो दृष्टा इति। प्रतिवेदं चैवं मंत्रकांड

ब्राह्मणद्रष्टारः स्मर्यंते॥

पतिपः तंदेवं स्वात्माकारं महापापेभ्यो लंबुद्धेः प्रकाशमानं शरीरवत् कमलासनमचष्ट तं निःश्रेयसरूपमहं प्रपद्ये इत्यर्थः॥ न केवलमेक स्यैव ज्ञानाति शयः किंतु बहूनां तत्रास्त्यातप्रपद्यंमानमित्यभिप्रायेणाह स्मरंतीति। ऋग्वेदे दशमंडलानि यस्य स तथोक्तः तत्र भवा ऋचो दाशतय्यः वेदांतरेपि कांडस्य कर्मजं णं दृष्टा ऐवो भ्रामनादिभिः स्मृता इत्याह ॥ प्रतीति ॥ ३५

किंच मंत्राणां ऋष्यादिज्ञानावश्यकत्वज्ञापिकां श्रुतिं मंत्रदृग्भ्योऽणां ज्ञात्वा तिदर्शयं दर्शयतीत्याह। श्रुतिरपीति। आर्षेयं ऋषिसंयोगः छंदो गायत्र्यादि दै-
वतमग्न्यादि ब्राह्मणं विनियोगः एतान्यविदितानि यस्मिन्मंत्रे तेनेत्यर्थः स्याणुं स्थाणुं वर्त्तं नरकं तथा च तानाधिकैः कस्तां तरितवे रस्य ब्राह्मणं व्यवहारस्यश्रव-
णीतत्वात् वेदस्यानादित्वमनपेक्षत्वं चाविरुद्धमिति भावः। अधुना समानन्नामरूपत्वं प्रपंचयति। शाखानां चेति। ततः किं तत्राह। दृष्टेति। ऐहिकामुष्मिक-
विषयसुखरागकृतधर्मस्य फलं पश्वादिकं दृष्टपश्वादिसद्भावमिति कृत्वं विसदृशो कामाभावे नहेत्वभावात्। तथा दृष्टदुःखद्वेषकृताधर्मफलं दृष्टसद्

श्रुतिरप्यृषिज्ञानपूर्वकमेव मंत्रेणानुष्ठानं दर्शयति। यो ह वा अविदितार्षेयछंदोदैवतब्राह्मणेन मंत्रेण याजयति वाध्यापयति वा स्थाणुं वर्छ-
ति गर्तं वा पद्यते इत्युपक्रम्य तस्मादेतानि मंत्रे विद्यादिति। शाखानां च सुखप्राप्त्यर्थो धर्मो विधीयते दुःखपरिहाराय चाधर्मः प्रतिषिध्यते। दृष्टानु-
श्रविकसुखदुःखविषयौ च रागद्वेषौ भवतो न विलक्षणविषयाविति तौ धर्माधर्मफलभूतो जगत्सृष्टिर्निष्पद्यमाना पूर्वसृष्टिसदृश्येव निष्प-
द्यते। स्मृतिश्च भवति। तेषां ये यानि कर्माणि प्राक्सृष्ट्यां प्रतिपेदिरे। तान्येव ते प्रपद्यंते सृज्यमानाः पुनः पुनः। हिंस्राहिंस्रे मृदुक्रूरे धर्माधर्माव-
नृतानृते। तद्भाविताः प्रपद्यंते॥

दुःखमेव न सुखं कृतहान्यादिदोषापत्तेरित्यर्थः तर्हि किं तेषां मानमाह। स्मृतिश्चेति। इत्तरसृष्टिः पूर्वसृष्टिसजातीया कर्मफलत्वात् पूर्वसृष्टिवत् इ-
त्यनुमानं चात्रार्थः। तेषां प्राणिनां मध्ये तान्येव ते जात्यतीयान्येव तानि दर्शयन् तत्स्माद्धेतुमाह। हिंस्रेति। कर्माणि विहितानि निषिद्धानि कारणपूर्ववि-
पाकेन संस्कारं व्यंजयंति। तत्रापूर्वाख्यकर्मभुक्तौ संस्कारभावितत्वात् पुनस्तज्जातीयान्यनिकरोतीत्यर्थः॥ ॥ ॥

संस्कारे लिंगमाह। तस्मादिति। संस्कारवशाद्धर्मपुण्यं पापं वा रोचते। ततोऽभिरुचिलिंगम् पुण्यापुण्यसंस्कारोऽनुमेयः स एव स्वभावः प्रकृतिर्वासनेति च
जीयते। एवं कर्मणामहेतुत्वमुक्त्वा स्वोपादाने लीनकार्यसंस्काररूपशक्तिमत्वादपि सा हेतुरित्याह। प्रतीयमानमिति। इतरथा निःसंस्कारप्रल
येऽनन्तरगर्भे चित्रस्याकस्मिकत्वं स्यादित्यर्थः। ननु तर्हि वैचित्र्यकारिणोऽन्याः शक्तयः कल्प्यन्तां तत्राह। नचेति। अविद्यायां लीनकार्यात्मकसंस्कारादन्याः
शक्तयो न कल्प्याः। मानाभावाद्गौरवाच्च। स्वोपादाने लीनकार्यरूपशक्तिस्तु महाप्रलये धर्मित्वेन तिष्ठति च हृष्ट्वा सोऽपि तिष्ठन्तीति ह्यतो विघातकाभावे दृश्याः
तस्मात्तत्तत्परोचत इति। प्रतीयमानमपि चेदं जगच्छक्तिविशेषमेव प्रलीयते। शक्तिरूपमेव च प्रभवतीतरथाऽकस्मिकत्वप्रसंगात्। नचाने
काकारणः शक्तयः शक्ताः कल्पयितुं। ततश्च विच्छिन्नविच्छिन्नप्रादुर्भवतां महदादिलोकप्रवाहाणां देवतिर्यङ्मनुष्यलक्षणानां च प्राणिनिकायप्र
वाहाणां वर्णाश्रमधर्मफलव्यवस्थानां वानादेः संस्कारैर्नियतत्वमिन्द्रियविषयसर्वं धनिमतत्त्ववस्थितेत्यर्थं॥ ॥ ॥ ॥

शक्तयोऽनन्तेति आत्माविधैवतः शक्तिरिति सिद्धान्ततदर्थः। निमित्तेष्वप्युपादानस्थं कार्यमेवाविद्यावशान्तया शक्तिरस्याऽव्यक्तताग्रहः। उपादानेकार्य
संस्कारसिद्धेः फलमाह। ततश्चेति। अपायस्थितिस्तस्यैव च सजातीयमेव च सजातीयतेतद्रूपजातीयमेव क्षणिकानिरासादिकं भोग्यालोकाभोगा
श्रयाः प्राणिनिकायाभोगहेतुकर्माणि संस्कारबलात्पूर्वलोकादितुल्यान्येवेति नियमइत्यर्थः। निकायाः समूहाः॥ ॥

दृष्टं तासिद्धमार्शीत्याह। नहीति। यथा पूर्वं दुःखसमनन्तरो साधारणविशेषो नास्ति सुखादेः साक्षिवेद्यत्वात्। तथा व्यवहारान्यथात्वमदृष्टमित्यर्थः। घट
मिदृष्टेन दृष्टस्य बाधा सम्भवतीत्यर्थः। उक्तमर्थं संक्षिपति। अतश्चेति। व्यवहारसाम्यात्तत्संभवात्तत्प्रवाहरूपमनादिभागमरूपः समानो वेदेत्यर्थः। सूत्रं योजयति। स
मानेत्यादिना। आवृत्तिरुत्पत्तिः। समानो कामयमानोऽग्निः। अन्नादोऽग्निरहं स्यामिति कामयित्वा कृत्तिकान्नक्षत्राभिमानिदेवताभ्योऽष्टसु कपालेषु पक्तव्यं हविर्निरूप्तवानि

नहि दृष्टविषयसंबंधादेर्व्यवहारस्य प्रतिसर्गमन्यथात्वं चेष्टुं दृष्टविपर्ययकल्पनं शक्यमुत्प्रेक्षितुं। अतश्च सर्वकल्पानां तुल्यव्यवहारत्वात्कल्पां
तरव्यवहारानुसंधानक्षमत्वाच्चेश्वराणां समाननामरूपा एव प्रतिसर्गं विशेषाः प्रादुर्भवंति। समाननामरूपत्वाच्चावृत्तावपि महासर्गमहाप्रलय
लक्षणायां जगतोऽभ्युपगम्यमानायां न कश्चिच्छब्दप्रामाण्यादिविरोधः॥ समाननामरूपतां च श्रुतिस्मृती दर्शयतः। सूर्याचंद्रमसौ धाता यथापू
र्वमकल्पयत्। दिवं च पृथिवीं चांतरिक्षमथो स्वरिति। यथा पूर्वस्मिन्कल्पे सूर्याचंद्रमःप्रभृति जगत्क्लृप्तं तथास्मिन्नपि कल्पे परमेश्वरोऽकल्पय
दित्यर्थः। तथाऽग्निर्वा अकामयत अन्नादो देवानां स्यामिति। स एतमग्नये कृत्तिकाभ्यः पुरोडाशमष्टाकपालं निरवपदिति नक्षत्रेष्टिविधौ योऽग्नि
र्निरवपद्यस्मै वाऽग्नये निरवपत्तयोः समाननामरूपतां दर्शयतीत्येवंजातीयका श्रुतिरिहोदाहर्तव्या॥ ॥ ॥ ॥

त्यर्थः। नक्षत्राभिमानिदेवतात्वेन वचनं। ननु यजमानोऽग्निर्भावी तदुद्देश्योऽग्निर्वा समाननामरूपः कल्पांतरे भवतीत्येवं रूढो वाक्यकामयतवि इत्युक्तेर
कामयतेत्यत्रापि तथा वर्तमानतरत्वमस्मिन्नरविषियुरुद्ध्योरधिकारिपुरुषत्वमतमोर्जगत्कारणत्वश्रवणात्। एकस्य रूढेनेति एको विद्यु
रित्यादिश्रुतिस्मृत्यविरोधादिति

सू.भा. स्मृतौ वेदे दर्शयतीति विषयसप्तमी। शर्वर्यंते प्रलयांते ऋतूनां वसंतादीनां लिंगानि नवपल्लवादीनि। पर्यये घटीयंत्रवदावृत्तौ भावाः पदार्थास्तुल्या इति शे
३७ षः। तस्माज्ज्ञानैश्वर्यवद्विग्रहांगीकारेपि कर्मणि शब्दविरोधाभावात् देवानामस्ति विद्याधिकार इति स्थितं तमाक्षिपति। मध्वादिष्विति। ब्रह्मविद्यादे

स्मृतिरपि॥ ऋषीणां नामधेयानि याश्च वेदेषु दृष्टयः॥ शर्वर्यंते प्रसूतानां तान्येवैभ्यो ददात्यजः॥ यथर्तुष्वृतुलिंगानि नानारूपाणि पर्यये॥ दृ
श्यंते तानि तान्येव तथा भावा युगादिषु। यथाभिमानिनोतीतास्तुल्यास्ते सांप्रतैरिह॥ देवा देवैरतीतैर्हि रूपैर्नामभिरेव चेति। एवंजातीयि
का द्रष्टव्या॥ मध्वादिष्वसंभवादनधिकारं जैमिनिः॥ इह देवादीनामपि ब्रह्मविद्यायामस्त्यधिकार इति यत्प्रतिज्ञातं तत्पर्यावर्त्यते। देवादी
नामनधिकारं जैमिनिराचार्यो मन्यते। कस्मात् मध्वादिष्वसंभवात्। ब्रह्मविद्यायामधिकाराभ्युपगमे हि विद्यात्वाविशेषात् मध्वादिविद्यास्व
प्यधिकारोभ्युपगम्येत। न चैवं संभवति कथमसौ वा आदित्यो देवमध्वित्यत्र मनुष्या आदित्यं मधुव्यपदेशेनोपासीरन्। देवादिषु ह्युपासके
ष्वभ्युपगम्यमानेष्वादित्यः कमन्यमादित्यमुपासीत॥ ॥ ॥ ॥

वादीन्नाधिकरोति विद्यात्वात् मध्वादिविद्यावदिति सूत्रार्थः। दृष्टांतं विवृणोति। कथमित्यादिना। द्युलोकमध्ववंशदंडेंतरिक्षरूपे मधुपये स्थि ३७
तस्यादित्यस्य देवानां मोदनान्मधुत्वमध्वित्यारोप्य ध्यानं कार्यं। तत्रादित्यस्याधिकारो न युक्तः। ध्यातृध्येयभेदाभावात् इत्याह॥ देवादिष्विति॥ ॥

ऋजुवत्यादीनां तत्र अधिकार इति। आङ्गिरसेनापि तत्र ध्येयत्वं स्यात् तत्रापि न ध्यातव्यमित्याह। पुनश्चेति॥ चतुर्वेदी कर्णाग्रे प्रणवश्चेति
वं चकुसुमानि तेभ्यः सोमादुन्मादिरक्तानि हृतानि लोहितशुक्लकृष्णपरः क्रमगोप्याख्यानि पंचाम्नातानि तत्तन्मंत्रभक्तैः आघ्राणपूर्वकं तपं चादिव
स्थितानि एतानि दिव्यानि स्मृतानि। ऋग्भिर्ध्येयरूपं छिद्ररूपमित्यादि मंडलमानीतानि पुरश्चरणे ऋग्भिर्वर्णितानि आत्मना परिणतानि पंचादिस्युस्थितेषु ला
दिभिरुपजीव्यानीति ध्यायतां वस्वादिसामिरुक्तोऽर्थः। सूत्रस्थादिपदार्थमाह॥ तत्राग्निरिति। आकाशो अनलश्चत्वारः पादाः। होतृकर्णौ ह्नेने

पुनश्चादित्यरूपाण्यपाणि पंचरोहितादीन्यमृतानुपक्रम्य वसवो रुद्रा आदित्या मरुतः साध्याश्च पंचदेवगणाः क्रमेण तत्तदमृतमुप
जीवन्ती सुपद्दिश्य सयत्न देवममृतं वेदेषु सलामयैको भूत्वाग्निरेव मुखेनैतदेवामृतं दृष्ट्वा तृप्यतीत्यादिना वस्वाद्युपजीव्यत्वमृतानि
विजानता वस्वादिमहिमप्राप्तिर्दर्शिता। वस्वाद्यमृतस्य ज्ञानमन्यस्वादीन्कृतोपजीविनो विजानीयुः कंवाद्यं वस्वादिमहिमानं प्रे
युः। तथाहि। पादो वा पुःपादस्त्वादित्यः पादोऽदितः पादो वा पुरुषीव संबर्ग आदित्यो ब्रह्मेत्यादेशदित्यादिषु देवतात्मोपासनेषु न तेषामेव दे
वतात्मनामधिकारः संभवति। तथैमावेव गौतमभरद्वाजावयमेव गोतमोऽयं भरद्वाज इत्यादिषु ऋषित्वविधिषूपासनेषु न तेषामेव ऋषी
णामधिकारः संभवति। कुतस्तदेवादीनामधिकारः॥
नेदनासिके एकादशाणि सप्त सप्तरश्मयस्तीरस्छेषु सप्तर्षिध्यानेकार्यमित्याह। तथेमावेवेति अयं दक्षिणः कर्णः गोतमो वामो
भरद्वाजः एवं दक्षिणनेत्रनासिके विश्वामित्रवशिष्ठौ वामे जमदग्निकश्यपौ वागत्रिरित्यर्थः। अत्रऋषीणां ध्येयत्वान्नाधिकारः॥ ॥

ह॰भा ३८

किंच विग्रहाभावात् देवादीनां नक्वाप्यधिकार इत्याह। ज्योतिषि भावाच्चेति। आदित्यः सूर्यश्चन्द्रः शुक्रोऽङ्गारक इत्यादिरूपाणां ज्योतिःपिंडेषु प्रयोग
प्रभावात्सत्वान्न विग्रहवान्देवः कश्चिदस्तीत्यर्थः। आदित्यः पुरस्तादुदेता पश्चादस्तमेतेति लघु विघावाक्ये ज्योतिष्येवादित्यशब्दः प्रसि
द्धः। तर्हि ज्योतिःपिंडानामेवाधिकारोऽस्तु तत्राह। नचेति। अस्मादीनामधिकारमाशंक्याह। एतेनेति। अग्निर्वा पुरोभूमिः इत्यादिरूपाणां अ
चेतनत्वाच्चिल्लिलेत्यर्थः। सिद्धांती शंकते। स्यादेतदित्यादिना। वज्रहस्तः पुरंदरः इत्यादयो मंत्राः सोरोदीदित्यादयोऽर्थवादाः। इष्टान्भोगा
ज्योतिषिभावाच्च॥ यदिदं ज्योतिर्मंडलं घुस्थानमहोरात्राभ्यां बंभ्रमज्जगदवभासयति। तस्मिन्नादित्यादयो देवतावचनाः शब्दाः प्रयुज्यं
ते लोकप्रसिद्धेर्वाक्यशेषप्रसिद्धेश्च॥ नच ज्योतिर्मंडलस्य हृदयादिना विग्रहेण चेतनतया पार्थिवादिनावा योगोऽवगंतुं शक्यते। मृदादिव
दचेतनत्वावगमात्। एतेनाग्न्यादयो व्याख्याताः। स्यादेतत्। मंत्रार्थवादेतिहासपुराणलोकेभ्यो देवादीनां विग्रहवत्वाद्यवगमाद्यमदो
षइति। नेत्युच्यते। न तावल्लौकिकं नाम किंचित्स्वतंत्रं प्रमाणमस्ति प्रत्यक्षादिभ्यस्तु अविचारितविशेषेभ्यः प्रमाणेभ्यः प्रसिध्यन्नर्थो लौका
त्प्रसिध्यतीत्युच्यते। न चात्र प्रत्यक्षादीनामन्यतममपि प्रमाणमस्ति। इतिहासपुराणमपि पौरुषेयत्वात् प्रमाणांतरमूलतामाकांक्षति

नहि यो देवाद्यसंतेष संभाविताः तेन ब्राह्मणत्वेन सर्वेषां फलैः युक्तैरित्यादीतिहासपुराणानि लोकेऽपि यमं दंडहस्तं लिखंति। इदंच ३८
ज्रहस्तमिति विग्रहादिपंचकस्याभावात् अधिकारदोषो नास्तीत्यर्थः। विग्रहो हविषां भोग ऐश्वर्यं च प्रसन्नता फलप्रदानमित्येतत्पंचकं वि
ग्रहादिकं मानाभावादेतन्नास्तीति द्रूषयति मेत्यादिना। नचाज्ञेति विग्रहाद्यविलक्षः॥ ॥ ॥ ॥

अर्थवादमन्त्राभ्यां मूलमिसाहं वदाह। अर्थवादादित्यादिना। ज्योतिष्टोमादिवत् प्रयोगविधिगृहीता मंत्राः प्रयोगसंबद्धार्थाभिधायिनः। नन्वेतान्विग्र
हादिपराइति मीमांसका आचक्षत इत्यर्थः। तस्मान्न विग्रहभावादिसिद्धिः। सूत्राभ्यां मध्वादिविपर्ययं निरस्यति। तत्राद्य इत्यादिना ब्रह्मविद्या देवादीना-
धिकरोति विद्यात्वात् मध्वादिविद्यावत् इति शङ्का हेतुरसमो जन्त्वित्याह। यद्यपीति। दर्शितं नन्वात्मानमधिकरोतीत्युक्तेत्वा तारा च सूर्यादिदेवादि

अर्थवादा अपि विधिनैकवाक्यत्वात् स्तुत्यर्थाः संतो न पार्थगर्थ्येन देवादीनां विग्रहादिसद्भावे कारणभावं प्रतिपद्यंते मंत्रा अपि श्रुत्यादिवि-
नियुक्ताः प्रयोगसमवायिनोऽभिधानार्थानि कस्यचिदर्थस्य प्रमाणमित्याचक्षते। तस्मादभावो देवादीनामधिकारस्य॥ भावं तु बादरायणोऽस्ति हि
॥ तुशब्दः पक्षं व्यावर्तयति। बादरायणस्त्वाचार्यो भावमधिकारस्य देवादीनामपि मन्यते। यद्यपि मध्वादिविद्यासु देवतादिव्यामिश्रास्वसंभवोऽधि-
कारस्य तथाप्यस्ति हि शुद्धायां ब्रह्मविद्यायां संभवः। अर्थित्वसामर्थ्यप्रतिषेधाद्यपेक्षत्वादधिकारस्य। न च क्वचिदसंभव इत्येतावता यत्र संभव-
स्तत्राप्यधिकारोऽपोद्यत। मनुष्याणामपि न सर्वेषां ब्राह्मणादीनां सर्वेषु राजसूयादिष्वधिकारः संभवति। तत्र यो न्यायः सोऽत्रापि भविष्य-
ति। ब्रह्मविद्यां च प्रकृत्य भवति दर्शनं श्रौतं देवाद्यधिकारस्य सूचकं। तद्यो यो देवानां प्रत्यबुध्यत स एव तदभवत्तथर्षीणां तथा मनुष्याणामिति॥

तिष्ठाभाससाम्यं विद्यात्वहेतोराह। न चेति। यत्र यस्याधिकारः संभवति स तत्राधिकारोति स्यादस्तु इत्यर्थः। यतः सर्वेषां सर्वत्राधिकारो न संभव-
ति ततो न चायमोघेत स्वपः। तत ब्रह्मण्येव देवादीनां प्रयोज्यत्वे नावबुध्यत मत तत्ब्रह्म भवदित्यर्थः॥ ॥ ॥

स्॰ भा॰ तेह देवा ऊचुरन्यो मन्तत इन्द्रविरोचनौ सुरासुरराजौ प्रजापतिं ब्रह्मविद्यार्थमुपजग्मतुरिति चलिंगमस्तीत्यर्थः। किं मन्त्र उन्नामन्तमितिं गंधर्वे ऽप्यन्ने पात
३९ वल्क्युद्वाचतमिति मोक्षधर्मे श्रुतं देवादीनामधिकारलिंगमित्याह। स्मार्तमिति। यथा बालानां गोलकेषु चक्षुरादिपदं भ्रमो गोपि शास्त्रविदो लौकिकाति
रिक्तेन्द्रियाणि स्वीकुर्वन्ति। तथा ज्योतिरादौ स्मर्यो विग्रहवत्त्वमो गोपि विग्रहवद्देवताः स्वीकार्या इत्याह। ज्योतिरादीति। तथा चेतनत्वेन व्यवहारादीत्यर्थः।
एकस्य जडस्य चेतनतो भयहेतुपत्संकल्पयन्तमाह। अस्तिहीति। तथा हि विग्रहवत्त्वमादेव व्यवहारः श्रूयते। स ब्रह्मणस्पतिरुद्रानगाणश्छन्दश्छविकृतत्वं पंथी
तेहोचुर्हन्ततमात्मानमन्विच्छामो यमात्मानमन्विष्य सर्वांश्च लोकानाप्नोति सर्वांश्च कामानिति। देहवद्देवानामपि सम्भवमनिरोधनीति सुरा
णामित्यादिषु। स्मार्तमपि गंधर्वपाज्ञवल्क्यसंवादादि। यदप्युक्तं ज्योतिरादिभावाच्चेत्यत्र ब्रूमः। ज्योतिरादिविषयाअपि आदित्यादयो देवता
वचनाः शब्दाश्चेतनवन्तमैश्वर्याद्युपेतं तं तं देवतात्मानं समर्पयन्ति। मन्त्रार्थवादादिषु तथा व्यवहारात्। अस्ति ह्यैश्वर्ययोगाद्देवतानां ज्योति
राद्यात्मभिश्चावस्थातुं यथेष्टं च तं तं विग्रहं ग्रहीतुं सामर्थ्यम्। तथा हि श्रूयते सुब्रह्मण्यार्थवादे मेधातिथेर्मेषेति मेधातिथिर्ह काण्वायनमिन्द्रो
मेषो भूत्वा जहारेति। स्मर्यते च। आदित्यः पुरुषो भूत्वा कुन्तीमुपजगाम हेति। मृदादिष्वपि चेतना अधिष्ठातारो ऽभ्युपगम्यन्ते। मृदब्रवी
दापो ऽब्रुवन्नित्यादिदर्शनात् ३९

मेषेत्यादि मेधातिथिर्ह काण्वायनमित्यादिः तत्र मेधातिथिर्मेषेति छन्दसं वोधनं श्रुतं तं व्याचष्टे। मेधेति। मुनिं मेषो भूत्वा जहारेति ज्ञापनार्थं मेषेति इन्द्रसंबोधन
मित्यर्थः। यदुक्तमादित्यादयो ऽचेतना एवेति तत्र सर्वत्र जडा जडं शब्दप्रसक्त्यादित्याह॥ मृदिति॥ ॥ ॥

अथ हिंसादौ केवलभागः कश्चेत्तत्राह ओतीति एदेस्त्विति। मंत्रादिकं पश्चात्तत्र समानविग्रहादेः स्वार्थेन प्रमाणं अल्पपरत्वात् विषंगुंदके
२र तिवाभवतु इत्याह। पदपीति। अन्यपदादपि [illegible] विवक्षात् बाधाभावस्त्वार्थो ग्राह्य इत्याह॥ अत्र कु मरीति॥ नासर्थ्यैः स्यैपर्थे प्रवचनत्वेनाप्ति
त्यमुदाहरति। तथा हीति। उणादौ प्रत्ययेऽस्त्विति विग्रहादेः तत्र नास्तीति वैयाकरणैः अंगीकृतं। अथ्वाहेति। विभुहर्यादिविधिवाक्यं तद्वैक्यात् तमा प्रशस्त। विधि
ओतीति एदेस्तु भूतधातौ एदिसादौ इच्छेत्तत्र मयूरपदाद्यमाने। चेजनास्त्यधिष्ठातारौ देवतास्ताने मंत्रार्थवादादिप्रवहारादिस्कं। पदप्युक्तं
त्रार्थवादे यादृशं तत्वं विग्रहादिमुक्तान् समत्र्य मिस्सत्र क्रमः। प्रत्ययाप्रत्यये हि सकलावासङ्गावपः कार्यं तामाश्रित्य वचनतमार्थ
त्वे यत्तथा स्यन्तार्थमपि प्रस्थितः। पठितुमिति तंतणपराणां हि श्रुत्वैवं प्रतिपद्यते। अत्राह॥ विषमतद्पमाणः। तत्रेहि तत्पराणां हि विषयं
प्रत्यसंप्रवृत्तमस्ति पतन तदस्तित्वे प्रतिपद्यते। अत्र पुनर्विभुहर्यैकवाक्यभावेन स्तुत्यर्थैः केवादेनपार्थ्यगर्थ्येन वचनात विषमा प्रव्यक्तिः श
भ्राध्ययनसातु। नहि मरुवाक्यप्रसापके अंतरवाक्यस्य पृथक् प्रसापकत्वमस्ति। प्रधानस्तुरांपि वेदितिनञ्जाति वाक्ये पदत्रय संबंधात्तु राणा
न प्रतिषिधत्वैकोपांगम्यते न पुनः स्तुरांपि वेदितिपद्द्वय संबंधात्तु राणा न विधिरपीति॥ ॥ ॥

रिपेकार्यवादेपु प्रत्ययः। कुतो तो मतार्थो वियहादिः। तद्विषयः प्रत्ययो नास्तीत्यर्थः। नन्ववांतरवाक्येत विग्रहादि प्रत्ययोऽस्त्वित्यत आह। नहीति।
स्तुराणातप्रत्ययो पिस्यादिति भावः

स॰ भा॰ पदैकवाक्यतयाप्येकवाक्यत्वसंभवान्नैवमित्याह। अत्रोच्यत इति। न ज्रुपदस्यैकपदस्यापि वेदितिपदार्थमन्वेतित्वपदैकवाक्यत्वं कल्पनेनापि स्तुत
चकेरोति। नतु पदद्वयेप्य कस्त्रुतपानवो धुपतिन सविधौ तिर्विधानुपपत्तेः नाकार्थ्यानुमत्रप्रसङ्गरत्वात्। अर्थवादस्तु भूतार्थसंसर्गस्तुति तूरेवोधप
५० नविधिनावाक्यैकवाक्यतां भजन्त इत्याह विग्रहपदेनमकस्तुत्यर्थः। ननु वर्थवादस्वरूपरतमानवांतरसंसर्गबोधकं तद्विना साक्षाद्देवविध्यन्तरबोधस्तुतत्रा
अत्रोच्यते। विधमकदप्त्यांशाप्तकं पत्सुरापान मतिषेधपदान्यस्यैकत्वार्स्तांतरपाकार्थिसाग्रहणं विधुर्हेरार्थवादश्रोस्तु अर्थवादस्था निपदानि
दयगल्पर्यं च तो न विधमप्रतिपद्यानंतरं कैमर्थ्यकल्पकत्वेन विधिस्तावकत्वं प्रतिपद्यन्ते। यथा हि वायव्यं श्वेतमालभेत भूतिकाम इति अत्र विधु
देशवर्तिनां वायव्यादिपदानां विधिना संबंधो नैवं वायुर्वै क्षेपिष्ठा देवता वायुमेव स्वेन भागधेयेनोपधावति स एवैनं भूतिं गमयतीत्येषाम
र्थवादगतानां पदानां न हि भवति वायुक्षेपिष्ठत्वमालभेतेति तस्मात् क्षेपिष्ठदेवतात्वाद्वायव्यमालभेतेत्यादि। वायुस्वभावसंकीर्तनेन वायव्यं तस्मात् प्रतिपद्यैवं विशिष्ट
देवत्यमिदं कर्मेति विधिं स्तुवन्तीति। तत्र प्रत्यक्षान्तरवाक्यार्थः प्रमाणान्तरयोगोचरभावाति। न चेतदनुवादेनार्थवादः प्रवर्तते। यत्र प्रमाणान्तरविरुद्धत्वं
ते गुणवादेन। यत्र तु तदुभयं नास्ति तत्र किं प्रमाणान्तराभावादनुवादः स्यादाहोस्वित् प्रमाणान्तरविरोधाद्विद्यमानवाद इति प्रतीतिरुपरोधो
विद्यमानवादश्चाश्रयणीयोऽनुगुणवादः
ह। प्रमाहीति। साक्षाद्धर्मास्मिन्यं दर्शयति। नहीति। अर्थवादस्तु सर्वे त्रैस्वार्थग्रहणं स्मर्यत्वादार्थवादा निविभज्यन्ते। तत्रेति। तत्रार्थवादे उपकर्ता अग्निर्हि ५०
मस्य भेषजमित्यादिर्विरुद्धार्थः। आदित्यो यूपः यजमानः प्रस्तर इत्यादौ बाधित इति जत्विलादिर्गुणवादः। वज्रहस्तः पुरंदर इत्यादौ मानान्तरसंवादविसंवादौ
नस्तः तत्र भूतार्थवाद इत्यर्थः। इति विभज्योपसंहारः॥ २१ २५ ॥ ॥ ॥

विग्रहाद्यर्थवादः स्वार्थेऽपि तात्पर्यवान् अन्यपरत्वे सत्यज्ञाताबाधितार्थकत्वात् प्रयाजादिवाक्यवत्। इति न्यायं मंत्रे घटयति एतेनेति। एतेनेति वेदां
तानुवादगुणवादार्थकनिरासप्रहेतो प्रत्येति न चोभयपरत्वे वाक्यभेदः तदंतरार्थस्य महावाक्यार्थे द्वारत्वादिति भावः। विध्यनुपपत्त्यापि स्वर्गवद्देव
ताविग्रहोऽङ्गीकार्य इत्याह। अपि चेति। ननु कृत्स्नफलके कर्मणि विधिः फलं विनानुपपन्न इति भवतु यत्र दुःखेन संभिन्नमित्यर्थवादसिद्धः स्वर्गो
विधिप्रमापकः विग्रहं विना विधेः कानुपपत्तिरित्यत आह। नहीति। उद्देश्यस्य ज्ञानानुपपत्त्या चेतस्यारोहोऽङ्गीकार्य इत्यत्र श्रुतिमप्याह। यस्या इति। अतश्च

एतेन मंत्रो व्याख्यातः। अपि च विधिभिरेवेन्द्रादिदेवतानि हवींषि चोदयद्भिरपेक्षितमिन्द्रादीनां स्वरूपं। न हि स्वरूपरहिता इन्द्रादयश्चेतसि आरो
पयितुं शक्यन्ते। न च चेतस्यनारूढायै तस्यै देवतायै हविः प्रदातुं शक्यते। श्रावयति च॥ यस्यै देवतायै हविर्गृहीतं स्यात्तां मनसा ध्याये
द्वषट्करिष्यन्निति। न च शब्दमात्रमर्थस्वरूपं संभवति शब्दादर्थप्रतीतेर्भेदात्। तत्र या इयं मंत्रार्थवादयोरिन्द्रादीनां स्वरूपमवगतं न तत्ता
दृशं शब्दप्रमाणकेन प्रत्याख्यातुं युक्तं॥

तस्माद्देहाद्यर्थं विग्रहस्य स्पष्टः। किंच कर्मप्रकरणपाठात् विग्रहप्रमितिः प्रयाजवत् कर्माङ्गत्वेनाङ्गीकार्या तां विना कर्म एव न सिध्येत्। किंच यस्य अन्यत्र
विग्रहवद्देवतात्मकशब्दमात्रं देवतेति भक्तिरपास्तेत्याह। न च शब्देति। न चाकृतिमात्रं शब्दमात्रमस्तु किं विग्रहेणेति वाच्यं। निर्मितस्य कल्प
योगात्। अतः शब्दस्यार्थाकांक्षायां मंत्रादिप्रमितविग्रहोऽङ्गीकार्य इत्याह तत्रेति। ॥ ॥ ॥ ॥

स॰ भा॰ एवं मन्त्रार्थवादमूलकमितिहासादिकमपि विग्रहे मानमित्याह। इतिहासेति। प्रमाणत्वेन संभवदित्यर्थः। व्यासादीनां योगिनां देवतादिप्रत्यक्ष
४१ मपीतिहासादेर्मूलमित्याह। प्रत्यक्षेति। व्यासादेर्यो देवादिप्रत्यक्षसम्भवस्तस्य शाक्षित्वादस्मद्वदित्यनुमानमतिप्रसंगेन दूषयति। य स्त्वित्यादिना।
सर्वधर्माभिज्ञं वस्तुत्वात्। घटवदिति जगद्वैचित्र्येणानैकान्त्यमपि स्फुटमाह। तथा क्षत्रियाभावकं वर्णाश्रमाभावं वर्णाश्रमाव्यवस्थां च ब्रूयात् निरंकुशबुद्धि

इतिहासपुराणमपि व्याख्यातेन मार्गेण संभवन्मन्त्रार्थवादमूलत्वात् प्रभवति देवताविग्रहादि साधयितुं। प्रत्यक्षादिमूलमपि संभवति। भ
वति ह्यस्माकमप्रत्यक्षमपि चिरंतनानां प्रत्यक्षं। तथा च व्यासादयो देवादिभिः प्रत्यक्षं व्यवहरंतीति स्मर्यते। यस्तु ब्रूयादिदानींतनानामिव पूर्वे
षामपि नास्ति देवादिभिर्व्यवहर्तुं सामर्थ्यमिति। स जगद्वैचित्र्यं प्रतिषेधेत्। इदानीमिव च नान्यदापि सार्वभौमः क्षत्रियोऽस्तीति ब्रूयात्। ततश्च राज
सूयादिचोदना उपरुंध्यात्। इदानीमिव च कालांतरेप्यव्यवस्थितप्रायान् वर्णाश्रमधर्मान् प्रतिजानीत। ततश्च व्यवस्थाविधायि शास्त्र
मनर्थकं स्यात्। तस्माद्धर्मोत्कर्षवशाच्चिरंतना देवादिभिः प्रत्यक्षं व्यवजह्रुरिति श्लिष्यते अपि च स्मरंति। स्वाध्यायादिष्टदेवतासंप्रयोग
इत्यादि॥ ॥

त्वात्। तथा च राजसूयादिकाम्यकृतादियुगधर्मव्यवस्थाशास्त्रस्य च बाध इत्यर्थः। योगसूत्रार्थादपि देवादिप्रत्यक्षसिद्धिरित्याह। अपि चेति। ४१
मंत्रजपात् देवसान्निध्यं तत्संभाषणं चेति सूत्रार्थः॥ ॥ ॥ ॥ ॥

योगमाहात्म्यस्य श्रुतिस्मृतिसिद्धत्वात् योगिनामस्ति देवादिप्रत्यक्षमित्याह। योग इति। पादतलाज्जानोः जानोरानाभेर्नाभेराग्रीवायाः ग्रीवाया आ
केशमूर्ध्नोरन्तं ततः आब्रह्मरन्ध्रं पृथिव्यादिपञ्चके क्रमुस्थिते धारणया जिते योगगुणे चाणिमादिके प्रवृत्ते योगाग्निमयं तेजोमयशरीरं प्राप्तस्य योगि
नो न रोगादिस्पर्श इत्यर्थः। चिरकालादिमसिद्धिरपि विग्रहे मानमित्याह। लोकेति। अधिकरणार्थमुपसंहरति। तस्मादिति। चिंतायाः फल
माह। क्रमेति। एवमेवं देवादीनां ब्रह्मविद्याधिकारे सत्येव देवत्वप्रसिद्धये मुक्तिफलान्युपासनानि युज्यन्ते देवानामनधिकारे तासामभावात्

योगोऽप्यणिमाद्यैश्वर्यप्राप्तिफलः स्मर्यमाणो न शक्यते साहसमात्रेण प्रत्याख्यातुं। श्रुतिश्च योगमाहात्म्यं प्रख्यापयति। पृथ्व्यप्तेजोऽनि
लखे समुत्थिते पंचात्मके योगगुणे प्रवृत्ते न तस्य रोगो न जरा न मृत्युः प्राप्तस्य योगाग्निमयं शरीरमिति। ऋषीणामपि मंत्रब्राह्मणद
र्शिनां सामर्थ्यं नास्मदीयेन सामर्थ्येनोपमातुं युक्तं। तस्मात्समूलमितिहासपुराणं। लोकप्रसिद्धिरपि न सति संभवे निरालंबनाध्यवसा
तुं युक्ता। तस्मादुपपन्नो मंत्रादिभ्यो देवादीनां विग्रहवत्त्वाद्यवगमः। ततश्चार्थित्वादिसंभवादुपपन्नो देवादीनामपि ब्रह्मविद्यायामधिका
रः। क्रममुक्तिदर्शनान्यप्येवमेवोपपद्यन्ते॥ शुगस्य तदनादरश्रवणात्तदाद्रवणात्सूच्यते हि। यथा मनुष्याधिकारनियममपोह्य देवादी
नामपि विद्यास्वधिकार उक्तस्तथैव द्विजात्यधिकारनियमापवादेन शूद्रस्याप्यधिकारः स्यादित्येतामाशंकां निवर्तयितुमिदमधिकरणमा

क्रममुक्त्यर्थिनामुपासनेषु प्रवृत्तिस्तस्मात्। अतोऽधिकारनिर्णयात्मकत्वान्नास्ति सिद्धिरिति भावः। शुगस्य सूच्यते हि। पूर्वेण सह दृष्टान्तसंगतिमाह। यथेति।
पूर्वत्र देवादीनामधिकारसिध्यर्थं मंत्रादीनां भूतार्थे विग्रहादौ समन्वयोक्त्या वेदान्तानामपि भूतार्थे ब्रह्मणि समन्वयो दृढीकृतः। अपशूद्राधिकरणस्य
श्रौतस्य विषये समन्वयोपयोगः स दृढीकृत इत्यधिकरणद्वयस्य प्रासंगिकस्यापि समन्वयाध्याये न शंकेति मन्तव्यं। एवं प्रसंगेऽशूद्रस्यापि द्विजवद्

अत्र वेदांतविचारो विषयः स किं शूद्रमधिकरोति न वेति संभवासंभवाभ्यां संदेहे हेतुपक्षमाह। तत्र शूद्रस्यापीत्यादिना। तस्माद नग्नित्वादनव
स.भा क्लृप्तोऽसमर्थः। विद्यार्थिनि शूद्र ऊह्य इत्यमोगाल्लिंगादपि शूद्रस्याधिकार इत्याह। भवतीति वेति। जानश्रुतिः किल षट् शतानि गवां निष्कमश्वतरीरथं च रैक्वाय गुरवे निवेद्य

मां शिक्षयेत्युवाच। ततो रैक्वो विधुरः कन्यार्थी सन् इदमुवाच। अहहेति निपातः खेदार्थः। हारेत्वा निष्कयुक्तः इत्वा गत्वा रथो हारेत्या सह गोभिः स

तत्र शूद्रस्याप्यधिकारः स्यादिति तावत्प्राप्तं अर्थित्वसामर्थ्ययोः संभवात्। तस्माच्छूद्रो यज्ञेनवक्लृप्त इतिवत् शूद्रो विद्यायामनवक्लृप्त इति
च निषेधाश्रवणात्। यज्ञे कर्मण्यनधिकारकारणं शूद्रस्यानग्नित्वं न तद्विद्यास्वधिकृतस्यापवादकं। न ह्याहवनीयादिरहितेन विद्या वेदि
तुं न शक्यते। भवति च लिंगं शूद्राधिकारस्योपोद्बलकं। संवर्गविद्यायां हि जानश्रुतिं पौत्रायणं शुश्रूषुं शूद्रशब्देन परामृशति। अहहारे
त्वा शूद्र तवैव सह गोभिरस्त्विति। विदुरप्रभृतयश्च शूद्रयोनिप्रभवा अपि विशिष्टविज्ञानसंपन्नाः स्मर्यंते। तस्मादधिक्रियते शूद्रो वि
द्यास्वित्येवं प्राप्ते ब्रूमः॥

हहे शूद्र तवैवास्तु किमनेनानेतममस्माकं इस्यानुपयोगीनेति भावः। अर्थित्वादि संभवेऽप्येषः साधनेऽप्रवृत्तिः इह चिंतास्वाभाविकत्वादितिस्वा
योपेता ल्लिंगादित्याह॥ तस्मादिति॥ ॥ ॥ ॥ ॥ ॥

सूत्राद्बहिरेव सिद्धांतयति। न शूद्रस्याधिकार इत्यादिना। आपाततो विदितो वेदार्थो येन तस्येत्यर्थः। अध्ययनविधिना संस्कृतो वेदस्तु समापात
ज्ञानं च वेदार्थविचारेषु शास्त्रीयं सामर्थ्यं तदभावात् शूद्रस्याधीतादिसंभवस्यापास्ति हेतुर्नास्ति वेदांतविचाराधिकार इत्यर्थः। अ[illegible]ध्ययनसंस्कृ
तेन वेदेन विदितो निश्चितो वेदार्थो येन तस्य वेदार्थेषु विधिष्वधिकारो नान्यस्यानधीतवेदस्यापि वेदार्थानुष्ठानाधिकारेऽध्ययनविधिवैयर्थ्या

न शूद्रस्याधिकारो वेदाध्ययनाभावादधीतवेदो हि विदितवेदार्थो वेदार्थेष्वधिक्रियते। न च शूद्रस्य वेदाध्ययनमस्ति उपनयनपूर्वकत्वाद्वे
दाध्ययनस्य। उपनयनस्य च वर्णत्रयविषयत्वात्। यत्त्वर्थित्वं न तदसति सामर्थ्येऽधिकारकारणं भवति। सामर्थ्यमपि न लौकिकं केवल
मधिकारकारणं भवति। शास्त्रीयेऽर्थे शास्त्रीयस्य सामर्थ्यस्यापेक्षितत्वात्। शास्त्रीयस्य च सामर्थ्यस्याध्ययननिराकरणेन निराकृत
त्वात्। यच्चेदं शूद्रो यज्ञेऽनवक्लृप्त इति तत् न्यायपूर्वकत्वाद्विद्यायामप्यनवक्लृप्तत्वं द्योतयति। न्यायस्य साधारणत्वात्। यत्पुनः संवर्गवि
द्यायां शूद्रशब्दश्रवणं लिंगं मन्यसे न तल्लिंगं न्यायाभावात्। न्यायोक्ते हि लिंगदर्शनं द्योतकं भवति न चात्र न्यायोऽस्ति

पातात्। अतः फलपर्यंतब्रह्मविद्यासाधनेषु श्रवणादिविधिषु शूद्रस्यानधिकार इत्यर्थः। अधीतवेदार्थज्ञानवत्त्वरूपस्याध्ययनविधिलभ्य
स्य सामर्थ्यस्याभावादिति। न्यायस्य तुल्यत्वाद्यज्ञपदं वेदार्थोपलक्षणार्थमित्याह। न्यायस्य साधारणत्वादिति। तस्माच्छूद्र इति तच्छ्रुतप्राप्तलक्ष्मा
यस्य मतं ब्रह्मविद्यायोग्यत्वादिसमर्थः। पूर्वोक्तं लिंगं दूषयति। यदिति। असामर्थ्यन्यायेनार्थित्वादिसंभवन्यायस्य निरस्तत्वादित्यर्थः॥ ॥

सू॰ भा॰ ननु निषादस्थपतिं याजयेदित्यत्राध्ययनाभावेपि निषादस्येष्टाविव शूद्रस्यापि विद्यानामधिकारोस्त्वित्याशंक्य कामं संवर्ग-
विद्यायामधिकारमंगीकरोति। काममिति। तद्विषयत्वात् अश्रुतत्वादित्यर्थः। वस्तुतस्तु विधिवाक्यस्थत्वान्निषादशब्दोप्यधिकारिसमर्पकः। शू-
४३ द्रशब्दस्तु विद्याविधिपरवाक्याद्बहिस्थत्वान्नाधिकारिणं बोधयति। असामर्थ्यं नामाविरोधेनान्यपरस्य शूद्रशब्दस्य स्वार्थबोधित्वासंभवात् इति न सांगीकारं

कामं चायं शूद्रशब्दः संवर्गविद्यायामेवैकस्यां शूद्रमधिकुर्यात् तद्विषयत्वान्न सर्वासु विद्यासु। अर्थवादस्थत्वात्तु न क्वचिदप्ययं शूद्रमधि-
कर्तुमुत्सहते। शक्यते चायं शूद्रशब्दोऽधिकृतविषये योजयितुं कथमित्युच्यते॥ ॥ ॥ ॥

त्यजति। अर्थवादेति। तर्हि शूद्रशब्दस्याश्रुतस्य कोर्थ इत्याशंक्य सूत्रेणार्थमाह॥ शक्यते चेत्यादिना। जानश्रुतिर्नाम राजा निदाघसमये रात्रौ ४३
प्रासादतले सुप्तः पतत्रीत्यन्तरदानादिगुणगणतोषिता ऋषयो हंसाः भूत्वा मालारूपेण तस्योपरि आजग्मुः। तेषु पाश्चात्यो हंसोऽ-
ग्रेसरं हंसमुवाच। भो भो भद्राक्ष किं न पश्यसि जानश्रुतेरस्य तेजः स्वर्गमाप्य स्थितं तत्त्वां धक्ष्यतीति न गच्छेति॥

तमग्रेसर उवाच ॥ कमप्येनं वराकं निघाहीनं सन्तं अरे सयुग्वानं सयुग्वा गंत्री तया सह स्थितं रैक्कमिवैतद्वचनमात्थ रैक्कस्य हि ब्रह्मविदस्स
तेजो दुरतिक्रमं नास्मानासन्नस्येत्यर्थः। अथ कस्मादेवं पिक्षो राजा शकटलिंगेन रैक्कं तारायिष्णोवान्म विद्मतीति हंसानामभिप्रायः॥ कं ड अरैधति
पदच्छेदः उशाष्टाप्यर्थः। तेषां हंसानामनादरवाक्यमवगत्य स्वसारात्स्रः शुश्रुस्य नासाभूद्रशब्देन रैक्कोनास्त्यसंहीतिस्त्यतेहीतिस्त्रान्व

कं वर एनमेतत्सन्तं सयुग्वानमिव रैक्कमात्थेत्यस्मादेव वाक्यादात्मनोऽनादरं श्रुतवतो जानश्रुतेः पौत्रायणस्य शुश्रूषेदेतामस्पीरैक्कः
शूद्रशब्देनानेन सूचितं भवात्मनः परोक्षज्ञानस्य ख्यापनायेति गम्यते। जातितः शूद्रस्यानधिकारात्। कथं पुनः शूद्रशब्देन शुगु
स्याशुरूस्यते इत्युच्यते तदाद्रवणात् शुचमभिदुद्राव शुचा वा अभिदुद्रुवे शुचा वा रैक्कमभिदुद्रावेति शूद्रः अवयवार्थसंभवात् रू
पार्थस्य चासंभवात् ह्य उपते चापमर्श्रत्वाभ्यामध्याप्यकाभ्यां ॥ ॥ ॥ ॥ ॥

यः श्रुतयोगिकार्थलाभे सति अनन्वित रूढ्यर्थस्त्याज्य इति न्यायघोतनार्थो हि शूद्रः। तदाद्रवणात्। तमाशुचाभ्याद्रवणात्। शूद्रः शोक
प्राप्तवान्। शुचा वा आराजाभिदुद्रुवे राजा। शुचा वाकरणेन रैक्कं गतवानित्यर्थः॥ ॥ ॥ ॥

सू॰ भा॰
४४

शूद्रशब्दस्य यौगिकत्वे लिंगमाह। क्षत्रियत्वेति। संवर्गविद्यायां विध्यनन्तरमर्थवादः आख्यायते शौनकं कापेयं कपिगोत्रं पुरोहितमभिप्रतारि
नामकं राजानं च कक्षसेनसुतं सूदेन परिविष्यमाणौ तौ भोक्तुमुपविष्टौ ब्रह्मचारी भिक्षितवानित्यर्थः। ननु अस्य चैत्ररथित्वं न श्रुतमित्यत आह।
चैत्ररथित्वं चेति। एतेन द्विरात्रेणेति छान्दोग्यश्रुत्यैव एवं चित्ररथस्य कापेययोग उक्तः। अभिप्रतारिणोऽपि तद्योगात् चित्ररथवंश्यत्वमिति श्रीम

क्षत्रियत्वगतेश्चोत्तरत्र चैत्ररथेन लिंगात्॥ इतश्च न जातिशूद्रो जानश्रुतिः। यत्कारणं प्रकरणनिरूपणेन क्षत्रियत्वमस्योत्तरत्र चैत्र
रथेनाभिप्रतारिणा क्षत्रियेण समभिव्याहारात् लिंगात् गम्यते। उत्तरत्र हि संवर्गविद्यावाक्यशेषे चैत्ररथिरभिप्रतारी क्षत्रियः संकीर्त्यते।
अथ ह शौनकं च कापेयं अभिप्रतारिणं च काक्षसेनिं परिविष्यमाणौ ब्रह्मचारी बिभिक्षे इति। चैत्ररथित्वं चाभिप्रतारिणः कापेययोगात्
अवगन्तव्यं कापेययोगो हि चैत्ररथस्यावगतः एतेन वै चैत्ररथं कापेया अयाजयन्निति समानान्वयानां च प्रायेण समानान्वया याजका भवं
ति। तस्माच्चैत्ररथिर्नामैकः क्षत्रपतिरजायत इति च क्षत्रपतित्वावगमात् क्षत्रियत्वमस्यावगन्तव्यं। तेन क्षत्रियेणाभिप्रतारिणा सह स
मानायां विद्यायां संकीर्तनं जानश्रुतेरपि क्षत्रियत्वं सूचयति। समानानामेव हि प्रायेण समभिव्याहारा भवंति। क्षत्तृप्रेषणाद्यैश्वर्ययोगा
च्च जानश्रुतेः क्षत्रियत्वावगतिः अतो न शूद्रस्याधिकारः॥

तेन एवंस्थानां हि प्रायेण पुरोहितवंश्या याजका भवंतीत्यर्थः। ननु अभिप्रतारिणः चैत्ररथित्वेनावगतात् कथं क्षत्रियत्वमत आह। तस्मादिति। ४४
चित्ररथापत्यः। क्षत्रपतिः तस्य क्षत्रपतेः कार्त्स्न्येन क्षत्रियत्वं प्रदर्श्य तेन समभिव्याहारो जानश्रुतेः क्षत्रियत्वे लिंगं

अत्र शूद्रशब्दो यौगिक एवेति न शूद्रस्याधिकार इति स्थिते तत्र लिंगांतरमाह। संस्कारेति। उपनयनं वेदग्रहणांगं शूद्रस्य नास्तीति एवमुक्तं इह विद्याग्रहणांगस्योपनयनसंस्कारस्य सर्वत्र परामृष्टत्वात् शूद्रस्य तदभावान्न विद्याधिकार इत्युच्यते। भाष्ये आदिपदेनाध्ययनगुरुशुश्रूषाद्युपलक्ष्यते। तं शिष्यमाचार्य उपनीतवानित्यर्थः। नारदोऽपि विद्यार्थी मंत्रमुच्चारयन् सनत्कुमारमुपगत इत्याह। अधीहीति। उपदिशेति यावत्। ब्रह्मपरा वेदपारगाः। सगुणब्रह्मनिष्ठाः परं निर्गुणं ब्रह्मान्वेषमाणा एष ह वै पिप्पलादः तज्जिज्ञासितं सर्वं वक्ष्यतीति निश्चित्य ते भरद्वाजादयः षडृषयः

संस्कारपरामर्शात्तदभावाभिलापाच्च ॥ इतश्च न शूद्रस्याधिकारो यद्विद्याप्रदेशेषूपनयनादयः संस्काराः परामृश्यंते। तं होपनिन्ये। अधीहि भगव इति होपससाद। ब्रह्मपरा ब्रह्मनिष्ठाः परं ब्रह्मान्वेषमाणा एष ह वै तत्सर्वं वक्ष्यतीति ते ह समित्पाणयो भगवंतं पिप्पलादमुपसन्ना इति च। तान् हानुपनीयैवेत्यपि प्रदर्शितैवोपनयनप्राप्तिर्भवति। शूद्रस्य च संस्काराभावोऽभिलप्यते। शूद्रश्चतुर्थो वर्ण एकजातिरित्येकजातित्वस्मरणात्। न शूद्रे पातकं किंचिन्न च संस्कारमर्हतीत्यादिभिश्च ॥

प. स्तत्प्रपगतादित्यर्थः। ननु वैश्वानरविद्यायां प्राचीनशालादीन् राजा अनुपनीयैव विद्यामुवाचेति श्रुतेरनुपनीतस्याप्यस्ति विद्याधिकार इत्यत आह। तान्हेति। ते ह समित्पाणयः पूर्वाह्णे प्रतिचक्रमिर इति पूर्ववाक्ये ब्राह्मणा उपनयनार्थमागता इति उपनयनप्राप्तिं दर्शयित्वा निषिध्यते। हीनवर्णो नोत्तमवर्णोऽनुपनीय वोपदिष्टव्य इत्याचारप्रापनार्थमित्यर्थः। एकजातिः। अनुपनीतः। पातकं अभक्ष्यभक्षणाद्युक्तं ॥ ॥

सत्यकामः किल मृतपितृको जवालां मातरमपृच्छत् किंगोत्रोऽहमिति तं माताप्युवाच भर्तृसेवाव्यग्रतयाहं तव पितुर्गोत्रं न जानामि जवाला
तु नामाहमस्मि सत्यकामो नाम त्वमसीति एतावज्ज्ञातमस्तीति ततः स जावालो गौतममागत्य तेन किंगोत्रोऽसीति पृष्ट उवाच। नाहं गोत्रं वेद्मि न मा
ता वेत्ति परं तु मे माता कथयति उपनयनार्थमाचार्यं गत्वा सत्यकामो जावालोऽस्मीति ब्रूहीति। अनेन सत्यवचनेन तस्य शूद्रत्वाभावो निर्द्धारितः॥

तदभावनिर्धारणे च प्रवृत्तेः॥ इतश्च न शूद्रस्याधिकारो यत्सत्यवचनेन शूद्रत्वाभावे निर्द्धारिते जावालं गौतम उपनेतुमनुशासितुं प्रवृत्त
तेनैतदब्राह्मणो विवक्तुमर्हति। समिधं सौम्याहरोपत्वा नेष्ये न सत्यादगा इति श्रुतिलिंगात्॥

अब्राह्मण एतत्सत्यं विविच्य वक्तुं नार्हतीति निर्धार्य हे सौम्य सत्यात् त्वं नागाः सत्यं न त्यक्तवानसि। अतस्त्वामुपनेष्ये तदर्थं समिधमाहरेति
गौतमस्य प्रवृत्तेश्च लिंगात् न शूद्रस्याधिकार इत्यर्थः। तदभावेति॥

स्मृतेस्तु श्रवणादिनिषेधाच्छूद्राधिकार इत्याह। श्रवणेति। अस्य शूद्रस्य द्विजैः पठ्यमानं वेदं प्रमादाच्छृण्वतः सीसलाक्षाभ्यां तप्ताभ्यां श्रोत्रद्वय
पूरणं प्रायश्चित्तं कार्यमित्यर्थः। पद्यु पादयुक्तं संचरिष्णु रूपमिति यावत्। भवति च स्मृतिरिति शेषः। मतिर्वेदार्थज्ञानं। दानं निसंनिषिध्यते शूद्रस्य
नैमित्तिकं तु दानमस्त्येव। यदुक्तं विदुरादीनां ज्ञानित्वं दृष्टमिति तत्राह येषामिति। सिद्धान्ते सिद्धे दुरपह्नवेपि साधनफले शूद्रैः क्रमेण ज्ञानं न ध्याय्यमित्यत
श्रवणाध्ययनार्थप्रतिषेधात्स्मृतेश्च। इतश्च न शूद्रस्याधिकारो यदस्य स्मृतेः श्रवणाध्ययनार्थप्रतिषेधो भवति। वेदश्रवणप्रतिषेधो वेदा
ध्ययनप्रतिषेधः तदर्थज्ञानानुष्ठानयोश्च प्रतिषेधः शूद्रस्य स्मर्यते श्रवणप्रतिषेधस्तावत् अथास्य वेदमुपशृण्वतस्त्रपुजतुभ्यां श्रोत्रप्रति
पूरणमिति पद्यु ह वा एतत् श्मशानं यच्छूद्रस्तस्मात् शूद्रसमीपे नाध्येतव्यमिति च। अत एवाध्ययनप्रतिषेधो यस्य हि समीपेपि नाध्येतव्यं
भवति स कथमश्रुतमधीयीत। भवति च वेदोच्चारणे जिह्वाच्छेदो धारणे शरीरभेद इति। अत एव चार्थादर्थज्ञानानुष्ठानयोः प्रतिषेधो भवति। न
शूद्राय मतिं दद्यादिति। द्विजातीनामध्ययनमिज्या दानमिति च। येषां पुनः पूर्वसंस्कारवशाद्विदुरधर्मव्याधप्रभृतीनां ज्ञानोत्पत्तिस्तेषां न
शक्यते फलप्राप्तिः प्रतिषेद्धुं ज्ञानस्यैकान्तिकफलत्वात्। श्रावयेच्चतुरो वर्णानिति चेतिहासपुराणाधिगमे चातुर्वर्ण्यस्याधिकारस्मरणात्। वेदपू
र्वकस्तु नास्त्यधिकारः शूद्राणामिति स्थितं॥ कंपनात्। अवसितः प्रासंगिकोधिकारविचारः प्रकृतामेवेदानीं वाक्यार्थविचारणां वर्तयि
ष्यामः॥ यदिदं किंच जगत्सर्वं प्राण एजति निःसृतं महद्भयं
आह। श्रावयेदिति। कंपनात्। अस्याप्रासंगिकत्वमाशंक्याह। अवसित इति तत्मासरुत्यर्थः। काठके पठति। यदिदमिति। सर्वं जगत्। प्राणान्निः
सृतं उद्यतं प्राणे चिदात्मनि प्रेरके सति। एजति चेष्टते तद्ब्रह्म प्राणशब्दं कारणं महद्भूतविभेत्यस्मादिति भयं॥ ॥ ॥ ॥

सू.भा.
५६

तस्मिन्भयहेतुत्वे दृष्टांतमाह। वज्रमिति। यथोद्यतं वज्रं नमंतमेव सर्वेः। परतत्माणात्मनं ब्रह्मनि विदितं ये विदुस्ते मुक्ता भवंतीत्याह। यइति। नन्वस्मि
न्ने वैकृत्स्नमिदं वाक्यमुदाहृतमित्यत आह। एतदिति। एजत्यस्मिन्कम्पनत्वस्य स्वत्रित्वात्। एजतिपदप्रयुक्तं वा संदेहहेतुमित्यर्थः। आसंजिकाधि
कारचिंतयास्मिन्संगतिर्नास्तीति। हेतुदेवप्रमितत्वे हेतो नो क्ता। तत्रांगुष्ठवाक्ये जीवानुवादे ब्रह्मैक्यज्ञानार्थं इति। क्रं। नतथेह प्राणानुवादं

वज्रमुद्यतं यदेतद्भिः दुरम्मृताते भवंतीति। एतद्वाक्यं एजत्कंपनतेति धात्वर्थानुगमात्तल्लक्षितं। आस्मिन्वाक्ये सर्वमिदं जगत्प्राणाश्रयं स्पं
दते। महच्चकिंचिद्भयकारणं वज्रशब्दितं ऽयतं तद्धिशानाच्चामृतत्वप्राप्तिरिति श्रूयते। तत्र कोऽसौ प्राणः किं तद्भयानकं वज्रमिति प्रतिपत्ते
विचारे किं प्राप्तं। प्रसिद्धेः पंचवृत्तिर्वायुः प्राण इति प्रसिद्धेरेव चात्र निर्देशः। हत्येव देवमाह। तंर्म संकीर्त्यते। कथं सर्वमिदं जगत्स
चलं वायोप्राणे प्रतिष्ठितं प्रतिष्ठा ये जतिवा पुनर्निमित्तं चमहद्भयानकं वज्रमुद्यम्यते। वायोर्हि पर्जन्यभावेन विवर्तमानैर्विद्युत्स्तनयित्नु
वृष्ट्यशनयो विवर्तत इत्याचक्षते। वायुविज्ञानादेव चैतदमृतत्वं। तथाहि श्रुत्यंतरं वायुरेव व्यष्टिर्वायुः समष्टिरप पुनर्मृत्युं जयति य
एवं वेदेति। तस्माद्वायुरयमिह प्रतिपत्तव्य इत्येवं प्राप्ते ब्रूमः

रोकज्ञानार्थः संभवति प्राणस्य स्वरूपेण कल्पितत्वे सक्यायोगात्। अतः प्राणो वायुर्नित्य परं ब्रह्मास्मि तिति प्रसंगान्नहि तत्र पूर्वपक्षः प्रतिप्रसिद्धेः पंच
वृत्तिरिति। नन्वत्र एव ब्रह्माणे इत्यादौ ब्रह्मलिंगात्प्राणश्रुतिनीता। अत्रापि सर्वचेष्टाभयहेतुत्वं ब्रह्मलिंगमस्तीति नास्ति पूर्वपक्षावसरोऽग
तप्त्यादि सत आह। वायोरेवेति। प्रतिष्ठाप्रस्थितिं लभ्य प्राणो वायो निमित्ते जगच्चलतीति प्रसिद्धं। अतः स्पष्टं ब्रह्मलिंगं नास्तीति भावः। वज्रलिंगा

सं वा युरि सा हा। बाधितिम्याह्रिष्टिई ब्रे ष्ठ ममष्टिः सामान्यं
५६

स त्वाह हि रेखासिद्धं तं प्रतिजानीते। ब्रह्मैवेति। पूर्वोक्तरेखासैकतास्वतानुगृहीतं सर्वोऽश्मत्वं लिंगं वाक्यभेदकप्राप्युते गौडमिसाहपरवेत्रे स्वादिना

ब्रह्मैवेदमिति प्रतिपत्तव्यं। कुतः। स्वैर्विशिष्टालोचनात्। स्वैर्विशिष्टरूपो हि ग्रंथभागयो ब्रह्मैव विनिर्दिश्यमानमुपलभामहे। इहैव कृष्णकृस्वादित
एतेवाप्युनिर्दिश्यमानं प्रतिपद्येमहि। पूर्वोक्तताव त्तदेवमुक्तं तत्र ब्रह्मन्त देवामृतमुच्यते। तस्मिन् लोकाः श्रिताः सर्वे तदु नात्येति कश्चनेति ब्र
ह्मनिर्दिष्टं तदेवेहापि सन्निधानाज्जगत्सर्वं प्राण एजतीति च लोकाश्रयत्वमलभिज्ञानान्निर्दिष्टमिति गम्यते। प्राणाद्यायतनं परमात्मन्नेव प्र
युक्तः प्राणस्य प्राणमिति दर्शनादेजयितृत्वमपीदं परमात्मन एवोपपद्यते। न वायुमात्रस्य तथा चोक्तं। न प्राणेन नापानेन मर्त्यो जीवति कश्च
न॥ इतरेण तु जीवंति यस्मिन्नेतावुपाश्रिताविति। उत्तरत्रापि भयादस्याग्निस्तपति भयात्तपति सूर्यः। भयादिंद्रश्च वायुश्च मृत्युर्धावति पंचम इति
ब्रह्मैव निर्दिश्यते न वायुः सर्वायुषकस्य जगतो भयहेतुत्वाभिधानात्। तदेवेहापि सन्निधानात् महद्भयं वज्रमुद्यतमिति च भयहेतुत्वप्रत्यभिज्ञाना
न्निर्दिष्टमिति गम्यते

श्रुतं स्वप्रकाशं तदु नात्येति। ब्रह्मणा श्रितः कोऽपि लोको नास्येवेत्यर्थः। सौत्रं लिंगं व्याचष्टे। एजयितृत्वमिति। सर्वायुषकस्य सर्वस्य कंपनश्रवणा

[illegible]

स.भा. अशनिर्वज्रशब्दः कथमिति सामर्थ्यं कम्पनेन इत्याह। वज्रमुद्यतमिति। बृहदारण्यके वायुरेव व्यष्टिर्वायुः समष्टिरप पुनर्मृत्युं जयतीति श्रवणात् सुजपरूपमा
४७ पेक्षिकममृतत्वमुच्यते। न मुख्यामृतत्वं तत्रैव वायुप्राप्ति प्रकरणं समाप्याथ हैनमुषस्तः पप्रच्छेति तेनात्मानमुक्त्वा वाय्वादेर्नार्त्तत्वोक्तेरित्या

वज्रशब्दोऽप्ययं भयहेतुत्वसामान्यात्प्रयुक्तो यथा हि वज्रमुद्यतं ममैव शिरसि निपतेद्यद्यहमस्य शासनं न कुर्यामित्यनेन भयेन जनो नियमेन राज-
शासने प्रवर्तते एवमिदमग्निवायुसूर्यादिकं जगदस्माद्ब्रह्मणो बिभ्यन्नियमेन स्वव्यापारे प्रवर्तते इति भयानकं वज्रोपमितं ब्रह्म। तथा
च ब्रह्मविषयं श्रुत्यन्तरं। भीषास्माद्वातः पवते। भीषोदेति सूर्यः भीषास्मादग्निश्चेन्द्रश्च मृत्युर्धावति पञ्चम इति। अमृतत्वफलश्रवणादपि
ब्रह्मैवेदमिति गम्यते ब्रह्मज्ञानाद्ध्यमृतत्वप्राप्तिः तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनायेति मन्त्रवर्णात्। यत्तु वायुविज्ञानात्
क्वचिदमृतत्वमभिहितं तदापेक्षिकं तत्रैव प्रकरणान्तरकरणेन परमात्मानमभिधायातोऽन्यदार्त्तमिति वाय्वादेरार्त्तत्वाभिधानात्। प्रकर-
णादपि अत्र परमात्मनिश्चयः। अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात्कृताकृतात्। अन्यत्र भूताच्च भव्याच्च यत्तत्पश्यसि तद्वदेति परमात्मनः
पृष्टत्वात्॥ ज्योतिर्दर्शनात्॥ एष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यत इति श्रूयते॥ ॥ ४७

ह। यत्तु वायुवित्यादिना। तस्मात्काठकवाक्यं ब्रह्मण्येव समन्वितमिति सिद्धम्। ज्योतिर्दर्शनात्। छांदोग्ये प्रजापतिविद्यावाक्यमाह एष इति॥ ॥

परंज्योतिःश्रुतिभ्यां संशयमाह। तत्रेति। घटादिविषयावरकतमोनाशकं सौरमित्यर्थः। सर्वत्र ब्रह्मप्रकरणस्यानुग्राहकः सर्वशब्दसंकोचाय
योगोस्तीति भावः श्रुतिः ब्रह्मणि नीता। न तथात्र य आत्मापहतपाप्मेति प्रकरणस्यानुग्राहकं पश्याम इति प्रत्युदाहरणेन पूर्वपक्षमाह। प्रसिद्धमेवेत्या
दिना पूर्वपक्षे सूर्यप्राप्तिः सिद्धांते ब्रह्मप्राप्त्या मुक्तिरिति फलं। ननु ज्योतिरधिकरणे ज्योतिःशब्दस्य ब्रह्मणि वृत्तेरुक्तत्वात्कथमयं पूर्वपक्ष इत्यत आ
ह। ज्योतिरिति। तत्र गायत्रीवाक्ये प्रकृतब्रह्मपरामर्शकयच्छब्दसामानाधिकरण्यात् ज्योतिःशब्दस्य स्वार्थत्यागः कृतः तत्र पाद्रसाधेसागेहेत्वं दृष्ट

तत्र संशय्यते किं ज्योतिःशब्दं चक्षुर्विषयतमोपहं तेजः किं वा परं ब्रह्मेति किं तावत्प्राप्तं। प्रसिद्धमेव तेजो ज्योतिःशब्दमिति। कुतः तत्र ज्यो
तिःशब्दस्य रूढत्वात्। ज्योतिश्चरणाभिधानादित्यत्र हि प्रकरणात् ज्योतिःशब्दः स्वार्थं परित्यज्य ब्रह्मणि वर्तते। न त्विह तद्वत् किंचित्स्वा
र्थपरित्यागकारणं दृश्यते तथा च नाडीखंडे। अथ यत्रैतदस्मात्शरीरादुत्क्रामत्यथैतैरेव रश्मिभिरूर्ध्वमाक्रमत इति मुमुक्षोरादि
त्यप्राप्तिरभिहिता तस्मात्प्रसिद्धमेव तेजो ज्योतिःशब्दमिति

नात्र पूर्वपक्षदृष्टः। ज्योतिःश्रुतेरनुग्राहकत्वेनार्चिरादिमार्गस्थत्वं लिंगमाह। तथा चेति। ताभ्य एता हृदयस्य नाड्यः इति कंडिकया नाडीनां र
श्मीनां च मिथः संश्लेषमुक्त्वा अथ संज्ञालोपानंतरं यत्र काले एतन्मरणं यथास्यात्तथोत्क्रामत्यथ तदा एतैर्नाडीसंश्लिष्टै रश्मिभिरूर्ध्वः सन्नु
परि गच्छतीत्यादिना ब्रह्मलोकद्वारभूतं गच्छतीत्यभिहितं तथैवात्रापि शरीरात्समुत्थाय परंज्योतिरादित्यमुपसंपद्य तद्द्वारा ब्रह्मलोकं
गत्वा स्वस्वरूपेणाभिनिष्पद्यत इति वक्तव्यं। समुत्थायोपसंपद्येत्युक्तश्रुतिभ्यां ज्योतिषोर्चिरादिमार्गस्थत्वभानादित्यर्थः॥ ॥

सू॰भा अतो मार्गस्थः सर्वो यास्त्याक्रमप्रवृत्तिपरं वाक्यमिति प्राप्ते सिद्धान्तयति। एवमिति व्याख्येयत्वेनोपक्रांतस्यात्मैवात्र ज्योतिः शब्देन व्याख्येय इति ज्यो
४८ तिषी मे नैकवाक्यता प्रयोजकप्रकरणानुगृहीतोत्तमपुरुषश्रुत्या वाक्यभेदकृज्ज्योतिः श्रुतिर्बाध्येति भावः। अशरीरत्वफललिंगाच्चैवं लिङ्गज्योति
र्न स्यादित्याह। अशरीरमिति। न चास्य सर्वस्याक्रमेणाशरीरत्वं स्यादिति वाच्यं। परत्वेन विशेषितस्य ज्योतिषस्तु ब्रह्मस्य तत्र इति पुरुषशब्देनाशरी
रत्वनिश्चयादित्याह। पर्यमिति। पर्वोक्तलिंगं स्फुटयति। यत्त्विति। नाडीखंडे दहरोपासकस्य पासर्वप्राप्तिरुक्ता मननमोक्ष इति प्रकाशसर्वोक्तिः अत्र तु प

एवं प्राप्ते ब्रूमः। परमेव ब्रह्म ज्योतिःशब्दं कस्मात् दर्शनात्। तस्य हि प्रकरणे वक्तव्यत्वेनानुवृत्तिर्दृश्यते। य आत्मापहतपाप्मेत्यपह
तपाप्मत्वादिगुणस्यात्मनः प्रकरणादन्वेष्टव्यत्वेन विजिज्ञासितत्वेन च प्रतिज्ञानात्। एतं त्वेव ते भूयोऽनुव्याख्यास्यामीति चानुसंधा
नादशरीरं वाव सन्तं न प्रियाप्रिये स्पृशत इति चाशरीरतायै ज्योतिः संपत्तेरस्याभिधानात्। न च ब्रह्मभावादन्यत्राशरीरतानुपपत्तेः।
परंज्योतिः स उत्तमः पुरुष इति च विशेषणात्। यत्तूक्तं मुमुक्षोरादित्यप्राप्तिरभिहितेति। नासावात्यंतिको मोक्षो गत्युत्क्रान्तिसंबंधात्।
नहि आत्यंतिके मोक्षे गत्युत्क्रांती स्त इति वक्ष्यामः॥ आकाशोऽर्थान्तरत्वादिव्यपदेशात्। आकाशो वै नाम नामरूपयोर्निर्वहिता ते यदन्त
रा तद्ब्रह्म तदमृतं स आत्मेति श्रूयते। तत्किमाकाशशब्दं परं ब्रह्म किं वा प्रसिद्धमेव भूताकाशमिति विचारे॥ ॥ ४८

ज्ञापतिवाक्ये निर्गुणविद्यायामर्चिरादिगतिस्थूलसर्वस्यानन्वयात् अनर्थकत्वात् श्रुतिप्रकाशे न स्वरूपं साक्षात्कृत परंज्योतिस्तदेवोपसंपद्यत इति
व्याख्येयमिति भावः॥ आकाशोऽर्थ॥ छांदोग्यमुदाहरति आकाश इति॥ ॥

यथोपक्रमप्रबलात् ज्योतिःश्रुतिबाधस्तथाकाशोपक्रमात् ब्रह्मादिश्रुतिबाध इति दृष्टांतेन पूर्वपक्षयति। भूतेति। श्रुतेर्गुणैराकाशोपास्तिर्निर्गुण
ब्रह्मज्ञानं चेत्फलमपत्र फलं। आकाशस्तल्लिंगादित्यनेन पौनरुक्त्यमाशंक्य तद्वदत्रास्पष्टलिंगाश्रवणादिति परिहरति। स्पष्टत्वादेश्चेति चैतन्मिति प्र
सिद्धलिंगमाकाशश्रुतेश्च बाधस्तदुपगताभ्यां ब्रह्मात्मश्रुतिभ्यामनेकलिंगोपात्ताभ्यां बाधो युक्तः। यत्र बहुप्रमाणसंवादस्तत्रैवास्य तात्पर्यमिति
निर्णयादिति सिद्धांतयति। परमेवेत्यादिना। नामरूपयोः श्रोथी नदंतःपातिनस्तद्भिन्नत्वं तत्कर्तृत्वं चायुक्तमित्यर्थः। नामादिकर्तृत्वं न ब्रह्मलिं
भूतपरिग्रहो युक्तः। आकाशशब्दस्य तस्मिन्रूढत्वात्। नामरूपनिर्वहणस्य चावकाशदानद्वारेणाकाशेऽपि संभवात्। स्पष्टत्वादि
श्च स्पष्टस्य ब्रह्मलिंगस्याश्रवणात् इत्येवं प्राप्ते इदमुच्यते। परमेव ब्रह्मेहाकाशशब्दं भवितुमर्हति। कस्मात् अर्थांतरत्वादिव्यपदेशात् ते यदंतरा तद्
ब्रह्मेति हि नामरूपाभ्यामर्थांतरभूतमाकाशं व्यपदिशति। न च ब्रह्मणोऽन्यन्नामरूपाभ्यामर्थांतरं संभवति। सर्वस्य विकारजातस्य नामरूपा
भ्यामेव व्याकृतत्वात् नामरूपयोरपि निर्वहणं निरंकुशं न ब्रह्मणोऽन्यत्र संभवति। अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीत्या
दिब्रह्मकर्तृत्वश्रवणात्। ननु जीवस्यापि प्रत्यक्षं नामरूपविषयं निर्वोढृत्वमस्ति। बाढमस्त्यभेदस्त्विह विवक्षितो। नामरूपनिर्वहणा
भिधानादेव च स्रष्टृत्वादिब्रह्मलिंगमभिहितं भवति। तद्ब्रह्म तदमृतं स आत्मेति च ब्रह्मवादस्य लिंगानि। आकाशस्तल्लिंगादित्यस्यैवायं प्र
गंगीयस्त्वादिति शंकते। नन्विति। अनेन जीवेनेत्येतज्जीवस्य ब्रह्माभेदेन कर्तृत्वमुच्यते साक्षाद्भोगादिति परिहरति। बाढमिति। पंचः॥
पूर्वोक्तं स्पष्टं लिंगं नास्तीति तत्राह। नामेति। तर्हि पुनरुक्तिस्तत्राह आकाशेति। तस्यैव साधकोऽयं विचारः। अत्राकाशपदस्य ब्रह्मणि वृत्तिं
सिद्धवत्कृत्य तत्र संशयादिप्रवृत्तेरुक्तत्वादिति न पौनरुक्त्यमिति भावः॥

स॰भा॰ सुषुप्त्युत्क्रान्त्योर्भेदेन अहं धीगम्य इत्युक्त कतम आत्मेति जनकप्रश्ने याज्ञवल्क्य आह। योयमिति। विज्ञानं बुद्धिः तन्मयस्तत्प्रायः सप्तमी व्यतिरे
४९ कार्था प्राणबुद्धिभ्यां भिन्न इत्यर्थः। व्यतिरेकज्ञानाय भेदमाह। अन्तर्ज्योतिरिति। पुरुषः पूर्ण इत्यर्थः। उभयोर्लिंगानां दर्शितानां संशयमाह। तत्किमिति।
पूर्वत्र नामरूपाभ्यां भेदोक्तेरेकार्थो ब्रह्मेत्युक्तं तद्युक्तं। प्राज्ञेनात्मना संपरिष्वक्त इति अभिन्नेपि जीवात्मनि भेदोक्तिवदौपचारिकभेदोक्ति

सुषुप्त्युत्क्रान्त्योर्भेदेन॥ व्यपदेशादित्यनुवर्तते बृहदारण्यके षष्ठप्रपाठके कतम आत्मेति। यो यं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः
पुरुष इत्युपक्रम्य भूयानात्मविषयः प्रपंचः कृतः॥ तत्किं संसारिस्वरूपमात्रान्वाख्यानपरं वाक्यमुतासंसारिस्वरूपप्रतिपादनप न्या॰ २
रमिति विशयः। किं तावत्प्राप्तं संसारिस्वरूपमात्रविषयमेवेति। कुतः। उपक्रमोपसंहाराभ्यां। उपक्रमे यो यं विज्ञानमयः प्राणेष्वि
ति शारीरलिंगादुपसंहारे च स वा एष महानज आत्मा यो यं विज्ञानमयः प्राणेष्विति तदपरित्यागान्मध्येपि बुद्धान्ताद्यवस्थोपन्यासेन
तस्यैव प्रपंचनादित्येवं प्राप्ते ब्रूमः॥ ४८

संभवादित्यास्ये पसंगतिः। पूर्वपक्षे कर्मकर्तृजीवस्तुतिः सिद्धान्ते जीवानुवादेन ततः कल्पितभेदभिन्नस्य प्राज्ञस्य परमात्मनः स्वरूपैक्यप्रमिति
रिति फलं। बुद्धान्ते जाग्रदवस्था॥

आदिमध्यावसानेषु जीवोक्तेर्जीवस्तावकमिदं वाक्यमिति प्राप्ते सिद्धांतयति। परमेश्वरेत्यादिना। वाक्यस्य जीवस्तावकत्वे जीवोद्देशेन प्राज्ञस्य ज्ञातत्वेनानुवादोक्तिरसंगता स्यात्। अतो ज्ञाताज्ञातसन्निपाते ज्ञातानुवादेनाज्ञातं प्रतिपादनीयं अपूर्वे वाक्यतात्पर्यमिति न्यायादिति सिद्धांततात्पर्यं। पुरुषः

परमेश्वरोपदेशपरमेवेदं वाक्यं न शारीरमात्रान्वाख्यानपरं कस्मात् सुषुप्तावुत्क्रांतौ च शारीराद्भेदेन परमेश्वरस्य व्यपदेशात् सुषुप्तौ तावद यं पुरुषः प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किंचन वेद नांतरमिति शारीराद्भेदेन परमेश्वरं व्यपदिशति। तत्र पुरुषः शारीरः स्यात् तस्य वेदितृत्वात् बाह्याभ्यंतरवेदनप्रसंगे सति तत्प्रतिषेधसंभवात्। प्राज्ञः परमेश्वरः सर्वज्ञत्वलक्षणया प्रज्ञया नित्यमवियोगात्। तथोत्क्रांतावप्ययं शारीर आत्मा प्राज्ञेनात्मनान्वारूढ उत्सर्जन् यातीति जीवाद्भेदेन परमेश्वरं व्यपदिशति। तत्रापि शारीरो जीवः स्यात् शरीरस्वामित्वात् प्राज्ञस्तु स एव परमेश्वरस्तस्मात् सुषुप्त्युत्क्रांत्योर्भेदेन व्यपदेशात् परमेश्वर एवात्र विवक्षित इति गम्यते यदुक्तमाद्यंतमध्येषु शारीरलिंगात् तत्परत्वमस्य वाक्यस्येति। अत्र ब्रूमः। उपक्रमे तावत् योयं विज्ञानमयः प्राणेष्विति न संसारिस्वरूपं विवक्षितं। किं तर्ह्यनूद्य संसारिस्वरूपं परेण ब्रह्मणास्यैकतां विवक्षति।।

शारीरं प्राज्ञो जीव इति भ्रांतिं वारयति। तत्र पुरुष इत्यादिना। देहस्य वेदनाप्रसक्तेर्निषेधायोगात् पुरुषो जीव एव प्राज्ञस्तु तद्रूपात्पर एवेत्यर्थः। अन्वारूढोऽधिष्ठितः उत्सर्जन् घोरान् शब्दान् मुंचन्।। ॥ ॥ ॥ ॥ ॥

बुद्धौ ध्यायंत्यामात्मा ध्यायतीव चलंत्यां चलतीव वस्तुतः सर्वविक्रियाशून्य इत्युक्तेन संसारित्वे तात्पर्यमित्याह ध्यायतीति। उपक्रमवदुपसं
हारवाक्येऽप्यर्थं विवक्षितमित्याह तथेति। व्याचष्टे। योऽयमिति। अवस्थोपन्यासस्य फलमर्थशुद्धिद्वारेणात्मपरत्वात्तन्नजीवलिंगत्वमित्याह। यतोऽन
बुद्ध्यंतेति प्रश्नोत्तराभ्यामसंसारित्वं गम्यत इत्याह। यदत ऊर्ध्वमिति कामादिविवेकानंतरमित्यर्थः। भवतीति चेति यद्वक्ष्यति तस्माद्गम्यत इति
यतो ध्यायतीव लेलायतीवेत्येवमादिश्रुतेरयं ग्रंथप्रवृत्तिः संसारिधर्मनिराकरणपरत्वेन लक्ष्यते। तथोपसंहारेऽपि। यथोपक्रममेवोपसंहर
तीति। स वा एष महानज आत्मा योऽयं विज्ञानमयः प्राणेष्विति। योऽयं विज्ञानमयः प्राणेषु संसारी लक्षितः स वा एष महानज आत्मा परमेश्व
र एवास्माभिः प्रतिपादित इत्यर्थः। यस्तु मध्ये बुद्धांताद्यवस्थोपन्यासात् संसारिस्वरूपविवक्षां मन्यते स प्राचीमपि दिशं प्रस्थापितः प्र
तीचीमपि दिशं प्रतिष्ठेत। यतो न बुद्धांताद्यवस्थोपन्यासेनावस्थावत्त्वं संसारित्वं वा विवक्षितं किं तर्ह्यवस्थारहितत्वमसंसारित्वं च। कथ
मेतदवगम्यते। यदत ऊर्ध्वं विमोक्षायैव ब्रूहीति पदे पदे पृच्छति। यच्चानन्वागतस्तेन भवति असंगो ह्ययं पुरुष इति पदे पदे प्रतिवक्ति। अ
नन्वागतं पुण्येनानन्वागतं पापेन तीर्णो हि तदा सर्वाञ्छोकान् हृदयस्य भवतीति च। तस्मादसंसारिस्वरूपप्रतिपादनपरमेवैतद्वाक्यमित्य
वगंतव्यं॥
योऽजनीति नावस्थाधर्मेणानन्वागतोऽस्पृष्टो भवति असंगत्वात्। सुषुप्तावप्यात्मतत्त्वं पुण्यपापाभ्यामस्पृष्टं भवति हि यस्मात् आत्मा सुषुप्तौ स
र्वशोकातीतः तस्मात् हृदयस्यैव सर्वे शोका इति श्रुत्यर्थः॥ ॥ ॥ ॥ ५०

स०भा०१ ५२ वा अस्य ब्रह्मात्मैकपरत्वे हेत्वन्तरमाह पत्यादीति । सूत्रं व्याचष्टे । इतश्चेति ॥ वशी खर्तं चोऽ पर धी नइति पावत । ईशानो नियमना । शक्तिमात्राः

पत्यादिशब्देभ्यः ॥ इतश्चासंसारिस्वरूपप्रतिपादनपरमेवैतद्वाक्यमित्यवगन्तव्यं ॥ यदस्मिन्वाक्ये पत्यादयः शब्दा असंसारिस्वरूपप्रति
पादनपराः संसारिस्वभावप्रतिषेधनाश्च भवन्ति । सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिरित्येवंजातीयका असंसारिस्वभावप्रतिपाद
नाः स न साधुना कर्मणा भूयान्नो एवासाधुना कनीयानित्येवंजातीयकाः संसारिस्वभावप्रतिषेधनास्तस्मादसंसारी परमेश्वर इहोक्त
इत्यवगम्यते ॥ इति श्रीमच्छारीरकमीमांसाभाष्ये श्रीमच्छंकरभगवत्पादकृतौ प्रथमाध्यायस्य तृतीयः पादः ॥ ॥

कोः कार्यमाधिपत्यमिति भेदः ॥ तस्माच्छ्रोधितत्वमर्थं वेषष्ठाध्याय समन्वय इति सिद्धं ॥ इति श्रीमच्छारीरकमीमांसाव्याख्यायां भाष्यरत्न
प्रभायां प्रथमाध्यायस्य तृतीयः पादः समाप्तः ॥

५१

इतिशारीकसूत्रभाष्येप्रथमाध्यायेतृतीयपादः समाप्तः।

"अथ"

(शंकराचार्यप्रणीतम्)

"शारीरकमीमांसाभाष्यम्"

("रत्नप्रभा" व्याख्यासहितम्)

(व्याख्यातृनामः गोविन्दभगवत्पादः)

॥श्री गणेशाय नमः॥ ॥अव्यक्ते रामर्जापं च जनाधारं च कारणं॥ वेदितव्यं प्रियं वंदे प्रकृतिं पुरुषं परं॥ १॥ अस्मिन्पादे ऽधिक-
रणत्रयस्येक्षत्यधिकरणेन संगतिं वक्तुं वृत्तं अनुवदति॥ ब्रह्मेति॥ तदशब्दत्वेन प्रधानस्य वैदिकशब्दशून्यत्वेने सर्वः

आनुमानिकमप्येकेषामिति चेन्न शरीररूपकविन्यस्तगृहीतेर्दर्शयति च॥ ब्रह्मजिज्ञासां प्रतिज्ञाय
ब्रह्मणो लक्षणमुक्तं जन्माद्यस्य यत इति तल्लक्षणं प्रधानस्यापि समानमित्याशंक्य तदशब्दत्वेन नि-
राकृतमीक्षतेर्नाशब्दमिति गतिसामान्यं च वेदांतवाक्यानां ब्रह्मकारणवादं प्रति विद्यते न प्रधानका-
रणवादं प्रतीति प्रपंचितं गतेन ग्रंथेन इदं इदानीमवशिष्टं शंक्यते यदुक्तं प्रधानस्याशब्दत्वं तदसि-
द्धं कासुचिच्छाखासु प्रधानसमर्पणाभासानां शब्दानां श्रूयमाणत्वात् अतः प्रधानस्य कारणत्वं वे-
दसिद्धमेव महद्भिः परमर्षिभिः॥ ॥ १

ईक्षत्यधिकरणे गतिसामान्यमशब्दत्वं च प्रतिज्ञातं तत्र ब्रह्मणि वेदांतानां गतिसामान्यं प्रपंचितं॥ अधुना प्रधानस्याशब्दत्व-
मसिद्धमित्याशंक्य निरूप्यत इत्याक्षेपसंगतिः॥ तेनाशब्दत्वनिरूपणेन ब्रह्मणि वेदांतानां समन्वयो दृढीकृतो भवतीति
त्यध्यायसंगतिरप्यधिकरणत्रयस्य ज्ञेया॥ अत्राव्यक्तपदं विषयः तत्किं प्रधानपरं पूर्वोक्तशरीरपरं वेति॥ ॥ ॥

त्तिस्मृतिप्रकरणाभ्यां संशये । पूर्वमप्रसिद्धब्रह्मपरत्वं यथा षष्ठाध्यायस्य दर्शितं तद्वदव्यक्तपदमप्रसिद्धप्रधानपरमितिपू
र्वपक्षयति । आनुमानिकमपीति । अपि शाखिनाम् ब्रह्मांगीकारेणापमन्त्राद्वत्वाक्षेप इति सूत्रयति ॥ तथा च ब्रह्मप्रधानयोर्विकल्पे
कपिलप्रभृतिभिः परिगृहीतमिति प्रसज्यते । तथा च तेषां शाखिनामन्यपरत्वं न प्रतिपाद्यते तावत्सर्वज्ञं ब्रह्म जगतः कार
णमिति प्रतिपादितमप्याकुलीभवेत् । अतः तेषामन्यपरत्वं दर्शयितुं परः संदर्भः प्रवर्तते । आनुमानिकमपि
अनुमाननिरूपितमपि प्रधानमेकेषां शाखिनां शब्दवदुपलभ्यते । काठके हि पठ्यते । महतः परमव्यक्तमव्यक्ता
त्पुरुषः पर इति । तत्र य एव यन्नामानो यत्क्रमाश्च महदव्यक्तपुरुषाः स्मृतिप्रसिद्धाः त एवेह प्रत्यभिज्ञायन्ते ॥
तत्राव्यक्तमिति स्मृतिप्रसिद्धेः शब्दादिहीनत्वाच्च न व्यक्तमव्यक्तमिति व्युत्पत्तिसंभवात् स्मृतिप्रसिद्धं प्रधान
मभिधीयते । तस्य च शब्दवत्त्वादशब्दत्वमनुपपन्नं । तदेव जगतः कारणं श्रुतिस्मृतिन्यायप्रसिद्धिभ्य इति चेत् ॥ ॥
न कारणत्वात् ब्रह्मण्येव वेदांतानां समन्वय इति पूर्वपक्षे नियमासिद्धिः फलं सिद्धांते नियमसिद्धिरिति विवेकः । पदविचा
रत्वादधिकरणानामेतत्पादसंगतिर्बोध्या । स्मार्तक्रमरूढिभ्यां अव्यक्तशब्दः प्रधानपरः शब्दस्पर्शादिशून्यत्वेन योगसंभ
वादित्याह ॥ शब्दादीति ॥ प्रधानस्य वैदिकशब्दवाच्यत्वे का क्षतिरित्यत आह ॥ तदेवेति ॥ अजामेकामित्याद्या श्रुतिः ॥ ॥

हेतुप्रकृतिरुच्यत इत्याद्यास्मृतिः यद्व्यक्तं जडप्रकृतिकमिति न्यायः ॥ नत्तो ब्रह्मैव कारणमिति मतक्षतिरिति भावः ॥ सूत्रे नञर्थं वद
न्सिद्धांतयति ॥ नेतदिति ॥ प्रधानं वैदिकं नेत्यत्र तात्पर्याभावं हेतुमाह ॥ नहीति ॥ ननु प्रधानस्यात्र प्रसक्ति ज्ञानाद्वैदिकत्व

स्मृ

नैतदेवं ॥ न ह्येतत्काठकवाक्यं स्मृतिप्रसिद्धयोर्महदव्यक्तयोरस्तित्वपरं ॥ न ह्यत्र यादृशं स्मृतिप्रसि
द्धं स्वतंत्रं कारणं त्रिगुणं प्रधानं तादृशं प्रत्यभिज्ञायते शब्दमात्रं ह्यत्राव्यक्तमिति प्रत्यभिज्ञायते
स च शब्दो न व्यक्तमव्यक्तमिति यौगिकत्वादन्यस्मिन्नपि सूक्ष्मे सुदुर्लक्ष्ये च प्रयुज्यते ॥ न चायं कस्मिं
श्चिद्रूढः ॥ या तु प्रधानवादिनां रूढिः सा तेषामेव पारिभाषिकी सती न वेदार्थनिरूपणे कारण
भावं प्रतिपद्यते न च क्र ॥ ॥ २

मित्यत आह ॥ न ह्यत्रेति ॥ ननु शब्दप्रत्यभिज्ञायामर्थोऽपि प्रत्यभिज्ञायत इत्याशंक्य यौगिकाच्छब्दादसति नियामके नार्थविशेष
धीरित्याह ॥ स चेति ॥ रूढ्यार्थधीरित्याशंक्य रूढिः किं लौकिकी स्मार्ता वा नाद्य इत्याह ॥ न चेति ॥ द्वितीयं प्रत्याह ॥ या त्विति ॥ पुरुष
संकेतो नानादिवेदार्थनिर्णयहेतुः पुंमतेर्वैचित्र्यादित्यर्थः ॥ यत्तु स्मार्तक्रमप्रत्यभिज्ञया क्र ॥ ॥ ॥ १ ॥

भिकार्थः स्मार्त एवेति चेदाह ॥ नचिकेतमिति ॥ गात्तद्रूपप्रत्यभिज्ञानशंकाया असत्त्वात् यत्नं त्वथा तज्ज्ञोथस्यासेनात्तद्रूपविरुद्धस्य
प्रत्यभिज्ञाने सतीत्यर्थः पूर्वज्ञाततद्रूपार्थस्य स्थाने तद्विरुद्धज्ञाने सति तस्य धीनाशात् इत्यत्र दृष्टांतमाह ॥ नहीत्येति ॥ प्रकृते नास्ति विरु
द्धज्ञानं इत्याशंक्य प्रकरणाच्छरीरज्ञानमसत्त्यादाह ॥ प्रकरणेति ॥ शरीरमेव रथरूपकेण रथसादृश्येन विन्यस्तं शरीररूपक
विन्यस्तं तस्य पूर्ववाक्ये आत्मबुद्ध्योर्मध्यस्थाने पठितत्वात् अपि मध्यस्थेनाव्यक्तशब्देन ग्रहणात् प्रधानस्य वैदिकत्वमिति सूत्रा

ममात्रसामान्यात्समानार्थप्रतिपत्तिर्भवति असति तद्रूपप्रत्यभिज्ञाने । न ह्यश्वस्थाने गां पश्यन्नश्वोयमित्यमूढोध्यवस्यति । प्रके
रणनिरूपणायां चात्र न परपरिकल्पितं प्रधानं प्रतीयते शरीररूपकविन्यस्तमव्यक्तशब्देन परिशिष्यते । कुतः प्रकरणात्परि
शेषाच्च । तथाह्यनंतरातीते ग्रंथे आत्मशरीरादीनां रथिरथादिरूपकक्लृप्तिं दर्शयति । आत्मानं रथिनं विद्धि शरीरं रथमे
व तु ॥ बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च इंद्रियाणि हयानाहुर्विषयांस्तेषु गोचरान् आत्मेंद्रियमनोयुक्तं भोक्तेत्याहु
र्मनीषिण इति तैश्चेंद्रियादिभिरसंयतैः ॥ ॥

र्थः ॥ स्मार्तः क्रमः किमिति स्यादेकपदस्याशंक्य श्रौतक्रमस्य प्रकरणाद्यनुग्रहेण बलवत्त्वादित्याह ॥ कुत इत्यादिना तदुभयं विवृणो
प ति । तथाहीति रूपकक्लृप्तिः सादृश्यकल्पना प्रग्रहो रश्मिरज्जुः । यस्तु बुद्धिसारथिर्विवेकी तदा मनसेंद्रियहयान् विषमविषयमार्गा
दाकर्षति । यदा विवेकी तदा मनोरश्म्या बद्धांस्तान् प्रवर्तयतीति मनसः प्रग्रहत्वमुक्तं । तेषु हयेषु गोचरान्मार्गान्नन्नु ॥ ॥

तआ

स्तत्त्वविदात्मनो भोगासंभवात् किं रथादिनेत्यत्राह। आत्मेति। आत्मा देहः देहादिसंगकल्पनया भोक्तृत्वं न स्वतो असंगत्वादित्यर्थः॥ अधुना
रथादिभिः गन्तव्यं वदन् आकांक्षापूर्वकमुत्तरवाक्यमादत्ते। सोऽध्वेत्यादिना शरीरस्य प्रकृतत्वेपि अव्यक्तपदेन प्रधानं गृह्यतामि

संसारमधिगच्छति। संयत्ते स्वध्वनः पारं विष्णोः परमं पदमाप्नोति। तिदर्शितत्वात्किं तदध्वनः पारं विष्णोः परमं पद
मित्यस्यामाकांक्षायां तेभ्य एव प्रकृतेभ्यः इन्द्रियादिभ्यः परत्वेन परमात्मानमध्वनः पारं विष्णोः परमपदं दर्शयति
इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान् परः महतः परमव्यक्तमव्यक्तात्पुरुषः
परः पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिरिति॥ तत्र य एवेन्द्रियादयः पूर्वस्मिन् रथरूपककल्पनायां ह्यश्वादिभा यां
वेन प्रकृतास्त एवेह परिगृह्यन्ते प्रकृतहानाप्रकृतप्रक्रियापरिहाराय। तत्रेन्द्रियमनोबुद्धयस्तावत्पूर्वत्रेह च समा
नशब्दा एव। अर्था हि शब्दादयो विषया इन्द्रियहयगोचरत्वेन निर्दिष्टास्तेषां चेन्द्रियेभ्यः परत्वं इन्द्रियाणां ग्रहत्वं विष
याणामतिग्रहत्वमिति श्रुतिप्रसिद्धेः। विषयेभ्यश्च मनसः परत्वं मनोमूलत्वाद्विषयेन्द्रियव्यवहारस्य मनसस्तु ३
परा बुद्धिर्बुद्धिस्था ह्यारुह्य भो

स्तत्त्वत्राह। तत्र य एवेति एवं प्रकरणं शोधयित्वा शरीरस्य परिशेषतामानयति। तत्रेन्द्रियेत्यादिना। अर्थानां पूर्वमनुक्तेः शंकां वारय
न् परत्वमुपपादयति। अर्था इति। ग्रहत्वं ति पुरुषपशुं बध्नन्तीति ग्रहाः इन्द्रियाणि तेषां ग्रहत्वं विषयाधीनं असति विषये तेषाम
किंचित्करत्वात्ततो ग्रहेभ्यः श्रेष्ठा अतिग्रहा विषया इति बृहदारण्यके॥ ॥ ॥

कैश्चयणात्॥ परत्वं श्रैष्ठ्याभिप्रायं न तांतरत्वेनेतिभावः॥ सविकल्पकज्ञानं मनः निर्विकल्पनिश्चयात्मिका बुद्धिरात्मशब्दात् स एव बुद्धेः
परः प्रत्यभिज्ञायतत्त्वेषः॥ हिरण्यगर्भाभेदेन ब्रह्मादिपदवेद्या समष्टिबुद्धिः महानित्याह॥ अथ चेति॥ मननशक्तिर्व्यापिनी भावि
निश्चयः ब्रह्मात्मा भोग्यवर्गाश्रयः तात्कालिकनिश्चयः कीर्तिशक्तिर्नियमनशक्तिः श्रीकाल्पनि श्रयः संविदभिव्यंजिका चेदध्य

व्यजातं भोक्तारमुपसर्पति बुद्धेरात्मा महान्परो यः स आत्मानं रथिनं विद्धीति रथित्वेनोपक्षिप्तः॥ आत्मशब्दात्। भोक्तु
श्च भोगोपकरणात्परत्वोपपत्तेः॥ महत्त्वं चास्य स्वामित्वादुपपन्नं॥ अथवा। मनो महानिति ब्रह्मा पूर्बुद्धिः ख्यातिरीश्वरः
प्रज्ञा संविच्चितिश्चैव स्मृतिश्च परिपठ्यत इति स्मृतेः। यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै इति च श्रु
तेः या प्रथमजस्य हिरण्यगर्भस्य बुद्धिः सा सर्वासां बुद्धीनां परा प्रतिष्ठा सेह महानात्मेत्युच्यते सा च पूर्वत्र बुद्धिग्रहणे
नैव गृहीता सती हिरुक् इहोपदिश्यते तस्या अपि अस्मदीयाभ्यो बुद्धिभ्यः परत्वोपपत्तेः एतस्मिंस्तु पक्षे परमात्म
विषयेणैव परेण पुरुषग्रहणेन रथिन आत्मनो ग्रहणं द्रष्टव्यं परमार्थतः परमात्मविज्ञानात्मनोर्भेदाभावात्।

त्मेति तत्सर्वाधिष्ठात्री समष्टिबुद्धिरित्यर्थः॥ हिरण्यगर्भस्येयं बुद्धिरस्तीत्यत्र श्रुतिमाह। य इति॥ नन्वप्रकृतता सा कथमुच्यते
तदुक्तौ च प्रधानेन किमपराद्धमित्यत आह॥ सा चेति॥ हिरुक्पृथक् पूर्वं व्यष्टिबुद्ध्यभेदेनोक्ताऽत्र ततो भेदेन परत्वमुच्यत इ
त्यर्थः॥ तर्हि रथपरथिनोर्द्वयोः परिशिष्टो स्यातां नेत्याह॥ एतस्मिंस्त्विति॥ ॥ ॥

अतोरथएवपरिशिष्ट इत्याह ॥ तदेवमिति ॥ तेषु पूर्वोक्तेषु षट्पदार्थेष्वित्यर्थः परिशेषस्य फलमाह ॥ इतराणीति ॥ वेदोयमो
चेतिशेषः ॥ स्वरूपमिति ॥ चेति सूत्रभागो व्याख्यातः ॥ किंच प्रत्यात्मैकत्व परेभ्यो भेदत्वादीनां प्रधानस्यावकाशो नास्तीत्याह ॥ शरीरे

मात्मु ॥ तदेवं शरीरमेवैकं परिशिष्यते ॥ इतराणीन्द्रियादीनि प्रकृतान्येव परमपदं दिदर्शयिषया समनुक्रमान् परि
शिष्यमाणेनेत्यन्तेनाव्यक्तशब्देन परिशिष्यमाणं प्रकृतं शरीरं दर्शयतीति गम्यते ॥ शरीरेन्द्रियमनोबुद्धिविष
यवेदनासंयुक्तस्य ह्यविद्यावतो भोक्तुः शरीरादीनां रथादिरूपकल्पनया संसारमोक्षगतिनिरूपणेन प्रत्यगा क
त्मब्रह्मावगतिरिह विवक्षिता ॥ तथा चैष सर्वेषु भूतेषु गूढोत्मा न प्रकाशते ॥ दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया
सूक्ष्मदर्शिभिरिति ॥ वैष्णवस्य परमपदस्य दुरवगमत्वमुक्त्वा तदवगमार्थं योगं दर्शयति ॥ यच्छेद्वाङ्मनसी प्रा
ज्ञानमात्मनि ज्ञस्तद्यच्छेज्ज्ञान आत्मनि ॥ ज्ञानमात्मनि महति नियच्छेत्तद्यच्छेच्छान्त आत्मनीति ॥ एतदुक्तं भवति ॥ वाचं मनसि संयच्छेत् वागा ५
दिबाह्येन्द्रियव्यापारमुत्सृज्य मनोमात्रेणावतिष्ठेत ॥ मनोपि विषयविकल्पाभिमुखं विषयविकल्पदोषदर्श
नेन ज्ञानशब्दोदितायां बुद्धावध्यवसायस्वभावायां धारयेत् ॥ तामपि बुद्धिं महत्यात्मनि भोक्तर्यग्र्यायां वा बुद्धौ ये
॥ सूक्ष्मतापादनेन नियच्छेत् ॥

स्यादिना भोगो वेदना काठकग्रन्थस्यैकस्य तात्पर्ये गूढत्वेपि तज्ज्ञानहेतुयोगविधयो लिङ्गानि संतीत्याह ॥ तथा चैषेत्यादिना ॥
अग्र्या समाधिपरिपाकजा वागिस्त्रइती व्याख्येयः ॥ ॥

छांदसः॥ मनसीति दैर्घ्यं च शंकोत्तरत्वेन स्पष्टं व्याचष्टे॥ उक्तमेतदित्यादिना॥ कार्यकारणयोरभेदात् मूलप्रकृतिवाचकाव्यक्तशब्देन

महांतं तत्समानं शांत आत्मनि प्रकरणवति परस्मिन्पुरुषे परस्यां काष्ठायां प्रतिष्ठापयेदिति तदेवं पूर्वापरालोचनायां नास्त्यत्र परपरिकल्पितस्य प्रधानस्यावकाशः॥ सूक्ष्मं तु तदर्हत्वात्॥ उक्तमेतत् प्रकरणपरिशेषाभ्यां शरीरमव्यक्तशब्दं न प्रधानमिति इदमिदानीमाशंक्यते॥ कथमव्यक्तशब्दार्हत्वं शरीरस्य॥ यावता स्थूलत्वात् स्पष्टतरमिदं शरीरं व्यक्तशब्दार्हं॥ अस्पष्टवचनस्त्वव्यक्तशब्द इति॥ अत उत्तरमुच्यते॥ सूक्ष्मं त्विह कारणात्मना शरीरं विवक्ष्यते॥ सूक्ष्मस्याव्यक्तशब्दार्हत्वात्॥ यद्यपि स्थूलमिदं शरीरं न स्वयमव्यक्तशब्दमर्हति तथापि तस्य त्वारंभकं भूतसूक्ष्ममव्यक्तशब्दमर्हति प्रकृतिशब्दश्च विकारे दृष्टः॥ यथा गोभिः श्रीणीत मत्सरमिति श्रुतिः अत इदं तर्ह्यव्याकृतमासीदिति॥ इदमेव व्याकृतनामरूपविभिन्नं जगत् प्रागवस्थायां परित्यक्तव्याकृतनामरूपं बीज॥ ॥

विकारो लक्ष्यत इत्यर्थः॥ गोभिर्गोविकारैः पयोभिः मत्सरं सोमं श्रीणीत मिश्रितं कुर्यादिति यावत्॥ श्रीञ् पाक इति धातोर्लोटो मध्यमपुरुषबहुवचनमेतत्

अव्यक्तात्मना कार्यस्याव्यक्तशब्दयोग्यत्वमानमाह ॥ कृतिश्चेति ॥ तर्हि प्रागवस्थायामिदं जगदव्याकृतमासीत् इत्यादिश्रुतेरर्थः ॥ बीज
रूपाशक्तिः संस्कारस्तद्वत्त्वं ॥ अथापि प्रांतरेकोत्तरत्वेन सूत्रं व्याचष्टे ॥ अत्राहेत्यादिना ॥ तर्हि तदा एवं सति सूक्ष्मशब्दितप्राग

वस्थवस्तु मव्यक्तशब्दयोग्यं दर्शयति ॥ तदधीनत्वादर्थवत् ॥ अत्राह ॥ यदि जगदिदमनभिव्यक्तनामरूपं बी
जात्मकं प्रागवस्थमव्यक्तशब्दार्हमभ्युपगम्येत । तदात्मना च शरीरस्याप्यव्यक्तशब्दार्हत्वं प्रतिज्ञायेत । स
एव तर्हि प्रधानकारणवाद एवं सत्यापद्येत अस्यैव जगतः प्रागवस्थायाः प्रधानत्वेनाभ्युपगमादिति
अत्रोच्यते । यदि वयं स्वतंत्रां कांचित्प्रागवस्थां जगतः कारणत्वेनाभ्युपगच्छेम प्रसंजयेम तदा प्रधानका
रणवादं परमेश्वराधीना त्वियमस्माभिः प्रागवस्था जगतोऽभ्युपगम्यते । न स्वतंत्रा सा चावश्याभ्युपगं
तव्या । अर्थवती हि सा न हि तया विना परमेश्वरस्य स्रष्टृत्वं सिध्यति शक्तिरहितस्य प्रवृत्त्यनुपपत्तेः ५
मुक्तानां च पुनर्बंधस्यानुत्पत्तिः विद्यया तस्याः ॥ ॥ ॥

वस्थाभ्युपगमे सति ईश्वरे कल्पितात्तन्नियम्यसंगीकारात् । नापसिद्धांत इत्याह ॥ अत्रोच्यत इत्यादिना कूटस्थब्रह्मणः स्रष्टृत्वसि
द्ध्यर्थं अविद्यास्वीकार्यैव बंधमुक्तिव्यवस्था ॥ ॥

स्वार्थमपि साक्षी कार्यं स्यादाह॥ मुक्तानामिति॥ यत्कारणमुक्तिः साक्षी कार्या तां विनैव स्वरूपेण मुक्तानां पुनर्बन्धापत्तिरित्यर्थः॥ तस्याः परकल्पितत्वस्य
स्वतन्त्रप्रधानाद्भेदं स्पष्टमाह॥ अविद्येत्यादिना॥ मायामयी प्रसिद्धमायोपमिता लोके मायाविनो मायावत्परतन्त्रेत्यर्थः॥ जीवभेदोपाधित्वे

बीजशक्तेरीहातु॥ अविद्यात्मिका हि बीजशक्तिरव्यक्तशब्दनिर्देश्या परमेश्वराश्रया मायामयी महासुषुप्तिर्यस्यां
स्वरूपप्रतिबोधरहिताः शेरते संसारिणो जीवाः तदेतदव्यक्तं क्वचिदाकाशशब्दनिर्दिष्टं॥ एतस्मिन्नु खल्वक्ष
रे गार्ग्याकाश ओतश्च प्रोतश्चेति श्रुतेः क्वचिदक्षरशब्दोदितं अक्षरात्परतः पर इति श्रुतेः॥ क्वचिन्मायेति सूचि
तं॥ मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरमिति मन्त्रवर्णात्॥ अव्यक्ता हि सा माया तत्त्वान्यत्वाभ्यां निरूपयितुमशक्यत्वात्। तदिदं महतः परमव्यक्तमित्युक्तं॥ अव्यक्तप्रभवत्वान्महतः॥ यदा हैरण्य॥ ॥

नापि साक्षी कार्यं स्यादाह॥ महासुषुप्तिरिति॥ बुध्याद्युपाधिभेदाज्जीवा इति बहूक्तिः॥ अविद्यायां श्रुतिमप्याह॥ तदेतदिति॥ आकाशशब्देनुत्वा
दाकाशः ज्ञानं विना तासाध्यादक्षरं॥ विचित्रकारित्वान्मायेति भेदः॥ इदानीमविद्यायास्तत्त्वाभेदाभ्यामनिर्वाच्यत्वेनाव्यक्तशब्दाहेतु
माह॥ अव्यक्तेति॥ ■ ॥ ॥

तस्य महतः परत्वं कथमित्यत आह ॥ तदिदमिति ॥ यदा बुद्धिर्महान् तदा तद्धेतुसात्परत्वमित्यन्वयः प्रतिबिंबस्योपाधिपरतंत्रत्वादुपाधेः प्र
तिबिंबात्परत्वमाह ॥ यदा त्विति हेतुं स्फुटयति ॥ अविद्येति अव्यक्तस्य परत्वे पि शरीरस्य किं जातं तदाह ॥ तत्रेति ॥ तन्निंद्रियादीनामप्यव्य

॥ भ॰ ३ बुद्धिर्महान् ॥ यदा तु जीवो महान् तदाप्यव्यक्ताधीनत्वाज्जीवभावस्य महतः परमव्यक्तमित्युक्तं अविद्या ह्यव्यक्तं
अविद्यावत्त्वेनैव जीवस्य सर्वः संव्यवहारः संततो वर्तते तच्चाव्यक्तगतं महतः परत्वमभेदोपचारात्तद्विकारे श
रीरे परिकल्प्यते सत्यपि शरीरवदिंद्रियादीनां तद्विकारत्वाविशेषे शरीरस्यैवाभेदोपचारादव्यक्तशब्देन ग्रह
णं इंद्रियादीनां स्वशब्दैरेव गृहीतत्वात् परिशिष्टत्वाच्च शरीरस्य । अन्ये तु वर्णयंति । द्विविधं हि शरीरं स्थूलं सू
क्ष्मं च स्थूलं यदिदमुपलभ्यते सूक्ष्मं च यदुत्तरत्र वक्ष्यते । तदंतरप्रतिपत्तौ रंहति संपरिष्वक्तः प्रश्ननि॥ ॥ ॥ ६

काभेदादव्यक्तत्वं परत्वं च किमिति नोच्यते तत्राह ॥ सत्यपीति ॥ स्वशब्दैरिंद्रियशब्दैरित्यर्थः ॥ सूत्रद्वयस्य वृत्तिकृद्व्याख्यानमुत्थापयति ॥ अ
न्ये त्विति । पंचीकृतभूतानां सूक्ष्मावयवाः स्थूलदेहारंभकाः सूक्ष्मशरीरं प्रतिजीवं लिंगस्याभ्युपेते न नियतमस्तीति वक्ष्यते । देहांतरप्रा
प्तौ तेन युक्तो गच्छति परलोकमित्यर्थः ॥ कथं तस्य महतो जीवात्परत्वमित्या ॥ ॥

शंक्य द्वितीयसूत्रं व्याचष्टे ॥ तदधीनत्वाच्चेति ॥ अर्थवदित्ति सूत्रस्थं दृष्टांतमाह ॥ यथेति ॥ तद्व्याख्यानं दूषयति ॥ तैरिति ॥ अव्यक्तप
दबलात्प्रकृतमपि स्थूलं त्यज्यत इति शंकते ॥ आम्नातस्येति ॥ एकार्थबोधकानां शब्दानां मिथ आकांक्षयैकस्यां बुद्धावारूढत्वमे

रूपणाभ्यामिति ॥ तत्त्वोभयमपि शरीरमविशेषात् पूर्वं त्ररथत्वेन संकीर्तितं इह तु सूक्ष्ममव्यक्तशब्देन परिगृह्य
ते सूक्ष्मस्याव्यक्तशब्दार्हत्वात् तदधीनत्वाच्च बंधमोक्षव्यवहारस्य जीवात्तस्य परत्वं यथार्थाधीनत्वादिंद्रियव्यापा
रस्येंद्रियेभ्यः परत्वमर्थानामिति ॥ तेस्त एतदुक्तं भवति अविशेषेण शरीरद्वयस्य पूर्वं त्ररथत्वेन संकीर्तितत्वात्स
मानयोः प्रकृतत्वपरिशिष्टत्वयोः कथं सूक्ष्ममेव शरीरमिह गृह्यते न पुनः स्थूलमपीति ॥ आम्नातस्यार्थं प्रति
पत्तुं प्रभवामो नाम्नातं पर्यनुयोक्तुं आम्नातं चाव्यक्तपदं सूक्ष्ममेव प्रतिपादयितुं शक्नोति नेतरत् ॥ व्यक्तत्वात्त
स्येति चेत् ॥ न एकवाक्यताधीनत्वादर्थप्रतिप त्तेः ॥ न हीमे पूर्वोत्तरे आम्नाते एकवाक्यताम् ॥ ॥

कवाक्यतात्वमते तस्या आभावात्कुतोऽर्थबोध इति समाधत्ते ॥ नेति ॥ तां विनापि अर्थधीः किं न स्यादित्यत आह ॥ नहीति शरीरश
ब्देन रूढ्या स्थूलं प्रकृतं तस्य हानिरप्रकृतस्य ॥ ॥

मूलस्य सूक्ष्मस्याव्यक्तपदेन ग्रहणमव्याप्यं स्यादित्यर्थः ॥ अस्त्वेकवाक्यत्वेत्यत आह ॥ नचेति ॥ ततः किं तत्राह ॥ तत्रेति ॥ आकांक्षया
वाक्यैकवाक्यत्वे सति प्रकृतं शरीरद्वयमव्यक्तपदेन ग्राह्यं ॥ आकांक्षायास्तुल्यत्वादिति भावः ॥ अनात्मनिश्रयः शुद्धिः तदर्थं

नापघकं चिदर्थं प्रतिपादयतः प्रकृतहानाप्रकृतप्रक्रियाप्रसंगात् ॥ नचाकांक्षामंतरेणैकवाक्यताप्रति
पत्तिरस्ति ॥ तत्राविशिष्टायां शरीरद्वयस्य ग्राह्यताकांक्षायां यथाकांक्षं संबंधे अनभ्युपगम्यमाने एकवा
क्यत्तेव बाधिता भवति कुतः ॥ आम्नातस्यार्थप्रतिपत्तिः ॥ नचैवं मंतव्यं दुःशोधत्वात्सूक्ष्मस्यैव शरीरस्ये
ह ग्रहणं स्थूलस्य तु दृष्टबीभत्सतया सुशोधतादग्रहणमिति ॥ यतो नैवेह शोधनं कस्यचिद्विवक्षितं नह
प्रशोधनं विधीयते ॥

सूक्ष्ममेवाकांक्षितं ग्राह्यं ॥ तस्य सूक्ष्मत्वेनात्माभेदेन गृहीतस्य दुःशोधत्वात् ॥ स्थूलस्य स्य दृष्टदोर्गंध्यादिनाऽलशुनादिवत् ॥ अनात्मत्व
धीवैराग्ययोः सुलभत्वादिति शंकते ॥ नचेति ॥ दृष्टबीभत्सा घृणा यस्मिन् तस्य भावस्तत्ता तात्पर्यस्यार्थः ॥ दूषयति ॥ एतदिति वैराग्याय
शुद्धिरत्र न विवक्षिता ॥

ताविध्यभावात्किंतु वैष्णवं परमं पदं विवक्षितमिति तद्दर्शनार्थं प्रकृतं सूक्ष्ममेवाव्यक्तपदेन ग्राह्यमिति भावः॥ किंच॥ सूक्ष्मस्य लिंगांतःपाति
नः इंद्रियादिग्रहणेनैव ग्रहणान्न पृथगव्यक्तशरीरपदाभ्यां ग्रहः॥ अभ्युपेत्याह॥ सर्वथेति॥ स्थूलस्य सूक्ष्मस्य वा ग्रहेपीत्यर्थः॥ तथा
नामेति सूक्ष्ममेवाव्यक्तमस्त्वित्यर्थः॥ अत्राव्यक्तं प्रधानं नेत्यत्र हेत्वंतरपरं सूत्रं॥ ज्ञेयत्वेति॥ सत्त्वादिगुणरूपात्प्रधानात्पुरुषस्यांतरं

किंचिदाख्यातमस्ति॥ अनंतरनिर्दिष्टत्वात्तु किंतद्विष्णोः परमं पदमिति दूरमिह विवक्ष्यते॥ तथा हि दूरमस्मात्परमिदम
स्मात्परमित्युक्तौ पुरुषान्न परं किंचिदित्याह॥ सर्वथापि त्वानुमानिकनिराकरणोपपत्तेस्तथा नाम्नातनैः किंचिच्छि ७
ष्यते॥ ज्ञेयत्वावचनाच्च॥ ज्ञेयत्वेन च सांख्यैः प्रधानं स्मर्यते गुणपुरुषांतरज्ञानात्कैवल्यमिति वदद्भिः न हि गुणस्वरू
पमज्ञात्वा गुणेभ्यः पुरुषस्यांतरं शक्यं ज्ञातुमिति॥ क्वचिच्च विभूतिविशेषप्राप्तये प्रधानं ज्ञेयमिति स्मरंति न चेदमि
हाव्यक्तं ज्ञेयत्वेनोच्यते॥ पदमात्रं ह्यव्यक्तशब्दो नेहाव्यक्तं ज्ञातव्यमुपा॥ ॥

भेदस्तत्ज्ञानादित्यर्थः॥ न हि शक्यमिति च वदद्भिः प्रधानं ज्ञेयत्वेन स्मर्यत इति संबंधः॥ न केवलं भेदप्रतियोगित्वेन प्रधानस्य ज्ञेय
त्वं तैरिष्टं किंतु तस्योपासनयाणिमादिप्राप्तयेपीत्याह॥ क्वचिच्चेति॥ ज्ञानविध्यभावेप्यव्यक्तपदजन्यज्ञानगम्यत्वमात्रेण ज्ञेयत्वंम
स्तीत्यत आह॥ न चानुपदिष्टमिति॥ उपदिष्टं हि ज्ञानं फलवदिति ज्ञातुं शं॥ ॥

क्यं निष्फलस्योपदेशायोगाद् व्यक्तस्य च ज्ञानानुपदेशात् फलवत्॥ ज्ञानगम्यत्वासिद्धिरित्यर्थः॥ फलितमाह॥ तस्मादिति सांख्येष्टफल
ज्ञानगम्यत्वावचनाच्चेत्यर्थः नन्वनुशरीरस्यापि ज्ञेयत्वानुक्तेः कथमिह ग्रहणं तत्राह॥ अस्माकं त्विति॥ अस्मन्मते विज्ञाख्यपदस्यैक

सितत्यं वेतिवाक्यमस्ति॥ न चानुपदिष्टपदार्थज्ञानं पुरुषार्थमिति शक्यं प्रतिपत्तुं॥ तस्मादपि नाव्यक्तशब्देन प्रधान
मभिधीयते॥ अस्माकं तु रथरूपककॢप्तशरीराद्यनुसारेणैव विष्णोरेव परमं पदं दर्शयितुमयमुपन्यासः इत
यथं॥ वदतीति चेन्न प्राज्ञोहि प्रकरणात्॥ अत्राह सांख्यो ज्ञेयत्वावचनादित्यसिद्धं कथं श्रूयते हि उत्तरत्राव्यक्त
शब्दोदितस्य प्रधानस्य ज्ञेयत्ववचनं॥ अशब्दमस्पर्शमरूपमव्ययं तथारसं नित्यमगंधवच्च यत्॥ अनाद्यनं २
तं महतः परं ध्रुवं निचाय्य तं मृत्युमुखात् प्रमुच्यत इति॥ अत्र हि यादृशं शब्दादिहीनं प्रधानं महतः परं स्मृतौ
निरूपितं तादृशमेव निचाय्यत्वेन निर्दिष्टं॥ तस्मात् प्रधानमेवेदं तदेव चाव्यक्तशब्दनिर्दिष्टमिति चेत्॥ ॥

स्यैव ज्ञेयत्वात् सदृशार्थमव्यक्तपदेन शरीरोपन्यासो युक्त इत्यर्थः साधारणशब्दमात्रात् प्रधानस्य प्रत्यभिज्ञा तस्मात्तल्लिंगस्या
नुल्ल्याभियामकाभावादिति॥ स्थित्रे पुनः

तात्पर्यलिंगोक्तिमात्रं कानिषेधति ॥ वदतीति चेदिति ॥ अत्र हि तादृशमेव निर्दिष्टमिति संबन्धः ॥ स्पष्टमन्यत् ॥ किंचात्र कठवल्ल्यां प्रधा

यं ब्रूमः नेह प्रधानं निचाय्यत्वेन निर्दिष्टं ॥ प्राज्ञो हीह परमात्मा निचाय्यत्वेन निर्दिष्ट इति गम्यते ॥ कुतः प्रकर
णात् ॥ प्राज्ञस्य हि प्रकरणं वितत्तं वर्त्तते पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिरित्यादिनिर्देशात् ॥ ए
ष सर्वेषु भूतेषु गूढोत्मा न प्रकाशत इति च दुर्ज्ञानत्ववचनेन तस्यैव ज्ञेयत्वाकांक्षणात् ॥ यच्छेद्वाङ्मनसी प्रा
ज्ञ इति च तद्विज्ञानायैव वागादिसंयमस्य विहितत्वात् ॥ मृत्युमुखप्रमोक्षणफलत्वाच्च ॥ न हि प्रधानमात्रं
निचाय्य मृत्युमुखात्प्रमुच्यत इति सांख्यैरिष्यते ॥ चेतनात्मविज्ञानाद्धि मृत्युमुखात्प्रमुच्यत इति तेषामभ्यु
पगमः ॥ सर्वेषु वेदान्तेषु प्राज्ञस्यैवात्मनो शब्दादिधर्मत्वमभिलप्यते ॥ तस्मान्न प्रधानस्यात्र ज्ञेयत्वमव्यक्त
शब्दनिर्दिष्टत्वं वा ॥ त्रयाणामेव चैवमुपन्यासः प्रश्नश्च ॥ इतश्च न प्रधानस्याव्यक्तशब्दवाच्यत्वं ज्ञेयत्वं वा ॥ य

नस्य प्रश्नोत्तरयोरसत्वान्न ग्रहणमित्याह ॥ त्रयाणामिति ॥ मृत्युना नचिकेतसं प्रति त्रीन्वरान्वृणीष्वेत्युक्तत्वात्त्रयाणामेव ॥

प्रश्नो नचिकेतसा कृतः उपन्यासश्च मृत्युना कृतो नान्यस्येत्यर्थः प्रश्नत्रयं क्रमेण पृच्छति तत्र नाचिकेत इति हे मृत्यो स त्वमग्निं तत्त्वरस्त्वं
स्वर्ग्यहेतुमग्निं स्मरसि प्रेते मृते देहाद्भिन्नोऽस्ति नेति संशयोऽस्ति अग्न एतदात्मतत्त्वं संदिग्धं जानीयामित्यर्थः क्रमेणोत्तरत्रयमा

नातोन्यस्यप्रश्नः स्यात्रयाणामेव पदार्थानामग्निजीवपरमात्मनामस्मिन् ग्रन्थे कठवल्लीषु वरप्रदानसामर्थ्याद्धृत्क्रयतयोपन्या
सो दृश्यते तद्विषय एव च प्रश्नः उपन्यासो वास्ति तत्र तावत् स त्वमग्निं स्वर्ग्यमध्येषि मृत्यो प्रब्रूहि त्वं श्रद्दधाना
य मह्यमित्यग्निविषयः प्रश्नः येयं प्रेते विचिकित्सा मनुष्येऽस्तीत्येके नायमस्तीति चैके एतद्विद्यामनुशिष्टस्त्वयाहं वराणा
मेष वरस्तृतीय इति जीवविषयः अन्यत्र धर्मादन्य [ली से] त्राधर्मादस्मात्कृताकृतात् अन्यत्र भूताच्च भव्याच्च
यत्तत्पश्यसि तद्वदेति परमात्मविषयः प्रतिवचनमपि लोकादिमग्निं तमुवाच तस्मै या इष्टका यावतीर्वा यथा १
वेत्यग्निविषयं हन्त त इदं प्रवक्ष्यामि गुह्यं ब्रह्म सनातनम् ॥ ॥

ह प्रतिवचनमपीति लोकहेतुं विराडात्मनोपास्यत्वाल्लोकादिं चित्योऽग्निरुक्तं मृत्युरुवाच नचिकेतसे याः स्वरूपतो यावतीः संख्याताः यथा
वा क्रमेण

न्विश्वी यत्तत्सर्वमुवाचेत्यर्थः॥ हंत ते दानीं गुह्यं वक्ष्यामीति गुह्यवाक्येन जीवप्रश्नाद्व्यवहितमपि यथा च मरणमित्यादिवाक्यं जीवविषयमुत्त
रं योग्यत्वादित्यर्थः॥ वाक्यार्थस्तु आत्मा मरणं प्राप्य यथा भवति तथा वक्ष्यामीति प्रतिज्ञातमाह योनिमिति चराचरदेहप्राप्तौ निमित्तमा

यथा च मरणं प्राप्य आत्मा भवति गौतम॥ योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः स्थाणुमन्येऽनुसंयन्ति यथाकर्म यथा
श्रुतमिति व्यवहितं जीवविषयं। न जायते म्रियते वा विपश्चिदित्यादिबहुप्रपंचं परमात्मविषयं नैवं प्रधानविष
यः प्रश्नोऽस्ति अपृष्ट साध्यानुपन्यसनीयत्वं तस्येति॥ अत्राह। यायमात्मविषयः प्रश्नो येयं प्रेते विचिकित्सा मनुष्ये
इति किं स एवायमन्यत्र धर्मादन्यत्राधर्मादिति पुनरनुकृष्यते किं वा ततोऽन्योऽयं पूर्वः प्रश्न[illegible]उत्थाप्यते इति किं चातः स
एवायं प्रश्नः पुनरनुकृष्यत इति यद्युच्येत द्वयोरात्मविषययोः प्रश्नयोरेकतापत्तेर्द्विविषयश्चात्मविषयश्च
द्वावेव प्रश्नावित्यतो न वक्तव्यं त्रयाणां प्रश्नोपन्या॥ ॥

म उ

हः। यथेति श्रुतमुपासनं सूत्रे आद्यश्चकारो यत इत्यर्थः एवं त्रयाणामेवोपन्यासः प्रश्नश्च यतः अतो न प्रधानं अव्यक्तमिति योजना॥

उक्तार्थसूत्रमाक्षिपति॥ अत्राहेति॥ एकः प्रश्नः द्वौ प्रश्नौ वेति पक्षद्वये फलितं स्पष्टयति॥ किंचात इति सप्तम्यर्थे तसिः अत्र च पक्षद्वयेपि
किमित्यर्थः प्रश्नैक्यपक्षे त्वसंगतिः भेदे प्रधानस्य श्रौतत्वसिद्धिरिति पूर्ववाद्याह॥ यद्येवेत्यादिना॥ प्रश्नैक्यपक्षमादाय सिद्धांत्याह

स्यादिति॥ अर्थान्योपपूर्वः प्रश्नः उपाख्यानस्य कल्प्येत॥ ततो यथैव वरप्रदानव्यतिरेकेण प्रश्नकल्पनायामदोषः ए
वं प्रश्नव्यतिरेकेणापि प्रधानोपन्यासकल्पनायामदोषः स्यादिति॥ अत्रोच्यते नैवं वयमिह वरप्रदानव्यतिरेकेण
प्रश्नं कंचित्कल्पयामः वाक्योपक्रमसामर्थ्यात्तु वरप्रदानोपक्रमा हि मृत्युनचिकेतःसंवादरूपा वाक्यप्रवृत्तिरास
माप्तेः कठवल्लीनां लक्ष्यते॥ मृत्युः किल नचिकेतसे पित्रा प्रहिताय त्रीन्वरान्प्रददौ नचिकेताः किल तेषां प्रथमे १०
न वरेण पितुः सौमनस्यं वव्रे द्वितीयेनाग्निविद्यां तृतीयेनात्मविद्यां येयं॥ ॥

अत्रोच्यत इति॥ येन प्रधानसिद्धिः स्यादिति शेषः॥ चतुर्थप्रश्नकल्पने वरत्रित्वोपक्रमविरोधः स्यादिति विवृणोति॥ वरेत्यादिना॥
वरप्रदानमुपक्रमे यस्यां सा प्रहिताय यमलोकं प्रति प्रेषिताय इतः पुनर्मर्त्यलोकं प्राप्तस्य मम पिता यथापूर्वं सुमनाः स्या
दिति प्रथमं वव्रे न तु द्वितीयवरो जीवविषयस्तृतीयो ब्रह्मविषये॥ ॥

तिप्रश्नभेदः किंतत्स्यादित्यत आह ॥ येयमिति ॥ प्रेतेइत्युपलक्षणं म्प्रत्तीयत्तोक्तिलिंगाज्जीवात्मविषयेवत्तत्तीयोवरइत्यर्थः ॥ एवंवाक्योप
क्रमेसतिप्रश्नांतरंनयुक्तमित्याह ॥ तत्रेति ॥ मरणधर्माद्यस्पर्शलिंगाभ्यांप्रष्टव्ययोः जीवेश्वरयोर्भेदात्प्रश्नभेदसिद्धेर्वाक्यबाधोयु

येयंप्रेतेमरणाभिधवरस्तृतीयइतिलिंगात् । तत्रयद्यन्यत्रधर्मादित्यस्योपमपूर्वं प्रश्नत्वमाप्येत ततोवरप्र
दानव्यतिरेकेणापिप्रश्नकल्पनाद्वाक्यंबाध्येत ॥ ननुप्रष्टव्यभेदादपूर्वोयंप्रश्नोभवितुमर्हति । पूर्वोहिप्रश्नोजी
वविषयः येयंप्रेतेविचिकित्सामनुष्येस्तिनास्तीतिविचिकित्साभिधानात् । जीवश्चधर्मादिगोचरत्वान्नान्यत्र
धर्मादितिप्रश्नमर्हति । प्राज्ञस्तु धर्माद्यतीतत्वात् अन्यत्रधर्मादितिप्रश्नमर्हति प्राज्ञस्तु धर्माद्यतीतत्वात् ॥
प्रश्नच्छायाचनसमानालक्ष्यते । पूर्वस्यास्तित्वनास्तित्वविषयत्वादुत्तरस्यधर्माद्यतीतवस्तुविषयत्वात् तस्मा

त्कइतिशंकते नचेत्यादिना गोचरत्वाद्याश्रयत्वात् । नकेवलंप्रष्टव्यभेदात्प्रश्नभेदः किंतुप्रश्नवाक्ययोः सादृश्याभावादपीत्याह
प्रश्नच्छायेति प्रष्टव्यभेदोसिद्धइति परिहरति नेत्यादिना किंचब्रह्मप्रश्नेजन्मादिनिषेधेनजीवस्वरूपंवदन्यमहृदयोरैक्यं
इत्यय

तीत्याह॥ रूह्यान्यत्रेति। तन्निषेधवाक्ये जीवोक्तिरसिद्धेत्यत आह॥ सतीति॥ भागीयुक्तः तस्मादविद्यया जीवस्य प्राप्तजन्मादिनिषेधेन
स्वरूपमुक्तमित्यर्थः किंच जीवो ब्रह्मणो भिन्नः मोक्षहेतुनैः स्रो विषयत्वात्, ब्रह्मवदित्याह॥ तथा स्वप्नेति॥ अंत अंव स्थायेन साक्षि

त्मस्वाभिज्ञानाभावात्तस्माद्भेदो न पूर्वस्यैवोत्तरत्रानुकर्षणमिति चेत्, न जीवब्रह्मणोरैक्याभ्युपगमात्। भवेत्तर्ह
योर्भेदात् ब्रह्मभेदोऽपि अन्यो जीवः प्राज्ञः स्यात्, न तदन्यत्वमस्ति तत्त्वमसीत्यादिश्रुत्यंतरेभ्यः॥ इहचान्यत्र धर्मादित्य
स्य प्रश्नस्य प्रतिवचनं न जायते म्रियते वा विपश्चिदिति जन्ममरणप्रतिषेधेन प्रतिपाद्यमाने शारीरपरमेश्वर
योरभेदः स्यादिति। सति हि प्रसंगे प्रतिषेधो भागी भवति। प्रसंगश्च जन्ममरणयोः शरीरसंस्पर्शाच्छारीरस्य भ ११
वति न परमेश्वरस्य। तथा स्वप्नांतं जागरितांतं चोभौ येनानुपश्यति। महांतं विभुमात्मानं मत्वा धीरो न शोचती
ति स्वप्नजागरितदृशो जीवस्यैव महत्त्वविभुत्वविशेषणस्य मननेन शोकवि॥ ॥

णः प्रमात्मा पश्यतीतमात्मानमिति संबंधः॥ हेतोरप्रयोजकत्वमाशंक्य तमेव विदित्वेत्यादिश्रुतिविरोधमाह॥ प्राज्ञेति॥ किंचाभेदमु

स्काभेदस्य निश्चितत्वादभेद एव सत्य इत्याह ॥ तथेति ॥ इह देहे यच्चैतन्यं तदेवामुत्र स्वर्गादौ एवमिहाखण्डैकरसे ब्रह्मणि यो नानेव मिथ्याभेदं प
श्यति स भेददर्शी मरणान्मरणं प्राप्नोति संसारभयान्न मुच्यत इत्यर्थः ॥ किंच जीवप्रज्ञानान्तरं संदुदर्शी भिन्तियदुत्तरमुवाच तत्तेनाप्युत्तरेण

च्छेदं दर्शयन् न प्राज्ञादन्यो जीव इति दर्शयति प्राज्ञविज्ञानाद्धि शोकविच्छेद इति वेदान्तसिद्धान्तः ॥ तथा यदेवेह तदमुत्र
यदमुत्र तदन्विह । मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यतीति जीवप्राज्ञभेददृष्टिमपवदन्ति । तथा जीवविषयस्या
स्तित्वनास्तित्वप्रश्नस्यानन्तरं ॥ अन्यं वरं नचिकेतो वृणीष्वेत्यारभ्य मृत्युना तैस्तैः कामैः प्रलोभ्यमानोऽपि नचिकेता य
दा न चचाल तदैवं मृत्युरभ्युदयनिःश्रेयसविभागप्रदर्शनेन विद्याविद्याविभागप्रदर्शनेन च विद्याभीप्सितं नचिके
तसं मन्ये न त्वा कामा बहवोलोलु ॥

भेदेऽभ्यतर इति संबंधः प्रष्टृप्रश्नयोः प्रशंसया पिङ्गेन एष्टस्य जीवस्यैवोऽभ्यन्तरद्योतनात् ब्रह्मत्वमित्युपरिस्याह ॥ अन्यं वरं वृणीष्वेत्यादि
ना पुत्रादिकं वृणीष्वेत्युक्तेऽपि विषयांस्तुच्छीकृत्य ज्ञानान्न चचाल नान्यं तस्मा नचिकेता वृणीते त इति श्रवणात् ॥ ॥ ॥

तदा संतुष्टो यमोऽन्यच्छ्रेयोऽन्यदुतैव प्रेय इति भोगापवर्गमार्गयोर्वैलक्षण्यं प्रतिज्ञाय दूरमेते विपरीते विषूची अविद्या या च विद्येति दर्शितवानित्यर्थः
प्रेयः प्रियतमं स्वर्गादिकं विषूची विरुद्धफले अविद्या कर्म विद्या तत्त्वधीः विद्याभीप्सितं विद्यार्थिनं त्वामहं मन्ये यतस्त्वां बहवोऽपि कामाः

पृष्टेति प्रश्नस्य प्रश्नमपि तदीयं प्रशंसं संबध्य दुवाच॥ तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणं॥ अध्यात्मयो
गाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहातीति॥ तेनापि जीवब्रह्मणोरभेद एवेह विवक्षित इति गम्यते॥ यत्प्रश्ननि
मित्तां च प्रशंसां महतीं मृत्योः प्राप्तस्य यद्यत्र नचिकेता यद्दत्तं विहाय प्रशंसानंतरमन्यमेव प्रश्नमुपक्षिपेत्॥ अ
स्थान एव सा सर्वा प्रशंसा प्रसारिता स्यात्॥ तस्माद्ध्येयं प्रेतेत्यस्यैव प्रश्नस्यैतदनुकर्षणमन्यत्र धर्मादिति॥ यत्तु प्र
श्नच्छायावैलक्षण्यमुक्तं तदूषणं॥ तदीयस्यैव विशेषस्य पुनः ९२

पुत्राद्यो मयाऽदीयमानाद्दुर्लभाः अपि नालोलुपंत लोभयंतो न कृतवंत इति प्रशंसां कृत्वा प्रश्नमपि तावद्गोभूय नाचिकेतः पृष्टेति स्तवं नि
स्पष्टार्थः॥ इयं प्रशंसा प्रश्नभेदपक्षे न घटत इत्याह यत्प्रश्नेति॥ यत्प्रश्नेन स्तुतिं लब्धवान् तं प्रश्नं विहाय पचान्य॥

देवो ऽस्थापयेत् प्रेनचसरे स्कृतिः कृतास्यादित्यर्थः॥ तस्मादिति प्रष्टव्यभेदाभावादित्यर्थः॥ प्रश्नवाक्यव्यक्तोः साहृत्याभावात् प्र
श्नभेदरूपं निरस्यति॥ यत्सित्सादिना धर्माधाश्रयस्य जीवस्य ब्रह्मत्वं कथमित्यत आह॥ यावदिति॥ अविद्यानाशानन्तरं ब्रह्मत्वं चेदापन्नं के

पृच्छ्यमानत्वात्॥ पूर्वं ब्रह्मिदेहादिव्यतिरिक्तस्यात्मनो ऽस्तित्वं पृष्टं उत्तरत्र तु तस्यैवासंसारित्वं पृच्छ्यत इति॥ यावदविद्यानि
वर्त्तते तावद्धर्मादिगोचरत्वं जीवस्य जीवत्वं च न निवर्त्तते॥ तन्निवृत्तौ तु प्राज्ञ एव तत्त्वमसीति श्रुत्या प्रत्याय्यते न चाविद्याव
स्थे तदुपगमे च वस्तुनः कश्चिद्विशेषो ऽस्ति यथा कश्चित्संध्यासमये पतितां कांचिद्रज्जुं महिं मन्यमानो भीतो वेपमानः पलायते तं
चापरो ब्रूयात् मा भैषीः नायमहीरज्जुरेषेति स च तदुपश्रुत्याहिकृतं भयं मुञ्चेज्जेद्वेपथुं पलायनं च॥ न तस्त्वहिबुद्धिकाले तद
पगमकाले च वस्तुनः कश्चिद्विशेषः स्यात्। तथैवैतदपि द्रष्टव्यं॥ ततश्च न जायते इत्येवमाद्यपि भवति॥ अस्तित्वप्र
श्नस्य प्रतिवचनं सूत्रं लैंग॥ ॥

मनि सं च स्यादित्यत आह॥ न चाविद्यावत्त्व इति॥ जीवस्य ब्रह्मत्वे स्वाभाविके ब्रह्मत्वप्रश्नस्य यदुत्तरं तज्जीवप्रश्नस्यापि भवतीत्यभिप्रा
यः॥ ततश्च न जायत इति जीवब्रह्मैक्ये त्रयाणामिति सूत्रं कथमित्यत आह॥ सूत्रमिति॥ कल्पितभेदात् प्रश्नभेदकल्पने साह॥ ततश्चेति॥
प

रमात्मनः सकाशात्प्रधानस्य वैधर्म्यमकारणत्वेन तृतीयवर्णं तर्पीयायोगादिति भावः॥ श्रौतोव्यक्तशब्दो न सांख्यासाधारणतत्त्वगोचरः वैदिक
शब्दत्वात् महदादिशब्दवदित्याह॥ महद्वच्चेति॥ सूत्रं व्याचष्टे॥ यथेत्यादिना नचाकाशादिशब्दे व्यभिचारः आकाशादेर्भूतान्तरसाधारणत्वेन सांख्यासा

विद्याकल्पितजीवप्राज्ञभेदापेक्षया योजयितव्यं॥ एकत्वेपि ध्यानविषयस्य प्रश्नस्य प्रापणावस्थायां देहव्यतिरिक्तास्तित्वमात्र
विचिकित्सनात् कर्तृत्वादिसंसारस्वभावानपोहनाच्च पूर्वस्य पर्यायस्य जीवविषयत्वमुत्प्रेक्षते॥ उत्तरस्य तु धर्माद्यन्य
परसंकीर्तनात् प्राज्ञविषयत्वमिति॥ ततश्च युक्तानि जीवपरमात्मकल्पना प्रधानकल्पनायां तु नवरप्रदानं न प्रश्नो न
प्रतिवचनमिति वैधर्म्यं॥ महद्वच्च॥ यथा महच्छब्दः सांख्यैः सत्तामात्रेपि प्रथमजे प्रयुक्तो न तमेव वैदिकेपि प्रयोगे
भिधत्ते बुद्धेरात्मा महान्परः महान्तं विभुमात्मानं वेदाहमेतं पुरुषं महान्तमित्येवमादावात्मशब्दप्रयोगादिभ्यो १३
हेतुभ्यः तथाव्यक्तशब्दोपि न वैदिके॥ ॥

ता धारणासिद्धेः साध्यस्यापि सत्त्वादिति मंतव्यं॥ सत्तामात्रे सत्त्वप्रधानप्रकृतेराद्यपरिणामे निर्विकल्पकबुद्ध्याविस्यर्थः॥ आत्मा महानित्या
त्मशब्दप्रयोगात्तं मत्वा नशोचति तमसः परस्तादित्यादिना शंकास्पदत्वम्। परत्वादिभ्यश्च महच्छब्दः सांख्यतत्त्वं नाभिधत्त इति संबंधः अधि
करणं॥

र्थमुपसंहरति॥ अत आह॥ चमसवदविशेषात्॥ अत्राजापदं विषयः तत्किं प्रधानपरं उत नेति रूपार्थासंभवात् संशये पूर्वत्राव्यक्तशब्दमात्रेण
प्रधानस्याप्रत्यभिज्ञायामप्यत्र त्रिगुणत्वादिलिंगोपेतादजापदात्तत्प्रत्यभिज्ञास्तीति प्रत्युदाहरणेन पूर्वपक्षयति॥ पुनरपीति फलं पू

प्रयोगे प्रधानमभिधातुमर्हति॥ अत आह अजास्यानुमानिकस्य शब्दवत्त्वं॥ चमसवदविशेषात्॥ पुनरपि प्रधानवाचकश
ब्दत्वं प्रधानस्यासिद्धमित्याह कस्मात् मंत्रवर्णात् अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः॥ अजो
ह्येको जुषमाणोनुशेते जहात्येनां भुक्तभोगामजोन्य इति॥ अत्र हि मंत्रे लोहितशुक्लकृष्णशब्दै रजःसत्त्वतमांस्यभि
धीयंते॥ लोहितं रजः रंजनात्मकत्वात् शुक्लं सत्त्वं प्रकाशात्मकत्वात्॥ कृष्णं तमः आवरणात्मकत्वात् तेषां साम्यावस्था
यथावद्धर्मै॥ ॥

र्वपक्षे ब्रह्मणि समन्वयासिद्धिः सिद्धांते तत्सिद्धिरिति पूर्ववत् द्रष्टव्यं रागहेतुत्वादिगुणयोगात् लोहितादिशब्दै रजआदिगुणलाभेपि कथं
प्रधानलाभः॥ तत्राह तेषां साम्येति अवयवाः प्रधानस्य रजआदयस्तेषां धर्मा रंजकत्वादयः तैर्निमित्तैर्लोहितादिरा॥ ॥

दैः प्रधानमुच्यत इत्यर्थः गुणभेदात्प्रधानलाभ इति भावः॥ तत्राजाशब्दं योजयति नेति॥ रूढिर्योगमपहरतीति न्यायेनत्वं रूढेः॥ नन्विति॥
रूढ्यसंभवाद्योगश्चाश्रयणीय इत्याह॥ बाढमिति॥ अजाशब्दितप्रकृतिसपुरुषभेदलिंगाभ्यामपि प्रधानप्रत्यभिज्ञेत्याह॥ स्वानेस्वादिना

र्थ उपदिश्यते लोहितशुक्लकृष्णेति॥ न जायत इति चाजा स्यात् मूलप्रकृतिरविकृतिरित्यभ्युपगमात्॥ ननु अजाशब्दः
छागायां रूढः बाढं सा तु रूढिरिह नाश्रयितुं शक्या विद्याप्रकरणात्॥ सा च बह्वीः प्रजास्त्रैगुण्यान्विता जनयति तां प्रकृतिं
अज एकः पुरुषो जुषमाणः प्रीयमाणः सेवमानो वानुशेते तामेवाविद्यया आत्मत्वेनोपगम्य सुखी दुःखी मूढोहमित्यवि
वेकतया संसरति अन्यः पुनरजः पुरुष उत्पन्नविवेकज्ञानो विरक्तो जहाति एनां प्रकृतिं भुक्तभोगां कृतभोगाप
वर्गां परित्यजतीत्यर्थः॥ तस्मात् श्रुतिमूलैव प्रधानादिकल्पना कापिलानामिति॥ एवं प्राप्ते ब्रूमः॥ नानेन मं १४
त्रेण श्रुतिमत्त्वं सांख्यवादस्य शक्यमाश्रयितुं न ह्ययं मंत्रः॥ ॥

प्रजार्थं नेति प्रजाः महदादयः त्रैगुण्यं सुखदुःखमोहाः अनुशयनं विवृणोति॥ तामेवाविद्ययेति॥ अविवेकेनेत्यर्थः॥ विषयधीः॥ भोग॥

गुणभिन्नात्मख्यातिरपवर्ग॥ सिद्धांतयति॥ एवं प्राप्त इति मायादावपि साधारण्येऽजाशब्दे विशेषार्थग्रहे न युक्तः विशेषग्रहहेतोः प्रकर

स्वातंत्र्येण कंचिदपि वादं समर्थयितुमुत्सहते सर्वत्रापि यथाकथंचित्कल्पनया जातत्वादिसंपादनोपपत्तेः सांख्यवाद एवेहाभि
प्रेत इति विशेषावधारणकारणाभावात्॥ चमसवत्॥ यथा ह्यर्वाग्बिलश्चमस ऊर्ध्वबुध्न इत्यस्मिन्मंत्रे स्वातंत्र्येणायं नामासौ
चमसोऽभिप्रेत इति न शक्यते नियंतुं सर्वत्रापि यथाकथंचिदर्वाग्बिलत्वादिकल्पनोपपत्तेः॥ एवमिहाप्यविशेषोऽजामेका
मित्यस्य मंत्रस्य नास्मिन्मंत्रे प्रधानमेवाजाऽभिप्रेतेति शक्यते नियंतुं तत्र त्विदं तच्छिर एष ह्यर्वाग्बिलश्चमस ऊर्ध्वबुध्न
इति वाक्यशेषात्॥ चमसविशेषप्रतिपत्तिर्भवति इह पुनः केयमजा प्रतिपत्तव्येत्यत्र ब्रूमः॥ ज्योतिरुपक्रमा तु तथा ह्य
धीयत एके॥ परमेश्वरादुत्पन्ना ज्योतिःप्रमुखा तेजोबन्नलक्षणा चतुर्विध॥ ॥

णादेरभावादिति हेतुं व्याख्याय दृष्टांतं व्याचष्टे॥ चमसवदिति॥ सर्वत्रेति॥ गिरिगुहादावपि उत्तरसूत्रस्यावतारिकामाह॥ ॥ ॥

वलिदमिति॥ चतुर्विधस्येति॥ जरायुजांडजस्वेदजोद्भिज्जरूपस्येत्यर्थः॥ स्वरस्य काकुतो न प्राप्नोतीत्याशंकते॥ कस्मादिति॥ अत्र्यंतरादर्थग्र
हो युक्तः सा जात्यान्भूजालपेक्षत्वाचेत्याह॥ तथा हीति॥ शाखिनः षं रोगाः किं च लोहितादिशब्दैरपि द्रव्यलक्षणया व्याख्या श्रधपधानात्

स्य भूतग्रामस्य प्रकृतिभूतेयमजा प्रतिपत्तव्या नुशब्दोवधारणार्थः॥ भूतत्रयलक्षणैवेयमजा विज्ञेया न गुणत्रयलक्ष
णा कस्मात्॥ तथा ह्येके शाखिनस्तेजोबन्नानां परमेश्वरादुत्पत्तिमाम्नायते श्रामेव रोहितादिरूपतामामनंति। यदग्ने
रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्येति। तान्येव हि तेजोबन्नानि प्रत्यभिज्ञायंते रोहितादिशब्द
सामान्यात् रोहितादीनां च शब्दानां रूपविशेषेषु मुख्यत्वात् भाक्तत्वाच्च गुणविषयस्य। असंदिग्धेन च संदिग्धस्य निगम

नं तु रंजनीयत्वादिगुणपरं वहिता सत्त्वादिगुणलक्षणेत्याह॥ रोहितादीनां चेति॥ ननु शाखांतरेण शाखांतरस्थमंत्रस्य निर्णयः कथमित्य
त आह॥ असंदिग्धेनेति॥ सर्वशाखाप्रत्ययन्यायादिति भावः॥ यथा शाखांतरवाक्यान्न प्रधानम्॥ ॥

हस्तयेहापि श्वेताश्वतरोपनिषदि मायाप्रकरणं न तत्तु ॥ महद्रस्याह ॥ तथेति ॥ स एषादेवः किंसहायं ब्रह्मेति विमृश्यते ब्रह्मवादिनो ध्यानाख्य
योगेन परमात्मानमनुप्रविष्टाः संतः तत्रैव देवस्यात्मभूतामेकदेशाध्यस्तां शक्तिं परतंत्रां मायां सत्वादिगुणवतीं ब्रह्मणः सहायमपश्य

मन्यंते ॥ तथेहापि ब्रह्मवादिनो वदंति किंकारणं ब्रह्मेत्युपक्रम्य ते ध्यानयोगानुगता अपश्यन्देवात्मशक्तिं स्वगुणैर्निगूढा
मिति पारमेश्वर्याः शक्तेः समस्तजगद्विधायिन्या वाक्योपक्रमेऽवगमात् ॥ वाक्यशेषेपि मायां तु प्रकृतिं विद्यान्मायिनं तु महे
श्वरमिति ॥ यो योनिं योनिमधितिष्ठत्येक इति च तस्या एवावगमात् ॥ न स्वतंत्रा काचित्प्रकृतिः प्रधानं नामाजामंत्रेणाम्ना
यत इति शक्यते वक्तुं प्रकरणात्सैव दैवी शक्तिरव्याकृतनामरूपा नामरूपयोः प्रागवस्थानेनापि मं॥ ॥

न्निसंभव ॥ मायाया एकत्वेपि तदंशानां जीवोपाधीनां तत्तत्संघाततयोक्तीनामविद्याख्यानां भेदाद्वी ॥ ॥

षा ॥ अव्याकृते अनभिव्यक्ते नामरूपे यस्यासा । अनेन तद्धेदं तर्ह्यव्याकृतमासीदिति श्रुत्यंतरप्रसिद्धिरुक्तात्स्यां शक्तो व्यक्ताव्यक्तकार्यलिंग
कानु मानं सूचयति । नामेति ॥ मायाया रोहितादिरूपत्वं कथमित्यत आह । तस्या इति विषयः आश्रय एवं प्रकरणबलान्मायैव अजेति

त्रैगुण्यमायत इत्युच्यते । तस्याश्च स्वविकारविषयत्वे ऐत्रैरूप्येण त्रैरूप्यमुक्तं ॥ कथं पुनस्ते जीवात्मनां त्रैरूप्येण त्रिरूपा जाप्र
तिपत्तुं शक्यते यावत्तानतावत्ते जीवन्तेषु जाकृतिरस्ति नचते जीवात्मानां जातिश्रवणादजातिनिमित्तोपजात्याद्यः संभव
तीति अतउत्तरं पठंति । कल्पनोपदेशाच्च मध्वादिवदिति ॥ १॥

१६

भाष्ये रूपमत्तं छांदोग्यश्रुत्या तेजोबन्नलक्षणावांतरप्रकृतिरजेति सूत्रकृन्मते नोत्तरसूत्रव्यावर्त्यशंकेति कथमिति । किं तेजोबन्नेष्वजाशब्दो रू
ढः न जायत इति योगिको वा नाद्यस्तेष्वजात्वजातेरसत्वादित्याह यावतेति । यत इत्यर्थः अतो न रूढ इति शेषः ॥ न द्वितीय इत्याह ॥ न चेति
जातिर्जन्म अजातिरजन्म लौकिकाजा ॥ ॥

यावती यस्माद्गुणवृत्तौ हि रूढिराश्रिता भवन्ति तथा च रोहितादिशब्दाः इह समभिव्याहारानुगृहीता रूढ्याश्रितया गुणवृत्त्या प्रधाने योगं वा
धिकाराथान्तरप्रकृतिरजाशब्देन ग्राह्या यथा मध्वादिशब्दैः प्रसिद्धमध्वाद्याश्रितगुणलक्षणया आदित्यादयो गृह्यन्ते तद्वत् तस्माद
जाशब्दं प्रधानमिति सिद्धं न संख्योपसंग्रहात्। पंच पंचजनशब्दः सांख्यतत्त्वपरोऽन्यपरो वेति योगरूढ्योरनिश्चयात्संशये यथातत्त्व

एवमिदमनजाया अजात्वं कल्प्यत इत्यर्थः तस्मादविरोधस्तेजोबन्नेष्वजाशब्दप्रयोगस्य॥ न संख्योपसंग्रहादपि नाना
भावादतिरेकाच्च॥ एवं परिहृतेऽप्यजामंत्रे पुनरन्यस्मान्मंत्रात्सांख्यः प्रत्यवतिष्ठते। यस्मिन्पंच पंचजना आकाशश्च
प्रतिष्ठितः। तमेव मन्य आत्मानं विद्वान्ब्रह्मामृतोऽमृतमिति अस्मिन्मंत्रे पंच पंचजना इति पंचसंख्याविषया
अपरा पंचसंख्या श्रूयते पंचशब्दद्वयदर्शनात्। त एते पंच पंचकाः पंचविंशतिः संपद्यन्ते तया पंचविंशतिसं
ख्यया यावन्तः संख्येया आकांक्ष्यन्ते तावन्त्येव च तत्त्वानि सांख्यैः संख्यायन्ते मूलप्रकृतिरविकृतिर्महदा॥ ॥ १७

विद्याधिकारे छागायां तात्पर्याभावादजापदे रूढिस्त्यागस्तथा पंच मनुष्येषु तात्पर्याभावाज्जनशब्देन रूढिं संत्यक्त्वा निमित्तात्प्राणा इति
दृष्टांतसंगतिं सूचयन्मंत्रमुदाहृत्य पूर्वपक्षयति। एवमित्यादिना फलं पूर्ववत्। प्राणश्चक्षुः श्रोत्रमन्नं मनो वाक्यशेषस्थाः पंच
जनाः पंच तत्र चत्वारः सूत्रेऽन्ने विराट् तयोः कारणमव्याकृतमाकाशश्च यस्मिन्नध्यस्तास्तमेवात्मानममृतं ब्रह्म मन्ये तस्मान्मन
नात् विद्वानहममृतोऽस्मीति मंत्रदृश्येव चैनं न च स्तक पंचसु विशिष्टेषु पंचजनेषु पुनः पंचत्वान्वयात्पंचविंशतिसंख्याप्रतीतेः॥ ॥

अ

सादृश्यकल्पनयातेजोबन्नात्मजाजोपदेशस्तु नैणोयं शङ्कइति परिहरति। कल्पनेति। नियमो यदृच्छा बर्करो बालपशुः यदुक्तं जीवब्रह्मभेदेनप्रधा
नवादप्रत्यभिज्ञेति तन्नेत्याह। नचेदमिति। व्यवस्थार्था भेदोपपत्त्या प्रतिपाद्यत इत्याह। प्रसिद्धिरिति। सत्यमेव प्रसिद्धिरद्धत इत्याह। भेदप्रसि तआ
विरोधः। नायमजाकृतिनिमित्तो ऽजाशब्दो नापि यौगिकः किंतर्हि कल्पनोपदेशोयं अजारूपकक्लृप्तिस्तेजोबन्नलक्षणाया अचराचरयोने
रुपदिश्यते। यथाहि लोके यदृच्छया काचिदजा रोहितशुक्लकृष्णवर्णा स्यात् बहुबर्करा सरूपबर्करा च तां कश्चिदजो जुषमाणोनुशयीत
तं कश्चिच्चैनां भुक्तभोगां जह्यादेवमियमपि तेजोबन्नलक्षणा भूतप्रकृतिस्त्रिवर्णा बहुसरूपं चराचरलक्षणं विकारजातं जनयति
अविदुषा च क्षेत्रज्ञेनोपभुज्यते विदुषा च परित्यज्यत इति। नचेदमाशङ्कितव्यमेकः क्षेत्रज्ञोनुशेते ऽन्यो जहातीत्यतः क्षेत्रज्ञभे
दः पारमार्थिकः परेषामिष्टः प्राप्नोतीति न ह्ययं क्षेत्रज्ञभेदप्रतिपिपादयिषा किंतु बंधमोक्षव्यवस्थाप्रतिपिपादयिषा तेषा प्र
सिद्धं तु भेदमनुद्य बंधमोक्षव्यवस्था प्रतिपाद्यते भेदस्तूपाधिनिमित्तः मिथ्याज्ञानकल्पितो न पारमार्थिकः एको देवः स
र्वभूतेषु गूढः सर्वव्यापी सर्वभूतानां तरात्मेत्यादिश्रुतिभ्यः। मध्वादिवत्तु। यथादित्यस्यामधुनो मधुत्वं वाचश्चाधेनोर्धेनु
श्रीराम त्वं द्युलोकादीनां चानग्नीनामग्नित्वं इत्येवं जातीयकं कल्प्यते॥ ॥ ॥ ॥

ति। कल्पनोपदेशे दृष्टांतं व्याचष्टे। मध्वित्ति नचयोगस्य मुख्यवृत्तित्वात्तेन प्रधानग्रहोन्याय्य इति शाब्दं रूढ्यर्थानपेक्षायोगात्तदाश्रि
तगुणरुद्धक्षणा॥ ॥

आविशंतीति यथाह्यापस्थिनो सप्तसप्तर्षयोपि च सप्तश्चान्ने सप्तछन्दोस्यत्राभिलादिक्रमादायद्विशादयः आविशंतीति तान्यथेत्सर्थः पंचशब्दद्वयेन स्ववाच्य
न्यूनसंख्याद्वारेण तथाप्यामहासंख्येव लक्ष्यत इति सहृशं तं शंकते ॥ अथेति मुख्यार्थस्य वक्ष्यमाणत्वाल्लक्षणा न युक्तेति परिहरन्ति ॥ तद्
ती पिनेति पंचजनशब्दयोरसमासमंगीकृत्य पंचविंशतिसंख्यापत्तिर्निरस्ता संप्रति समासनिश्चयानन्तरमतीतिरित्याह ॥ परश्चेति समासेहे
तुमाह ॥ भाषिकेणेति अयमर्थः अस्मिन्मन्त्रे प्रथमः पंचशब्द आद्युदात्तः ॥ द्वितीयः सर्वानुदात्तः ॥ जनशब्दश्चान्तोदात्तः ॥ तथा च न द्वितीय

संख्येवेयमवयवद्वारेण लक्ष्यते ॥ तथा पंचसप्तचवर्षाणि नव वर्षशतं ऋतून् इति द्वादशवार्षिकीमनावृष्टिं कथयंति ॥ तद्
द्वैद्विति ॥ तदपि नोपपद्यते ॥ अयमेवास्मिन्पक्षे दोषो यल्लक्षणाश्रयणीयास्यात् ॥ परश्चात्र पंचशब्दो जनशब्देन समस्तः
पंचजना इति भाषिकेण स्वरेण ॥ ॥ १८

पंचशब्दजनशब्दयोस्समासं विनान्त्यस्याकारस्योदात्तत्वं पूर्वेषामनुदात्तत्वं च घटते समासस्येति सूत्रेण समासान्तोदात्तविधानादनुदात्तं पद
मेकवर्जमिति च सूत्रेण यस्मिन्पदे उदात्तः स्वरितो वा यस्य वर्णस्य विधीयते तमेकं वर्जयित्वावशिष्टं तत्पदमनुदात्तं भवति ॥ तिविधा
नात् च ॥ एवं भाषिकान्तोदात्तस्वरेणैकपदत्वनिश्चयः ॥ भाषिकाख्ये तु शतपथब्राह्मणस्वरविधायकग्रन्थे स्वरितोनुदात्तो वेति सूत्रेण यो
मंत्रदशायां ~~स्वरितोनुदात्तः स्वरितो वेति सूत्रेण यो मंत्रदशायां~~ अनुदात्तः स्वरितो वा स ब्राह्मणदशायामुदात्तो भवतीति अपवादः ॥ अंतः
तथा चांतस्योदात्तत्वात्पूर्वेषामनुदा[illegible] ब्राह्मणवदुच्चायां प्राप्त उदात्तमनुदात्तमंत्यस्य भिन्निति सूत्रेण मं ॥ ॥

नामुदात्तत्वं

तावताकथंसांख्यतत्त्वसंग्रहइत्याशंक्यसंख्यायापर्याप्तिकोशायां॰ तद्यानिश्राद्याएणीसाह॥ तयेत्तिजगतोमूलभूताप्रकृतिस्त्रिगुणात्मकंप्रधानमनादि
त्वादविकृतिःकस्यचित्कार्यंनभवतीत्यर्थः॥ महदहंकारपंचतन्मात्राणि सप्तप्रकृतयोविकृतयश्च। तत्रमहान्प्रधानस्यविकृतिरहंकारस्य
प्रकृतिरहंकारस्तामसःपंचतन्मात्राणांशब्दादीनांप्रकृतिःमहतोविकृतिःसात्विकएकादशेंद्रियाणांपंचतन्मात्राश्चपंचानांस्थूलभूतानांमा
काशादीनांप्रकृतयःपंचस्थूलान्येकादशेंद्रियाणिचेतिषोडशसंख्याकोगणोविकारएवनप्रकृतिःतत्त्वांतरोपादानत्वाभावात्पुरुषस्तूदासीन

द्याः प्रकृतिविकृतयःसप्तषोडशकश्चविकारोनप्रकृतिर्नविकृतिःपुरुषइति। तथाश्रुतिप्रसिद्धायापंचविंशतिसंख्ययातेषांस्मृति
प्रसिद्धानांपंचविंशतितत्त्वानांउपसंग्रहात्ऽपिपुनःश्रुतिमतमेवप्रधानादीनांतत्त्वक्रमःसंख्योपसंग्रहादपिप्रधानादीनांश्रु
तिमतंप्रसाशकर्तव्योकस्मात्नानाभावात्। नानाहितानिपंचविंशतितत्त्वानितेषांपंचजनाःपंचजनाःसाधारणोधर्मोऽस्तियेनपंच न
विंशतेरंतरालेपराःपंचपंचसंख्यानिविशेरन्नह्येकंनिबंधनमंतरेणनानाभूतेषुद्वित्वादिकाःसंख्यानिविशंते। अथोच्येत

इतिसांख्यकारिकार्थः संख्ययातत्त्वानामुपसंग्रहात्। शब्दवत्त्वमितिप्राप्तेसिद्धांतयति। नेतिनानात्वमिष्टमित्यतआह। तेषामितिपंचरूपं
तर पंचकसाधारणस्यैपंचकाद्यधिकत्वस्यधर्मस्याभावोननानात्वंविवक्षितमित्यर्थः। धर्मादिज्ञानकर्मेंद्रियेषुश्रवणस्यज्ञानकरणत्वं पंच
कद्वयेऽस्तिपंचतन्मात्रारूपपंचकस्थूलप्रकृतित्वंचतत्त्वथापियस्मिन्त्रिसात्मनआकाशस्यचएवगुणः॥ सत्त्वरजस्तमोमहदहंकाराःपंचक
कर्त्तथाःमनःश्रोत्रादिभूतानिपंचास्मिन्पंचकद्वयेमिथोनुवृत्तेतरपंचकव्यावृत्तधर्मोनास्तीत्यर्थः। मास्त्विसतआह। येनेतिधर्मेणेत्यर्थः
तदेवस्फुटयति। नहीति। महासंख्यायामध्यांतरसंख्याःकंचिद्धर्ममादाय॥ ॥

कर्मकरणत्वं

मंत्रदृशायां उदात्तस्यां य स्य परलग्नत्वयो आर्यमाभृत्यानुदात्तत्वं विहितं तथा चात्र नकारादुपरि तत्र आकार आकाराश्लेषेनेन श्लिष्टत्वयापध्यमानो
नुदात्तो भवति॥ अथ मंत्रोनुदात्तस्वरः भाषिकः। तेन श्रौतलक्षणस्वरेणैकपदत्वं निश्चीयत इति॥ प्रकारार्थाकारे रूपाठकमिश्लेषोंतोदात्तस्वरो उ
भाषिक इति व्याख्यातं तद्व्याख्यानं कल्पतरुकारैर्दूषितं॥ अंतानुदात्तं हि समाम्नातारः पंचजनत्वाद्दमधीयत इति पाठकाः प्रसिद्धिरस्ति
ध्येति। तथा च पंच पंच जना इति मंत्रिकोंतोदात्तस्वरः पक्षे अपंच पंच जना इत्यंतानुदात्तो श्रौतलक्षणस्वर इति विभागः॥ उभयथापि ऐकपद्या
समासस्थिद्धिरिति तेन रीय प्रयोगादप्येकपदत्वमित्याह॥ प्रयोगांतरे चेति॥ आज्यलासां पंचानां पंचजनानां देवविशेषणं पंचायध

एकपदत्वं निश्चयात्॥ प्रयोगांतरे च पंचानां त्वा पंचजनानामित्येकपद्ये कस्यैवैकविभक्तित्वादर्शनात्॥ समस्तत्वाच्च नद्वि
त्वापा पंच पंचेति न पंचकद्वयग्रहणं पंच पंचेति। न च पंचसंख्याया एकस्याः पंचसंख्यया परया विशेषः॥ ॥

व त्वयग्रहणम्। साज्यग्रहणे मंत्रश्लेषः देवतानां कर्मणि यंत्रवद्दृष्टितं शरीरं तदेवं धनं इहामुत्र भोगाधारस्तस्मैतस्या। येकल्प्यार्थ
मिति यजमानोक्तिः॥ अस्तु समासस्ततः किमित्यत आह॥ समस्तत्वाच्चेति॥ आवृत्ति वै स्पष्टा तदभावे पंचकद्वयाग्रहणात्पंचविं
शति संख्याप्रतीतिरसिद्धेति भावः॥ जनपंचकमेकं पंचकानां पंचकद्वितीयमिति पंचकद्वयं तस्य पंच पंचेति ग्रहणं नेत्यत्रार्थः
किं च समासपक्षेपि किं पंचत्वाद्द्वयोरूपयोः पंचत्वयोः परस्परान्वयः॥ ॥

किंयात्तयोः शुक्लजनेरन्वयः॥ अथवा पंचत्वविशिष्टैर्जनैः परस्परं पंचत्वस्यान्वयः॥ नाद्य इत्याह॥ न च [illegible] पंचसंख्याया इति॥ विशेषणमन्वयः
अनन्वये हेतुमाह॥ उपसर्जनस्येति॥ अप्रधानानां सर्वेषां प्रधाने न विशेष्ये ऐवान्वयो वाच्यः॥ गुणानां परस्परान्वये वाक्यभेदापाता
दित्यर्थः॥ द्वितीये दशसंख्याप्रतीतिः स्यात्॥ न पंचविंशतिसंख्याप्रतीतिः॥ तृतीयमुत्थापयति॥ कन्विति॥ पंचत्वविशिष्टेषु पंचत्वां
तरान्वये विशेषणीभूतपंचत्वेऽपि पंचत्वान्वयात् पंचविंशतिप्रतीतिरित्यर्थः॥ दृष्टान्तवैषम्येण परिहरति॥ नेति अभ्र इति॥ पंचानां

णां पंच पंचका इति उपसर्जनस्य विशेषणेन असंयोगात्॥ न चापं च पंचसंख्याका जना एव पुनः पंचसंख्यया विशेष्य
माणाः पंचविंशतिः प्रस्येष्यंते॥ यथा पंच पंच पूल्य इति पंचविंशतिपूल्यः प्रतीयंते तद्वत्॥ नेति अभ्रः॥ पुंक्षत्वं च पुलीश
ष्टस्य समाहाराभिप्रायकत्वात्॥ कतीति सत्यां आकांक्षायां पंच पंच पूल्य इति विशेषणं इह तु पंचजनाः स्यादित्य एवमपे क्रू॥
क्षेपादानात् कतीति असत्यां आकांक्षायां न पंच पंचजना इति विशेषणं भवेत्॥ भवद् पीदं विशेषणं पंचसंख्याया एवम १९

पूल्यानां समाहार इत्यत्र संख्यापूर्वो द्विगुरिति समासो विहितः॥ ततो द्विगोरिति स्त्रीत्वेन ङीपुविधानात् समाहारप्रतीतेः समाहारः॥ कती
त्याकांक्षायां सत्यां पंचेति पदान्तरान्वयो युक्तः॥ पंचजना इत्यत्र ऽऽकांक्षाभावेन समाहारस्याप्रतीतेः॥ जनानां यादित एव पंचत्वो
पादानात् संख्याकांक्षाया असत्वात् संचयेति पदान्तरं नान्वेति आकांक्षाधीनत्वादन्वयस्येत्यर्थः॥ अभेदे विशेषणं॥ ननु जनानां निराकांक्षत्वेपि
तद्विशेषणीभूतपंचत्वानि कतीत्याकांक्षायां पंचत्वान्तरं विशेषणं भवत्वित्याशंकते॥ भवद् पीति॥ नोपसर्जनस्योपसर्जनान्तरेणान्वयः
किंतु प्रधानेनैवेति नोपसर्जनन्यायविरोध उक्त इति प॥ ॥

रिहरन्ति॥ तत्रचेति॥ एवंनानाभावादितिव्याख्यायअतिरेकाच्चेतिव्याचष्टे॥ अतिरेकाच्चेत्यादिना॥ अतिरेकः आधिक्यंजनशब्दितपंचविंशतितत्त्वे
षु आत्मान्तर्भूतो न वा॥ नाद्यस्स्याद्द्वितीये दोषमाह॥ अर्थांतरेति तथा आत्मानं विकल्प्य तद्दूषयन्ति॥ तथेति॥ उक्तदोषः संख्याधिक्यं पंच
विंशतिजनाः आत्माकाशाभ्यांचेति सप्तविंशतिसंख्यास्यादित्यर्थः॥ नच सत्त्वरजस्तमसां पृथग्गणनायासेष्टेति वाच्यं॥ आकाशस्य पृथगुक्ते

तत्र चोक्तदोषः तस्मादेव पंचजनाः इति न पंचविंशतितत्त्वाभिप्रायं॥ अतिरेकाच्च न पंचविंशतितत्त्वाभिप्रायं॥ अति
रेकाच्च न पंचविंशतितत्त्वाभिप्रायं॥ अतिरेको हि भवत्यात्माकाशाभ्यां पंचविंशतिसंख्यायाः आत्मा तावदिह प्रतिष्ठां
प्रत्याधारत्वेन निर्दिष्टः॥ यस्मिन्निति सप्तम्या सचैतस्य तेभेदं मन्य आत्मानमित्यात्मत्वेनानुकर्षणात्॥ आत्मा च
चेतनः पुरुषः स पंचविंशतावंतर्गतएवेति न तस्यैवाधारत्वमाधेयत्वं च युज्यते॥ अर्थांतरपरिग्रहे च तत्त्वसंख्याति
रेकः सिद्धांतविरुद्धः प्रसज्येत॥ तथाकाशश्च प्रतिष्ठित इत्याकाशस्यापि पंचविंशतावंतर्गतस्य न पृथगुपादानं
दोषः न्याय्यं॥ अर्थांतरपरिग्रहे चोक्त[illegible]॥ कथं च संख्यामात्रश्रवणेन तत्त्वश्रुतानां पंचविंशतेस्तत्त्वानामुपसंग्रहः प्रतीयते॥ ज
नेत्याद्यस्य तत्तेषु रूढत्वात्॥ अर्थांतरोपसंग्रहेपि संख्योपपत्तेः॥ कथं तर्हि पंच च पंचजना इति उच्यते॥ दिक्संख्ये संज्ञायामिति [illegible]

वैयधिकरण्याद्यसिद्धिरित्यात्मनि तत्त्वानां प्रतिष्ठोक्तिविरोधात्तव मते स्वतंत्रप्रधानस्यैवानाधारत्वान्नेह नानास्तीति वाक्यशेषविरोधाच्च॥ तथा सत्यद्वैत
वादिशास्त्रं च पंचविंशतिसंख्याप्रतीतावपि न सांख्यतत्त्वानां ग्रहणमित्याह॥ कथं चेति॥ किं जनशब्दात्तत्त्वग्रहः उत संख्ययेति कथंशब्दार्थः॥ ना
द्यः स्यात् जनेति॥ न द्वितीयस्त्याह॥ अर्थांतरेति॥ किंतदर्थांतरं यदर्थकमिदं वाक्यमिति पृच्छति कथमिति पंच च ते जनाश्चेति कर्मधार
यादिसमासांतरात्॥ ॥

संज्ञासमासस्यार्थं तस्यावलंबत्वं तावदाह ॥ उच्यत इति दिग्वाचिनः संख्यावाचिनश्च सुबंताः संज्ञायां गम्यमानायां सुबंतेनोत्तरपदेन समस्यंते ।
यथा दक्षिणाग्निः सप्तर्षय इत्यादि ॥ अयं च समासस्तत्पुरुषभेदः पंचजनशब्दस्य संज्ञात्वमुक्त्वा संज्ञिकथनार्थं सूत्रं गृह्णाति के पुन

चशब्दस्य जनशब्देन समासः ॥ ततश्च रूढत्वाभिप्रायेणैव केचित्पंचजना नाम विवक्ष्यंते । न सांख्यत्
वाभिप्रायेणेति केचित्तस्याभाकांक्षायां पुनः पंचेति प्रयुज्यते । पंचजना नाम ये केचित्ते च पंचैवेत्यर्थः ॥
सप्तर्षयः सप्तेति यथा ॥ के पुनस्ते पंचजना नामेति तदुच्यते । प्राणादयो वाक्यशेषात् ॥ यस्मिन्पंच
पंचजना इत्यत्र उत्तरस्मिन्मंत्रे ब्रह्मस्वरूपनिरूपणाय प्राणादयः पंच निर्दिष्टाः प्राणस्य प्राणमु
त चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रमन्नस्यान्नं मनसो ये मनो विदुरिति ॥ ते चात्र वाक्यशेषगताः सं २०
निधानात्पंचजना विवक्ष्यंते । कथं पुनः प्राणादिषु जनशब्दप्रयोगः ॥ नतेषु शक्यं जनशब्दप्रयोगः

स्त इति । अतो उक्तशब्दोऽप्यर्थः ॥ ये प्राणादिप्रेरकं तत्साक्षिणमात्मानं विदुस्ते ब्रह्मविद इत्यर्थः ॥ जनशब्दस्य प्राणादिषु कथंचित्प्र
योग इति ॥

शंकते॥ कथं पुनरिति॥ यथा तत्र तत्तेषु जनशब्दस्य लक्षणया प्रयोगस्तथा मम प्राणादिषु पंचजनशब्दस्य लक्षणयेत्याह॥ तत्तेषु वेति॥ तर्हि रूढ्यति
क्रमसाम्यात्तान्येव ग्राह्याणीत्यत आह॥ समानेष्विति॥ संन्निहितं जातीयानपेक्ष्य श्रुतिस्था एव ग्राह्याः॥ ननु व्यवहितविजातीयसापेक्षश्रुतिस्थस्य
र्थः॥ लक्षणाबीजं संबंधमाह॥ जनेति॥ जनः पंचजन इति पर्यायः॥ पुरुषपित्रादिशब्दवच्च पंचजनशब्दस्य प्राणादिलक्षकत्वं दुष्कमित्याह॥ जनवच
नश्चेति॥ ननु जायंत इति जनाः महदादयः जनकत्वाज्जनः प्रधानं इति प्रयोगसंभवे किमिति रूढिमाश्रित्य लक्षणेत्याप्रयास इत्यत आह॥ समा

समानेतु प्रसिद्ध्यतिक्रमे वाक्यशेषवशात् प्राणादय एव गृहीतव्या भवंति॥ जनसंबंधाच्च प्राणादयो जनशब्दभाजो भवंति॥ जनवचन
श्च पुरुषशब्दः प्राणेषु प्रयुक्तः ते वा एते पंच ब्रह्मपुरुषा इत्यत्र प्राणोह पिता प्राणोह मातेत्यादि च ब्राह्मणे॥ समासबलाच्च समुदाय
स्य रूढत्वमविरुद्धं कथं पुनरसति प्रथमप्रयोगे रूढिः शक्या अध्येतुं॥ शक्योद्भिदादिवदित्याह॥ प्रसिद्धार्थसंनिधाने ह्यप्रसिद्धार्थः
शब्दः प्रयुज्यमानः समभिव्याहारात्तद्विषयो नियम्यते॥ ॥

सेति॥ यथाश्वकर्णशब्दस्य वर्णसमुदायस्य वृक्षे रूढिरेवं पंचजनशब्दस्य रूढिरेव नावयवशक्त्याको योग इत्यर्थः॥ पूर्वकालिकप्रयोगाभावान्न रूढि
रित्याक्षिपति॥ कथमिति॥ स्युः पुमांसः पंचजना इत्यमरकोशादौ प्रयोगोस्त्येव तदभावमंगीकृत्याप्याह॥ शक्येति॥ जनसंबंधाच्चेति पूर्वभाष्ये
नरेषु पंचजनशब्दस्य रूढिमाश्रित्य प्राणादिषु लक्षणोक्ता॥ इह तु प्रौढिवादेन प्राणादिषु रूढिरुच्यत इति मंतव्यं॥ संगृहीतं विवृणोति॥
प्रसिद्धेत्यादिना॥ उद्भिदा यजेत पशुकाम इत्यत्रोद्भित्पदं विधेयगुणार्थकं कर्मनामधेयं वेति संशये खनित्रादावुद्भित्पदस्य प्रसिद्धेर्योगनाम
त्वे प्रसिद्धिविरोधात्॥ ॥

शंकते॥ कथंपुनरिति॥ यथान्तवत्त्वेषु जनशब्दस्य लक्षणया प्रयोगस्तथा मम प्राणादिषु पंचजनशब्दस्य लक्षणयेत्याह॥ तत्वेषुवेत्ति॥ तर्हि रूढ्यति
क्रमसाम्यात्तान्येव गृह्यतामित्यत आह॥ समानेत्विति॥ संनिहितं जातीयानपेक्ष्य श्रुतिस्थ एव ग्राह्याः॥ ननु व्यवहितं विजातीयसापेक्षस्य श्रुतिस्थस्य
र्थः॥ लक्षणाबीजं संबंधमाह॥ जनेति॥ जनः पंचजन इति पर्यायः॥ पुरुषपित्रादिशब्दवत्पंचजनशब्दस्य प्राणादिलक्षकत्वं युक्तमित्याह॥ जनवच
नश्चेति॥ ननु जायंत इति जनाः॥ महदादयः जनकर्त्ता जनः प्रधानं इति प्रयोगसंभवे किमिति रूढिमाश्रित्य लक्षणेत्याप्रयास इत्यत आह॥ समा

समाने तु प्रसिद्ध्यति क्रमे वाक्यशेषवशात् प्राणादय एव गृहीतव्या भवंति॥ जनसंबंधाच्च प्राणादयो जनशब्दभाजो भवंति॥ जनवचन
श्च पुरुषशब्दः प्राणेषु प्रयुक्तः ते वा एते पंच ब्रह्मपुरुषा इत्यत्र प्राणो ह पिता प्राणो ह मातेत्यादि च ब्राह्मणं समासबलाच्च समुदाय
स्य रूढत्वमविरुद्धं कथं पुनरसति प्रथमप्रयोगे रूढिः शक्या अध्येतुं॥ शक्योद्भिदादिवदित्याह॥ प्रसिद्धार्थसंनिधाने ह्यप्रसिद्धार्थः
शब्दः प्रयुज्यमानः समभिव्याहारात् तद्विषयो नियम्यते॥ ॥

सेति॥ यथाश्वकर्णशब्दस्य वर्णसमुदायस्य वृक्षे रूढिरेवं पंचजनशब्दस्य रूढिरेव नावयवशक्त्या योग इत्यर्थः॥ पूर्वकालिकप्रयोगाभावान्न रूढि
रित्याशंकयति॥ कथमिति॥ स्युः पुमांसः पंचजना इत्यमरकोशादौ प्रयोगोस्त्येव तदभावमंगीकृत्याप्याह॥ शक्येति॥ जनसंबंधाच्चेति पूर्वभाष्ये
नरेषु पंचजनशब्दस्य रूढिमाश्रित्य प्राणादिषु लक्षणोक्ता॥ इह तु प्रौढिवादेन प्राणादिषु रूढिरुच्यत इति मंतव्यं॥ संगृहीतं विवृणोति॥
प्रसिद्धेत्यादिना॥ उद्भिदा यजेत पशुकाम इत्यत्रोद्भिच्छब्दं विधेयगुणार्थकं कर्मनामधेयं वेति संशये खनित्रवाद्उद्भिदस्यप्रसिद्धेर्योगनाम
त्वेप्रसिद्धिविरोधात्॥ ॥

ज्योतिष्टोमे गुणविधिरिति प्राप्ते सिद्धांतः॥ यजेत यागेनेष्टं भावयेदित्यर्थः॥ तत्र उद्भिदेत्यप्रसिद्धस्य तत्तौ धांतस्य यागेनेत्यनेन प्रसि
द्धार्थकेन सामानाधिकरण्येनान्वयः भवत्वं निश्चीयते उद्भिनत्ति पशून् साधयतीति प्रसिद्धेरविरोधात् प्रकृतज्योतिष्टोमे गुणविध्ययोगा
तद्विधो उद्भिदाख्यगुणवता यागेनेति मत्वर्थसंबंधलक्षणाप्रसंगात् अनेन कर्मनामैवोद्भिदेत्यादि तथाचिन्नतीति प्रसिद्धा [illegible] छेदना
र्थकशब्दसमभिव्याहारादृशविशेषो यूपशब्दार्थः॥ करोतीति समभिव्याहाराद्वेदिशब्दार्थः॥ संस्कारयोग्यस्थंडिलविशेष इति गम्यते तथापि

यथोद्भिदा यजेत॥ यूपं छिनत्ति वेदिं करोतीति तन्न्यायमपि पंचजनशब्दः॥ समासान्याख्यानादवगतसंज्ञाभावः॥ सं
ज्ञाकांक्षी वाक्यशेषसमभिव्याहृतेषु प्राणादिषु वर्तिष्यते॥ केचित्तु देवाः पितरो गंधर्वा असुरा रक्षांसि इत्येते पंचजना इत्याख्या पंच
ताः॥ अन्ये चत्वारो वर्णा निषादपंचमाः परिगृहीताः॥ कश्चित्तु यत्सांवजन्यया विशेषेति प्रजापरः प्रयोगः पंचजनश २९
ब्दस्य दृश्यते तत्संग्रहोपी न कश्चिद्विरोधः॥ ॥

सिद्धार्थप्राणादिशब्दसमभिव्याहारात्संपंचजनशब्दः प्राणाद्यर्थक इति निश्चीयत इत्यर्थः॥ एकदेशिनां मतद्वयमाह॥ केचिदित्यादिना॥ श्रद्धा
यां ब्राह्मणजातो निषादः अस्यापंचजनशब्दस्यार्थांतरमाह॥ कश्चित्त्विति॥ पांचजन्यया प्रजयाविशतीतिविदृत्तपादिश्यपुरुषरूपयेंद्र
स्याह्वानार्थघोषाः इत्ययं तत्र कश्चित् घोषांतरे केऽर्णद्राह्वाना योगादिति अस्यानुसारेण प्रजार्थत्वपक्षेऽपि न विरोध इत्यर्थः॥ तत्र विरोध इत्याशं
क्याह॥ ॥

स्था

आचार्य इति॥ अतः सांख्यतन्त्रातिरिक्तयत्किंचित्परतया पंचजनशब्दव्याख्यायामविरोध इति भावः॥ शंकोत्तरत्वेन सूत्रं गृह्णाति॥ भवेयुरिति ज्योतिषां सूर्यादीनां ज्योतिस्त्वहत्वदेवा उपास्य इत्यर्थः॥ नन्विदं षष्ठं ज्योतिःपदोक्तं सूर्यादिकं ज्योतिः शब्दाद्येष्वस्ति तत्काण्वानां पंचत्वपूरणाय गृह्यते॥ नान्येषामिति विकल्पो न युक्त इति शंकते॥ कथं पुनरिति॥ आकांक्षाविशेषाद्विकल्पो युक्त इत्याह सिद्धांती॥ अपेक्षेति॥ यथातिरा

आचार्यस्तु न पंचविंशतेस्तत्त्वानामिह प्रतीतिरस्तीत्येवं परतया प्राणादयो वाक्यशेषादिति जगाद॥ भवेयुस्तावत्प्राणादयः पंचजना माध्यंदिनानां येऽन्नं प्राणादिष्वामनंति। काण्वानां तु कथं प्राणादयः पंचजना भवेयुः ये ह्यन्नं प्राणादिषु नामनंतीति॥ अत उत्तरं पठति॥ ज्योतिषैकेषामसत्यन्ने॥ असत्यपि काण्वानामन्ने ज्योतिषा तेषां पंचसंख्या पूर्येत॥ तेऽपि हि यस्मिन् पंच पंचजना इत्यतः पूर्वस्मिन् मंत्रे ब्रह्मस्वरूपनिरूपणायैव ज्योतिरधीयते॥ तद्देवा ज्योतिषां ज्योतिरिति। कथं पुनरुभयेषामपि तुल्यवदिदं ज्योतिः पठ्यमानं समानमंत्रगतया पंचसंख्यया केषांचिद्गृह्यते केषांचिन्नेति। अपेक्षाभेदादित्याह। माध्यंदिनानां हि समानमंत्रपठितप्राणादिपंचजनलाभात् नास्मिन्मंत्रांतरपठिते ज्योतिषि अपेक्षा भवति तदलाभात्तु काण्वानां भवत्यपेक्षा। अपेक्षाभेदाच्च समानेऽपि मंत्रे ज्योतिषो ग्रहणाग्रहणे यथातिरात्रे वचनभेदात् षोडशिनो ग्रहणाग्रहणे तद्वत्। तदेवं न तावत् श्रुतिप्रसिद्धिः काचित्प्रधानविषयास्ति स्मृतिन्यायप्रसिद्धी तु परिहरिष्येते॥ ॥

त्रे षोडशिनं गृह्णाति न गृह्णातीति वाक्यभेदाद्विकल्पस्तद्वच्छाखाभेदेन पाठापाठाभ्यां ज्योतिषो विकल्प इत्यर्थः॥ ननु क्रियायां विकल्पो युक्तः न वस्तुनीति चेत् सत्यं अत्रापि शाखाभेदेन साम्नाः ज्योतिः सहिता वा पंच प्राणादयो यत्र प्रतिष्ठितास्तन्मनसानुद्रष्टव्यमिति ध्यानक्रियायां विकल्पोपपत्तिरित्यनवद्यं॥ उक्तं प्रधानस्याशब्दत्वमुपसंहरति॥ तदेवमिति॥ तथापि स्मृतियुक्तिभ्यां प्रधानमेव जगत्कारणमित्यत आह॥

कारणत्वेन चाकाशादिषु यथाव्यपदिष्टोक्तेः पूर्वग्रंथेनास्य संगतिं वक्तुं वृत्तमनुवदति। प्रतिपादितमिति।। अधिकरणत्रयेण प्रधानस्याश्रौतत्वोक्त्या जगत्कारणत्वलक्षणेन ब्रह्मण एव बुद्धिस्थत्वात्तस्मिन्नेव बुद्धिस्थे निर्विशेषे ब्रह्मणि वेदांतानां समन्वय इति साधितं। पूर्वसूत्रसंदर्भेण तत्र लक्षणसमन्वययोरप्रसिद्धिरेव श्रुतीनां विरोधदर्शनादित्याक्षेपरूपां तेनास्य संगतिमाह।। तत्रेति।। येन विरोधपरिहाराय द्वितीयाध्याये संगतिर्नास्ति अध्याय इति वाच्यं सिद्धे समन्वये स्मृत्यादिमानांतरविरोधनिरासस्य द्वितीयाध्यायार्थत्वात् तद्वाच्य जगत्कारणवादि श्रुती

कारणत्वेन चाकाशादिषु यथाव्यपदिष्टोक्तेः।। प्रतिपादितं ब्रह्मणो लक्षणं प्रतिपादितं ब्रह्मविषयं गतिसामान्यं वेदांत
वाक्यानां प्रतिपादितं च प्रधानस्याशब्दत्वं तत्रेदमपरमाशंक्यते न जन्मादिकारणत्वं ब्रह्मणो ब्रह्मविषयं वा गतिसामा
न्यं वेदांतवाक्यानां प्रतिपत्तुं शक्यं कस्मात् विगानदर्शनात्।। ।।

गो

२२

नां मिथो विरोधाद्वाक्यार्थः। न निश्चयेन लक्ष्ये समन्वयासिद्धौ प्राप्तायां तत्साधकाविरोधचिंतायाः अत्रैव संगतत्वात्।। न चैवं सृष्टिश्रुतीनामप्यविरोधोऽत्रैव चिंतनीय इति वाच्यं।। स्वसमयकल्पितसृष्टौ विरोधस्यैवाभावात्।। किमर्थं तर्हि द्वितीये तच्चिंतनं स्थूलबुद्धिसमाधानार्थं इति क्रमः इह तु सूक्ष्मदृशां वाक्यार्थे समन्वयज्ञानाय तत्पदार्थश्रुतिविरोधः परिह्रियते।। यद्यपि त्वंपदार्थश्रुतिविरोधोऽत्र परिहर्तव्यः।। तथापि प्रथमसूत्रेण बंधमिथ्यात्वसूचनाद्विरोधः सिद्धः। प्रपंचस्तु स्थूलबुद्धिसमाधानप्रसंगेन भविष्यतीति मन्यते सूत्रकारः।। अथ जगत्कारणश्रुतयो विषयाः किं स्वार्थे ब्रह्मणि मानं न वेति संशये न्योगितिषोः संख्यादृष्टिक्रियाभ्यां विकल्पेऽपि कारणे यत्सन्न सद्वा सद्वा कारणभिन्नस्यादि विकल्पासंभवादप्रामाण्यमिति प्रत्युदाहरणेन पूर्वपक्षयन्मुक्ताक्षेपं विघट्टणोति।। ।। ।।

प्रतिवेदांतमित्यादिना॥ वेदांतानां समन्वयसाधनात्कृत्स्नस्याध्यायस्य संगतिः॥ असदादिपदानां सत्कारणे समन्वयोक्तेः पादसंगतिः पूर्वपक्षे समन्व
यासिद्धिः फलं॥ सिद्धांते तत्सिद्धिरिति विवेकः॥ क्रमाक्रमाभ्यां सृष्टिविरोधं तावद्दर्शयति॥ तथाहि क्वचिदित्यादिना स परमात्मा लोकानसृजत॥
भः अम्मयशरीरप्रचुरस्वर्गलोकोऽम्भःशब्दार्थः॥ सूर्यरश्मिव्याप्तोऽन्तरिक्षलोको मरीचयः मरो मर्त्यलोकः॥ अब्बहुलाः पाताललोका आप
इति श्रुत्यर्थः॥ सृष्टिविरोधमुक्त्वा कारणविरोधमाह॥ तथेति॥ असदनभिव्यक्तनामरूपात्मकं कारणं ततः कारणात्सदभिव्यक्तं एतत्तु
प्रतिवेदांतं दुर्न्यायास्पष्टमुपलभ्यते॥ क्रमादिवैचित्र्यात्॥ तथाहि क्वचिदात्मन आकाशः संभूत इत्याकाशादिका सृष्टिराम्नायते
क्वचित्तेज आदिका तत्तेजोऽसृजतेति॥ क्वचित्प्राणादिका स प्राणमसृजत प्राणाच्छ्रद्धामिति॥ क्वचित्त्वक्रमेणैव लोकानामुत्पत्तिरा
म्नायते स इमांल्लोकानसृजताम्भो मरीचीर्मरमाप इति तथा क्वचिदसत्पूर्विका सृष्टिः पठ्यते॥ असद्वा इदमग्र आसीत्ततो वै सद
जायतेति असदेवेदमग्र आसीत्तत्सदासीत्तत्समभवदिति च॥ क्वचिदसद्वादनिराकरणेन सत्पूर्विका प्रक्रिया प्रतिज्ञायते॥ तद्धैक
आहुरसदेवेदमग्र आसीदित्युपक्रम्य कुतस्तु खलु सोम्यैवं स्यादिति होवाच कथमसतः सज्जायेतेति॥ सत्त्वेव सोम्येदमग्र आसी
तमासी दिति क्वचित्स्वयंकर्तृकैव व्याक्रिया जगतो निगद्यते॥ तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यामेव व्याक्रियतेति॥ एवमनेकधा विप्रतिपत्तेः॥
ध्यार्थे छांदोग्यवाक्यमाह॥ असदेवेति॥ किं शून्यमेवेत्यत आह॥ तत्सदिति॥ आबाधितं ब्रह्म सदासीदित्यर्थः॥ तद्ब्रह्मात्मनात्तिष्ठज्जगत्सृष्टिकाले सम्प
नाभिव्यक्तमभवत्॥ प्रक्रिया सृष्टिः॥ तत्र कारणे॥ एकेषां शाखिनां मतं श्रुतिरेव दूषयतीत्याह कुत इति॥ कुत एवं पदयोरर्थमाह॥ कथमिति॥ स्वम
तमाह॥ तद्धेदं जगत्॥ ह किल तर्हि प्राक्काले अव्याकृतं कारणमेवासीत्॥ श्रुतीनां विरोधमुपसंहरति॥ एवमिति॥ किमत्र न्याय्यमित्याशं
क्य मानांतरमिति भावः॥ ॥

सदिति त

क

धानलक्षकत्वं वेदांतानां न्याय्यमित्याह॥ स्मृतीति॥ तत्र स्मृत्योर्विरोधे धर्मिग्राहकस्य ज्येष्ठस्य विरोधं परिहरति॥ सत्स्वपीति॥ आकाशादिषु ब्रह्मणः कार
णत्वे विरोधो नेत्यस्तीति प्रतिज्ञायां हेतुमाह॥ कुत इति॥ यथाभूततत्त्वमेवाह॥ सर्वज्ञ इति॥ कारणस्य सर्वज्ञत्वादिकं प्रतिवेदांतं द्रष्टव्यमित्याह॥

ज्य

वस्तुनि विकल्पस्यानुपपत्तेर्न वेदांतवाक्यानां जगत्कारणावधारणपरता न्याय्येत्यत्र न्यायप्रसिद्धिर्येनानुकारणांतरपरिग्र
हो न्याय्य इति एवं प्राप्ते ब्रूमः॥ सत्स्वपि प्रतिवेदांतं सृज्य[illegible]मानेष्वाकाशादिषु क्रमादिद्वारके विगानेन स्रष्टरि किंचिद्विगानमस्ति
कुतः॥ यथाव्यपदिष्टोक्तेः॥ यथाभूतो ह्येक एवाद्वितीयो वेदांते सर्वज्ञः सर्वेश्वरः सर्वात्मकोऽद्वितीयः कारणत्वेन व्यपदिष्टः॥ तथाभूत
एव वेदांतांतरेष्वपि व्यपदिश्यते॥ तद्यथा॥ सत्यं ज्ञानमनंतं ब्रह्मेति॥ अत्र तावत् ज्ञानशब्देन शरीरादिकीर्तिपरेण च तद्वि
षयेण कामयितृत्ववचनेन चेतनं अर्थात् यद्रूपं यत्परं प्रयोजनत्वेनेश्वरं मन्यते ब्रवीनु॥ तद्विषये ऐव परेणात्मशब्देन शरीरादिकोश
परंपरयांतरानुप्रवेशेनेन सर्वेषां मध्यस्थत्वमात्मानं निराधारत्वं॥ बहु स्यां प्रजायेयेति चात्मविषयेण बहुभवनानुशंसनेन
स्रष्टुःप्रमाभावानां विकारणामाश्रयभेदमभावतत्तद्यदिदं सर्वमसृजत यदिदं किंचेति तत्तत् जगत्सृष्टिनिर्देशेन प्राक्सृष्टेरद्वि २२
तीयं स्रष्टारमाचष्टे॥ ॥ ॥

तद्यथेत्यादिना॥ तद्विषयेण ब्रह्मविषयेण चेतनं सर्वज्ञं तदात्मानं स्वयमकुरुतेति श्रुतेरपरप्रयोज्यत्वं॥ तस्माद्वा एतस्मादात्मन इति प्रत्य
गात्मत्वं स्वस्य बहुरूपत्वकामनया स्थितिकालेप्यद्वितीयत्वं॥ यथा तैत्तिरीयके सर्वज्ञत्वादिकं कारणस्य तथा छांदोग्यादावपि द्रष्टव्यमित
इत्याह॥ ॥

तदत्रयलक्षणमिति॥ मिषत्सव्यापारं॥ अविगीतार्थत्वादविरुद्धार्थकत्वात्॥ कारणेनास्ति प्रतिपत्तिरिति शेषः॥ तथापि कार्यविरोधात्॥ का
रणेऽपि विरोधः स्यादित्याशंक्य निषेधति॥ कार्यविषयं त्वित्यादिना स्वप्नसृष्टीनां प्रत्यहमन्यथात्वेन सोऽहमिति प्रत्यभिज्ञायमाने द्रष्टर्यपि
नानात्वं प्रसज्येतेत्याह॥ अतिप्रसंगादिति॥ सृष्टिविरोधभंग॥ कुत्र सृष्टेरविरोध इत्यत आह॥ अधुनांगीकारं त्यजति॥ समाधास्यति चेति किमर्थं त

तदत्रयं लक्षणं ब्रह्मकारणत्वेन विज्ञातं तल्लक्षणमेवान्यत्रापि विज्ञायते सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं॥ तदैक्षत
बहु स्यां प्रजायेयेति तत्तेजोऽसृजतेति॥ तथात्मा वा इदमेक एवाग्र आसीत् नान्यत्किंचन मिषत्स ईक्षत लोकान्नु सृजा इति
एवंजातीयकस्य कारणस्वरूपनिरूपणपरस्य वाक्यजातस्य प्रतिवेदान्तमविगीतार्थत्वात्॥ कार्यविषयं तु विगानं दृश्य
ते क्वचिदाकाशादिका सृष्टिः क्वचित्तेजआदिकेत्येवंजातीयकं न च कार्यविषयेण विगानेन कारणमपि ब्रह्म सर्ववेदान्ते
ष्वविगीतमधिगम्यमानमविवक्षितं भवितुमर्हतीति शक्यते वक्तुं अतिप्रसंगात् समाधास्यति चाचार्यः कार्यविषय
मपि विगानं न वियदश्रुतेरित्यारभ्य भवेदपि कार्यस्य विगीतत्वं अप्रतिपाद्यत्वात्॥ न ह्ययं सृष्ट्यादिप्रपंचः प्रति
पिपादयिषितः न हि तत्प्रतिबद्धः कश्चित्पुरुषार्थो दृश्यते श्रूयते वा न च कल्पयितुं शक्यते॥ उपक्रमोपसंहारा
भ्यां तत्र तत्र ब्रह्मविषयैर्वाक्यैः साकमेकवाक्यताया गम्यमानत्वात्॥ ॥

र्हि श्रुतयः सृष्टिमन्यथान्यथा वदंती सांख्यसृष्टावतात्पर्यज्ञापनायेत्याह॥ भवेदित्यादिना॥ अतात्पर्यार्थे विरोधो न दोषायेत्यतात्प
र्यं साधयति॥ नहीति॥ फलवद्ब्रह्मवाक्यशेषत्वेन सृष्टिवाक्यानामर्थवत्त्वसंभवात् स्वार्थे पृथक्फलं कल्प्यं वाक्यभेदापत्तेरित्याह॥ नच
कल्पयितुमिति न्यायादेकवाक्यत्वं स्पष्टं श्रुतिरपि दर्शयतीत्याह॥ ॥

र्दृश्यते चेति॥ शुंगेन कार्येण लिंगेन कारणब्रह्मज्ञानार्थत्वं सृष्टिश्रुतीनां मुमुक्षाकारणस्याद्वयत्वज्ञानं फलांतरमाह॥ मृदादीति॥ एवं निष्फ
लायामन्यार्थायां सृष्टौ तात्पर्याभावाद्विरोधो न दोषः सूत्रद्वयसंमतिमाह॥ तथा चेति॥ अनन्यथान्यपेति विषादृष्ट्या॥ अवतारयत्रं लधी

दर्शयति च॥ सृष्ट्यादिप्रपंचस्य ब्रह्मप्रतिपत्त्यर्थतां॥ अन्नेन सोम्य शुंगेनापो मूलमन्विच्छाद्भिः सोम्य शुंगेन तेजो
मूलमन्विच्छ तेजसा सोम्य शुंगेन सन्मूलमन्विच्छेति मृदादिदृष्टांतैश्च कार्यस्य कारणेनाभेदं वदितुं सृष्ट्यादिप्रपंचः
श्राव्यत इति गम्यते॥ तथा च संप्रदायविदो वदंति॥ मृल्लोहविस्फुलिंगाद्यैः सृष्टिर्या चोदितान्यथा॥ उपायः सोऽव
प्रति तारय नास्ति भेदः कथंचनेति॥ ब्रह्मप्रतिपत्तिं प्रति तु फलं श्रूयते॥ ब्रह्मविदाप्नोति परं॥ तरति शोकमात्मवित्
तमेव विदित्वाति मृत्युमेतीति॥ प्रत्यक्षावगमं चेदं फलं तत्त्वमसीति असंसार्यात्मप्रतिपत्तौ संसार्यात्मत [illegible] २४

गमने अतत्त्वदन्यथात्वेपि ब्रह्मणि न भेदः ते ये न विभागमित्यर्थः॥ ब्रह्मज्ञानस्य सृष्टिश्रोपितमुक्तं लं निर्वाहायतस्य फलमाह॥ ब्रह्मेति॥
मृत्युमत्येतीत्यन्वयः॥ एवं सृष्टिद्वारकं विरोधमुक्तं समाधाय कारणस्य सदसत्त्वादिना साक्षात्कृतविरोधनिरासार्थं सूत्रमादत्ते॥

यत्कारणमिति यतोऽस्तित्वलक्षणं ब्रह्म निर्धार्यते तस्मिन्नेव श्लोकमुदाहरन्ति ॥ अतोऽत्र श्लोके निरात्मकमसन्नाम्नात इति योजनात् तत्र सदात्मनि
श्लोको मंत्रो भवतीति । सदात्मसमाकर्षादतीन्द्रियार्थकासच्छब्देन ब्रह्म लक्ष्यत इत्याह ॥ तस्मादिति ॥ न च प्रधानमेव लक्ष्यतामिति वाच्यं चेतना
र्थक ब्रह्मादिशब्दानामनेकेषां लक्षणागौरवादिति भावः ॥ तित्तिरिश्रुतौ सूत्रं योजयित्वा छांदोग्यादौ योजयति । एषैवेति । सदेव का

यत्तु नः कारणविषयं विगानं दर्शितं असद्वा इदमग्र आसीदित्यादि तत्परिहर्तव्यं ॥ अत्रोच्यते । समाकर्षात् । असद्वा इदमग्र आसी
दिति नात्रासन्निरात्मकं कारणत्वेन श्राव्यते । यतोऽसन्नेव स भवत्यसद्ब्रह्मेति वेद चेदस्ति ब्रह्मेति चेद्वेद संतमेनं ततो विदुरित्यसद्वादा
पवादेनास्तित्वलक्षणं ब्रह्मान्नमयादिकोशपरंपरया प्रत्यगात्मानं निर्धार्य सोऽकामयतेति तमेव प्रकृतं समाकृष्य सप्रपंचां
सृष्टिं तस्मात् श्रावयित्वा तत्सत्यमित्याचक्षत इति चोपसंहृत्य तदप्येष श्लोको भवतीति तस्मिन्नेव प्रकृतेऽर्थे श्लोकमिममुदा
हरत्यसद्वा इदमग्र आसीदिति । यदि त्वसन्निरात्मकमस्मिन् श्लोकेऽभिप्रेयेत ततोऽन्यसमाकर्षणेऽन्यस्योदाहरणादसंबद्धं वाक्य
मापद्येत तस्मा नामरूपव्याकृतवस्तुविषयः प्रायेण सच्छब्दः प्रसिद्ध इति तद्व्याकरणाभावापेक्षया प्रागुत्पत्तेः सदेव
ब्रह्मासदिवासीदित्युपचर्यते । एषैवासदेवेदमग्र आसीदित्यत्रापि योजना तत्सदासीदिति समाकर्षणादत्यन्ताभावाभ्यु
पगमे हि तत्सदासीदिति किं समाकृष्येत ॥ ॥

र्थकत्वदेव पूर्वोक्तासतः समाकर्षान्न शून्यपरमित्यर्थः ॥ नन्वसत्पदलक्षणया न युक्ता श्रुतिभिरेव स्वमतभेदेनोदितानुदितहोम
वद्विकल्पः स्यादसद्दर्शितत्वादित्यत आह ॥ १५ ॥

समाकर्षति॥ निरध्यक्षव्याकरणाभ्युपगमे हि अनंतरेण प्रकृतावेक्षं विनास इत्यनेन सर्वनाम्नाकः कार्यानुप्रवेशित्वेन

तद्धेक इति॥ एके त्वाखिन इत्यर्थो न भवति किंत्वनादिसंसारचक्रस्य वेदवाद्या इत्यर्थः॥ अन्यनिरासेन श्रुतिभिः सद्वादस्यैवेष्टसात्ता
त्वाद्विरोधस्फूर्तिनिरासाय लक्षणान्युक्तेति भावः॥ यदुक्तं कश्चिदकर्तृकास्त्विष्टिः कल्पितेति तन्नेत्याह॥ तद्धेदमिति॥ आध्यक्षः कृतीनेनु
कर्तृभावरचवदराम्नायते इत्यत आह॥ चेतनस्य चापमिति यत्र दृष्टाश्रोत्रं श्रोतास्मनोभंते कल्प्यत इत्यर्थः॥ आधंकार्यस्य कर्तृकंका

तद्धैक आहुरसदेवेदमग्र आसीदित्यत्रापि न कस्यतंतराभिप्रायेणा मैकीयमतोपन्यासः॥ क्रियायामिव वस्तुनि विकल्पस्या
संभवात्॥ तस्माच्छ्रुतिपरिगृहीतसंकल्पद्वाद्र्यायैवायं मंदमतिपरिकल्पितस्यासत्पक्षस्योपन्यस्य निरास इति द्रष्टव्यं॥
तद्धेदं तर्ह्यव्याकृतमासीदित्यादिना निरध्यक्षस्य जगतो व्याकरणं कथ्यते॥ स एष इह प्रविष्ट आ नखाग्रेभ्य इत्यध्य
स्य व्याकृतकार्यानुप्रवेशित्वेन समाकृष्यते। चेतनस्य चापमात्मनः शरीरे तु प्रवेशः श्रूयते। प्रविष्टस्य चैतनत्वश्र
वणात्। पश्यंश्चक्षुः शृण्वन् श्रोत्रं मन्वानो मन इति॥ अपि च यादृशमिदमद्यत्वे नामरूपाभ्यां व्याक्रियमाणं जगत्साध्यक्ष २५
व्याक्रियते एवमादिसर्गेपीति गम्यते दृष्टविपरीतकल्पनानुपपत्तेः॥ श्रुत्यंतरमप्यनेन जीवेनात्मनानुप्रविश्य ना
मरूपे व्याकरवाणीति साध्यक्षामेव जगतो व्याक्रियां दर्शयति॥ व्याक्रियत इत्यपि कर्मकर्तरि लकारः सत्येव परमेश्व
रे व्याकर्तरि सौकर्यमपेक्ष्य द्रष्टव्यः यथा लूयते केदारः स्वयमेवेति सत्येव पूर्णके लवितरि॥ ॥

यसात् घटवदित्याह॥ अपि चेति॥ अद्यत्वे इदानीं॥ ननु कर्मकारकादन्यस्य कर्तुः सत्वे कर्मण एव कर्तृत्ववाचि लकारो विरुद्ध इत्यत
आह॥ व्याक्रियत इति अनाया॥ ॥

सेनस्तिद्धिमपेक्ष्यकर्मणः कर्तृत्वमुपचर्यत इत्यर्थः ॥ यः क्रियते जगत्स्वयमेव निष्पन्नमिति व्याख्याय केनचिद्धाकृतमिति व्याचष्टे ॥ यद्वेति ॥
अतः श्रुतीनामविरोधात्कारणद्वारा समन्वय इति सिद्धं जगद्वाचित्वादिति विषयमाह ॥ कौषीतकेति ॥ बलाकाया अपत्यं बालाकिः ब्राह्म
च णस्तं प्रति राजो वाच यो वा इति न केवलमादित्यादीनां कर्ता किंतु सर्वस्य जगत इत्याह ॥ यस्येति ॥ एतत् जगत् यस्य कर्म क्रियते इति स्यु

यद्वा कर्मण्येव घञ्लकारः अर्थाक्षिप्तं कर्तारमपेक्ष्य द्रष्टव्यः ॥ यथा गम्यते ग्राम इति ॥ जगद्वाचित्वात् ॥ कौषीतकिब्राह्मणे बा
लाक्यजातशत्रुसंवादे श्रूयते ॥ यो वै बालाक एतेषां पुरुषाणां कर्ता यस्य वै तत्कर्म स वै वेदितव्य इति ॥ तत्र किं जीवो वेदित
व्यत्वेनोपदिश्यते ॥ उत मुख्यः प्राण उत परमात्मेति विशयः ॥ किं तावत्प्राप्तं प्राण इति कुतः ॥ यस्य वै तत्कर्मेति श्रवणात् ॥
परिस्पंदलक्षणस्य च कर्मणः प्राणाश्रयत्वात् ॥ वाक्यशेषे चाथास्मिन् प्राण एवैकधा भवतीति प्राणशब्ददर्शनात् प्राण
शब्दस्य च मुख्ये प्राणे प्रसिद्धत्वात् ये चैते पुरस्ताद्बालाकिनादित्ये पुरुषश्चंद्रमसि पुरुष इत्येवमादयः ॥ पुरुषा निर्दिष्टाः ॥
तेषामपि भवति प्राणः कर्ता प्राणावस्थाविशेषत्वादादित्यादिदेवतात्मनां ॥ ॥

सत्याकार्यमित्यर्थः ॥ कर्मेति शब्दस्य योगरूढिभ्यां संशयमाह ॥ तत्रेति ॥ पूर्वत्रैकवाक्यस्थ सदादिशब्दबलाद्ब्रह्मणीतः इह तु वाक्यभेदा
द्धंतते ब्रह्मवाणीति बालाकिवाक्यस्थब्रह्मशब्देन प्राणादिशब्दो ब्रह्मपरत्वेन नेतुमशक्य इति प्रत्युदाहरणेन पूर्वपक्षमाह ॥ किं तावदिति ॥ पू
र्वपक्षे वाक्यस्य प्राणाद्युपास्तिपरत्वाद्ब्रह्मणि समन्वयासिद्धिः सिद्धांते तु तत्सिद्धिरिति फलं ॥ अथ कस्तुपेतोद्दिष्टेति शेषः ॥ श्रुतं
पुरुषकर्तृत्वं प्राणस्य कथमित्यत आह ॥ ये चैत इति ॥ स्वात्मक प्राणस्य विकाराः सूर्यादय इत्यत्र मानमाह ॥ ॥ ॥ ॥

कतम इति ॥ तस्य महिमानः सर्वे देवा इति पूर्ववाक्ये दर्शितं ॥ अतः सर्वदेवात्मक। तात्मप्राणो ब्रह्म तत्परोक्षं अध्यक्षे कवचघटादिरित्यर्थः ॥ पूर्वपक्षांतर
माह ॥ जीवो चेति ॥ यत्कारणं यस्मा जीवं बोधयति ॥ तस्मादस्ति कृत्स्नोत्थापनं जीवलिंगमिति योजना तौ ह पुरुषं सुप्तमाजग्मतुः ॥ तौ राजा ह बृह
न्पांडरवासः ॥ सोमराजन्नित्यामंत्र्य संबोधनानभिज्ञत्वात् प्राणादेर्नामभिर्न मुक्तार्थयष्ट्याघातेनोत्थाप्य जीवं बोधितवानित्यर्थः ॥ श्रेष्ठी प्रधानः ॥

कतम एको देव इति ॥ प्राण इति स ब्रह्म त्यदित्याचक्षत इति श्रूयंतर प्रसिद्धेः ॥ जीवो वायमिह चेदिति तद्युक्तयोपदिश्यते ॥ तस्यापि ध
र्माधर्मलक्षणं कर्मेष्यते आवश्यकं तु ॥ यस्य वै तत्कर्मेति ॥ सोऽपि भोक्तृत्वाद्भोगोपकरणभूतानामेतेषां पुरुषाणां कर्तोपपद्यते
तस्यापि वाक्यशेषे च जीवलिंगमवगम्यते ॥ यत्कारणं चेदितद्युक्तयोपन्यस्तस्य पुरुषाणां कर्तुर्वेदनायोपेतं बालाकिं प्रति बु
बोधयिषुरजातशत्रुः सुप्तं पुरुषमामंत्र्यामंत्रणशब्दाश्रवणात्प्राणादीनामभोक्तृत्वं प्रतिबोध्य यष्टिघातोत्थापनात्प्राणादि
व्यतिरिक्तं जीवं भोक्तारं प्रतिबोधयति ॥ तथा पुरस्तादपि जीवलिंगमवगम्यते ॥ तद्यथा श्रेष्ठी स्वैर्भुंक्ते यथा वा स्वाः श्रेष्ठिनं भुं २८
जंत्येवमेवैष प्रज्ञात्मैतैरात्मभिर्भुंक्ते एवमेवैत आत्मान एनमात्मानं भुंजंतीति ॥ प्राणभृत्त्वाच्च जीवस्योपपन्नं प्राणब्रह्म
त्वं ॥ तस्माज्जीवमुख्यप्राणयोरन्यतरस्येह ग्रहणं न परमेश्वरस्य तल्लिंगानवगमादिति ॥ ।।

स्वैर्भृत्यैः ज्ञातिभिरुपहृतं भुंक्ते स्वाः ज्ञातयश्च तमुपजीवंति एवं जीवोऽपि आदित्यादिभिः प्रकाशादिना भोगोपकरणेन भुंक्ते तेन च हविर्ग्रहणा
दिना जीवमुपजीवंतीत्युक्तं ॥ भोक्तृत्वं जीवलिंगं ननु प्राण एवैकधा भवंतीति श्रुतेः प्राणशब्दो जीवे कथमित्यत आह ॥ प्राणभृत्त्वाच्चेति
स्त्वाद्बृहिरेयत्ति ध्वांतयति ॥ ॥

सत्यमिति॥ प्रकरणादिकं हि सर्वनाम्नः संकोचकं तस्मिन्नसति सामान्येन बुद्धिस्थं सर्वमेव गृह्यते। अत्र संकोचकासत्त्वे सर्वार्थकेन सर्वनाम्ना बुद्धिस्थस्य कार्यमा
त्रस्य कर्मशब्दो वाचक इत्याह॥ तथापीति॥ किंच जगदेकदेशेन तया जगत् प्रकृतमित्याह॥ पूर्वत्रेति॥ जगद्देहे पुरुषाणामपि ग्रहणं तस्य गुणक्रियार्थ[illegible]त्याह॥
एतदुक्तमिति॥ स वेदितव्य इति संबंधः॥ पुरुषमात्रनिरूपितं कर्तृत्वमिति निरासार्थो वाशब्दः॥ ब्राह्मणा भोजयितव्याः परिव्राजकाश्चेत्यत्र यथा ब्राह्मणश

सत्यमेतत्। तथाप्यसति विशेषोपादाने साधारणेनार्थेन संनिधानेन संनिहितवस्तुमात्रस्यायं निर्देश इति गम्यते॥ न विशिष्टस्य कस्यचित्
विशेषसंनिधानाभावात्। पूर्वत्र च जगदेकदेशभूतानां पुरुषाणां विशेषोपादानादविशेषितं जगदेवेहोपादीयत इति गम्यते॥ एतदुक्तं भवति
य एतेषां पुरुषाणां जगदेकदेशभूतानां कर्ता किमनेन विशेषेण यस्य वा कृत्स्नमेव जगदविशेषितं कर्मेति वाशब्द एकदेशावच्छिन्नकर्तृत्वव्या
वृत्त्यर्थः। ये बालाकिना ब्रह्मत्वाभिमताः पुरुषाः कीर्तितास्तेषामब्रह्मत्वख्यापनाय विशेषोपादानं॥ एवं ब्राह्मणपरिव्राजकन्यायेन सामान्य
विशेषाभ्यां जगतः कर्ता वेदितव्यतयोपदिश्यते। परमेश्वरश्च सर्वजगतः कर्ता सर्ववेदान्तेष्ववधारितः॥ जीवमुख्यप्राणलिंगान्नेति चेत्तद्व्याख्या गो
तं॥ अथ यदुक्तं वाक्यशेषगताज्जीवलिंगान्मुख्यप्राणलिंगाच्च तयोरेवान्यतरस्येह ग्रहणं न्याय्यं न परमेश्वरस्येति तत्परिहर्तव्यं॥ अ
त्रोच्यते। परिहृतं चैतदुपासात्रैविध्यादाश्रितत्वादिह तद्योगादित्यत्र। त्रिविधं ब्रह्मोपासनमेवं सति प्रसज्येत। जीवोपासनं मुख्यप्रा २७
णोपासनं ब्रह्मोपासनं चेति न चैतत् न्याय्यं॥ उपक्रमोपसंहाराभ्यां हि [illegible]विषयत्वमस्य वाक्यस्यावगम्यते॥ तत्रोपक्रमस्तावत्
त्॥ ब्रह्मविषयत्वं दर्शितं॥ उपसंहारस्यापि निरतिशयफलश्रवणात्। ब्रह्मविषयत्वं दृश्यते। सर्वान्पाप्मनोऽपहत्य सर्वेषां। ॥

ब्दः परिव्राजकान्यविषयः॥ तथात्र कर्मशब्दः पुरुषान्यजगद्वाचीत्याह॥ एवमिति। अतः जगत्कर्ता वेदितव्यः॥ परमेश्वरस्य किमायतमित्यत आह
परमेश्वर इति॥ सिद्धान्तमुक्त्वा पूर्वपक्षबीजमनूद्य दूषयति जीवमुख्यप्राणलिंगान्नेति चेत्तद्व्याख्यातमिति। उक्तमेव स्मारयति त्रिविधमिति। ज्यैष्ठ्यं
गुणाधिक्यं अधिपत्यं नियंतृत्वं स्वाराज्यमिति। ॥

गो

एवमिति सच बालाकिर्ब्रह्म भ्रान्त्या यष्टिलिंगरूपान्पुरुषानुक्त्वा राज्ञा निरस्तस्तूष्णीं स्थितः तदुक्तं ब्रह्म मषेस्यैकाराज्ञोच्यमानं ब्रह्मैवेति वक्त-
व्यमं अन्यथा राज्ञोपि मृषावादित्वप्रसंगादित्याह॥ यद्वैतदिति॥ वेदितव्योपीत्यर्थः॥ मुख्यं पुरुषकर्तृत्वं ब्रह्मण एव लिंगं प्राणजीवयोस्तु
नियंम्यत्वेनास्वतंत्र्यादित्याह॥ कर्तृत्वं चेति॥ यदुक्तं चलनादृष्टयोर्वाचकः कर्मशब्दः प्राणजीवयोः रूपस्यापकइति तत्रेत्याह॥ यस्येति॥ अने

एवं प्राप्ते ब्रूमः॥ परमेश्वर एवायमेतेषां पुरुषाणां कर्ता स्यात्॥ कस्मात्॥ उपक्रमसामर्थ्यात्॥ इह हि बालाकिरजातशत्रुणा
ब्रह्म ते ब्रवाणीति संवदितुमुपचक्रमे॥ स च कतिचिदादित्याद्यधिकरणान्पुरुषानमुख्यब्रह्मदृष्टिभाज उक्त्वा तूष्णीं बभूव
तमजातशत्रुर्मृषावादेन खलु मा संवदिष्ठा ब्रह्म ते ब्रवाणीत्यमुख्यब्रह्मवादिनमपोद्य तत्कर्तारमन्यं वेदितव्यतयोप॑यदि सो निक्षेप
न प्यमुख्यब्रह्मदृष्टिभाक् स्यादुपक्रमो बाध्येत तस्मात्परमेश्वर एवायं भवितुमर्हति॥ कर्तृत्वं चैतेषां पुरुषाणां न परमेश्वरादन्यस्य स्वा-
तंत्र्येणावकल्पते॥ यस्य वैतत्कर्मेत्यपि नायं परिस्पंदलक्षणस्य धर्माधर्मलक्षणस्य वा कर्मणो निर्देशः॥ तयोरन्यतरस्याप्य-
कृतत्वात्● असंशब्दितत्वाच्च॥ नापि पुरुषाणामयं निर्देशः॥ एतेषां पुरुषाणां कर्तेत्येवं तेषां निर्दिष्टत्वात् लिंगवचनविगानाच्च॥
नापि पुरुषविषयस्य करोत्यर्थस्य क्रियाफलस्य वायं निर्देशः कर्तृशब्देनैव तयोरुपात्तत्वात् परिशेषात्तु प्रत्यक्षसंनिहितं जग-
त्सर्वनाम्नैतच्छब्देन निर्दिश्यते॥ क्रियत इति च तदेव जगत्कर्म ननु जगदप्यप्रकृतमसंशब्दितं च॥ ॥

कार्यकाछ्लात्● अन्यतरार्थस्य प्रकरणादुपपदाद्वा ग्रहणं न्याय्यं॥ अत्र प्रकरणोपपदयोरसत्वात्कस्य ग्रहणमिति॥ संशये पुरुषकर्तृपदसां-
न्निध्यात्॥ क्रियत इति योगाज्जगतो ग्रहणमित्यर्थः॥ एतत्कर्मेति प्रकृतपरामर्शात्पुरुषाः पूर्वोक्ताः कर्मशब्देन निर्दिश्यंतामित्याह॥ नापीति॥ येन
कृत्स्यात्सातात्पुरुषाणां नपुंसकैकवचनपरामर्शयोगाच्चेत्यर्थः॥ ननु पुरुषोत्पादकस्य कर्तुर्व्यापारः करोत्यर्थः● उत्पादनं तस्य फलं पुरुषजन्म तदन्यतर-
वाची कर्मशब्दः स्यादित्यत आह॥ नापीति॥ कर्तृशब्देनेति॥ क्रियाफलाभ्यां विना कर्तृत्वायोगात्कर्तृशब्देनैव तयोर्ग्रहणमित्यर्थः॥ जगतोपि प्रकरणो

पपदेन तत्त्वइत्यकर्मंगीकरोति॥

नआ

यस्यत्वमिति भेदः। संभवत्येकवाक्यत्वे वाक्यभेदो हि नेष्यत इत्युक्तं चेत्पुनरुक्तिः स्यादिति शंकते। नन्वेवमिति। कर्मपदस्य रूढ्या पूर्वपक्षप्राप्तौ। तन्निरासार्थमस्यारंभो युक्त इत्याह॥ नेत्यादिना प्राणशब्दे जीवलिंगयोर्गतिमाह॥ प्राणशब्दोपीति॥ मनो जीवः। जीवलिंगेन ब्रह्मैव लक्ष्यत इत्युक्तं इदानीं तल्लिंगेन जीवोक्तिद्वारा ब्रह्मलक्षणा द्वयमित्याह॥ अन्यार्थमिति॥ जीवपरामर्शस्य जीवाधिकरणब्रह्मज्ञानार्थत्वे प्रश्नमाह॥ क्वैष इति॥ हे बालाके एतद्य

थाप्रभूतानां श्रेष्ठ्यं स्वाराज्यमाधिपत्यं पर्येति य एवं वेदेति॥ नन्वेवं सति प्रतर्दनवाक्यनिर्णयेनैवेदमपि वाक्यं निर्णीयेतेति॥ न निर्णीयते॥ यस्यैतत्कर्मेत्यस्य ब्रह्मविषयत्वेन तत्रानिर्धारितत्वात्। तस्मादत्र जीवमुख्यप्राणशंका पुनरुत्पद्यमाना निवर्त्यते। प्राणशब्दोपि ब्र
नं ह्मविषयो दृष्टः प्राणबंधनं हि सोम्य मन इत्यत्र जीवलिंगमप्युपक्रमोपसंहारयोर्ब्रह्मविषयत्वादभेदाभिप्रायेण योजयितव्यं॥
अन्यार्थं तु जैमिनिः प्रश्नव्याख्यानाभ्यामपि चैवमेके॥ अपिचेति। नैवात्र विवदितव्यं जीवप्राधान्यं वेदं वाक्यं स्यात् ब्रह्मप्राधान्यं वेति यतोन्यार्थं जीवपरामर्शं ब्रह्मप्रतिपत्त्यर्थमस्मिन्वाक्ये जैमिनिराचार्यो मन्यते। कस्मात्। प्रश्नव्याख्यानाभ्यां प्रश्नस्तावत्सुप्तपुरुषप्रतिबोधनेन प्राणादिव्यतिरिक्ते जीवे प्रतिबोधिते पुनर्जीवव्यतिरिक्तविषय उपलभ्यते। क्वैष एतद्बालाके पुरुषोऽशयिष्ट क्व वा एतदभूत् कुत एतदागादिति॥

यत्रं विशेषज्ञानाभावरूपं यथा स्यात्तथैष पुरुषः क्वाशयिष्ट कस्मिन्नधिकरणे शयनं कृतवानित्यर्थः। एकीभावाश्रयज्ञानार्थं पृच्छति॥ क्ववाद
ति। एतद्भवनमेकीभावरूपं यथा तथा एष पुरुषः क्वाभूत् कृत्स्नः कैनैक्यं प्राप्नोतीति यावत्। अपादानं पृच्छति। कुत इति। एतदागमन
मेकदेशरूपं यथा स्यात्तथा पुरुषः कुत आगत इत्यर्थः। प्रश्नमुक्त्वा व्याख्यानमाह॥ ॥

प्रतिवचनमिति॥ शयनभवनयोराधारः उत्थानापादानं च प्राणशब्दितं ब्रह्मैवेत्यर्थः॥ उत्तरे प्राणेनेति॥ प्रश्नोऽपि प्राणविषय इत्यत आह॥ सुषुप्तिकाले
चेति॥ जगद्धेतुत्वजीवेभ्याभ्यां प्राणे ब्रह्मत्वे सत्यर्थः॥ जीवोक्तिरन्यार्थत्वमुपसंहरति॥ तस्मादिति॥ निःसंबोधताविशेषधीशून्यतास्वच्छताविक्षेपमलशून्य

प्रतिवचनमपि यदा सुप्तः स्वप्नं न कंचन पश्यत्यथास्मिन्प्राण एवैकधा भवतीत्यादि॥ एतस्मादात्मनः प्राणा यथायतनं विप्रतिष्ठन्ते प्राणेभ्यो दे
ण वा देवेभ्यो लोका इति च सुषुप्तिकाले च परे ब्रह्मणि जीव एकतां गच्छति। परस्माच्च ब्रह्मणः प्राणादिकं जगज्जायत इति वेदान्तमर्यादा त
स्माद्यत्रास्य जीवस्य निःसंबोधस्वच्छतारूपः स्वापः उपाधिजनितविशेषविज्ञानरहितं स्वरूपं यत्तत्तद् ब्रह्मरूपमागमनं सोऽत्र प
आचित रमात्मा वेदितव्य तथा आचित इति गम्यते॥ अपि चैवमेके शाखिनो वाजसनेयिनोऽस्मिन्नेव बालाक्यजातशत्रुसंवादे स्पष्टं विज्ञान
मयशब्देन जीवमाम्नाय तद्व्यतिरिक्तं परमात्मानमामनन्ति॥ य एष विज्ञानमयः पुरुषः क्वैष तदाभूत्कुत एतदागादिति प्रश्ने प्र
तिवचनेऽपि य एषोऽन्तर्हृदय आकाशस्तस्मिञ्छेत इति॥ आकाशशब्दश्च परमात्मनि प्रयुक्तो दहरोऽस्मिन्नन्तराकाश इत्यत्र
त्र॥ सर्व एत आत्मनो व्युच्चरन्तीति चोपाधिमतामात्मनामन्यतो व्युच्चरणमामनन्तः परमात्मानमेव कारणत्वेनामनन्तीति गम्य २८

ते भेदभ्रान्तिशून्यतास्वरूपमैक्यमाह॥ उपाधीति॥ प्रश्नप्रत्याख्यानयोर्ब्रह्मविषयत्वेऽपि शाखान्तरसंवादमाह॥ अपि चैवमेके शाखिन इति॥ ननु त
आकाशः॥ सुषुप्तिस्थानमुक्तं। तद्ब्रह्मेत्यत आह॥ आकाशेति॥ उपाधिद्वारा प्रमात्रात्मजन्महेतुत्वात्॥ आकाशो ब्रह्मेत्याह॥ सर्व इति॥ एवं
जीवनिरासार्थत्वेन सूत्रं व्याख्याय निरासपरत्वेनापि व्याचष्टे॥ ॥

प्राण

प्राणेति॥ अस्मिन्वाक्ये प्राणोपदेशं ब्रह्मत्वेनार्थं मन्यते जैमिनिः॥ उक्तप्रश्नव्याख्यानप्रश्नवाक्यस्य ब्रह्मपरत्वावगमादपि चैके शाखिनः॥ एवमेव
प्राणातिरिक्तं जीवात्मानमानंतः प्राणस्य वाक्यार्थत्वं गमयंतीति सूत्रयोजना॥ अतिरिक्तजीवोपदेशः॥ प्राणनिराकरणस्याभ्युच्चयः हेत्वंत
रमिति भावार्थः॥ तस्मादिदं वाक्यं ब्रह्मणि समन्वितमिति सिद्धवाक्यान्वयात्॥ विषयवाक्यमाह॥ बृहदिति॥ यसादेशं स्पष्टयते प्रियता

प्राणनिराकरणस्यापि स्फुटत्वपुरुषोक्ष्यापने प्राणादिव्यतिरिक्तात्मोपदेशोऽभ्युच्चयः॥ वाक्यान्वयात्॥ बृहदारण्यके मैत्रेयीब्रा
अरे ह्मणेऽधीयते न वा अरे पत्युः कामाये त्युपक्रम्य न वा अरे सर्वस्य कामाय सर्वं प्रियं भवत्यात्मनस्तु कामाय सर्वं प्रियं भवत्या
त्मा वा अरे द्रष्टव्यः श्रोतव्यो मंतव्यो निदिध्यासितव्यो मैत्रेय्यात्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेदं सर्वं विदित
त्रा मिति॥ तत्र तद्विचिकित्स्यते किं विज्ञानात्मैवायं द्रष्टव्यश्रोतव्यादिरूपेण प्रदिश्यते॥ अहोस्वित्परमात्मेति कुतः पुनरेषा विचि
कित्सा प्रियसंसूचितेनात्मना भोक्त्रोपक्रमाद्विज्ञानात्मोपदेश इति प्रतिभाति॥ तथात्मविज्ञानेन सर्वविज्ञानोपदेशात्परमा
त्मोपदेश इत्यपि॥ ॥

तत्रात्मैव सर्वविशेषी प्रियतमो ततोऽन्यस्य सारस्य ज्यात्मैव द्रष्टव्यः दर्शनार्थं श्रवणादिकं कार्यमित्यर्थः॥ प्रियसंसूचितेनेति॥ पतिजायादिभिः प्रि
येर्भोग्यैर्जीवस्तत्यानुमितेनेत्यर्थः॥ यथा ब्रह्मत्वे प्रवाचनस्योपक्रमबलाद्वाक्यस्य ब्रह्मपरत्वं तथात्र जीवोपक्रमादस्य वाक्यस्य जीवप
रत्वमिति दृष्टांतेन पूर्वपक्षयति॥ ॥ ॥

कं तावदिति॥ पूर्वपक्षे वाक्यस्य जीवोपास्तिपरत्वं सिद्धांते त्वेये प्रसंङ्ग्रंथलिसमन्वय इति फलं॥ इदं प्रसंङ्क्रु महदपरिच्छिन्नं भूतं सत्यमनंतं नित्य
मपारं सर्वगतं चैकरसं एतेभ्यः कार्यकारणात्म जायमानेभ्यः भूतेभ्यः सांख्ये नोत्थाय भूतोपाधिकं जन्मानुभूय तान्येव भूतानि विलीयमा
नान्यनुस्तत्य विनश्यति॥ औपाधिकमरणानंतरं विशेषधीर्नास्तीति कस्यार्थः॥ विज्ञातारं विज्ञानकर्तारं भोक्तारं ज्ञात्वे भोग्यं ज्ञातमिति रूपचारः
कं तावदात्मविज्ञानात्मोपदेश इति॥ कस्मात् उपक्रमसामर्थ्यात्॥ पतिजायापुत्रवित्तादिकं हि भोग्यभूतं सर्वं जगदात्मार्थतया प्रियं
भवतीति प्रियसूचितं भोक्तारमात्मानमुपक्रम्यानंतरमिदमात्मनोदर्शनाद्युपदिश्यमानं कस्यान्यस्यात्मनः स्यात्॥ मध्येपीदं मह
द्भूतमनंतमपारं विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति न प्रेत्य संज्ञास्तीति प्रकृतस्यैव महतो भूतस्य द्रष्टृ
स्य भूतेभ्यः समुत्थानं विज्ञानात्मभावेन अनुविनाशं विज्ञानात्मन एवेदं द्रष्टृत्वं दर्शयति॥ तथा विज्ञातारमरे केन विजानीयादिति कर्तृवच
नेन शब्देनोपसंहरन् विज्ञानात्मन एवेदं द्रष्टृत्वं दर्शयति॥ तस्मादात्मविज्ञानेन सर्वविज्ञानवचनं भोक्त्रर्थत्वात् भोग्यजात
स्योपचारिकं द्रष्टव्यमिति॥ एवं प्राप्ते ब्रूमः॥ परमात्मोपदेश एवायं कस्मात्॥ वाक्यान्वयात्॥ वाक्यं हीदं पौर्वापर्येणावेक्ष्यमाणं
परमात्मानं प्रत्यन्वितावयवं लक्ष्यते॥ कथमिति तदुपपाद्यते॥ अमृतत्वस्य तु नाशास्ति वित्तेनेति याज्ञवल्क्यादुपश्रुत्य येना
हं नामृता स्यां किमहं तेन कुर्यां यदेव भगवान्वेद तदेव मे ब्रूहीति॥ अमृतत्वमाशासानायै मैत्रेय्यै याज्ञवल्क्य आत्मविज्ञानमुप
दिशति॥ न चान्यत्र परमात्मविज्ञानादमृतत्वमस्तीति श्रुतिस्मृतिवादा वदंति॥ तथा चात्मविज्ञानेन सर्वविज्ञानमुच्यमानं नान्यत्र पर २९
मोक्षसाधनज्ञानगम्यत्वादिलिंगेभ्यो वाक्यस्यान्वयार्थं तत्त्वमेव गम्यतेऽर्थावगमात्॥ अंशत्वप्रमापकत्वमिति सिद्धांतयति॥ एवमिति॥ वित्तेन तत्साध्ये
न कर्मणेत्यर्थः॥ भेदनिंदापूर्वकमभेदसाधनेनैकविज्ञानात्सर्वविज्ञानस्य समर्थनादौपचारिकत्वं न युक्तमित्याह॥ ॥

नचैतदौपचारिकमित्यादिना ॥ पराकरोतीति ॥ श्रेयोमार्गाद्दूरीकरोतीति ॥ यथादुंदुभिशंखवीणाशब्दसामान्यग्रहणेनैव गृह्यमाणास्तद्गतास्तद्विशेषाः
शुक्तिग्रहणआग्रहजन्तयस्तत्सामान्येकल्पितास्ततो न भिद्यंते ॥ एवमात्मभानभास्यं सर्वमात्ममात्रमिति निश्चितमित्याह ॥ दुंदुभ्यादीति ॥ एवमे

नचैतदौपचारिकमाश्रयितुं शक्यं ॥ एककारणमात्मविज्ञानेन सर्वविज्ञानं प्रतिज्ञायानंतरेण ग्रंथेन तदेवोपपादय
ति ॥ ब्रह्म तं परादाद्योऽन्यत्रात्मनो ब्रह्म वेदेत्यादिना ॥ यो हि ब्रह्मक्षत्रादिकं जगदात्मनोऽन्यत्र स्वातंत्र्येण लब्धसद्भावं प
श्यति तं मिथ्यादर्शिनं तदेव मिथ्यादृष्टं ब्रह्मक्षत्रादिकं जगत् ॥ पराकरोतीति भेददृष्टिमपोह्येदं सर्वं यदयमात्मे
ति सर्वस्य वस्तुजातस्यात्माव्यतिरेकमवधारयति ॥ दुंदुभ्यादिदृष्टांतैश्च तमेवाव्यतिरेकं द्रढयति ॥ अस्य महतो
भूतस्य निश्वसितमेतद्यदृग्वेद इत्यादिना च प्रकृतस्यात्मनो नामरूपकर्मप्रपंचकारणतां व्याचक्षाणः परमात्मान
मेनं गमयति ॥ ॥

कविज्ञानेन सर्वविज्ञानप्रतिज्ञाया मुख्यत्वाद्ब्रह्मनिश्चयः ॥ सर्वस्रष्टृत्वलिंगादपीत्याह ॥ अस्य महत इति ॥ ऋग्वेदादिकं नाम इष्टं हुतमिति
कर्म ॥ अयं च लोकः परश्च लोक इति रूपं किंच स यथा सर्वासामपां समुद्र एकायनमिति खंडिकायां सर्वप्रपंचस्य मुख्यलयाधारत्वमा
त्मनो ब्रह्मत्वे लिंगमित्याह ॥ ॥

२यत्पुनरुक्तं प्रियसंस्तुच

तथैवैकायनेति॥ जीवब्रह्मणोर्भेदाभेदसत्त्वादभेदांशेनेदं जीवोपक्रमणं प्रतिज्ञासाधकमित्याश्मरथ्यमतं॥ सत्यसंसारदशायां भेदएव मुक्तौ

१ सेंद्रियस्य तथैवैकायनप्रक्रियायामपि सर्वविषयस्य[illegible]सांतःकरणस्य प्रपंचस्यैकायनमंतरमबाह्यं कृत्स्नं प्रज्ञानघनं व्या
चक्षाणः परमात्मानमेवैनं गमयति॥ तस्मात्परमात्मन एवायं दर्शनाद्युपदेश इति गम्यते॥ तोपक्रमाद्विज्ञानात्मन एवायं दर्शनाद्यु
पदेश इति अत्र ब्रूमः॥ प्रतिज्ञासिद्धेर्लिंगमाश्मरथ्यः॥ अस्त्यत्र प्रतिज्ञा आत्मनि विज्ञाते सर्वमिदं विज्ञातं भवतीदं सर्वं यदयमात्मेति
च तस्याः प्रतिज्ञायाः सिद्धिं सूचयत्येतल्लिंगं यत्प्रियसंस्तुचितस्यात्मनो द्रष्टव्यत्वादि संकीर्तनं॥ यदि हि विज्ञाना[illegible]त्मनोन्यः स्यात् ४त्मा परमा
५ विज्ञाने ततः परमात्म[illegible]विज्ञानात्मनि विज्ञायते इत्येकविज्ञानेन सर्वविज्ञानं प्रतिज्ञातं तद्धीयेत तस्मात्प्रतिज्ञासिद्ध्यर्थं विज्ञानात्म
परमात्मनोरभेदांशेनोपक्रमणमित्याश्मरथ्य आचार्यो मन्यते॥ उत्क्रमिष्यत एवं भावादित्यौडुलोमिः॥ विज्ञानात्मन एव देहें
द्रियमनोबुद्धिसंघातोपाधिसंपर्कात्कलुषीभूतस्य ज्ञानध्यानादिसाधनानुष्ठानात्संप्रसन्नस्य देहादिसंघातादुत्क्रमिष्यतः प ३०
रमात्मैक्योपपत्तेरिदमभेदेनोपक्रमणमुपपन्नमित्यौडुलोमिराचार्यो मन्यते॥ श्रुतिश्चैवं भवति॥ एष संप्रसादोस्माच्छरीरा
त्समुत्थाय परं ज्योतिरूपसंपद्य स्वेन रूपेणाभिनिष्पद्यत इति क्वचिच्च जीवाश्रयमपि नामरूपं नदीनिदर्शनेन ज्ञापयति य
थानद्यः स्यंदमानाः समुद्रेस्तं गच्छंति नामरूपे विहाय तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यमिति॥ ॥

वेवाभेदइत्यौडुलोमिमतं तत्र मानमाह॥ श्रुतिश्चेति समुत्थानमुक्तौ इति॥ ननु संसारस्यौपाधिकत्वात् सर्वदैवाभेद इत्यात्रा क्व दृष्टांतबलेन सं
सारस्य स्वाभाविकत्वमित्याह॥ क्वचिच्चेति॥ यथा नद्यः स्यंदमानाः समुद्रेस्तं गच्छंति नामरूपे विहायेति नदीनिदर्शनं व्याचष्टे॥ ॥

यथालोक इति सिद्धांतमाह॥ अवस्थितेरिति॥ अत्यंताभेदज्ञापनार्थं जीवमुपक्रम्य द्रष्टव्यत्वादयो ब्रह्मधर्मा उक्ता इत्यर्थः॥ एतेन जीवलिंगानां
ब्रह्मपरत्वकथनार्थमिदमधिकरणं न भवति॥ प्रतर्दनाधिकरणे कथितत्वात् नापि जीवानुवादेन ब्रह्मप्रतिपादनार्थरूपमुक्तं सोऽस्मिन्नगतत्वा
दित्यर्थमिदमधिकरणमिति निरस्तं जीवोद्देशेन ब्रह्मत्वप्रतिपादने भेदोऽप्यावश्यक इति भेदाभेदशंका प्राप्तौ कल्पितभेदेनोद्देश्यत्वादिकं

यथा लोके नद्यः स्वाश्रयमेव नामरूपं विहाय समुद्रमुपयंति एवं जीवोऽपि स्वाश्रयमेव नामरूपं विहाय परं पुरुषमुपैतीति हि तत्रार्थः प्र
तीयते दृष्टांतदार्ष्टांतिकयोस्तुल्यतायै॥ अवस्थितेरिति काशकृत्स्नः॥ अस्यैव परमात्मनोऽनेनापि विज्ञानात्मभावेनावस्थाना
दुपपन्नमिदमभेदेनोपक्रमणमिति काशकृत्स्न आचार्यो मन्यते॥ तथा च ब्राह्मणम् अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्या
करवाणीति॥ एवंजातीयकं परस्यैवात्मनो जीवभावेनावस्थानं दर्शयति मंत्रवर्णश्च सर्वाणि रूपाणि विचित्य धीरो नामानि कृत्वाभिव
दन्यदास्ते इत्येवंजातीयकः॥ ॥ नी॰

स्वतोऽत्यंताभेद इति ज्ञापनार्थत्वमस्यारंभात्॥ ज्ञापने चात्मलिंगं आत्मशब्देनोपक्रांतस्य जीवस्य धर्मिणो धर्मान्तरस्याग्रहणं विनैव ब्रह्मधर्मकथनं भेदा
भेदे धर्मिद्वयग्रहः स्यादिति मंतव्यं धीरः सर्वज्ञः सर्वाणि रूपाणि कार्याणि विचित्य सृष्ट्वा तेषां नामानि च कृत्वा तेषु बुद्ध्यादिषु प्रविश्याभिवदनादिकं
कुर्वन्योऽवर्तत तं विद्वानिह अमृतो भवतीति मंत्रोऽपि जीवपरयोरैक्यं दर्शयतीत्याह॥ मंत्रेति॥ जीवस्य ब्रह्मविकारतां नेच्छन्नित्यत आह॥ ॥

नचत्तेजइति ॥ ॥ मतत्रयं विभज्य दर्शयति ॥ कार्त्स्न्येत्यादिना ॥ कियानपीति ॥ अभेदय द्वैतेपीत्यर्थः ॥ तत्रांशस्य मतस्योपादेयत्वमाह ॥ तत्र कार्त्स्न्येति ॥ सो
यं देवदत्तइति वदत्तत्वमस्यादिवाक्येभ्यः परापरयोरंशंताभेदः प्रतिपादयितुमिष्टोर्थः तदनुसारित्वादित्यर्थः ॥ नानानुक्तिश्चांशत्वंन्यथानुप

नचत्तेजःप्रभृतीनां सृष्टौ जीवस्य पृथक्सृष्टिः श्रुता येन परमात्मनोन्यस्तद्विकारो जीवः स्यात् ॥ कार्त्स्न्यस्याचार्यस्यापि मतः परमेश्व
रो जीवो नान्यइति मतं ॥ आश्मरथ्यस्य तु यद्यपि जीवस्य परस्मादनन्यत्वमभिप्रेतं ॥ तथापि प्रतिज्ञासिद्धेरिति सापेक्षत्वाभिधानात्कार्य
कारणभावः कियानप्यभिप्रेत इति गम्यते ॥ औडुलोमिपक्षे पुनः स्पष्टमेवावस्थांतरापेक्षौ भेदाभेदौ गम्येते ॥ तत्र कार्त्स्न्यीयं
मतं श्रुत्यनुसारीति गम्यते ॥ प्रतिपिपादयिषितार्थानुसारात् तत्त्वमस्यादिश्रुतिभ्यः ॥ एवं च सति तत् ज्ञानादमृतत्वमवक
ल्प्यते ॥ विकारात्मकत्वे हि जीवस्याभ्युपगम्यमाने विकारस्य प्रकृतिसंबंधे प्रलयप्रसंगान्न तज्ज्ञानादमृतत्वमवकल्प्यते ॥ अतश्च
स्वाश्रयस्य नामरूपस्यासंभवात् ॥ उपाध्याश्रयं नामरूपं जीवे उपचर्यते ॥ ॥

पत्त्याप्ययमेवपक्ष आदेय इत्याह ॥ एवं चेति ॥ अंशंताभेदे सतीत्यर्थः ॥ कथंचित्तस्य ज्ञानान्निवृत्तिः संभवति ॥ न सत्यस्येत्यपि द्रष्टव्यं ॥ यदुक्तं नदीद
ष्टांतात्संसारः स्वाभाविक इति तं नेत्याह ॥ अतश्चेति ॥ अनामरूपब्रह्मत्वाज्जीवस्येत्यर्थः ॥ उत्पत्तिश्रुत्या जीवस्य ब्रह्मणा भेदाभेदाविष्यत आह ॥ ॥

अत एवेति॥ उत्पत्तेः स्वाभाविकत्वे मुक्त्ययोगादित्यर्थः॥ अत्र पूर्वपक्षे बीजत्रयमुक्तं जीवेनोपक्रमः परस्यैव समुत्थानञ्च साजीवाभेदाभिधानं विज्ञा
त इत्यत्र श्रुतेति॥ तत्राद्यं बीजं त्रिसूत्र्यां निरस्तं संप्रति द्वितीयं अनुद्धृतये व निराचष्टे यदप्युक्तमित्यादिना॥ आत्मज्ञानात्सर्वविज्ञानं प्रतिज्ञातं त

अत एव उत्पत्तिरपि जीवस्य क्वचिदग्निविस्फुलिङ्गोदाहरणेनाम्नायमानोपाध्याश्रयैवेति वेदितव्या यदप्युक्तं प्रकृतस्यैव महतो भूतस्य द्रष्ट
व्यस्य भूतेभ्यः समुत्थानं विज्ञानात्मभावेन दर्शयन् विज्ञानात्मन एवेदं दृष्टव्यत्वं दर्शयतीति॥ तत्रापि य[illegible]ने परिहरत्वीयो जपित्त
व्याः प्रतिज्ञासिद्धेर्लिङ्गमाश्मरथ्यः इदमत्र प्रतिज्ञातमात्मनि विदिते सर्वमिदं विदितं भवतीदं सर्वं यदयमात्मेति च उपपादितं च॥
सर्वस्य नामरूपकर्मप्रपञ्चस्यैकप्रसवत्वादेकप्रलयत्वाच्च दुन्दुभ्यादिदृष्टान्तैश्च कार्यकारणयोरव्यतिरेकप्रतिपादनात्तस्य
स्या एव प्रतिज्ञायाः सिद्धिं सूचयत्येतल्लिङ्गं॥ यन्महतो भूतस्य भूतेभ्यः समुत्थानं विज्ञानात्मभावेन कथितमित्याश्म
रथ्य आचार्यो मन्यते॥ अभेदे हि सत्येकविज्ञानेन सर्वविज्ञानं प्रतिज्ञातमवकल्प्यत इति॥ उत्क्रमिष्यत एवंभावादित्यौडुलो
मिः॥ उत्क्रमिष्यतो विज्ञानात्मनो ज्ञानध्यानादिसामर्थ्यात्संप्रसन्नस्य परेणात्मनैक्यसंभवादिदमभेदाभिधानमिति ~~काशकृत्स्न~~
मि आचार्यो॥ औडुलोमिराचार्यो मन्यते॥ अवस्थितेरिति काशकृत्स्नः॥ अस्यैव परमात्मनोऽनेनापि विज्ञानात्मभावेनावस्थानादुपपन्नमिदमभे
दाभिधानमिति काशकृत्स्न आचार्यो मन्यते॥ ॥

नहेतुरिदं सर्वं यदयमात्मेति[illegible]उक्तस्य प्रतिपादनात्तदेव प्रतिज्ञातमुपपादितमिति योजना॥ एकस्मादात्मनः सर्वो यस्य एकस्मिन्प्रलयो यस्य तद्भा
वादित्यर्थः॥ समुत्थानमभेदाभिधानमिति यावत्॥ जन्मनाशाभ्याम् उक्तो नाभेद इत्याक्षिप्य परिहरति॥ ननु इत्यादिना॥ मृतस्य सं॥ ॥

अव्यतिरेक

ज्ञानास्तीत्तिवाक्येऽत्रैवमामोहितंगतंसिज्ञानरूपस्यात्मनोज्ञानाभावेनाशप्रसंगादितिमैत्रेय्योक्तोमुनिराह॥ नवाअरेइति॥ मोहंमोहकरंवाक्यं
अविनाशीनाशहेतुशून्यःअनुच्छित्तिधर्मानाशवान्नभवतीति अनुच्छित्तिधर्मेत्यर्थः॥ तृतीयंबीजंतृतीयेगमत्तेनैवनिरसनीयमित्याह॥
यद्यपीत्यादिना॥ आद्यमतद्वयेपिसत्यभेदांगीकारात्केनेत्याक्षेपोनयुक्तः॥ काशकृत्स्नस्यमतेतत्त्वंताभेदाद्विज्ञानस्यकारकाभावात्तयु

ननूच्छेदाभिधानमेतत्॥ एतेभ्योभूतेभ्यःसमुत्थायतान्येवानुविनश्यतिनप्रेत्यसंज्ञास्तीतिकथमेतदभेदाभिधानं॥ नैषदोषः
विशेषविज्ञानविनाशाभिप्रायमेतत्विनाशाभिधानंनोच्छेदाभिप्रायं॥ अत्रैवमाभगवानमूमुहन्नप्रेत्यसंज्ञास्तीतिपर्यनु
अ युञ्जस्वयमेवशुश्रूषार्थोत्तरस्यदर्शितत्वात्॥ नवाअरेहंमोहंब्रवीम्यविनाशीवा अरेयमात्मानुच्छित्तिधर्मामात्रासंसर्गस्त्व
स्यभवतीतिएतदुक्तंभवति॥ कूटस्थनित्यएवायंविज्ञानघनआत्मानास्योच्छेदप्रसंगोस्ति॥ मात्राभिस्तुस्यभूतेन्द्रियलक्ष
णाभिरविद्याकृताभिरसंसर्गोविद्ययाभवतिसंसर्गाभावेचैतत्कृतस्यविशेषविज्ञानस्याभावान्नप्रेत्यसंज्ञास्तीत्युक्तमि
ति॥ यदप्युक्तंविज्ञातारमरेकेनविजानीयादितिकर्तृवचनेनशब्देनोपसंहाराद्विज्ञातास्त्येवेदंद्रष्टव्यमिति॥ तदपिकारा ३२
कत्वीयेनैवदर्शनेनपरिहरणीयं॥ ॥

कइति अस्यानुसारित्वात्मतेभनःकल्पितंविज्ञातृत्वंमुक्तेलातनिभूतपूर्वगत्योक्तमिति॥ परिहरणीयमित्यर्थः॥ किंचपूर्वापरपर्या
लोचनयावाक्यस्यमुक्तात्मपरत्वावगमात्विज्ञातृत्वंकल्पितमेवानूद्यतइतिनतल्लिंगेनजीवपरत्वमित्याह॥ ॥ ॥

अपिचेति॥ आर्थेषु परेषु कारणरूपपक्षस्यैवादेयत्वे किं बीजं तत्राह॥ दर्शितमिति॥ अतश्च श्रुतिमतात्पुनरपि श्रुतिस्मृतिमतमाह सदेवेत्या

अपि च यत्र हि द्वैतमिव भवति तदितर इतरं पश्यतीत्यारभ्याविद्याविषये तस्यैव दर्शनादिलक्षणं विशेषविज्ञानं प्रपंच्य यत्र त्वस्य सर्वमा
त्मैवाभूत्तत्केन कं पश्येदित्यादिना विद्याविषये तस्यैव दर्शनादिलक्षणस्य विशेषविज्ञानस्याभावमभिदधाति॥ पुनश्च विषयाभा
वेप्यात्मानं विजानीयादित्याशंक्य विज्ञातारमरे केन विजानीयादित्याह॥ ततश्च विशेषविज्ञानाभावोपपादनपरत्वाद्वा
क्यस्य विज्ञानधातुरेव केवलः सन् भूतपूर्वगत्या कर्तृवचनेन तृचा निर्दिष्ट इति गम्यते॥ दर्शितं तु पुरस्तात्काशकृत्स्नीयास्य पक्षस्य
श्रुतिमत्वं॥ अतश्च विज्ञानात्मपरमात्मनोरविद्याप्रत्युपस्थापितनामरूपरचितदेहाद्युपाधिनिमित्तो भेदो न पारमार्थि
क इत्येषोर्थः सर्वैर्वेदांतवादिभिरभ्युपगंतव्यः॥ सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं॥ आत्मैवेदं सर्वं ब्रह्मैवेदं सर्वं॥ इदं
३१ सर्वं यदयमात्मा॥ नान्योतोस्ति द्रष्टा॥ नान्यदतोस्ति [illegible] इत्येवंरूपाभ्यः श्रुतिभ्यः॥ स्मृतिभ्यश्च वासुदेवः सर्वमिति क्षेत्रज्ञं चापि मां
विद्धि सर्वक्षेत्रेषु भारत समं सर्वेषु भूतेषु तिष्ठंतं परमेश्वरमित्येवंरूपाभ्यः भेददर्शनापवादाच्च अन्योसावन्योहमस्मीति न
स वेद मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यतीत्येवंजातीयकात्॥ ॥

दिना॥ हेतूनां भेदेन पारमार्थिक इति प्रतिज्ञायाः संबंधः॥ भेदाभेदपक्षे जीवस्य जन्मादिविकारवत्त्वात्तन्निषेधो न स्यादित्याह॥ ॥

सवा एष॥ भेदस्य सत्यत्वे तन्नाशभयाबाधाद् अहं भ्रंशेनेति निर्बाधं ज्ञानं न स्यादित्याह॥ अन्यथा चेति॥ अभेदस्यापि सत्यत्वात्तत् प्रमेत्यारंभ्य भेदाभेदयो
र्विरोधात् संशयः स्यादित्याह॥ सुनिश्चितेति॥ भास्करनिर्बाधज्ञानमित्यत आह॥ निरपवादमिति॥ अहं ब्रह्मेत्यबाधितनिश्चयस्यैव शोकादि
निवर्तकत्वमित्यत्र स्मृतिमप्याह॥ स्थितेति॥ अस्यां नैकैकत्वे हि प्रज्ञा प्रतिष्ठिता भवति न भेदाभेदयोरिति भावः॥ ननु जीवपरमात्मनो

स वा एष महानज आत्माऽजरोऽमरोऽमृतोऽभयो ब्रह्मेति चात्मनि सर्वविक्रियाप्रतिषेधात्॥ अन्यथा च मुमुक्षूणां निरपवादविज्ञा
नानुपपत्तेः॥ सुनिश्चितार्थानुपपत्तेश्च॥ निरपवादं हि विज्ञानं सर्वाकांक्षानिवर्तकमात्मविषयमिष्यते वेदांतविज्ञानसुनिश्चि
तार्था इति च श्रुतिः॥ तत्र को मोहः कः शोक एकत्वमनुपश्यत इति स्थितप्रज्ञलक्षणस्मृतेश्च॥ स्थिते च क्षेत्रज्ञपरमात्मैक
त्वविषये सम्यग्दर्शने क्षेत्रज्ञः॥ परमात्मेति नाममात्रभेदात् क्षेत्रज्ञोऽयं परमात्मनो भिन्नः परमात्मायं क्षेत्रज्ञाद्भिन्न इत्येवं
जातीयक आत्मक्षेत्रज्ञभेदविषयो निर्बंधो निरर्थकः॥ एको ह्ययमात्मा नाममात्रभेदेन बहुधाभिधीयत इति॥ न हि सत्यं ३२
ज्ञानमनंतं ब्रह्म यो वेद निहितं गुहायामिति • कांचिदेवैकां गुहामभिसृत्यैतदुक्तं॥ न च ब्रह्मणोऽन्यो गुहायां निहितोऽस्ति त
त्सृष्ट्वा तदेवानुप्राविशदिति स्रष्टुरेव प्रवेशश्रवणात्॥ ॥

यतोऽभिन्नौ अपर्यायनामवत्त्वात् स्तंभकुंभवदित्यत आह॥ स्थिते चेति॥ कथं तर्हि पर्यायनामभेद इत्याशंक्य जीवत्वेश्वरत्वादिनिमित्तभेदा
दित्याह॥ एको हीति॥ किंचाविद्यातत्कार्यबुद्धिरूपायां गुहायां स्थितो जीवो भवति तस्यामिव ब्रह्म निहितमिति श्रुतेः स्थानैक्याज्जीव एव ब्रह्मेत्याह॥
न हीति॥ कांचिदेवैकामिति॥ जीवस्थानादन्यामित्यर्थः॥ नन्वेकस्यां गुहायां द्वौ किं न स्यातामित्यत आह॥ न चेति॥ स्रष्टुरेव प्रवेशेन जीवत्वान्न भेदः
नन्वसंताभेदे जीवस्य स्रष्टृभानाद् ब्रह्मादिस्पष्टं॥ ॥

स्पष्टता

स्यादतंस्पष्टत्वात्तयोर्भेदइतिचेन्नदर्पणे प्रतिबिंबस्य स्फुटत्वे ~~बिंबस्यास्फुटत्वे~~ पि बिंबस्यास्फुटत्ववत्कल्पितभेदेन विरुद्धधर्मव्यवस्थोपप
त्तेः॥ सत्यभेदेयेषामाग्रहस्तेषांदोषमाह॥ यैरिति॥ सोदमिति तत्त्वमसीत्यत्र कार्यकारणद्रव्यसामानाधिकरण्यादत्यंताभेदो वेदांतार्थस्तदूष
एवनिश्रेयससाधनं तस्यबाधो नयुक्त इत्यर्थः॥ किंचभेदाभेदवादिनो ज्ञानकर्मभ्यां कृतकं मोक्षं कल्पयंति॥ तत्रानित्यत्वदोषः यत्कृतकं त
दनित्यमिति तत्रयत्क्रियासाध्यंतदनित्यमिति न्यायबाधितं अस्माकं तुनर्थध्वंसस्य ज्ञानसाध्यत्वान्नित्यमुक्तात्ममात्रत्वाच्च नानित्यत्वदोषइति

येतुनिर्बंधं कुर्वंतित्ते वेदांतार्थबाधमानाः श्रेयोद्वारं सम्यक्दर्शनमेव बाधंते॥ कृतकमनित्यं च मोक्षं कल्पयंति॥ न्यायेन च न
संगच्छंत इति॥ प्रकृतिश्च प्रतिज्ञादृष्टांतानुरोधात् यथाभ्युदयहेतुत्वाद्धर्मो जिज्ञास्य एवं निश्रेयसहेतुत्वाद्ब्रह्मजिज्ञास्यमि दू
त्युक्तं। ब्रह्मत्वजन्माद्यस्य यत इति लक्षितं॥ तत्र लक्षणं घटरुचकादीनां मृत्सुवर्णादिवत्स्यादिति तेकुलालसुवर्णकारादिवन्निमि
त्तत्वेन च समानं इत्युक्तो भवति विमर्शः किमात्मकं पुनर्ब्रह्मणः कारणत्वं स्यादिति॥ तत्रनिमित्तकारणमेव तावत्केवलं स्यादिति प्रतिभाति
कस्मात्॥ ईक्षापूर्वककर्तृत्वश्रवणात्॥ ॥

भाष्यः॥ तस्मात्मैत्रेयी ब्राह्मणं अस्य ग्रंथब्रह्मणि समन्वितमिति सिद्धं प्रकृतिश्च प्रतिज्ञालक्षणसूत्रेण स्यसंगतिं यत्नुवृत्तं स्मारयति॥ यथेति॥ तत्रहि
गो॥ ब्रह्मबुद्धिस्ववेदांतार्थसामान्यतो जगत्कारणत्वं लक्षणमुक्तं तेन बुद्धिस्थे ब्रह्मणि कृत्स्नवेदांत समन्वयं प्रतिपाद्यत्कारणत्वं किं कर्तृत्वमात्रमुत प्रकृति
त्वकर्तृत्वोभयरूपमिति विशेषजिज्ञासायामिदमारभ्यते॥ तथा च सामान्यज्ञानस्य विशेषचिंताहेतुत्वात्तेनास्य संगतिः॥ यद्यपि तदानं तत्र्यमस्य
पुक्तं तथापि निश्चितताप्तर्यवेदांतैः कर्तृमात्रेश्वरसेश्वरैर्निरासः कृत इति समन्वयांते इदं लिखितं॥ लक्षणसूत्रस्याध्यायादिसंगतत्वात्॥ ॥

त्रुं

दि दस्याप्यध्यायसंगतिः॥ पूर्वत्र सर्वविज्ञाने न प्रतिज्ञाया मुख्यत्वाद्ब्रह्मणो जीवपरत्वं निरस्तं तद्युक्तं कर्तुरुपादानत्वाभेदेन प्रतिज्ञाया गौणत्वादित्याक्षिप
तै ति तत्र निमित्तत्वादिना पूर्वोत्तरपक्षयोर्द्वैताद्वैतसिद्धिः फलं॥ ईक्षापूर्वकेति ईक्षणश्रुत्या कर्तृत्वं निश्चितं तथा च ब्रह्म न जगत्प्रकृतिः कर्तृत्वात्
य यत्कर्तृ तत्तस्य न प्रकृतिर्यथा घटकर्ता कुलाल इत्यर्थः॥ जगद्भिन्नकर्तृपादानकं कार्यत्वाद्घटवदित्याह॥ अनेकेति ब्रह्मणोपादानत्वमीश्वरत्वाद्राजादिवदि गो
त्याह॥ ईश्वरेति॥ जगन्न ब्रह्मप्रकृतिकं तद्विलक्षणत्वात्॥ यद्वित्थं तत्तथा कुलालविलक्षणघटवदित्याह॥ कार्यं चेति॥ निष्कलं निरवयवं

ईक्षापूर्वकं हि ब्रह्मणः कर्तृत्वमवगम्यते॥ स ईक्षांचक्रे स प्राणमसृजतेत्यादिश्रुतिभ्यः॥ ईक्षापूर्वकं च कर्तृत्वं निमित्तकार
णेष्वेव कुलालादिषु दृष्टं॥ अनेककारकपूर्विका च क्रियाफलसिद्धिर्लोके दृष्टा स च न्यायः आदिकर्तर्यपि युक्तः संक्रमयितुं॥ ई
श्वरत्वप्रसिद्धेश्च॥ ईश्वराणां हि राजवैवस्वतादीनां निमित्तकारणत्वमेव केवलं प्रतीयते तद्वत्परमेश्वरस्यापि निमित्तकार
णत्वमेव युक्तं प्रतिपत्तुं॥ कार्यं चेदं जगत्सावयवमचेतनमशुद्धं च दृश्यते कारणेनापि तस्य तादृशेनैव भवितव्यं कार्यका
रणयोः सारूप्यदर्शनात्॥ ब्रह्म च नैवंलक्षणमवगम्यते॥ निष्कलं निष्क्रियं शान्तं निरवद्यं निरंजनमित्यादिश्रुतिभ्यः॥ पारि ३५
शेष्याद्ब्रह्मणोन्यदुपादानं कारणमभ्यु॥ ॥

निष्क्रियमचलं शान्तमपरिणामि॥ निरवद्यं निरस्तसमस्तदोषं॥ तत्र हेतुः॥ निरंजनमिति अंजनतुल्यतमः शून्यमित्यर्थः॥ तर्हि ज
गतः स्वतन्त्रोपादानं किमित्यत आह॥ परिशेष्यादिति॥ ब्रह्मनिषेधे प्रधानं परिशिष्यत इत्यभिमानः॥ सिद्धान्तेति प्रकृतिश्चेति॥ चका
रान्निमित्तत्वग्रहः एवमुभयरूपे कारणत्वे तयोरबाधो भवतीत्याह॥ एवमिति॥ कर्तृज्ञाना॥ ॥ य

दपि सर्वकार्यज्ञानं केन स्यादित्यत आह ॥ निमित्तकारणव्यतिरेकस्त्विति मृद्दारीनामुपादानानां दृष्टांततया दार्ष्टांतिकस्य ब्रह्मण उपादानत्वं वक्ष्य
मित्याह ॥ दृष्टांतोपीति वाचारभ्यनाममात्रं विकारो न वस्तुतोस्तीति सत्यकारणज्ञानाद्विकारज्ञानं युक्तमित्यर्थः ॥ गतिसामान्यार्थमुंडके

थादिगुणकं स्यादित्यस्ति समभ्युपगंतव्यं ब्रह्मकारणत्वश्रुतेर्निमित्तत्वमात्रे पर्यवसानादिति ॥ एवं प्राप्ते ब्रूमः ॥ प्रकृतिश्च उपादान
कारणं च ब्रह्माभ्युपगंतव्यं ॥ निमित्तकारणं च ॥ न केवलं निमित्तकारणमेव कस्मात् ॥ प्रतिज्ञादृष्टांतानुपरोधात् ॥ एवं हि प्रतिज्ञा
दृष्टांतौ श्रौतौ नोपरुध्येते ॥ प्रतिज्ञा तावत् ॥ उत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमिति ॥
तमपिविज्ञा तत्र चैकेन विज्ञातेन सर्वमन्यदविज्ञातं भवतीति प्रतीयते ॥ तच्चोपादानकारणविज्ञाने सर्वविज्ञानं संभवति ॥ उपादानकारणाव्य
तिरेकात् कार्यस्य निमित्तकारणाव्यतिरेकस्तु कार्यस्य नास्ति लोके तक्ष्णः प्रासादव्यतिरेकदर्शनात् ॥ दृष्टांतोपि यथा सोम्यै
केन मृत्पिंडेन सर्वं मृन्मयं विज्ञातं स्याद्वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यमित्युपादानकारणगोचर एवाम्नायते
तथैकेन लोहमणिना सर्वं लोहमयं विज्ञातं स्यादेकेन नखनिकृंतनेन सर्वं कार्ष्णायसं विज्ञातं स्यादिति च ॥ तथान्यत्रापि कस्मिन्नु भग
वो विज्ञाते सर्वमिदं विज्ञातं भवतीति ॥ प्रतिज्ञा यथा पृथिव्यामोषधयः संभवंतीति दृष्टांतः ॥ तथा आत्मनि खल्वरे दृष्टे श्रु
ते मते विज्ञाते इदं सर्वं विदितमिति प्रतिज्ञा स यथा ॥ ॥

पि प्रतिज्ञादृष्टांतावाह तथान्यत्रापीति ॥ बृहदारण्यकेपि तावाह ॥ तथा आत्मनीति ॥ घटः स्फुरतीत्यनुगतस्फुरणं प्रकृतित्वादतिरेकेण विका रानंसत्त्वीति ॥ ५

सोयमर्थो यथा स्फुटः स्यात्तथा दृष्टान्तः स उच्यते ॥ हन्यमानदुन्दुभिजन्यात् शब्दसामान्याद्बाह्यात् विशेषशब्दान् सामान्यग्रहणातिरेकेण पृथग्ग्र
हीतुं श्रोता न शक्नुयात् सामान्यस्य तु ग्रहणेन दुन्दुभ्याघातजशब्दविशेषो गृहीतो भवति तस्य शब्दग्रहणेन तद्गतो नरविशेषशब्दो गृहीतो भवति ॥
अतः शब्दसामान्यग्रहणात् विशेषाः सामान्ये कल्पिताः तद्वदात्मनि मानभास्याघटादय आत्मनि कल्पिता इत्यर्थः ॥ प्रतिज्ञादृष्टान्तानुपरोधा ५

दुन्दुभेर्हन्यमानस्य न बाह्यान् शब्दान् शक्नुयाद्ग्रहणाय दुन्दुभेस्तु ग्रहणेन दुन्दुभ्याघातस्य वा शब्दो गृहीत इति दृष्टान्तः ॥ एवं ॥ यथासंभवं प्रति
ये दृष्टान्तं प्रति ज्ञादृष्टान्तौ प्रकृतित्वप्रसाधनौ प्रत्येतव्यौ ॥ यत इतीयमपि पंचमी यतो वा इमानि भूतानि जायन्ते ॥ इत्यत्र जनिक
र्तुः प्रकृतिरिति विशेषस्मरणात् प्रकृतिलक्षणैवापादाने द्रष्टव्या ॥ निमित्तत्वं त्वधिष्ठात्रन्तराभावात् अधिगन्तव्यं ॥ य
था हि लोके मृत्सुवर्णादिकमुपादानकारणं कुलालसुवर्णकारादीनधिष्ठातॄनपेक्ष्य प्रवर्तते ॥ नैवं ब्रह्मण उपादानकारणस्य
सतोन्योधिष्ठातापेक्ष्योस्ति प्रागुत्पत्तेरेकमेवाद्वितीयमित्यवधारणात् अधिष्ठात्रन्तराभावोपि प्रतिज्ञादृष्टान्तानुपरोधादेवोदितो ३५
वेदितव्यः ॥ अधिष्ठातरि ह्युपादानादन्यस्मिन्नभ्युपगम्यमाने पुनरप्येकविज्ञानेन सर्वविज्ञानस्यासंभवात् प्रतिज्ञादृ
ष्टान्तोपरोध एव स्यात् तस्मादधिष्ठात्रं ॥ ॥

६

तल्लिंगाद्ब्रह्मणः प्रकृतित्वमुक्त्वा पंचमीश्रुत्याप्याह ॥ यत इति यतो वा इमा इत्यत्र श्रुतौ यत इति पंचमी प्रकृतौ द्रष्टव्येत्यन्वयः ॥ जनिकर्तुर्जायमान
२ स्य कार्यस्य प्रकृतिरुपादानसंज्ञिका भवतीति सूत्रार्थः ॥ संज्ञायाः फलमपादाने पंचमीति सूत्रात् प्रकृतौ पंचमी लाभः ॥ एवं ब्रह्मणः प्रकृ
तित्वं प्रसाध्य कर्तृत्वं साधयति निमित्तत्वमिति ॥ ब्रह्मस्वातिरिक्तकर्तृनिषेधेयं प्रकृतित्वान्मृदादिवदिति साध्यनुमानानाशागमः ॥ ॥

स

बाधकमाह॥ प्रागुत्पत्तेरिति॥ जगत्कर्तृब्रह्मणेवेत्यपि सूत्रं योजयन्ति॥ अधिष्ठात्रंतरेति॥ एकस्योभयरूपं कारणत्वं भवविरुद्धमिति सूत्रचतुष्टये
न साधयन्ति॥ कृतश्चेत्यादिना अभिध्यारसृष्टिसंकल्पः॥ अभ्युच्चयो हेत्वनंतरं॥ आकाशादेवेत्येवकारसूचितमुपादानांतरानुपादानमग्रहणं

तदभावादात्मनः कर्तृत्वमुपादानांतराभावाच्च प्रकृतित्वं कुतश्च आत्मनः कर्तृत्वे प्रकृतित्वे॥ अभिध्योपदेशाच्च॥ अभिध्योपदेश
आत्मनः कर्तृत्वप्रकृतित्वे गमयति सोऽकामयत बहु स्यां प्रजायेयेति॥ तदैक्षत बहु स्यां प्रजायेयेति च तत्राभिध्यानपूर्विकायाः
स्वातंत्र्यप्रवृत्तेः कर्तेति गम्यते बहु स्यामिति प्रत्यगात्मविषयत्वात् बहुभवनाभिध्यानस्य प्रकृतिरित्यपि गम्यते॥ साक्षाच्चो
भयाम्नानात्॥ प्रकृतिरित्यापकृष्यते॥ इतश्च प्रकृतिर्ब्रह्म यत्कारणं साक्षात् ब्रह्मैव कारणमुपादायोभौ प्रलयप्रभवावा
म्नायेते॥ सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यंते॥ आकाशं प्रत्यस्तं यंतीति यद्धि यस्मात्प्रभवति यस्मिंश्च प्रलीयते
तत् तस्योपादानं प्रसिद्धं यथा व्रीहियवानां पृथिवी साक्षादितिचोपादानांतरानुपादानं दर्शयत्याकाशादेवेति प्रत्यस्त
मयश्च नोपादानादन्यत्र कार्यस्य दृष्टः॥ आत्मकृतेः परिणामात् इतश्च प्रकृतिर्ब्रह्म यत्कारणं ब्रह्मप्रक्रियायां तदात्मानं स्वय
मकुरुतेति आत्मनः कर्मत्वं कर्तृत्वं च दर्शयति॥ आत्मानमिति कर्मत्वं स्वयमकुरुतेति कर्तृत्वं कथं पुनः पूर्वसिद्धस्य सतः कर्तृ
त्वेन व्यवस्थितस्य क्रियमाणत्वं शक्यं संपादयितुं॥ ॥

साक्षादिति पदेन सूत्रकारो दर्शयतीति योजना॥ आत्मसंबंधिनी कृतिरात्मकृतिः संबंधश्चात्मनः कृतिं प्रति विषयत्वमाश्रयत्वं च॥ ननु कृ
तेराश्रयः सिद्धो भवति विषयस्तु साध्य इत्येकस्योभयं विरुद्धमित्याशंकते॥ कथं पुनरिति॥ यथाभेदः साध्यपरिणामाभेदेन कृतिविषयत्वं

नह्युपादानत्वमात्मनः परिणामाद्विकारात्मना॥

नमित्यविशेषइतिशेषः॥ सिद्धस्यापि साध्यत्वे दृष्टांतमाह॥ विकारात्मनेति॥ ननु ब्रह्मण आत्मानमिति द्वितीयया कार्यात्मना साध्यत्वं अस्यास्तु प्रकृ
तित्वं कर्तृत्वं न्वोस्तित्यत आह॥ स्वयमिति चेति॥ ब्रह्मणः कृतिकर्मत्वोपपादनार्थं परिणामादिति पदं व्याख्याय अन्यथापि व्याचष्टे पृथक्सू
त्रमिति भट्टरुद्रदत्त ब्रह्म सर्वत्यन्येति॥ परिणामस्य सामानाधिकरण्यश्रुतेः ब्रह्मणः प्रकृतित्वमित्यर्थः॥ ब्रह्मत्व संभूत तत्र यं त्यस्वरोप्संभूतद्

परिणामादिति क्रमः॥ पूर्वसिद्धोपि हि स आत्मा विशेषेण विकारात्मनापरिणमयामासात्मानमिति॥ विकारात्मना च परिणा
मो भ्रदायास्य प्रकृतिषु पलब्धः॥ स्वयमिति च विशेषणात् निमित्तांतरानपेक्षत्वमिति प्रतीयते॥ परिणामादिति वाप्य
कसूत्रं तस्येषोर्थः॥ इतश्च प्रकृति ब्रह्म यत्कारणं ब्रह्मणएव विकारात्मना परिणामः सामानाधिकरण्येनाम्नायते॥ सच्च
त्यश्चाभवन्निरुक्तं चानिरुक्तं चेत्यादिनेति॥ योनिश्च हि गीयते॥ इतश्च प्रकृति ब्रह्म यत्कारणं योनिरित्यपि पठ्यते वेदां २६
तेषु॥ कर्तारमीशं पुरुषं ब्रह्मयोनिमिति॥ यद्भूतयोनिं परिपश्यंति धीरा इति च॥ योनिशब्दश्च प्रकृतिवचनः समधिगतो
लोके पृथिवी योनिरोषधिवनस्पतीनामिति॥ स्त्रीयोनेरप्यस्त्येवावयवद्वारेण गर्भं प्रत्युपादानकारणत्वं॥ ॥

य निरुक्तं च कुराक्यं प्रत्यादि अनिरुक्तं च कुं अरूपरूपोत्तरूपादिकं ब्रह्मैवाभवदित्यर्थः॥ अत्र सूत्रे परिणामशब्दः कार्यमात्रपरः॥ ननु सत्यका
क र्यात्मपरिणामपरः॥ तदनन्यत्वमिति विवर्तवादस्य वक्ष्यमाणत्वात्॥ योनिशब्दाच्च प्रकृतित्वमित्याह॥ योनिश्चेति कर्तारं क्रियाशक्तिमंतं ईशं
नियंतारं पुरुषं प्रत्यंचं ब्रह्मपूर्णं योनिं प्रकृतिं ध्यानेन पश्यंतीत्यर्थः॥ ननु नुपादाने दिङ्गैयोनौ योनिशब्दो दृष्टत इत्यत आह॥ स्त्रीयोनेरिति
शक्तित्वम वयवद्वाराद्वार्थः॥ योनिशब्दस्य स्त्रीनमप्यर्थो भवतीति सोत्र भूतयोन्यादिशब्दैर्ग्राह्यः॥ ऊर्णनाभ्यादि प्रकृतिदृष्टांतवाक्यशेषादेरो

कश्चिदिति॥ हेतुंद्रूते तत्वनिर्णये उपदेशनाययोनिःस्थानंमयाकारि कृतमित्यर्थः॥ पूर्वपक्षोक्तानुमानानि अन्यथाभवाधमाह॥ यस्मिन्नित्यादि
ना॥ ननु अनुमानस्य अत्यनुपेक्षतानतयाबाधइत्यतआह॥ नहीति॥ जगत्कर्तापक्षः अत्रैवसिध्यतियाश्रुतिःसाशरीरजन्येतिव्याप्तिविरोधेन

कश्चित्स्थानवचनोपियोनिशब्दोदृष्टः योनिष्टइंद्र निषदे आकारीतिवाक्यशेषात्तत्रप्रकृतिवचनतापरिगृह्यते
यथोर्णनाभिःसृजतेगृह्णतेचेत्येवंजातीयकात्॥ एवंप्रकृतित्वंब्रह्मणःप्रसिद्धंयत्पुनरिदमुक्तंईक्षापूर्वकंकर्तृ
त्वंनिमित्तकारणेष्वेवकुलालादिषुलोकेदृष्टंनोपादानेष्वित्यादितत्प्रत्युच्यते॥ नलोकवदिहभवितव्यंनह्ययमनुमा
नगम्योर्थःशब्दगम्यत्वात्त्वर्थस्ययथाशब्दमिहभवितव्यंशब्दश्चेक्षितुरीश्वरस्यप्रकृतित्वंप्रतिपादयतीत्यवोचाम
स्या

नित्यश्रुतिमतोनुमानासंभवादतःश्रौतमीश्वरंपक्षीकृत्यानुपादानत्वसाधनेभवत्येवोपजीव्ययाप्रकृतित्वबोधिकाश्रुत्याबाधइत्यर्थः॥ यदुक्तं
विलक्षणत्वाद्ब्रह्मणोनजगदुपादानत्वमितितत्राह॥ पुनश्चेति॥ नविलक्षणत्वादित्यारभ्येत्यर्थः अतःउभयरूपंकारणत्वंब्रह्मणोलक्षणमि
तिसिद्धमेतेन॥ ॥ या

सर्वे व्याख्याता॥ अस्यातिदेशाधिकरणस्य तात्पर्यं वक्तुं वृत्तमनुवदति ईक्षतेरिति प्रधानवादस्य प्राधान्येन निराकरणे हेतुमाह॥ तस्य हीत्यादिना
तर्ह्यण्वादिवादा उपेक्षणीया दुर्बलत्वादित्यत आह तेऽपीति॥ निर्मूलास्ते कथं प्रतिपक्षा इत्यत आह तेषामिति॥ तथा हि छांदोग्ये जगत्कारण

व्याख्याता

रेण प्रतिवक्ष्यामः एतेन सर्वे व्याख्याताः ईक्षतेर्नाशब्दमित्यारभ्य प्रधानकारणवादः सूत्रैरेव पुनः पुनराशंक्य निराकृतः
तस्य हि पक्षस्योपोद्बलकानि कानिचिल्लिंगाभासानि वेदांतेष्वापातेन प्रतिभांतीति स च कार्यकारणानन्यत्वाभ्युपग
मात्प्रत्यासन्नो वेदांतवादस्य देवलप्रभृतिभिश्च कैश्चिद्धर्मसूत्रकारैः स्वग्रंथेष्वाश्रितः तेन तत्प्रतिषेधे यत्नोऽतीव कृ
तो नाण्वादिकारणप्रतिषेधे तेऽपि त्वब्रह्मकारणपक्षस्य प्रतिपक्षत्वात्प्रतिषेद्धव्याः तेषामप्युपोद्बलकं वैदिकं किंचिल्लिं
गमापातेन मंदमतीन्प्रति भायादिति॥ अतः प्रधानमल्लनिबर्हणन्यायेनातिदिशति॥ एतेन प्रधानकारणवादप्रतिषेध॥ ३७

तत्राप नार्थं पितापुत्रमुवाच॥ आसां वटधानानां मध्ये कां भिंधीति भिन्ना भगवन्नस्क्याच॥ पुनः पुनः पित्रा किमत्र पश्यसीत्युक्ते न किंचन भग
वंस्याह॥ तत्र पित्राणिमानं न पश्यसीत्युक्तं॥ तथा च न किंचन शब्दाच्छून्यस्वभाववादो प्रतीयेते॥ अणुत्राख्यास्परमाणवाद इति एवमक्षदे वेद
म॥ ॥

आसीद्दणोरणीयानित्यादिलिंगं द्रष्टव्यं अत्र अण्वादिवादाः श्रौता न वेति संशये सत्सद् एवेत्यादिशब्दबलाच्छ्रौता इति प्राप्ते तिदिशति ॥ एतेनेति
अस्यातिदेशत्वान्न पृथक् संगत्याद्यपेक्षा न किंच नासदृष्टयोः प्रत्यक्षायोग्यधर्मकपरत्वादणुशब्दस्य सूक्ष्माभिप्रायत्वादशब्दत्वं तेषां वा

न्यायकलापेन सर्वे एवाण्वादिकारणवादा अपि प्रतिषिद्धतया व्याख्याता वेदितव्याः तेषामपि प्रधानकारणवादव
दशब्दत्वाच्छिष्टपरिग्रहविरोधित्वाच्चेति व्याख्याता व्याख्याता इति पदाभ्यासोऽध्यायपरिसमाप्तिं द्योतयति ॥ ॥ इति श्री
शारीरमीमांसाभाष्ये शंकरभगवत्पादकृतौ प्रथमाध्यायस्य चतुर्थपादः समाप्तः ॥ ॥ एवं प्रथमाध्यायः ३८

दनां प्रधानवादवदश्रौतत्वं ब्रह्मकारणश्रुतिबाधितत्वं च तस्माद्ब्रह्मैव परमकारणं तस्मिन्नेव सर्वेषां वेदान्तानां समन्वय इति सिद्धं ॥
॥ इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीगोविंदानंदभगवत्कृतौ शारीरकमीमांसाव्याख्यायां भाष्यरत्नप्रभायां प्रथमाध्यायस्य
चतुर्थः पादः ॥४॥ ॥ इति प्रथमाध्यायः ॥ ॥

शारीरकसूत्रभाष्यद्वितीयाध्यायप्रारंभः ·

सा॰ लक्ष्म॥ श्रीगणेशाय नमः॥ हरिः ॐ॥ ॥ सांख्यादिस्मृतियुक्तिभिर्न चलितो वेदान्तसिद्धान्तगो निर्मुक्तैर्विविधागमैरविदितो योमा
२ दिजन्माद्ययः॥ उत्पत्त्यलसत्तविवर्जितश्चितिवपुर्यो मौचकं जीवकोल्लिंगितमध्यितो पि नाम ततनुकृतं जानकीशं भजे १ नामरूपेभ्या
१ करणतो नामा तिरस्कृतेनीम ततनुष्कृदपि संशास्त्रं ज्ञिप्याकर्त्ता पिलिंगहारीरे माधिना कृत्तेति श्रंसद्गति च मध्यितः प्रसिद्धेभ्यस्तं प्रत्यभिन्नं

श्रीगणेशाय नमः॥ ॐ हरिः ॐ॥ स्मृत्यनवकाशदोषप्रसंग इति चेन्नान्यस्मृत्यनवकाशदोषप्रसंगात्॥ प्रथमे ध्याये
सर्वज्ञः सर्वेश्वरो जगतः उत्पत्तिकारणम् मृत्सुवर्णादय इव घटरुचकादीनामुत्पन्नस्य जगतो नियन्तृत्वेन स्थितिकारणं मायावी
व मायायाः प्रसारितस्य जगतः पुनः स्वात्मन्येवोपसंहारकारणम् वृत्तिरिव चतुर्विधस्य भूतग्रामस्य स एव च सर्वेषां न आत्मे
त्येतद्वेदान्तवाक्यसमन्वयप्रतिपादनेन प्रतिपादितं॥ प्रधानादिकारणवादाश्चाशब्दत्वेन निराकृताः॥

परमात्मानं मूलप्रकृतिनियन्तारं भजे इत्यर्थः॥ स्मृतिप्रसंगात् सर्वेजनप्रधानयोर्विरुद्धमपि विषमिभावं संगतिं वक्तुं वृत्तं कीर्तयति प्रथ
मेध्याय इति। जन्मादिसूत्रमारभ्य जगदुत्पत्त्यादिकारणं ब्रह्मेति प्रतिपादितं। शास्त्रदृष्ट्या लिंगादिसूत्रेषु समन्वयो द्वितीयः सर्वात्मेत्युक्तं। १
आनुमानिकमित्यादिनाप्यकारणांतरस्याश्रौतत्वं प्रदर्शितमित्यर्थः॥ ॥

एवं प्रथमाध्यायस्यार्थमनवद्य तस्मिन् विषये विरोधपरिहारविषयमिदं द्वितीयाध्यायमारभमाणः संक्षिप्य कथयति ॥ इदानीमि
ति। अत्र प्रथमपादे समन्वयस्य सांख्यादिस्मृतिभिर्युक्तिभिश्च विरोधपरिहारः क्रियते। द्वितीयपादे सांख्ययोगगतानामितिमतानां समन्वयविरोधा
पकत्वमुच्यते ॥ तृतीयपादे श्रुतिविरोधेन तस्य सृष्टिश्रुतीनां जीवात्मश्रुतीनां च व्योमादिमहाभूतानां जन्मलयक्रमादिकथनेनाविरोधः प्रतिपा
द्यते ॥ चतुर्थपादे लिंगशरीरश्रुतीनां अविरोधः स्पष्टः ॥ अयमेवार्थः सुखबोधार्थं श्लोकेन संगृहीतः। द्वितीये स्मृतितर्काभ्यामवि
विरोधोऽन्यदुष्टता। भूतभोक्तृश्रुतेर्लिंगश्रुतेरप्यविरुद्धतेति। तत्रानन्तरे विषये विरोधाशंकासमाधेयोगात्समन्वयाध्यायानंतर
मिदानीं स्वपक्षे स्मृतिन्यायविरोधपरिहारः प्रधानादिवादानां च न्यायाभासोपबृंहितत्वं प्रतिवेदान्तं च सृष्ट्यादिप्रक्रियायाः अविगी
तत्वमित्यस्यार्थजातस्य प्रतिपादनाय द्वितीयोध्याय आरभ्यते। तत्र प्रथमं तावत्स्मृतिविरोधमुपन्यस्य परिहरति ॥ यदुक्तं ब्रह्मैव स
र्वज्ञं जगतः कारणमिति तदयुक्तं। कुतः स्मृत्यनवकाशदोषप्रसंगात्। स्मृतिश्च तंत्राख्या परमर्षिप्रणीता शिष्टपरिगृहीता अन्या
श्च तदनुसारिण्यः स्मृतयः एवं सत्यनवकाशाः प्रसज्येरन् ॥
र्थमविरोधाध्यायस्य प्रवृत्तं। तत्र प्रथमाधिकरणानां संगतिमाह। तत्र प्रथमस्मिन्निति। श्रौते समन्वये विरोधनिरासार्थत्वादस्य पादस्य श्रुति
शास्त्राध्यायसंगतयः स्फुटत्वादपेक्षकत्वात्तेषामधिकरणानामेतत्पादसंगतिः। अत्र पूर्वपक्षे स्मृतिविरोधादुक्तसमन्वयासिद्धिः
फलं सिद्धांते तत्सिद्धिरिति विवेकः। तत्र सूत्रस्य पदच्छेदः तत्समन्वयो विग्रहः सृष्टिं सांख्यस्य साधिकृत्य प्रणीतत्वात् स्मृतिः सामान्यतस्तस्याभा
संदेहः पूर्वपक्षमाह। यदुक्तमिति। तत्र तस्मिन् सांख्ये तंत्रात्मनेनेति तंत्रशास्त्रं कपिलोक्तमन्यच्च पंचशिखादिभिः प्रोक्तं एवं स्मृतिर्वेदांतानाम

ब्र॰सू॰भा॰२ तासामपि ब्रह्मण्येकत्वमस्तित्वविरोध इत्यत आह तासु हीति॥ ननु सांख्यस्मृतिरप्रमाणमस्तु तद्वाधे ह मन्वादिस्मृतीनामप्रामाण्यं स्या
२ दिस्मृतीनां प्रमाणानां धर्मे सावकाशत्वात्प्रामाण्यं स्यादित्याह। मन्वादीति। तर्हि सांख्यादिस्मृतीनामपि धर्मे तात्पर्येण प्रामाण्यमस्तु तत्त्वं तु ब्रह्मैवेत्यवि
रोध इत्यत आह। नैवमिति। तत्त्वे विकल्पानुपपत्तेर्निरवकाशस्मृत्यनुसारेण श्रुतिव्याख्या न युक्तेति सावकाशान्निरवकाशं बलीय इति

तासु ह्यचेतनं प्रधानं स्वतंत्रं जगतः कारणमुपनिबध्यते। मन्वादिस्मृतयस्तावच्चोदनालक्षणेनाग्निहोत्रादिना धर्मजातेनापेक्षितमर्थं समर्पयंत्यः सावकाशा भवंत्यस्य वर्णस्यास्मिन्काले ऽनेन विधानेनोपनयनमीदृशश्चाचार इत्थं वेदाध्ययनमित्थं समावर्तनमित्थं सहधर्मचारिणीसंयोग इति। तथा पुरुषार्थांश्च वर्णाश्रमधर्मान्नानाविधान्विदधति। नैवं कपिलादिस्मृतीनामनुष्ठेये विषयेऽवकाशोऽस्ति मोक्षसाधनमेव हि सम्यग्दर्शनमधिकृत्य ताः प्रणीताः। यदि तत्राप्यनवकाशाः स्युः आनर्थक्यमेवासां प्रसज्येत। तस्मात्तदविरोधेन वेदांता व्याख्यातव्याः। कथं पुनरीक्षत्यादिभ्यो हेतुभ्यो ब्रह्मैव सर्वज्ञं जगतः कारणमित्यवधारितः श्रुत्यर्थः स्मृत्यनवकाशदोषप्रसंगेन पुनराक्षिप्यते। भवेदयमनाक्षेपः स्वतंत्रप्रज्ञानां। परतंत्रप्रज्ञास्तु प्रायेण जनाः स्वातंत्र्येण श्रुत्यर्थमवधारयितुमशक्नुवंतः प्रख्यातप्रणेतृकासु स्मृतिष्ववलंबेरन्। तद्बलेन च श्रुत्यर्थं प्रतिपित्सेरन्। अस्मत्कृते च व्याख्याने न विश्वस्युर्बहुमानात्स्मृतीनां प्रणेतृषु॥

न्यायादित्याह। तस्मादिति। श्रुतिविरोधे स्मृत्यप्रामाण्यस्योक्तत्वात्पूर्वपक्षो न युक्त इति शंकते। कथमिति। मेधावतां श्रौतमर्थं ज्ञातुं शक्नु २
वंति तेषामयं पूर्वपक्षो न भवेत्। सांख्यादिषु श्रद्धालूनां तु भवेदित्याह। भवेदिति॥

तेषामंतीन्द्रियार्थे तानवलाद्यत्र श्रद्धास्मादित्याह। कपिलप्रभृतीनांचेति। आदौ यो जायमानंच कपिलं जनयेदृषिं प्रसूतं विभृयात् ज्ञानैस्तं पश्ये
त्परमेश्वरमिति श्रुतिर्योजना। यथा सांख्यस्मृतिविरोधाद्ब्रह्मवादस्याप्रमाणत्वमोच्यते। तथा स्मृत्यंतरविरोधात्प्रधानवादस्याप्रमाणत्वमनुच्यत इति भि

कपिलप्रभृतीनां चार्षज्ञानमप्रतिहतं स्मर्यते। श्रुतिश्च भवति ऋषिं प्रसूतं कपिलं यस्तमग्रे ज्ञानैर्बिभर्ति जायमानं च पश्येदिति। तस्मान्ने
षामतमयथार्थमिति शक्यं संभावयितुं। तर्कावष्टंभेन चैतेर्थं प्रतिष्ठापयंति। तस्मादपि स्मृतिबलेन वेदांता व्याख्येया इति पुनराक्षेपः। तस्य समा
धिर्नास्मृत्यनवकाशदोषप्रसंगादिति। यदि स्मृत्यनवकाशदोषप्रसंगेनेश्वरकारणवाद आक्षिप्येत एवमप्यन्या ईश्वरकारणवादिन्यः स्मृत
यो नवकाशाः प्रसज्येरन्। ता उदाहरिष्यामः। यत्तत्सूक्ष्ममविज्ञेयमिति परं ब्रह्म प्रकृत्य स हि अंतरात्मा भूतानां क्षेत्रज्ञश्चेति कथ्यत इति चोक्त्वा त
स्मादव्यक्तमुत्पन्नं त्रिगुणं द्विजसत्तमेत्याह। तथान्यत्राप्यव्यक्तं पुरुषे ब्रह्मन्निर्गुणे संप्रलीयत इत्याह॥ ॥

।ऽनंतपति। तस्य समाधिरिति। तस्माद्धुलनः सकाशादव्यक्तमापालीनं कृत्स्नाम कं जगदिति भावः॥

ब्र·सू·भा·२ इति हासवत्वानुक्तापुराणसंमतिमाह। अतश्चेति। प्रभवत्यस्मादिति प्रभवो जन्महेतुः प्रलीयतेऽस्मिन्निति प्रलयो लयाधिष्ठानं। तस्मात्कूटस्था
दीश्वरात्कायाः ब्रह्मादयः प्रभवंति। स एव मूलमुपादानं। किं परिणामि न शाश्वतिकः कूटस्थः अतः स नित्य इत्यर्थः। ननु श्रुतिविरोधः किं
२ मिति नोक्त इत्यत आह। स्मृतिबलेनेति। स्मृतीनां मिथो विरोधे कथं तत्त्वनिर्णय इत्यत आह। दर्शितं त्विति। श्रुतिभिरेव तत्त्वनिर्णय इत्यर्थः। स्मृती
नां का गतिरित्यत आह। विप्रतिपत्तौ चेति। वस्तुतत्त्वे स्मृतीनां मिथो विरोधे वस्तुनि विकल्पायोगात् श्रुतिमूलाः स्मृतयः प्रमाणं। इतर

अतश्च संक्षेपमिमं शृणुध्वं नारायणः सर्वमिदं पुराणः। स सर्गकाले च करोति सर्वं संहारकाले च तदत्ति भूय इति पुराणे। भगवद्गीतासु
च॥ अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथेति। परमात्मानमेव च प्रकृत्यापस्तंबः पठति तस्मात्कायाः प्रभवंति सर्वे स मूलं शाश्वतिकः स नि
त्य इति। एवमनेकशः स्मृतिष्वपीश्वरः कारणत्वेनोपादानत्वेन च प्रकाश्यते। स्मृतिबलेन प्रत्यवतिष्ठमानस्य स्मृतिबलेनैवोत्तरं वक्ष्यामीत्यतोऽय
मन्यस्मृत्यनवकाशदोषोपन्यासः। दर्शितं तु श्रुतीनामीश्वरकारणवादं प्रति तात्पर्यं विप्रतिपत्तौ च स्मृतीनामवश्यकर्तव्येऽन्यतरपरिग्र
हेऽन्यतरपरित्यागे च श्रुत्यनुसारिण्यः स्मृतयः प्रमाणमनपेक्ष्या इतराः। तदुक्तं प्रमाणलक्षणे विरोधे त्वनपेक्षं स्यादसति ह्यनुमानमिति॥

स्त्वकल्प्यश्रुतिमूला न प्रमाणमित्यर्थः। कुतः श्रुतिविरोधे स्मृतेरप्रमाणमित्यत्र जैमिनीयन्यायमाह। तदुक्तमिति। औदुम्बरीं स्पृष्ट्वोद्गायेदिति
प्रत्यक्षश्रुतिविरुद्धा सा सर्वा वेष्टयितव्येति स्मृतिर्निर्मूलत्वेनाप्रमाणमिति संदेहे मूलश्रुत्यनुमानात्प्रमाणमिति प्राप्ते सिद्धान्तः। श्रुतिविरोधे स्मृतिप्रामाण्य
मनपेक्ष्यमपेक्षाशून्यं हेयमिति यावत्। हि यतो असति विरोधे श्रुत्यनुमानं भवति। अत्र तु विरोधे सति श्रुत्यनुमानायोगान्मूलाभावात्सर्ववेष्टनस्मृते ३

अस्तु सांख्यस्मृतिः प्रत्यक्षमूलत्वेन तत्राह । न चेति । योगिनां सिद्धिमहिम्नाऽतीन्द्रियज्ञानं संभावयितुं शक्यमिति शंकते । शक्यमिति । कपिला
दिभिः किलादौ वेदमाम्नाय एवं निश्चित्य तदर्थस्यानुष्ठानेन सिद्धिः संपादिता । तया सिद्ध्या प्रणीतं तस्य सनुसारेणानादिश्रुतिपीडा न प्रकृतेरुपजीव्यावि
रोधादिति परिहरति । न सिद्धेरपीति । अतिशंकितुमिति श्रुतीनां मुख्यार्थमतिक्रम्योपचरितार्थः शंकितुं न शक्यत इत्यर्थः । स्वतः सिद्धे वेदे नोप

न चातीन्द्रियानर्थान् श्रुतिमंतरेण कश्चिदुपलभत इति शक्यं संभावयितुं निमित्ताभावात् । शक्यं कपिलादीनां सिद्धानामप्रतिहतज्ञान
त्वादिति चेत् न सिद्धेरपि सापेक्षत्वात् धर्मानुष्ठानापेक्षा हि सिद्धिः । स च धर्मश्चोदनालक्षणः ततः पूर्वसिद्धायाश्चोदनायाः अर्थो न प
श्चिमसिद्धपुरुषवचनवशेनातिशंकितुं शक्यते । सिद्धव्यपाश्रयकल्पनायामपि बहुत्वात् सिद्धानां प्रदर्शितेन प्रकारेण स्मृतिविप्रति
पत्तौ सत्यां न श्रुतिव्यपाश्रयादन्यन्निर्णयकारणमस्ति । परतंत्रप्रज्ञस्यापि नाकस्मात्स्मृतिविशेषविषयः पक्षपातो युक्तः । कस्यचित्क्व
चित्पक्षपाते सति पुरुषमतिवैश्वरूप्येण तत्वाव्यवस्थानप्रसंगात् तस्मात्तस्यापि स्मृतिविप्रतिपत्त्युपन्यासेन श्रुत्यनुसाराननुसारविषयविवे
चनेन च सन्मार्गे प्रज्ञा संग्रहणीया ॥

जीव्य इति चेन्न । अनीश्वरस्य स्वतः सिद्धौ मानाभावात् अंगीकृत्याप्याह । सिद्धेति । सिद्धानां वचनमाश्रित्य वेदार्थकल्पनायामपि सिद्धोक्तीनां मि
थो विरोधे श्रुत्याश्रितमन्वादियुक्तिभिरेव वेदार्थनिर्णयो युक्त इत्यर्थः । श्रुतिरूपाश्रयमेव तत् सिद्धोक्तिमात्रं न तत्त्वनिर्णयकारणमित्यक्षरार्थः । ननु
मंदमतेः सरिमस्मृतौ श्रद्धा भवतीति तस्य मतिः वेदांतमार्गे कथमानेयेत्यत आह । परतंत्रेत्यादिना ॥

ननुश्रुत्या कपिलस्य सर्वज्ञत्वोक्तेस्तन्मते श्रद्धा दुर्वारेत्यत आह ॥ यात्विति । कपिलशब्दमात्रेण सांख्यकर्ता श्रौत इति भ्रांतिरयुक्ता । तस्य द्वैतवा-
दिनः सर्वज्ञत्वायोगात् अत्र च सर्वज्ञानसंभृततत्त्वेन श्रुतः कपिलो वासुदेवांश एव स हि सर्वात्मत्वसाक्षी दृढं सांख्यमुपदिशतीति सर्वज्ञ इति भावः ।

यातु श्रुतिः कपिलस्य ज्ञानातिशयं प्रदर्शयंती प्रदर्शिता न तया श्रुतिविरुद्धमपि कापिलं मतं श्रद्धातुं शक्यं ॥ कपिलमिति श्रुतिसामान्यमा-
त्रत्वात् अन्यस्य च कपिलस्य सगरपुत्राणां प्रतप्तुर्वासुदेवनाम्नः स्मरणात् । अन्यार्थदर्शनस्य च प्राप्तिरहितस्यासाधकत्वात् । भवति चान्या म-
नोर्माहात्म्यं प्रख्यापयंती श्रुतिः । यद्वै किंच मनुरवदत्तद्भेषजमिति । मनुना च । सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि । संपश्यन्नात्म-
याजी वै स्वाराज्यमधिगच्छतीति सर्वात्मत्वदर्शनं प्रशंसता कापिलं मतं निंद्यत इति गम्यते । कपिलो हि न सर्वात्मत्वदर्शनमनुमन्यते ॥ आ-
त्मभेदाभ्युपगमात् ॥

प्रतप्तुः प्रदाहकस्य । किंच यः कपिलं ज्ञानैर्बिभर्ति तमीश्वरं पश्येदिति विधीयते । तथा चाज्ञासिद्धेश्वरप्रतिपत्तिशेषस्य कपिलसर्वज्ञत्वस्य दर्शन-
मनुवादस्तस्य मानान्तरेण प्राप्तिरहितस्य स्वार्थसाधकत्वायोगात् ज्ञानानुवादमात्रात्सर्वज्ञत्वसिद्धिरित्याह । अन्यार्थेति । द्वैतवादिनः कपिलस्य श्रौतत्वं

निरस्य अद्वैतवादिनो मनोः श्रौतत्वमाह ॥ भवति चेति ॥

इतिहासेपि कापिलमतमिदं पूर्वकमद्वैतं दर्शितमित्याह। महाभारतेपीति। पुरुषाः आत्मानः किं बहवस्ते भिन्नाः उत सर्वे इह पुरुषाणां प्रत्यगात्मा
एक इति विमर्शार्थः। बहूनां पुरुषाणां कारणं देहानां यथैका योनिरूपादानं पृथिवी तथा तं पुरुषमात्मानं विश्वमूर्धत्वपादादिमत्त्वेन सर्वात्मकं सर्वसत्वा
दिगुणैः साधयन्तं कथयिष्यामि। विश्वे सर्वलोकमस्तिष्कं यस्य तिर्यग्मनुष्यादीनां मूर्धानो स्वैवेति विश्वमूर्धा एक एव सर्वक्षेत्रेषु प्रतिबिंबभावेन प्रवि

महाभारतेपि। बहवः पुरुषा ब्रह्मन्नुताहो एक एव तु। इति विचार्य बहवः पुरुषा राजन् सांख्ययोगविचारिणाम्। इति परपक्षमुपन्यस्य तत्
व्युदासेन बहूनां पुरुषाणां हि यथैका योनिरुच्यते। तथा तं पुरुषं विश्वमाख्यास्यामि गुणाधिकम्। इति स्वपक्षमुपन्यस्य ममान्तरात्मा तव च ये चान्ये देहसं
स्थिताः। सर्वेषां साक्षिभूतोसौ न ग्राह्यः केनचित् क्वचित्। विश्वमूर्धा विश्वभुजो विश्वपादाक्षिनासिकः। एकश्चरति भूतेषु स्वैरचारी यथा
सुखमिति सर्वात्मत्वेन निरूपिता। श्रुतिस्मृतिसर्वात्मतायां भवति। यस्मिन्सर्वाणि भूतान्यात्मैवाभूद्विजानतः। तत्र को मोहः कः शोक एकत्व
मनुपश्यतः इत्येवंविधा। अतश्च स्मृत्यात्मभेदकल्पनयापि कापिलस्य तन्त्रस्य वेदविरुद्धत्वं वेदानुसारिमनुवचनविरुद्धत्वं च। न केवलं स्व
तन्त्रप्रकृतिकल्पनयैवेति।।

एतत्वादेवं विश्वभुजत्वादि भोजनादि सर्वभूतेष्वेकश्चरति। अवगच्छति सर्वज्ञ इत्यर्थः। स्वैरचारी स्वतन्त्रः नास्य नियन्ता कश्चिदस्ति स ईश्वर इत्यर्थः।
यथासुखमिति विशेषकानंदस्वरूप इति भावः। कपिलंतन्त्रस्य वेदमूलस्मृतिविरोधमुक्त्वा साक्षाद्वेदविरोधमाह। अतिश्चेति। यस्मिन् ज्ञानकाले
केवलं स्वतन्त्रप्रकृतिकल्पनमेव वेदविरुद्धं न किंत्वात्मभेदकल्पनमपीति सिद्धमिति संबंधः।। ॥ ॥ ॥

शा.सू.भा.२ स्मृतिविरोधे वेदस्यैवाप्रामाण्यं किं न स्यादित्यत आह। वेदस्य हीति। वेदस्य प्रामाण्यं स्वतःसिद्धमपौरुषेयत्वात्पौरुषेयवाक्यानां स्वार्थस्मृतितन्मू-
५ लानुभवयोः कृत्स्नतयाप्रामाण्यं ज्ञेयमित्यवेहितपरतःप्रामाण्यमिति विप्रकर्षः। स्मृतिस्तु सा विशेषाद्दुःसम्पाद्यः। तस्मादिति। विरोधे हि निरवकाशे
नस्यावकाशं बाधमिह परतः परतःप्रामाण्यमौवैषम्यादिति निश्चितप्रामाण्येनाचानुपसंजातविरोधिना वेदवाक्येन विरुद्धस्मृतेरेव बाध इति भा-

वेदस्य हि निरपेक्षं स्वार्थे प्रामाण्यं रवेरिव रूपविषये पुरुषवचसां तु मूलान्तरापेक्षं वक्तृस्मृतिव्यवहितं चेति विप्रकर्षः। तस्माद्वेदविरुद्धे विषये
स्मृत्यनवकाशप्रसङ्गो न दोषः। कुतश्चान्यस्मृत्यनवकाशप्रसङ्गो न दोषः॥ ॥इतरेषां चानुपलब्धेः॥ ॥प्रधानादितराणि यानि प्रधानपरिणाम-
त्वेन स्मृतौ कल्पितानि महदादीनि न तानि वेदे लोके चोपलभ्यन्ते। इन्द्रियाणि तावल्लोकवेदप्रसिद्धत्वात्तु शक्यन्ते स्मर्तुं। अलोकवेदप्रसिद्ध-
त्वात्तु महदादीनां षष्ठस्येवेन्द्रियार्थस्य न स्मृतिरवकल्पते। यदपि क्वचिच्छ्रवणमिवावभासते तदप्यतत्परं व्याख्यातं आनुमानिकमप्य-
प्येकेषामित्यत्र। कार्यस्मृतेरप्रामाण्यात्कारणस्मृतेरप्यप्रामाण्यं युक्तमित्यभिप्रायः॥ तस्मादपि न स्मृत्यनवकाशप्रसङ्गो दोषः॥ तर्कावि-
ष्टंभं तु न विलक्षणत्वादस्यारम्भो न भविष्यति॥

धः। तस्मादिति। विशेषादित्यर्थः। भ्रान्तिमूलत्वसंभवादिति भावः। महदहंकारौ तावदप्रसिद्धौ अहंकारप्रकृतिकत्वेन तन्मात्राण्यप्यप्रसिद्धानि ५
स्मर्यन्तु निराकांतरत्याह। इतरेषां चेति। ननु महतः परमव्यक्तमिति श्रुतिप्रसिद्धानि महदादीनीत्यत आह। यदपीति। स्वतात्पर्यमाह। कार्येति। सां-
ख्यस्मृतेर्महदादिष्विव प्रधानेपि प्रामाण्यं नेति निश्चीयत इत्यर्थः। सांख्यस्मृतेर्बाधेपि तद्युक्तिभिः कथं बाध इत्यत आह। तर्केति॥ ॥

ब्रह्मण्युक्तसमन्वयः प्रधानवादियोगस्मृत्या विरुध्यते न वेति संदेहे पूर्ववत्पूर्वपक्षमतिदिशति। एतेन योगः प्रत्युक्तः। अतिदेशत्वात्सर्वैव संगत्या-
दिकं द्रष्टव्यं। पूर्वपक्षानुक्रमेण पूर्वपक्षमाह। अस्ति ह्यत्रेति। निदिध्यासनं योगः। त्रीणि उरोग्रीवाशिरांस्युन्नतानि यस्मिन् शरीरे तत् त्रिरुन्न-
तमिति पाठश्चेच्छांदसः। पुंजीनेति दोषः। न केवलं योगे विधिः। किंतु योगस्य ज्ञापकान्यर्थवादवाक्यान्यपि संतीत्याह। लिंगानि चेति। तां पूर्वो-

एतेन योगः प्रत्युक्तः॥ एतेन सांख्यस्मृतिप्रत्याख्यानेन योगस्मृतिरपि प्रत्याख्याता द्रष्टव्येत्यतिदिशति। तत्रापि श्रुतिविरोधेन प्रधानं स्व-
तंत्रमेव कारणं महदादीनि च कार्याण्यलोकवेदप्रसिद्धानि कल्प्यंति नन्वेवं सति समानन्यायत्वात्पूर्वेणैवैतत्कृतं किमर्थं पुनरपिदिश्यते।
अस्ति ह्यत्राभ्यधिकाशंका सम्यग्दर्शनाभ्युपायो हि योगो वेदे विहितः श्रोतव्यो मंतव्यो निदिध्यासितव्य इति। त्रिरुन्नतं स्थाप्य समं शरीरमि-
त्यादिनाऽऽसनादिकल्पनापुरःसरं बहुप्रपंचं योगविधानं श्वेताश्वतरोपनिषदि दृश्यते। लिंगानि च वैदिकानि योगविषयाणि सहस्रश उ-
पलभ्यंते। तां योगमिति मन्यंते स्थिरामिंद्रियधारणामिति। विद्यामेतां योगविधिं च कृत्स्नमिति चैवमादीनि। योगशास्त्रेऽप्यथ तत्त्वदर्शनोपा-
यो योग इति सम्यग्दर्शनाभ्युपायत्वेनैव योगोऽङ्गीक्रियते। अतः संप्रतिपन्नार्थैकदेशत्वादष्टकादिस्मृतिवद्योगस्मृतिरप्यनपवदनीया भवि-
ष्यतीति॥ ॥

क्तां धारणां योगविदो योगं परमं तप इति मन्यंते। उक्तामेतां ब्रह्मविद्यां योगविधिं ध्यानप्रकारं च मृत्युप्रसादान्नचिकेता लब्ध्वा ब्रह्म प्राप्त इति संबं-
धः। योगस्मृतिः प्रधानादिकल्पनांशेऽपि प्रमाणत्वेन स्वीकार्या। संप्रतिपन्नः प्रामाणिकोऽर्थैकदेशो योगरूपस्तद्वत्त्वादित्यर्थः। अष्टकाः कर्तव्याः
गुरुरनुगंतव्य इत्यादिस्मृतीनां वेदाविरुद्धार्थकत्वान्मूलश्रुत्यनुमानेन प्रामाण्यमुक्तं प्रमाणलक्षणे॥

सू॰भा॰२
६

एवं योगस्मृतेर्योगेऽप्रामाण्यात् तत्त्वांशेऽपि प्रामाण्यमिति पूर्वपक्षमनूद्य सिद्धान्तयति। इममिति। ननु योगो हि स्मृतियोगविधिमिति न तिरस्कृता इ-
त्यत आह। सतीष्वपीति। तासां न्यायरकत्वेन प्रसिद्ध्यभावाद् दृशीश्च प्रत्युत पार्थिवी हि तत्त्वांशे श्रुत्या च लिंगाच्चात्र पक्षेऽपीति भावः। तत्कारणमिति। तेषां सकृ-
तानां कामानां तत्कारणं सांख्ययोगाभ्यां विवेकज्ञानेनाभिपन्नं प्राप्तं ज्ञात्वा देवं सर्वपाशैरविद्यादिभिर्मुच्यत इत्यर्थः। समूलत्वे स्मृती-
इष्यमपृथिक्काशंकातिदेशेन निवर्त्यते। अर्थैकदेशसंप्रतिपत्तावप्यर्थैकदेशविप्रतिपत्तेः पूर्वोक्ताया दर्शनात्। सतीष्वप्यध्यात्मविषयासु ब-
ह्वीषु स्मृतिषु सांख्ययोगस्मृत्योरेव निराकरणे यत्नः कृतः सांख्ययोगौ हि परमपुरुषार्थसाधनत्वेन लोके प्रख्यातौ शिष्टैश्च परिगृहीतौ लिंगेन
च श्रौतेनोपबृंहितौ। तत्कारणं सांख्ययोगाभिपन्नं ज्ञात्वा देवं मुच्यते सर्वपाशैरिति। निराकरणं तु न सांख्यज्ञानेन वेदनिरपेक्षेण योगमा-
र्गेण वा निःश्रेयसमधिगम्यत इति। श्रुतिर्हि वैदिकादात्मैकत्वविज्ञानादन्यन्निःश्रेयससाधनं वारयति। तमेव विदित्वातिमृत्युमेति नान्यः
पन्था विद्यतेऽयनायेति। द्वैतिनो हि ते सांख्या योगाश्च नात्मैकत्वदर्शिनः। यत्तु दर्शनमुक्तं तत्कारणं सांख्ययोगाभिपन्नमिति। वैदिकमेव तत्र
ज्ञानं ध्यानं च सांख्ययोगशब्दाभ्यामभिलप्यते। प्रत्यासत्तेरित्यवगन्तव्यं येन त्वंशेन न विरुध्येते तेनेष्टमेव सांख्ययोगाभिपन्नमिति। वैदिके
एव तत्र ज्ञानं ध्यानं च सांख्ययोगशब्दाभ्यामभिलप्यते। स्मृत्योः सावकाशत्वं। तद्यथाऽसंगो ह्ययं पुरुष इत्येवमादिश्रुतिप्रसिद्धमेव पुरुषस्य वि-
शुद्धत्वं निर्गुणपुरुषनिरूपणेन सांख्यैरभ्युपगम्यते। तथा योगैरप्यथ परिव्राड् विवर्णवासा मुण्डोऽपरिग्रह इत्येवमादिश्रुतिप्रसिद्धमेव नि-
वृत्तिनिष्ठत्वं प्रव्रज्याद्युपदेशेनानुगम्यते। एतेन सर्वाणि तर्कस्मरणानि प्रतिमन्तव्यानि॥
तद्स्मृतिनिरासः किमिति कृत इत्यत आह। निराकरणं त्विति इति
हितोः कृतमिति विषयः। असंगो ह्ययमिति श्रुतिः सांख्ययोगद्वयोः सजातीयपक्षस्य ग्राहित्वादिति भावः। किं सर्वांशेऽप्युक्तस्मृत्योरप्रामाण्यं नेत्याह। येन त्वंशेने-

ति। यथैवाद्वैतस्य कारणभक्ष्यादिभिर्विरोधमात्रं नास्तीति द्-
ष्टमिति। एतेनेति श्रुतिविरोधेनेत्यर्थः॥

उपकारकं वा धीनमुक्तमित्याशंक्यपोंशादुपकारकः सन्नबाध्यः किंतु तत्त्वं ग्राह्यमित्याह । तावदपीति । तर्कोनुमानं तदनुग्राहिका युक्तिरुपपत्तिः । स्मृ
तीनामप्रामाण्यात्ताभिः समन्वयस्य न विरोध इति सिद्धं । न विलक्षणत्वात् । वृत्तानुवादेनाधिकरणस्य तात्पर्यमाह । ब्रह्मास्येति । पूर्वपक्षमाहि

ता; स्मृतितर्कोपि यजिज्ञासांतत्वग्रहणायोपकुर्वंतीति चेत् । उपकुर्वंतु नाम । तत्वज्ञानं तु वेदांतवाक्येभ्य एव भवति । नावेदविन्मनुते तं बृहं
तं । तं त्वौपनिषदं पुरुषं पृच्छामीत्येवमादिश्रुतिभ्यः ॥ ॥ न विलक्षणत्वादस्य तथात्वं च शब्दात् ॥ ॥ ब्रह्मास्य जगतः कारणं प्रकृति
श्चेत्यस्य पक्षस्याक्षेपः स्मृतिनिमित्तः परिहृतः । तर्कनिमित्त इदानीमाक्षेपः परिह्रियते । कुतः पुनरस्मिन्नवधारितेप्यागमार्थे तर्कनि
मित्तस्याक्षेपस्यावकाशः । ननु धर्म इव ब्रह्मण्यप्यनपेक्ष्य आगमो भवितुमर्हति । भवेदयमवष्टंभो यदि प्रमाणांतरानवगाह्य आगम
मात्रप्रमेयोयमर्थः स्यादनुष्ठेयरूप इव धर्मः । परिनिष्पन्नरूपं तु ब्रह्मावगम्यते । परिनिष्पन्ने तु वस्तुनि प्रमाणांतराणामस्त्यवकाशो य
था पृथिव्यादिषु ॥

पति । कुतः पुनरिति । अनवकाशे हेतुमाह । ननु धर्म इवेति । मानांतरानपेक्षे वेदैकसमधिगम्ये ब्रह्मण्यनुमानात्मकतर्कस्याप्रवेशात्कोक्षेप
स्यानवकाशः । भिन्नविषयत्वात्तर्कवेदयोरित्यर्थः । सिद्धस्य मानांतरगम्यत्वादेकविषयत्वाद्विरोध इति पूर्वपक्षं समर्थयते । भवेदयमिति । अव
ष्टंभो हठीतः ॥

ब्र॰ भा॰ २
७

नन्वेकविषयत्वेन विरोधे विप्रकृतिविरोधान्मानांतरमेव गृह्यतां नाभिमतमत आह यथा चेति। प्रबलश्रुत्या दुर्बलश्रुतिबाधवन्निखिलकाशमा
नांतरेण लक्षणया श्रुतिर्नेयेत्यर्थः। किंच ब्रह्मसाक्षात्कारस्य मोक्षहेतुत्वेन प्रधानस्यांतरंगं तर्कं स्यात्परोक्षदृष्टांतगोच
रत्वेन प्रधानवद् व्याप्तेः साक्षाद्विषयत्वात् श्रुतिस्तु परोक्षार्थकत्वाद् बहिरंगमतस्तर्केण बाध्येत्याह। दृष्टेति। ऐतिह्यमात्रेण परोक्षतया निपातनात्। अनु
भवस्य प्राधान्यं द्रढयति। अनुभवावसानं चेति। नेशान् तर्केण श्रुतिरिति सपर्यादेनं तर्कस्य निषेधस्मात् कथं विधिविरोधान्नैवमित्याह। श्रुतिरपि

यथा च श्रुतीनां परस्परविरोधे सत्येकवशेनेतरा नीयंते। एवं प्रमाणांतरविरोधेपि तद्वशेनैव श्रुतिर्नीयेत। दृष्टसाम्येन चादृष्टमर्थं
समर्थयंती युक्तिरनुभवस्य संनिकृष्यते विप्रकृष्यते तु श्रुतिरैतिह्यमात्रेण स्वार्थाभिधानात्। अनुभवावसानं च ब्रह्मविज्ञानमविद्याया निव
र्तकं मोक्षसाधनं च दृष्टफलतयेष्यते। श्रुतिरपि श्रोतव्यो मंतव्य इति श्रवणव्यतिरेकेण मननं विदधती तर्कमप्यत्रादर्तव्यं दर्शयति। अतस्त
र्कनिमित्तः पुनराक्षेपः स्मर्यते। न विलक्षणत्वादस्येति। यदुक्तं चेतनं ब्रह्म जगतः प्रकृतिरिति तन्नोपपद्यते। कस्माद्विलक्षणत्वादस्य विकार
स्य प्रकृत्याः। इदं हि ब्रह्मकार्यत्वेनाभिप्रेयमाणं जगद्ब्रह्मविलक्षणमचेतनमशुद्धं च दृश्यते ब्रह्म च जगद्विलक्षणं चेतनं शुद्धं च श्रूयते॥ ॥

ति। एवं पूर्वपक्षं संभाव्य चेतनब्रह्मकारणवादिवेदांतसमन्वयः शिलादिकं न चेतनप्रकृतिकं कार्यत्वात् घटवदिति लिंगानुमानयोगमापेत
विरुध्यते न वेति संदेहे सत्यनुमानाभावात् दुर्बलत्वेप्यनुमानस्य व्याप्तिमूलत्वेन प्राबल्यात् तेन विरुध्यत इति प्रत्युदाहरणेन पूर्वपक्षयति। न विलक्ष
णत्वादिति। पूर्वोत्तरपक्षयोः समन्वयासिद्धिः तत्सिद्धिश्चेति पूर्ववत्फलं। जगन्न ब्रह्मप्रकृतिकं तद्विलक्षणत्वात्। यद्यद्विलक्षणं तत्तन्न तत्प्रकृतिकं य
थायं हि विलक्षणगुरुचकादयमित्यर्थः॥

सुखदुःखमोहाः सत्वरजस्तमांसि। तथा च जगत्सुखदुःखमोहात्मकसामान्यप्रकृतिकं तदन्वितत्वात् यदित्थं तत्तथा यथा मृदन्विता घटादय
इत्याह। भेदेश्चेति विलक्षणत्वं साधयति। ब्रह्मविलक्षणत्वं चेति। यथा हि एक एव स्त्री पितुः पतिमपत्न्युपपतीनां प्रीतिपरितापविषादादीन्क

न च विलक्षणत्वेऽप्रकृतिविकारभावो दृष्टो न हि रुचकादयो विकारा मृत्प्रकृतिका भवन्ति। कारणवादयो वा सुवर्णप्रकृतिकाः मृदेव तु
मृदन्विताः विकाराः प्रक्रियन्ते। सुवर्णेन च सुवर्णान्विताः। तथेदमपि जगच्चेतनं सुखदुःखमोहान्वितं सच्चेतनस्यैव सुखदुःखमोहा
त्मकस्य कारणस्य कार्यं भवितुमर्हति। न विलक्षणस्य ब्रह्मणः। अस्ति विलक्षणत्वं चास्य जगतः शुद्धचेतनत्वं ब्रह्मणा त्ववगंतव्यं। अ
शुद्धं हि इदं जगत् सुखदुःखमोहात्मकत्वात् प्रीतिपरितापविषादादिहेतुत्वात् स्वर्गनरकाद्युच्चावचप्रपंचत्वाच्च। अचेतनं चेदं जगच्चेत
नं प्रति कार्यकरणभावेनोपकरणभावोपगमात्। नहि साम्ये सत्युपकार्योपकारकभावो भवति। नहि प्रदीपौ परस्परस्योपकुरुतः। ननु
चेतनमपि कार्यकरणं स्वामिभृत्यन्यायेन भोक्तुरुपकरिष्यति। न स्वामिभृत्ययोः पौरुष्यचेतनांशस्यैव चेतनं प्रत्युपकारकत्वात्। यो ह्येक
स्य चेतनस्य परिग्रहो बुद्ध्यादिरचेतनभागः स एवान्यस्य चेतनस्योपकरोति। न तु स्वयमेव चेतनश्चेतनान्तरस्योपकरोत्यपकरोति वा॥

रोति एवमन्येऽपि भावा द्रष्टव्याः। तत्र प्रीतिः सुखं परितापः शोकः विषादो भ्रमः आदिपदात् रागादिग्रहः। उभयोश्चेतनत्वेन साम्यादुपकार्योप
कारकभावो न स्यादित्युक्तं। स्वामिभृत्ययोर्व्यभिचारादिति शंकते। ननु चेतनमपीति। भृत्यदेहस्यैव स्वामिचेतनोपकारकत्वान्न व्यभिचार इत्याह। ने

हि ९५ हि

स्.का.२
८

उत्कर्षापकर्षश्च स्यात्ता चेतनानां मिथो पकारकत्वमित्याह निरतिशय इति। तस्मादुपकारकत्वात्। अतश्चेतनस्य प्रकृतिकत्ववत्वे न जगाच्चेतनमेवेत्येकं
देशतनमुत्थापयति। के पीति। घटादेश्चेतनत्वमनुपलब्धिबाधितमित्यत आह। अविभावनं त्विति। अंतःकरणस्य परिणामत्वात्ततो पि चैतन्यस्यानु
पलब्धिरित्यर्थः। अंतःकरणादन्यस्य स्वस्वुपरागदशायामेव चैतन्याभिव्यक्तिर्नान्यदेति भावः। तदभावे चैतन्यानभिव्यक्तौ दृष्टांतः। यथेति। आ
निरतिशयात्यकृत्तीरश्चेतना इति सांख्यामन्यंते। तस्मादचेतनेनैकार्यकरणं। न च काष्ठलोष्ठादीनां चेतनत्वे किंचिदप्रमाणमस्तिप्रसिद्धश्चापंचे
तना चेतनत्वविभागो लोके। तस्माद्विलक्षणत्वान्नेदं जगत्तत्प्रकृतिकं। योपि कश्चिदाचक्षीत तस्मुलाजगतश्चेतनप्रकृतिकतां तदुक्ते नैवसम
स्तं जगच्चेतनमवगमिष्यामि। प्रकृतिरूपस्य विकारेष्वस्य दर्शनात्। अविभावनं तु चैतन्यस्य परिणामविशेषाद्भविष्यति। यथा स्वप्रचेत
न्यानामप्यात्मनां स्वापमूर्छाद्यवस्थासु चैतन्यं न विभाव्यते। एवं काष्ठलोष्ठादीनामपि चैतन्यं न विभावयिष्यते। एतस्मादेव च विभावितात्वि
भावितत्वात्कृताकृतद्विशेषाद्रूपादिभावाभावाभ्यां च कार्यकरणानामात्मनां च चेतनत्वाविशेषेपि गुणप्रधानभावेन विशेष्यते। यथात्मयथापि
वत्वाविशेषेपि मांसस्य पोदनौदनादीनां मृत्पालवर्तिनो विशेषात्परस्परोपकारित्वं भवसेवमिहापि भविष्यति। अविभागप्रसिद्धिरप्यत एव न विरो
ध इति। तेनापि कथंचिच्चेतनाचेतनत्वलक्षणं विलक्षणत्वं परिह्रियेत। श्रुत्यश्रुत्युद्भुतलक्षणं तु चिरंतनत्वलक्षणं नैव परिह्रियते॥ ॥ ८

तात्मनो श्चेतनत्वेन स्वस्वामिभावः कुत इत्यत आह। एतस्मादेवेति। साम्येपि प्रातिस्विकस्वरूपविशेषाच्छेषशेषित्वे दृष्टांतः। यथा चेतिथ यथा
चेति। चेतनाचेतनभेदः कथमित्यत आह। अविभागेति। चैतन्याभिव्यक्तानभिव्यक्तिभ्यामित्यर्थः। सर्वस्य चेतनत्वमिति केद्रस्य कुमंगीकृत्य सांख्यः

ङ्गीकारे लक्षणा ऋतत्र शेषेण परिहरति। नचेत्यादिना। इतरच्चेतनाचेतनत्वरूपं वैलक्षण्यं तथा लक्ष्य दृष्टयो। अतार्थापत्तिः। शुद्धेन्वाद्येतिभावः। श्रुति
साहाय्यात्तर्कस्य वाध्येषु त्तरसूत्रमवतारयन् शंकते। नन्विति। मृदादीनां वक्तृत्वादिश्रुतेस्तदभिमानिविषयत्वात्तथा विज्ञानं चाविज्ञानं चेति चेतनाचेतनविभाग

नचेतरदपि विलक्षणत्वं परिहर्तुं शक्यतइत्याह। तथात्वं च श्रुतमित्यादिति। अनवगम्यमानमेव हीदं लोके समस्तस्य वस्तुनः चेतनत्वं चेतनत्वकृ
तिकल्पत्वं वलाछब्दशरणतया केवलमोत्प्रेक्ष्यते। तच्छ्रुत्यैव निरुध्यते। यतः शब्दादपि तथात्वमवगम्यते। तथात्वमिति प्रकृतिविलक्षणत्वे
कथयति। शब्दस्य विज्ञानं चाविज्ञानं चेति कस्यचिद्विभागस्याचेतनतां श्रावयन्नपि चेतनो कस्यचिद्विलक्षणं न चेतनं जगच्छ्रावयति। ननु चेतनत्वम
पि कस्यचिदचेतनत्वाभिमतानां भूतेन्द्रियाणां श्रूयते। यथा मृदब्रवीदापोऽब्रुवन्निति। तत्तेज ऐक्षत ता आप ऐक्षन्तेति चैवमाद्या भूतविषया चेतनत्वश्रु
तिः। इन्द्रियविषयापि ते ह प्राणा अहंश्रेयसे विवदमाना ब्रह्म जग्मुरिति। ते ह वाचमूचुस्त्वं न उद्गायेति। इत्येवमाद्येन्द्रियविषयेति। अत उत्तरं पठ
ति॥ ॥ अभिमानिव्यपदेशस्तु विशेषानुगतिभ्यां॥ ॥ तुशब्द आशंकामपनुदति। न खलु मृदब्रवीदित्येवंजातीयकया श्रुत्या भूतेन्द्रियाणां
चेतनत्वमाशंकनीयं। यतोऽभिमानिव्यपदेश एष मृदाद्यभिमानिन्यो वागाद्यभिमानिन्यश्च चेतना देवता वदनसंवदनादिषु चेतनोचितेषु व्यव
हारेषु व्यपदिश्यन्ते। न भूतेन्द्रियमात्रं। कस्माद्विशेषानुगतिभ्यां। विशेषो हि भोक्तृणां भूतेन्द्रियाणां च चेतनाचेतनप्रविभागलक्षणः प्रागभिहितः

सर्वचेतनतायां चासौ नोपपद्येत॥

शब्दस्योपचरितार्थत्वं तद्युक्तमिति सांख्य। समाधत्ते। अभिमानीति संवदनविवादः। न भूतमात्रमिन्द्रियमात्रं वा चेतनत्वेन व्यपदिश्यते। लोकवेदयोः
सिद्धविभागबाधप्रसंगादित्यर्थः॥ ॥

ब्र॰ सू॰ भा॰ २ विशेषपदस्यार्थमाह ॥ अपि चेति । अहंश्रेयसे स्वश्रेष्ठत्वाय विवदमाना इत्यत्र प्राणानां चेतनत्वाद्देवतापदेन विशेषितत्वात्प्रा-
९ णपदेऽभिमानिव्यपदेश इत्यर्थः । प्राणे निःश्रेयसं श्रैष्ठ्यं विदित्वा प्राणलीना जाता इत्यन्वयः । अनुगतिं व्याचष्टे अनुगता इति । तस्मै प्राणाय

अपि च कौषीतकिनः प्राणसंवादे करणमात्राशंकाविनिवृत्तयेऽधिष्ठातृचेतनपरिग्रहाय देवताशब्देन विशिंषंति । एता ह वै देवता
अहंश्रेयसे विवदमाना इति । ता वा एताः सर्वा देवताः प्राणे निःश्रेयसं विदित्वेति च । अनुगताश्च सर्वत्राभिमानिन्यश्चेतना देवता मंत्रार्थवादेति
हासपुराणादिभ्योऽवगम्यंते । अग्निर्वाग्भूत्वा मुखं प्राविशदित्येवमादिका च श्रुतिः करणेष्वनुग्राहिकां देवतामनुगतां दर्शयति । प्राणसंवाद
वाक्यशेषे च ते ह प्राणाः प्रजापतिं पितरमेत्योचुरिति श्रेष्ठनिर्धारणाय प्रजापतिगमनं तद्वचनाच्चैकैकोत्क्रमणेनान्वयव्यतिरेकाभ्यां प्राणश्रैष्ठ्य
प्रतिपत्तिः तस्मै बलिहरणमिति चैवंजातीयकोऽस्मदादिष्विव व्यवहारोऽनुगम्यमानोऽभिमानिव्यपदेशं द्रढयति । तत्तेज ऐक्षतेत्यपि परस्या
एव देवताया अधिष्ठात्र्याः स्वविकारेष्वनुगताया इयमीक्षा व्यपदिश्यत इति द्रष्टव्यं । तस्माद्विलक्षणमेवेदं ब्रह्मणो जगद्विलक्षणत्वाच्च न ब्रह्म
प्रकृतिकमित्याक्षिप्ते सिद्धान्तो विधीयते ॥ ॥ दृश्यते तु ॥ ॥ तुशब्दः पक्षं व्यावर्तयति यदुक्तं विलक्षणत्वान्नेदं जगद्ब्रह्मप्रकृतिकमिति ॥

बलिहरणं वागादिभिः स्वीयवसिष्ठत्वादिगुणसमर्पणं कृतं । तेजआदीनामीक्षणं त्वध्येष्वधिकरणे चेतनतिष्ठत्वात्स्यादिति द्रष्टव्यमित्यर्थः ॥ ९
यस्मात्ति जगतश्चेतनत्वं तस्मादिति पूर्वपक्षोपसंहारः ॥

किंच किंचिद्वैलक्षण्यं हेतुः बहुवैलक्षण्यं वा। आद्ये व्यभिचारमाह। नायमेकान्तो दृश्यते हीति। हेतोरसत्वाद्व्यभिचार इति शंकते। तन्विति। य
त्किंचिद्वैलक्षण्यं तन्मन्यसीति व्यभिचार इत्याह। उच्यत इति। शरीरस्य केशादीनां च प्राणित्वाप्राणित्वरूपं वैलक्षण्यमस्तीत्यर्थः। द्वितीये पितृत्वे व्यभि
चारमाह॥ महानिति। पारिणामिकः केशादीनां स्वगतपरिणामात्मक इत्यर्थः। किंच ययोः प्रकृतिविकारभावः तयोः सादृश्यं वदता वक्तव्यं। कि

नायमेकान्तो दृश्यते हि लोके चेतनत्वेन प्रसिद्धेभ्यः पुरुषादिभ्यो विलक्षणानां केशनखादीनामुत्पत्तिरचेतनत्वेन च प्रसिद्धेभ्यो गोम
यादिभ्यो वृश्चिकादीनां। नन्वचेतनान्येव पुरुषादिशरीराण्यचेतनानां केशनखादीनां कारणान्यचेतनान्येव वृश्चिकादिशरीराणि चेतनानां
गोमयादीनां कार्याणीति। उच्यते। एवमपि किंचिदचेतनं चेतनस्यायतनभावमुपगच्छति किंचिन्नेत्यस्त्येव वैलक्षण्यं। महांश्चायं पारिणा
मिकः स्वभावविप्रकर्षः पुरुषादीनां केशनखादीनां च रूपादिभेदात्। तथा गोमयादीनां वृश्चिकादीनां च। अत्यन्तसारूप्ये च प्रकृतिविकार
भाव एव प्रलीयेत। अथोच्येत अस्ति कश्चित्पार्थिवत्वादिस्वभावः पुरुषादीनां केशनखादिष्वनुवर्तमानो गोमयादीनां च वृश्चिकादिष्विति। ब्र
ह्मणोऽपि तर्हि सत्तालक्षणः स्वभाव आकाशादिष्वनुवर्तमानो दृश्यते। विलक्षणत्वेन च कारणेन ब्रह्मप्रकृतिकत्वं जगतो दूषयता किमशेषस्वभा
स्वभावस्याननुवर्तनं विलक्षणत्वमभिप्रेयते। उत यस्य कस्यचिदथ चैतन्यस्येति वक्त
व्यं॥

नाशेषेति किं यत्किंचिदिति। आद्ये दोषमाह। अत्यन्तेति। द्वितीये मार्गेऽस्य ब्रह्मजगतोरपि तल्लक्षण्यात्प्रकृतिविकृतित्वसिद्धिरित्याह। अथेत्यादिना विलक्ष
णत्वं विकल्प्य दूषयति तत्राह। विलक्षणत्वे तेत्यादिना॥

स॰भा॰ १०

जगतिसमस्तस्य ब्रह्मस्वभावस्य चेतनत्वादेरननुवर्तमानत्वप्रसक्तकार्यत्वमितिपक्षे सर्वस्यास्य प्रकृतिविकारत्वमिसक्तं स्यात्। तदसंगतमित्याह प्रथ
मइति। तृतीयेतु दृष्टान्ताभावइति। नच जगन्न ब्रह्मप्रकृतिकमचेतनत्वाद्विषयादिवदितिदृष्टान्तोस्तीतिवाच्यं। अनादित्वं सोपाधित्वात्तत्त्वध्वंसोपा
धापकृतात्। तस्यापि कार्यसंस्कारात् तत्स्वभावत्वेन ब्रह्मप्रकृतिकत्वाद्भावत्वाग्रहे घटादिभावत्व सोपाधित्वादिति। संप्रति कस्तत्र पक्षाधारणां दोषमा

प्रथमेविकल्पे समस्तप्रकृतिविकारोच्छेदप्रसंगः। नह्यसत्यपि स्थेये प्रकृतिर्विकार इतिभवति द्वितीयेचासिद्धत्वं। दृश्यतेहिसत्तालक्षणो ब्रह्म
स्वभाव आकाशादिष्वनुवर्तमान इत्युक्तं। तृतीयेच दृष्टान्ताभावः। किंहि यच्चैतन्येनानन्वितं तदब्रह्मप्रकृतिकं दृष्टमिति ब्रह्मवादिनं प्रत्युदा
ह्रियेत। समस्तस्य वस्तुजातस्य ब्रह्मप्रकृतिकत्वाभ्युपगमात्। आगमविरोधस्तु प्रसिद्ध एव। चेतनं ब्रह्म जगतः कारणं प्रकृतिश्चेत्यागम
तात्पर्यस्य प्रसाधितत्वात्। यत्तूक्तं परिनिष्पन्नत्वाद्ब्रह्मणि प्रमाणान्तराणि संभवेयुरितितदपि मनोरथमात्रं। रूपाद्यभावाद्धि नायमर्थः
प्रत्यक्षस्यगोचरः। लिङ्गाद्यभावाच्च नानुमानादीनां। आगममात्रसमधिगम्य एव त्वयमर्थो धर्मवत्। तथा च श्रुतिः नैषा तर्केण मतिरापनेया
प्रोक्तान्येनैव सुज्ञानाय प्रेष्ठेति।

१०

ह॥ आगमेति पूर्वोक्तमनुवदन्नाह। शुष्कतर्कविषयत्वाभावात् तर्केणाक्षेप इत्याह यत्तूक्तमित्यादिना। लिङ्गसादृश्यपदव्युत्पत्तिलिङ्गत्वं
तां अभावादनुमानोपमानशब्दानां मनोऽगोचरो ब्रह्मलक्षणो वेदैकवेद्य इत्यर्थः। एषा ब्रह्मविषया मतिस्तर्केण स्वतंत्रेणनापनेया प्रापणीया यद्वा कु
तर्केणनव्यापनीया कुतार्किकैर्न दूषणीयेत्यर्थः। किन्तु अन्येनैव वेदविदाचार्येण प्रोक्ता मतिः सुज्ञानाय अनुभवाय फलाय भवति हे प्रेष्ठ प्रियतमेति। नचिकेतसं प्रति मृत्यो

इयं विविधा सृष्टिर्यतः आसमंतात् भवत् तं को वा अद्धा साक्षाद्वेदेति स्थितं नु वेद तं क इह लोके तं प्रवोचत् प्रावोचत् छांदसो दीर्घलोपः पथा वह्निका

को अद्धा वेद क इह प्रवोचत् कुत आजाता कुत इयं विसृष्टिः। अर्वाग्देवा अस्य विसर्जनेनाथा को वेद यत आबभूवेति चैतेस्य चौ सिद्धाना
ममीश्वराणां दुर्बोधितां जगत्कारणस्य दर्शयितः। स्मृतिरपि भवति। चिंत्याः खलु ये भावा न तांस्तर्केण योजयेदिति। अप्रमेयोपमं चिंसोपम
विकार्योऽयमुच्यते इति च। नमे विदुः सुरगणाः प्रभवं न महर्षयः। अहमादिर्हि देवानां महर्षीणां च सर्वशः इति चैवं जातीपिका। यदपि
श्रवणव्यतिरेकेण मननं विदधत्स एव तर्कमप्यादर्तव्यं दर्शयती सुतर्केणानेन निषेधप्रष्ठ तर्कस्यात्मलाभः संभवति श्रुत्यनुगृही
तस्यैव स्वतर्कस्य ऽनुभवांगत्वेनाश्रीयते॥ ॥

पितास्तीसर्गेः॥ प्रभवं जन्म न विदुः मम सर्वादित्वेन जन्माभावाभिप्रायेण मननविधिव्याजेन शुष्कः कुत्सनपेक्षः॥ कुलानवेनिश्रिते स्वसनु
पश्चा गुरुपदेशस्यासंभावनादेर्निरासाय गृहीतः श्रुत्यनुगृहीतः॥ ॥

शा॰सू॰भा॰२ तमाहास्वप्नांतेति॥ जीवस्य स्वप्नावस्थावतो देहादिप्रपंचयुक्तस्य निष्प्रपंचब्रह्मैक्यमसंभवि हैतयाहि प्रमाणविरोधाद्दूषणमाह द्वितीयपक्षमयुक्त

२१ मिति द्वैतौ नाभिसंभावनायां तन्निरासाय सत्वोदयस्यात्मनोनुगतस्याभिचारिणी भिन्नस्यासिरनन्वागतत्वमसंस्पृष्टत्वं स्वप्नस्यानोत्पत्ना विक

त्येवं त्वैया घटावदात्मव्यभिचारिणी भिन्नस्याभिरनन्वागतत्वमस्य एयोगात्सुषुप्तौ प्रपंचध्वंसभावेसत्वासे स्थिते कूटस्थस्य दृष्टौ नाशिष्प्रपंचप्रेक्षैकांतम

वः। यथाद्युरादयो भेदभिन्नास्तथा जगद्भूला भिन्नं तत्तद्वादिमादितर्कस्याश्रयितव्यमिति सर्वः। इतो मादृशां तर्कस्यात्रब्रह्मण्यप्रवेशाद्दस्य चानुकूलत्वा

साम्यं तु बुद्धं तमोरूपयोरितरेतरव्यभिचारेणात्मनोऽनन्वागतत्वं संप्रसादे च प्रपंचपरित्यागेन सदात्मनासंपत्तेः निष्प्रपंचसदात्मत्वं प्र
पंचस्य ब्रह्मप्रभवत्वात्कार्यकारणानन्यत्वन्यायेन ब्रह्माव्यतिरिक इत्येवं जातीयकः तर्कोऽप्रतिष्ठानादिति चैकेवलस्य तर्कस्य विप्रलंभक
त्वं दर्शयिष्यति॥

त्तर्केणास्येपावकाशो इति भावः। केवलत्वं शुष्कतर्कस्याप्रवेशः सूत्रसंमत इत्याह। तर्काप्रतिष्ठानादिति। विप्रलंभकत्वमप्रमाणत्वं। मदुक्तो। एक २१

देशिनासर्वस्य जगतश्चेतनलोके विभागश्रुत्यनुपपत्तिरिति दूषणं सांख्येन तन्नतेनैकदेशिनाविभागश्रुतेश्चेतनाभिव्यक्तावृत्तविषयत्विमांसो

जषितु शक्यत्वात्सांख्यस्यैवेदं दूषणं यत्रैनेपापते॥

प्रधानकार्यत्वे सर्वस्याचेतनत्वेन चेतनाचेतनकार्यविभागासंभवादित्याह। सोपीत्यादिना। सिद्धान्ते चेतनाचेतनवैलक्षण्यं पारमार्थिकं कथं ब्रह्मलक्षणः प्रकृ
तित्वमित्यत आह। प्रकृत्यादिति। अप्रयोजकत्वं अभिचारणाभ्यां निरस्तत्वादित्यर्थः। कार्यमनुसंतेः प्रागसदेव स्यात् स्वविरुद्धकारणमतत्वसत्वायोगा

सोपि च चेतनकारणश्रवणबलेनैव समस्तस्य जगतश्चेतनतामुत्प्रेक्षेत तस्यापि विज्ञानं चाविज्ञानं चेति चेतनाचेतनविभागश्रवणं विभाव
नाविभावनाभ्यां चैतन्यस्य शक्यत एव योजयितुं। परस्यैव त्विदमपि विभागश्रवणं न युज्यते कथं। परमकारणस्य ह्यत्र समस्तजगदात्मना समवस्था
नं श्राव्यते। विज्ञानं चाविज्ञानं चाभवदिति। तत्र यथा चेतनस्याचेतनभावो नोपपद्यते विलक्षणत्वादेवमचेतनस्यापि चेतनभावो नोपपद्यते। प्रत्यु
क्त्वा तु विलक्षणत्वे यथाश्रुतमेव चेतनं कारणं ग्रहीतव्यं भवति॥ ॥असदिति चेन्न प्रतिषेधमात्रत्वात्॥ ॥यदि चेतनं शुद्धं शब्दादि
हीनं च ब्रह्म तद्विपरीतस्याचेतनस्याशुद्धस्य शब्दादिमतश्च कार्यस्य कारणमिष्येत। असत्तर्हि कार्यं प्रागुत्पत्तेरिति प्रसज्येत। अनिष्टं चैतत्स
त्कार्यवादिनस्तवेति चेत् नैष दोषः। प्रतिषेधमात्रत्वात्। प्रतिषेधमात्रं हीदं नास्य प्रतिषेधस्य प्रतिषेध्यमस्ति। न ह्ययं प्रतिषेधः प्रागुत्पत्तेः स
त्त्वं कार्यस्य प्रतिषेद्धुं शक्नोति। कथं। यथैव हीदानीमपीदं कार्यं कारणात्मना सदेवं प्रागुत्पत्तेरपीति गम्यते। न हीदानीमपीदं कार्यं कारणा
त्मानमन्तरेण स्वतंत्रमेवास्ति॥

दृष्टान्तसिद्धान्ताभ्यामनिर्वाच्यमिथ्यात्वात् कार्यस्य कालत्रयेपि कारणात्मना सत्त्वमविरुद्धमिति समाधत्ते। असदिति चेदित्यादिना। अत्र सत्त्वा
दिति त्रयं सत्त्वप्रतिषेधो निरर्थक इत्यर्थः॥

शा.सू.भा.२ कार्यसत्त्वमाशंक्य श्रुतिमाह। सर्वं तमिति। मिथ्यात्वमजानतः पुंसः ब्रह्म परिहरति। नन्विति सार्धेन। विस्तरेण चैतदिति मिथ्यात्वमित्यर्थः। स्थल्का
१२ र्यवादरीत्यध्यर्थे कार्यमेवेदं कारणस्यापि कार्यवदशुद्ध्यादिप्रसंगादिति। सूत्रं व्याचष्टे अत्राहेति। प्रतिसंसृज्यमानपदस्य व्याख्या। कारणे निपत्य जले

सर्वं तं परादाद्योऽन्यत्रात्मनः सर्वं वेदेत्यादिश्रवणात्। कारणात्मना तु सत्त्वं कार्यस्य प्रागुत्पत्तेरविशिष्टम्। ननु शब्दादिहीनं ब्रह्म जगतः कारणम्। बाढं।
न तु शब्दादिमत्कार्यं कारणात्मना हीनं प्रागुत्पत्तेरिदानीं वास्तीति। तेन न शक्यते वक्तुं प्रागुत्पत्तेरसत्कार्यमिति। विस्तरेण चैतत्कार्यकारणानन्य
त्ववादे वक्ष्यामः॥ ॥अपीतौ तद्वत्प्रसंगादसमंजसम्॥ ॥अत्राह। यदि स्थौल्यसावयवत्वाचेतनत्वपरिच्छिन्नत्वाशुद्ध्यादिधर्मकं कार्यं ब्रह्म
कारणकमभ्युपगम्येत। तदापीतौ प्रलये प्रतिसंसृज्यमानं कार्यं कारणाविभागमापद्यमानं कारणमात्मीयेन धर्मेण दूषयेदित्यपीतौ कारण
स्यापि ब्रह्मणः कार्यस्येवाशुद्ध्यादिरूपप्रसंगात्सर्वज्ञं ब्रह्म जगत्कारणमित्यसमंजसमिदमौपनिषदं दर्शनम्। अपि च समस्तस्य विभागस्या
विभागप्राप्तेः पुनरुत्पत्तौ नियमकारणाभावाद्भोक्तृभोग्यादिविभागेनोत्पत्तिर्न प्राप्नोतीत्यसमंजसम्। अपि च भोक्तॄणां परेण ब्रह्मणा विभा
गं गतानां कर्मादिनिमित्तप्रलयेऽपि पुनरुत्पत्तावभ्युपगम्यमानायां मुक्तानामपि पुनरुत्पत्तिप्रसंगादसमंजसम्॥

लीयमाने लवणादिवज्जलं दूषयतीति दृष्टान्तार्थः। सूत्रस्य योजनान्तरमाह। अपि चेति। सर्वस्य कार्यस्यापीतौ कारणवदेकरूपत्वप्रसंगादित्यर्थः। १२
अर्थान्तरमाह। अपि चेति। कर्मादीनां मुक्तिनिमित्तानां प्रलयेऽपि भोक्तॄणां उत्पत्तौ तद्वदेव मुक्तानामप्युत्पत्तिप्रसंगादित्यर्थः॥ ॥

ऽंक्तापूर्वकं आल्पांतरमाह। अथेति। यदि लयकालेपि कार्यं कारणे द्रव्यकं तर्हि स्थितिकाले तद्रूपाभावप्रसंगात्कार्यं सदा द्रव्यतापत्ते आसमंजस
मिदं दर्शनमित्यर्थः। अपीतौ जगत्कारणं न दूषयति। कारणे लीनस्य न मृदादिकुलीनघटादिवदिति सिद्धांतसूत्रमाचष्टे नैवेत्यादिना। अपिग

अथेदं जगद्रूपी तावपि विभक्तमेव परेण ब्रह्मणा वतिष्ठेते वमप्यपीतिश्च न संभवति। कारणाव्यतिरिक्तं च कार्यं न संभवतीत्यसमंज
समेवेति। अत्रोच्यते। न तु दृष्टांतभावात्। नैवास्मदीये दर्शने किंचिदसामंजस्यमस्ति। यत्तावदभिहितं कारणमपिगच्छत्कार्यं कार
णमात्मीयेन धर्मेण दूषयेदिति। तददूषणं कस्मात् दृष्टांतसद्भावात्। संति हि दृष्टांता यथा कारणमपिगच्छत्कार्यं कारणमात्मीयेन
धर्मेण न दूषयति तद्यथा। शरावादयो मृत्प्रकृतिका विकारा विभागावस्थायामुच्चावचमध्यमप्रभेदाः संतः पुनः प्रकृतिमपिगच्छंतो
न तामात्मीयेन धर्मेण संसृजंति। रुचकादयश्च सुवर्णविकारा अपीतौ न सुवर्णमात्मीयेन धर्मेण संसृजंति। पृथिवीविकारश्चतुर्वि
धो भूतग्रामो न पृथिवीमपीतावात्मीयेन धर्मेण संसृजति। त्वत्पक्षस्य तु न कश्चिद्दृष्टांतोस्ति। अपीतिरेव हि न संभवेत् यदि कारणे
कार्यं स्वधर्मेणैवावतिष्ठेत॥

छन्नी समानं विभागावस्थायां स्थितिकालः। स्थितिकाले न धुरजलेन लवणस्याकारणमिति अदृष्टांतः। किंच दूषकत्वे कार्यस्य स्थितिः स्याद्द्र
वणवदित्याह। अपीतिरेवेति अपीति कार्येण धर्मेण कारणस्य योगो न संभवति धर्म्यसत्त्वे धर्माणामप्यसत्त्वादिति भावः॥ सांवरदोषः॥

ननु सत्कार्यवादेऽनन्यत्वेऽपि कार्यस्य कारणाभेदेन सत्त्वात् दूषकत्वं स्यादित्यत आह। अनन्यत्वेऽपीति। कल्पितस्याधिष्ठानधर्मेण सम्भेदोऽन्यथाधिष्ठानस्य कल्पितकार्यधर्मवत्त्वं तस्य कार्यस्य कूटस्थत्वादीत्यर्थः। किं चापीतावितिविशेषणवैयर्थ्यमिति शङ्कां समाधत्ते। अस्त्युक्तं चेति। परिणामदृ-

अनन्यत्वेऽपि कार्यकारणयोः कार्यस्य कारणात्मत्वं न तु कारणस्य कार्यात्मत्वम्। आरम्भणशब्दादिभ्य इति वक्ष्यामः। अत्यल्पं चेदमुच्यते। कार्यमपीतौ कारणस्वरूपेण धर्मेण कारणं संसृजेदिति। स्थितावपि समानोऽयं प्रसङ्गः। कार्यकारणयोरनन्यत्वाभ्युपगमादिदं सर्वं यदयमात्मा। आत्मैवेदं सर्वम्। ब्रह्मैवेदममृतं पुरस्तात्। सर्वं खल्विदं ब्रह्म। इत्येवमाद्याभिर्हि श्रुतिभिरविशेषेण त्रिष्वपि कालेषु कार्यस्य कारणादनन्यत्वं श्राव्यते। तत्र यः परिहारः कार्यस्य तद्धर्माणां चाविद्याध्यारोपितत्वान्न तैः कारणं संसृज्यत इति। अपीतावपि स समानः। अस्ति चायमपरो दृष्टान्तः। यथा स्वयं प्रसारितया मायया मायावी त्रिष्वपि कालेषु न संस्पृश्यते। अवस्तुत्वात्। एवं परमात्मापि संसारमायया न संस्पृश्यत इति। यथा च स्वप्नदृगेकः स्वप्नदर्शनमायया न संस्पृश्यते। प्रबोधसम्प्रसादयोरनन्वागतत्वात्। एवमवस्थात्रयसाक्ष्येकोऽव्यभिचार्यवस्थात्रयेण व्यभिचारिणा न संस्पृश्यते। मायामात्रं ह्येतत्परमात्मनोऽवस्थात्रयात्मनावभासनं रज्ज्वा इव सर्पादिभावेनेति॥

ष्टान्तं व्याख्याय विवर्तदृष्टान्तमाचष्टे अस्ति चेति। मायाया अनुपादानत्वमित्यरुचेर्दृष्टान्तान्तरमाह। यथेति॥ अस्त्येव स्वप्नकाले दृष्टः संसर्ग इत्यत आह। प्रबोधेति। जाग्रत्सुषुप्त्योः स्वप्नेनात्मनोऽस्पर्शात् तत्कालेऽप्यस्पर्श इत्यर्थः। एवं तस्य जीवस्यावस्थाभिरसंसर्गस्तदा सर्वज्ञस्य किं वाच्य- १३

मेतिपक्षे सर्वेषामणूनां साम्यापत्तिमेकैकगुणत्वं वा स्याच्चतुर्गुणत्वं वा उभयथापि दोषमाह। अकल्प्यमाने त्विति। आदितान केवलमणुवादस्या
युक्तत्वादुपेक्षा किंतु शिष्टबहिष्कृतत्वादत्यंतमेवानादरणीयत्वमित्याह। अपरिग्रहाच्चेति। चकारार्थप्रपंचयितुमुपक्रमते। अपि चेति। अत्यंतभेदत्वाप

अकल्प्यमाने तूपचितापचितगुणत्वे परमाणुत्वसाम्यप्रसिद्धये यदि तावत्सर्वे एकैकगुणा एव कल्प्येरन् ततस्तेजसि स्पर्शस्योपलब्धिर्न स्यादप्
सु रूपस्पर्शयोः पृथिव्यां च रसरूपस्पर्शानां कारणगुणपूर्वकत्वात्कार्यगुणानां। अथ सर्वे चतुर्गुणा एव कल्प्येरन्। ततोऽप्स्वपि गंधस्योपलब्धिः
स्यात्तेजसि गंधरसयोर्वायौ गंधरूपरसानां। न चैवं दृश्यते। तस्मादप्यनुपपन्नः परमाणुकारणवादः। अपरिग्रहाच्चात्यंतमनपेक्षा॥ ॥प्रधानका
रणवादो वेदविद्भिरपि कैश्चिन्मन्वादिभिः सत्कार्यत्वाद्यंशोपजीवनाभिप्रायेणोपनिबद्धः। अयं तु परमाणुकारणवादो न कैश्चिदपि शिष्टैः के
नचिदप्यंशेन परिगृहीत इत्यत्यंतमेवानादरणीयो वेदवादिभिः। अपि च वैशेषिकाः तंत्रार्थभूतान्षट्पदार्थान् द्रव्यगुणकर्मसामान्यविशे
षसमवायाख्यानत्यंतभिन्नान् भिन्नलक्षणानभ्युपगच्छंति। यथा मनुष्योऽश्वः शश इति॥ ॥

कमाह। भिन्नलक्षणानिति। द्रव्यगुणकर्मणां द्रव्यत्वगुणत्वकर्मत्वानि तयोर्लक्षणानि गुणाश्रयत्वाश्रयाधेयत्वनिर्गुणत्वे इति जातिमदक्रियात्वं गु
णलक्षणं संयोगविभागयोर्निरपेक्षकारणं कर्म नित्यमनेकमनेकसमवेतं सामान्यं नित्यद्रव्यवृत्तयोऽन्त्या विशेषाः। नित्यः संबंधः समवायः इति भिन्नानि

तथात्वमसंतभिन्नत्वं तेन विरुद्धो योधर्मधर्मिभावः॥ गुणादयो न द्रव्यधर्माः स्युः ततो संतभिन्नत्वात् छशशृंगादिवदित्यर्थः। भेदे बाधकमुपन्यस्याभे
भेदमाह। अथ भवतीति। गुणादिषु तदधीनत्वं तावदन्वयव्यतिरेकसिद्धं तथाच गुणादयो द्रव्याभिन्नाः द्रव्याधीनत्वात्। यद्यस्मात् भिन्नं तन्न तदधीनं
यथा गृहाद्भिन्नः कुशादिरित्यर्थः। अभेदे द्रव्यं गुण इति शब्दप्रत्ययभेदः कथं तत्राह। द्रव्यमिति। कल्पितभेदोपजीवी सारांशः। अस्य थातत्वेनैव द्रव्यत्वाभेदे

तथात्वं चाभ्युपगमस्तद्विरुद्धं द्रव्याधीनत्वं शेषाणामभ्युपगच्छंति। तन्नोपपद्यते। कथं। यथाहि लोके शशकुशपलाशप्रभृतीनामत्यंतभिन्ना
नां सतां नेतरेतराधीनत्वं भवति। एवं द्रव्यादीनामसंतभिन्नत्वात् नैव द्रव्याधीनत्वं गुणादीनां भवितुमर्हति। अथ भवति द्रव्याधीनत्वं गुणादीनां ततो द्र
व्याभावे भावात् द्रव्याभावे भावात् द्रव्यमेव संस्थानादिभेदादनेकशब्दप्रत्ययभाग्भवति॥ यथा देवदत्त एक एव सन्नवस्थांतरयोगादनेकशब्द
प्रत्ययभाग्भवति तद्वत्। तथासति सांख्यसिद्धांतप्रसंगः स्वसिद्धांतविरोधश्चापद्येयाताम्। नन्वग्नेर्धूमस्याप्यग्न्यधीनत्वं दृश्यते॥ ॥

पि धर्मधर्मित्वायोगादिति मंतव्यं। अस्तु गुणादीनां द्रव्यतादात्म्यमिति वदंतं ताकिंकं मन्यं प्रत्याह। तथासतीति। सांख्योक्त्ववेदांतीग्राह्यः। यद्वा कपिलस्यापि ता
दात्म्यसिद्धांतइतिसांख्यग्रहणं। यद्यपि तदधीनत्वं तदुत्पन्नत्वं तच्च धूमेनास्ति अग्निं विनापि भावात् तथापि तत्कार्यत्वं तदधीनत्वं मत्वा व्यभिचारं शंकते। नन्विति॥

कार्यत्वमन्यत्वं चांगीकरोति। सत्यमिति तथापि तादात्म्येन प्रतीयमानत्वस्य हेतोर्विवक्षितत्वान्न व्यभिचार इत्याशयः। अस्य हेतोरस्मयासिद्धिमाशंकते।
गुणादीनामिति। गुणादीनां द्रव्येण भेदाभावेऽप्ययुतसिद्धत्वेन तादात्म्यप्रतीतिसिद्धिरि। सुधीः दूषयितुं विकल्पयति। तत्र नहीति शौक्ल्यस्य पटे तिष्ठत्वास

सत्वं इत्यपेते। भेदप्रतीतेस्तु तत्राग्निधूमयोरन्यत्वं निश्चीयते। इह तु शुक्लः कंबलो रोहिणी धेनुर्नीलमुत्पलमिति द्रव्यस्यैव तस्य तस्य तैस्तैर्विशेषै तेन
णा प्रतीयमानत्वान्नैव द्रव्यगुणयोरग्निधूमयोरिव भेदप्रतीतिरस्ति। तस्मात् द्रव्यात्मकता गुणस्य एतेन कर्मसामान्यविशेषसमवायानां द्रव्यात्मक
ताव्याख्याता। गुणादीनां द्रव्याधीनत्वं द्रव्यगुणयोरयुतसिद्धत्वादिति यद्युच्येत। तत्र न अयुतसिद्धत्वमपृथग्देशत्वं वास्यादपृथक्कालत्वं वा। अ
पृथक्स्वभावत्वं वा सर्वथापि नोपपद्यते। अपृथग्देशत्वे तावत्त्वाभ्युपगमो विरुध्येत। कथं तंत्वारब्धो हि पटः तंतुदेशोऽभ्युपगम्यते। न पटदेशः।
पटस्य तु गुणाः शुक्लत्वादयः पटदेशा अभ्युपगम्यंते न तंतुदेशाः॥ यथा चाहुः द्रव्याण्याश्रित्य द्रव्यांतरमारभंते गुणाश्च गुणांतरमिति। तंतवो हि कारणद्रव्या
णि कार्यद्रव्यं पटमारभंते। तंतुगताश्च गुणाः शुक्लत्वादयः कार्यद्रव्ये पटे शुक्लत्वादिगुणांतरमारभंत इति हि तेऽभ्युपगच्छंति सोऽभ्युपगमो द्रव्यगु
णयोरपृथग्देशत्वेऽभ्युपगम्यमाने बाध्येत। अथापृथक्कालत्वं अयुतसिद्धत्वमुच्येत। सव्यदक्षिणयोरपि गोविषाणयोरयुतसिद्धत्वं प्रसज्येत। तथा
ऽपृथक्स्वभावत्वे त्वयुतसिद्धत्वेन द्रव्यगुणयोरात्मभेदः संभवति॥ ॥

टस्य तंतुदेशत्वात्पटशौक्ल्ययोरपृथग्देशत्वाभावाच्छुक्लः पट इति सामानाधिकरण्यप्रतीतिर्न स्यादित्यर्थं दूषयति। अपृथग्देशत्व इति। कारणं द्रव्य
तद्रूपं व्याचष्टे। तंतवो हीति। स्वभावो हि स्वरूपं तस्यापृथक्त्वे स्वरूपाभेदसिद्धिरित्याह। अपृथक्स्वभावत्व इति॥ ॥

शा. रु. भा२
६२

श्रुभेदेपुक्तिमाह तस्येति। गुणस्येत्यर्थः। एवं षट्पदार्थाः अस्तंतभिन्ना इति सिद्धांतो नुभयविरोधेन दूषितः। सिद्धांतांतरं दूषयति। युतेति। अयुतसिद्ध
त्वं किमुभयोरुतान्यतरस्य ता घट्स्याह। आग्नीति। द्वितीयमाशंक्य दूषयति। अपेत्यादिना॥ कारणस्य पृथक्सिद्धत्वेपि कार्यस्य पृथक्सिद्धमिस्त्वतुपेत्य संबं

तस्य तादात्म्ये नैवप्रतीयमानत्वात्। युतसिद्धयोः संबंधः संयोगोऽयुतसिद्धयोस्तु समवाय इत्ययमभ्युपगमो म्यैवतेषां। यावत्सिद्धस्य कार्यस्य का
रणस्यायुतसिद्धत्वानुपपत्तेः। अथान्यतरापेक्षस्त्वयमभ्युपगमः। स्याद्युतसिद्धस्य कार्यस्य कारणेन संबंधः समवाय इति। एवमपि प्रा
णसिद्धस्यालब्धात्मकस्य कार्यस्य कारणेन संबंधो नोपपद्यते। द्व्याप्तत्वात् संबंधस्य। सिद्धं भूत्वा संबध्यत इति चेत्। प्राक्कारणसंबंधात्कार्यस्य
सिद्धावभ्युपगम्यमानायामयुतसिद्ध्यभावात् कार्यकारणयोः संयोगविभागौ न विद्येते इति दुरुक्तं स्यात्। यथा चोत्पन्नमात्रस्याक्रियस्य कार्यद्रव्य
स्य विभुभिराकाशादिभिर्द्रव्यांतरैः संबंधः संयोग एवाभ्युपगम्यते न समवायः। एवं कारणद्रव्येणापि संबंधः संयोग एव स्यात्। न समवायः। नापि
संयोगसमवाययोर्वा संबंधस्य संबंधिव्यतिरेकेण सत्त्वे किंचित्प्रमाणमस्ति॥

योः सिद्धस्यासिद्धस्य वेति विकल्प्याद्यं दूषयित्वा द्वितीयं शंकते सिद्धं भूत्वेति। सतोरेवासमयोः प्राप्तिः संयोग इत्यभ्युपगमात्। न तु पटयोरपि संयोगा
पत्तिरित्ययसिद्धान्तः स्यादित्यर्थः। सद्योजातपटस्य क्रियाभावात् कथं संयोगस्तत्राह। यथेति। किंच संबंधस्यापि संबंधेन वस्तुतां तदसंबंधस्यानियामक

६२

संबंधः संबंधिभिन्नत्वविशिष्टधीगम्यत्वादस्वांतरवदिति शंकते। संबंधीति। कल्पितभेदसाधने सिद्धसाधनता वस्तुभेदसाधने तु व्यभिचार
इत्यभिप्रायेण समाधत्ते। नैकलेपीति। स्वरूपे गौणत्वमनुष्यादिशब्दभागे वयुप्राधापेक्षयापि तेनादिविलक्षणशब्दधीगम्यो भवति। न च विघतइति व्यभिचार
इत्यर्थः। फलितमाह। इत्युपलब्धीति विलक्षणशब्दधीगम्यत्वादिरूपलब्धिघटितेन लक्षणेन लिंगेन प्रकाशस्य स्वांतरस्य संयोगादेः संबंधिव्यति

संबंधिशब्दप्रत्ययव्यतिरेकेण संयोगसमवायशब्दप्रत्ययदर्शनात तयोरस्तित्वमितिचेत् नैकत्वेपि स्वरूपत्वाद्यरूपापेक्षया नेकशब्दप्रत्ययदर्श
नात्। यथैकोपि सन् देवदत्तो लोके स्वरूपसंबंधिरूपं चापेक्ष्यानेकशब्दप्रत्ययभाग् भवति। मनुष्यो ब्राह्मणः श्रोत्रियो वदान्यो बालो युवा स्थविरः
पिता पुत्रः पौत्रो भ्राता जामातेति। यथा चैकापि सती रेखा स्थानान्यत्वेन निविशमाना एकदशशतसहस्रादिशब्दप्रत्ययभेदमनुभवति। तथा संबंधि
नोरेव संबंधिशब्दप्रत्ययव्यतिरेकेण संयोगसमवायशब्दप्रत्ययार्हत्वं न व्यतिरिक्तवस्त्वस्तित्वेनेति उपलब्धिलक्षणप्राप्तस्यानुपलब्धेरभावो वस्त्वं ॥
तरस्य। नापि संबंधिविषयत्वे संबंधशब्दप्रत्यययोः संततभावप्रसंगः स्वरूपवास्वरूपापेक्षयेत्युक्तोत्तरत्वात्॥ ॥

रेकेणानुपलब्धेरभावो निश्चीयत इत्यर्थः। न हि अंगुलिद्वयस्य नैरंतर्यव्यतिरेकेण संयोग उपलभ्यते समवायस्तु नकस्यापि क्वचिदप्यनुभवमारोहतीति
भावः। संबंधस्य संबंध्यभेदे संबंधिनः सदातनत्वात्सर्वदा संबंधबुद्धिप्रसंग इति शंकां निषेधति। नापीति। परापेक्षया नैरंतर्यावस्थायामंगुल्योः स्वरूप

पिनिश्चसंबंधधीर्नस्वांतरत्व कभिल घं ॥

शा॰ स॰ भा॰ २ पूर्वपरमाण्वोः संयोगनिरासेन द्व्यणुकादिसृष्टिर्निरस्ता। संप्रत्यदृष्टवदात्मनाणूनां संयोगोऽणुषु क्रियाहेतुरात्ममनसोः संयोगो बुद्ध्याद्यसमवा
६३ यिकारणं निरस्यते॥ तथाप्येवात्मेति निरस्तमपि कल्पितप्रदेशपक्षमाश्रित्य प्रसंगात्सदोषांतरं वक्तुं पुनरुत्थापयति। कल्पिता इति। कल्पनमूहः। ऊ
हितार्थाः संतोऽसंतो वा द्वितीये न संयोगसिद्धिः खस्वाभावयोरेकत्र वस्त्ववच्छेदकासत्वादाद्येनेह मात्रेण सर्वार्थसिद्धिप्रसंगः इह सत्याधीनत्वात्स्वभ

तथाप्यात्ममनसामप्रदेशत्वान्न संयोगः संभवति। प्रदेशवतो द्रव्यस्य प्रदेशवता द्रव्यांतरेण संयोगदर्शनात्। कल्पिताः प्रदेशा आत्ममन
नसां भविष्यंतीति चेत्तन्नाविद्यमानार्थकल्पनायां सर्वार्थसिद्धिप्रसंगात्। इयानेवाविद्यमानो विरुद्धो विरुद्धो वार्थः कल्पनीयो नातोऽधिक इति
नियमहेत्वभावात्कल्पनायाश्च स्वायत्तत्वात्। प्रभूतत्वसंभवाच्च। न च वैशेषिकैः कल्पितेभ्यः षड्भ्यः पदार्थेभ्योऽन्येऽधिकाः शतं सहस्रं वार्था
न कल्पयितव्या इति निवारको हेतुरस्ति। तस्माद्यस्मै यस्मै यद्यद्रोचते तत्तत्सिध्येत्। कश्चित्कृपालुः प्राणिनां दुःखबहुलः संसार एव मा भूदिति कल्प
येत्। अन्यो वा व्यसनी मुक्तानामपि पुनरुत्पत्तिं कल्पयेत्। कस्तयोर्निवारकः स्यात्। किं चान्यत् द्वाभ्यां परमाणुभ्यां निरवयवाभ्यां सावयवस्य द्व्यणु ६३
कस्याकाशेनेव संश्लेषानुपपत्तिः। न ह्याकाशस्य पृथिव्यादीनां च जतुकाष्ठवत्संश्लेषोऽस्ति। ॥ ॥ ॥

तत्त्वं निरवधित्वं तत्संभवाच्चेत्यर्थः। यदृच्छातः सर्वसिद्धिस्तदा पदार्थबंधमुक्तिनियमा लुप्येरन्नित्याह। न चेत्यादिना संयोगं दूषयित्वा समवायं दूषयति।
किं चान्यदिति। तन्मते दूषणांतरं द्रष्टव्यमित्यर्थः। संश्लेषः संग्रहः। यत्र एकाकर्षणेनापराकर्षणं तस्यानुपपत्तिरित्यर्थः। द्व्यणुकं निरवयवासमवेतं

सावयवत्वादनित्यत्वप्रसक्तिरिति भावः ॥

ननु द्व्यणुकस्यासमवेतत्वेन दाश्रितत्वं न स्यात्संबंधं विना तद्योगाच्च संयोगादाश्रितत्वे कार्यद्रव्यस्य प्रकृतस्य संयोगादिति शंकते। कार्येति। प्रकृतिविकारयोरभेदादाश्रयाश्रयिभावानुपपत्तिरिहेति परिहरति। नेति। भेदात भ्राव इति वृत्तं प्रसाह। इतरेतराश्रयत्वादिति। कथं तर्हि कार्यस्य कारणाश्रितत्वव्यवहारः कल्पितभेदादित्याह। कारणस्यैवेति। परमाणूनां निरवयवत्वमप्ययुक्तमित्याह॥ किंचेति। परमाणवः सावयवाः। अल्पत्वा-

कार्यकारणद्रव्ययोराश्रिताश्रयभावोऽन्यथा नोपपद्यत इत्यवश्यं कल्प्यः समवाय इति चेत् नेतरेतराश्रयत्वात् कार्यकारणयोर्हि भेदसिद्धावाश्रिताश्रयभावसिद्धिराश्रिताश्रयभावसिद्धौ च तयोर्भेदसिद्धिः कुंडबदरवदितीतरेतराश्रयत्वं स्यात्। नहि कार्यकारणयोर्भेदः आश्रिताश्रयभावो वा वेदांतवादिभिरभ्युपगम्यते। कारणस्यैव संस्थानमात्रं कार्यमित्यभ्युपगमात्। किंचान्यत् परमाणूनां परिच्छिन्नत्वाद्यावत्यो दिशः षडष्टौ दश वा तावद्भिरवयवैः सावयवास्ते स्युः सावयवत्वादनित्याश्चेति नित्यत्वनिरवयवत्वाभ्युपगमो बाध्येत। यांस्त्वं दिग्भेदभेदिनोऽवयवान् कल्पयसि त एव परमाणव इति चेत्॥

त्। घटवद्विपक्षे तेषां दिग्भेदावधित्वं न स्यादत्नवदित्यर्थः। ननु परमाण्वपेक्षया योयं प्राचीदक्षिणेत्यादिदिग्भेदव्यवहारस्तदवधित्वेन येऽवयवास्त्वया कल्प्यंते त एव मम परमाणवस्तेपि सावयवाश्चेत्तदवयवा एवेत्येवं यतः परं न विभागः स एव निरवयवः परमाणुरिति शंकते। यांस्त्वमिति॥

शा॰सू॰ना॰२ परिहरति। नस्यजेति। अयमर्थः। यत्रावयवविभागाभावोऽप्यवस्तु स परमाणुरिति यद्युच्येत तर्हि त्रसरेणुरेव परमाणुः स्यात् तदन्यस्याल्पस्य दृ-
६४ ग्विभागासेनावयवविभागस्य भावात् पृथिव्यादिजातीयो न्यूनपरिमाणविश्रान्तिभूमिर्यः स परमाणुरित्युच्येत तर्हि तस्य तत्र मूलकारणत्वं विनाशि-
त्वात् घटवत्सावयवत्वसिद्धिः अणवो विनाशिनः पृथिव्यादिजातीयत्वात् घटवदिति साधनादिति। संप्रति निरवयवद्रव्यस्य नाशहेत्वभावादात्मवद्विना-

नस्थूलस्य सूक्ष्मतारतम्यक्रमेणापरमकारणाद्धि नाशोपपत्तेः। यथा पृथिवी घणुकाद्यपेक्षया स्थूलतमा वस्तुभूतापि विनश्यति। ततः सूक्ष्मं
सूक्ष्मतरं च पृथिव्येकजातीयकं विनश्यति। ततो घ्यणुकं तथा परमाणवोऽपि पृथिव्येकजातीयकत्वाद्विनश्येयुः। विनश्यन्तोऽप्यवयवविभागेनैव
विनश्यन्तीति चेत् नायं दोषो यतो घृतकाठिन्यविलयनवदपि विनाशोपपत्तिमवोचाम॥ यथा हि घृतसुवर्णादीनामविभज्यमानावयवानाम
पि अग्निसंयोगात् द्रवभावापत्त्या काठिन्यविनाशो भवति एवं परमाणूनामपि परमकारणभावामलात्सर्वादिविनाशो भवीष्यतीति॥

६४

शङ्कासांख्यपूर्वोक्तं परिहारं स्मारयति। विनश्यन्त इत्यादिना॥ ब्रह्मातिरिक्तस्याणूनि कृत्वा च द्रव्यस्य निरवयवत्वं न सिद्धमिति निष्कासितदृष्टान्ताशात्वि-
नाशः फलमेव संभवति मृत्कौन्तानां तद्ब्रह्मणाशितत्कार्याणुनाशसंभवति भावः॥

जगज्जन्मस्थितिलयाईश्वरस्यावच्छात्रपंतदसंगिलेवच्छसंमतिमाह। अत्रैवोक्तमिति। पृतत्वमसीत्युपदेशकाले प्रबुध्यते। मायानिद्रां त्यजति।
तदाजन्मलयस्थित्यवस्थाशून्यमद्वैतमीश्वरमात्मत्वेनानुभवतीत्यर्थः। फलितमाह। तत्रेति। द्वितीयमसामंजस्यमनूद्य तेनैव सूत्रेणापरिहरति। यत्पुन
रिति। सुषुप्तावज्ञानसत्वे पुनर्विभागोऽस्तीत्यत्र मानमाह। श्रुतिश्चेति। सति ब्रह्मण्यैक्यं प्राप्यापि न विदुरिति सतो नोक्तिः। इह सुषुप्तेः प्राक्प्रबोधे येन जात्या
दिना विभागो भवति। तदपुनरुत्थानकालेऽपि तथैव भवंतीति विभागोक्तिः। ननु सुषुप्तौ पुनर्विभागप्रापकाज्ञानसत्वेऽपि सर्वप्रलयेऽपि तत्सत्वे कुतस्तत्रा

अत्रोक्तं वेदांतार्थसंप्रदायविद्भिराचार्यैः। अनादिमायया सुप्तो यदा जीवः प्रबुध्यते। अजमनिद्रमस्वप्नमद्वैतं बुध्यते तदेति। तत्र यदुक्त
मपीतौ कारणस्यापि कार्यस्येव स्थौल्यादिदोषप्रसंग इति तदयुक्तं। यत्पुनरेतदुक्तं समस्तस्य विभागस्याविभागप्राप्तेः पुनर्विभागेनो
नियमकारणं नोपपद्यत इत्ययमप्यदोषः दृष्टांतभावादेव। यथा हि सुषुप्तिसमाध्यादावपि सत्यां स्वाभाविक्यामविभागप्राप्तौ मिथ्याज्ञान
स्यानपोदितत्वात् पूर्ववत् पुनः प्रबोधे विभागो भवत्येवमिहापि भविष्यति। श्रुतिश्चात्र भवति इमाः सर्वाः प्रजाः सति संपद्य न विदुः स
ति संपद्यामह इति। त इह व्याघ्रो वा सिंहो वा वृको वा वराहो वा कीटो वा पतंगो वा दंशो वा मशको वा यद्यद्भवंति तदाभवंतीति। यथा ह्यवि
भागेऽपि परमात्मनि मिथ्याज्ञानप्रतिबद्धो विभागव्यवहारः स्वप्नवदव्याहतः स्थितो दृश्यते। एवमपीतावपि मिथ्याज्ञानप्रतिबद्धैव वि
भागशक्तिरनुमास्यते॥

ह यथाहीति। यथा सुषुप्तौ परमात्मनि सर्वकार्याणामविभागेऽपि पुनर्विभागहेतुस्त्वज्ञानशक्तिरस्ति एवमपीतौ महाप्रलयेऽपि मिथ्याभूता
ज्ञानसंबद्धा पुनःसृष्टिविभागशक्तिरनुमास्यते। यतः स्थिता विद्यातो मिथ्याज्ञानकार्यो विभागव्यवहारस्तत्वबोधाभावात्स्वप्नवदबाधितो द

दृष्टेः। अतः का[illegible]॥

अज्ञानां जीवानां महाप्रलयेप्यज्ञानशक्तिनियमात्पुनर्जन्मनियम इति भावः। एतेनेति। जन्मकारणाज्ञानशक्त्यभावेनेत्यर्थः। वैलक्षण्यादीनां
सांख्यपक्षेपि दोषत्वान्नास्माभिः स्वतन्त्रेण प्रयासः कार्य इत्याह। स्वपक्षेति। सूत्रं व्याचष्टे। स्वेति। प्रादुष्युः प्रादुर्भवेयुः। अत एवेति। सत्कार्यस्य वि
रुद्धकारणात्मनात्मत्वाभोगात्वात्। स्वस्येवापरेषां वेतनकार्यमिथ्यात्ववादिन इति मंतव्यं। अपीतौ तद्वदिति सूत्रोक्तदोषचतुष्टयमाह। तथापीतावविति
एतेन मुक्तानां पुनरुत्पत्तिप्रसंगः प्रत्युक्तः सम्यग्ज्ञानेन मिथ्याज्ञानस्यापोदितत्वात्। यः पुनरयमपरो विकल्प उत्प्रेक्षितोऽथेदं जगदपीता
वपि विभक्तेनैव परेण ब्रह्मणावतिष्ठेतेति सोप्यनभ्युपगमादेव प्रतिषिद्धस्तस्मात्समंजसमिदं मौपनिषदं दर्शनं॥ ॥स्वपक्षदोषाच्च॥
॥स्वपक्षे चैते प्रतिवादिनः साधारणा दोषाः प्रादुष्युः कथमित्युच्यते यत्तावदभिहितं विलक्षणत्वान्नेदं जगद्ब्रह्मप्रकृतिकमिति प्रधान
प्रकृतिकतायामपि समानमेतत् शब्दादिहीनात्प्रधानाच्छब्दादिमतो जगत उत्पत्त्यभ्युपगमात्। अत एव च विलक्षणकार्योत्पत्त्यभ्युपगमात्स
मानः प्रागुत्पत्तेरसत्कार्यवादप्रसंगः। तथापीतौ कार्यस्य कारणाविभागाभ्युपगमात्तद्वत्प्रसंगोपि समानः। तथा मृदितसर्वविशेषेषु वि
कारेष्वपीतावविभागात्मतां गतेष्विदमस्य पुरुषस्योपादानमिदमस्येति प्राक्प्रलयात्प्रतिपुरुषं ये नियता भेदा न ते तथैव पुनरुत्पत्तौ नि
यन्तुं शक्यन्ते कारणाभावात्। विनैव कारणेन नियमेऽभ्युपगम्यमाने कारणाभावसाम्यान्मुक्तानामपि पुनर्बन्धप्रसंगः। अथ केचिद्भेदा अपीता
वविभागमापद्यंते केचिन्नेति चेत् ये नापद्यंते तेषां प्रधानकार्यत्वं न प्राप्नोतीत्येवमेते दोषाः साधारणत्वान्नान्यतरस्मिन्पक्षे चोदयितव्या भ
वंतीत्यदोषतामेवैषां द्रढयति अवश्याश्रयितव्यत्वात्॥
कार्यवत्प्रधानस्वरूपादिमत्त्वप्रसंगः। इदं कर्मादिकमस्योपादानं भोग्यमस्येत्यनियमः। बद्धमुक्तोऽप्यनुक्तश्च परिहर्तव्य इत्यर्थः। मुक्तानां भेदाः
संघातविशेषाः प्रधाने लीयंते नैव धर्माणां भेदास्तु न लीयंत इत्युच्येत तर्हि अलीनानां पुरुषवत्कार्यत्वव्याघात इत्यर्थः॥ १४

किंच तर्कस्य स्वाभाविकदोषवत्त्वात्तेन निर्दोषवेदांतसमन्वयो न बाध्य इत्याह। तर्काप्रतिष्ठानादिति। पुरुषमतीनां विचित्रत्वेपि कपिलस्य सर्वज्ञत्वात्तदीयतर्के विश्वास इति शंकते। अथेति। कपिलोपि स्वर्ज्ञतः कारणादेनेति कल्पमेति सामायेन परिहरति। एवमपीति। सत्त्वमध्यस्थाशंकाभागं व्याचष्टे। अथेत्याश्रीयेतेति। किंन स्मरणत्वादिति तर्काणामप्रतिष्ठितत्वेपि प्रतिपक्षधर्मतासंपन्नः कश्चित्तर्कः प्रतिष्ठितो भविष्यति तेन प्रधानमनुमेयमिति भावः। ननु

तर्काप्रतिष्ठानादप्यन्यथानुमेयमिति चेदेवमप्यविमोक्षप्रसंगः॥ इतश्च नागमगम्येर्थे केवलेन तर्केण प्रत्यवस्थातव्यं। यस्मान्निरागमाः पुरुषोत्प्रेक्षामात्रनिबंधनास्तर्का अप्रतिष्ठिता भवंत्युत्प्रेक्षाया निरंकुशत्वात्। तथा हि कैश्चिदभियुक्तैर्यत्नेनोत्प्रेक्षितास्तर्का अभियुक्ततरैरन्यैराभास्यमाना दृश्यंते। तैरप्युत्प्रेक्षिताः संतस्ततोन्यैराभास्यंत इति न प्रतिष्ठितत्वं तर्काणां शक्यमाश्रयितुं पुरुषमतिवैरूप्यात्। अथ कस्यचित्प्रसिद्धमाहात्म्यस्य कपिलस्यान्यस्य वा संमतस्तर्कः प्रतिष्ठित इत्याश्रीयेत। एवमप्यप्रतिष्ठितत्वमेव। प्रसिद्धमाहात्म्यानुमतानामपि तीर्थकराणां कपिलकणभुक्प्रभृतीनां परस्परविप्रतिपत्तिदर्शनात्। अथोच्येतान्यथा वयमनुमास्यामहे यथा नाप्रतिष्ठादोषो भविष्यति। न हि प्रतिष्ठितस्तर्क एव नास्तीति शक्यते वक्तुं। एतदपि हि तर्काणामप्रतिष्ठितत्वं तर्केणैव प्रतिष्ठाप्यते। केषांचित्तर्काणामप्रतिष्ठितत्वदर्शनेनान्येषामपि तज्जातीयानां तर्काणामप्रतिष्ठितत्वकल्पनात्॥

सोप्यप्रतिष्ठितः तर्कजातीयत्वाद्विलक्षणसादिवदित्यत आह। नहीति। तर्कजातीयत्वादिति तर्कः प्रतिष्ठितो न वा। आद्ये तेनैवाप्रतिष्ठितत्वसाध्याभावाद्व्यभिचारः। द्वितीयेपि तस्यैव तर्काणामप्रतिष्ठितत्वहेतुत्वाभावादित्यभिसंधिमानाह। एतदपीति॥ ॥ ॥ ॥

न्या·सू·भा·२
२५

किं चानागतपाकइष्टसाधनं पाकत्वादतीतपाकवदित्यादिरिष्टसाधनतानुमानात्मकतर्कस्य प्रवृत्तिनिवृत्तिव्यवहारहेतुत्वान्नाप्रतिष्ठितत्वमित्याह। सर्वे
तर्केति। अध्यक्षविषयः पाकभोजनादिविषयस्तत्साध्यत्वेनानागतपाकभोजनादिविषये पाकादौ सुखदुःखहेतुत्वानुमित्या प्रवृत्त्यादि
रित्यर्थः। किं न पूर्वोत्तरमीमांसयोस्तर्कैर्लोकव्यवहारस्य निर्णयस्य कृपणालम्बनात्तर्कः प्रतिष्ठित इत्याह अन्तेऽपि नाम मनुरपि केषांचित्तर्काणां प्रति
सर्वेतर्काप्रतिष्ठायां च लोकव्यवहारोच्छेदप्रसङ्गः। अतीतवर्तमानाध्यक्षसाम्येनानागतेऽप्यध्वनि सुखदुःखप्राप्तिपरिहारपरो वर्तमानो
लोको दृश्यते। अत एव विप्रतिपन्नो वाचार्या भाष्यनिराकरणेन सम्यक्पूर्वपक्षनिर्धारणात्तर्केणैव वाक्यार्थनिरूपणमारोपेणाक्रियते। मनुरपि चै
वं मन्यते। प्रत्यक्षमनुमानं च शास्त्रं च विविधागमं। त्रयं सुविदितं कार्यं धर्मशुद्धिमभीप्सतेति। आर्षं धर्मोपदेशं च वेदशास्त्राविरोधिना।
यस्तर्केणानुसंधत्ते स धर्मं वेद नेतर इति चक्षुष्यन्वयमेव तर्कस्यालंकारोपदप्रतिष्ठितत्वेनाभिमतं हि सा वचन तर्कपरित्यागेन नित्यं यस्तर्कैः
प्रतिपन्नत्वाद्भवति। न हि पूर्वोत्तरमीमांसादिशास्त्रैरेतन्मतं नैव भवितव्यमिति किंचिदस्ति प्रमाणं तस्मान्नैतत्तर्कोऽप्रतिष्ठानदोषदुष्ट इति वे
देष्वप्यविमोक्षप्रसङ्गः। यद्यपि केचिद्विषये तर्कस्याप्रतिष्ठितत्वमुपलभ्यते। तथापि प्रकृते तादृशविषयप्रसङ्गाभावादत एव प्रतिष्ठितत्वादा
षादनिर्मोक्षप्रसक्त्या तर्कस्य नहीदमतिगम्भीरं भाववेदं भाष्यमुक्तिनिबन्धनमागममन्तरेण। अस्मिंस्तु प्रविशामः। रूपाद्यभावाद्धि नायमर्थः प्रत्य
क्षस्य गोचरो लिंगाद्यभावाच्चानुमानादीनामिति प्रेक्षावताम्॥
कोऽप्यस्येत्यत आह। मनुरिति। धर्मस्वरूपनिरूपणार्थं इति शेषः। कस्यचित्तर्कस्याप्रतिष्ठितत्वमङ्गीकरोति। अप्यवेति। सर्वतर्काणामप्रतिष्ठायां एवं १५
पक्षस्यैव न स्यादिति भावः। पूर्वपक्षतर्कवत्सिद्धान्ततर्कोऽप्यप्रतिष्ठितः तर्कत्वाविशेषादिति वदन्तं प्रत्याह सतीति। नहीति॥ कुचितर्कस्याप्रतिष्ठामाम
पि जगत्कारणविशेषे तर्कस्य स्वातन्त्र्यं नास्तीति सूत्राभिप्रायमाचष्टे। यद्यपीत्यादिना। नायस्य जगत्कारणस्यैवात्मा मन्दमत्यमुक्तिनिबन्धनमुक्त्वा

अविमोसो मुख्यभावहृलभ्यौं तरेणाह। अपि चेत्यादिना। एकरूपवस्तुज्ञानस्य सम्यग्ज्ञानत्वे पितर्के जन्यत्वं किं तस्मादित्यत आह। तत्रैवेत्य
हि। तर्कोत्थज्ञानानां मिथो विप्रतिपत्तेर्न सम्यक्ज्ञानत्वं सम्यक्ज्ञाने विप्रतिपत्तिपुरस्सरो गाद्दिल्पर्थः। एकरूपेणानवस्थितेर्विषमोपन्यस्तार्के प्रम

अपि च सम्यक्ज्ञानान्मोक्ष इति सर्वेषां मोक्षवादिनामभ्युपगमः तत्र सम्यक्ज्ञानमेकरूपं वस्तु तत्त्वतादैकरूप्येण सुव्यवस्थितं पोर्थः सपरमार्थो
लोके तद्विषयं तत्सम्यक्ज्ञानमभिरूप्यते। यथाग्निरुष्ण इति॥ तत्रैवं सति सम्यक्ज्ञाने पुरुषाणां विप्रतिपत्तिरनुपपन्ना। तर्कज्ञानानां तु स्व
नोत्प्रेक्षितविरोधात् प्रसिद्धा विप्रतिपत्तिः यदुक्तं केनचिज्ज्ञानं लिंके एव तेनैव सम्यग्ज्ञानमिति प्रतिपादितं। तदपरेण युक्त्याभ्यस्ते ते नापि प्रतिष्ठापितं तत्
दपरेणाप्युत्पोष्य तदुक्तिर्मासिद्धं लोके। कुत एकरूपतयावस्थितात् विषयं तर्कप्रभवं सम्यक्ज्ञानं भवेत्। नच प्रधानत्वादीतर्कविशमुत्तम इति सर्वे
तार्किकैः परिगृहीतः। येनैतदीयं मतं सम्यग्ज्ञानमिति प्रतिपद्येमहि। नचयामतेश्चतीतानागतवर्तमानास्तार्किका एकस्मिन्देशे काले च स
माहर्तुं येन तन्मति रेकरूपैकार्थविषमाता सम्यक्मतिरितिस्यात् वेदस्य तु नित्यत्वे विज्ञातेोसन्निहितत्वे च सति व्यवस्थितार्थविषयत्वोपप
त्तेः तज्जनितस्य ज्ञानस्य सम्यक्त्वं अतीतानागतवर्तमानैः सर्वैरपि तार्किकैरपह्नोतुमशक्यं। अतः सिद्धमस्यैवोपनिषदूज्ञानस्य सम्यग्ज्ञा
नत्वं॥

वं कथं सम्यक्ज्ञानं भवेदिति योजना। ननु सांख्यस्यश्रेष्ठत्वात्तत्ज्ञानं सम्यग्जिज्ञासाशंकाहेत्वसिद्धिमाह। नच प्रधानेति। ननु सर्वतार्किकैर्मिलित्वा
निश्चिततर्केण्यमति मुक्तिहेतुरस्त्वत आह। नचशक्यंत इति॥ ॥ ॥ ॥ ॥ ॥

तस्मात्तर्कोत्थज्ञानानामुक्तमोगात्तर्केण वेदांतसमन्वयबाधो न युक्तस्तद्बाधे सम्यग्ज्ञानालाभेनानिर्मोक्षप्रसंगादिति सूत्रांशार्थमुपसंहरति।
अतोन्यत्रेति। सम्यक्त्वस्य तर्केणाविरोधे फलितमधिकरणार्थमुपसंहरति आगमेति। एवं जगदुपादाननिमित्तब्रह्मणि वेदांतसमन्वयो विषयः
स किं स्मृतिमुतत्नद्बोधादानमिति वैदिकाहिंसान्यायेन विरुध्यते नवेति संदेहे सांख्यस्मृत्यनंतरं तर्कोकुशलमतिलोपित्वेनाविकारीत्वात्तर्कैर्मतिकु

अतोन्यत्र सम्यक्ज्ञानत्वानुपपत्तेः संसाराविमोक्षएवप्रसज्येत अत आगमवशेनागमानुसारितर्कवशेन च चेतनं ब्रह्म जगतः कारणं प्रकृति
श्चेति स्थितं। एतेन शिष्टापरिग्रहा अपि व्याख्याताः। वैदिकस्य दर्शनस्य प्रत्यासन्नत्वात् गुरुतरतर्कबलोपेतत्वात् वेदानुसारिभिश्च कैश्चि
च्छिष्टैः केनचिदंशेन परिगृहीतत्वात् प्रधानकारणवादं तावद्व्यपाश्रित्य यस्तर्कनिमित्त आक्षेपो वेदांतवाक्येषूद्भावितः स परिहृतः इदानीम
ण्वादिवादव्यपाश्रयेणापि कैश्चिन्मन्दमतिभिर्वेदांतवाक्येषु पुनस्तर्कनिमित्त आक्षेप आशंक्येत इत्यतः प्रधानमल्लनिबर्हणन्यायेनाति
दिशति परिगृह्यंत इति परिग्रहाः न परिग्रहा अपरिग्रहाः शिष्टानामपरिग्रहाः शिष्टापरिग्रहाः एतेन प्रकृतेन प्रधानकारणवादनिरा
करणकारणेन शिष्टैर्मनुव्यासप्रभृतिभिः केनचिदप्यंशेनापरिगृहीता ये अण्वादिकारणवादास्तेपि प्रतिषिद्धतया व्याख्याता निराकृता

बलत्वशंकासिद्धेस्तर्कदोषस्याप्यस्य अबाधितत्वाद्विरुध्यत इति प्रसक्तस्तर्कहेतोर्न सामेति निरस्यति। एतेनेति पदं लंपर्यंतं। ननु सांख्यमतस्यैव प्रत्यासत्तिः किंक
मतस्येतिदर्शः किं किमिति कृतो वैपरीत्यस्यापि संभवादित्याशंक्य बीजस्य रूपदेशादिति हेतुभावे कारणमाह। वैदिकस्येति। सत्कार्यत्वात्मासंगत्व
नकाशत्वादि अंशैर्वेदांतशास्त्रस्य प्रत्यासन्नः प्रधानवादः शिष्टैर्देवलादिभिः सत्कार्यत्वांशेन स्वीकृत इति प्रबलत्वादुपन्यासः अण्वादिकारणवादानां निर्मूलत्वेन दुर्बल

किं निराकरणकारणमिति प्रष्टव्यं नास्तीत्याह। तुल्यत्वादिति। कारणमेवाह। तुल्यमिति। यदुक्तं विभुत्वाज्जगदुपादानं ब्रह्मेति। तत्र पक्षसाधक
त्वेन श्रुतेरुपजीव्यत्वात् करणतया बाधः। महापरिमाणत्वस्य सर्वसंयोगित्वरूपविभुत्वस्य वा निर्गुणे ब्रह्मण्येव सिद्धेः श्रुतिदृष्टत्वं। अतः सम
न्वयपक्षता किं कृत्या येन न विरोधः इति सिद्धं। आद्रिती पात ब्रह्मणो जगत्सर्गादिस्थितिर्दर्शितं समन्वये विषमः। स किं परिच्छिन्नेन निर्न्नैतन्नादिस्तु प्रका
रणाभिन्नं प्रधानं तत्तु ज्ञो घटपटादिभिस्तर्कसहितभेदप्रसंगादिना विरुध्यते नवेति संदेहे ब्रह्मणि तत्कृत्स्नप्रतिष्ठितत्वे पिंडगर्द्दे प्रतिष्ठित

तुल्यत्वात्तन्निराकरणकारणस्य नात्र पुनरारंभः किं तर्हि किंचिदस्ति। तुल्यमत्रापि परमाणुवादिनोऽस्य जगत्कारणस्य तर्कविरुद्धत्वं तर्क
स्य चाप्रतिष्ठितत्वमन्यथानुमानेऽप्यविमोक्षप्रसंगागमविरोधश्चैवं जातीयकं तु एककारणं कारणं। मोक्षापत्तेरविभागश्चेत्स्याल्लोकवत्।
॥ अन्यथापि पुनर्ब्रह्मकारणवादस्तर्कबलेनैवाक्षिप्यते। यद्यपि श्रुतिः प्रमाणं स्वविषये भवति। तथापि प्रमाणान्तरेण विषयापहारे
न्यपरा भवितुमर्हति। यथा मंत्रार्थवादे॥

त्वाद्विरुध्यत इति पूर्वपक्षयति। भोक्त्रापत्तेरिति। विरोधादद्वैतासिद्धिः पूर्वपक्षफलं सिद्धांते तत्सिद्धिरिति भेदः। अनयोः सूत्रस्यार्थानिर्ण
यात् कर्णाक्षेपोनमुक्तक्रमिति ध्यायते। यद्यपीति। मानांतरापोह्यैक्यस्य शब्देन बाधनासंभवः फलतीति यद्ब्रह्माभेदाज्जलादिवत्भेदो वेति
पादानकत्वं श्रुतिविषयः सृष्ट्यादिसो प्रयोजनं कार्यवन्मानांतरयोग्यमर्हवेति हेतुप्रमाणोपपत्तिरिति समाधत्ते। तथापीति॥ स्वस्यपरत्वं

सू॰भा॰२ स्वविषयेऽजगद्बीजं तर्कस्याप्रतिष्ठितत्वात्तेनाक्षेप इत्याह तर्केति। तर्कादेर्हेतोरप्रामाण्येऽपि ततः समन्वयविरोधे किमायातमिति शंकते किं न

१७ तदिति पूर्वपक्षी समाधत्ते। अत इति। तर्कादेः प्रामाण्यात्तु हेतुना धर्मत्वं श्रुतेरयुक्तमित्युक्तं तेन समन्वयबाधो युक्त इत्यर्थः। इममर्थं कृत्वा पूर्वकं

सप्रपतिकल्पमित्यादिना। ननु भोक्तृभोग्ययोर्मिथ एकत्वे केनोक्तमित्याशंक्य श्रुतार्थापत्त्या साह। तयोश्चेति। तयोरेकब्रह्माभेदश्रवणादेकत्वं

तर्कोऽपि स्वविषयादन्यत्राप्रतिष्ठितः स्यात् यथा धर्माधर्मयोः। किमतो यद्येवमत इदमयुक्तं। यत्प्रमाणान्तरप्रसिद्धोऽर्थः श्रुत्या बाध्यत इत्युच्यते। प्रसिद्धो ह्ययं भोक्तृभोग्यविभागो लोके। भोक्ता चेतनः शारीरः भोग्याः शब्दादयो वि

षया इति यथा भोक्ता देवदत्तो भोज्य ओदन इति। तस्य च विभागस्याभावः प्रसज्येत। यदि भोक्ता भोग्यभावमापद्येत। भोग्यं वा भोक्तृभावमा

पद्येत। तयोश्चेतरेतरभावापत्तिः परमकारणाद्ब्रह्मणोऽनन्यत्वात्प्रसज्येत। न चास्य प्रसिद्धस्य विभागस्य बाधनं युक्तं। यथा चाद्यत्वे भोक्तृ

भोग्ययोर्विभागो दृष्टः। तथातीतानागतयोरपि कल्पयितव्यः। तस्मात्प्रसिद्धस्यास्य भोक्तृभोग्यविभागस्याभावप्रसंगादयुक्तमिदं ब्र

ह्मकारणतावधारणमिति चेत्कश्चिच्चोदयेत्तं प्रति ब्रूयात्॥ १८

कल्प्यते एकस्मादभिन्नयोर्भेदे एकस्यापि भेदापत्तेः ततश्च भेदो बाध्येतेत्यर्थः। इष्टापत्तिं वारयति। न चास्येति। श्रुतेर्मानार्थत्वेन स्वार्थकारणत्वा

न्निरपेक्षप्रत्यक्षेण मानबाधो न युक्त इत्यर्थः। ननु विभागस्याधुनिकत्वादनाद्यद्वैतश्रुत्या बाध इत्यत आह। यथेति। अतीतानागतकालौ भेदादिवि

भागाश्रयौ कालत्वाद्वर्तमानकालवदित्यनुमानाद्विभागोऽनाद्यनंत इत्यर्थः॥

एवंप्राप्तेपरिहारमदृष्टांतेनापाततः सिद्धांतमाह॥ स्याल्लोकवदिति। दृष्टांतेपि कथमेकसमुद्राभिन्नानां परिणामानां मिथो भेदः कथं वा
तेषां भेदे सत्येकस्मादभिन्नत्वमिति शंकां न हि दृष्टेनुपपन्नमिति रीत्यभिमानेनाह। नचेति। एवं भोक्तृभोग्ययोर्मिथो भेदो ब्रह्माभेदश्चेत्याह। एवमि

स्याल्लोकवदिति। उपपद्यत एवायमस्मत्पक्षेपि विभागः एवं लोके दृष्टत्वात्। तथाहि। समुद्रादुदकात्मनोऽनन्यत्वेपि तद्विकाराणां फेन
वीचीतरंगबुद्बुदादीनामितरेतरविभाग इतरेतरसंश्लेषादिलक्षणश्च व्यवहार उपलभ्यते। न च समुद्रादुदकात्मनोऽनन्यत्वेपि फेनतरं
गादीनामितरेतरभावापत्तिर्भवति। न च तेषामितरेतरभावानापत्तावपि समुद्रात्मनोऽन्यत्वं भवत्येवमिहापि॥ न च भोक्तृभोग्ययोरित
रेतरभावापत्तिः। न च परस्माद्ब्रह्मणोऽन्यत्वं भविष्यति। यद्यपि भोक्ता न ब्रह्मणो विकारः। तत्सृष्ट्वा तदेवानुप्राविशदिति स्रष्टुरेवाविकृत
स्य कार्यानुप्रवेशेन भोक्तृत्वश्रवणात्। तथापि कार्यमनुप्रविष्टस्यास्त्युपाधिनिमित्तो विभागः आकाशस्येव घटाद्युपाधिनिमित्तः॥ ॥

हेति। जीवस्य ब्रह्मविकारत्वाभावात् दृष्टांतवैषम्यमिति शंकते। यद्यपीति। औपाधिकं जन्मास्तीति तरंगादिसाम्यमाह। तथापीति विभागो जन्म
यद्वत्तथापीतिशब्देनैवोक्तः परिहारः। ननु भोक्तुः प्रतिदेहं विभागः कथमित्यत आह। कार्यमनुप्रविष्टस्येति॥ ॥ ॥

भोक्त्राधिकविभागे फलितमुपसंहरति। इत्यत इति। एकब्रह्माभिन्नत्वेपि भोक्त्रादेस्तरंगादिवद्भेदांगीकारान्न द्वैतमानेनाद्वैतसमन्वयस्य विरोध इ-
त्यर्थः। एतस्मिन्नेव पूर्वपक्षे विवर्तवादेन मुख्यसमाधानमाह। तदनन्यत्वमिति समानविषमसत्ताकत्वेनैतदुभयोः परिहारयोः परिणामविवर्ताश्रय-
त्वेनार्थभेदमाह। अभ्युपगम्येति। प्रत्यक्षादीनामौत्सर्गिकप्रामाण्यमंगीकृत्य स्थूलबुद्धिसमाधानार्थं परिणामदृष्टांतेन भेदाभेदावुक्तौ संप्रत्यंगीकृ-

इत्यतः परस्मात्कारणाद्ब्रह्मणोऽनन्यत्वेप्युपपद्यते भोक्तृभोग्यलक्षणो विभागः समुद्रतरंगादिन्यायेनेत्युक्तं॥ ॥तदनन्यत्वमारंभणश-
ब्दादिभ्यः॥ अभ्युपगम्य चेमं व्यावहारिकं भोक्तृभोग्यलक्षणं विभागं स्याल्लोकवदिति परिहारोऽभिहितो न त्वयं विभागः परमार्थतोस्ति। य-
स्मात्तयोः कार्यकारणयोरनन्यत्वमवगम्यते। कार्यमाकाशादिकं बहुप्रपंचं जगत्। कारणं परं ब्रह्म। तस्मात्कारणात्परमार्थतोऽनन्यत्वं
व्यतिरेकेणाभावः कार्यस्यावगम्यते कुतः आरंभणशब्दादिभ्यः। आरंभणशब्दस्तावदेकविज्ञानेन सर्वविज्ञानं प्रतिज्ञाय दृष्टांतापेक्षा-
यामुच्यते। यथा सोम्यैकेन मृत्पिंडेन सर्वं मृन्मयं विज्ञातं स्याद्वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यमिति॥ ॥

तं प्रामाण्यं न तत्त्वावेदकत्वात्म व्यावहारिकत्वे स्थाप्यते। तथाच मिथ्याद्वैतग्राहिप्रमाणैरद्वैतश्रुतेर्न बाधः एकस्यां रज्ज्वां दंडस्रगादिद्वैतदर्श-
नादित्ययं मुख्यः परिहार इति भावः। एवमद्वैतसमन्वयस्याविरोधाय द्वैतस्य मिथ्यात्वं साधयति। यस्मात्तयोरिति। तदपेक्षे कार्यकारणत्वमाका-
त इत्यत आह। व्यतिरेकेणेति। कारणात्पृथक्सत्ताशून्यत्वं कार्यस्य साध्यते नैक्यमित्यर्थः। वागारम्भणमात्रं विकारो न कारणात्पृथगस्तीत्येवकारार्थ-

क्तिं योजयति। एतदुक्तमिति। आरंभणशब्दार्थमाह। पुनश्चेति। अपागात् अग्नेरग्नित्वमपगतं कारणमात्रत्वात्। त्रीणि तेजोबन्नानां रू
पाणि रूपत्रयमात्रलक्षणानि सत्यं। तेषामपि सन्मात्रत्वात्सर्वं देवादि ध्यत्तदसत्मित्यभिप्रायः। जीवेन गतो ब्रह्मात्मत्वे प्रतिज्ञाबाध इत्याह। नन्वन्यथेति। त

एतदुक्तं भवति एकेन मृत्पिंडेन परमार्थतो मृदात्मना विज्ञातेन सर्वं मृन्मयं घटशरावोदंचनादिकं मृदात्मताविशेषाद्विज्ञातं भवेत्।
यतो वाचारंभणं विकारो नामधेयं वाचैव केवलमस्तीत्यारभ्यते विकारो घटः शराव उदंचनं चेति। न तु वस्तुवृत्तेन विकारो नाम कश्चिदस्ति
। नामधेयमात्रं ह्येतदनृतं मृत्तिकेत्येव सत्यमिति। एष ब्रह्मणो दृष्टांत आम्नातः तत्र श्रुताद्वाचारंभणशब्दाद्दार्ष्टांतिकेऽपि ब्रह्मव्यतिरेकेण
कार्यजातस्याभाव इति गम्यते। पुनश्च तेजोबन्नानां ब्रह्मकार्यतामुक्त्वा तेजोबन्नकार्याणां तेजोबन्नव्यतिरेकेणाभावं ब्रुवता अपागादग्ने
रग्नित्वं वाचारंभणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यमित्यादिना। आरंभणशब्दादिभ्य इत्यादिशब्दादैतदात्म्यमिदं सर्वं तत्सत्यं स
आत्मा तत्त्वमसि। इदं सर्वं यदयमात्मा। ब्रह्मैवेदं सर्वं। आत्मैवेदं सर्वं। नेह नानास्ति किंचनेत्येवमाद्यप्यात्मैकत्वप्रतिपादनपरं वचनजातमुदा
हर्तव्यं। न चान्यथा एकविज्ञानेन सर्वविज्ञानं संपद्यते॥ तस्माद्यथा घटकरकाद्याकाशानां महाकाशानन्यत्वं। यथा च मृगतृष्णिकोदकादी
नामूषरादिभ्योऽनन्यत्वं। दृष्टनष्टस्वरूपत्वात्स्वरूपेणानुपाख्यत्वात्। एवमस्य भोग्यभोक्त्रादिप्रपंचजातस्य ब्रह्मव्यतिरेकेणाभाव इति द्रष्ट
व्यं॥

मोरनन्यत्वेऽकमेण दृष्टांतावाह। तस्माद्यथेति॥ प्रतिज्ञावृत्तादिलिप्यर्थः। दृष्टं प्रातीतिकं नष्टमिति संपन्नस्वरूपं तद्रूपेणानुपाख्यत्वात् स्मृ

स्मृत्यभावादेतत्सत्यमिति संबंधः॥

सू॰भा॰र॰ शुद्धाद्वैतं स्वमतमुक्त्वा भेदाभेदमतमुत्थापयति। नन्विति। अनेकाभिः शक्तिभिस्तदधीनप्रवृत्तिभिः परिणामैर्युक्तमित्यर्थः। भेदाभेदम
१९ तेऽसर्वव्यवस्थासिद्धिरसंतानं द्वैतज्ञानबाधकस्याभिमानः। दूषयति। नैवं स्यादिति। एवकारवाचारंभणशब्दाभ्यां विकारसत्यत्वनिषेधात्परिणाम
वादः श्रुतिबाह्य इत्यर्थः। किंच संसारस्य सत्यत्वे तद्विशिष्टस्य जीवस्य ब्रह्मत्वोपदेशो न स्यादित्याह। स आत्मेति। एकत्वज्ञानकर्मसमुच्च

नन्वनेकात्मकं ब्रह्म यथा वृक्षोऽनेकशाखः एवमनेकशक्तिप्रवृत्तियुक्तं ब्रह्म। अत एकत्वं नानात्वं चोभयमपि सत्यमेव। यथा वृक्ष इत्ये
कत्वं शाखा इति नानात्वं यथा च समुद्रात्मनैकत्वं फेनतरंगाद्यात्मना नानात्वं यथा च मृदात्मनैकत्वं घटशरावाद्यात्मना नानात्वं। तत्रैकत्वां
शेन ज्ञानान्मोक्षव्यवहारः सेत्स्यति नानात्वांशेन तु कर्मकांडाश्रयौ लौकिकवैदिकव्यवहारौ सेत्स्यत इति। एवं च मृदादिदृष्टांता अनुरू
पा भविष्यन्तीति। नैवं दात्म्यमिदं सर्वं तत्सत्यमिति परमकारणस्यैवैकस्य सत्त्वावधारणात्। स आत्मा तत्त्वमसि श्वेतकेतो इति च शारीर
स्य ब्रह्मभावोपदेशात्। × स्यान्मृत्तिकेत्येव सत्यमिति प्रकृतिमात्रस्य दृष्टान्ते सत्यत्वावधारणात् वाचारंभणशब्देन च विकारजातस्यानृतत्वाभि
धानात्। दार्ष्टान्तिकेऽप्यैत × स्वयं प्रसिद्धं ह्येतच्छारीरस्य ब्रह्मात्मत्वमुपदिश्यते न यत्नान्तरप्रसाध्यं। अतश्चेदं शास्त्रीयं ब्रह्मात्मत्वमवगम्य
मानं स्वाभाविकस्य शारीरात्मत्वस्य बाधकं संपद्यते रज्ज्वादिबुद्धय इव सर्पादिबुद्धीनां॥

यता ध्यमित्युपदेशार्थवत्त्वाशंकासेतीति पदविरोधान्नैकत्वमित्याह। स्वयमिति। अतस्तत्त्वज्ञानबाध्यत्वात्संसारित्वं मिथ्येत्याह। अतश्चेति। स्वतः सिद्धे

ब्र॰सू॰भा॰र॰ १९

यद्दर्थं व्यवहारार्थं नानात्वं सत्यमिति। तत्किं नानात्वदृष्टिव्यवहारार्थं प्राग्वाः ला द्विदसाहा बाधिते चेति। स्वभावोऽविद्यातया कृतः स्वाभाविकः नाना-
दृष्टं प्रमात्रत्वादिव्यवहारस्याभावान्नानात्वं न कल्प्यमिति स एवः। न द्वितीयः। नानात्वाकृतकल्पितत्वेनान्यत्वेन व्यवहारोपपत्तौ नानात्वस्य सत्यत्वासिद्धेः। पर-
प्रमात्रत्वादिव्यवहारः स सर्वस्मिन्नेकस्मिन्नपि निर्विचेत इति तन्मते स्याद्। न चाप्यमिति। संसारसत्यत्वेन दृश्यस्यापि जीवस्य ब्रह्मत्वेनस्याद्विद भेदयोरैक-
दैकत्वविरोधादतो संसारिणस्य भेदस्य सदा तन्नत्वावगमात्संसारे मिथ्यैवेत्यर्थः। किंच यथा लोके कश्चित्स्वस्य स्वप्नावस्थाभेदैर्गृहीतो न तत्र गाढचित्तम

बाधिते च शरीरात्मत्वेन दाश्रयः समस्तः स्वाभाविको व्यवहारो बाधितो भवति यस्मात्सिद्धं येन नानात्वं ज्ञो परो ब्रह्मत्वेन कल्प्येत। दृष्टं यतिचे
यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येदित्यादिना श्रुत्या स्वात्मत्वदर्शिनं प्रति समस्तस्य क्रियाकारकफललक्षणस्य व्यवहारस्याभावः। न चायं
व्यवहाराभावो यस्माद्विद्योपनिबन्धनो जिधीमत्त इतिव कुमुक्ते। तत्त्वमसीति ब्रह्मात्मत्वाभ्युपगमस्यानवस्थाविशेषनिबन्धनत्वात्। तत्स्फुरदृष्टान्तेन
प्राप्तानामभिसंधस्य स्वबद्धत्वेन स्याभिसंधस्य मोक्षे दर्शयन्नेकत्वमेवैकं पारमार्थिकं दर्शयति। मिथ्याज्ञानविजृम्भितं च नानात्वमुभयमसत्ता
पाहिकं व्यवहारगोचरोऽपि जन्तुरन्यत्राभिसंधत्त इत्येतत्॥

ना परस्तु गच्छतीति सदृश्यते बध्यते च तस्मान्नानात्ववादी बध्यते सत्यवादी येन न दृश्यते मुच्यते च तस्मैतदात्म्यमिदं सर्वमिति एकत्वदर्शी नान्नुच्यत इति
श्रुतदृष्टान्तेनैकत्वं सत्यं नानात्वं मिथ्या साह। तस्करेति। व्यवहारगोचरो नानात्वव्यवहाराश्रयः।

स॰ भा॰ २
२०

नानात्वानिरूपणाप्येकत्वमेव स्यादित्याह । सर्वतोऽपीति । किंचास्मिन्नेव हाभेदप्रतीते जीवस्य ब्रह्मणा भेदज्ञानान्नैव ज्ञाननिवर्त्तते मुक्तिरित्युक्ता सा न युक्ता भे-
दज्ञानस्य भ्रमत्वानभ्युपगमात्स्मर्तव्यः । अभीतरत्वाभावादित्याह । न चास्मिन्निति । वैपरीत्यस्यापि संभवादिति भावः । इदानीं प्रसक्तादिद्वारा मानाभावान्नथा-
नुपपत्त्या नानात्वस्य सत्त्वमिति पूर्वपक्षबीजमुक्त्वा दूषयति । नन्विति साहित्येन एकत्वस्यैकांततः कैवल्यं व्याहन्येरन्नप्रमाणानि सुषुप्तौ उपजीव्यप्रसक्तादिद्व

सर्वतोऽपि सर्वमुपाश्रोतीति एकत्वानेव प्रत्यपतीति च भेदबुद्धिं प्रपद्यते तद्वद्वै यदि तान्न चास्मिन्दर्शने नानात्वे सहृदुपपद्यते । सम्यक्ज्ञानापत्तौ
घस्य कस्यचिन्मिथ्याज्ञानस्य संसारकारणत्वेनानभ्युपगमात् । उभयस्य सत्यतायां हि कथमेकत्वज्ञानेन नानात्वज्ञानमपनुद्यत इत्युच्येत ।
नन्वेकत्वैकांताभ्युपगमे नानात्वाभावात्प्रसिद्धानि लौकिकानि प्रमाणानि व्याहन्येरन् । निर्विषयत्वात् स्थाण्वादिषु पुरुषादिज्ञानानि
। तथा विधिप्रतिषेधशास्त्रमपि भेदापेक्षत्वात्तदभावे व्याहन्येत । मोक्षशास्त्रस्यापि शिष्यशासित्रादिभेदापेक्षत्वात्तदभावे व्याघातः स्यात् ।
कथं चानृतेन मोक्षशास्त्रेण प्रतिपादितस्यात्मैकत्वस्य सत्यत्वमुपप- ॥ सि॰ टी॰ ॥

२०

मागणापदेशं तानभेदपरत्वमुचितमिति भावः । ननु कर्मकारकाणां यजमानादीनां विद्याकारकाणां शिष्यादीनां च कल्पितभेदमाश्रित्य कर्मशा-
नंकांडमोक्षप्रवृत्तेः स्वप्रमेयस्य धर्मादेर्बाधाभावात्प्रामाण्यमव्याहतमित्याशंक्याह । कथंचानृतेनेति । धूलिकल्पितधूमेनानुमितस्य वह्नेरिव प्रमे-
यबाधापत्तेरिति भावः ॥

तत्र द्वैतविषये प्रत्यक्षादीनां प्रामाण्यं व्यावहारिकं प्रामाण्यमुपपद्यत इत्याह। अत्रोच्यत इत्यादिना। सत्यत्वं बाधाभावः बाधो निष्प्रत्व निश्च
यः स्वकृतो मिथ्यात्वेऽपि विकारेषु तन्निश्चयाभावेन प्रत्यक्षादिव्यवहारोपपत्तावुक्तदृष्टांतं विवृणोति। यथा सुप्तस्य प्राकृतस्येति॥ एवं द्वैतप्रमा

अत्रोच्यते। नैष दोषः सर्वव्यवहाराणामेव प्राग्ब्रह्मात्मताविज्ञानात्सत्यत्वोपपत्तेः स्वप्नव्यवहारस्येव प्राक्प्रबोधात्। यावद्धि न स
त्यात्मैकत्वप्रतिपत्तिस्तावत्प्रमाणप्रमेयफललक्षणेषु विकारेष्वनृतत्वबुद्धिर्न कस्यचिदुत्पद्यते। विकारानेव त्वहं ममेत्यविद्ययात्मा
त्मीयेन भावेन सर्वो जंतुः प्रतिपद्यते स्वाभाविकीं ब्रह्मात्मतां हित्वा। तस्मात्प्राग्ब्रह्मात्मताप्रतिबोधादुपपन्नः सर्वो लौकिको वैदिकश्च व्यवहा
रः। यथा सुप्तस्य प्राकृतस्य जनस्य स्वप्न उच्चावचान्भावान्पश्यतो निश्चितमेव प्रत्यक्षाभिमतं विज्ञानं भवति। प्राक्प्रबोधात्। न च प्रत्य
क्षाभासाभिप्रायस्तत्काले भवति तद्वत्। कथं त्वसत्येन वेदांतवाक्येन सत्यस्य ब्रह्मात्मत्वस्य प्रतिपत्तिरुपपद्येत। नहि रज्जुसर्पेण दष्टो म्रिय
ते। नापि मृगतृष्णिकांभसा पानावगाहनादिप्रयोजनं क्रियत इति॥

णानां व्यवहारकालेऽबाधशून्यार्थबोधकत्वं व्यावहारिकं प्रामाण्यमुपपाद्याद्वैतप्रमाणानां वेदांतानां सर्वकालेष्वबाध्यब्रह्मबोधकत्वं
तात्त्विकं प्रामाण्यमुपपादयितुं शंकामनुवदति। कथं त्वसत्येनेति। किं मिथ्यात्वात्सत्यं न जायते किमुत सत्यस्य ज्ञातेनाबाधदृष्ट एव नहि वन्ध्या

ब्रा॰सू॰भा॰२

२१

श्रीसीकृत्यापि दृष्टांतमाह। नैष दोष इति। सर्पेणादष्टस्यापि दष्टत्वभ्रांतिकल्पितविषात्सत्यमरणमूर्छादिदर्शनादसत्यात्सत्यं तज्जायत इत्यत्र वि-
मतिद्धसत्यर्थः। दृष्टांतांतरमाह। स्वप्नेति। असत्यात्स्वप्नोदकादेः सत्यस्य स्वल्पज्ञानस्नानादिज्ञानस्य कार्यस्य दर्शनाद्व्यभिचार इत्यर्थः। यथाश्रुतमात्रमपरि-
कं तेन तत्कार्यमपीति। ज्ञानमर्थं शंकते यतीति। अत्र ब्रूम इत्यादिना। स्वप्नगतिर्हस्तिः सत्यादिव्यस्तसत्याभिमातिप्रातिभासिकस्वप्नदृष्टवस्तुनः फलं चैतन्यं वाच्य-
स्वभिव्यक्तमवगतिरूपार्थः। प्रसंगाद्देहात्मवादोऽपि निरस्त इत्याह। एतेनेति। स्वप्नद्रष्टुरवगतेः स्वप्नदेहधर्मत्वेऽस्थितस्यानपाताद्द्रष्टुः स्वप्नोऽवगत इत्यु

नैष दोषः। शंकाविषादिनिमित्तमरणादिकार्योपलब्धेः। स्वप्नदर्शनावस्थस्य च सर्पदंशनोदकस्नानादिकार्यदर्शनात्। तत्कार्यमप्यनृत-
मेवेति चेत् ब्रूयात्। अत्र ब्रूमः। यद्यपि स्वप्नदर्शनावस्थस्य सर्पदंशनोदकस्नानादिकार्यमनृतं तथापि तदवगतिः सत्यमेव फलं। प्रतिबुद्ध-
स्याप्यबाध्यमानत्वात्। नहि स्वप्नादुत्थितः स्वप्नदृष्टं सर्पदंशनोदकस्नानादिकार्यं मिथ्येति मन्यमानस्तदवगतिमपि मिथ्येति मन्यते
कश्चित्। एतेन स्वप्नदृशोऽवगमस्याबाधनेन देहमात्रात्मवादो दूषितो वेदितव्यः। तथा च श्रुतिः। यदा कर्मसु काम्येषु स्त्रियं स्वप्नेषु पश्यति। समृ-
द्धिं तत्र जानीयात्तस्मिन्स्वप्ननिदर्शने इति। समृद्धिं तत्र जानीयात्स्य असत्येन स्वप्नदर्शनेन सत्यफलाः समृद्धेः प्राप्तिं दर्शयति॥ ॥

चाभिहितावर्तं गतिप्रतिसंधानेन स्यात्। अतो देहभेदेऽपि अनुसंधानदर्शनाद्देहादन्योऽनुसंधातेत्यर्थः। असत्यात्सत्यस्य ज्ञानं न जायत इति २१
द्वितीयप्रतिपन्नस्यश्रुत्या व्यभिचारमाह। तथा च श्रुतिरिति। न च स्त्रियो मिथ्यात्वेऽपि तद्दर्शनात्सत्यादेवसत्याः सत्यफलःसमृद्धेर्ज्ञानमिति वाच्यं। विषयाबा-
धितत्वेन दर्शनस्यापि मिथ्यात्वात् अकृतपि सत्ये ज्ञानमिथ्यात्वे तदनुगतत्वेन तस्मात् ज्ञानस्य भवावृत्तेति भावः॥ ॥ ॥

असत्वस्य स्वेष्टस्य ज्ञानमुक्त्वा निष्टस्य ज्ञानमाह। तथेति। असत्वस्य ज्ञाने दृष्टांतांतरमाह।। तथा ऽक्कारादीति। रेखात्मककारत्वादिभ्रांत्या
सत्याकारादयो ज्ञायंत इति प्रसिद्धमित्यर्थः। एवमसत्सात्वस्य जन्मो ज्ञाप्य दर्शयित्वाकाधितत्समिति निषेधो मन्तव्यः। अन्यतो त्वस्य ज्ञानो ज्ञाप्य
दृत्वं तत्करणागम्यं तद्व्यंकुरलिंगानुमितवह्निवदिति व्याप्तिर्मन्तव्या। तथा च कल्पितानानां पिचेदी तामांसस्य जत्मेको धूमत्वं भवतीति तालिकं मा

तथा प्रसरद्दर्शनेषु केषु चिद्दरिष्टेषु जातेषु न चिरमिव जीविष्यतीति विशारदिका त्वाप्राप्तयुस्त्वमाः पुरुषं प्रत्युक्तं कर्म दत्तं पशुपतिस्मरने
हंतीत्यादिनातेन तेनाहतेनैव स्वप्नदर्शनेन सत्यमरणं सूच्यत इति दर्शयति। प्रसिद्धं चेदं लोके। अन्वयव्यतिरेककुशलानां इष्टं तत्र स्वप्न
दर्शनेन साधागमं सूच्यते इष्टं नाम व्यागमइति। तथा क्वचिद्दिसत्यसूत्रस्यातिप्रसिद्धत्वेऽरेखात्मकतास्य प्रतिपत्तेः। अपि चासत्यमिदं मु
द्रागमात्मैकत्वस्य प्रतिपादकं नातः परं किंचिदाकांक्ष्यमस्ति। यथा हि लोके यजेतेत्युक्ते किं केन कथं इत्याकांक्ष्यते नैवं तत्त्वमसीत्युक्ते किं
चिदाकांक्ष्यमस्ति। सर्वात्मैकत्वविषयत्वादवगतेः। सति ह्यन्यस्मिन्नवशिष्यमाणेऽर्थे आकांक्षा स्यात् न त्वात्मैकत्वव्यतिरेकेणावशिष्य
माणोऽन्योऽर्थोऽस्ति यमाकांक्षेत।।

मागमप्रमितिभावः। यदुक्तं एकत्वनानात्वव्यवहारसिद्धये ड्वंमसत्यमिति। तत्राभिदस्मल्लोकसिद्धस्य सर्वफलवदत्ने दविरोधे न सत्यत्व
फल्लनायोगात्। किंच प्रवृत्तिभेरैकदा व्यवहारः स्यात्तदा सा दपि सत्सर्वं। नैवमस्ति एकत्वज्ञानेन सर्वस्य नानात्वस्य निःशेषं बाधि
तस्थुक्ति ज्ञानेन बारजतस्येव तस्याऽप्रिप्फितं सम्मिति।।

ननूपक्रमोऽद्वैते प्रमाणविरोधादेकत्वगतिर्नोपपद्यत इत्यत आह। न चेयमिति। तत्त्विल्लात्मनस्तत्त्वमस्य पितुर्वाक्यात् श्वेतकेतुर्विज्ञातवानिति सांकेत-
सन्दिग्धं श्रुतसामग्री सत्यात्मत्वे तत्पर्यः॥ व्यावहारिकगुरुशिष्यादिभेदमुपजीव्य नामप्रमाणप्रवृत्तेः प्रमाणादिगतं व्यावहारिकप्रामाण्यमुपजी-
व्यं तत्त्वपारमार्थिकैकत्वावगमात् न विरुध्यते। किं तु तत्प्रमाणविरोधादनुपजीव्यं प्रत्यक्षादेस्तात्त्विकं प्रामाण्यं बाध्यत इति भावः। किं चैकत्वावगतेः फलव-

न चेयमवगतिर्नोपपद्यत इति शक्यं वक्तुं। तद्धास्य विजज्ञाविति इत्यादिश्रुतिभ्यः। अवगतिसाधनानां च श्रवणादीनां वेदानुवचनादीनां च विधीयमानत्वात्।
न चेयमवगतिरनर्थिका भ्रान्तिर्वेति शक्यं वक्तुं। अविद्यानिवृत्तिफलदर्शनात्। बाधकज्ञानान्तराभावाच्च। प्राक्चात्मैकत्वावगतेरव्याहतः स-
र्वः सत्यानृतव्यवहारो लौकिको वैदिकश्चेत्यवोचाम। तस्मादन्तिमेन प्रमाणेन प्रतिपादिते आत्मैकत्वे समस्तस्य प्राचीनभेदव्यवहारस्य बाधित-
त्वान्नानेकात्मकब्रह्मकल्पनावकाशोऽस्ति। ननु मृदादिदृष्टान्तप्रणयनात्परिणामवत् ब्रह्म शास्त्रस्याभिमतमिति गम्यते। परिणामिनो
हि मृदादयोऽर्था लोके समधिगता इति॥

प्रमाणान्तरविरोधाद्द्वैतभ्रमो वा स्यादित्यत आह। न चेयमिति। ननु सर्वस्य द्वैतस्य मिथ्यात्वे प्रमाणप्रमेयादिलौकिको व्यवहारः सर्वे
ऽनृतं च सत्यमभवदिति वैदिकश्च कर्मकाण्डप्रामाण्यमेवं सम्भिन्नमनृतमिति तात्कालिकप्रामाण्यव्यवहारस्तथा दीर्घस्वप्नेऽपि स्या-
दित्यप्रदृष्टान्तं स्मारयति। प्रागिति। व्यवहारार्थं नानात्वं सत्यमिति कल्पनमसंगतमिति रूपं हरति। तस्मादिति। नेदं कल्पितं किं तु श्रुतमिति शंकते॥ २२

कार्यकारणयोरनन्यत्वाद्प्रपंचस्यांतेन परिणामित्वेन चलनाः कूटस्थत्वश्रुतिविरोधादिति परिहरति। नेत्युच्यत इति। स एव परिणामित्वं प्रलये
न ह्याहि संचक्रमेणाहि रुद्धमिति दृष्टांतेन संकृते। स्थितीति। कूटस्थस्य कस्यचिदपि विक्रियामानमुक्तं। कूटस्थत्वव्याघातादित्यत आह नेति। कूटस्थ
त्वात्सिद्धिमाशंक्याह। कूटस्थश्चेति। कूटस्थस्य निरवयवस्य एवं रूपत्यागेनावस्थानं तदा तत्कृतपरिणामाभावोऽगात् श्रुतिः। रजतवद्धि कल्पितस्य प्रपंचस्ये
नेत्युच्यते। स वा एष महानज आत्माजरोऽमरोऽमृतोऽभयो ब्रह्म स एष नेति नेत्यात्मा स्थूलमनण्वह्रस्वमित्याद्याभ्यः सर्वविक्रियाप्रतिषेधश्रुतिभ्यो ज
गतः कूटस्थत्वावगमात्। न चैकस्य ब्रह्मणः परिणामधर्मत्वं तद्रहितत्वं च शक्यं प्रतिपत्तुं। स्थितिगतिवत्स्यादिति चेन्न। कूटस्थस्येति वि
शेषणात्। न हि कूटस्थस्य ब्रह्मणः स्थितिगतिवदनेकधर्माश्रयत्वं संभवति। कूटस्थं च ब्रह्म सर्वविक्रियाप्रतिषेधादित्यवोचाम। न च यथा
ब्रह्मणः आत्मैकत्वदर्शनं मोक्षसाधनं। एवं जगदाकारपरिणामित्वदर्शनमपि स्वतंत्रमेव कस्मैचित्फलायाभिप्रेयते। प्रमाणाभावात्।
कूटस्थब्रह्मात्मत्वविज्ञानादेव हि फलं दर्शयति शास्त्रं। स एष नेति नेत्यात्मेत्युपक्रम्याभयं वै जनक प्राप्तोऽसीत्येवंजातीयकं। तत्रैतत्सिद्धं भ
वति। ब्रह्मप्रकरणे सर्वधर्मविशेषरहितब्रह्मदर्शनादेव फलसिद्धौ सत्यां यत्तत्राफलं श्रूयते। ब्रह्मणो जगदाकारपरिणामित्वादि तद्ब्रह्म
दर्शनोपायत्वेनैव विनियुज्यते। फलवत्सन्निधावफलं तदंगमितिवत्। न तु स्वतंत्रं फलाय कल्प्यत इति। न हि परिणामवत्त्वविज्ञानात्परि
णामवत्त्वमात्मनः फलं स्यादिति वक्तुं युक्तं॥
भावः। किंच निष्फलस्य जगतः फलवन्निष्प्रपंचब्रह्मधीशेषत्वेनानुवादान्न सत्यत्वमित्याह। न चेति। यथेत्यादिना तं यथा यथोपासते तदेव भ
वतीति श्रुतेः ब्रह्मणः परिणामित्वविज्ञानात्तत्त्वाप्तिर्दृष्टः फलमित्याशंक्याह। न हीति। परिणामित्वेति। ब्रह्मविदाप्नोति परमिति श्रुतकूटस्थनि
त्यमोक्षफलस्य भवेद्दुःखानित्यपरिणामित्वकस्य माभोगादिति भावः॥

ननु पूर्वं जन्माद्यस्य यत इतीश्वरकारणप्रतिज्ञा कृता अधुना तदनन्यत्वमित्युक्तं तदभेदप्रतिपादनेनेशित्रीशितव्यभेदाभावाज्जगद्धेतोः सा
दितिशंकते। कूटस्थेति। कल्पितद्वैतमपेक्ष्येश्वरत्वादिकं परमार्थतो नन्यत्वमिति सविरोधमाह। नेत्यादिना। अविद्यात्मके चिदात्मनि लीनेना
मरूपे इह बीजं तस्य व्याकरणं स्थूलात्मना सृष्टिस्तदपेक्षत्वादीश्वरत्वादेर्न विरोध इत्यर्थः॥ संगृहीतार्थं विवृणोति। तस्मादित्यादिना। तत्वा

कूटस्थनित्यस्यात्मनोऽस्य कूटस्थब्रह्मात्मवादिन एकत्वैकान्त्यादीशित्रीशितव्याभावे ईश्वरकारणप्रतिज्ञाविरोध इति चेत्। नावि
द्यात्मकनामरूपबीजव्याकरणापेक्षत्वात्। तस्माद्वा एतस्मादात्मन आकाशः संभूत इत्यादिवाक्येभ्यो नित्यशुद्धबुद्धमुक्तस्वरूपात्सर्व
ज्ञात्सर्वशक्तेरीश्वराज्जगज्जनिस्थितिप्रलयाः। नाचेतनात्प्रधानादन्यस्माद्वेत्येषोऽर्थः प्रतिज्ञातो जन्माद्यस्य यत इति। सा प्रतिज्ञा तदवस्थै
व न तद्विरुद्धोऽर्थः पुनरिहोच्यते। कथं नोच्यते तेनात्मनः एकत्वमद्वितीयत्वं च ब्रुवता। शृणु यथा नोच्यते सर्वज्ञस्येश्वरस्यात्मभूते इव
अविद्याकल्पिते नामरूपे तत्त्वान्यत्वाभ्यामनिर्वचनीये संसारप्रपंचबीजभूते सर्वज्ञस्येश्वरस्य माया शक्तिः प्रकृतिरिति च श्रुतिस्मृ
त्योरभिलप्येते। ताभ्यामन्यः सर्वज्ञ ईश्वरः॥ २३

मतोभ्यामिति। नामरूपयोरीश्वरत्वं व कुम्भकारकं जडत्वान्नापीश्वरादन्यत्वं कल्पितस्य पृथक् सत्त्वास्फूर्त्योरभावादित्यर्थः। संस्कारात्मक
नामरूपयोर्बीजं सविकल्पमा ब्रूते। मायेति। नामरूपे चेदीश्वरस्यात्मभूते तर्हि ईश्वरो जडः स्यादत आह। ताभ्यामन्य इति॥ ॥

अत्र सर्वेष्वाकृतस्रोच श्रुतिमाहाम्यकाशाद्युत्पत्तिरित्या। अविद्याद्युपाधिनाकल्पितभेदेन विवक्षानस्येश्वरत्वं भातिविंबभूतानां जीवानां विषमत्वमित्याह।
सच्चलात्मभूतानिनचात्रतालाजीवाभाष्योक्तं इति भूमिभिन्नांबुध्यादिसंघातभेदेन भेदोक्तेः अविद्याप्रतिविंबस्वरूप एव जीवस्फुरतं। परमात्मनस्त्वे

आकाशो वै नाम नामरूपयोर्निर्वहिता ते यदन्तरा तद्ब्रह्मेति श्रुतेः नामरूपे व्याकरवाणि। सर्वाणि रूपाणि विचित्य धीरो नामानि कृत्वाभि
वदन्यदास्ते। एकं बीजं बहुधा यः करोति इत्यादि श्रुतिभ्यश्च। एवमविद्याकृतनामरूपोपाध्यनुरोधीश्वरो भवति। व्योमेव घटकरकाद्युपाध्यनु
रोधि। स च स्वात्मभूतानेव घटाकाशस्थानीयानविद्याप्रत्युपस्थापितनामरूपकृतकार्यकरणसंघातानुरोधिनो जीवाख्यान्विज्ञानात्मनः प्र
तीष्टे व्यवहारविषये तदेवमविद्यात्मकोपाधिपरिच्छेदापेक्षमेवेश्वरस्येश्वरत्वं सर्वज्ञत्वं सर्वशक्तित्वं च न परमार्थतो विद्ययापास्तसर्वोपा
धिस्वरूपे आत्मनि ईशित्रीशितव्यसर्वज्ञत्वादिव्यवहार उपपद्यते। तथा चोक्तं। यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमेति
। यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येदित्यादिना च। एवं परमार्थावस्थायां सर्वव्यवहाराभावं वदंति वेदांताः सर्वे तथेश्वरगीतास्वपि न
कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः। न कर्मफलसंयोगं स्वभावस्तु प्रवर्तते॥

इत्यादि दैत्यनाबेश्वरनिमाहतपाचेति कर्थतामीकर्तृत्वादिकमित्यत आह। स्वभावस्त्विति। अनाद्यविद्यैव कर्तृत्वादिरूपेण प्रवर्तत इत्यर्थः॥

सू·भा·२
२४
भक्ताभक्तयोः पापसुकृते नादत्त इत्यादीश्वरस्य वास्तवमीश्वरत्वमित्यत आह। नादत्त इति। न संहरति सर्वः। तेन स्वरूपज्ञानावरणेन कर्त्ताहमि
त्यभिमाने नियंते तेषां च कर्मणि तिङ्कार्यः सत्कारसंगतत्वात् आह। सत्कारेपीति। न केवलं लौकिकः अनुग्रहार्थं परिणामप्रक्रियापर्यवसिता किं तु पापसत्कार्यं

नादत्ते कस्यचित्पापं न चैव सुकृतं विभुः। अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तव इति परमार्थविरुद्धाभासोक्तिः ज्ञानस्यादि स्ववाहरण
वः प्रदर्श्यते। अव हारण्यक्षोपांतक्तः श्रुतावपीश्वरादिस्य वहारः। एष सर्वेश्वर एष भूताधिपतिरेष भूतपाल एष सेतुर्विधरण एषां लोका
नामसंभेदायेति। तथा चेश्वरगीतास्वपि। ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति। भ्रामयन्सर्वभूतानि यंत्रारूढानि मायया इति। सत्कारेपि
। प्रत्यर्थ्याभिप्रायेणात एव नमत्वमित्याह। अवधारणमिप्रायेण तुल्या श्लोके वदतिमहादमुद्रस्थानीयतां ब्रह्मणः कथयति। अथ मला
त्यायेव प्रपंचं परिणामप्रक्रियां चाऽपनिक्षुणे व्यपासने वृक्षमोस्य तद्दति॥ ॥ भावेवोपलब्धेः॥ इतश्च कारणस्य तत्त्वं
कार्यस्य। यत्कारणे भाव एव कारणस्य कार्येऽनुपलभ्यते नाभावे तद्यथा सत्सु मृदादिषु घटउपलभ्यते। सत्त्वं तत्तु प्रपदः॥

चेत्याह। परिणामप्रक्रियां चेति। तद्रूपं रूपप्रणाधीः परिणामसूद्दीपते सपित कल्पमपधीस्तु विवर्त्तनाभि निरूपं न तदनन्यत्वेऽपलक्षादि
विरोधं परिहृत्यानुमानेनाह। भाव एव निकारणस्य भावेनत्वेऽपलब्धौ च कार्यस्य सत्ताऽनुपलब्धेः कार्यस्यानन्यत्वमिति सूत्रार्थः॥ २४

घटोत्पत्तेः प्राक् सत्त्वोपलब्धिप्रसङ्गात् निमित्तसत्त्वोपलब्धिप्रसक्तात्। प्र इति। असत्त्वेप्ययं हेतुः किं न स्यादित्यप्रयोजकत्वमाशंक्य निरस्यति
नचेति। मृद्घटयोरन्यत्वेन गवाश्वयोरिव हेतुत्वं छिनत्तिः स्यादित्यर्थः। गवाश्वयोर्निमित्तनैमित्तिकेति कुलालाभावादेव भावः। अतो दृष्टान्तेति
नहेतुतानिमित्तादिभावः सिध्यति तेन न सत्त्वानि सर्वान्तरतामाशंक्याह। नचकुलालेति। नचोपादानोपादेयभावेनार्थान्तरता। प्र दृष्टान्ते

नचनिमित्तेनाप्यभावे प्रसत्त्वोपलब्धिर्दृष्टान्तघटयोर्योगः सन्नुगोभाववशयोपलभ्यते॥ नचकुलालाभाव एव घटानुपलम्भस्तोऽस
त्यपि निमित्ततेनैमित्तिकभावः स्यात्। नन्वेवमसत्त्वाभावेऽपि असत्त्वोपलब्धिर्निपतनीयपते। यथाग्न्यभावे धूमस्येति। नेत्युच्यते।
दापितेऽग्नेर्गोपालघटिकादिधारितस्य धूमस्य दृश्यमानत्वात्। अथ धूमं कथाविदवस्थाया विशिष्यतां तद्दृष्टो धूमो नास
त्यग्नौ भवतीति॥

तद्भावाभावेऽपि हेतुसत्त्वात्सत्त्वेनागवाश्ववत् हेतुहेतुमद्भावाभावात्मकोऽतिभावः। कुलालघटयोर्निमित्तादिभावे सत्यप्यसत्त्वात् कुलालसत्त्वनियतोपलब्धि
र्घटस्य नैवेत्यस्य ह्यर्थः। यथाश्रुतस्य तस्य हेतोर्व्यभिचारं शंकते। नन्विति। अग्न्यभावेऽपि धूमोपलब्धिरिति नियमात्मको हेतुस्तत्रेत्या
साह। नेति। अविच्छिन्नमूलेति धीरैरवस्थध धूमेन नियमोऽस्तीति व्यभिचार इत्याशंकते। अथेति॥

शा.सू.भा.२ तद्भावयतिपतमावत्वेसतितद्बुध्यनुरक्तबुद्धिविषयत्वस्यहेतोर्व्यवस्थितत्वान्नव्यभिचार इत्याह। नैवमिति। आलोकबुध्यनुरक्तबुध्याघेरू
२५ व्यभिचारनिराकरणसत्वेनआलोकाभावेपिघटादिरूपसत्वान्नव्यभिचारइत्यत्र माविशेषसामग्रीबुद्धिंविनाप्युपलंभात्तत्रव्यभिचारइत्य
र्थः। तथाचतमोऽकार्यकारणयोर्भावेनसततयानुरक्तांसहकृतामितिभाष्यार्थः। यद्वा तद्भावः सामानाधिकरण्यंतद्विषयकबुद्धिग्राह्यत्वंहेतुंवदा

नैवमपिकूष्मिदोषः। तद्भावानुरक्तांहिबुद्धिंकार्यकारणयोरनन्यत्वेहेतुंवर्णयदानः। नचासावग्निधूमयोर्विद्यते। भावाद्योपलब्धे
रितिवासूत्रं। नकेवलंशब्दादेवकार्यकारणयोरनन्यत्वं। प्रत्यक्षोपलब्धिभावाच्चतयोरनन्यत्वमित्यर्थः। भवतिहिप्रत्यक्षोपलब्धिःका
र्यकारणयोरनन्यत्वे। तद्यथातंतुसंस्थानेपटेतंतुव्यतिरेकेणपटोनामकार्यंनैवोपलभ्यते केवलास्तुतंतवआतानवितानवंतःप्र
त्यक्षमुपलभ्यंते। तथातंतुष्वंशवोंऽशुषुतदवयवाः।।

मः। मृद्घटइतिसामानाधिकरण्यबुद्धिदर्शनादग्निधूमयोरतुल्यदर्शनादित्यर्थः। अनुमानार्थत्वेनसूत्रंव्याख्यायपक्षांतरेणप्रत्यक्षपरतया
व्याचष्टे। भावाच्चेतिएवसूत्रोच्चारणंभगवत्पादस्य इदमनुच्चार्यमित्याकारः नचैकःपटइतिप्रत्यक्षंपटस्यतंतुभ्यःपृथक्सत्वेप्रमाणंअपृथ
क्सत्वात्तत्कमिथ्याकार्यविषयत्वेनाप्युपपत्तेः। अतःआतानवितानसंयोगवंतस्तंतवएवपटइतिप्रत्यक्षोपलब्धेः सत्वादनन्यत्वमित्यर्थः।
पटस्यापरत्वादौबाधितिदृष्टांतिः। तथैसादिनाप्रत्यक्षोपलब्धात तत्कार्यकारणमात्रंपरिशिष्यत इत्यर्थः।। २५

यत्रासत्त्वं नास्तीति तत्कार्यं विमतं कारणादभिन्नं कार्यत्वात्स्वरूपवदित्यनुमेयमित्याह। अनयेति। कारणपरिशेषे प्रमाणादिकं परिशिष्यतां नभवेत्
सत आह। तत्र सर्वेति। ब्रह्मणि विवेकिनां सर्वेषां तासर्पसंकल्पानां देवाद्वितीयं परिशिष्यते न कारणान्तरस्य प्रामाणिकत्वादिति भावः। इदं जगत्सदा

अनपायस्य सोपलब्ध्या लोहितशुक्लकृष्णानि त्रीणि रूपाणि। ततो वाय्वादिमात्रमाकाशमात्रं चेति अनुमेयं। ततः परं ब्रह्मैकमेवाद्वितीयं। त
त्र सर्वप्रमाणानां निष्ठा भवेत्॥ ॥ सत्ताद्वावशेष इत्यत्र कारणात्कार्यस्यानन्यत्वं प्रकरणं प्रभृति सतेः कारणात्मनैव कारसोमत्वमवस्का
लीनस्य कार्यस्य श्रूयते। सदेव सोम्येदमग्र आसीदात्मा वा इदमेक एवाग्र आसीदित्यादाविदं शब्दग्राहि तस्य कार्यस्य कारणेन सामानाधिकर
ण्यात्। अत्र सदात्मना सर्वत्रानुवर्तनेन तत्तत्स्वघटे यथा सिकताप्रसक्तेरनं तस्मात् आगुल्फतेरनन्यत्वादुल्लेखात्प्रत्यक्षमेव कारणात्कार्यमित्य
वगम्यते॥

सैवेति सामानाधिकरण्यमुक्तमस्ति ः शङ्कु कार्यस्य कारणात्मनासत्त्वं अनृतं तदन्यथानुपपत्त्या सत्त्वसाधिर्जगतः कारणादनन्यत्वं इत्याह सत्ता
रः सत्ताद्वैतिष्ठ। सर्वे प्रतिभासमानत्वात् हपत्रपदात्मनेति। घटादिकं शाकुम्भसाधात्मना वर्तितेन तत्तद्स्वघमानत्वात् सामान्यतो अतिरेकेणासिकताप्रसक्तेरवदित्य

ब्र॰ सू॰ भा॰ २

२६

कारणवत्कार्यस्यापि सत्वात्सत्वभेदे मानाभावात्कार्यस्य कारणादभिन्नसत्ताकत्वमिति सत्त्वस्यार्थांतरमाह। यथा चेति। इदानीं सतः कार्यस्य
प्रागुत्तरकालयोः सत्त्वाद्योगात्सत्त्वाव्यभिचारश्च सत्त्वे सर्वानुस्यूतचिन्मात्रमेकं तदभेदेन सतीमस्त्यन घट इति भासमानयोः कार्यकारण
योरनन्यत्वमित्यर्थः। न चैवं घटपटयोरप्येकसत्त्वाभेदादनन्यत्वं स्यादिति वाच्यं वस्तुत एकसत्त्वाङ्गीकारान्नानात्वस्येष्टत्वात्तर्हि मृद्घटयोः

यथा च कारणं ब्रह्म त्रिषु कालेषु सत्त्वं न व्यभिचरत्येवं कार्यमपि जगत्त्रिषु कालेषु सत्त्वं न व्यभिचरति। एकं च पुनः सत्त्वं। अतोऽप्यनन्यत्वं
कारणात्कार्यस्य॥ ॥असद्व्यपदेशान्नेति चेन्न धर्मांतरेण वाक्यशेषात्॥ ॥ननु क्वचिदसत्त्वमपि प्रागुत्पत्तेः कार्यस्य व्यपदिशति श्रु
तिरसदेवेदमग्र आसीदिति। असद्वा इदमग्र आसीदिति च। तस्मादसद्व्यपदेशान्न प्रागुत्पत्तेः कार्यस्य सत्त्वमिति चेत्। नेति ब्रूमः। नह्य
यमत्यंतासत्त्वाभिप्रायेण प्रागुत्पत्तेः कार्यस्यासद्व्यपदेशः। किं तर्हि व्याकृतनामरूपत्वाद्धर्माद्व्याकृतनामरूपत्वं धर्मांतरं तेन धर्मांतरेणा
यमसद्व्यपदेशः प्रागुत्पत्तेः सत एव कार्यस्य कारणरूपेणानन्यस्य। कथमेतदवगम्यते। वाक्यशेषात्। यदुपक्रमे संदिग्धार्थं वाक्यं तच्छे
षान्निश्चीयते। इह च तावदसदेवेदमग्र आसीदित्यसच्छब्देनोपक्रमे निर्दिष्टं यत्तदेव पुनः तच्छब्देन परामृश्य सदिति विशिनष्टि। त
सदासीदिति॥

को विशेषः तादात्म्यमिति चेन्न; यद्यपि ततः सर्वत्र सत्तैक्येऽपि घटपटयोर्भेदेन सत्ताया अभिन्नत्वात् तादात्म्यं कार्यकारणयोर्भेदस्यासत्त्वान्नेदकत्वाभा
वादभिन्नसत्ताकत्वं तादात्म्यमिति विशेषः। उक्तं कार्यस्यापि कारणात्मना सत्त्वमसिद्धमित्याशंक्य समाधत्ते। असदिति। आक्षः शार्करउपक्रमा
दित्युपक्रमेऽपि नाकांक्षा इति संदेहे तेनैव तमितिवाक्यशेषात् एतेनेति यथा निश्चयः एवमत्रापि तत्सदिति वाक्यशेषात्तन्निश्चयः इत्यर्थः॥ ॥

२६

आसीदित्यतीतकालसंबंधोक्तेरस्यासदप्याकृतमेव पुनरस्य समभिव्याहा। असतश्च पूर्वोपरेति। उक्तस्यार्थं वाक्यान्तरेति दिङ्गा लसदाइति॥ किमसाग्रात्वं
विशेषणं अस्यस्मास्संभवतीतिभावः। सत्ताभावस्य तयोर्हेतुतरमाह सत्कारः॥ युक्तेरिति दध्याद्यर्थीभासीरादेः प्रवृत्तस्य चानुपपत्तिर्युक्तिः तस्याकार्य
स्याकारणात्मत्वेन सत्वासिध्यतीत्यर्थः। असतो विक्रायं सततस्मादसतः कारणत्वविघातत्र प्रवृत्तिरित्यन्यथोपपत्तिमाशंक्याह। अविशिष्टे

असतश्च पूर्वापरकालासंबंधासासीदित्यनुपपत्तेश्च। असदेवेदमग्र आसीदित्यत्रापि तदात्वानं स्वयमकुरुतेति वाक्यशेषेण विशेषणा
त्वात्संतात्सत्वं। तस्मादुर्मीतेरौपचारिकमसदपदेशः प्रागुत्पत्तेः कार्यस्य। नामरूपव्याकृतं हि वस्तु सच्छब्दार्हं लोके प्रसिद्धं। अतः प्राङ्नामरू
पव्याकरणादसदिवासीदित्युपचर्यते॥ ॥युक्तेः शब्दान्तराच्च॥ युक्तेः प्रागुत्पत्तेः कार्यस्य सत्वमनन्यत्वं च कारणादवगम्यते। शब्दां
तराच्च। युक्तिस्तावद्वर्ण्यते। दधिघटरुचकाद्यर्थिभिः प्रतिनियतानि कारणानि क्षीरमृत्तिकासुवर्णादीन्युपादीयमानानि लोके दृश्यंते।
नहि दध्यर्थिभिः मृत्तिकोपादीयते। न घटार्थिभिः क्षीरं तदसत्कार्यवादे नोपपद्येत। अविशिष्टे हि प्रागुत्पत्तेः सर्वस्य सर्वत्रासत्वे कस्मा
त्क्षीरादेव दध्युत्पद्यते। न मृत्तिकायाः मृत्तिकाया एव च घटोऽस्य पद्यते न क्षीरात्॥ ॥ ॥ ॥

दिहेति। असतः उत्पत्त्यभावादुत्पत्तौ वा सर्वस्मात्सर्वोत्पत्तिप्रसंगात्तत्तदुपादानविशेषोपेक्षत्वतिर्नस्यादित्यर्थः। तदुक्तं सांख्यवृद्धैरसदकरणा
दुपादानग्रहणात्सर्वसंभवाभावात् शक्तस्य शक्यकरणात्कारणभावाच्च सत्कार्यमिति। शक्तस्य कारणस्य शक्यकार्यकारित्वाच्छक्तिविशिमस्य

कार्यस्य सत्वमसिद्धं कारणे ... ॥

कार्यस्यासत्त्वेपि कुतश्चिदतिशयात्प्रवृत्तिनियमोपपत्तिरिति शंकते । अथेति । अतिशयः कार्यधर्मः कारणधर्मो वा । आद्ये धर्मिणोऽनागतावस्था
रूपस्य कार्यस्य सत्त्वं दुर्वारमित्याह । तस्यैवातिशयवत्त्वादिति । द्वितीयेपि कार्यसत्त्वमापातीत्याह । शक्तिश्चेति । कार्यकारणभावमस्मात्कार्यवदसतीवा

अथापि विशिष्टेपि प्रागसत्त्वे क्षीरएवदध्नः कश्चिदतिशयो नत्वन्तिकानां । स्वतिकापामेवघटस्य कश्चिदतिशयोनक्षीरस्येत्युच्येत ।
तर्हि अतिशयवत्त्वात्प्रागवस्थायाः असत्कार्यवादहानिः सत्कार्यवादसिद्धिश्च । शक्तिरूपस्य कारणस्य कार्यनियमार्थं कल्प्यमानानाम्
ऽसती कार्यं नियच्छेत् । असत्त्वाविशेषादसत्त्वाविशेषाच्च । तस्मात्कारणस्यात्मभूता शक्तिः शक्तेश्चात्मभूतं कार्यं । अपि च कार्यकार
णयोरैक्यगुणादीनां च भाननहि घटवद्दव्यवस्थापना तादृत्स्यमभ्युपगंतव्यं॥ ॥ ॥ ॥ ॥

शक्तिनैकार्यनियामिका यस्य कस्यचित्स्यपुनरसंगस्य वा नियामकत्वप्रसंगादन्यत्सामर्थ्यैः शक्तावसत्त्वाविशेषात्तस्मात्कारणात्म
नालीनैकार्येनैवाभिव्यक्तिनियामकत्वमाह शक्तिरिति लेषः ततः सत्कार्यसिद्धिरित्यर्थः । किंच कार्यकारणयोरभेदेऽन्तर्यद्भेदे मिश्रौ संप्रतिपत्तिमे

तयोरस्तत्वेऽपि समवायस्वीकारात् तथा चानुद्धिर्निर्देतीलाङ्गुकु समवायप्रसङ्गमति। समवायेति। समवायः समवायिभिः संबन्धेन वा आधेयसंबंधः
किं समवायः स्वरूपमात्रेण समवायानवस्था हि तीयेन्द्रियः सोऽपि स्वरूपसंबंधादिनोपपत्तेः समवायासिद्धिः असंबद्ध इति पक्षे दो
षमाह अनभ्युपगम्यमान इति। द्रव्यगुणादीनां विशिष्टधीविरहप्रसङ्गः असंबद्धस्य विशिष्टधीनियामकत्वाभावो गादिसम्बन्धः॥ विशिष्टधीनि
यामको हि संबंधः न तस्य नियामकान्तरापेक्षा अनवस्थानात्। स्वपरनिर्वाहकः समवाय इति शंकते। अपीति। संबध्यते स्वस्य संबंधि

समवायकस्तनामामपि समवायस्य समवायिभिः संबंधेऽभ्युपगम्यमाने तस्य तस्यास्मोन्यः संबंधः कल्पित स्यात् इत्यनवस्थाप्रसं
गोऽनभ्युपगम्यमाने वा विशिष्टप्रसंगः। अथ समवायः स्वयं संबंधरूपत्वादनपेक्ष्यैवान्यं संबंधं संबध्येत। संयोगोऽपि तर्हि स्वयं
संबंधरूपत्वादनपेक्ष्यैव समवायं संबध्येत॥

नन्वविशिष्टधियं करोतीत्यर्थः। प्रतीतिर्यथा दृष्टमति। संयोगोपीति। यत्तु गुणत्वात् संयोगस्य समवायापेक्षा न स्वसंबंधत्वादिति तन्न।
धर्मत्वात् समवायस्यापि संबंधान्तरापत्तेरसंबद्धस्यान्यत्वस्य गोधर्मत्वादर्शनात् किंच निष्प्रयत्वाद्गो गुणादिति श्रुतिस्मृत्यादिषु व्यवहारादि
ष्टधर्मो गुण इति परिभाषया समवायस्यापि गुणत्वाच्च जातिविशेषो गुणत्वमिति परिभाषा तु समवायसिद्ध्युत्तरकालीना। नित्यानेकसमवे
तो जातिरिति तावता न समवायवृत्तावधीनस्यात् अतः समवायासिद्धेः प्राक् संयोगस्य गुणत्वमसिद्धमिति दिक्॥ ॥ ॥

स·भा·२ किंच प्रतीत्यनुसारेण वस्तुस्थितौ कार्यमन्यथा योगो प्रतीतेरन्यथा आलंबननिमित्तमपि सुवचत्वात् तथाच यथा घट इति अभेदप्रतीतेरभेद एव सत्कार्यैः।
२८ ताभ्यांश्च संतति भिन्नस्य समवायस्य तन्नियामकत्वात् भवादित्याह। तादात्म्येति। एवं प्रतीत्यनुसारेणाकार्यस्य कारणेन नामतत्वे स्वरूपेणानुमित्या
त्वमित्युक्तं। एतन्निरूपणात्तचतस्मिन्निष्पाल्यमित्याह। कथं चेति। तंत्राद्य मन्त्रूषाय यविनः पटादेस्तंत्वादिष्ववयवेषु वृत्तित्वाद्विस्वरूपेणाध्यंजिनताव

तादात्म्यप्रतीतेश्चाद्रव्यगुणादीनां समवायकल्पना। तथैकं कथं चैकार्यमयपवृत्तिः संकारणेष्ववयवेष्वेषु वर्तमानं वर्तेत किं समस्तेष्व
वयवेषु वर्तेतोत प्रत्येकमवयवं प्रतिनाद्यः समस्तेषु वर्तते ततो वयव्यनुपलब्धिः प्रसज्येत। समस्तावयवसंनिकर्षस्याशक्यत्वात्। न हि वृद्धे
समस्तेषु आश्रयेषु वर्तमानं वस्त्राश्रयग्रहणेन गृह्यते। अथावयवशः समस्तेषु वर्तेत। तदाप्यारंभकावयवव्यतिरिक्तेनावयवविनोवृय
वाः कल्पेरन्। येरारंभकेष्ववयवेष्ववयवश्योवयवी वर्तेत। कोशमवयव्यतिरिक्तैः स्वैरवयवैरसिः कोशं व्याप्नोति। अथावयवश्चेदंश्यप्रसज्ये
त। तेष्वपि तेष्ववयवेष्ववर्तयितुमन्येषामन्येषामवयवानां कल्पनीयत्वात्॥ २९

यवश इति विकल्पार्थं दूषयति। यदीत्यादिना। व्यासज्यवृत्तिवस्तु प्रत्येकस्मिन्नपर्याप्तं अप्रत्यक्षमेव प्रसज्येत न हि घटादेर्यावदवयवानामप्रत्य
क्षत्वात्प्रत्यक्षत्वं प्रसज्येतेत्यर्थः। द्वितीयं शंकते। अथेति। यथा हस्ते कोशे च प्रत्यवयवशः खड्गो वर्त्तमानो हस्तमात्रग्रहेऽपि गृह्यते। एवमवयवी किंचिद
वयवग्रहेणावयविनो ग्रहसंभवेऽपि तदवयवानामनवस्था स्यादिति दूषयति। तदापीति॥ ॥ ॥

आद्यद्वितीयमुद्राव्यहरूकमाति। अथ यथालक्षणमित्यादिना। एकस्मिन्नतो यत्र त्रिकालेतं तत्तरेवृत्तिर्नस्यात् तत्र वर्तीवृत्तेकल्पकत्तोरित्यर्थः। यथा
युगपदनेकव्यक्तिषु वृत्तावपिजातेरनेकत्वदोषो नास्ति तथा वयविनस्याभ्युपेते। गोत्वेति। जातिवदवयविनो वृत्तिरसिद्धा। अनुभवाभ्यकादिति
परिहरति। नतथेति। दोषांतरमाह। प्रत्येकेति। अधिकरणत्वं वं धापयादेवदत्तः स्वकार्येण व्यापनं ग्रामे ऽस्याप्यवाकूरोति। तथागोत्ववृत्तवीस्यका

अथ यस्य यथकत्वं यैना तदैकत्रव्यापारे ऽत्यन्ताभावाभावः स्यात्। नहि देवदत्तः स्वगृहे सन्निधौ ममानस्तदहरेव पाटलीपुत्रेपि सन्निधी
येत। युगपदनेकवृत्तावनेकत्वप्रसंगः स्यात्। देवदत्तयज्ञदत्तयोरिव स्रुघ्नपाटलीपुत्रनिवासिनोः। गोत्वादिवृत्तावपेकं परिसमा
प्तेनेदोषइतिचेत्। नतथाप्रतीत्यभावात्। यदि गोत्वादिवृत्तावत्येकं परिसमाप्तोवयवी स्यात्। यथा गोत्वं प्रतिव्यक्ति प्रत्यक्षं गृह्यते एवं
यवयवपिप्रत्यवयवं प्रत्यक्षं गृह्येत। नचैवं निमतं गृह्यते। प्रत्येकपरिसमाप्तौ चावयविनः कार्येणाधिकाराणस्य चैकत्वात् अंगे
णापिस्तनकार्यं कुर्यात्। उरसा च पृष्ठकार्यं न चैवं दृश्यते। प्रागुक्तने श्च कार्यस्यासत्त्वेऽपि त्तिरेककानिरास्मिकाचस्यात्। ऽस्योत्पत्तिश्च
नोमनक्रियामासकर्तृकाभवितुमर्हतिगनसादिवत्। क्रियाश्चनानस्यात्। अकर्तृका चेतिविप्रतिषिध्येत॥

यंस्थिरादिशब्दागपुच्छादावपिकुर्यादित्यर्थः। एवंबुध्यनिरूपणादर्थेकार्त्स्न्यं कार्यस्यदर्शितं संप्रसंगस्यायेवाद्दोषांतरमाह। प्रागिति। यथा
घटस्थलतीसपोगेचलनक्रियामसामव्यपत्वरूपं कर्तृत्वं घटस्यभाति। तथा घटोजायतइतिजननक्रियाकर्तृत्वं अनुभूयते। अतोजनिकर्तुः जनेः
प्राक्सत्त्वमावश्यकं। कर्तुरसत्त्वे क्रियामाश्रयमलापत्तेरित्यर्थः। जनेरनुभवसिद्धं विसकर्तृकत्वे क्रियात्वेनानुमाह। उत्पत्तिश्चेति॥ ॥

स्.भा.२
२९

असतो घटस्योत्पत्तौ कर्तृत्वासंभवेऽपि कुलालादेः सत्त्वात्कर्तृत्वमित्याशंक्याह। घटस्य चेति। घटोत्पत्तिर्घटस्य कपालेषूत्पत्तिरित्युक्तदिशा
ति। तथेति। शंकामनूद्य दोषमाह। तथा चेति। अनुभवविरोध इत्यर्थः। उत्पत्तेः भावस्यापि विकृतिपेति स्वमतेन कार्यस्य सत्त्वमानीतं संगतिका
र्यस्यासत्त्वमभ्युपगम्य कारणे समवायः स्वाश्रयसत्ता समवायो चेति तत्किं कमलमाशंकते। अथेति। तन्मतेनापि कार्यस्य सत्त्वमाकल्पकं असतः सं

घटस्योत्पत्तिरूप्यमानानां घटकर्तृका किं तर्हि असत्कर्तृकेति कल्प्या स्यात्। तथा कपालादीनामुत्पत्तिरूप्यमानानामकर्तृकैव कल्प्येत
तथा च सति घटउत्पत्तव्यकेऽपि कुलालादीनि कारणान्यसमर्थं तदुत्पत्ते फलं स्यात्। नचुलोकेऽपि घटोत्पत्तिरिति कुलालादीनामुत्पत्तिमान
त्वमप्रतीयतेऽसत्त्वात्प्रतीतेः॥ अथ स्वकारणसत्तासंबंधएवोत्पत्तिरुत्पत्त्यभावे कार्यस्येति चेत् कथमलब्धात्मकं तस्य संबंधेतुत्तिति रूपस्य
तो हि द्वयोः संबंधः संभवति न सदसतोः सतोर्वा अभावस्य च निरूपाख्यत्वात्सामग्रीति भर्तृहरीकारणमनुपपन्नं सतां हि लोके संबंधग्
हादीनां मर्यादादृष्टो नाभावस्य। न हि वंध्यापुत्रो राजा बभूव प्राक्पूर्णवर्म्मणो भिषेकादित्येवं जातीयके न मर्यादाकरणे न निरूपाख्यो वंध्या
पुत्रो राजा बभूव भवति भविष्यति इति वा विशेष्यते॥

वंधिलामोगादित्याह। कथमिति। अन्वयेवेति दृष्टांतोक्तिः ननु नरशृंगादिवत्कार्यं सर्वदा सर्वज्ञामनुपलभ्यं भवति किं तत्सत्तेः स्फुरत्वं स्यात्तेन तदर्था
सत्त्वमप्येतु सदैवेति सैषाम्यं संबंधित्वोपपत्तिरित्याशंक्याह। अभावस्येति। अभावग्राहकं सत्प्रत्यक्षपरपर्यायत्वे गा॥ असतः कालेन
संबंधात्सफलं न युक्तमित्यर्थः॥

२९

ननु कारकव्यापारादूर्ध्वभाविनः कार्यस्य वंध्यापुत्रतुल्यत्वं प्रसक्तमित्यत आह। यदि चेति। कार्याभावः असत्कार्यमिति पक्षः। इत्युपपादयति तदुप
पत्तिमभिप्रेत्य दिङ्मात्रम्। कुतस्तर्हि निर्णयस्तमाह। वयं त्विति। नासतो विद्यते भाव इति स्मृतेरिति भावः। सत्कार्यवादे कारकवैयर्थ्यं शङ्कते।
न त्विति। सिद्धकारणानपेक्षत्वाच्च कार्यस्य सिद्धत्वमित्याह।। तदेतत्समत्वाच्चेति। अनिर्वाच्यकार्योत्पत्तिकारणस्याभिव्यक्तेः कारकव्यापार इत्यर्थः।
नैष दोष इति। कार्यस्य सत्त्वमिष्टं तत् सांख्यानां सत्कार्यवादे कारकवैयर्थ्यं दोषमापादयति।। अभिव्यक्तेरपि सत्त्वादेवं तदाहिनां व्यवहितं घटं न
यदि च वंध्यापुत्रोऽपि कारकव्यापारादूर्ध्वमभविष्यत् तदुपादानस्य तत्कार्याभावोऽपि कारकव्यापारादूर्ध्वं भविष्यतीति। किं च यं तु प्रकृत मो वंध्या
पुत्रस्य कार्याभावस्य चाभावत्वाविशेषात् यथा वंध्यापुत्रः कारकव्यापारादूर्ध्वं न भविष्यति। एवं कार्याभावोऽपि कारकव्यापारादूर्ध्वं न भ
विष्यतीति। न त्वेवं सति कारकव्यापारो निरर्थकः प्रसज्येत यतो हि शक्तिसिद्धत्वात्कारणस्वरूपसिद्धये न कश्चिद्व्यापार्यते। एवं शक्तिसिद्ध
त्वात् तदनन्यत्वाच्च कार्यस्य स्वरूपसिद्धये न कश्चिद्व्यापार्यते। व्याप्रियन्ते च। अतः कारकव्यापारस्य वैयर्थ्यम् अस्य मते असत्कारणभावः कार्य
स्येति। नैष दोषः। यतः कार्यकारणयोरन्यत्वं न स्यात् तदा कारकव्यापारस्यार्थवत्त्वमुपपद्यते। कार्यकारणयोरपि कारणत्वात्तत्त्व एव।
अनेन भूतस्यानागतस्य च दिक् भावि।।
यभासनचतुरमापाम हिम्नाखमनवद्य याहर्शनं सर्वमुपपन्नं विद्यार्थमात्रे सर्वसम्भवाभावात् शक्तस्य शक्यकरणादित्युक्तं समाधानं समाधानान्तर
वात्। ननु कारणाद्भिन्नस्य देवोऽस्य तदिति समाधानं किं तस्यादि साध्यासम्भव इत्याशङ्क्य इत्याह। कार्यकारणे पीति। अतः कारणादेद्भ
दभेदौ दुर्निरूपस्य सदसद्विलक्षणस्यानिर्वाच्याभिव्यक्तिर्निर्वाच्यकारकव्यापाराणां फलमिति पक्ष एव श्रेयानिति भावः।। ॥ ॥

स्०भा०२ ननु घटपटः स्वपुत्रबुद्धलाभवस्थाविशिष्टोपदेक्ष्यते। तथा च पूर्वमन्यदृश्यः तद्द्रष्टुः दृष्टिकोपवत्त्वाद्दृश्यचदिस्मतस्त्राह। स्वचेति। वस्तुतोऽन्यत्वं सति

भेदः हेतोर्व्यभिचारस्थलं तत्र माह। तथा प्रतिदिनमिति। अस्त्वं पित्रादिदेहस्यावस्थाभेदेऽपि जन्मनाशाभ्यो रमात्मभेदो पुरुषः। दृष्टान्ते तु मृदा

३० दिनाशोऽसति घटादिकं जायत इति जन्मविनाशरूपविरुद्धधर्मवत्त्वात् कोऽपि कारणयोर्भेदो न पुरुष इति शंकते। जन्मेति। कारणस्य नाशाभा

न च विशेषदर्शनमात्रेणैव वस्त्वन्यत्वं भवति। न हि देवदत्तः संकोचितहस्तपादः प्रसारितहस्तपादश्च विशेषेण दृश्यमानो वस्त्वन्य
त्वं गच्छति। स एवेति प्रत्यभिज्ञानात्। तथा प्रतिदिनमनेकसंस्थानानामपि पित्रादीनां न वस्त्वन्यत्वं भवति। मम पिता मम भ्राता मम पुत्र
इति प्रत्यभिज्ञानात्। जन्मोच्छेदानन्तरितत्वात्तत्र युक्तं नान्यत्रेति चेन्न॥ न क्षीरादीनामपि दध्याद्याकारसंस्थानस्य प्रत्यक्षत्वात्। अदृष्टप
मानानामपि वटधानादीनां समानजातीयावयवान्तरोपचितानामंकुरादिभावेन दर्शनगोचरत्वे जन्मसंज्ञा तेषामेवापचयवतामपचय
धर्मणामदर्शनापत्तावुच्छेदसंज्ञा॥

यद्वैलक्षण्यसिद्धिरिति परिहरति। नेति। दधिघृतादिकार्यान्वितत्वेन क्षीरमधादीनां प्रत्यक्षत्वान्नाशासिद्धिरित्यर्थः। ननु पत्रान्तर्यो(?) भेदहेतुत्वसि ३०
द्धावपि पत्रांकुरादौ वटबीजादीनां अन्वयो न दृश्यते तत्र हेतुसत्ता दृश्यत्वमप्रत्यक्षत्वं स्यादित्यत आह। अदृष्टेति। तत्राप्यंकुरादौ बीजावयवयुतानाम
न्यमानत्वादेव जन्मविनाशौ किं त्ववयवान्तरोपचयापचयाभ्यां तद्व्यवहार इत्यर्थः॥ ॥ ॥ ॥

अत्र पचपाचपक्लिंगे न वस्तुभेदानुमानं तयोः सतडसत्तिः सत्येनाश्रयस्याभावं स व्यभिचारमाह॥ तत्रेदमिति॥ किंदेहे पिभेदस्तत्त्वम्
मिथ्यात्वरस्यत्र बाधकमाह मिथ्यादीति। एतेनेति कारणस्य सर्वकार्ये फल्गुपकुर्वन्नेनेसर्वः। स्वपक्षेदोषं परिहरन् परपक्षे प्रसज्जयति। पुष्प

तत्रेदकृजन्मोच्छेदांतरालात्रेदस्ततः सत्वापत्तिः। सतस्त्वा सत्वापत्तिः तथा सति गर्भकालेनजुत्तानशायिनश्चभेदप्रसंगः। तथा चा
ल्पमौर्यं न स्याद्विरोधेपि भेदप्रसंगः पित्रादिस्थूलहारलोपप्रसंगश्च। एतेन सत्यभंगवादः प्रत्युक्तो वेदितव्यः। प्रसन्न पुनः प्रागुत्पत्तेर
सत्कार्ये तस्यानिर्विषयः कारकव्यापारः स्यात्। अभावस्याविषयत्वानुपपत्तेः। आकाशहननमपो जनन्खङ्गाद्येनेकपुधनपुंसि कृत
। समवायिकारणविषयः कारकव्यापारः स्यादिति चेत्। नान्यविषयस्य कारकव्यापारेणान्यनिष्पत्तिप्रसंगात्। समवायिकारण
स्यैवात्मातिशयः कार्यमिति चेत्। न सत्कार्यतापत्तेः। तस्मात् सोपादीयमानद्व्यणुकादिभावेनावतिष्ठमानानि कापालानि तंत
इति न कारणं तत्कार्यं वर्षशतेनापि शक्यं निष्पद्येत॥

पुनरिति। असतः कार्यस्य कारकव्यापाराहितातिशयाश्रयत्वायोगादविषयत्वेपि समवायिकारणे विषयत्वं स्यादिति शंकते। समवायीति। समवा
यिकारणमात्र्यं भिन्नमभिन्नं वेति विकल्प्याद्यं निरस्यति। नेत्यादिना। द्वितीयमाशंक्य आत्मेति। कार्यीभूतकारणा
नन्यत्वमुपसंहरति। तस्मादिति॥

सू॰ भा॰ २
३१

परमकारणानन्यत्वं फलितमाह। तथा च मूलेति। असत्कार्यवादे प्रतिज्ञाबाधः स्यादित्याह। यदि तु प्रागुत्पत्तेरिति। कार्यमुपादानाद्भिन्नं तद्
तथा च तत्कारणमेवांशात्कार्यं तेन तेन कार्याकारेण न तद्व्यतिरिक्तमित्याह स्पष्टत्वं प्रतिपद्यते। एवं युक्तेः कार्यस्य कारणात्मत्वे सर्वं
अनन्यत्वं च कारणाद्दृश्यते। अंशान्तरसंबन्धेन दृश्यते। पूर्वं सत्त्वे सद्रूपे [illegible] नः [illegible] दृष्टत्वात् ततोऽसः सद्रूपदेशी [illegible]
दृष्टान्तरं। स देवसौम्येदमग्र आसीदेकमेवाद्वितीयमित्यादि [illegible] असदेवेदमग्र आसीदित्यादि [illegible]
तः सद्रूपमेवेति आक्षिप्य सत्त्वेन सौम्येदमग्र आसीदित्यवधारणेन तथैव [illegible] कार्यस्य कारणात्मत्वे सद्रूपस्यैव कारणेन
सामानाधिकरण्यस्य प्रमाणतः [illegible] नन्यत्वे प्रसिद्ध्यतः। यदि तु प्रागुत्पत्तेरसत्कार्यं स्यात् [illegible] सद्रूपमानं कारणेन सर्वं स्यात्॥
तदसत्कारणात्स्यात्। तथा मे नाश्रुतं श्रुतं भवतीति प्रतिज्ञापीडेत॥ सत्तान्यत्वानुगते स्थितिं प्रतिज्ञासमर्थयते॥ ॥घटवत्॥ ॥
यथा च संवेष्टितपटो न व्यक्तो दृश्यते। किमयं पटः किमन्यत् द्रव्यमिति स एव प्रसारितो यत्संवेष्टितं द्रव्यं स पट एवेति प्रसारणेनाभिव्य
ज्यते। यथा च संवेष्टनसमये पट इति गृहीतोऽपि न विशिष्टायामविस्तारो गृह्यते। स एव प्रसारणसमये विशिष्टायामविस्तारो गृ
ह्यते। न संवेष्टिततद्रूपाद्भिन्नः पट इति। एवं तन्त्वादिकारणावस्थं पटादिकार्यमव्यक्तं सत्तुरीवेमकुविन्दादिकारकव्यापारादभिव्यक्तं
सद्दृश्यते। अतः संवेष्टितप्रसारितपटन्यायेनैवानन्यत्कारणात्कार्यमिति सूत्रार्थः॥
[illegible] बाष्पानुपलम्भमानत्वात्ततोऽधिकपरिमाणतापत्तेश्च न घटादिचक्रादि [illegible] पटवद्वेति। द्वितीयं दृष्टान्तमभिचारेत्सूत्रयति

यथा च संवेष्टनेति आयामो दैर्घ्यं॥

३१

तत्रैव विलक्षणकार्यकारित्वहेतुमाशंक्य व्यभिचारमाह सूत्रकारः यथा च प्राणादीति॥ एवं जीवजगतोर्ब्रह्मानन्यत्वमतिप्रसिद्धिं विलपि
करणं धर्ममुपसंहरति। अतश्च कृत्स्नस्येति। जीवाभिन्नं ब्रह्म जगत्कारणमिति वदन्तो हि तत्समन्वयो विषयः स पादिताद्दकृत्स्नजगत्तत्वे
यथा च प्राणादि॥ ॥ यथा च लोके प्राणापानादिषु प्राणभेदेषु प्राणायामेन निरुद्धेषु कारणमात्रेण रूपेण वर्त्तमानेषु जीवन
मात्रं कार्यं निर्वर्त्यते। नाकुंचनप्रसारणादिकं कार्यांतरं तेष्वेव प्राणभेदेषु पुनः प्रवृत्तेषु जीवनादधिकमाकुंचनप्रसारणादिकमपि
कार्यांतरं निर्वर्त्यते। न च प्राणभेदानां प्रभेदवतः प्राणादन्यत्वं। समीरणस्वभावाविशेषात्। एवं कार्यस्य कारणादनन्यत्वं। अतश्च
कृत्स्नस्य जगतो ब्रह्मकार्यत्वात्तदनन्यत्वाच्च सिद्धैषा श्रौती प्रतिज्ञा। येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमिति॥ ॥ इतरव्यप
देशाद्धिताकरणादिदोषप्रसक्तिः॥ अन्यथा पुनश्चेतनकारणवाद आक्षिप्यते। चेतनाद्धि ब्रह्मणो जगत्प्रक्रियायामाश्रीयमाणायां हिताकरणा
दयो दोषाः प्रसज्यन्ते। कुतः इतरव्यपदेशात्। इतरस्य शारीरस्य ब्रह्मात्मत्वं व्यपदिशति श्रुतिः। स आत्मा तत्त्वमसि श्वेतकेतो इति प्रति
बोधनात्। यद्वा इतरस्य ब्रह्मणः शारीरात्मत्वं व्यपदिशति। तत्सृष्ट्वा तदेवानुप्राविशदिति स्रष्टुरेवाविकृतस्य ब्रह्मणः कार्यानुप्रवेशेन
शारीरात्मत्वदर्शनात्। अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति च परा देवता जीवमात्मशब्देन व्यपदिशंती न ब्रह्मणो
भिन्नः शारीर इति दर्शयति। तस्माद्यद्ब्रह्मणः स्रष्टृत्वं तच्छारीरस्यैवेति। अतश्चासौ स्वतंत्रः कर्ता सन् हितमेवात्मनः सौमनस्यकरं कुर्यात्।
नाहितं जन्ममरणजरारोगाद्यनेकानर्थजालं। नहि कश्चिदपरतंत्रो बंधनागारमात्मनः कृत्वानुप्रविशति।
तर्हि स्यानिष्टं नरकादिकं मज्जने वेस्वतंत्रचेतनत्वादिलिंगात्मेनविरुध्यते मचेति संदेहे पूर्वोक्तजीवानन्यत्वमुपजीव्य जीवदोषाः ब्रह्मणि प्रसज्येर
न् इति पूर्वपक्षसंगत्यर्हो। तथा च के। इतरव्यपदेशाद्धिताद्हिता पूर्वपक्षे जीवाभिन्ने समन्वयासिद्धिः सिद्धान्ते तत्सिद्धिरिति फलं हिताकरणे

आदिवदेतत्सर्वमापादयति। न च स्वयमित्यादिना। जीवेश्वरयोरभेदे जीवगता दोषाः ब्रह्मणि स्युः ब्रह्मगताश्च सृष्टिसंहारसर्वज्ञत्व
शा॰ स॰ भा॰ २ ादयो गुणा जीवे स्युः न चेष्टापत्तिः जीवस्यास्य शरीरेऽपि स्वं द्वारसामर्थ्यादर्शनादिति मा प्रसिद्ध्येत तत्सूत्रं व्याचष्टे। तुशब्द इत्यादिना। जीवेश्वर
३२ न च स्वयमसंतनिर्मलः सन्नसंतमलिनं देहमात्मत्वेनोपेयात्। कृतमपि कथंचिद्यत् दुःखकरं तदिच्छया जह्यात्। सुखकरं चोपाददी
त स्मरेच्च मयेदं जगद्विचित्रं विरचितमिति। सर्वो हि लोकः स्पष्टं कार्यं कृत्वा स्मरति मयेदं कृतमिति। यथा च मायावी स्वयं प्रसारितां मायामि
च्छयानायासेनैवोपसंहरति। एवं शारीरोऽपि इमां सृष्टिमुपसंहरेत्। स्वमपि तावच्छरीरं शारीरो न शक्नोत्यनायासेनोपसंहर्तुं। एवं हित
क्रियाद्यदर्शनादन्याय्या चेतनात्प्रक्रियेति गम्यते॥ अधिकं तु भेदनिर्देशात्॥ ॥ तुशब्दः पक्षं व्यावर्तयति। यत्सर्वज्ञं सर्वशक्ति ब्रह्म नि
त्यशुद्धबुद्धमुक्तस्वभावं शारीरादधिकमन्यत् तद्वयं जगतः स्रष्टृ ब्रूमः। न तस्मिन्हिताकरणादयो दोषाः प्रसज्यन्ते। न हि तस्य हितं किंचित्कर्तव्य
मस्ति अहितं वा परिहर्तव्यं। नित्यमुक्तत्वात्। न हि तस्य ज्ञानप्रतिबंधः शक्तिप्रतिबंधो वा क्वचिदप्यस्ति। सर्वज्ञत्वात् सर्वशक्तित्वाच्च। शारी
रस्त्वनेवंविधः तस्मिन्प्रसज्यन्ते हिताकरणादयो दोषाः न तु तं वयं जगतः स्रष्टारं ब्रूमः। कुत एतत्। भेदनिर्देशात्। आत्मा वा अरे द्रष्टव्यः
श्रोतव्यो मंतव्यो निदिध्यासितव्यः सोऽन्वेष्टव्यः स विजिज्ञासितव्यः सता सोम्य तदा संपन्नो भवति शारीर आत्मा प्राज्ञेनात्मनान्वारूढः इत्येवं
जातीयकः कर्तृकर्मादिभेदनिर्देशो जीवादधिकं ब्रह्म दर्शयति। नन्वभेदनिर्देशोऽपि दर्शितः तत्त्वमसीत्येवंजातीयकः। कथं भेदाभेदौ विरुद्धौ ३२
संभवेतां। नैष दोषः आकाशघटाकाशन्यायेनोभयसंभवस्य तत्र तत्र प्रतिष्ठापितत्वात्॥ ॥ ॥ ॥ ॥
यो लौकिकं बिंबप्रतिबिंबयोरिव कल्पितभेदांगीकाराद्धर्मव्यवस्थेति सिद्धान्तग्रंथार्थः। यद्विषयं जीवस्य स्रष्टारं ब्रूमः तदा दोषाः प्रसज्यंते न तु तं

किं चाभेदस्तानादृष्टेर्वा दोषा आपाद्यंते स्वर्गं वा नाथ पदस्मात् आह। अपि चेति। उक्तं मिथ्याज्ञानविजृंभितत्वं स्फुटयति। अविद्येति। कर्तृत्वादिदुःखधर्मा
ध्यासिदेहधर्माध्यासं दर्शयति। जन्मेति। द्वितीयमस्याह। अबाधिते त्विति। ज्ञानात् पूर्वं सृष्ट्यादिधर्माणामबाधात् दर्शितभेदेन्वयव्यवस्थोपपत्ते

अपि च यदा तत्त्वमसीत्येवंजातीयकेनाभेदनिर्देशेनाभेदः प्रतिबोधितो भवति अपगतं भवति तदा जीवस्य संसारित्वं ब्रह्मणः स्रष्टृत्वं। सम
स्तस्य मिथ्याज्ञानविजृंभितस्य भेदव्यवहारस्य सम्यक्ज्ञानेन बाधितत्वात् तत्र कुत एव सृष्टिः कुतो वा हिताकरणादयो दोषाः। अविद्याप्रत्युपस्था
पितनामरूपकृतकार्यकरणसंघातोपाध्यविवेककृता हि भ्रांतिर्हिताकरणादिलक्षणः संसारो न तु परमार्थतोस्तीत्यसकृदवोचाम। जन्मम
रणछेदनभेदनाद्यभिमानवत्। अबाधिते तु भेदव्यवहारे सोन्वेष्टव्यः स विजिज्ञासितव्यः इत्येवंजातीयकेन भेदनिर्देशेनावगम्यमानं ब्रह्मणोधि
कत्वं हिताकरणादिदोषप्रसक्तिं निरुणद्धि॥ ॥अश्मादिवच्च तदनुपपत्तिः। यथा च लोके पृथिवीत्वसामान्यान्वितानामप्यश्मनां केचिन्महा
र्हाः मणयो वज्रवैडूर्यादयोन्ये मध्यमवीर्याः सूर्यकांतादयोन्ये प्रहीणाः श्ववायसप्रक्षेपणाः पाषाणाः इत्यनेकविधं वैचित्र्यं दृश्यते यथा
चैकपृथिवीव्यपाश्रयाणामपि बीजानां बहुविधं पत्रपुष्पफलगंधरसादिवैचित्र्यं चंदनकिंपाकादिषूपलक्ष्यते। यथा चैकस्याप्यन्नर
सस्य लोहितादीनि केशलोमादीनि च विचित्राणि कार्याणि भवंति। एवमेकस्यापि ब्रह्मणो जीवप्राज्ञपृथक्त्वं कार्यवैचित्र्यं चोपपद्यत इ
ति। अतस्तदनुपपत्तिः परपरिकल्पितदोषानुपपत्तिरित्यर्थः॥

नेकं चिद्रव्यमित्यर्थः। नन्वेवमेकरूपे ब्रह्मणि कथं जीवेश्वरवैचित्र्यं कथं च तत्कार्यवैचित्र्यमित्यनुपपत्तिं दृष्टांतैः परिहरति सूत्रकारः। अश्मा
दिवच्चेति। किं च कोमलताल्पफलेन तत्कार्यसंस्काररूपानाद्युपाधिभेदाद्वैचित्र्यमिति भावः॥

ब्र॰ सू॰ भा॰ २ सूत्रस्थचकारार्थमाह श्रुतेश्चेति। ब्रह्मजीवान्तरदोषवत् जीवाभिन्नत्वाज्जीववदित्याद्यनुमानं स्वतःप्रमाणनिरवद्यश्रुत्या दिक्कृति बाधितं।
३३ किंच कर्तृत्वभोक्तृत्वादिविकारस्य मिथ्यात्वाज्जीवस्यैव तावद्दोषो नास्ति कुतो बिंबस्थानीयस्य दोषविशेषदर्शितः। परमेश्वरस्य दोषप्रसक्तिः
मतु ब्रह्मणा विचित्रकार्यप्रकृतिः। एकरूपत्वाद्व्यतिरेकेण लक्षितत्वादित्यदिति। तत्र एकरूपेऽस्य मदृष्टा बीजविचित्रदृश्यवत्स्वैवैचित्र्यदर्शनेन स्वाभि

श्रुतेश्च प्रामाण्याद्विकारस्य च वाचारम्भणमात्रत्वात्स्वप्नदृश्यभाववैचित्र्याच्चेत्यभ्युच्चयः॥ ॥उपसंहारदर्शनान्नेति चेन्न क्षीरवद्धि
॥ ॥चेतनं ब्रह्मैकमद्वितीयं जगतः कारणमिति यदुक्तं तन्नोपपद्यते। कस्मादुपसंहारदर्शनात्। इह हि लोके कुलालादयो घटपटादीनां कर्तारो
ऽनेकं दंडसूत्राद्यनेककारकोपसंहारेण संगृहीतसाधनाः सन्तः तत्तत्कार्यं कुर्वाणा दृश्यन्ते। ब्रह्म चासहायं तवाभिप्रेतं। तस्य साधनान्त
रानुपसंग्रहे सति कथं स्रष्टृत्वमुपपद्यते। तस्मान्न ब्रह्म जगत्कारणमिति चेत्॥

चादिस्वर्पः। तस्मात्स्वगतभिन्ने ब्रह्मणि सत्यमपस्याद्विरोध इति सिद्धं। उपसंहारदर्शनात्। असहायस्य ब्रह्मणो जगत्सर्गं ब्रुवन्समन्वयो
विषमः। स किं परमतापं तं न कारणमिति लौकिकन्यायेन विरुध्यते नवेति संदेहे पूर्वमौपाधिकजीवभेदे ब्रह्मणि जीवदोषाननुसक्तं
इत्युक्तं। संप्रति निरुपाधिकं ब्रह्मणः परकादिकं सहकारिणाली नानात्वाभावादिति प्रत्युदाहरणेन पूर्वपक्षमाह उपसंहारेति। चेत

[illegible] ३३

उक्तःस्यात्पस्य क्षीरादेर्व्यभिचार इति सिद्धांतयति। नैषइति। अयं भावः सत्यमेककारणत्वमिष्टमेव विशिष्टस्य अथ्वा रस्यत्तु माप्येवम्समयइति भावे
नाह। कार्यमिति। क्षीरस्याप्यंतं च नादि स्यात् कोप्ली ससहायत्वहेतोर्नव्यभिचार इत्याशंक्य सहायाभावेपि यस्य कस्यचित्परिणामस्य क्षीरे दृष्टत्वा
व्यभिचारतावदस्थ्यमित्याह॥ नन्विलादिना। तर्हि सहायो यथा तत्राह। तामेतइति। ननु ताप्येतेक्षीरं दधिभावापत्तौ अंकापेतइति किमर्थं कल्प्यंते।
नैषदोषः। यतः क्षीरवत् द्रव्यस्वभावविशेषादुपपद्यते। यथाहि लोके क्षीरं जलं वा स्वयमेव दधिहिमभावेन परिणमते न पेक्षते तथा क्षीरम्
धनंतत्पेक्षापि भविष्यति। ननु क्षीरादयोपि दध्यादिभावेन परिणमनमात्रमपेक्षंत एव वा यथा धनं क्षीरादिकं। कथमुच्यते क्षीरवदिति। नैषदो
षः। स्वयमपि हि क्षीरं शीघ्रपातंगी च परिणमनमात्रं ननु भवेत्स्वतापेतेनौष्ण्यादिना दधिभावापत्तिश्च स्वयं दधिभावत्वात्सनतस्यात्मीयोत्कर्ष
दिनापि चलात् दधिभावमापद्यते। न हि ताम्रएकान्तेनौष्ण्यादिना चलादधिभावमापद्यते। साधनसामग्र्या च तस्योत्कर्षो नासंपद्यते। परि
पूर्णं सूक्तिकं तु ग्रस्तं नतस्यान्येन केनचित्स्वरूपतासंपादयितव्या॥
स्वतो सर्वाक्रं क्षीरं सहायेन स्वरूपं क्रियत इति किं न स्यात्तत्राह। यदि चेति। ब्रह्मणः स्वसहायसंपत्तौ किं कार्यमित्यत्राह। साधनेति। सहायचिदे
नान्य ऐक्यरचिदुपकारः क्षीरस्य भवति। तत्रश्रांतवनस्पत्यौष्ण्यादिना तत्र दधिभावत्वानपेक्ष्यौष्ण्यत्वेनतुल्यं। तर्हि शक्तिमंजकोपि तत्सहायाद
त्तरोणावाच्यस्तत्राह। परिपूर्णेति। निरपेक्षतायामुपादानशक्तिकल्पितर्थः॥

स्वदृष्टान्ते श्रौ मानमाह। श्रुतिश्चेति। ननु ब्रह्म न कारणं चेतनत्वे सत्यसहायत्वात्कुलालादिवदिति न क्षीरादौ व्यभिचार इति सूत्र

श्रुतिश्च भवति न तस्य कार्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते। परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया चे
ति। तस्मादेकस्यापि ब्रह्मणो विचित्रशक्तियोगात्क्षीरादिवद्विचित्रः परिणाम उपपद्यते॥ ॥देवादिवदपि लोके॥ ॥स्यादेतत् उपपद्यते
क्षीरादीनामचेतनानामनपेक्ष्यापि बाह्यं साधनं दध्यादिभावः। दृष्टत्वात्। चेतनाः पुनः कुलालादयः साधनसामग्रीमपेक्ष्यैव तस्मै तस्मै
कार्याय प्रवर्तमाना दृश्यन्ते। कथं ब्रह्म चेतनं सदसहायं प्रवर्तेतेति देवादिवदिति ब्रूमः। यथा लोके देवाः पितर ऋषय इत्येवमादयो
महाप्रभावाश्चेतना अपि सन्तोऽनपेक्ष्यैव किंचिद्बाह्यं साधनमैश्वर्यविशेषयोगादभिध्यानमात्रेण स्वत एव बहूनि नानासंस्थानानि शरीरा
णि प्रासादादीनि रथादीनि च निर्मिमाणा उपलभ्यन्ते मन्त्रार्थवादेतिहासपुराणप्रामाण्यात्। तन्तुनाभश्च स्वत एव तन्तून्सृजति। बलाका
चान्तरेणैव शुक्रं गर्भं धत्ते। पद्मिनी चानपेक्ष्य किंचित्प्रस्थानसाधनं सरोऽन्तरात्सरोऽन्तरं प्रतिष्ठते। एवं चेतनमपि ब्रह्मानपेक्ष्य बाह्यं सा
धनं स्वत एव जगत्स्रक्ष्यति॥

व्यावर्त्यशङ्कामाह। स्यादेतदिति। तस्यापि हेतोर्देवादौ व्यभिचार इत्याह। देवादिवदिति। लोकमते शापते ऽर्थः तेनेति लोको मन्त्रार्थवादादिप्रसिद्ध

[illegible]

ननु देवादिशरीराणां न दृष्टान्तेषु शरीरेषु चेतनत्वं नास्ति वृक्षादिकार्यप्रमितौ चेतनप्रयोज्यमिति मर्त्यानां कर्तृत्वेमे घटस्य शरीरं च सहायोऽस्ति। अतो
विशिष्टहेतोर्न व्यभिचार इति शंकते। स्यादित्रिक्रमादिस्पष्टिना व्यभिचारे सतीति परिहरति। तत्प्रति क्रमादिति। अयं दृष्टान्तवैषम्यारम्भः॥ अत्र
हि हेतौ चेतनत्वं स्वंऽकृष्टधीविषयत्वरूपं चिकीर्षात्मापन्नदेहसाधारणं ग्राह्यं। ननु मृद्व्यापारवत्त्वं कुलालदृष्टान्ते साधनवैकल्यापत्तेः। असहाय
सपरिक्रमाघटते देवादयोऽपि न दृष्टाः कार्यकाले क्वचिदृष्टा इति केन अलक्षणानुमानाभावं वृत्ति शरीरमेव यस्य चेतनं देवादीनां शरीरं तत्र दिविभू
मुद्रादेर्नोपादानं। ननु चेतन आत्मा तं तु नास्य चेष्टा इतरजन्तुभक्षणाच्छाला कुडिनतामापद्यमाना तन्तुभवति। वृक्ष्यादा चलनपि लुर
वृक्षवत्ता कर्मयते। पक्षिनिचयचेतनमप्युक्तासत्ये चेतनेनैव शरीरेण सहितं तत्त्वतो न रमुपसर्पति। वृक्षीबध्नस्तं। ननु स्वयमेव चेतनः स
तेनतेषु सर्पतेऽप्याश्रयते। तस्मान्नैते वृक्षाणो दृष्टान्ता इति। तं प्रति श्रुमान्नाप्रदेशः कुलालादिदृष्टान्तवैलक्षण्यप्रमाणाव्यभिचारितत्वात्
यथाहि कुलालादीनां देवानुग्रहस्यानविशेषणः तस्माद्यमेकस्य सामर्थ्यं दृष्टं तथा सर्वेषामेव भवितुमर्हतीति नास्त्येकान्त इत्यभिप्रा १०॥
यं च चेतनस्य सत्वातिरिक्तहेतुमनुमत्वं तदुभयं देवादिषु अस्तीति व्यभिचारः। देहस्य स्वांतःपातित्वे तस्यातिरिक्तत्वाभावात्॥ तथा च कुलाल
वैलक्षण्यं देवादीनां घटादिकार्यैरुत्थानिरिक्ता नपेक्षत्वा हेतुवैलक्षण्यं ब्रह्मणः देहस्याप्यनपेक्षणान्न रदेवादीनां कार्यारंभे कास्येकरूपताप्रसक्तौ। श्रु
मतेऽपि महाभारते। श्रीकृष्णस्य संकल्पमात्रेणैव द्रौपद्याः रपटपरंपरोत्पत्तिः। अतः सिद्धमसहायस्यापि ब्रह्मणः कारणत्वम्॥

सू॰ स॰ भा॰ २

३५ कृत्स्नप्रसक्तिः। क्षीरादिवच्चेतनब्रह्मपरिणामीति भ्रमो सत्कार्यवादे सा सेश्वरा स्त्रुणी विकल्पेन परिणामदूषितेति निरूप्य पूर्वाधिकरणमि
ति पूर्वाधिकरणेनोक्ताधिकरणस्य कार्यत्वं संगतिमाह। चेतनमिति। निरवयवात् ब्रह्मणो जगत्सर्गवदन्यत्वमन्यो ऽपि सकिंपन्निरव
यं चेतनपरिणामीति न्यायेन विरुध्यते न वेति संदेहे विरुध्यत इति पूर्वपक्षफलं संगमयति। कृत्स्नेति। ब्रह्मपरिणामीति वदतां वक्तव्यं ब्रह्म

कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा॥ ॥ चेतनमेकमद्वितीयं ब्रह्म क्षीरादिवद्देवादिवच्चानपेक्षितबाह्यसाधनं स्वयं परिणममा
नं जगतः कारणमिति स्थितं शास्त्रार्थः परिशुद्धये तु पुनराक्षिपति। कृत्स्नप्रसक्तिः। कृत्स्नस्य ब्रह्मणः कार्यरूपेण परिणामः प्राप्नो
ति निरवयवत्वात्। यदि ब्रह्म पृथिव्यादिवत्सावयवमभविष्यत् ततोस्यैकदेशः पर्यणंस्यदेकदेशश्चावास्थास्यत। निरवयवं तु
ब्रह्म श्रुतिभ्यो वगम्यते। निष्कलं निष्क्रियं शान्तं निरवद्यं निरंजनं। दिव्यो ह्यमूर्तः पुरुषः सबाह्याभ्यन्तरो ह्यजः। इदं महद्भूतमनन्तम
पारं विज्ञानघन एव। स एष नेति नेत्यात्मा। अस्थूलमनणु इत्याद्याभ्यः सर्वविशेषप्रतिषेधिनीभ्यः। ततश्चैकदेशपरिणामासंभवात् ३५
कृत्स्नपरिणामप्रसक्तौ सत्यां मूलोच्छेदः प्रसज्येत। द्रष्टव्यतोपदेशानर्थक्यं चापद्येत अयत्नदृष्टत्वात्कार्यस्य तद्व्यतिरिक्तस्य च ब्रह्मणो ऽभावात्॥

निरवयवत्वशब्दव्याकोपो वा॥ अथ सर्वब्रह्मणः परिणामो मा भूत् स्थितिः स्यात् इष्टं अतिरेकं दृष्टान्तेन निवर्तयति। यदि ब्रह्म स्यादिति मा पर्यगात् स्वरूप
रिणामेऽपि अवस्थेदेकदेशश्चावस्थास्यदपरिणतोऽभविष्यत् इत्यत्र श्रुतिभ्योऽपि निरवयवत्वसिद्धेः प्रक्लिष्टतरो ऽयमाह॥ ततश्चेति। यदा परिणाममति
रेकेण मूलब्रह्म नास्ति तदा तत्र द्रष्टव्यत्वोपदेशोऽनर्थकः स्यादिति तेन तात्पर्यमाह। द्रष्टव्येति॥

ब्रह्मणः परिणामात्मना जन्मनाङ्गीकारेऽजोऽमर इति श्रुतिविरोध इत्यत आह। अजत्वादीति। सावयवत्वपक्षमाशंक्य तदुक्तदोषेण परिहरति
। अर्थस्यादिना। परिणामपक्षे दुर्घट इति मदुक्तं तदस्माकं दिष्टमेवेति विवर्तवादं न तिरस्कुर्वन्ति। श्रुतेरिति स्वपक्षे पूर्वोक्तदोषद्वयं नास्तीति सूत्रेण

अजत्वादिशब्दकोपश्च। अथैतद्दोषपरिजिहीर्षया सावयवमेवाभ्युपगम्येत। तथापि ये निरवयवत्वस्य प्रतिपादकाः शब्दाः उदा
हृतास्ते प्रकुप्येयुः। सावयवत्वे चानित्यत्वप्रसंग इति। सर्वथाऽयं पक्षो न घटयितुं शक्यत इत्याक्षिपति। श्रुतेस्तु शब्दमूलत्वात्॥ ॥तु
शब्देनाक्षेपं परिहरति। न खल्वस्मत्पक्षे कश्चिदपि दोषोऽस्ति। न तावत्कृत्स्नप्रसक्तिरस्ति। कुतः। श्रुतेः। यथैव हि ब्रह्मणो जगदुत्पत्तिः श्रू
यते। एवं विकारव्यतिरेकेणापि ब्रह्मणोऽवस्थानं श्रूयते। प्रकृतिविकारयोर्भेदेन व्यपदेशात्। सेयं देवतैक्षत। यथैव हि ब्रह्मणो जगदुत्प
त्तिः श्रूयते। एवं विकारव्यतिरेकेणापि ब्रह्मणोऽवस्थानं श्रूयते। हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे
व्याकरवाणीति। तावानस्य महिमा ततो ज्यायांश्च पूरुषः। पादोऽस्य सर्वा भूतानि। त्रिपादस्यामृतं दिवीति चैवंजातीयकात्। तथा हृदयायतनत्व
वचनात्। सत्संपत्तिवचनाच्च। यदि कृत्स्नं ब्रह्म कार्यभावेनोपयुक्तं स्यात्। सता सोम्य तदा संपन्नो भवतीति सुषुप्तगतं विशेषणमनुपपन्नं
स्यात्। विकृतेन ब्रह्मणा नित्यसंपन्नत्वात्। अविकृतस्य च ब्रह्मणोऽभावात्॥

जगत्प्रादुर्भावयति। तुशब्देनेत्यादिना ईक्षितृत्वेन स्रष्टृत्वेन च स्वस्मिन् प्रकर्तव्यस्य प्रपंचात् भेदोऽस्य सत्त्वलक्षणे तेन कृत्स्नप्रसक्तिरित्याह।
सेयं देवतेति। न्यूनाधिकभावेनापि भेदं कृत्स्नैकदेशत्वेनाह। तावानिति। इतश्चास्त्यविकृतं ब्रह्मेत्याह। तथेति। स वा एष आत्मा हृदीति
श्रुतेरस्ति दृश्यातिरिक्तं ब्रह्मेति सुषुप्तिकाले रूपविशेषणाच्चेत्यर्थः॥

शा॰ सू॰ भा॰ २ लिंगांतरमाहा ॥ तथेंद्रियेति । मृत्स्नादेर्विकारस्येंद्रियगोचरत्वात्तच्च स्वरूपाग्रहणत इत्यादिश्रुतामृत्तिकासत्यमिति धार्मिकान्निनसगोचरत्वे
कृते श्रुतिविकृतत्वं ब्रह्मणेत्यर्थः । कृत्स्नप्रसक्तिर्देशोनोक्तीरक्षाद्वितीयमदोषोऽपिनास्तीत्याह । नचेति ॥ ननु ब्रह्मणः कार्यात्मना व्यक्तिप्रमा
३६ व्यक्तिचेत्तावयवत्वं दुर्वारं निरवयवस्यैकस्य द्विधा सत्तायोगादतो यदि द्विधा भूतं ततः सावयवमिति तर्कविरुद्धं ब्रह्मणो निरवयवत्वमिति चेत्

तथेन्द्रियगोचरत्वप्रतिषेधात् ब्रह्मणो विकारस्य चेन्द्रियगोचरत्वोपपत्तेः । तस्मादस्त्यविकृतं ब्रह्म । न च निरवयवत्वशब्दकोपोऽस्ति श्रु
प्रमाणत्वादेव निरवयवत्वस्याप्यभ्युपगम्यमानत्वात् । शब्दमूलं च ब्रह्म शब्दप्रमाणकं नेन्द्रियादिप्रमाणकं । तद्यथाशब्दमभ्युपगंतव्यं ।
शब्दश्चोभयमपि ब्रह्मणः प्रतिपादयत्यकृत्स्नप्रसक्तिं निरवयवत्वं च । लौकिकानामपि मणिमंत्रौषधिप्रभृतीनां देशकालनिमित्तवै
चित्र्यवशाच्छक्तयो विरुद्धानेककार्यविषया दृश्यंते ॥ ता अपि तावन्नोपदेशमंतरेण केवलेन तर्केणावगंतुं शक्यंते । अस्य वस्तुनः एता
वत्य एतत्सहाया एतद्विषया एतत्प्रयोजनाश्च शक्तय इति । किमुताचिंत्यस्वभावस्य ब्रह्मणो रूपं नविना शब्देन निरूप्येत । तथाचाहुः
पौराणिकाः । अचिंत्याः खलु ये भावा न तांस्तर्केण योजयेत् प्रकृतिभ्यः परं यच्च तदचिंत्यस्य लक्षणमिति । तस्माच्छब्दमूल एवातींद्रि
यार्थयाथात्म्याधिगमः ॥ ॥ ३६

तमजानतः शंकां गूढाभिप्रायमुक्त्वा परिहरति । शब्दमूलत्वं चेति मण्यादिलौकिकानां मन्त्रादृष्टानामपि शक्तिरचिंत्या तद्वच्छब्दैकसमधिगम्यस्य ब्र
ह्मणः किमु वक्तव्यं । अतो ब्रह्मणो निरवयवत्वं द्विधाभावश्चेत्युभयं शब्दप्रमाणत्वादभ्युपगंतव्यं न तर्केण बाधनीयमित्यर्थः ॥ प्रकृतिभ्यः प्रत्यक्षदृष्ट
वस्तुस्वभावेभ्यो यत्परं विलक्षणं केवलोपदेशगम्यं तदचिंत्यस्वरूपमिति स्मृत्यर्थः ॥ ॥ ॥ ॥

स्यान्नायमनवयवो येन शंक्यते । ननु शब्देनापीत्यादिपक्षद्वयं ब्रह्मपरिणामी सेकदेशिनाभिप्रेतं सिद्धान्ततत्त्वमाश्रित्याहदीनानामाशिषति । नन्विति । कृत्स्न
प्रसक्त्यादीनामस्य प्रतिषेधाद्दोषः सम्भवः । ननु ब्रह्मणस्सावयवत्वे निरवयवत्वे च विकल्पासहत्वाद्दोषः । तत्समाधानं स्यादित्याशङ्क्याह । निरवयवत्वे ब्र
ह्मणः प्रकृतित्वश्रुतिविरोधः सावयवत्वे नित्यत्वश्रुतिविरोधः । विकल्पश्च वस्तुन्ययुक्तः । अतः प्रकारान्तरानुपलम्भाच्छ्रुतीनां प्रामाण्यं दुर्घटमि
ननु शब्देनापि न शक्यते विरुद्धोऽर्थः प्रत्याययितुं । निरवयवं च ब्रह्म परिणमते न च कृत्स्नमिति । यदि निरवयवं ब्रह्म स्यान्नैव परिणमे
त । कृत्स्नमेव वा परिणमेत । अथ केनचिद्रूपेण परिणमेत केनचिच्चावतिष्ठेत । रूपभेदकल्पनात्सावयवमेव प्रसज्येत । क्रियाविषये ह्य
तिरात्रे षोडशिनं गृह्णाति । नातिरात्रे षोडशिनं गृह्णातीत्येवंजातीयकायां विरोधप्रतीतावपि विकल्पाश्रयणं विरोधपरिहारकारणं भव
ति । पुरुषतंत्रत्वाच्चानुष्ठानस्य । इह तु विकल्पाश्रयणेनापि न विरोधपरिहारः संभवत्यपुरुषतंत्रत्वाद्वस्तुनः तस्माद्दुर्घटमेतदिति । नैष
दोषोऽविद्याकल्पितरूपभेदाभ्युपगमात् । न ह्यविद्याकल्पितेन रूपभेदेन सावयवं वस्तु संपद्यते । न हि तिमिरोपहतनयनेनानेक इव
चंद्रमा दृश्यमानोऽनेक एव भवति । अविद्याकल्पितेन च नामरूपलक्षणेन रूपभेदेन व्याकृताव्याकृतत्वान्यत्वाभ्यामनिर्वचनीयेन ब्रह्म
परिणामादिसर्वव्यवहारास्पदत्वं प्रतिपद्यते । पारमार्थिकेन च रूपेण सर्वव्यवहारातीतमपरिणतमवतिष्ठते ॥ ॥
तिमिरेत्यादिना दृष्टान्तयति । नैष दोष इति । निरवयवस्य वस्तुनः कूटस्थस्याप्यविद्याकल्पितनामरूपविकारांगीकारात्तद्दुर्घटत्वदोषो ना
स्ति । वास्तवकौटस्थ्यस्य कल्पितविकारासहिष्णुत्वेनाविरोधादित्यर्थः । रूपभेदांगीकारे सावयवत्वं स्यादित्याशंक्याह । न हीत्यादिना ॥

सू॰भा॰२

३७

कृत्स्नप्रसक्तिं निरस्य दोषांतरं निरस्यति। वाचारंभणेति। ननु श्रुतिप्रतिपाद्यस्य परिणामस्य कथं मिथ्यात्वं तत्राह। नचेयमिति। निःप्रपंचब्रह्म
बोधे फलेन सृष्टिरन्यघतेन प्रतिपाद्यते इत्यसकृदावेदितं। अतो विवर्तवादेन कश्चिद्दोषइत्युपसंहरति। तस्मादिति। एकावस्थानाशे नावस्था
तरं परिणामः। यथा दुग्धस्य दधिभावः। पूर्वरूपानुपमर्देनावस्थांतरं विवर्तः। यथा शुक्तेः रजतभावः। तत्र ब्रह्मणो विवर्तोपादानत्वं प्रश्ना। सि

वाचारंभणमात्रत्वाद्अविद्याकल्पितनामरूपभेदस्येति न निरवयवत्वं ब्रह्मणः कुप्यति। नचेयं परिणामश्रुतिः परिणामप्रतिपादनार्था।
तत्प्रतिपत्तौ फलानवगमात्। सर्वव्यवहारहीनब्रह्मात्मभावप्रतिपादनार्था त्वेषा। तत्प्रतिपत्तौ फलावगमात्। स एष नेति नेत्यात्मेत्युप
क्रम्याभयं वै जनक प्राप्तोसीति। तस्मादस्मत्पक्षे न कश्चिदपि दोषप्रसंगोस्ति॥ ॥आत्मनि चैवं विचित्राश्च हि॥ ॥अपि च नैवात्र विवदित
व्यं। कथमेकस्मिन्ब्रह्मणि स्वरूपानुपमर्देनैवानेकाकारा सृष्टिः स्यादिति। यतः आत्मन्यपि एकस्मिन्स्वप्नदृशि स्वरूपानुपमर्देनैवानेका
कारा सृष्टिः पठ्यते॥ न तत्र रथा न रथयोगा न पंथानो भवंत्यथ रथान्रथयोगान्पथः सृजते इत्यादिना॥ लोकेपि देवादिषु मायाव्यादिषु च स्व
रूपानुपमर्देनैव विचित्रा हस्त्यश्वादिसृष्टयो दृश्यंते तथैकस्मिन्नपि ब्रह्मणि स्वरूपानुपमर्देनैवानेकाकारा सृष्टिर्भविष्यतीति॥ ॥स्वप
क्षदोषाच्च॥ ॥परेषामप्येष समानः स्वपक्षे दोषः। प्रधानवादिनोपि हि निरवयवमपरिच्छिन्नं शब्दादिहीनं प्रधानं सावयवस्य परिच्छिन्न
स्य शब्दादिमतः कार्यस्य कारणमिति स्वपक्षः तत्रापि कृत्स्नप्रसक्तिर्निरवयवत्वाद्वा प्राप्नोति। निरवयवत्वाभ्युपगमकोपो वा॥
दृष्टांतेन दृष्टपन्यायाद्वा दर्शयति सूत्रकारः। आत्मनि चेति। न रथा रथयोगाः अश्वाः। किंच कृत्स्नप्रसक्त्यादीनां सांख्यादिपक्षेपि दोषत्वान्नास्माकं

कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा [illegible]
वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यं॥

प्रधानस्यापि निरवयवत्वे कृत्स्नप्रसक्तिः सावयवत्वे च निरवयवत्वाभ्युपगमविरोध इत्यत आशंकते। नन्विति। किं साम्यावस्था गुणानां विकारः समु
दायो वा आद्ये तस्यान मूलप्रकृतित्वं विकारत्वात्। द्वितीये प्रपंचाभावः समुदायस्यावस्तुत्वेन मूलाभावात्। अथ निरवयवा गुणा एव विविधपरि
णामानां प्रकृतिरिति चेन्न हि कृत्स्नप्रसक्तौ मूलोच्छेदो दुर्वारः इत्यभिप्रेत्य परिहरति। नैवमित्यादिना। इति यतः अतः समानत्वान्नवयं पक्षेतु

ननु नैवं तैर्निरवयवं प्रधानमभ्युपगम्यते। सत्त्वरजस्तमांसि त्रयो गुणास्तेषां साम्यावस्था प्रधानं। तैरेवावयवैस्तत्सावयवमिति। नैवं जातीय
केन सावयवत्वेन प्रकृतौ दोषः परिहर्तुं पार्यते। यतः सत्त्वरजस्तमसामपि एकैकस्य समानं निरवयवत्वं। एकैकमेव चेतरद्वयानुगृहीतं
सजातीयस्य प्रपंचस्योपादानमिति समानत्वात्स्वपक्षदोषप्रसंगस्य। तर्काप्रतिष्ठानात्सावयवमेवेति चेत्। एवमप्यनित्यत्वादिदोषप्र
संगः। अथ शक्तिपर्यवसायी वैचित्र्यसूचिताः अवयवा इत्यभिप्रायः। तास्तु ब्रह्मवादिनोऽप्यविशिष्टाः॥

सोऽयमित्यन्वयः। प्रत्येकं सत्त्वादिकमितरगुणद्वयसचिवं निरवयवं प्रपंचोपादानं नहि कृत्स्नस्योपादानस्य कार्यरूपत्वप्रसक्तौ मूलोच्छेद इत्यतो नि
रवयवत्वसाधकतर्कस्याभासत्वाद्गुणानां सावयवत्वमेव परिणामित्वेन स्यादिति दृष्टान्तेन कृत्स्नप्रसक्तिरेकदेशपरिणामसंभवादिति शंकते। त
र्केति। एतत्तर्काभासत्वेऽपि दोषान्तरं स्यादिति परिहरति। एवमपीति। ननु गुणानामवयवाः सन्तु वयं त्वङ्कान नवंति किंतु कार्यवैचित्र्यानुमिताः शक्तयः
शक्तिमत्त्वाशंकायां नापि कश्चित् शक्तिभिर्गुणानां सावयवत्वं तुल्यमित्याह। अथेत्यादिना॥

शा.सू.भा.२ अणुवादेऽपि दोषसाम्यमाह। तथेति। सांख्यस्येव दोषः समान इति संबंधः। निरवयवयोः परमाण्वोः संयोगः व्याप्य वा स्यादव्याप्य वेति विकल्प्याद्ये तत्कार्य
स्य द्व्यणुकस्यैकपरमाणुमात्रत्वापत्तिः। प्रथिम्नोऽधिकपरिमाणस्यानुपपत्तेः। न ह्यणोरप्येकदेशेन पर्वधः पार्श्वे तत्र व्याप्तौ ततोऽधिकद्रव्यं संभवति
३८ द्वितीयेऽपरमाण्वोः सावयवत्वापत्तिरित्यर्थः। ननु स्वंचयोरेकदेशसुक्तेत्वमपि चोर इति यद्दोषसाम्योक्तिरयुक्तेत्यत आह। परिहृतत्वाच्चेति। उक्तं हि मायावादे

तथाणुवादिनोऽप्यणुरण्वन्तरेण संयुज्यमानो निरवयवत्वाद्यदि कार्त्स्न्येन संयुज्येत। ततः प्रथिमानुपपत्तेरणुमात्रत्वप्रसंगः। अथैकदेशे
न संयुज्येत तथापि निरवयवत्वाभ्युपगमव्याकोप इति। स्वपक्षेऽपि समान एष दोषः। समानत्वाच्च नान्यतरस्मिन्नेव पक्षे उपक्षेप्तव्यो भवति। प
रिहृतस्तु ब्रह्मवादिना स्वपक्षे दोषः॥ ॥ सर्वोपेता च तद्दर्शनात्॥ ॥ एकस्यापि ब्रह्मणो विचित्रशक्तियोगादुपपद्यते विचित्रो विकारप्रपं
च इत्युक्तं। तत्पुनः कथमवगम्यते। विचित्रशक्तियुक्तं परं ब्रह्मेति। तदुच्यते। सर्वोपेता च तद्दर्शनात्। सर्वशक्तियुक्ता च परा देवतेत्यभ्यु
पगंतव्यं। कुतः। तद्दर्शनात्। तथाहि दर्शयति श्रुतिः सर्वशक्तियोगं परस्या देवतायाः। सर्वकर्मा सर्वकामः सर्वगंधः सर्वरसः सर्वमिद
मभ्यात्तोऽवाक्यनादरः। सत्यकामः सत्यसंकल्पो यः सर्वज्ञः सर्ववित् एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचंद्रमसौ विधृतौ तिष्ठत इत्येवं
जातीयका॥
समवत्सर्वेषामंजसं। अतो निरवयवे ब्रह्मणि समन्वयस्याविरोध इति सिद्धम्। सर्वोपेता। मायाशक्तिमतो ब्रह्मणो जगत्सर्गं विदधतः समन्वयस्याश ३८
शरीरस्य न मायेत्यन्यायेन विरोधोऽस्ति न वेति संदेहे मायस्याऽऽभासत्वादस्तीति पूर्वपक्षे पूर्वोक्तशक्तिमत्त्वसमर्थनादेकविषयत्वं संगतिं वदन्सिद्धां
तसूत्रं व्याचष्टे। एकस्येत्यादिना। पूर्वोत्तरपक्षयोर्विरोधाविरोधौ फलमिति स्फुटमेवापादसमाप्तेरवगन्तव्यं॥ अभ्यात्तः अभिव्याप्तः। अवाकी वागिंद्रि

पूर्वपक्षमाशयमनूद्य दूषयति। विकरणत्वादिति। देवादिचेतनानां शास्त्रज्ञानामपि देहाभिमाने सत्येव कर्तृत्वं दृष्टं तदभावे सुषुप्ते तन्न दृष्टं। श्रुतो
ब्रह्मणः शास्त्रत्वेप्यदेहत्वान्न कर्तृत्वं नास्य देहसंशक्तिः संभवतीति शंकार्थः। विकरणस्य जीवस्य कर्तृत्वासंभवेपीश्वरस्य संभवतीति देवादिवद
पि लोकवदित्यत्रोक्तं सशरीरस्य कल्पितस्य मायाश्रयत्वयोगात् निर्विशेषचिन्मात्रस्यैव मायाधिष्ठानत्वं युक्तमिति समाधानार्थः। न प्रयोजनवत्त्वास्य
विकरणत्वान्नेति चेत्तदुक्तं॥ ॥स्यादेतद्विकरणं परं दैवतं शक्तिशास्त्रमचक्षुष्कमश्रोत्रमवागमनाः इत्येवंजातीयकं। कथं तत्सर्वश
क्तियुक्तमपि सत्कार्यमपि प्रभवेत्। देवादयो हि चेतनाः सर्वशक्तियुक्ता अपि संत आध्यात्मिककार्यकरणसंपन्ना एव तस्मै कार्याय प्रभवंतो वि
ज्ञायंते। कथं च नेति नेतीति प्रतिषिद्धसर्वविशेषाया देवतायाः सर्वशक्तियोगः संभवेदिति चेत् यदत्र वक्तव्यं तत्पुरस्तादेवोक्तं। श्रुत्यवगाह्य
मेवेदमतिगंभीरं ब्रह्म न तर्कावगाह्यं। न च यथैकस्य सामर्थ्यं दृष्टं तथान्यस्यापि सामर्थ्येन भवितव्यमिति नियमोस्तीति। प्रतिषिद्धसर्ववि
शेषस्यापि ब्रह्मणः सर्वशक्तियोगः संभवतीत्येतदप्यविद्याकल्पितरूपभेदोपन्यासेनोक्तमेव। तथा च शास्त्रं। अपाणिपादो जवनो ग्रही
ता पश्यत्यचक्षुः स शृणोत्यकर्णः। इत्यकरणस्यापि ब्रह्मणः सर्वसामर्थ्ययोगं दर्शयति॥ न प्रयोजनवत्त्वात्। अन्यथा पुनश्चेतनकर्तृकत्वं
जगतः आक्षिप्यते न खलु चेतनः परमात्मेदं जगद्बिंबं विरचयितुमर्हति। कुतः प्रयोजनवत्त्वात्प्रवृत्तीनां। चेतनो हि लोके बुद्धिपूर्वकारी पु
रुषः प्रवर्त्तमानो न मंदोपक्रमामपि तावत्प्रवृत्तिमात्मप्रयोजनानुपयोगिनीमारभमाणो दृष्टः किमुत गुरुतरसंरंभां॥
रित्यत्र ब्रह्मणः जगत्सर्गे कर्तृत्वमर्थयो विषयः। सा किमभ्रांतस्य चेतनस्य फलं वस्तु नरकेयतीति न्यायेन विरुध्यते न वेति संदेहे पूर्वव
देहस्यापि शक्तिमत्त्वात् शक्तो लोकवत् कर्तृत्वमुक्तं तदा सेयसंगत्या पूर्वपक्षरूपमाचष्टे॥ अन्यथेत्यादिना॥

शा॰सू॰भा॰२ ईश्वरस्य फलाभावेऽपि प्रयोजनापेक्षैव प्रवृत्तिरस्त्वित्याशंक्य श्रुतिमाह॥ भवति चेति॥ या प्रेक्षावत्प्रवृत्तिः सा स्वफलार्थेति लोकप्रसिद्धिः।
न चोन्मत्तप्रवृत्तौ व्यभिचारस्तस्यापि दुःखासहनप्रयुक्तस्वचित्तव्याकुलतानिवृत्त्यर्थत्वादिति भावः। किंच गुरुत्वादपायस्य फलं वाच्यमित्याह। गु-
३९ रुतरेति। तर्हि अस्तीश्वरस्यापि प्रवृत्तिः स्वार्थेत्यत आह। यदीयमपीति। अस्वार्थत्वे प्रवृत्त्यभावः पूर्वोक्तः स्यादित्यर्थः॥ ईश्वरः प्रेक्षावान्न भवतीत्या-

भवति च लोकप्रसिद्ध्यनुवादिनी श्रुतिः न वा अरे सर्वस्य कामाय सर्वं प्रियं भवति। आत्मनस्तु कामाय सर्वं प्रियं भवतीति॥ गुरुतरसंरम्भा
चेयं प्रवृत्तिः यदुच्चावचप्रपंचं जगद्बिंबं विरचयितव्यं। यदीयमपि प्रवृत्तिः चेतनस्य परमात्मनः आत्मप्रयोजनोपयोगिनी परिकल्प्येत परि-
तृप्तत्वं परमात्मनः श्रूयमाणं बाध्येत। प्रयोजनाभावे वा प्रवृत्त्यभावोऽपि स्यात्। अथ चेतनोऽपि सन्नुन्मत्तो बुद्ध्यपराधादन्तरेणैवात्मप्रयो-
जनं प्रवर्तमानो दृष्टस्तथा परमात्मापि प्रवर्तिष्यत इत्युच्येत। तथा सति सर्वज्ञत्वं परमात्मनः श्रूयमाणं बाध्येत॥ तस्मादश्लिष्टा चेतना-
त्सृष्टिरिति लोकवत्तु लीलाकैवल्यं। तुशब्देनाक्षेपं परिहरति। यथा लोके कस्यचिदाप्तैषणस्य राज्ञो राजामात्यस्य वा व्यतिरिक्तं किंचित्प्रयो-
जनमनभिसंधाय केवलं लीलारूपाः प्रवृत्तयः क्रीडाविहारेषु भवंति॥ ३९

शंक्य श्रुतिविरोधमाह। अथेत्यादिना। बुद्धेरपराधो विवेकाभावः। उक्तन्यायस्य राज्ञां लीलायां व्यभिचार इति सिद्धान्ती तत्र तं व्याचष्टे तुशब्देने-
ति। व्यतिरिक्तं लीलातिरिक्तं। क्रीडारूपा विहारास्तेषु रम्यदेशेषु तेष्वित्यर्थः॥

कदाचिद्राजादीनां लीलायामपि किंचित्फलं सुखोल्लासादिकं संभाव्येत तथापि निश्वासादौ प्रेक्षावत्प्रवृत्तिर्नास्ति ननु स्वस्य तत्रोद्देश्यफलं किंचि
दस्तीति व्यभिचारस्थलांतरमाह। यथा चेति। प्राणस्य स्वभावश्चलत्वमपार्थं श्वासोच्छ्वासादिहेतुरीश्वरस्य स्वभावः कालकर्मसहितमाया। नन्वीश्वर
स्य जगद्रचनायाः केवलं लीलात्वं किं निष्फलत्वे तत्फलमेव किंचित्कल्प्यतां तत्राह। नहीति। आप्तकामत्वव्याघातादित्यर्थः। नन्वीश्वरस्तर्हि किमिति
न तिष्ठति किमिति स्वस्याफलां परेषां दुःखावहां सृष्टिं करोति तत्राह। न च स्वभाव इति। कालकर्मादिसामग्र्यां सत्यां सृष्टेरपरिहार्यत्वादित्यर्थः। यद्

यथा चोच्छ्वासप्रश्वासादयोऽनभिसंधाय बाह्यं किंचित्प्रयोजनं स्वभावादेव संभवंत्येवमीश्वरस्याप्यनपेक्ष्य किंचित्प्रयोजनांतरं स्वभावादेव
केवलं लीलारूपा प्रवृत्तिर्भविष्यति। न हीश्वरस्य प्रयोजनांतरं निरूप्यमाणं न्यायतः श्रुतितो वा संभवति। न च स्वभावः पर्यनुयोक्तुं शक्यते। य
द्यप्यस्माकमियं जगद्बिंबविरचना गुरुतरसंरंभेवाभाति तथापि परमेश्वरस्य लीलैव केवलेयमपरिमितशक्तित्वात्। यदि नाम लोके ली
लास्वपि किंचित्सूक्ष्मं प्रयोजनमुत्प्रेक्ष्येत। तथापि नैवात्र किंचित्प्रयोजनमुत्प्रेक्षितुं शक्यते आप्तकामश्रुतेः। नाप्यप्रवृत्तिः। उन्मत्तप्रवृ
त्तिर्वा सृष्टिश्रुतेः सर्वज्ञश्रुतेश्च। न चेयं परमार्थविषया सृष्टिश्रुतिः। अविद्याकल्पितनामरूपव्यवहारगोचरत्वात्। ब्रह्मात्मभावप्रतिपा
दनपरत्वाच्चेत्येतदपि नैव प्रस्मर्तव्यं

क्तं गुरुतरप्रयासत्वात्फलं वाच्यमिति। तत्र हेत्वसिद्धिमाह। यद्यपीत्यादिना। अल्पप्रवृत्तेरपि फलं वाच्यं लोके तथा दर्शनादित्याशंक्यागमबाधमा
ह। यदि नामेति। सृष्टिश्रुतेरप्रवृत्तिर्नास्ति। सर्वज्ञत्वश्रुतेरुन्मत्तता नास्तीति विभागः। स्वप्नसृष्टिवदस्याः सृष्टेर्मायामात्रत्वान्न फलापेक्षेत्याह। न चे
यमिति। न च निष्फलसृष्टिश्रुतीनामानर्थक्यं सफलब्रह्मधीशेषत्वेनार्थवत्त्वादित्युक्तं न विस्मर्तव्यमित्यर्थः॥ गौरीकांतायनमः

वैषम्यनैर्घृण्येन ॥ निर्दोषाद्ब्रह्मणो जगत्सर्गं ब्रुवन्समन्वयो विषयः । स किं यो विषमकारी स दोषवानिति न्यायेन विरुध्यते न वेति संदेहे पूर्वत्र ली-
लामात्रस्य सृष्टिकर्तृत्वमुक्तं तदेव कर्मादिसापेक्षस्य न युक्तं । अनीश्वरत्वापत्तेर्निरपेक्षत्वे रागादिदोषापत्तेरित्याक्षेपसंगत्या पूर्वपक्षयति । पुनश्चेत्यादिना ।
ब्रह्मैव जगत्कारणमिति । जन्मादिसूत्रेसौ प्रतिज्ञातोर्थः । पृथग्जनः पामरः । निरवद्यं निरंजनमिति श्रुतिः । न मे द्वेष्योस्ति न प्रियः इति स्मृतिः ।

वैषम्यनैर्घृण्ये न सापेक्षत्वात्तथा हि दर्शयति ॥ पुनश्च जगज्जन्मादिहेतुत्वमीश्वरस्याक्षिप्यते । स्थूणानिखनन न्यायेन प्रतिज्ञातस्यार्थ-
स्य दृढीकरणाय । नेश्वरो जगतः कारणमुपपद्यते । कुतः वैषम्यनैर्घृण्यप्रसंगात् ॥ कांश्चिदत्यन्तसुखभाजः करोति देवादीन् कांश्चिद-
त्यंतदुःखभाजः पश्वादीन् कांश्चिन्मध्यमभोगभाजो मनुष्यादीनित्येवं विषमां सृष्टिं निर्मिमाणस्येश्वरस्य पृथग्जनस्येव रागद्वेषोपपत्तेः श्रु-
तिस्मृत्यवधारितस्वच्छत्वादीश्वरस्वभावविलोपः प्रसज्येत । तथा खलजनैरपि जुगुप्सितं निर्घृणत्वमतिक्रूरत्वं दुःखयोगविधानात्सर्व-
प्रजोपसंहाराच्च प्रसज्येत । तस्माद्वैषम्यनैर्घृण्यप्रसंगान्नेश्वरः कारणमिति । एवं प्राप्ते ब्रूमः । वैषम्यनैर्घृण्ये नेश्वरस्य प्रसज्येते । कस्मात् सापे-
क्षत्वात् । यदि हि निरपेक्षः केवल ईश्वरो विषमां सृष्टिं निर्मिमीते । स्यातामेतौ दोषौ वैषम्यं नैर्घृण्यं च । न तु निरपेक्षस्य निर्मातृत्वमस्ति
। सापेक्षो हीश्वरो विषमां सृष्टिं निर्मिमीते । किमपेक्षत इति चेत् । धर्माधर्मावपेक्षत इति सिद्धांतयति । एवं प्राप्त इत्यादिना वदामः । अतः
च्छत्वादीत्यादिपदेन कूटस्थत्वग्रहः । स्वच्छत्वादिश्चासावीश्वरस्वभाव ॥ सृज्यमानप्राणिधर्माधर्मापेक्षा विषमा सृष्टिरिति नायमीश्वरस्यापराधः ॥
श्चेति विग्रहः । निमित्तमनपेक्ष्य विषमकारित्वे वैषम्यादिदोषः स्यात् न त्वनपेक्षत्वमीश्वरस्यास्तीति सिद्धांतयति । एवं प्राप्त इत्यादिना । न च सापेक्ष-
त्वेऽनीश्वरत्वं सेवामपेक्ष्य फलदातरि राज्ञीश्वरत्वानपायात् ॥

ननु तर्हि धर्माधर्मावेव विचित्रसृष्टिरस्तु किमीश्वरेणेत्यत आह ईश्वरस्तु पर्जन्यवदिति। साधारणहेतुसहितस्यैवासाधारणहेतोः कार्य
कारित्वान्नेश्वरवैयर्थ्यं। अन्यथा पर्जन्यवैयर्थ्यप्रसंगादिति भावः। यं जनमुन्निनीषते ऊर्ध्वं नेतुमिच्छति तं साधु कारयति एवमीश्वर इ
त्यत्र च। न चैवं चिज्ज न साधुकर्मैव साधुकर्म कारयतो वैषम्यं तदवस्थमिति वाच्यं। अनादिपूर्वार्जितसाध्वसाधुवासनया स्वभावेन तज्

ईश्वरस्तु पर्जन्यवद् द्रष्टव्यः। यथा हि पर्जन्यो व्रीहियवादिसृष्टौ साधारणं कारणं भवति। व्रीहियवादिवैषम्ये तु तत्तद्बीजगतान्येवासाधा
रणानि सामर्थ्यानि कारणानि भवन्ति। एवमीश्वरो देवमनुष्यादिसृष्टौ साधारणं कारणं भवति। देवमनुष्यादिवैषम्ये तु तत्तज्जीव
गतान्येवासाधारणानि कर्माणि कारणानि भवन्त्येवमीश्वरः सापेक्षत्वान्न वैषम्यनैर्घृण्याभ्यां दुष्यति। कथं पुनरवगम्यते सापेक्ष ईश्व
रो नीचमध्यमोत्तमं संसारं निर्मिमीत इति तथा हि दर्शयति श्रुतिः। एष ह्येव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषत एष उ एवा
साधु कर्म कारयति तं यमधो निनीषत इति। पुण्यो वै पुण्येन कर्मणा भवति पापः पापेनेति च। स्मृतिरपि प्राणिकर्मविशेषापेक्षमेवे
श्वरस्यानुग्रहीतृत्वं निग्रहीतृत्वं च दर्शयति। ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहमित्येवंजातीयका॥ ॥न कर्माविभागादिति चे
न्नानादित्वात्॥ ॥सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमिति प्राक् सृष्टेरविभागावधारणान्नास्ति कर्म यदपेक्षा विषमा सृष्टिः स्या
त्॥
न स्यात्तत्कर्म सुप्रवृत्तावीश्वरस्य साधारणहेतुत्वादतोऽनवद्य ईश्वर इति भावः। अप्रथमसर्गस्य वैषम्यहेतुकर्माभावादेकरूपत्वं स्यात्तथा तदुत्त
रकृत्यानामप्यमीमांसाक्षिप्य समाधत्ते सूत्रकारः॥ न कर्मेति॥

श्री·सू·भा·२
४१

प्रथमसृष्टेः पश्चाद्विकर्मकृतं वैषम्यमित्याशङ्क्यान्योन्याश्रयमाहास च्युत्तरेति। आद्यासृष्टिरित्युपलक्षणम्। आदावेकरूपत्वेन ध्येविषमक
र्मोत्पत्तौ हेत्वभावेनोत्तरसृष्टीनामपि तुल्यत्वस्य दुर्वारत्वादिति द्रष्टव्यं। परिहारः सुगमः। प्रथमसृष्टेः कस्मिंश्चिन्नास्तीत्वेवं मतान्तरमिति॥ कथंपु
नरिति। उपपत्तिसहितश्रुत्यादिकं प्रमाणमिति सूत्रव्याख्योपादर्शयति। उपपद्यत इति॥ हेतुं विनैव सर्गाङ्गीकारे ज्ञानकर्मकाण्डवैयर्थ्यस्यादि

स च्युत्तरकालं हि शरीरादिविभागापेक्षं कर्म कर्मापेक्षश्च शरीरादिविभागः इतीतरेतराश्रयः प्रसज्येत। अतो विभागादूर्ध्वं कर्मापेक्ष ईश्वरः
प्रवर्त्ततां नाम प्राग्विभागाद्वैचित्र्यनिमित्तस्य कर्मणोऽभावात्तुल्यैवाद्यासृष्टिः प्राप्नोतीति चेत्। नैष दोषोऽनादित्वात्संसारस्य। भवेदेष दोषो य
द्यादिमान्संसारः स्यात्। अनादौ तु संसारे बीजाङ्कुरवद्धेतुहेतुमद्भावेन कर्मणः सर्गवैषम्यस्य च प्रवृत्तिर्न विरुध्यते। कथं पुनरवगम्यतेऽ
नादिरेष संसार इति। अत उत्तरं पठति। ॥उपपद्यते चाप्युपलभ्यते च॥ ॥उपपद्यते च संसारस्यानादित्वं आदिमत्त्वे हि संसारस्याकस्मा
दुद्भूतेर्मुक्तानामपि पुनः संसारोद्भूतिप्रसङ्गोऽकृताभ्यागमप्रसङ्गश्च। सुखदुःखादिवैषम्यस्य निर्निमित्तत्वात्। न चेश्वरो वैषम्यहेतुरित्यु
क्तं। न चाविद्या केवला वैषम्यस्य कारणं एकरूपत्वात्। रागादिक्लेशवासनाक्षिप्तकर्मापेक्षा त्वविद्या वैषम्यकरी स्यात्॥

त्वर्थस्मारितमर्थः। ननु सुखादिवैषम्ये ईश्वरोऽविद्या वा हेतुरस्त्वित्याशङ्क्य क्रमेण दूषयति। न चेश्वर इत्यादिना। कस्तर्हि हेतुस्तत्राह रागादीति। ४१
रागद्वेषमोहाः क्लेशास्तेषां वासनाभिराक्षिप्तानि कर्माणि धर्माधर्मव्यामिश्ररूपाणि तदपेक्षाविद्या सुखादिसर्गवैचित्र्यहेतुः तस्मादविद्यासहकारित्वे

[illegible]

किंच सृष्टेः सादित्वे प्रथमशरीरस्योत्पत्तिर्न संभवति हेत्वभावात्। नच कर्म हेतुः शरीरात्प्राक् कर्मासंभवात् तस्मात्कर्मशरीरयोः अन्योन्याश्र
यपरिहाराय सर्वैर्वादिभिः संसारस्यानादित्वमंगीकार्यमित्याह। नचेति। सर्गप्रमुखे सृष्ट्यादौ प्रागधारितप्राणोपि सन् अस्य आत्मभाविधारणनि
मित्तेन जीवशब्देनोच्यतामित्यत आह। नच धारयिष्यतीति। हस्युः सदृशीं भार्यामुपेयादित्यादावगत्या भाविरूपाश्रयणमिति भावः। अस

नच कर्मान्तरेण शरीरं संभवति। नच शरीरमन्तरेण कर्म संभवतीतीतरेतराश्रयत्वप्रसंगः। अनादित्वे तु बीजांकुरन्यायेनोपपत्तेः नक
श्चिद्दोषो भवति। उपलभ्यते च संसारस्यानादित्वं श्रुतिस्मृत्योः। श्रुतौ तावदनेन जीवेनात्मनेति सर्गप्रमुखे शारीरमात्मानं जीवशब्देन
प्राणधारणनिमित्तेनाभिलपन्ननादिः संसार इति दर्शयति। आदिमत्वे तु प्रागधारितप्राणः कथं प्राणधारणनिमित्तेन जीवशब्देन
सर्गप्रमुखेऽभिलप्येत। नच धारयिष्यतीत्यतोऽभिलप्येत। अनागताद्धि संबंधादतीतः संबंधो बलवान्भवति। अभिनिष्पन्नत्वात्। सूर्याचंद्र
मसौ धाता यथापूर्वमकल्पयत् इति च मंत्रवर्णः पूर्वकल्पसद्भावं दर्शयति। स्मृतावप्यनादित्वं संसारस्योपलभ्यते न रूपमस्येह तथो
पलभ्यते नांतो न चादिर्न च संप्रतिष्ठेति। पुराणे चातीतानागतानां च कल्पानां न परिमाणमस्तीति स्थापितं। ॥ ॥

संसारवृक्षस्य स्वरूपं सत्यं मिथ्या वेत्येवंरूपं इदंतया विनाऽनेनोपलभ्यते ज्ञानं विनांतोपि नास्ति नाप्यादिरुपलभ्यते। असत्वादेव नच संप्रतिष्ठा म
ध्ये स्थितिः दृष्टनष्टस्वरूपत्वादिति गीतावाक्यार्थः। संसारस्यानादित्वेऽभिनिष्पन्नत्वादेकर्मयथायुक्तीयमभिलपनधारणमुपपन्नं। तस्मान्निरव
द्ये ब्रह्मणि समन्वयाविरोध इति सिद्धं ॥

सर्वधर्मोपपत्तेश्च॥ ॥निर्गुणस्य ब्रह्मणो जगदुपादानत्वादि वेदान्तसमन्वयो विषयः। स किं यन्निर्गुणं तन्नोपादानं यथा रूपमिति न्याये
न विरुध्यते न वेति संदेहे भवत्वीश्वरस्य विभ्रमसृष्टिनिमित्तत्वं तत्प्रयोजककर्मणः सत्त्वान्न तूपादानत्वं तद्व्यापकस्य सगुणत्वस्याभावा
दिति प्रत्युदाहरणेन प्राप्ते सिद्धान्तसूत्रमाह॥ चेतनमिति। विवर्त्तोपादानत्वं निर्गुणस्याप्यविरुद्धं। अज्ञाततत्त्वस्य भ्रमाधिष्ठानत्वस्यप्रयो
जकस्य सत्त्वात् सगुणत्वं तु व्यापकं शब्दादिगुणशून्ये नीलत्वादिभ्रमदर्शनादिति भावः। यद्यपि सर्वज्ञत्वं सर्वशक्तित्वं च लोके कारणधर्मत्वेना
प्रसिद्धं तथापि योग्यस्य कर्तुः सर्वज्ञत्वाद्यपेक्षेति प्रसिद्धं। ईश्वरस्यापि सर्वकर्तृत्वश्रवणात् प्रसिद्ध्यनुसारेण धीन्निर्णीतस्य सर्वज्ञ

सर्वधर्मोपपत्तेश्च॥ ॥चेतनं ब्रह्म जगतः कारणं प्रकृतिश्चेत्यस्मिन्नवधारिते वेदार्थे परैरुपक्षिप्तान्विलक्षणत्वादीन्दोषान्पर्य
हार्षीदाचार्यः। इदानीं परपक्षप्रतिषेधप्रधानं प्रकरणमारिप्समाणः स्वपक्षपरिग्रहप्रधानं प्रकरणमुपसंहरति। यस्मादस्मिन्ब्रह्म
णि कारणे परिगृह्यमाणे प्रदर्शितेन प्रकारेण सर्वे कारणधर्मा उपपद्यन्ते। सर्वज्ञं सर्वशक्तिमहामायं च ब्रह्मेति। तस्मादनतिशङ्कनी
यमिदमौपनिषदं दर्शनमिति॥ ॥इति शारीरकमीमांसाभाष्ये श्रीगोविन्दभगवत्पूज्यपादशिष्यश्रीशंकरभगवत्पूज्यपादकृतौ द्वि
तीयाध्यायस्य प्रथमः पादः समाप्तः॥

त्वं सर्वशक्तित्वं चास्तिध्यतीत्यभिसंधायाह। सर्वज्ञं सर्वशक्तीति। महामायमिति कर्तृत्वोपादानत्वकथनेन सर्वशंकाप्रसंगावकाशो लक्षणाधिकं। तस्मा
दौपनिषदे सिद्धान्ते न कश्चिद्दोष इति सिद्धं॥ ॥श्रीमत्परमहंसपरिव्राजकाचार्यश्रीगोविन्दानन्दभगवत्कृतौ शारीरकव्याख्यायां भाष्यरत्नप्रभा

॥श्रीगणेशाय नमः॥ ॥सांख्यतार्किकबौद्धाश्च जैनाः पाशुपतादयः। यस्मात्खंडनजानंति तं वेदे रघुपुंगवं ॥१॥ खलु निखिलधर्माणां प्रतिद्वंद्वित्वाधानेऽपि
तदुपपत्तिमाद्यं ब्रूमो निरचार्षीत्॥ रचितात्तदुपपत्तेश्चानुमानं। ननु मुमुक्षूणां वाक्यार्थनिर्णयप्रतिबंधकनिरासाय वेदांतानां तात्पर्यं निश्चेतुं सिद्धांतस्य
मारब्धं तच्च निर्दोषतया निश्चितं। ततः परपक्षनिरासात्मकोऽयं पादोऽस्मिन्नध्याये न संगतः। तन्निरासस्य मुमुक्षुभिरनपेक्षितत्वादित्याशंक्याह॥ यद्यपीति

श्रीगणेशाय नमः॥ ॥रचितात्तदुपपत्तेश्चानुमानं॥ ॥यद्यपीदं वेदांतवाक्यानां निर्दोषार्थनिरूपयितुं शास्त्रं प्रवृत्तं। न तर्कशास्त्रवत्केवलाभि
युक्तिभिः केचित्सिद्धं तं साधयितुं दूषयितुं वा प्रवृत्तं तथापि विवेदांतवाक्यानि व्याचक्षाणैः सम्यग्दृष्टिं न प्रतिपत्स्यंते तेषां स्यादि दृष्टीनां निराकर
णीयानि इति तदर्थः परः पादः प्रवर्तते। वेदांतार्थनिर्णयस्य सम्यग्दर्शनार्थत्वात्तन्निर्णयेन स्वपक्षस्थापनं प्रथमं कृतं। तद्ध्यभ्यर्हितं परपक्ष
प्रत्याख्यानादिति॥ ननु मुमुक्षूणां मोक्षसाधनत्वेन सम्यग्दृष्टिनिरूपणाय स्वपक्षस्थापनमेव केवलं कर्तुं युक्तं किं परपक्षनिराकरणेन पर
रद्वेषकरणेन॥

परपक्षनिराकरणं विना स्वपक्षे दोषो योग्यत्तल्लक्ष्मित्याह तथापीति तर्हि स्वपक्षस्थापनायामेव परपक्षप्रत्याख्यानं कार्यमित्युक्तमाह वेदांता
र्थेति। वेदांततत्त्वसम्यनिर्णयस्य फलवत्त्वात् तत्करणं तदभावात् दर्शयितुं। ननु रागद्वेषकरत्वात् परमतनिराकरणं न कार्यमिति शंकां तत्त्विति॥

तत्त्वनिर्णयप्रधानाऽपरत्वं पंचकारण्या तत्त्वनिर्णयमत्र परमतेषु अप्रदूषणं विना न सिध्यति सा च तेषु भ्रांतिमूलत्वनिश्चयं विना न सिध्यति स च इदंप्रथं दवि
न्या० कु० भा० २ त्वान्नेति तत्सिद्धांतसंरक्षणार्थत्वात्प्रधानादिदूषणस्यापादेः स्मिन्नवसरे संगतः। संगतत्वाद्धि तदागेणापि कूर्मेण इत्यभिसंधाय न्यायकारिकां समाध
४२ ते। वाढमित्यादिना। अपवर्गसाधनत्वाज्ज्ञानस्य तत्त्वज्ञानं तेषु भ्रान्तिमित्यादिना निर्वहति सतीति तत्त्वनिर्णयमपपलः क्रियत इत्यर्थः। स्वमतस्थापनमतस्तद्दूषणेनु प्रधा
नसिद्ध्यर्थत्वात् कृतो न्योन्यं दूषणं परपक्षपलत्वं बुध्यादिनिरासो दृष्टमन्वह इति। न तु तत्त्वनिर्णयेऽप्युपकृत इति मंतव्यमपीतरत्वं शंकते। नन्वीश्वरेति। एवं
सांख्यादीनां मुख्यत्वं तर्कोऽस्त्वनुग्राहकतर्केति। स्वाद्धीतत्त्वमुक्तं। संप्रति अनुसत्त्वपेक्षाः तदीयाः स्युरिति तत्र पुरुषो निरस्यत इत्यर्थे भेदान्न पुनरुक्तिरित्याह। तदुक्तं
वाढमेवं। तथापि महाजनपरिगृहीतानि महांति सांख्यादितंत्राणि तत्त्वकृद्धीनां प्रदेशेन प्रवृत्ताः सुपलभ्यन्ते तत्केषांचित्तत्त्वज्ञानमतो नानेतानपि सम्यग्दृष्टि
नापोपादेयानीत्यपेक्षा। तथा पुरुषार्थाणां तत्त्वसंभवेन सर्वज्ञभाषितत्वाच्च श्रद्धधते ते चिस्ततस्तदस्मात्तेऽपपादनाय प्रपद्यते। नन्वीश्वरेतीश्वरादिकामाचुना
नुमानापेक्षा। एतेन सर्वमाख्याता व्याख्याता इति च पूर्वं ज्ञापितासांख्यादिषु सत्प्रतिक्षेपः कृतः। किं पुनः कृतकुर्वते नेति॥ तदुच्यते॥ सांख्यादयः स्वस्वछा
पनापयेदाननवाकाद्यपुराणादृष्टसहचर्यपक्षानुग्रहेप्येन्नैव पोज्जन्म तो व्याचक्षते। तेषां पृथगाख्यानं ता व्याख्यानभासं न समकव्याख्यानमिमिसेताव त्र्व्यफलं इहतु वा
सनिरपेक्षः स्वतंत्रस्तद्युक्तिप्रतिषेधः क्रियत इत्येव विशेषः। तत्र सांख्यामन्यं ते यथा घटस्यापि वा दृश्यो भेदो मृदादिलक्षणान्वीयमानः मृदात्मकत्वात्मृदेकस्वभावः एवं को ४२
इति प्रधानमचेतनं जगदुपादानमिति सांख्यसिद्धांतोऽत्र विषयः। स किंप्रमाणक इति भ्रांतिमूलो वेति संदेहे सर्वे धर्मी पक्षे तस्वेत्यत्र धर्मांश्च॥ लोकेदृष्टः॥
प्रधाने संभवात्तदेवोपादानमिति सांख्यपक्षे ग्रासप्रमाणमूलत्वं दूषयन् अर्थ पितृसमाह। तत्र सांख्या इति। सांख्यसिद्धांतज्ञानं स्वपरमतनिरास समलक्षप जीमलालाद्याः संग
तिः परमतनिरासात्फलं सर्वेषामधिकरणानामेतत्सादसंगतिः पूर्वपक्षे प्रमाणमूलमतविरोधादुक्तश्रुत्यर्थसमन्वयासिद्धिः फलं सिद्धांते तत्सिद्धिरिति अ
पादद्वयेऽपि। श्रौतसमन्वयदार्ढ्यार्थत्वादस्य पादस्य श्रुतिसंगतिरिति विवेकः भिन्न इति भेदविकारापेक्षा कार्यापि नाम्निता तन्तु तस्य कृतिका इति भाष्यमाह

सर्वकार्यं सुखदुःखमोहात्मकं वस्तु प्रकृतिकं तदन्वितत्वात् घटवदित्यनुमानमाह ॥ तथेति । किन्तर्यं प्रधानं परिणमते तत आह । चेतनस्येति । अर्थो भोग
मुक्तिरूपः । तदर्थं स्वभावत एव प्रवर्त्तते । न तु केन चिज्ज्ञानेन प्रेर्यते इत्यर्थः । तदुक्तं पुरुषार्थ एव हेतुः न केन चित्कार्यते करणमिति अनुमानांतरमा
तेह का निरूपयति ॥ तथेति । उक्तं हि भेदानां परिमाणात्समन्वयात् शक्तितः प्रवृत्तेश्च कारणकार्यविभागादविभागाद्वैश्वरूप्यस्येति । अत्र कारिका
र्थं समन्वयादिति लिंगं व्याख्यातं तद्विशिष्टं निव्याख्यायते । तथा हि । क्षित्यादीनां भेदानां कारणमव्यक्तमस्ति परिमितत्वात् । घटवत् । न च दृष्टांतेन व्यावर्त्तक

तथा सर्वे स्वावात्मिका भेदाः सुखदुःखमोहात्मतयान्वीयमानाः सुखदुःखमोहात्मकसामान्यपूर्वका भवितुमर्हंति । यत्तत्सुखदुःखमोहात्मकं
सामान्यं तत् त्रिगुणं प्रधानमव्यक्तमचेतनं चेतनस्य पुरुषार्थसाधयितृ स्वभावेनैव विचित्रेण विकारात्मना विवर्त्तत इति । एवं तथा परिमाणादि
भिरपि लिंगैस्तदेव प्रधानमनुमिमीते । तत्र वदाम ॥

यं घटोत्पत्तेः प्रागनभिव्यक्तघटादिरूपकार्यविशिष्टत्वेन मृदेव्यव्यक्तत्यात् यथा घटादीनां कारणं शक्तितः प्रवृत्तेर्महदादिकार्याणामपि कारणं तु
शक्तितः प्रवृत्तिर्वाच्यात एव शक्तिमत्कारणमव्यक्तं ॥ किंच कारणकार्यस्य विभागो जन्म दृश्यते । क्षितेर्मृत्तिका जायते ततो घट इति । एवमविभागः शक्तिलो
पेन मृत्पिंडे घटस्य मृत्तिकायां लयः ॥ तस्याः क्षितौ क्षितेरप्सु अपां तेजसि लीनौ विभागाविभागौ वैश्वरूप्यस्य विचित्रस्य भावजातस्य दृश्यमानौ प्र
दर्शरूपस्वीकृतौ क्वचित्कारणे विश्रांतौ विभागत्वादविभागत्वाच्च मृद्घटविभागाविभागवदित्यर्थः । सिद्धांतयति । तत्र वदाम इति ॥

किमनुमानैः अचेतनप्रकृतिकत्वं जगतः साध्यते स्वतंत्राचेतनप्रकृतिकत्वं वा आद्ये सिद्धसाधनता। अस्माभिरनादित्रिगुणमायाङ्गीकारात्। द्विती
ये घटादिदृष्टांते साध्यासिद्धिरित्याह यदीति। स्वतंत्रमचेतनं प्रकृतिरिति लिंगितदृष्टांतबलेन न तदा निरूप्येत परिदृष्टांतः। क्वचित्स्यात्तन्न तु दृष्टः क्वचि
दित्यन्वयः। स्वतंत्रपदार्थमाह। चेतनानधिष्ठितमिति। परकीयसाध्याप्रसिद्धिमुक्त्वा स्वसाध्यव्याप्तिपक्षं वक्तुं पठति विचित्ररचनालक्षणकार्यं तच्चेतनाधि
ष्ठिताचेतनप्रकृतिकमिति व्याप्तिमाह। गेहेति। इदं जगच्चेतनाधिष्ठिताचेतनप्रकृतिकं॥ कार्यत्वात्। गेहवदिति प्रयोगः॥ विपक्षे विचित्ररचनानुप

यदि दृष्टांतबलेनैवैतन्निरूप्येत नाचेतनं लोके चेतनानधिष्ठितं स्वतंत्रं किंचिद्विशिष्टपुरुषार्थनिर्वर्तनसमर्थान्विकारान्विरचयद्दृ
ष्टं। गेहप्रासादशयनासनविहारभूम्यादयो हि लोके प्रज्ञावद्भिः शिल्पिभिर्यथाकालं सुखदुःखप्राप्तिपरिहारयोग्या रचिता दृश्यंते। तथेदं जग
दखिलं पृथिव्यादि नानाकर्मफलोपभोगयोग्यं बाह्यमाध्यात्मिकं शरीरादि नानाजात्यन्वितं प्रतिनियतावयवविन्यासमनेककर्मफलानुभ
वाधिष्ठानं दृश्यमानं प्रज्ञावद्भिः संभावितमैः शिल्पिभिर्मनसापि आलोचयितुमशक्यं सत्कथमचेतनं प्रधानं रचयेत्॥ ॥ ४४

पत्तिरूपं तर्कं बाधकतर्कं वक्तुं जगतो वैचित्र्यमाह। तथेति॥ बाह्यं पृथिव्यादि भोग्यं। आध्यात्मिकं शरीरादि च भोगाधिष्ठानमिति विभागः। प्रति
नियतोऽसाधारणोऽवयवानां विन्यासो रचना यस्य तादृशमित्यर्थः। इत्थं विचित्रं जगच्चेतनानधिष्ठिता जडप्रकृतिः कथं रचयेदिति सूत्रार्थः॥

पक्षे तत्तन्नाधिष्ठितमचेतनं तत्कार्यकारीति व्याप्तिमुक्तकं मूलभूतामाह ॥ लोष्टेति। चेतनाऽप्रेरितेषु लोष्टादिषु कार्यकारित्वादर्शनादि
त्यर्थः॥ किंचात्मादिजडप्रकृतिः चेतनाधिष्ठिता परिणामित्वान्मृदादिवदित्याह॥ मृदिति। ननु मृदादिदृष्टान्तेऽप्यस्ति स्वचेतनत्वं चेतनाधिष्ठि
तत्वं चेति तत्र परिणामित्वहेतोः चेतनत्वमेव व्यापकं मृदादिस्वरूपत्वेनान्तरंगत्वात् न तु चेतनाधिष्ठितत्वं व्यापकं तस्य मृदादिबाह्यकुलालादिस
पेक्षत्वेन बहिरंगत्वात्तथा च परिणामित्वेऽपि मूलप्रकृतेरचेतनत्वधर्मेणैव संयोगो न तु चेतनाधिष्ठितत्वेनेत्याशंक्य निषेधति। नचेति। महान स

लोष्टपाषाणादिष्वदृष्टत्वात्। मृदादिष्वपि कुंभकाराद्यधिष्ठितेषु विशिष्टाकाररचनादर्शनात्तथा प्रधानस्यापि चेतनाधिष्ठितत्वप्रसंगः।
न च मृदाद्युपादानस्वरूपव्यपाश्रयेणैव धर्मेण मूलकारणमवधारणीयं न तु बाह्यकुंभकारादिव्यपाश्रयेणेति किंचिन्नियामकमस्ति। न चै
वं सति किंचिद्विरुध्यते प्रत्युत श्रुतिरनुगृह्यते। चेतनकारणसमर्पणात् इतो रचनानुपपत्तेश्च हेतोः नाचेतनं जगत्कारणमनुमातव्यं भवति। अ
न्वयाद्यनुपपत्तेश्चेति च शब्देन हेतोरसिद्धिं समुच्चिनोति। नहि बाह्याध्यात्मिकानां भेदानां सुखदुःखमोहात्मकतयाऽन्वय उपपद्यते सुखादी
नामान्तरत्वप्रतीतेः शब्दादीनां चातद्रूपत्वप्रतीतेः। तन्निमित्तत्वप्रतीतेश्च॥

दृष्टान्तेऽन्तरंगस्यापि महानसस्य रूपस्य धूमव्यापकत्वं नास्ति तद्वदित्यस्य बहिरंगस्यापि वह्नेस्तद्दर्शनात् अंतरंगत्वं व्यापकत्वे प्रयोजकं न भवतीति भावः।
किंच यद्यचेतनं तच्चेतनाधिष्ठितमेव परिणमत इत्यंगीकारे बाधकाभावात्स्वीकर्तव्यं स्वप्नेऽप्यर्हाच्च तत्रांगीकार्यमित्याह। न चैवमस्त्विति। सुखदुःखमोहा
न्वयादिति हेतोरसिद्धिं द्योतनार्थः सूत्रे च कार इत्याह। अन्वयाद्यनुपपत्तेश्चेति। तानुमानं प्रकृतमित्यर्थः। आदिशब्दः परिमाणाद्युपग्रहार्थः॥ शब्दादी
नां वा स्येत्यानुभवादान्तरसुखाद्यात्मकत्वमसिद्धं तन्निमित्तत्वात्। नहि निमित्तनैमित्तिकयोरभेदेनान्वयोऽस्ति। दंडघटयोरदर्शनादित्यर्थः॥

शा.सू.भा.२ किंच यदि घटेष्विव सुखादिकं शब्दादावन्वितं स्यात्तर्हि सर्वैरविशेषेण सुखादिकमुपलभ्येत घटेष्विव न तथोपलब्धिरस्तीति योग्यानुपलब्ध्या हेत्व
भावनिश्चयमित्याह। शब्दा इति। विषयस्यैकत्वेऽपि पुरुषगतनानावैचित्र्यात्कस्यचित्सुखबुद्धिः कस्यचिद्दुःखबुद्धिः कस्यचिन्मोहबुद्धिर्दृश्यतेऽतो वि
४५ षयाः सुखाद्यात्मका न भवन्तीत्यर्थः। एवं समन्वयमादित्ति हेतुं दूषयित्वा परिमाणादिहेतुं दूषयति॥ तथेति। बुध्यादीनां परिमितत्वेन संसर्गपूर्वक

शब्दाद्यविशेषेऽपि च भावनाविशेषात्सुखादिविशेषोपलब्धेः तथा परिमितानां भेदानामङ्कुरादीनां संसर्गपूर्वकत्वं दृष्ट्वा बाह्याध्यात्मिका
नां भेदानां परिमितत्वात्संसर्गपूर्वकत्वमनुमिमानस्य सत्त्वरजस्तमसामपि संसर्गपूर्वकत्वप्रसंगः परिमितत्वाविशेषात्॥ ॥ ४५

त्वसिद्धौ संसृष्टान्यनेकानि सत्त्वरजस्तमांसि सिध्यन्ति एकस्मिन्संसर्गासंभवात् न प्रकृतिसिद्धिरिति सांख्यस्य भावः। किमिदं परिमितत्वं न तावद्देशा
तः परिच्छेदः पक्षान्तर्गताकाशे तस्याभविनभावासिद्धेः। नापि कालतः परिच्छेदः सांख्यैः कालस्यानंगीकारात् अविद्यागुणसंसर्गेण सिद्धसाधनत्वं ना
पि वस्तुतः परिच्छेदः सत्त्वादीनां परस्परभिन्नत्वे सत्यपि साध्याभावेन व्यभिचारादित्याह। सत्त्वेति। संसर्गेण

यदुक्तं कार्यकारणविभागो पञ्च समाप्यते तत्प्रधानमिति तन्न खलु णिमापायांवाहमात्रप्रसिद्धिर्भवात्। न च यः कर्मस्य विभागः सचेतनानधिष्ठिताचेत
नेसमात् तद्रतिव्याप्तिरस्ति। सर्वत्र चितनेषु चेतनाधिष्ठानदर्शनादित्याह। कार्येतिरस्ते नाविभागो पि ख्यातः। मतुपसरिमितं तदवक्रपूर्वकमिति
व्याप्त तरं तत्रापि गुणेषु तनादिषु परिमिते तु व्यभिचारः। एतेन सहकार्यो रेवप्रकृतिविकारभावादचेतनविकाराणामचेतनं तन्नैव प्रकृतिरिति
निरस्तं। चेतनाधिष्ठिताचेतनप्रकृतिकत्वे पि सा हरेणापपत्तेः। नाविलक्षणत्वादित्वात्र्वादरूपनियमस्य निरस्तत्वाच्च। एवं चेतनाधीनकारणस्य

कार्यकारणभावस्तु चेतनापूर्वकनिर्मितानां घटादीनां दृष्ट इति न कार्यकारणभावात् तत्वाद्याधारिकानां भेदानां न चेतनपूर्वक
त्वं शक्यं कल्पयितुं॥ ॥प्रकृतेश्च॥ ॥आस्तां तावदियं रचना तस्मिन् प्रधानस्य प्रवृत्तिः साम्यावस्थानात् प्रच्युतिः सत्त्वरजस्तमसामंगां
गिभावरूपापत्तिर्विशिष्टकार्याभिमुखप्रवृत्तिता॥

शक्तितः कार्यप्रवृत्तिसंभवात् शक्तितः प्रवृत्तेः लिंगमस्यधासिद्धमिति भावः। स्वतंत्रमचेतनं कारणत्वेनतानुमानसंतस्यसृष्ट्यर्थं प्रवृत्तेरनुप
पत्तेरितिचकारेणानुपपत्तिपदमनुषज्य संयोजनीयं। रचनाप्रवृत्त्योः को भेद इत्याशंक्य प्रवृत्तिस्वरूपमाह॥ साम्येति गुणानां किल साम्यावस्था
तत्वेनाप्रलयः तदा न किंचित्कार्यं भवति प्रलयो भावप्रसंगात्। किं त्वादौ साम्यच्युतिरूपं वैषम्यं भवति। ततः कस्यचिद्गुणस्यांगित्वमुद्भूतत्वेन प्राधान्यं
कस्यचिदंगत्वं शेषत्वमित्यंगांगिभावो भवति। तस्मिन् सति महदादिकार्योत्पादनात्मिका प्रवृत्तिः तया विविधकार्यविन्यासो रचनेति भेद इत्यर्थः॥

गुणानां प्रवृत्तिः चेतनाधिष्ठानपूर्विका प्रवृत्तित्वाद्रथादिप्रवृत्तिवदित्याह ॥ सापीति। विपक्षे त्वचेतने प्रवृत्त्यनुपपत्तिरिति सर्वः॥ केचित्तु भेदानां प्रवृ-
त्तिशक्तिमत्त्वाच्चेतनानधिष्ठिताचेतनप्रकृतिकत्वाभिमित्युक्तेः प्रवृत्तिरिति लिंगं व्याचक्षते। अस्यापि गुणेष्वव्यभिचारः। कार्यत्वविशेषणेन
विरुद्धता ॥ प्रवृत्तिशक्तिमत्त्वे सति कार्यत्वस्य घटादिषु चेतनाधिष्ठितप्रकृतिकत्वेनोक्तसाध्यविरुद्धेन व्याप्तिदर्शनादिति प्रवृत्तेश्चेति सत्त्वेनाप्यपि
तां॥ ननु लोके स्वतन्त्राणां चेतनानां प्रवृत्तिदर्शनेऽपि प्रधानेऽप्रवृत्तिः सिध्यतु तत्राह। दृष्टान्तेति। अनुमानशरणस्य तव दृष्टान्तं विनङ्क्षतीति दूषणार्थमिति भावः।

अपि चाचेतनस्य प्रधानस्य स्वतंत्रस्योपपद्यते। मृदादिष्वदर्शनाद्रथादिषु च। न हि मृदादयो रथादयो वा स्वयमचेतनाः सन्तः चेतनैः कु-
लालादिभिरश्वादिभिर्वानधिष्ठिता विशिष्टकार्याभिमुखप्रवृत्तयो दृश्यन्ते। दृष्टाच्चादृष्टसिद्धिः। अतः प्रवृत्त्यनुपपत्तेरपि हेतोर्नाचेतनं जगत्का-
रणमनुमातव्यं भवति। ननु चेतनस्यापि प्रवृत्तिः केवलस्य न दृष्टा। सत्यमेतत् तथापि चेतनसंयुक्तस्य रथादेरचेतनस्य प्रवृत्तिर्दृष्टा। न त्वचेतनसं-
युक्तस्य चेतनस्य प्रवृत्तिर्दृष्टा ॥

गादिति भावः। ननु प्रधानस्य प्रवृत्तिं वदता चेतनसंसृष्टे प्रवृत्तिर्वाच्यानुमानप्रयुक्तेति सांख्यः शंकते। नन्विति। शुद्धचेतनस्य प्रवृत्त्यसंयोगमङ्गीकरोति। स-
त्यमिति। तर्हि केवलस्याचेतनस्य प्रवृत्तिसिद्धिरन्यायसम्प्रयोगात्तत्राह। तथापीति। केवलस्य चेतनस्याप्रवृत्तावपि चेतनाचेतनयोर्मिथः संबन्धात्प्रवृ-
त्तिरिति भावः। दृष्टान्ते दर्शितं सिद्धान्तं सांख्यो दूषयति। नन्विति। स्वतःप्रवृत्तिरचेतनाश्रयैव दृष्टा। न तु चेतनसंबन्धेनापि चेतनस्य क्वचित्प्रवृत्तिर्दृष्टा। तस्या-

मतः हर्षं श्रुत्वा मध्यस्थः पृच्छति। किंपुनरिति। यस्मिन्नचेतने रथादौ प्रवृत्तिर्दृष्टा तस्यैव सा न चेतनस्तत्र हेतुरिति किं सांख्यमतं साधु उत येन चेतने
नाश्वादिना संयोगादचेतनस्य प्रवृत्तिस्तस्य युक्तस्येति वेदान्तिमतं वा साध्विति प्रश्नार्थः। सांख्य आह। नन्विति। उभयोः प्रवृत्तितदाश्रययोरित्यर्थः। दृ
ष्टान्ते केवलस्य चेतनस्य प्रवृत्त्यदृष्टेश्चेतनसंयुक्तिर्न कल्प्येति भावः। आत्मनोऽप्रत्यक्षत्वे कथं सिद्धिस्तत्राह। प्रवृत्तीति। जीवद्देहस्य रथादिभ्यो वैलक्षण्यं प्रा
णादिमत्त्वलिङ्गं दृष्टमिति कृत्वा चेतनस्य सिद्धिरित्यन्वयः। जीवद्देहः सात्मकः प्राणादिमत्त्वात्। व्यतिरेके रथादिवदित्यात्मसिद्धिरित्यर्थः। देहप्रव

किंपुनरत्र युक्तं। यस्मिन्प्रवृत्तिर्दृष्टा तस्य सा उत यत्प्रयुक्तस्य दृष्टा तस्य सेति। ननु यस्मिन्दृश्यते प्रवृत्तिस्तस्यैव सेति युक्तमुभयोः प्रत्यक्षत्वात्
। न तु प्रवृत्त्याश्रयत्वेन केवलश्चेतनो रथादिवत्प्रत्यक्षः। प्रवृत्त्याश्रयदेहादिसंयुक्तस्यैव तु चेतनस्य सद्भावसिद्धिः। केवलाचेतनरथादिवैल
क्षण्यं जीवद्देहस्य दृष्टमिति। अत एव च प्रत्यक्षे देहे सति दर्शनादसति चादर्शनाद्देहस्यैव चैतन्यमपीति लोकायतिकाः प्रतिपन्नाः। तस्मा
दचेतनस्यैव प्रवृत्तिरिति॥

त्तिः स्वाश्रयाद्भिन्नेन ज्ञानवता संभृता प्रवृत्तित्वाद्रथप्रवृत्तिवदित्यनुमानीतरस्य चेतनापेक्षत्वस्याप्रयोजकत्वं सत्त्वात्मसिद्धिरेव न प्रवृत्तिकर्तृत्वमित्येवका
रार्थः। अनुमितस्य सद्भावमात्रेण प्रवृत्तिहेतुत्वे सर्वत्राकाशादेर्हेतुत्वप्रसङ्गादिति भावः। आत्मनोऽप्रत्यक्षत्वे चार्वाकाणां भ्रमोऽपि लिङ्गमित्याह। अत एवे
ति। अप्रत्यक्षत्वादेवेत्यर्थः। देहात्मनः प्रत्यक्षत्वे प्रमाणसंभवादिति भावः।। दर्शनात्प्रवृत्तिचैतन्ययोरिति शेषः।। ।। ।। ।।

प्रकृतिश्चलाश्रयमल्लमचेतनस्यैवैकस्मिन्नङ्गीकृत्य चेतनस्य प्रयोजकत्वमिति तुं तीक्षाधयति। तदभिधीयत इति। स्यादेतत् अन्धत्वावस्थायां चेतनस्यान्यमप्रति
रेकेणे स्फुटीतामांश्चेतनस्य प्रवर्तकत्वं बाधानामपि संमतमित्याह। लोकायतिकानामपीति। यः प्रवर्तकः तस्य प्रवृत्तिमत्त्वाद्रथादिवद्दृष्टिव्यापारानिष्टापा
काभावान्न प्रवर्तकत्वमिति कश्चिद् दूषयते। नन्विति। अन्यथा देहे व्यभिचाराद्व्याप्तिरिति परिहरति नेति॥ वस्तुतः एकत्वेऽपि कल्पितं द्वैतं तदेव स्पष्टयति साह।

तदभिधीयते। ननु यस्मिन्नचेतने प्रवृत्तिर्दृश्यते तेन तस्येति भवतु तस्यैव सा। सा तु चेतनाद्भवतीति ब्रूमः। तद्भावे भावात्। तदभावे चाभावात्। य
थाकाष्ठादिव्यपाश्रयापि दाहप्रकाशलक्षणा विक्रियानुपलभ्यमानापि च केवले ज्वलने ज्वलनादेव भवति तत्संयोगे दर्शनात् तद्वियोगे चादर्श
नात् तद्वत्। लोकायतिकानामपि चेतन एव देहो अचेतनानां रथादीनां प्रवर्तको दृष्ट इत्यविप्रतिषिद्धं चेतनस्य प्रवर्तकत्वं। ननु तव देहादिसंयुक्तस्या
प्यात्मनो ज्ञानस्वरूपमात्रव्यतिरेकेण प्रवृत्त्यनुपपत्तेः अनुपपन्नं प्रवर्तकत्वमिति चेन्न अयस्कान्तवद्रूपादिवच्च प्रवृत्तिरहितस्यापि प्रवर्तक
त्वोपपत्तेः यथायस्कान्तो मणिः स्वयं प्रवृत्तिरहितोऽप्ययसः प्रवर्तको भवति। यथा वा रूपादयो विषयाः स्वयं प्रवृत्तिरहिता अपि चक्षुरादीनां प्रवर्त
का भवन्ति। एवं प्रवृत्तिरहितोऽपीश्वरः सर्वज्ञः सर्वगतः सर्वात्मा सर्वशक्तिश्च सन् सर्वं प्रवर्तयेदित्युपपन्नं। एकत्वात्प्रवर्त्याभावे प्रवर्तकत्वानुपप
त्तिरिति चेन्न अविद्याप्रत्युपस्थापितनामरूपमायावेशवशेनासकृत्प्रत्युक्तत्वात्। तस्मात्संभवति प्रवृत्तिः सर्वज्ञकारणत्वे नत्वचेतनकारणत्वे॥ ५७
पयोम्बुवच्चेत्तत्रापि॥

नाविद्येति। अविद्याकल्पितेन नामरूपप्रपंचेन तथैवाविद्यारूपमायापदवाच्यया आवेशः कश्चिदात्मनः कल्पितः संबंधः तस्य वशः सामर्थ्यं तेनासकृत् तयोर्मिथ्यात्वा
कर्मीश्वरस्येत्युक्तत्वान्न चोद्यावसर इत्यर्थः॥

अनादिसुरूपप्रवृत्तिः चेतनाधीना प्रवृत्तित्वात् दृष्टादिप्रवृत्तिवदिति स्थितं तत्र क्षीरादौ व्यभिचारमाशंकते सापि पयसस्स्वभावेनैव न तु मानान्तरेण नच
साध्यसिद्धेर्नव्यभिचार इति सूत्रं व्याचष्टे स्यादेतदित्यादिना॥ साध्यपक्षेति। साध्यवत्पक्षेण तुल्यत्वादित्यर्थः। अनुपमासीनव्यभिचारस्फुरितिपावत्
क्षीरे प्रवर्त्तकत्वेन धेन्वादेः सत्त्वाच्च न व्यभिचार इत्याह चेतनापाश्रेति। ऽपदर्शितमनुमानाङ्गमाभ्यां दूतिदोषः। स्वत्रकारस्य क्षीरवत्स त्वापीति वत्सकुः प्र
स्यादेतत् यथा क्षीरमचेतनं स्वभावेनैव वत्सविवृद्धये प्रवर्त्तते। यथा चु जलमचेतनं स्वभावेनैव लोकोपकाराय स्यन्दते। एवं प्रधानमचेतनं स्वभावे
नैव पुरुषार्थाय प्रवर्त्स्यति इति। नैतत्साधु मन्यते। यतस्तु यदपि पयोम्बुनोश्चेतनाधिष्ठितयोरेव प्रवृत्तिरिति अनुमिमीमहे। ऽसमवादिप्रसिद्धेर
पादेव चेतने केवलेप्रवृत्तसहदीनात्वात् स्वंच्यमोपम्यु। तिष्ठन्यापो तरो यमयतीति श्रुतेरस्वदा स्वरसप्रशामनेगाम्भिमाहोमानयः स्पंदते इतीवं जातीय
केऽसमस्तस्य लोकपरिस्पंदितस्यैश्वराधिष्ठितत्वाश्रावयति। तस्मात्साध्यपक्षनिक्षिप्तत्वात्पयोम्बुपदिस्तनुपपन्नाः। चेतनापाश्रधेन्वाः स्नेहेच्छयोप
पूलतस्य वृत्तिफलोपपत्तेः। वत्सचोषणेन च परमसंस्थानरूपमाणस्य स्नेहाध्येतो फलं तत्तमतपेक्षा निम्न मृत्याघपेक्षत्वात्स्पंदनस्य। चेतनापेक्षत्वेन तु सर्व
त्रोपदर्शितं। ऽपसंहारदर्शनान्नेति चेत्न क्षीरवद्धीमत अनुवाद्य निमित्तनिरपेक्षामपि साश्रयं कार्यं भवतीति तत्त्वकौमुदी प्रदर्शितं। इतिदर्शितं। स्याद्व
दस्मात्तु पुनः सर्वत्रैवेश्वरापेक्षत्वमापद्यमानं न परं गृह्यते॥ ॥व्यतिरेकान्न च स्थितेश्वरानपेक्षत्वात्। सांख्यानां त्रयो गुणाः सांस्मिके नायु तिष्ठमा
नाः प्रधानं न तु तद्व्यतिरेकेण प्रधानस्य प्रवर्त्तकं निवर्त्तकं वा किंचिदप्यनपेक्ष्यमवस्थितमस्ति। पुरुषस्तूदासीनो न प्रवर्त्तको न निवर्त्तक इत्यतो
नपेक्षं प्रधानमनपेक्षत्वात् कदाचित्प्रधानं महदाद्याकारेण परिणमते कदाचिन्न परिणमत इत्येतदयुक्तं। ईश्वरस्य तु सर्वज्ञत्वात् सर्वशक्तित्वान्महामाय
त्वाच्च प्रवृत्तिनिवृत्ती न विरुध्येते॥
र्वा परविरोधमाशंक्य सलोकदृष्टांताश्रयदृष्टाच्चान्तर्वर्त्तमिति विरोधमाह। उपसंहारेति। अव्यक्तप्रधानस्यापि धर्मादिकमपुरुषार्थाप्रवर्त्तने फेरत्साह्यं कमसञ्ज्ञय
न्तं तत्प्रयासेष्टे। सांख्यानामित्यादि। न प्रधानव्यतिरिक्तं कर्मलोन्तर्वस्थितः पुरुषस्तूदासीनस्वत्कदाचित्स्थितप्रवृत्तिः कदाचिन्निवृत्तिरस्त्वयुक्तमित्यर्थः। कर्म

सोपि प्रधानात्मकस्याचेतनत्वात्स्वासमत्वाद्धनिकादावि कश्च
तिनिपामकत्वमितिभावः॥

ब्र॰सू॰भा॰२ पुनरपि दूषणं न बलात्प्रधानस्य सत एव क्षीरादिवत्प्रवृत्तिरित्याशंक्य निषेधति सूत्रकारः । अन्यत्रेत्यादिनोत्तरति । कथमिति निमित्तान्तरेति । धेन्वादि
४८ निमित्तान्तरमस्तीति सिद्धान्तयति । अत्रोच्यत इति । प्रहीणं नष्टं यदुक्तं क्षीरस्य स्वेच्छया संपादयितुमशक्यत्वात्स्वाभाविकत्वमिति तत्राह । न च यथाकाममिति ।

अन्यत्राभावाच्च न तृणादिवत् ॥ ॥ स्यादेतत् । यथा तृणपल्लवोदकादि निमित्तान्तरनिरपेक्षं स्वभावादेव क्षीराद्याकारेण परिणमते । एवं प्रधानमपि
महदाद्याकारेण परिणंस्यत इति । कथं च निमित्तान्तरनिरपेक्षं तृणादीति गम्यते । निमित्तान्तरानुपलम्भात् । यदि हि किंचिन्निमित्तमुपलभेमहि ततो यथा
कामं तेन तेन तृणाद्युपादाय क्षीरं संपादयेमहि । न तु संपादयामहे । तस्मात्स्वाभाविकस्तृणादेः परिणामः । तथा प्रधानस्यापि स्यादिति । अत्रोच्यते । भवेत्तृ
णादिवत्स्वाभाविकः प्रधानस्यापि परिणामो यदि तृणादेरपि स्वाभाविकः परिणामोऽभ्युपगम्येत । न त्वभ्युपगम्यते निमित्तान्तरोपलब्धेः । कथं निमित्ता
न्तरोपलब्धिः । अन्यत्राभावात् । धेन्वैव ह्युपभुक्तं तृणादि क्षीरीभवति न प्रहीणमनडुदाद्युपभुक्तं वा । यदि हि निर्निमित्तमेतत्स्याद्धेनुशरीरसंबंधादन्यत्रा
पि तृणादि क्षीरीभवेत् । न च यथाकामं मानुषैर्न शक्यं संपादयितुमित्येतावता निर्निमित्तं भवति हि किंचित्कार्यं मानुषसंपाद्यं किंचिद्दैवसंपाद्यं । मनु
ष्या अपि शक्नुवंत्येवोचितेनोपायेन तृणाद्युपादाय क्षीरं संपादयितुं प्रभूतं हि क्षीरं कामयमानाः प्रभूतं घासं धेनुं चारयंति । ततश्च प्रभूतं क्षीरं लभंते
। तस्मान्न तृणादिवत्स्वाभाविकः प्रधानस्य परिणामः ॥ ॥ अभ्युपगमेऽप्यर्थाभावात् ॥ ॥ स्वाभाविकी प्रधानप्रवृत्तिर्न भवतीति स्थापितं । अथापि नाम ४८
भवतः श्रद्धामनुरुध्यमानाः स्वाभाविकीमेव प्रधानस्य प्रवृत्तिमभ्युपगच्छेम । तथापि दोषोऽनुषज्येतैव कुतोऽर्थाभावात् । यदि तावत्स्वाभाविकी प्रधानस्य
प्रवृत्तिः । न किंचिदन्यदिहापेक्षत इत्युच्यते । ततो यथैव सहकारि किंचिन्नापेक्षते । एवं प्रयोजनमपि किंचिन्नापेक्षिष्यते ।

प्रधानस्य न स्वतः प्रवृत्तिः स्वतः प्रवृत्त्यभ्युपगमे पुरुषार्थसापेक्षाभावप्रसंगादित्यर्थः ॥ ॥ ॥ ॥

तत्रेष्टापत्तिं निरस्यति। इत्यतः प्रधानमिति। उक्तप्रसंगस्येष्टत्वे प्रतिज्ञाहानिः स्यादित्यर्थः। अर्थात्संभवादित्यतः प्रवृत्तिरित्यंतरं शंकापूर्वकमा
ह॥ स्वपरीत्यादिना। प्रयोजनमपेक्षितं चेदुक्तमपि साह। तथापीति। कूटस्थे पुरुषे स्वतः सुखादिरूपस्यातिशयस्याधातुमशक्यत्वात्स्वांगीकारश्चे
द्भोगो न मुक्तिः। किंच प्रधानप्रवृत्तेर्भोगार्थत्वे तस्य हेतुविवेकख्यात्यभावादनिर्मोक्षप्रसंगश्च। अपवर्गार्थत्वे विवेकख्यातिरूपफलस्य स्वतःसिद्धत्वात्

इत्यतः प्रधानं पुरुषस्यार्थस्य साधयितुं प्रवर्तत इति प्रतिज्ञा हीयेत। स्यादेतत् नहि कार्यं वक्तव्यं केवलं नापेक्षते तु नु प्रयोजनमपीति। तथापि प्रधा
नप्रवृत्तेः प्रयोजनं विवेकख्यातिर्भोगो वा स्यादपवर्गो वा भवेदिति। भोगश्चेत्कौतूहलनिवृत्तिः शब्दाद्युपलब्धितो यस्य पुरुषस्य भोगो भवेदनिर्मोक्षप्रसंगश्चापव
र्गश्चेत्सोऽपि प्रवृत्तेः प्रागपवर्गस्य सिद्धत्वात्प्रवृत्तिरनर्थिका स्यात्। शब्दाद्यनुपलब्धिप्रसंगश्च। उभयार्थतायामुपगमेऽपि भोक्तव्यानां प्रधानमात्रा
णामानंत्यादनिर्मोक्षप्रसंग एव। न चौत्सुक्यनिवृत्त्यर्था प्रवृत्तिः। नहि प्रधानस्याचेतनस्यौत्सुक्यं संभवति। न च पुरुषस्य निर्मलस्य निष्कल
स्यौत्सुक्यम्। दृक्शक्तिसर्गशक्तिवैयर्थ्यभयाच्चेत्प्रवृत्तिः तर्हि दृक्शक्त्यनुच्छेदवत्सर्गशक्त्यनुच्छेदादनिर्मोक्षप्रसंग एव। तस्मात्प्रधानस्य पु
रुषार्थप्रवृत्तिरित्येतदयुक्तं॥

वृत्तिवैयर्थ्यं भोगाभावप्रसंगश्चेत्यर्थः। तृतीयं दूषयति उभयार्थतेति। मीमांसते औत्सुक्येति। भोगार्थः औत्सुक्यनिवृत्त्यर्थं यथा क्रियासु प्रवर्तते लो
कः पुरुषस्य विमोक्षार्थं प्रवर्तते तद्वदव्यक्तमिति कारिकोक्तं दूषयति। न चेति। औत्सुक्यमिच्छाविशेषः केवलं तदसामर्थ्यं तद्धानमुक्तमित्यर्थः। अस्ति पुरु
षस्य दृक्शक्तिः चिद्रूपत्वात्। अस्ति च प्रधानस्य सर्गशक्तिः त्रिगुणत्वात्। तयोरुभयोः दृक्शक्तिं विना सार्थक्याभावात्प्रधानस्य प्रवृत्तिरिति चे
न्न उभयोर्नित्यत्वात्स्वशक्तिनित्यत्वापत्तिरित्याह दृक्शक्तीति॥

सां.का.भा.२ ५९ पुरुषस्य प्रवर्तकत्वं निरस्तमपि दृष्टांतेन पुनराशंक्य निषेधति। पुरुषाश्मवदिति। प्रधानस्य स्वातंत्र्यं पुरुषस्यौदासीन्यं चाभ्युपेतं स्वमते इति वदंतं
सांख्यं प्रत्याह। कथं चेति। पुरुषस्य परिस्पंदः प्रयत्नगुणो वा नास्तीति विकुर्वतेत्स्वरूपं। प्रधानपुरुषयोर्नित्यत्वाद्व्यापित्वाच्च नित्यः सन्निधिः अक्रमनस्तु परि
मार्जनमनुलेपनं स्थापनमनित्यसन्निधिश्चेति व्यापारोऽस्तीति तत्र उपन्यासः समदृष्टांतो यस्मात् सोऽत्र भवतीत्यर्थः। ननु चित्रकृद्यमोऽयं दृष्टांतः भावयोग्यता स्ति

पुरुषाश्मवदिति चेत्तथापि॥ ॥स्यादेतत् यथा कश्चित्पुरुषो दृक्शक्तिसंपन्नः प्रवृत्तिशक्तिविहीनः पंगुरपरं पुरुषं प्रवृत्तिशक्तिसंपन्नं दृ
क्शक्तिविहीनं अंधमधिष्ठाय प्रवर्तयति। यथा वायस्कांतो लोहं स्वसन्निधिमात्रेण प्रवर्तयति। एवं पुरुषः प्रधानं प्रवर्तयिष्यति।
इति दृष्टांतद्वयेन पुनः प्रत्यवस्थानमत्रोच्यते। तथापि नैव दोषान्निर्मोक्षोऽस्ति। अभ्युपेतहानं तावद्दोष आपततीति। प्रधानस्य स्वतंत्रस्य प्रकृतेरभ्युप
गमात् पुरुषस्य च प्रवर्तकत्वानभ्युपगमात्। कथं चोदासीनः पुरुषः प्रधानं प्रवर्त्तयेत्। पंगुरपि हि अंधं वागादिभिः पुरुषं प्रवर्तयति नैवं पुरुषस्य कश्चि
दपि प्रवर्तनव्यापारोऽस्ति निष्क्रियत्वात्। निर्गुणत्वाच्च। नाप्ययस्कांतवत्संनिधिमात्रेण प्रवर्त्तयेत्॥ सन्निधिनित्यत्वेन प्रवृत्तिनित्यत्वप्रसंगात्। अयस्कां
तस्य तु अनित्यसन्निधिरस्ति स्वव्यापारः सन्निधिः परिमार्जनाद्यपेक्षा चास्तीत्यनुपन्यासः पुरुषाश्मवदिति। तथा प्रधानस्याचेतनत्वात् पुरुषस्य चोदासी ५९
न्यात् तृतीयस्य चतन्मयाभावात्। संबंधपितुर्भावान्न संबंधानुपपत्तिः योग्यतानिमित्तेऽश्चसंबंधे योग्यत्वानुच्छेदादनिर्मोक्षप्रसंगः। पक्षैकदेशिनं प्रत्याह नावेनि
के त्वपि तत्वः॥
त पाताद्यावदः संबंधस्तत्राह। योग्यतेति चिद्रूपत्वरूपा या योग्यता या नित्या सा तत्संबंधानित्यत्वापत्तिरित्यर्थः। यथा स्वतंत्रप्रधानप्रवृत्तिपक्षे भोगोऽपवर्गोऽभयं
वा फलमिति विकल्पदूषितः। एवं पुरुषाधीनप्रधानप्रवृत्तिपक्षेऽपि फलाभावेन दूषणान्तरमाह। पक्षे चेति॥

सिद्धांते परमात्मन उदासीनस्य कूटस्थस्य प्रवर्तकत्वमित्याशंक्याह। परमात्मेति। सांख्यमतेऽभ्युपेतविरुद्धत्वात् अस्मन्मते कल्पिताकूटस्थितयोरविरोधस्य
तिशयः। किं प्रधानावस्थायाः कूटस्थत्वमिष्यते उत विकारिता। आद्ये दोषमाह। तस्मादिति। अंगांगिभावे साम्यस्वरूपतच्युतिः स्यात् ततः कौटस्थ्यभंग इति भा
दंगांगिभावानुपपत्तेः स्वरूपानुपपत्तिरित्यर्थः। द्वितीयं दूषयति। बाह्येति। चिरकालं स्थितस्य साम्यस्य च्युतौ निमित्तं वाच्यं तन्नास्तीत्यर्थः। गुणानां मिथो

परमात्मनस्तु स्वरूपव्यपाश्रयमौदासीन्यं मायाव्यपाश्रयं च प्रवर्तकत्वमित्यस्त्यतिशयः॥ ॥अंगित्वानुपपत्तेश्च॥ इतश्च न प्रधानस्य प्रवृ
त्तिरवकल्पते। यद्धि सत्त्वरजस्तमसां अन्योन्यगुणप्रधानभावमुत्सृज्य साम्येन स्वरूपमात्रेणावस्थानं प्रधानावस्था। तस्यामवस्थायामनपेक्षस्व
रूपाणां स्वरूपप्रणाशभयात्परस्परं प्रत्यंगांगिभावानुपपत्तेः। बाह्यस्य कस्यचित्क्षोभयितुरभावात् गुणवैषम्यनिमित्तो महदाद्युत्पादो न स्यात्॥ अ
न्यथानुमितौ च ज्ञशक्तिवियोगात्॥ अथापि स्यादन्यथा वयमनुमिमीमहे। यथा नायमनंतरो दोषः प्रसज्येत॥ न ह्यनपेक्षस्वभावाः कूटस्थाश्चा
स्माभिर्गुणा अभ्युपगम्यंते। प्रमाणाभावात्। कार्यवशेन तु गुणानां स्वभावोऽभ्युपगम्यते। यथा यथा कार्योत्पाद उपपद्यते तथा एषां स्वभावोऽभ्युपगम्य
ते॥ यथा यथा कार्योत्पाद उपपद्यते तथा तथा एषां स्वभावोऽभ्युपगम्यतां॥ चलं गुणवृत्तमिति चास्त्यभ्युपगमः। तस्मात्साम्यावस्थायामपि वैषम्यो
पगमयोग्या एव गुणा अवतिष्ठंत इति॥

नपेक्षस्वभावत्वान्न गुणेषु वैषम्यमित्युक्तं। तत्र हेत्वसिद्धिमाशंक्य सूत्रकारः परिहरति। अन्यथेति। अनपेक्षस्वभावादन्यथा सापेक्षत्वेन गुणानाम
नुमाने पूर्वसूत्रोक्तो दोषो न प्रसज्यते। न चैवमपसिद्धांतः कार्यानुसारेण गुणस्वभावांगीकारादित्याह। चलं गुणवृत्तमिति॥ ७ ५

एवंलब्धो गुणांगित्वानुपपत्तिर्हेतुवैषम्याभावमंगीकृत्य परिहरति। एवमपीति। कार्यार्थं ज्ञानकल्पने ब्रह्मवादः स्यादित्यर्थः। अंगीकारं त्यजतीति। वै
षम्येति। सूत्रं व्याचष्टे। परस्परेति। त्वङ्मात्रमेव ज्ञानेंद्रियमेकमंतःकरणं श्रोत्रादिज्ञानकरणं पंच कर्मेंद्रियाणि मनश्चेति सप्तेंद्रियाणि ज्ञानेंद्रियाणि पं
च कर्मेंद्रियाणि पंच मनश्चेत्येकादश। बुद्धिरहंकारो मन इति त्रीणि। एकमिति बुद्धिरेव। एवं पूर्वापरविरोधादित्य व्याख्याय श्रुतिस्मृतिविप्रतिषे

एवमपि प्रधानस्य ज्ञशक्तिवियोगाद्रचनानुपपत्त्यादयः पूर्वोक्ता दोषास्तदवस्था एव। ज्ञशक्तिमपि त्वनुमिमानः प्रतिवादित्वान्निवर्तेत। चेत
नमेकमनेकप्रपंचस्य जगत उपादानमिति ब्रह्मवादप्रसंगात्। वैषम्योपगमयोग्या अपि गुणाः साम्यावस्थायां निमित्ताभावान्नैव वैषम्यं
भजेरन्। भजमाना वा निमित्ताभावाविशेषान्नित्यमेव वैषम्यं भजेरन्निति प्रसज्यत एवायमनंतरो दोषः॥ ॥विप्रतिषेधाच्चासमंजसं॥ ॥
परस्परविरुद्धश्चायं सांख्यानामभ्युपगमः। क्वचित्सप्तेंद्रियाण्यनुक्रामंति क्वचिदेकादश। तथा क्वचिन्महतस्तन्मात्रसर्गमुपदिशंति।
क्वचिदहंकारात्। तथा क्वचित्त्रीण्यंतःकरणानि वर्णयंति। क्वचिदेकमिति॥ प्रसिद्ध एव तु श्रुत्येश्वरकारणवादिन्या विरोधः। तदनुवर्तिन्या च
स्मृत्या। तस्मादप्यसमंजसं सांख्यानां दर्शनमिति॥ अत्राह। नन्वौपनिषदानामप्यसमंजसमेव दर्शनं। तप्यतापकयोर्जात्यंतरभावान
भ्युपगमात्॥

धाच्चेत्यर्थान्तरमाह। प्रसिद्ध इति। तस्माच्छ्रुतिमूलत्वात्स्मृत्यास्य तेन निर्दोषवेदांतसमन्वयस्य न विरोध इति सिद्धं॥ स्वमतासामंजस्यमसहमा
नः सांख्यः प्रत्यवतिष्ठते॥ अत्राहेति

५०

विद्धत्येति। एकं हीति। तथाच भेदव्यवहारस्योपद्रवस्य समंजसमित्यर्थः। ननु तयो रूपादृतैकोपि मिथो भेदोस्त्येव। प्रत्येकवस्त्वात्मकयोरौष्ण्यप्रकाशयोरतो
नव्यवहारलोपदूषणं कर्वहरि वताभ्यामात्मनो मोक्षो न स्यादित्याह। यदि चेत्यादिना। ननु सत्यपि धर्मित्वे स्वभावनाशो मोक्ष उपपद्यते। इत्येव जलवीच्या
दिनाद्दृष्टान्तादित्याशंक्य दृष्टान्तासिद्धिमाह। योपीति। किंच भेदांगीकारेऽपसिद्धान्तः। अनंगीकारे लोकप्रसिद्धबाध इत्याह। प्रसिद्धश्चेति। अर्थीद्विजेनाऽला

एकं हि ब्रह्म सर्वात्मकं सर्वस्य प्रपंचस्य कारणमभ्युपगच्छतां एकस्यैवात्मनो विशेषौ तप्यतापकौ न नाम संतप्यतौ रुस्त्वभ्युपगंतव्यं स्यातां। यदि चै
तौ तप्यतापकौ एकस्यात्मनो विशेषौ स्यातां ताभ्यां तप्यतापकाभ्यां न निर्मुच्यत इति तापोपशान्तये सम्यग्दर्शनमुपदिशत् शास्त्रमनर्थकं स्यात्। न
ह्यौष्ण्यप्रकाशधर्मस्य प्रदीपस्य तदवस्थस्यैव ताभ्यां निर्मोक्ष उपपद्यते। योपि जलतरंगवीचीफेनाद्युपन्यासस्तत्रापि जलात्मन एकस्य वीच्यादयो
विशेषा आविर्भावतिरोभावरूपेण नित्या एवेति समानो जलात्मनो वीच्यादिभिरनिर्मोक्षः। प्रसिद्धश्चायं तप्यतापकयोर्जात्यन्तरभावो लोके। तथाहि। अ
र्थी चार्थश्चान्योन्यभिन्नौ लक्ष्येते। यद्यर्थिनः स्वतोऽन्योऽर्थो न स्याद्यस्यार्थिनो यद्विषयमर्थित्वं स तस्यार्थो नित्यसिद्ध एवेति न तस्य तद्विषयमर्थित्वं
स्यात्। यथा प्रकाशात्मनः प्रदीपस्य प्रकाशाख्योऽर्थो नित्यसिद्ध एवेति न तस्य तद्विषयमर्थित्वं भवत्यप्राप्ते ह्यर्थेऽर्थिनोऽर्थित्वं स्यादिति। तथार्थस्याप्य
र्थत्वं न स्याद्यदि स्यात् स्वार्थत्वमेव स्यात्। न चैतदस्ति॥

भादिनार्थिनं तापयतीति तापकः। अर्थीति। तप्यतापकयोर्भेदे बाधकमाह। यदीति। अर्थिनोऽन्यस्यार्थस्याभावादर्थित्वाभाववदर्थादन्यस्यार्थिनोऽसत्त्वादर्थत्वाभा
वः प्रसज्येतेत्याह। तथार्थस्यापीति। प्रसंगस्येष्टत्वं निराकरोति। नचैतदस्तीति। अर्थित्वं हि कामनाविषयत्वं तच्च कामाद्दन्यस्य कामयितुरसत्त्वान्नस्या
न्नहि स्वस्य स्वार्थ्यं यस्मान्नास्ति। कामस्यैव कामयितृत्वायोगात्तस्माद्भेदांगीकार्य इत्यर्थः॥

सा·स·भा·२ इत्यस्य भेद इत्याह॥ संबंधीति। तथाऽनर्थानर्थिनावपि भिन्नाविति सत्वपुरुषयोः। अर्थानर्थयोः स्वरूपेण ति(?)पूर्वकं तापकत्वं स्फुटयति। अर्थिनोनुकूल इति। अत्रैवं
तमते मुक्तेरयोगमुक्तस्य मते योगमाह। जात्यंतरेति। तथा च तप्यतापकयोः पुरुषबुद्धिसत्वयोः संयोगः स्वस्वामिभावः। तस्य हेतुरनादिरविवेकस्तस्य परिहारो विवेक
५१ स्तस्मान्नित्यमुक्तस्यापि पुरुषस्य कथंचिद्दुःखप्राप्त्यासोपपत्तिरित्यर्थः। यत्कामो भगवाँल्लयपराजयौ राजन्युपचर्यते। तथा पुरुषाद्धत्वं ताभिन्नबुद्धिगतैव

संबंधिनावुद्दिश्येते अर्थी चार्थश्चेति तयोश्च संबंधिनोः सर्वधःस्यान्नैकस्यैव। तस्माद्भिन्नावेतौ अर्थार्थिनौ। तथाऽनर्थानर्थिनावपि। अर्थिनोनुकू
लोर्थः प्रतिकूलोनर्थस्तत्राभिमतः पर्यायेणाभ्यां संबध्यते। तत्रार्थस्याल्पीयस्त्वात्तु भूयस्त्वाच्चानर्थस्य भावादर्थी नर्थीचन पर्येवेति तापकः
सम्बध्यते। तप्यस्तु पुरुषो यदेकः पर्यायेणोभाभ्यां संबध्यतेऽतः तत्संयोगस्तप्यतापकयोरेकात्मकतायां मोक्षानुपपत्तिः। जात्यंतरभावे तु तत्संयोगहे ५१
तुपरिहारात्तस्मादपि कदाचिन्मोक्षोपपत्तिरिति। अत्रोच्यते। नैकत्वादेव तप्यतापकभावानुपपत्तेर्नैवदेव दोषोपपद्यकाल्मता। तथा तापकाव
ध्योन्यस्य विषयविषयिभावप्रतिपद्यमानो। नत्वेतदस्ति। एकत्वादेव। नह्यग्निरेकः सन्नात्मानं दहति प्रकाशयति वा। स तस्मात् प्रकाश्यादिध
र्मभेदे परिणामित्वे च। किमुत स्यात् सत्येकस्मिन् तप्यतापकभावः संभवेत्। कुतः पुनरयं तप्यतापकभावः स्यादिति। उच्यते। किं न पश्यसि कर्मभूतं तेजो
वदेहस्तप्यस्तापकः सवितेति॥

धर्मोसौ पुरुषे उपचर्यते। तदुक्तं सैव च बध्यते मुच्यत इति सिद्धांतयति। अत्रेति। किं परमार्थदृष्ट्यातप्यतापकभावानुपपत्तिरुच्यते व्यवहारदृष्ट्या वा। ना
द्यइत्याह नैकत्वाद्येति। दोकर्त्राभिनिवेशः। तस्मादेव त्वं विस्फो ति। भवेद्दिलादिना। एतता विर्कं विषयविषयिभिन्नं नत्वस्तीत्यर्थः॥ मत्रतप्यतापकभा

बोद्धृत्वं तत्रैवेति व्यवहारस्य कारणमस्तीति ब्रूते। किंन परपक्षीति॥

देहस्यातत्पक्षे देहात्मवादापत्तिरिति शंकते । नन्विति । अचेतनस्यैव देहस्य तत्सिद्धेर्नेति वदता सांख्येन वक्तव्यं । किं चेतनस्य केवलस्य तत्सिद्धिः किं वा देहसं-
हतस्य उत तस्य : आद्ये चित्त्वस्य नाशादृष्टादिरुच्यत इति । नद्वितीयमतौ विसाहनापीत्यादिना चतुर्थं शंकते । सत्वमिति । सत्वरजसोस्तत्र ताप-
कत्वे पुरुषस्य बंधाभावो मोक्षशास्त्रानर्थक्यमिति परिहरति । नताभ्यामिति । असंगत्वेपि पुरुषस्य तस्य सत्वप्रतिबिंबतातस्सिरिति शंकते । सत्वेति । नहि

ननु तस्मिन्नपि न दुःखं साचेतस्यापि तु नोऽचेतनस्य देहस्य पक्षे हि देहस्यैव तत्सिद्धिः स्यात्तथा देहनाशे स्वयमेव नश्यतीति तन्नाशाय साधनं नैषितव्यं स्यादि-
ति । उच्यते । देहाभावे केवलस्य चेतनस्य तत्सिद्धिर्न दृष्टा । न च तत्रापि तत्सिद्धिर्न तु विशिष्टस्य चेतस्यापि तु केवलस्यैष्यते । नापि देहचेतनयोः संहतत्वमसंभवादि-
दोषप्रसंगात् । न च तत्संसर्गे एव तत्सिद्धिमभ्युपगच्छामि । कथं तत्रापि तस्य तापकभावः । सत्वं तस्य तापकं रज इति चेन्न । ताभ्यां चेतनस्य संहतत्वानुपप-
त्तेः । सत्वानुरोधिनश्चेतनोऽपि तस्य तद्वेति चेत् । परमार्थतस्तर्हि नैव तस्य तद्दुःखापत्तिर्वस्तुतः संभवो गतात् । न चेतस्यैतेनैव बन्धो दोषाय न
हि दंडभयः सर्पस्येवेत्येतावता सर्वदा भवति । सर्पो यादृग्भयं दृष्टेऽपि तावता निर्विशेषः तस्मादविवेकतो यं तस्य तापकभावः । न पारमार्थिक इत्यभ्यु-
पगंतव्यमिति । नैवं सति ममापि किं छिन्नं दुष्यति ॥
जलचंद्रस्य चलनवत्प्रतिबिंबे तत्संबंधसंस्कारस्यागतस्य साह । परमार्थेनेति । इदं दृष्टमात्रेण कथं मिथ्यात्वस्यागम इति चेदुच्यते दृश्यदृश्यस्य
बुद्धिसत्वस्य दृश्यं भूते । तन्मात्रदृश्यपुरुषस्य तत्स्वरूपं चैतन्य । स्थितमेव वस्तु तत्स्वभावादिसुपपादयति । न चेदिति । पुरुषो वस्तुतस्तत्प्रतिबिंबात्के
दित्व दोषात् दोषापत्तिं मिथ्यात्वदिपरत्वादिरूपार्थः । मिथ्यात्वं दृश्यमेव दोष इति चेन्नेत्याह । नहीति । सविषयत्वं निर्विषयत्वं चेत्यदार्थः कल्पित एव दृष्ट्यः ।
सांख्यस्याविवेकेन तस्य तापकत्वे सति ममापि किं छिन्नं दुष्यति किं तु दृश्यमेव संपन्नमिति सर्वः ॥

पादि मिथ्यात्वं तथात्वांगीकारेऽपसिद्धांतः स्यादिति भावः। सत्यं तथापि पुरुषस्य मोच्यते तथाप्यपसिद्धांतः। कौटस्थ्यहानादिति। नैर्मल्यस्वच्छत्वलक्षणात्मस्वभावनित्यत्वस्यापि
गादित्याह। अयोग्यतादिना किंच रजस्तमो नित्यत्वात् दुःखसातत्यमित्याह। नित्यत्वे ति। अत्र सांख्यः शंकते। तथ्येति। सत्यं पुरुषो वा तथापि किं तापकस्य किं खुर
शा॰सू॰भा॰२ जः निमित्तमविवेकात्मकमदर्शनं तमः तेन सहितः सनिमित्तः संयोगः पुरुषस्य गुणैः स्वामित्वरूपः तद्रूपेत्यत्वादित्यर्थः। मोक्षस्तदभावः निमित्तस्य निवृ
५२

अथ पारमार्थिकमेव चेत्तत्सत्यत्वमभिगच्छसि। तथैव सुतरामनिर्मोक्षः प्रसज्येत नित्यत्वाभ्युपगमाच्च तापकस्य तप्यतापकशक्त्योर्नित्यं
त्वेऽपि सनिमित्तसंयोगापेक्षत्वात् तपेः संयोगनिमित्तादर्शननिवृत्तावात्यंतिकः संयोगोपरमस्ततश्चात्यंतिको मोक्ष उपपन्न इति चेन्न। नादर्श
नस्य तमसो नित्यत्वाभ्युपगमात् गुणानां चोद्भवाभिभवयोरनियतत्वादनियतः संयोगनिमित्तोपरम इति वियोगस्याप्यनियतत्वात् सैवानि
र्मोक्षो परिहार्यः स्यात्। औपनिषदस्यात्मैकत्वाभ्युपगमाद्वैकस्य च विषयविषयिभावानुपपत्तेः विकारभेदस्य च वाचारंभणमात्रत्वश्रवणादनि
र्मोक्षशंका स्वप्नेऽपि नोपजायते। व्यवहारे तु यत्र यथा दृष्टस्तप्यतापकभावस्तत्र तथैव स इति न चोदयितव्यः परिहर्तव्यो वा भवति॥ ॥

त्वभावात् न मोक्ष इति सिद्धांती परिहरति। नेति। नमसो नित्यत्वस्वभावेऽपि विवेकेनोपरमान्मोक्षसंभवस्याह गुणानां चेति। च त्वं गुणानां निःसर्गीका
रादिति भावः। परपक्षे धर्मोऽस्त्यानुपपत्तिमुक्त्वा स्वपक्षमुपसंहरति। औपनिषदस्य त्विति। वस्तुत एकत्वेन बंधाभावान्न मुक्तस्य भावशंकावसर इ
व्यवहारे तु भेदांगीकारात्तप्यतापकभावोऽर्थवत्त्वज्ञानात्तन्निवृत्तिश्चोपपद्यत इति न चोद्यावसरः॥ ॥ ॥ ॥ ५२

कृत्वानुवादेन महद्दीर्घवदिति स्वमतस्थापनात्मकाधिकरणस्य संगतिमाह। प्रधानेति। यद्यपि सांख्यमतनिरासानंतरं परमाणुवादो निराकर्तव्यः। स्वमतस्थापनस्य स्मृतिपादे संगतत्वान्नापि पूर्वत्र प्रधानगुणानां सत्वादीनां जगत्समन्वयात्प्रधानस्यानुपादानत्वमुक्तं। तथा ब्रह्मगुणचैतन्यानन्वयाद्ब्रह्मणोपि नोपादानत्वमिति दिग्दोषो दृष्टांतसंगतिलाभाद्वस्तुमात्रेऽधीमतन्त्रस्य यः। चेतनात् ब्रह्मणो जगत्त्व जीवादीये दृष्टांतसमन्वयो विषयः। सकिं यः समवायिकारणगुणः सकार्ये स्वे स्वसमानजातीयगुणारंभकस्तेतु शौक्ल्यवदिति मायेन विरुध्यते तेन वेति संदेहे न्यायस्याव्यभिचारादिरुध्यत इति प्राप्ते व्यभिचारान्नो विरोध इति सिद्धांतसूत्रं व्याचष्टे ह्रस्वेत्यादिना। यद्यपि न विलक्षणत्वादित्यत्र चेतनादचेतनसर्गः साधितः तथापि वैशेषिकन्यायमस्तदीयप्रक्रियया व्यभिचारो न व्यक्ता

प्रधानकारणवादो निराकृतः। परमाणुकारणवादस्त्विदानीं निराकर्तव्यः। तत्रादौ तावद्योऽणुवादिना ब्रह्मवादिनि दोष उत्प्रेक्षते स प्रतिसमाधीयते। तत्रायं वैशेषिकाणामभ्युपगमः कारणद्रव्यसमवायिनो गुणाः कार्यद्रव्ये समानजातीयं गुणांतरमारभंते। शुक्लेभ्यस्तंतुभ्यः शुक्लस्य पटस्य प्रसवदर्शनात् तद्विपर्ययादर्शनाच्च। तस्माच्चेतनस्य ब्रह्मणो जगत्कारणत्वेऽभ्युपगम्यमाने कार्येऽपि जगति चैतन्यं समवेयात् तद्दर्शनात्तु न चेतनं ब्रह्म जगत्कारणं भवितुमर्हतीति। इममभ्युपगमं तदीययैव प्रक्रियया व्यभिचारयति॥ ॥महद्दीर्घवद्वा ह्रस्वपरिमंडलाभ्यां॥ ॥एषा तेषां प्रक्रिया॥ परमाणवः किल कंचित्कालमनारब्धकार्या यथायोगं रूपादिमंतः पारिमांडल्यपरिमाणाश्च तिष्ठंति। ते च पश्चाददृष्टादिपुरःसराः संयोगसचिवाः संतो द्व्यणुकादिक्रमेण कृत्स्नं कार्यजातमारभंते। कारणगुणाश्च कार्ये गुणांतरं। यदा द्वौ परमाणू द्व्यणुकमारभेते तदा परमाणुगतरूपादि~~...~~ ~~योगसचिवाः संतो द्व्यणुकादिक्रमेण कृत्स्नं कार्यजातमारभं~~ गुणविशेषाः शुक्लादयो द्व्यणुके शुक्लादीनपरानारभंते। परमाणुगुणविशेषस्तु पारिमांडल्यं द्व्यणुके पारिमांडल्यमपरमारभंते। द्व्यणुकस्य परिमाणांतरयोगाभ्युपगमात्। अणुत्वह्रस्वत्वे हि द्व्यणुकवर्तिनी परिमाणे वर्णयंति

दृश्यस्य च अस्य जगतोऽर्थिता। प्रलयकाले परमाणवो निश्चला असंयुक्तास्तिष्ठंति। सर्गकाले चादृष्टवशात्संयोगात्तेषु कर्म भवति। तेन संयोगात् द्व्यणुकांतरसृष्टिर्भवति। कारणगुणाः कार्ये गुणांतरमारभंत इति सामान्येन प्रक्रियामुक्त्वा विशेषयन्नत्राह। यद्वद्ध्विति। परमाणुः परिमंडलः तत्परिमाणं पारिमांडल्यं

मिलक्ष्यते। तत्र स्वसमानजातीयगुणारंभकत्वमवती
शुक्लत्वापस्यव्यभिचार इति भावः॥

ब्रा.सू.भा.२ व्यभिचारस्थलांतरमाह यद्यपीति। द्वे द्वे इति द्विः पठितव्यं। एवं सति चतुर्भिर्द्व्यणुकैश्चतुरणुकारंभ उपपद्यते यथाश्रुते तु द्वाभ्यां द्व्यणुका
५३ भ्यां महत् चतुरणुकमारंभणीयं नोपपद्यते कारणगतं महत्त्वं बहुत्वं वा विना कार्ये महत्त्वायोगादिति मतं तत्प्रकटार्थं द्व्यणुकानि द्वाभ्यां द्व्यणुकाभ्या
मारब्धकार्ये महत्त्वं दृश्यते। तस्य हेतुः प्रचयो नाम प्रशिथिलावयवसंयोग इति तूलपिंडे दृश्यत इति चिरंतनवैशेषिकदेशीयं मतं व्यभिचारः सर्वथा
पि द्व्यणुकगतह्रस्वत्वाणुत्वपरिमाणयोरनारंभकत्वे व्यभिचारः। यद्यपि तार्किकाः द्वाभ्यामेव परमाणुभ्यां द्व्यणुकं त्रिभिर्द्व्यणुकैः त्र्यणुकमिति कल्पयं
ति। तथापि तर्कस्याप्रतिष्ठानान्नात्र नियम इति मत्वाप्युक्तं। यद्यपि बहव इति। कारणगुणाः शुक्लादयः समानजातीयगुणारंभकाः कार्यद्रव्यपरिमा

यद्यपि द्व्यणुके चतुरणुकमारभेते। तथापि समानं द्व्यणुकसमवायिनं शुक्लादीनामारंभकत्वं। अणुत्वह्रस्वत्वे तु द्व्यणुकसमवायिनी अपि नै
वारभेते। चतुरणुके तु महत्त्वदीर्घत्वपरिमाणयोगाभ्युपगमात्। यद्यपि बहवः परमाणवो बहुत्वेन वा त्र्यणुकानि वा द्व्यणुकसहिता वा परमाणवः कार्य
मारभंते। तथापि समानेषा योजना। तदेवं यथा परमाणोः परिमंडलात्सतोऽणु ह्रस्वं च द्व्यणुकं जायते। महद्दीर्घं च त्र्यणुकादि न परिमंडलं। यथा वा द्व्य घ
णुकादणोर्ह्रस्वाच्च सतो महद्दीर्घं च त्र्यणुकं जायते। नाणु नो तु ह्रस्वं। एवं चेतनाद्ब्रह्मणोऽचेतनं जगज्जनिष्यत इत्यभ्युपगमे किं तव छिन्नं॥ ॥

णं तु न कारणगुणपरिमाणारब्धं किंतु कारणगतसंख्यारब्धमिति प्रक्रिया तुल्येत्यर्थः। एवं प्रक्रियां दर्शयित्वा सूत्रं योजयन् व्यभिचारमाह। तदेवमिति। प ५३
रमाणुभ्य एव महद्दीर्घं चेत्स्यान्नियतप्रक्रियानाश्रित्योक्तं नियतप्रक्रियामाश्रित्य व्यभिचारमाह। यथा चेति। अणुह्रस्वेभ्यो द्व्यणुकेभ्योऽणु द्रव्यं न जायते
ह्रस्वमपि न जायत इति व्यभिचार इत्यर्थः॥ सद्वैवाशंक्य श्रुत्यर्थोऽनुक्तः समुच्चयार्थः। तथा च ह्रस्वपरिमंडलाभ्यां द्व्यणुकपरमाणुभ्यां यथा महद्दीर्घाणुव
च्चेतनादचेतनं जायत इति सूत्रयोजना। तत्र ह्रस्वात् महद्दीर्घं त्र्यणुकं परिमंडलाद्द्व्यणुकमिति विभागः॥

दृष्टांतवैषम्यं शंकते। न्यूनमन्यमद्भुति। अचेतनेनैव विरोधिगुणइत्यत आह। नचचेतनेति। कार्यद्रव्यस्यपरिमाणांतराक्रांतत्वमंगीकृत्य विवक्षितां
न्यासाम्प्रमाहात्मैवमिति। अंगीकारं त्यजति। नचेति। उत्पन्नंहि परिमाणांतरं विरोधि भवति। तदुत्पत्तेः प्राग्विरोध्यभावाद्व्यणुके पारिमांडल्यारंभः किंन स्या
दित्यर्थः। ननु विरोधिपरिमाणेनसहैवद्रव्यंजायत इत्यत आह। आरब्धमपीति। सहोत्पत्तावपसिद्धांतः। अतो विरोध्यभावः सिद्ध इति भावः। अणुत्वा

अथ मन्यसे विरोधिना परिमाणांतरेणाक्रांतं कार्यद्रव्यं द्व्यणुकादीत्यतो नारंभकाणि कारणगतानि पारिमांडल्यादीनीत्यभ्युपगच्छामि न तु चे
तनाविरोधिना गुणांतरेण जगत् आक्रांतमस्ति। येन कारणगता चेतना कार्ये चेतनांतरं नारभेत। नह्यचेतना नाम चेतनाविरोधी कश्चिद्गुणो
स्ति। चेतनप्रतिषेधमात्रत्वात्। तस्मात्पारिमांडल्यादिवैषम्यात्प्राप्नोति चेतनायाः आरंभकत्वमिति। मैवं मंस्थाः। यथा कारणे विद्यमानानामपि
पारिमांडल्यादीनामनारंभकत्वमेवं चैतन्यस्यापीत्यस्यांशस्य समानत्वात्। नच परिमाणांतराक्रांतत्वं पारिमांडल्यादीनामनारंभकत्वे कारणं। आ
रब्धमपि कार्यद्रव्यं प्राग्गुणारंभात् क्षणमात्रमगुणं तिष्ठतीत्यभ्युपगमात्। न
च परिमाणांतरारंभे व्यग्राणि पारिमांडल्यादीन्यतः स्वसमानजातीयं परिमाणांतरं नारभंते। परिमाणांतरस्यान्यहेतुत्वाभ्युपगमात्। कारणमह
त्त्वात्कारणबहुत्वात्प्रचयविशेषाच्चमहत्॥

घारंभे व्यग्रत्वात्पारिमांडल्यादेः स्वसमानगुणानारंभकत्वमित्याशंक्य निषेधति। नचेति। व्यग्रत्वमन्यथासिद्धिः। तत्र हेतुः परिमाणांतरस्येति। अन्य
हेतुकत्वे सूत्रमुदाहरति। कारणेति। कारणानां द्व्यणुकानां बहुत्वात् त्र्यणुके महत्त्वं कृतो महत्त्वात् द्व्यणुके महत्त्वं द्वितूलपिंडारब्धे तिष्ठन्तूलपिंडे प्रचया

शा॰ सू॰ भा॰ २ महत्त्वविरुद्धमणुत्वं परमाणुगतं द्वित्वसंख्यमात्रजन्यं केऽमन्यतीत्याह। तदिति। महत्त्वस्यासमवायिकारणं तदेव महत्त्वसमानाधिकरणस्यैवोत्पत्तेः। परमाणुत्व
स्यासमवायिकारणं तद्द्व्यणुत्वाविनाभूतह्रस्वत्वस्यासमवायिकारणमित्येतद्दिशति। एतेनेति। अतो महत्त्वादेरहेतुत्वात्पारिमाण्डल्यादीनामसमवायित्वमिति
५४ भावः। तेषां सन्निधिविशेषाभावात्समानगुणारंभकत्वमपि न वाच्यमित्याह॥ नचेति। पारिमाण्डल्यादीनामपि वृत्त्वादिवत्समवायिकारणगतत्वाविशेषादि
त्यर्थः। तेषामनारंभकत्वेऽपि द्रव्यस्य विरोधिगुणाक्रान्तत्वं व्यग्रत्वमनन्तसन्निधिरेव निर्हेतुरित्युक्तिफलमाह। तस्मादिति॥ यत्तु कारणगुणाः स्वसमानजातीयगुणारंभकाः इ
तिव्याप्तेः। सामान्यगुणेषु पारिमाण्डल्यादिषु व्यभिचारेऽपि पोद्रव्यसमवायिकारणगतो विशेषगुणः स्वसमानजातीयगुणारंभक इति व्याप्तेश्चैतन्यस्य विशेषगु

तद्विपरीतमणु। एतेन दीर्घत्वह्रस्वत्वे व्याख्याते इति। दिक्कालाभ्यां जातिस्य गुणैर्न च सन्निधानविशेषात्कुतश्चित्कारणाद्वृत्त्वादीन्येवारंभतेन पारिमा
ण्डल्यादीनीत्यपेतं। दृष्टान्ते गुणान्तरेऽवारंभमाणे तर्हि तेषामेव कारणगुणानां स्वाश्रयसमवायाविशेषात् तस्मात्स्वभावादेव पारिमाण्डल्यादीनामप
रंभकत्वं। तथा चैतन्ना प्राप्यपीति दृष्टव्यं। संयोगाच्च द्रव्यादीनां विलक्षणानामुत्पत्तिदर्शनात् समानजातीयोत्पत्तिव्यभिचारः। द्रव्ये प्रकृते गुणोदा
हरणमयुक्तमिति चेत् न दृष्टान्तेन विलक्षणारंभमात्रस्य विवक्षितत्वात्। न च द्रव्यस्य द्रव्यमेवोदाहर्तव्यं गुणस्य गुण एवेति कश्चिन्नियमे हेतुर
स्ति॥

गुणत्वादारंभकत्वं दुर्वारमिति। तन्मन्दं चित्ररूपं प्रति हेतुत्वं तन्तुगतेषु नीलादिरूपेषु विजातीयचित्ररूपहेतुषु व्यभिचारात् चैतन्यस्यात्मत्वेन गुणत्वाभावाच्चेति मन्त ५४
व्यं। तस्माच्चेतनाद्विजातीयारंभो युक्त इति स्थितं। तत्रोदाहरणं तत्राह। संयोगाच्चेति। ननु चेतनत्वं स्वकार्ये पादानत्वात् द्रव्यं तत्र विलक्षणस्योपादानमिति न कृ
ते किंचिद्द्रव्यमेवाविलक्षणकार्यकरमुदाहर्तव्यं। न संयोगस्य गुणस्योदाहरणमिति योऽत्र शङ्कते। द्रव्य इति। गुणाद्द्रव्यवच्चेतनाद्चेतनारंभ इति विलक्षणा
रंभकत्वेऽपि। पद्दृष्टान्त इति परिहरतीतीति॥

अनियमः कणादसंमतइत्याह। सूत्रकारोपीति। एतावता कथमनियमस्तत्राह। एतदुक्तमिति। नविलक्षणत्वापायेनपुनरुक्तत्वमावेष्यतिदेशा
धिकरणेनपुनरुक्तिरितिशंकते। नचतिदेशइति। समानगुणारंभनियमस्यपारिमांडल्यादिदृष्टांतेनभंगार्थमस्यारंभइत्याह। सर्थैवातिदेशोस्य
र्थः। वैशेषिकमतपरीक्षामारभते। उभयथापिनकर्मातस्तदभावः। नास्यप्रासंगिकत्वंनपूर्वाधिकरणेनासंगतिरपेक्षितेतिमत्वानःप्रधानस्येश्वरा
सूत्रकारोपिभवतांद्रव्यस्यगुणानुदाजहार। प्रत्यक्षाप्रत्यक्षाणामप्रत्यक्षत्वात्संयोगस्यपंचात्मकंनविद्यतइति। यथाप्रत्यक्षाप्रत्यक्षयोर्भूम्याकाश
योःसमवयसंयोगःप्रत्यक्षएवंप्रत्यक्षाप्रत्यक्षेषुपंचसुसमवयच्छरीरमप्रत्यक्षंस्यात्प्रत्यक्षंहिशरीरं। तस्मान्नपांचभौतिकमित्येतदुक्तंभव
ति। गुणाश्चसंयोगाद्व्यंशरीरंदृश्यतेइतिचात्रापिविलक्षणोत्पत्तिःप्रपंचिता। नन्वेवंसतितेवैचैतत्कृतंनेतिब्रूमः। तत्रैवाख्यंप्रत्यक्षंएततुवैशेषिकं
मतं। नन्वतिदेशोपिसमानत्वापतमाकृतएनेनशिष्टापरिग्रहाअपिव्याख्याताइति। तत्रमैवंतस्यैवलयंवैशेषिकपक्रियारंभेतत्प्रक्रियानुगतेनेति
दर्शनेनप्रपंचःकृतः॥ ॥उभयथापिनकर्मातस्तदभावः॥ इदानींपरमाणुकारणवादंनिराकरोति। सचवादइत्थंसमुत्तिष्ठते। पटादीनिहिलोके
सावयवानिद्रव्याणितन्वादिभिस्संयोगसचिवैस्तैस्तैरारभ्यमाणानिदृष्टानि। तत्सामान्येनयावत्किंचित्सावयवंतत्सर्वंतदनुगतैरेवसं
योगसचिवैस्तैस्तैर्द्रव्यैरारभ्यमितिगम्यते॥
नधिष्ठितस्याकारणत्वेपिपरमाणूनांतदधिष्ठितानांकारणत्वमस्त्विति प्रत्युदाहरणसंगत्यासांख्याधिकरणानंतरमस्यावतारस्तामाह। इदानीमिति। द्व्यणु
कादिक्रमेणपरमाणुभिर्जगदारभ्यतेइतिवैशेषिकराद्धांतोत्रविषयः॥ सकिंमानमूलोभ्रांतिमूलोवेतिसंदेहपूर्वपक्षयति। सचेति। तैःपटादिभिःसामान्यं
त्रितयादेःकार्यद्रव्यत्वंतेनेत्यर्थः। विमतंसावयवंस्थिमादिकंस्वन्यूनपरिमाणसंयोगसचिवानेकद्रव्यारब्धंकार्यद्रव्यत्वात्पटादिवदितिप्रयोगः। स्थिरपर

शा॰सू॰भा॰२ नचैतावता कथं परमाणुसिद्धिरत आह ॥ सचापकर्ष इति विमतं सावयवत्वं यस्तावच्छेदकं यतो निवर्तते सन्न्यूनपरिमाणतारतम्यापकर्षस्य पर्यंतत्वेनावसानभू
५५ मित्वेनावगतः परमाणुरित्यर्थः। एवं चायमनुमानप्रकारः। द्व्यणुकन्यूनं द्रव्यं निरवयवपर्यवसि ध्यतीति भावः। जगन्निःसत्त्ववादिनां कार्यद्रव्यत्वहेत्वसिद्धिरि
तिवदंतं प्रत्याह। सर्वं चेति विमतमाद्यंतवत्सावयवत्वात्सत्यघटवदित्यर्थः। हेतोरसिद्धिर्निरस्ता अप्रयोजकत्वं निरस्यति तच्चेति। ते कति विधा इत्याकांक्षायामाह ता

स चायमवयवावयविविभागो यतो निवर्तते सोऽपकर्षपर्यंतगतः परमाणुः। सर्वं चेदं जगत् गिरिसमुद्रादिकं सावयवं सावयवत्वाद्घटवत्। न
चाकारणेन कार्येण भवितव्यमित्यतः परमाणवो जगतः कारणमिति काणभुगभिप्रायः। तानीमानि चत्वारि भूतानि भूम्युदकतेजःपवनाख्यानि
सावयवान्युपलभ्य चतुर्विधाः परमाणवः परिकल्प्यंते तेषां चापकर्षपर्यंतगतत्वेन परतो विभागासंभवाद्विनश्यतां पृथिव्यादीनां परमाणुप
र्यंतो विभागो भवति। स प्रलयकालः। ततः सर्गकाले च वायवीयेष्वणुषु अदृष्टापेक्षं कर्मोत्पद्यते। तत्कर्म स्वाश्रयमणुमण्वंतरेण संयुनक्ति। ततो द्व्यणु
कादिक्रमेण वायुरुत्पद्यते॥ एवमग्निरेवमाप एवं पृथिवी एवमेव शरीरं सेंद्रियम् इत्येवं सर्वमिदं जगदणुभ्यः संभवति। अणुगतेभ्यश्च रूपादिभ्यो द्व्य
णुकादिगतानि रूपादीनि संभवंति। तंतुपटन्यायेनेति काणादा मन्यंते॥ ५५

नीति। प्रलये चैषामपि नाशात् जगत्कारणत्वमित्याशंक्याह। तेषां चेति। अवयवानां विभागान्नाशाद्वा द्रव्यस्य विनाशः परमाणूनां निरवयवत्वेनावयवविभा
गादेर्नाशहेतोरसंभवान्न नाश इत्यर्थः। तेषां नित्यत्वे फलितं सृष्टिक्रममाह। तत इति॥

एवंकारणादनंतस्यमानमूलत्वात्तेनवेदांतसमन्वयस्याविरोधाद्सिद्धिरितिपूर्वपक्षेफलंतस्यभ्रांतिमूलत्वाद्विरोधइतिसिद्धांतपक्षे। तत्रेदमिति। अलयेवि
भकानांपरमाणूनामन्यतरकर्मणोभयकर्मणोवासंयोगोवाच्यः कर्मणश्चनिमित्तमपेक्षणादिकंदृष्टंयथाप्रयत्नवदात्मसंयोगादेरिच्छा।वाय्वाभिघाताद्दुत्सो
दिचलनंहस्तनोदनादस्मादिगमनंतदुदपाककर्मणोदृष्टंनिमित्तमभ्युपगम्यतेतेनवाक्षितीयेककर्मनिष्पत्तिः।नाद्यःप्रयत्नादेःस्वस्तुतरकालीनत्वादिच्छभयमपि

तत्रेदमभिधीयते।विभागादयःसृष्टिकालीनानांप्रयत्नानांसंयोगःकर्मापेक्षोऽभ्युपगंतव्यः।कर्मवतांतंवादीनांसंयोगदर्शनात्कर्मणश्चकार्यत्वान्निमित्तंकि
मप्यभ्युपगंतव्यं।अनभ्युपगमेनिमित्ताभावात्तानुत्पाद्यकर्मस्यादभ्युपगमेऽपिपदिप्रयत्नोऽभिघातादिर्वा।यथादृष्टंकिमपिकर्मणोनिमित्तमभ्युप
गम्येततत्रसर्गेभवात्तेनैवाणुत्पाद्यकर्मस्यात्।नहितस्यामवस्थायामात्मगुणःप्रयत्नःसंभवति।शरीराभावाच्छरीरप्रतिष्ठेहिमनसात्मनःसंयोगे
सत्यात्मगुणःप्रयत्नोजायतेएतेनाभिघातादयोऽपिदृष्टंनिमित्तंप्रत्याख्यातव्याःसर्गेनिरस्ताः।नहितत्सर्वंनाद्यस्यकर्मणोनिमित्तंसंभवत्यथादृष्टमाद्य
स्यकर्मणोनिमित्तमित्युच्यते।तस्तुनरात्मसमवायिवास्यादणुसमवायिता॥

नकर्मसंभवति अतःकर्मसंभवात्तस्यसंयोगपूर्वकद्व्यणुकादिसर्गस्याभावइतिसूत्रार्थः।स्थिरस्यवेगवत्द्रव्यसंयोगविशेषोऽभिघातःसच्चलनेचोस
तोदनमितिभेदः।दृष्टनिमित्ताभावेऽपिअदृष्टवदात्मसंयोगाद्दणुकर्मेतिद्योतकः।अथादृष्टमिति।विकल्पपुरःसरंदूषयति।तसुनरिति।जडत्वव
दणोराश्रयत्वंकिंनस्यादितिमत्वाविकल्पःकृतइतिमंतव्यं॥ ॥

न्या.कु.भा.५
५६

अत्रापि सत्त्वं मोजुपपत्तिः। ऽन्यथेति। जीवाधिष्ठितमदृष्टं निमित्तमस्त्विव्यत आह। आत्मनश्चेति। अचेतनत्वा(त्)ऽधिष्ठातृत्वमिति शेषः। मित्रेश्वर
साधिष्ठातृत्वमग्रे निराकरिष्यते। अचेतनत्वमदृष्टस्य कर्मनिमित्तत्वाभावे हेतुरुक्तः। हेत्वन्तरमाह। आत्मसमवायित्वेति। गुरुत्ववददृष्टमपि स्वाश्र
यसंयुक्ते क्रियाहेतुरिति शंकते। अदृष्टवतेति विभुसंयोगस्याणुवृत्सद्धसत्वात् क्रियायास्तत्वेप्रलयाभाव स्यादिति दूषयति संबन्धेति। कादाचित्कत्व

ऽन्यथापि नादृष्टनिमित्तमणुकर्मत्युक्तं तेनादृष्टस्याचेतनत्वात्। न ह्यचेतनं चेतनेनानधिष्ठितं स्वतन्त्रं प्रवर्तते प्रवर्त्तोयतिश्चेति साध्य
प्रक्रियायामभिहितं। आत्मनश्चानुपलब्धेश्चैतन्यस्य तस्यामवस्थायामचेतनत्वात्। आत्मसमवायित्वाभ्युपगमाच्च नादृष्टमणुकर्मणो निमित्तं
स्यादसंबन्धाद् दृष्टवता पुरुषेणाणूनां संबन्ध इति चेत्। संबन्धस्य तत्साक्षात्त्वेति सा तत्प्रसंगो नियामकान्तराभावात् देवानियतस्य कस्यचि
त्कर्मनिमित्तस्याभावात् नाणुष्वाद्यकर्म स्यात् कर्माभावात् तन्निबन्धनः संयोगो न स्यात् संयोगाभावात् तन्निबन्धनद्व्यणुकादिकार्यजातं न स्या
त् संयोगश्चाणोरस्ववतरेणात्मना बाह्यादेकदेशेन वात्मवात्मनाचेदुपचयानुपपत्तेरणुमात्रप्रसंगः॥ ५६

तेरदृष्टनियम्यत्वायोगेपीश्वरानियमद्दुसत्तत्राह। नियामकान्तरेति। पत्न्यानन्तचतुर्दशजन्मभिति व्याप्तिविरोधेन नित्यज्ञानादिदेहस्तद्गुणईश्वरो नास्ति।
अस्तित्वेपि सदासत्वान्नियामकत्वमिति भावः स्वार्थैभिमन्यति। तदेवमिति। संयोगस्य हेतुत्वं रचयं दूषयित्वा स्वरूपं दूषयति संयोगश्चाणोरिति संयो
गस्याव्याप्यवृत्तित्वे एकस्मिन्नितरस्यान्तर्भावात्कार्यस्य पृथुत्वायोगात् सर्वकार्यपरमाणुमात्रं स्यादित्यर्थः॥

किंच सांशद्रव्ये संयोगस्यैकांशवृत्तित्वं दृष्टं तद्विरोधाद्याप्यवृत्तित्वं न कल्प्यमित्याह। दृष्टेति। परमाणोः संयोग एकदेशेन चेदिति संबंधः। दिग्भेदेन
कल्पितप्रदेशस्य संयोगस्यापि कल्पितत्वात् ततः कार्यं नोत्पद्येत उत्पन्नं वा नित्यं स्यादित्याशयः इति हृदयं तद्धर्मः। कारणदानां सर्गप्रसक्तो सततं संयोगेन पिला
प्रलयनिरासे पि सततं संयोगेन स्यात्। यथा चेति। परमाणूनां कर्मणा संयोगात् सर्गः विभागात् प्रलय इति प्रक्रिया न युक्ता। युगपदनंत परमाणूनां विभागे निय

दृष्टविपर्ययप्रसंगश्चाप्रदेशवतो द्रव्यस्य प्रदेशवता द्रव्यांतरेण संयोगस्य दृष्टत्वादेकदेशेन चेत्सावयवत्वप्रसंगः। परमाणूनां कल्पिताः प्रदे
शाः स्युरिति चेत्। कल्पितानामवस्तुत्वात् अवस्त्वेव संयोग इति वस्तुतः कार्यस्यासमवायिकारणं न स्यात्। असति चासमवायिकारणे द्व्यणुकादि
कार्यद्रव्यं नोत्पद्येत यथा चादिसर्गे निमित्ताभावात् संयोगोत्पत्त्यर्थं कर्म नाणूनां संभवति। एवं महाप्रलयेपि विभागोत्पत्त्यर्थं कर्म नैवाणूनां संभवे
त्। न हि तत्रापि किंचिन्नियतं तन्निमित्तं दृष्टमस्ति। अदृष्टमपि भोगप्रसिद्ध्यर्थं न प्रलयप्रसिद्ध्यर्थमित्यतो निमित्ताभावान्नाणूनां संयोगोत्पत्त्यर्थं
विभागोत्पत्त्यर्थं वा कर्मातश्च संयोगविभागाभावात् तदायत्तयोः सर्गप्रलययोरभावः प्रसज्येत। तस्मादनुपपन्नोयं परमाणुकारणवादः॥ ॥

तस्याभिघातादेर्दृष्टस्य निमित्तस्यासत्वात् धर्माधर्मरूपादृष्टस्य सुखदुःखार्थत्वेन सुखदुःखशून्यप्रलयप्रयोजकत्वायोगात् अदृष्टनिमित्तेन कर्म
णा विभागः संभवति। तथा च दृष्टादृष्टनिमित्तयोरसत्वाद्यथापि संयोगार्थत्वेन विभागार्थत्वेन च कर्म नास्ति अतः कर्माभावात् तयोः संयोगवि

भागपूर्वकयोः सर्गप्रलययोरभाव इति सूत्रयोजना॥ ॥

समवायाभ्युपगमाच्च तदभावः अणुवादसंभव इति योग्यतमा संबध्यते। द्व्यणुकस्य समवायः परमाणुभिन्नत्वसाम्यात् द्व्यणुकवत्समवायस्यापि समवा-
यांतरमित्यनवस्थितिरित्यर्थः॥ नन्विह तंतुषु पट इत्यादिविशिष्टधीनियामकः समवायो न संबंधांतरमपेक्षते। स्वरूपेणैव नित्यसंबंधत्वादिति लोक-

॥ समवायाभ्युपगमाच्च साम्यादनवस्थितेः॥ ॥ समवायाभ्युपगमाच्च तदभाव इति प्रकृतेनाणुवादनिराकरणेन संबध्यते। द्वाभ्यां चाणुभ्यां द्व्य-
णुकमुत्पद्यमानमत्यंतभिन्नमणुभ्यां समवायेन समवेतोऽभ्युपगम्यते भवता। न चैवमभ्युपगच्छता ताद्वाकेनाणुकरणता समर्थयितुं। कुतः। साम्या-
दनवस्थितेः। यथैव द्व्यणुकमणुभ्यामत्यंतभिन्नं सत् द्व्यणुकं समवायलक्षणेन संबंधेन ताभ्यां संबध्यते। एवं समवायोऽपि समवायिभ्योऽत्यंतभिन्नः स-
न् समवायलक्षणेनान्येनैव संबंधेन समवायिभिः संबध्येतात्यंतभेदसाम्यात्। ततश्च तस्य तस्यान्योऽन्यः संबंधः कल्पयितव्य इत्यनवस्थैव प्रसज्ये-
त। नन्विह प्रत्ययग्राह्यः समवायो नित्यसंबद्ध एव समवायिभिर्गृह्यते। नासंबद्धः संबंधांतरापेक्षो वा ततश्च न तस्यान्यः संबंधः कल्पयितव्यो ये-
नानवस्था प्रसज्येतेति। नेत्युच्यते। संयोगोऽप्येवं सति संयोगिभिर्नित्यसंबद्ध एवेति समवायवन्नान्यं संबंधमपेक्षेत। अथार्थांतरत्वात्संयोगः संबंधां-
तरमपेक्षेत। समवायोऽपि तदर्थांतरत्वात्संबंधांतरमपेक्षेत। न च गुणत्वात्संयोगः संबंधांतरमपेक्षते न समवायो गुणत्वादिति युज्यते वक्तुं अपेक्षा- ५०
कारणस्य तुल्यत्वात्॥

ते। नन्विहेति। संयोगस्यापि स्वरूपसंबंधोपपत्तेः समवायो न स्यादिति दूषयति। नेति। संबंधिभिन्नत्वाच्चेत्संयोगस्य समवायस्यापि तुल्यम्॥ ॥

गुणपरिभाषामास्त्विति। गुणत्वाभावेपि कर्मसामान्यादीनां समवायांगीकारे गुणत्वं समवायित्वेन व्यापकं॥ तदपि व्याप्यं गुणस्यापि समवायवत्त्वरूपसंबं
धसंभवेन व्याप्यानुकूलतर्काभावात् तस्मात्संबंधिभिन्नत्वमेव संबंधांतरापेक्षायां कारणं तस्य समवायेपि तुल्यत्वादनवस्था दुर्वारा सा च मूलक्षयक

गुणपरिभाषामास्वातंत्र्यात्। तस्मादर्थांतरं समवायमभ्युपगच्छतः प्रसज्येतैवानवस्था। प्रसज्यमानायां चानवस्थायामेकासिद्धौ सर्वासिद्धेर्द्वा
भ्यामणुभ्यां द्व्यणुकं नैवोत्पद्येत। तस्मादप्यनुपपन्नः परमाणुकारणवादः॥ नित्यमेव च भावात्॥ ॥ अपि चाणवः प्रवृत्तिस्वभावा वा निवृत्तिस्व
भावा वा उभयस्वभावा वाऽनुभयस्वभावा वाभ्युपगम्यंते गत्यंतराभावात्॥ चतुर्धापि नोपपद्यते प्रवृत्तिस्वभावत्वे नित्यमेव प्रवृत्तेर्भावात् प्रलया
भावप्रसंगः। निवृत्तिस्वभावत्वेपि नित्यमेव निवृत्तेर्भावात्सर्गाभावप्रसंगः। उभयस्वभावत्वं च विरोधादसमंजसं। अनुभयस्वभावत्वे तु निमि
त्तवशात्प्रवृत्तिनिवृत्त्योरभ्युपगम्यमानयोरदृष्टादेर्निमित्तस्य नित्यसन्निधानान्नित्यप्रवृत्तिप्रसंगादतंत्रत्वेप्यदृष्टादेर्नित्याप्रवृत्तिप्रसंगात्तस्माद
प्यनुपपन्नः परमाणुकारणवादः॥

रीत्या समवायासिद्धौ समवेतद्व्यणुकासिद्धिरित्यर्थः। सूत्रं व्याचष्टे। अपि चेति। अनुभयस्वभावत्वे नैमित्तिकी प्रवृत्तिर्वाच्या। निमित्तं च कालादृष्टा
दिकं नित्यसन्निहितमिति नित्यमेव प्रवृत्तिप्रसंगः। तस्यानिमित्तत्वे प्रवृत्त्यभाव इत्यर्थः॥ ॥ ॥ ॥

शा॰ स्॰ भा॰ किंच परमाणवः समवायिकारणवंतः कारणापेक्षया स्थूला अनित्याश्च रूपवत्त्वात् रसवत्त्वाद् गंधवत्त्वात् स्पर्शवत्त्वात् घटवदिति सूत्रं योजयितुं परस्य कि-

५८ यामाह । सावयवानामित्यादिना । नन्वत्र परमाणुत्वं पक्षतावच्छेदकं तद्विरुद्धं स्थूलत्वं कथं साध्यते इति चेत् तत्र वा पुत्रत्वेन जन्यत्वादेः एषामवच्छेदकत्वा

रूपादिमत्त्वाच्च विपर्ययो दर्शनात् ॥ ॥ सावयवानां द्रव्याणामवयवशो विभज्यमानानां यतः पर्यंतो विभागो न संभवति ते चतुर्विधा रूपादिमंतः
परमाणवः । चतुर्विधस्य रूपादिमतो भूतभौतिकस्यारंभकाः नित्याश्चेति वैशेषिका अभ्युपगच्छंति । स तेषामभ्युपगमो निरालंबन एव । यतो
रूपादिमत्त्वात्परमाणूनामणुत्वनित्यत्वविपर्ययः प्रसज्येत । परमकारणापेक्षया स्थूलत्वमनित्यत्वं च तेषामभिप्रेतविपरीतमापद्येतेत्यर्थः । कु-
तः । एवं लोके दृष्टत्वात् । यद्धि लोके रूपादिमद्वस्तु तत्स्वकारणापेक्षया स्थूलमनित्यं च दृष्टं । तद्यथा । पटस्तंतूनपेक्ष्य स्थूलोऽनित्यश्च भवति । तं-
तवश्चांशूनपेक्ष्य स्थूला अनित्याश्च भवंति । तथा चामी परमाणवो रूपादिमंतस्तैरभ्युपगम्यंते । तस्मात्तेऽपि कारणवंतस्तदपेक्षया स्थूला अनित्या-
श्च प्राप्नुवंति ॥

न्त्रयाप्रयोजकता कारणस्य खे नित्यत्वे चात्मवद्रूपादिमत्त्वायोगात् न चैवं तर्हि वायुः कारणवानिति पृथक्कृत्य धर्मे रूपादिहेतूनां भागासिद्ध्यभावेऽपि किं रूपा ५८
द्यन्यतमत्वादिति वाच्यम् । यत्र स्पर्शस्तत्र कारणं यत्र रूपं तत्र कारणमिति व्याप्तिग्रहकाले वायुत्वावच्छेदेन सन्दिग्धव्यभिचाराभावादिति भावः ॥ ॥

परमाणवो नित्याः सत्वे सति सकारणत्वाभावादिति सत्प्रतिपक्षस्तु व्याप्यविशेषणासिध्यादुष्यति । यच्च नित्यत्व इति । सर्वं भावत्वं प्रागभावनिरासार्थं नि
त्यत्वप्रतिषेधः सप्रतियोगिकः । अभावत्वात् घटाभाववदिति नित्यत्वस्य क्वचित्सिद्धेः कार्यमनित्यमिति विशेषतः कार्ये नित्यत्वप्रतिषेधात् कारणभूतप
रमाणुषु नित्यत्वं सिध्यति । अन्यथा प्रतियोग्यभावे प्रतिषेधानुपपत्तेरिति कणादोक्तमनुमानं तथासिध्या दुष्यति । यदपीति कार्ये नित्यत्वप्रतिषेधश्च व

यच्च नित्यत्वे कारणं तेनोक्तं सदकारणवन्नित्यमिति । तदप्येवं सत्यणुषु न संभवति उक्तेन प्रकारेणाणूनामपि कारणवत्त्वोपपत्तेः । यदपि नित्यत्वे
द्वितीयं कारणमुक्तमनित्यमिति च विशेषतः प्रतिषेधाभाव इति । तदपि नावश्यं परमाणूनां नित्यत्वं साधयेत् सति हि परिनिष्ठिते क्वचिन्नित्ये वस्तुनि
नित्यशब्देन नञः समासो नोपपद्यते । न पुनः परमाणुनित्यत्वमेवापेक्ष्यते । तत्रास्त्येव नित्यं परमकारणं ब्रह्म । न च शब्दार्थव्यवहारमात्रेण कस्यचिद
र्थस्य प्रसिद्धिर्भवति । प्रमाणान्तरसिद्धयोः शब्दार्थयोर्व्यवहारावतारात् ॥ ॥ ॥ ॥

हारमङ्गीकृत्य ब्रह्मणि प्रतियोगिप्रसिद्धिरुक्ता वस्तुतस्तु विशेषव्यवहार एवासिद्धः कारणनित्यत्वस्य प्रमाणान्तरेणाज्ञानं विना कार्यमनित्यमिति व्य
वहारयोगादित्याह । न च शब्देति । यदि प्रमाणान्तरं कारणानित्यत्वे स्यात्तदायं व्यवहारः समूलो भवति । ततो मूलज्ञानात्प्राग्व्यवहारमात्रान्न वस्तुसिद्धिः
वंशपदस्य व्यवहारादपि तत्सिद्धिप्रसंगात् मूलज्ञाने तु तेनैव विशेषसिद्धेर्व्यवहारोपन्यासवैयर्थ्यमिति भावः ॥ ॥

एवंपरमाणुनित्यत्वेकणादसूत्रद्वयंनिरस्य तृतीयंनिरस्यति।यदपीति।सतामणूनांदृश्यमानस्थूलकार्याणांप्रत्यक्षेणाकारणत्वज्ञानमविद्येतियदि
सूत्रार्थः तर्हिप्रत्यक्षकारणत्वंनित्यत्वेहेतुःस्यात्तत्र।द्व्यणुकेव्यभिचारादित्यर्थः।यद्यारंभकद्रव्यप्रत्यक्षत्वंहेतुविशेषणंतदाविशेष्यवैयर्थ्यमापद्येतपु

यदपीतिसत्त्वेतृतीयंकारणमुक्तमविद्याचेति।तद्यद्येवंविज्ञायेतसतांपरिदृश्यमानकार्याणांकारणानांप्रत्यक्षेणाग्रहणमविद्येति।ततोद्व्य
णुकनित्यताप्यापद्येत।अथद्रव्यत्वेसतीतिविशेष्येततथाप्यकारणवत्त्वमेवनित्यतानिमित्तमापद्येत।तस्यचप्रागेवोक्तत्वात् अविद्याचेतिपु
नरुक्तंस्यात्।अथापिकारणविभागात्कारणविनाशाच्चान्यस्यतृतीयस्याविनाशहेतोरसंभवोऽविद्यासापरमाणूनांनित्यत्वंख्यापयतीतिव्या
ख्यायेत॥

नह्यक्लिश्चेसा ह अथेत्यादिनापरमाणवोनित्याः नाशकानुपलंभादाकाशवदितिसूत्रार्थमाशङ्कते।अथापीति।तन्त्वाद्यवयवानांविभागान्नाशाद्वापटादि
नाशोदृष्टः तच्चद्वयंनिरवयवाणूनांनास्तीतिनित्यत्वमित्यर्थः॥

परिणामवादमाश्रित्य गुणानां नाशकं किंचित्कं भवतीति परिहरति । नेति । अवयवानां संयोगेन द्रव्यांतरोत्पत्तिरारंभ इति पक्षे मते स्यात्तत् तदा द्रव्यविना-
शो द्रव्याभावे वेति नियमः स्यान्नारंभे मानमस्तीत्युक्तं तत्त्वमप्रदर्शनात् ततः कारणमेव स्वतो निर्विशेषं विशेषवद्रस्थात्मना कार्यमित्यत्र भवतु वैला-
दृष्टिपिंडं तयाचारणात्तन्मयविधपरिणामरूपाणामुत्पत्तिमिति तितैनकालादिना पिंडात्मकस्वरूपतिरोभावेन कारणाभावापत्तिर्विनाशः उपपद्यते । य-

तावद्रूपं विनश्यतु द्रव्याभावे वा हेत्वभावेऽपि विनष्टुमर्हतीति नियमोऽस्ति संयोगस्य चिवेहि अनेकस्मिंश्च द्रव्ये द्रव्यांतरस्यारंभकेऽभ्युपगम्यमाने एत-
देवं स्यात् । यदा त्वपास्तविशेषं सामान्यात्मकं कारणं विशेषवद्द्रव्यांतरमापद्यमानं आरंभकमभ्युपगम्यते । तदा घृतकाठिन्यविलयनवत्क-
त्यवस्थाविलयेनेनापि विनाश उपपद्यते । तस्मात् रूपादिमत्त्वस्याद्भिरिष्टतविपर्ययः परमाणूनां ॥ ॥ ॥

धाम्निसंपर्कात् घृतकाठिन्यमवयवसंयोगस्यावयवानां चनाशादिति नैकत्रीयते तद्वच्च काठिन्यस्य संयोगविशेषत्वेन गुणत्वात् द्रव्यनाशेऽनुदाहर-
णत्वमिति तिरस्कं गुणवत् द्रव्यस्यापि कुतश्चित् हितनाशदृष्टांशेनोदाहरणानुपपत्तिर्भाषापार्थ्वातंत्र्यात् वस्तुतस्तु घृतं कठिनं द्रव्यमित्यनुभूतेर्घृ-
तपरिणामविशेषो द्रव्यमेव काठिन्यं । न च द्रव्यत्वेऽप्यवयवविभागादेव तस्य नाशः इति वाच्यं । घृतस्य परिणामिन एकत्वेन विभागासंभवात् स्पर्श-
गुणकाठिन्यनाशेन तत्संभवाच्चेति भावः ॥

शा॰ सू॰ भ॰ किंच प्रलये नासीद्‌ जीनाम्स्य किंचनेसरागुत्वां नाशयितुमिष्टस्य स्याच्च तेषां परमकारणत्वमिष्टमसंहरति। तस्मादिति। यद्यस्मादधिकगुणकं तत्तस्मात्स्थू-
९० लमिति व्याप्तिमुक्त्वा विकल्पयति। तद्वदिति। पार्थिवः परमाणुः अधिकैर्गुणैस्ततः एकैकन्यूनगुणाज्जलादिपरमाणव इति किं कल्प्यते न वा आद्ये दो-

तस्मादप्यनुपपन्नः परमाणुकारणवादः॥ ॥उभयथा च दोषात्॥ ॥गंधरसरूपस्पर्शगुणा स्थूला पृथिवी रूपरसस्पर्शगुणाः सू-
क्ष्मा आपः रूपस्पर्शगुणं सूक्ष्मतरं तेजः। स्पर्शगुणः सूक्ष्मतमो वायुरिति। एवमेतानि चत्वारि भूतान्युपचितापचितगुणानि स्थूलसूक्ष्म-
तारतम्योपेतानि च लोके लक्ष्यन्ते। तद्वत्परमाणवोऽप्युपचितापचितगुणाः कल्प्येरन्न वा। उभयथापि च दोषानुषंगोऽपरिहार्य एव स्यात्। कल्प्य-
माने तावदुपचितापचितगुणत्वे उपचितगुणानां मूर्त्युपचयादपरमाणुत्वप्रसंगः। न चांतरेणापि मूर्त्युपचयं गुणोपचयो भवतीत्युच्येत। का-
र्येषु भूतेषु गुणोपचये मूर्त्युपचयदर्शनात्॥ ९०

षमाह। कल्प्यमान इति। मूर्त्युपचयात्। स्थौल्यादित्यर्थः॥ पार्थिवोऽणुरप्यात्स्थूलः अधिकगुणत्वात् घटवदित्येवं प्रयोक्तव्यं। अप्रयोजकत्वं निरस्य-
ति न चांतरेणेति। दृष्टविरोधस्यादिति भावः॥

यदुक्तं यत्कार्यद्रव्यं तत्संयोगसचिवानेकद्रव्यारब्धमिति तन्नेत्याह। तथा कार्यारंभोपीति। कैवल्यं शाखाधारसंकार्यद्रव्यस्थिततावपि हेतुत्वात्संयोगस्य। क्षीर
रंभकसंयोगाद्द्ध्यारंभकं न संयोगांतरं तथा च दध्यादौ व्यभिचारात्र व्याप्तिरित्यर्थः। किंच यत्कार्यद्रव्यं तद्द्व्यारभ्यमिति सैव व्याप्तिरस्तु लाघवात् न तु संयोगस
चिवत्वन्यूनपरिमाणानेकद्रव्यारब्धमिति गौरवात् दीर्घविस्तृतदुकूलारब्धरज्जौ न्यूनपरिमाणयोर्व्यभिचारश्च न च रज्जुर्न द्रव्यांतरमिति वाच्यं अवयवि
मात्रविलयापातात् किंच निरवयवद्रव्यत्वस्यैकात्मवृत्तित्वे लाघवान्निरवयवानेकाणुसिद्धिः॥ परमाणुत्वतारतम्यविश्रांतिभूमित्वेन तत्सिद्धिरि

तथा कार्यारंभोपि नावयवसंयोगेनैव केवलेन भवति। क्षीरजलादीनामंतरेणापि अवयवसंयोगांतरं दधिहिमादिकार्यारंभदर्शनात्। तदेवम्
सारतरतर्कसंदृब्धत्वादीश्वरकारणश्रुतिविरुद्धत्वाच्छ्रुतिप्रवणैश्च शिष्टैर्मन्वादिभिरपरिगृहीतत्वादत्यंतमेवानपेक्षास्मिन्परमाणुकारणवा
देकार्या श्रेयोर्थिभिरिति वाक्यशेषः॥

ति तन्न त्र्यणुकत्वे न्यूनत्रुटिषु विश्रांतेः। न च त एव त्रुटिनामानो जगद्धेतव इति वाच्यं। पृथिवीत्वादिना सावयवत्वानित्यत्वयोरनुमानान्न चावयवत्व
स्य क्वचिद्विश्रांतौ परमाणुसिद्धिः अविश्रांतावनवस्थितिर्वाच्यं। मापापांशुत्वेप्यवयवत्वविश्रांतिसंभवात् तो न किंचिदणुसद्भावे प्रमाणं निरवयवानां सं
योगसमवायिकारणत्वासंभवेन त्र्यणुकाद्यारंभकत्वायोगश्चेत्यादिबाधकमुक्तमेव। संमत्यपरिग्रहाच्चेति सूत्रं वाकाशोपूरयत्राधिकरणार्थमुपसंहर
ति। तदेकमिति। तस्मादंगीकृतिमूलेन वैशेषिकमतेन वेदांततात्पर्यस्याविरोध इति सिद्धम्॥

शा० सू० भा० २ वैशेषिकं निरस्य वैनाशिकं निरस्यति। समुदाय इति। परिमाणभेदेन देहादेरन्यतरविनाशांगीकारादर्धवैनाशिको वैशेषिकः। तस्य निरासानंतरं सर्व
६५ वैनाशिकवादी बुद्धिस्थो निरस्यत इति शेषः। संगतिमाह। वैशेषिकेति। नाभाव उपलब्धेरिति निरसनीयसिद्धांतात्तन्निरस्यसिद्धांतस्य भेदं वक्तुं तत्सिद्धांतं विभ
जते। स चेति। ननु सुगतप्रोक्तागमस्यैकत्वात्कुतो बहुप्रकारतेत्यत आह। प्रतिपत्तीति। एकस्यैवागमस्य व्याख्यातुः शिष्यस्यावस्थाभेदेन बुद्धिभेदान्मंदमध्य

समुदाय उभयहेतुकेऽपि तदप्राप्तिः॥ ॥वैशेषिकराद्धांतो दुर्युक्तियोगाद्वेदविरोधाच्छिष्टापरिग्रहाच्च नापेक्षितव्य इत्युक्तं सोऽर्धवैनाशिक
इति वैनाशिकत्वसाम्यात्सर्ववैनाशिकराद्धांतो नतरामपेक्षितव्य इतीदमिदानीमुपपादयामः। स च बहुप्रकारः प्रतिपत्तिभेदाद्विनेयभेदाद्
वा। तत्रैते त्रयो वादिनो भवंति केचित्सर्वास्तित्ववादिनः केचिद्विज्ञानास्तित्वमात्रवादिनः। अन्ये पुनः सर्वशून्यत्ववादिन इति। तत्र ये सर्वा
स्तित्ववादिनो बाह्यमांतरं च वस्त्वभ्युपगच्छंति। भूतं भौतिकं चित्तं चैत्तं च तांस्तावत्प्रतिब्रूमः। तत्र भूतं पृथिवीधात्वादयो भौतिकं रूपादयश्च
क्षुरादयश्च

मोत्तमधियां शिष्याणां वा भेदाद्बहुप्रकारतेत्यर्थः। तानेव प्रकारानाह। तत्रेति। सौत्रांतिको वैभाषिको योगाचारो माध्यमिकश्चेति चत्वारः शिष्यास्ते ६५
षामाद्ययोर्बाह्यार्थानां परोक्षत्वापरोक्षत्वविवादेऽप्यस्तित्वसंप्रतिपत्तेस्तयोः सिद्धांतमेकीकृत्य निरस्यत इत्याह। तत्र ये सर्वास्तित्वेति। भूतभौतिकं बाह्यं चि
त्तं चैत्तं चाभ्यांतरमिति विभागः॥ तत्र संदिग्धे किं मानमूलो भ्रांतिमूलो वायं सिद्धांत इति तत्र मानमूल इति पूर्वपक्षयन्सिद्धांतं तत्र दर्शयति। तत्र

स्थिरः प्रपंचो ऽसत्हेतुक इति वेदांतसिद्धांतस्तस्मान्न मूलक्षणिकसिद्धांतविरोधात्सिद्धिः पूर्वपक्षफलं सिद्धांते तद्विरोध इति तत्र पृथिव्यादिभूत
चतुष्टयविषये द्व्यणुकादिकं भौतिकं च परमाणुसमुदाय एव न त्ववयव्यंतरमिति मत्वा परमाणून्विभजते । चतुष्टये चेति । चतुर्विधा इत्यर्थः खरः कठि
णः तत्स्वभावाः पार्थिवाः परमाणवः स्निग्धाः आप्याः उष्णास्तैजसाः ईरणं चलनं तत्स्वभावो वायव्यानामिति बाह्यसमुदायमुक्त्वाध्यात्मिकसमुदायमाह ।

चतुष्टये च पृथिव्यादिपरमाणवः खरस्नेहोष्णेरणस्वभावास्ते पृथिव्यादिभावेन संहन्यंत इति मन्यंते । तथा रूपविज्ञानवेदनासंज्ञासंस्कार
संज्ञकाः पंचस्कंधाः तेप्यध्यात्मं सर्वव्यवहारास्पदभावेन संहन्यंत इति मन्यंते । तत्रेदमभिधीयते ॥

तथेति सविषयेंद्रियाणि रूपस्कंधः विषयाणां बाह्यत्वेपि देहस्थेंद्रियग्राह्यत्वादाध्यात्मिकत्वं । अहमहमित्यालयविज्ञानप्रवाहो विज्ञानस्कंधः ।
सुखाद्यनुभवो वेदनास्कंधः गौरश्व इत्येवं नामविशिष्टसविकल्पकप्रत्ययः संज्ञास्कंधः । रागद्वेषमोहधर्माधर्माः संस्कारस्कंधः । तत्र विज्ञानस्कंध
श्चित्तमात्मेति गीयते । अन्ये च चत्वारः स्कंधाश्चैत्तास्तेषां संघात आध्यात्मिकः सकललोकयात्रानिर्वाहक इत्यर्थः ॥ ॥ ॥

अवयवातिरिक्तावयव्यनुपलब्धेरवयवाः श्लिष्यंते। यत्सत्तत्क्षणिकं यथा विद्युदिति तेषां क्षणिकत्वाभिमानमूलोयं सिद्धांत इति प्राप्ते सिद्धांतसूत्रं
योजयति। य एष इति। सर्गादौ परमाणूनां स्कंधानां च स्वतः संघातस्तावन्न संभवति। अचेतनत्वात्। नापि चित्ताख्यमभिज्वलनं विज्ञानं समुदायहेतुः संघा-
ते देहाकारे जाते विज्ञानं विज्ञाने जाते संघात इत्यन्योन्याश्रयात्। न च क्षणिकविज्ञानादन्यः कश्चिज्जीव ईश्वरो वा त्वयाभ्युपगम्यते यः संघातकर्ता भवेत्। न च क-
र्त्तारमनपेक्ष्याणवः स्कंधाश्च स्वयमेव संघातार्थं प्रवर्तंत इति वाच्यं। अनिर्मोक्षप्रसंगात्। नन्वालयविज्ञानसंतानः संहंतास्त्वित्यत आह। आशयस्ये-

य एष उभयहेतुक उभयप्रकारः समुदायः परेषामभिप्रेतः अणुहेतुकश्च भूतभौतिकसंहतिरूपः स्कंधहेतुकश्च पंचस्कंधीरूपस्तस्मिन्नुभ-
यहेतुकेपि समुदायेभिप्रेयमाणे तदप्राप्तिः समुदायभावानुपपत्तिरित्यर्थः। कुतः समुदायिनामचेतनत्वात्। चित्ताभिज्वलनस्य च समुदाय-
सिद्ध्यधीनत्वात्। अन्यस्य च कस्यचिच्चेतनस्य भोक्तुः प्रशासितुर्वा स्थिरस्य संहंतुरनभ्युपगमात्। निरपेक्षप्रवृत्त्यभ्युपगमे च प्रवृत्त्यनुपरमप्र-
संगात्॥ आशयस्याप्यन्यत्वानन्यत्वाभ्यामनिरूप्यत्वात्। क्षणिकत्वाभ्युपगमाच्च निर्व्यापारत्वात्प्रवृत्त्यनुपपत्तेः। तस्मात्समुदायानुपपत्तिः॥ समु-
दायानुपपत्तौ च तदाश्रया लोकयात्रा लुप्येत॥

ति। आशेरतेस्मिन्रागादय इत्याशयः संतानः स किं संतानिभ्यो विज्ञानेभ्यो अन्यो अनन्यो वा। आद्ये स्थिरः क्षणिको वा नाद्यः। अस्मदिष्टनित्यात्मवादप्रसंगात्॥ ६६
द्वितीये दोषमाह। क्षणिकत्वेति। क्षणिकस्य जन्मातिरिक्तव्यापारो नास्ति तस्मात्स परमाण्वादिमेलनार्थं प्रवृत्तिरनुपपन्ना क्षणिकत्वव्याघातादित्यर्थः। एते-
नानन्यः संतान इति पक्षो निरस्तः क्षणिकस्य मेलकत्वानुपपत्तेः तस्मात्संहंतुरसत्वात्संघातानुपपत्तिरित्यर्थः॥

संहंतुरभावेऽपि संघातोपपत्तिमाशंक्य निषेधति। इतरेतरेति। कार्यप्रलयमनेन गच्छतीति प्रत्ययः कारणं। अविद्यादिभिरेवार्थात्संघातसिद्धेर्व्यवहारोपप
त्तिरित्यर्थः। अविद्यादीनाह। ते चेति॥ क्षणिकेषु स्थिरत्वबुद्धिरविद्या ततो रागद्वेषमोहाः संस्कारा भवंतीति भोगर्भस्थस्याद्यं विज्ञानं उत्पद्यते तस्माच्चा
लयविज्ञानात्पृथिव्यादिचतुष्टयं नाम्नाश्रयत्वान्नाम भवति। ततो रूपं सितासितात्मकं शुक्लशोणितं तन्निष्पद्यते गर्भस्य कललबुद्बुदावस्था नामरूप
शब्दार्थ इति निष्कर्षः विज्ञानं पृथिव्यादिचतुष्टयं रूपं चेति षडायतनानि यस्येंद्रियजातस्य तत्षडायतनं। नामरूपेंद्रियाणां मिथः संयोगः स्पर्शः। त

इतरेतरप्रत्ययत्वादिति चेन्नोत्पत्तिमात्रनिमित्तत्वात्॥ यद्यपि भोक्ता प्रशासिता वा कश्चिच्चेतनः संहंता स्थिरो नाभ्युपगम्यते। तथाप्यविद्या
दीनामितरेतरकारणत्वादुपपद्यते लोकयात्रा तस्यां चोपपद्यमानायां न किंचिदपरमपेक्षितव्यमस्ति। ते चाविद्यादयः अविद्या संस्कारो विज्ञा
नं नाम रूपं षडायतनं स्पर्शो वेदना तृष्णोपादानं भवो जातिः जरामरणं शोकः परिदेवना दुःखं दुर्मनस्तेत्येवंजातीयका इतरेतरहेतुकाः सौगते
समये क्वचित्संक्षिप्ता निर्दिष्टाः क्वचित्प्रपंचिताः। सर्वेषामप्ययमविद्यादिकलापोऽप्रत्याख्येयः॥

तः सुखादिका वेदना। तया पुनर्विषयतृष्णा तया प्रवृत्तिरुपादानं। तेन भवत्यस्माज्जन्मेति भवो धर्मादिः ततो जातिर्देहजन्म पंचस्कंधसमुदाय
ति यावत्॥ जातानां स्कंधानां परिपाको जरा स्कंधनाशो मरणं म्रियमाणस्य पुत्रादिस्नेहादंतर्दाहः शोकः। तेन हा पुत्रेत्यादिप्रलापः परिदेवनं। अ
निष्टानुभवो दुःखं तेन दुर्मनस्ता मानसी व्यथा इतिशब्दो मानापमानादिक्लेशसंग्रहार्थः न केवलं सुगतानामेवाविद्यादयः संमताः किंतु सर्ववादि

अविद्यादिहेतुकाज्जन्मादयो जन्मादिहेतुकाश्चाविद्यादय इति मिथो हेतुहेतुमद्भावादर्थात्संघातसिद्धिरिति शङ्कामुपसंहरति। तदेवमिति॥ सिद्धान्तभागं व्याचष्टे। तत्रेति। अविद्यादीनामुत्तरोत्तरहेतुत्वमङ्गीकृत्य संघातहेत्वभावात्संघातो नास्त्यादिसूत्रे पूर्वोक्तं स्मारयति। नन्विति। किमविद्यादयः संघातस्य गमका उतोत्पादका इति विकल्प्याद्ये संघातस्योत्पादकं किंचिद्वाच्यं तत्रास्तीत्याह। अत्रोच्यते यदीति। आश्रयाश्रयिभूतेष्विति भोक्तृविशेषणमाश्र

तदेवमविद्यादिकलापे परस्परं निमित्तनैमित्तिकभावेन घटीयन्त्रवदनिशमावर्तमानेऽर्थाक्षिप्त उपपन्नः संघात इति चेत्। तन्न। कस्मात्। उत्पत्तिमात्रनिमित्तत्वात्। भवेदुपपन्नः संघातो यदि संघातस्य किंचिन्निमित्तमवगम्येत। न त्ववगम्यते। यदितरेतरप्रत्ययत्वेऽप्यविद्यादीनां पूर्वपूर्वमुत्तरोत्तरस्योत्पत्तिमात्रनिमित्तं भवेन्न तु संघातोत्पत्तेः किंचिन्निमित्तं संभवति। नन्वविद्यादिभिरर्थादाक्षिप्यते संघात इत्युक्तं। अत्रोच्यते यदि तावदयमभिप्रायः अविद्यादयः संघातमन्तरेणात्मानमलभमाना अपेक्षन्ते संघातमिति। ततस्तस्य संघातस्य निमित्तं वक्तव्यं। तच्च नित्येष्वप्यणुषु अभ्युपगम्यमानेष्वाश्रयाश्रयिभूतेषु भोक्तृषु सत्सु न संभवतीत्युक्तं वैशेषिकपरीक्षायां किमङ्ग पुनः क्षणिकेष्वप्यणुषु भोक्तृरहितेष्वाश्रयाश्रयिशून्येषु चाभ्युपगम्यमानेषु संभवेत्॥

दृष्टाश्रयेष्वित्यर्थः। यदा स्थिरेष्वणुषु संघातयोग्येषु कर्तृषु वा दृष्टसहायेषु सत्सु तावन्नाभावमात्रेण संहतिकर्तृत्वायोगात्संघातापत्तेर्निमित्तं नास्तीत्युक्तं तदा क्षणिकपक्षे तत्रास्तीति किमु वक्तव्यमित्याह किमिति। आशयाश्रयः संघातकर्तरि तच्छून्येष्वित्यर्थः। आश्रयाश्रयिशून्येष्विति

पाठेऽपकार्येपिकारकत्वशून्येष्वित्यर्थः

द्वितीयं शंकते। अथापि इति। संघातस्याविद्यादीनां चोत्पत्तौ अन्योन्याश्रयत्वादिति दूषयति॥ कथमिति। स्वाभाविकः स्वल्पः संघातानां हेतुहेतुमद्भा
वेन प्रवाहेन संहन्तारमपेक्षन्ते। पूर्वसंघातानुगम्या अविद्यादय उत्तरसंघातप्रवर्तका इति तात्पर्यं। अपदोषोपीत्याशंकते। अथ मन्यसे इति। स्वभावस्य

अथायमभिप्रायः अविद्यादय एव संघातस्य निमित्तमिति। कथं तमेवाश्रित्यात्मलाभं लभमाना तस्यैव निमित्तं स्युः॥ अथ मन्यसे संघाता एवा
नादौ संसारे संततस्यानुवर्तन्ते तदाश्रयाश्चाविद्यादय इति। तदापि संघातात्संघातान्तरमुत्पद्यमानं नियमेन वा सदृशमेवोत्पद्येत अनियमेन वा सदृ
शं विसदृशं चोत्पद्येत। नियमाभ्युपगमे मनुष्यपुद्गलस्य देवतिर्यग्योनिनारकप्राप्त्यभावः प्राप्नुयात्। अनियमाभ्युपगमेपि मनुष्यपुद्गलः कदा
चित्क्षणेन हस्ती भूत्वा देवो वा पुनर्मनुष्यो वा भवेदिति प्राप्नुयात्। उभयमप्यभ्युपगमविरुद्धं। अपि च यद्भोगार्थः संघातः स्यात् स नास्ति स्थिरो
भोक्तेति तवाभ्युपगमः। ततश्च भोगो भोगार्थ एव स नान्येन प्रार्थनीयः। तथा मोक्षो मोक्षार्थ एवेति मुमुक्षुणा नान्येन भवितव्यं। अन्येन चेत्प्रार्थ्येत उभ
यं भोगमोक्षकालावस्थायिना तेन भवितव्यं। अवस्थायित्वे क्षणिकत्वाभ्युपगमविरोधः। तस्मादितरेतरोत्पत्तिमात्रनिमित्तत्वमविद्यादीनां यदि
भवेत् भवतु नाम न तु संघातः सिध्येत् भोक्त्रभावादित्यभिप्रायः॥

नियमानियमयोरपसिद्धान्तापातः स्यादिति परिहारार्थः। पूर्वसंघातनिगलितिचेति पुद्गलो देहः। किंच भोक्तुः क्षणिकत्वपक्षे भोगापवर्गव्यवहारोपि दुर्घट इ
त्याह। अपि चेति। भोगादिकर्तृसमकाले नास्ति चेदित्यर्थः। अस्ति चेत् क्षणिकत्वभंग इत्यर्थः। प्रकृतं संघातनिरासमुपसंहरति। तस्मादिति

शा॰ त॰ भा॰ २ द्विविधो हि कार्यसमुत्पादः सुगतसंमतः हेत्वधीनः कारणसमुदायाधीनश्चेति। तत्राविद्यातः संस्कारस्ततो विज्ञानमित्येवंरूपः प्रथमः पृथिव्यादिह
६८ मुदायात्कार्यमित्येवं द्वितीयः। तत्र प्रथमो कृत्स्नद्वितीयः संघातं कर्त्रभावेन दूषितः॥ संप्रत्याद्यं दूषयति हेत्वकारः। उत्तरेति। क्षणिकोर्थः क्षणद्वयस्थ
ते निरुध्यमानत्वं विनाशकसान्निध्यं। निरुद्धत्वमतीतत्वं। ननु कार्यकालेपि नाशाभावात् मलेपि पूर्वक्षणस्य क्षणिकार्थस्य हेतुत्वमस्त्विति शंक

उत्तरेत्यादेव पूर्वनिरोधात्॥ ॥ उक्तमेतदविद्यादीनामुत्पत्तिमात्रनिमित्तत्वात्संघातसिद्धिरस्तीति। तदपि तत्सान्निमात्रनिमित्तत्वं न संभव
तीति दूषयितुमुपपाद्यते। क्षणभंगवादिनो मतमभ्युपगम्य। उत्तरस्मिन्क्षणे उत्पद्यमाने पूर्वः क्षणो निरुध्यत इति। नचैवमभ्युपगच्छता पूर्वो
त्तरयोः क्षणयोः हेतुफलभावः शक्यते संपादयितुं निरुध्यमानस्य निरुद्धस्य वा पूर्वक्षणस्याभावग्रस्तत्वादुत्तरक्षणहेतुत्वानुपपत्तेः। अथ
भावभूतः परिनिष्पन्नावस्थः पूर्वक्षण उत्तरक्षणस्य हेतुरित्यभिप्रायस्तथापि नोपपद्यते भावभूतस्य पुनर्व्यापारकल्पनायां क्षणांतरसंबंध
प्रसंगात्। अथ भाव एवास्य व्यापार इत्यभिप्रायः। तथापि नैवोपपद्यते। हेतुस्वभावानुपरक्तस्य फलस्योत्पत्त्यसंभवात्। स्वभावोपरागाभ्युपगमे च
हेतुस्वभावस्य फलकालावस्थायित्वे सति क्षणभंगाभ्युपगमत्यागप्रसंगः॥

ते। अथ भावेति। तदुपपादयति। किं हेतोर्हत्वं तत्राह। कार्योत्पादनाख्यो व्यापारः। अनंतरिक्तो व्यापाराद्यदुत्पत्तौ द्वितीयं शंकते। अथेति। भावः उ ६८
त्पत्तिः उक्तं हि भूतिर्येषां क्रिया सैव कारकं सैव चोच्यत इति येषां क्षणिकभावानां या भूतिः सैव क्रिया कारकं चेत्यर्थः। नच स्थापिनिमित्तत्वं सापेक्षो पादानत्वं।
तथा च मृद एव घटादिकालासत्वे घटाद्यनुत्पत्तिः सत्वे च क्षणिकत्वहानिरिति परिहरति। तथापीत्यादिना॥

प्रथमपक्षोक्तं दोषं दूषयितुं विनैवेति । वस्तुनो जन्मध्वंसाभ्यां निरूपणाभावेन क्षणिकत्वमित्यर्थः । अपि चेति । तयोः स्वरूपत्वे वस्तुन्यंतर्भावात् वस्तुनोऽनाघ्रातस
त्वमित्यपि दुष्टमंधिर्ती शंकते अथास्तीति । विरोधमेवाह । तस्मादेतिं दूषयति सत्येव सतीति । ताभ्यां संसर्गे वस्तुनः क्षणिकत्वभंगः स्यात् संसर्ग एव नास्ती
विनैव वास्य भावो पगमेण हेतुफलभावमभ्युपगच्छता सर्वत्र तत्प्रसंगे रतिप्रसंगः । अपि चोत्पाद निरोधौ नाम वस्तुनः स्वरूपमेव वा स्यातामन्य
द्वस्त्वंतरं वा वस्त्वंतरमेव वा सर्वथापि नोपपद्यते । यदि तावद्वस्तुनः स्वरूपमेवोत्पादनिरोधौ स्यातां ततो वस्तुरूपवदुत्पादनिरोधयोरपि चपर्यायाः
शा मुमुः ॥ अथ व्यतिरिक्ताविति चेद्भिन्नयोरुत्पादनिरोधयोरपि संभवात् मध्यवर्तिनो वस्तुनः स्थायितापत्तिः अथ वस्त्वभिलप्येते इति एवमप्याद्यंत
मध्यक्षणत्रयसंबंधित्वाद्वस्तुनः क्षणिकत्वाभ्युपगमहानिः अथ सत्वव्यतिरिक्तावेवोत्पादनिरोधौ वस्तुनः स्यातां अत्रापि हि भवतां ततो वस्तुत्पा
दनिरोधाभ्यामसंसृष्टमिति वस्तुनः शाश्वतत्वप्रसंगः । यदि चदृश्यनादृश्य नैव वस्तुनः उत्पादनिरोधौ स्यातामेवमपि दुष्टधर्मौ तौ न वस्तुधर्माविति व
स्तुनः शाश्वतत्वप्रसंग एव । तस्मादप्यसंगतं सौगतमतं ॥ ॥असति प्रतीतिकोपरोधौ सौगपद्यमन्यथा ॥ ॥क्षणभंगवादे पूर्वक्षणनिरोधस्य सा
भो तरस्य क्षणस्य हेतुर्भवतीत्युक्तं ॥ ॥

तित्वतीयकल्पमुख्यमप्यदूषयति ॥ अथासंतेति । सत्त्वं व्याख्यातुं वृत्तं स्मारयति । क्षणभंगेति ॥ ॥ ॥ ॥

किं कार्योत्पत्तिर्निर्हेतुका सहेतुका वा आद्ये प्रतिज्ञाहानिरित्याह ॥ अन्यथा सत्त्वे बीजादिना विषमकरणसहकारिसंस्काराश्चतुर्विधा हेतवस्तान्प्रती
त्य समुत्पद्यते चित्तरूपादिविज्ञानं चैत्ताश्चित्तसमकाः सुखादयश्च जायन्त इति प्रतिज्ञार्थः ॥ यथा नीलविज्ञानस्य नीलत्वं कृत्वालम्बनप्रत्ययो विषयः । चक्षुः
करणमधिपतिप्रत्ययः सहकारिप्रत्ययश्चालोकः समनन्तरप्रत्ययः संस्कार इति भेदः प्रतिज्ञाहानिं पुरुषदोषमुक्त्वा वस्तुदोषमप्याह निर्हे

अन्यथा सत्त्वे हेतौ फलोत्पत्तिं ब्रूयात् । ततः प्रतिज्ञोपरोधः स्यात् चतुर्विधान्हेतून्प्रतीत्य चित्तचैत्ता उत्पद्यन्त इतीयं प्रतिज्ञा हीयेत निर्हेतुका
यां चोत्पत्तावप्रतिबन्धात्सर्वं सर्वत्रोत्पद्येत । अथोत्तरक्षणोत्पत्तिं यावदवतिष्ठते पूर्वक्षण इति ब्रूयात् । ततो यौगपद्यं हेतुफलयोः स्यात् तत
थापि प्रतिज्ञोपरोध एव स्यात् । क्षणिकाः सर्वे संस्कारा इतीयं प्रतिज्ञोपरुध्येत ॥ ॥ प्रतिसंख्याऽप्रतिसंख्यानिरोधाप्राप्तिरविच्छेदात् ॥ अ
पि च वैनाशिकाः कल्पयन्ति बुद्धिबोध्यं त्रयादन्यत्संस्कृतं क्षणिकं चेति ॥

तुकायां चेति । सहेतुकत्वपक्षेऽन्वयिकारणसम्बन्धादेः कार्ये सहभावापत्त्या क्षणिकत्वप्रतिज्ञाहानिरिति सूत्रशेषं व्याचष्टे । अथोत्तरक्षणोत्पादिना ६९
सम्यक् क्रियन्त इति संस्काराः आद्यन्तवन्तो भावा इत्यर्थः । एवमाद्यसूत्राभ्यां समुदायो निरस्तः उत्तरसूत्राभ्यां कार्यकारणभावक्षणिकत्वे निरस्ते संप्रति
तदभिमतं द्विविधं विनाशं दूषयति । प्रतिसंख्येति ॥ संस्कृतमुत्पाद्यं बुद्धिबोध्यं त्रयमप्यभावत्वात्तुच्छरूपादन्यदित्यर्थः ॥ ॥

किं तत्त्रयं तदाह ।२। न दृश्यतेति निरुपाख्यं निःस्वरूपं प्रतीमः संख्या संतं भावमसंतं करोमीत्येवंरूपा संख्या बुद्धिः प्रतिसंख्या तया निरोधः कस्यचिद्भाव
स्य भवति। अबुद्धिपूर्वकस्तु संभावानां स्वरसभंगुराणामिति साह विपरीत इति। परप्रक्रियामुक्त्वा हस्तं व्याचष्टे। तेषामिति। भावाः संतानिनः संतानो ना
म भावानां हेतुफलभावेन प्रवाहस्तस्मिन् संताने चरमक्षणः स्वक्षणांतरं करोति वा न वा। आद्ये चरमत्वव्याघातः संतानाविच्छेदात्। द्वितीये चरमस्यास

तदपि च त्रयं प्रतिसंख्याऽप्रतिसंख्यानिरोधावाकाशं चेत्याचक्षते। त्रयमपि चैतदवस्त्वभावमात्रं निरुपाख्यमिति मन्यंते॥ बुद्धिपूर्वकः किल
विनाशो भावानां प्रतिसंख्यानिरोधो नाम भाष्यते॥ तद्विपरीतोऽप्रतिसंख्यानिरोधः आवरणाभावमात्रमाकाशमिति। तेषामाकाशं परस्तात्प्रत्याख्या
स्यति निरोधद्वयमिदानीं प्रत्याचष्टे। प्रतिसंख्याऽप्रतिसंख्यानिरोधयोरप्राप्तिरसंभव इत्यर्थः॥ कस्मादविच्छेदात्। एतौ हि प्रतिसंख्याऽप्रतिसंख्यानि
रोधौ संतानगोचरौ वा स्यातां भावगोचरौ वा। न तावत्संतानगोचरौ संभवतः। सर्वेष्वपि संतानेषु संतानिनामविच्छिन्नेन हेतुफलभावेन संतान
विच्छेदस्यासंभवात्। नापि भावगोचरौ संभवतः। नहि भावानां निरन्वयो निरुपाख्यो विनाशः संभवति। सर्वास्वप्यवस्थासु प्रत्यभिज्ञानब
लेनान्वय्यविच्छेददर्शनात्॥

स्यासंगः। अर्थक्रियाकारित्वं सत्त्वमिति स्वसिद्धांताच्चरमस्यासत्त्वे पूर्वेषामप्यसत्त्वप्रसंगः। अर्थक्रियाशून्यत्वात्। तस्मात्संतानस्य विच्छेदासंभवा शां
न्निरोधाप्राप्तिरित्याह। न तावदिति। नहीति प्रत्याह। नापीति। घटकपालचूर्णाद्यवस्थासु सेयं मृदिति प्रत्यभिज्ञानादन्वयिभावस्य मृदादेर्नास्ति कविना भा
टि

बीजस्यांकुरादिषु प्रत्यभिज्ञानाद्दर्शनाच्चान्वयिनो विच्छेद इत्यत आह। अन्त्यस्येति। अंकुरादयोऽनुस्यूतान्वयिभावस्थाः॥ कार्यत्वाद्घटवदित्यन्वयवि
च्छेदसिद्धिरित्यर्थः। यस्माद्द्वाभ्यां नाशाभ्यामपि त्वं तस्मात्ताति सर्गनिरोधासंभव इत्युपसंहारः। अविद्यादीनां प्रतिसंख्यानिरोधं तदभिमतं दूषयति। उभ

अस्पष्टप्रत्यभिज्ञानामप्यवस्थानां क्वचित् दृष्टेनान्वयाविच्छेदेनान्यत्रापि तदनुमानात्। तस्मात्सर्वपरिकल्पितस्य निरोधद्वयस्यानुपपत्तिः
॥उभयथा च दोषात्॥ योऽयमविद्यादिनिरोधः प्रतिसंख्याप्रतिसंख्यानिरोधान्तःपाती परपरिकल्पितः स सम्यग्ज्ञानाद्वा सपरिकरात्स्यात् स्वयमेव वा
पूर्वस्मिन्विकल्पे निर्हेतुकविनाशाभ्युपगमहानिप्रसंगः। उत्तरस्मिंस्तु मार्गोपदेशानर्थक्यप्रसंगः एवमुभयथापि दोषप्रसंगादसमंजसमिदं
दर्शनं॥ आकाशे चाविशेषात्॥ यच्च तेषामेवाभिप्रेतं निरोधद्वयमाकाशं च निरूपाख्यमिति। तत्र निरोधद्वयस्य निरूपाख्यत्वं पुरस्तान्निराकृतं। आ
काशस्येदानीं निराक्रियते। आकाशे चायुक्तो निरुपाख्यत्वाभ्युपगमः प्रतिसंख्याप्रतिसंख्यानिरोधयोरिव वस्तुत्वप्रतिपत्तेरविशेषात्। आ
गमप्रामाण्यात्तावदात्मन आकाशः संभूत इत्यादिश्रुतिभ्य आकाशस्य वस्तुत्वप्रसिद्धिः॥ ॥ ॥ ॥ ७०

मार्गेति। यमनियमादयः परिकराः सर्वं दुःखं क्षणिकमिति भावनोपदेशो मार्गोपदेशः। आगमप्रामाण्यादिति तत्राकाशस्य कार्यत्वोक्त्या घटादिवद्
वस्तुत्वं प्रसिध्यतीत्यर्थः॥

नन्वागमप्रामाण्ये विप्रतिपन्नान्प्रत्याकाशस्य वस्तुत्वं कथं सिध्यतीत्यत आह। विप्रतिपन्नानिति शब्दो वस्तुनिष्ठः गुणत्वात् रूपादिवदित्यनु-
मानेनाकाशस्य वस्तुत्वं सिध्यति पृथिव्याद्यष्टद्रव्याणां श्रोत्रग्राह्यगुणाश्रयत्वायोगादित्यर्थः। आकाशस्याभावत्वं प्रसज्याभाववत्त्वं दूषयति। अपि चेति
यथैकघटसत्त्वेऽपि घटसामान्याभावो नास्ति तथैकपक्षिसत्त्वेऽपि सामान्याभावात्मकाकाशे नास्त्येवेति पक्ष्यन्तरसंचारो न स्यादित्यर्थः। देशविशे-

विप्रतिपन्नान्प्रति तु शब्दगुणानुमेयत्वं वक्तव्यं गन्धादीनां गुणानां पृथिव्यादिवस्त्वाश्रयत्वदर्शनात्। अपि चावरणाभावमात्रमाकाशमिच्छतामे-
कस्मिन्सुपर्णे पतत्यावरणस्य विद्यमानत्वात्सुपर्णान्तरस्योत्पित्सतोऽनवकाशत्वप्रसङ्गः। यत्रावरणाभावस्तत्र पतिष्यतीति चेत्। येनावरणाभावो
विशेष्यते तत्तर्हि वस्तुभूतमेवाकाशं स्यान्नावरणाभावमात्रम्। अपि चावरणाभावमात्रमाकाशं मन्यमानस्य सौगतस्य स्वाभ्युपगमविरोधः प्र-
सज्येत॥ सौगते हि समये पृथिवी भगवः किंसंनिश्रया इत्यस्मिन्प्रश्नप्रतिवचनप्रवाहे पृथिव्यादीनामन्ते वायुः किंसंनिश्रय इत्यस्य प्रश्न-
स्य प्रतिवचनं भवति। वायुराकाशसंनिश्रय इति। तदाकाशस्यावस्तुत्वे न समञ्जसं स्यात्। तस्मादप्ययुक्तमाकाशस्यावस्तुत्वम्॥

षावच्छेदेनावरणाभावोऽस्तीत्याशंक्याभावावच्छेदकदेशविशेष एवाकाशो नाभावरूप इत्याह। यत्रेत्यादिना पतिष्यति पक्षी संचरिष्यतीत्यर्थः। आकाशस्याव-
स्तुत्वं स्वग्रन्थविरुद्धं चेत्याह। अपि चेति। किंसंनिश्रयः किमाश्रय इति। किंसंनिश्रय आश्रयवस्तुनः शशविषाणस्याश्रयत्वादर्शनादिति भावः॥ ॥

व्याघातांतरमाह। अपि चेति। ध्वंसप्रतियोगितारूपो धर्मो नित्यत्वं वा सति संभवति धर्मिणोऽसत्वव्याघातादित्यर्थः आत्मनः क्षणिकत्वं दूषयति। अ
नुस्मृतेरिति। अनुभवजन्या स्मृतिस्तस्या अनुभवसमानाश्रयत्वात्तदनुभवाश्रयस्यात्मनः स्थायित्वमित्यर्थः। क्षणिकत्वे तावद्दृष्टानुसंधानं च न स्या
दित्याह। कथं ह्यहमिति। पूर्वदर्शिनि कर्तर्यद्राक्षमिति स्मरणकर्तैक्यमस्मत्प्रत्यभिज्ञानादात्मनः स्थायित्वमित्याह। अपि चेति। योऽहमदः पूर्वमद्राक्षं स ए

अपि च निरोधद्वयमाकाशं च त्रयमप्येतन्निरुपाख्यमवस्तु नित्यं चेति विप्रतिषिद्धं। न ह्यवस्तुनो नित्यत्वमनित्यत्वं वा संभवति। वस्त्वाश्रयत्वात्
धर्मधर्मिव्यवहारस्य धर्मधर्मिभावे हि घटादिवद्वस्तुत्वमेव स्यान्न निरुपाख्यत्वं॥ अनुस्मृतेश्च॥ अपि च वैनाशिकः सर्वस्य वस्तुनः क्षणिकता
मभ्युपयन्नुपलब्धुरपि क्षणिकतामभ्युपेयात्। न च सा संभवति। अनुस्मृतेः। अनुभवमुपलब्धिमनुत्पद्यमानं स्मरणमेवानुस्मृतिः। सा चोप
लब्ध्येककर्तृका सती संभवति। पुरुषांतरोपलब्धिविषये पुरुषांतरस्य स्मृत्यदर्शनात्। कथं ह्यहमदोऽद्राक्षमिदं पश्यामीति च पूर्वोत्तरदर्शिन्ये
कस्मिन्नसति प्रत्ययः स्यात्। अपि च दर्शनस्मरणयोः कर्तर्येकस्मिन्प्रत्यक्षः प्रत्यभिज्ञाप्रत्ययः सर्वस्य लोकस्य प्रसिद्धोऽहमदोऽद्राक्षमिदं प
श्यामीति। यदि हि तयोर्भिन्नः कर्ता स्यात्। ततोऽहं स्मराम्यद्राक्षीदन्य इति प्रतीयात्। न त्वेवं प्रत्येति कश्चित्। यत्रैवं प्रत्ययः तत्र दर्शनस्मरणयोर्भि ७१
न्नमेव कर्तारं सर्वलोकोऽवगच्छति॥

वाहमद्य तत्स्मरामीति प्रत्यभिज्ञानाकारोऽद्राक्षमिदं पश्यामीति ज्ञानांतरसंबंधकथनं योऽहमद्राक्षं सोऽहं पश्यामीति प्रत्यभिज्ञां तद्द्योतनार्थं विपक्षे
बाधकमाह। यदि हीति दृष्टस्मर्त्रोर्भेदेऽहं स्मरामि अन्योऽद्राक्षीदिति प्रतीतिः स्यादित्यवतरणं तमाह। यत्रैवमिति॥ ॥ ॥

प्रत्ययमाह। स्मराम्यहमिति। स्मराम्यहमन्योऽद्राक्षीदिति प्रत्ययो यत्र तत्राभिन्नमेव कर्त्तारं लोकोऽवगच्छति तत्र विवाद इत्यर्थः प्रकृतप्रत्यभिज्ञायां तु दृश
भेदप्रत्ययप्रसङ्गाद्वा धकस्माद्दर्शनादिमित्युक्ती पित्तचण्डवीरमित्याह। इह त्वहमदर्शिति। यथाग्नेः श्यौ स्फाटिकं न वा धृतेक च्छित्तयानामेह द्रष्टास्मीति पूर्वदर्शनं निष्ठ
त इत्यनेनबाधाभावात्प्रत्यभिज्ञाप्रामाण्यं भवति। तथा द्रष्टृत्वे द्वैरैकैरेकत्वे तस्य प्रतिसन्धानमित्याह। तेनैवं मतीति स्मरणदृष्टसंबन्धेऽप्यात्मनस्तत्त्वीयस्मरणे भ

स्मराम्यहमसावद्राक्षीदिति इहत्वहमद्राक्षमिति दर्शनस्मरणयोर्वैनाशिकोऽप्यात्मानमेवैकं कर्त्तारमवगच्छति। न नाहमिमामात्मनोदर्शनं नि
वर्त्तनि हन्ते। यथाग्निरतु न्छोऽप्रकोशइति वा। तत्रैवं सत्येकस्य दर्शनस्मरणस्मरणदृष्टसंबन्धे स्मरणकत्वानुपगमहानिरपरिहार्या वैनाशिकस्यात्मा
नः। तथानन्तरमनन्तरमात्मन एव प्रतिपत्तिं प्रत्यभिजानन्नेककर्तृकामेतमात्मानं दृष्टसादृशीनात्मप्रतिपत्तीरजन्मनःआत्मैककर्तृकाः प्रतिसंदधा
नः कथं स्मरणभङ्गवादी वैनाशिको नापत्रपेत सम्पदि व्यपात्सादृश्य देतत्संपत्स्यत इति॥

गोऽस्तीति यदुक्तं तत्रस्याह। तथेति। वर्तमानदशारम्भोतमाच्छुसाद्भरणादनन्तरमनन्तरं स्वस्यैव प्रतिपत्तिमात्मैककर्तृकां प्रत्यभिजानन्नाजन्मनस्त्र्यव
र्तमानदशापर्यन्तं अतीताः प्रतिपत्तीः स्वैककर्तृकाः प्रतिसंदधानः प्रतिपत्ता। द्वितीयव्याख्याल्लाविवात्मनि प्रत्यभिज्ञानं सादृश्यदोषादिति शंकते॥स

सादृश्यज्ञानस्य धर्मिप्रतियोगिज्ञानाधीनत्वात् स्थिरस्यैवानुसंधातृत्वात्सादृश्यज्ञानं संभवति। स त्वेवापसिद्धान्तः स्यादिति परिहरति। तमित्यादिना।
स्यादेतत् न सादृश्यप्रत्ययः पूर्वोत्तरवस्तुद्वयज्ञानजन्यस्तत् द्वयगतसादृश्यावगाही किंतु हि किंचिदेव विकल्पः स्वाकारमेव बाह्यत्वेन विषयीकुर्वाणः

तं प्रति ब्रूमात्। तेनेदं सदृशमिति द्वयायतत्वात् सादृश्यस्य क्षणभंगवादिनः सदृशयोर्द्वयोर्ग्रहीतुरेकस्याभावात्सादृश्यनिमित्तं संप्रति
संधानमिति मिथ्याप्रलापएव स्यात्। स्याच्चेत्पूर्वोत्तरयोः क्षणयोः सादृश्यसंग्रहीतैकस्तथा सत्येकस्य क्षणद्वयावस्थानात्क्षणिकत्वप्रतिज्ञाभी
येत। तेनेदं सदृशमिति स्वसमानांतरभवेदं न पूर्वोत्तरक्षणद्वयग्रहणनिमित्तमिति चेत् न तेनेदमिति भिन्नार्थोपादानात्। स्वसमानांतरमेव
चेत् सादृश्यविषयं स्यात्तेनेदं सदृशमिति वाक्यप्रयोगोऽनर्थकः स्यात्। सादृश्यमित्येव प्रयोगः प्राप्नुयात्॥ ॥ ॥

क्षणांतरास्पर्शीत्यतो न स्थिरद्रष्टृपेक्षेति शंकते। तेनेदमिति। अत्र वक्तव्यं सादृश्यप्रत्यये तेनेदं सदृशमिति वस्तुद्वयं भासते न वेति नेति वदतः स्वा ७२
नुभवविरोधः। किंचार्थभेदाभावात्सहत्रयप्रयोगो न स्यात्। तस्मात् पदत्रयेणाभिथः संसृष्टभिन्नार्थभानाद् भानमसिद्धमिति परिहरति। न तेनेति॥

अयमभासते वस्तु अयं तत्स्वरूपमभिन्नमेवनवाखण्डमिति चेन्न च प्रमाणानेकप्रसमाभेदे मिथोप्यभेदापत्तेः इष्टापत्तिरिति अज्ञानां विज्ञानवादिनं प्रका
हापदाहीति॥ वस्तुत्वयज्ञेयं एतद्रूपमसत्पाद्भिन्नं सर्वलोकप्रसिद्धं तच्चेन्नांगी। किं मतेस्यापि दृष्टप्रसंगभये नन्तर्हि तत्तदेकाराणां क्षणिकविज्ञानानां
नित्योपात्तनिमित्तत्वादेकस्मिन्धर्मिणि विरुद्धानेकप्रसस्तु एतान्मकविप्रतिपत्त्यसंभवात्तदुपपक्षसाधनादिव्यवहारो लुप्येत अतोपथानुभवं ज्ञानं तैय
मेदैगाकिर्मः। तथा च तेनेदं सदृशमिति वा स्थायीभेदीनपूर्वकं साहूपजानतत्त्वात्मनःस्थापित्वं दुर्वारमिति धर्मः। ननु संस्मेवंधा ह्यर्थाः क्षणिकसलक्ष

यदा हि लोके प्रसिद्धः पदार्थः परीक्षकैर्न परिगृह्यते तदा स्वपक्षसिद्धिः परपक्षदोषो वा उभयमप्युच्यमानं परीक्षकाणामात्मन्यपयथार्थ
त्वेन न बुद्धिं समानमारोहत्येवेनेव वक्तोयमिति निश्चितं यत देव वक्तव्यं॥ ततोन्यदुच्यमानं वञ्चकत्वापित्वमात्मनः केवलं ख्यापयेत्॥ ॥

णानिर्विकल्पकग्राह्याः सविकल्पाध्यवसेयास्तु छापि स्वसादृश्यादन्यो वा आः कल्पिता अवभासंते। अतो विप्रतिपत्त्यादिव्यवहार इति वा ह्यार्थवाद
मार्गो न निरस्यति। एवमेवेति॥ प्रत्यक्षमाणसिद्धं तदेव वक्तव्यं न हि क्षणिकत्वे किंचित्प्रमाणमस्ति। न चेदानीं घट इति प्रत्यक्षमवर्त्तमानकालसत्त्वं घट
स्य गोचरयद्वर्त्तमानक्षणमात्रसत्त्वरूपेण क्षणिकत्वे मानमिति वाच्यं। तस्य वर्तमानत्वमाद्येणि च रलेन कालांतरासत्त्वासिद्धेर्नवपत्त्यन्तरक्षणिक
मितिआसिरस्ति विग्रुदादे रपि द्विक्षणस्थापित्वेन दृष्टेः तामावाच्च स्थायिन मनुमातार मंतरेणानुमानं संभवति। तस्मादमानसिद्धार्थवक्ता तथा

किंच सा दृश्यं प्रत्यभिज्ञायां दोषवशान्निमित्तं विषयतयाऽऽज्ञा। अथैषि च रूपसत् ज्ञातं वा। नाद्यः मंदांधकारे रज्जुशुक्तिमात्रग्रहे शैवलातानेपि रूप्याने दृष्ट्र मा
पतेः। नद्वितीयः स्थापितातारं विनातत् ज्ञानासंभवस्योक्तत्वात् नापि विद्यमानतयाऽतिमितमित्याह। नचेति। सोहमित्यत्र स्वेत्वात्तेनाहं सदृश इत्यनुल्ले
खादित्यर्थः। सोहमिति प्रत्यभिज्ञाया भ्रमत्वं निरस्य संशयत्वं निरस्यति। भवेदिति। जडार्थे प्रत्यभिज्ञाते षिधर्मभावनयाऽसंशयः कदाचित्स्यात्

न चायं सादृश्यात्संव्यवहारो युक्तः। तद्भावावगमात्। तत्सदृशभावानवगमाच्च। भवेदपि कदाचिद्बाह्यवस्तुनि विप्रलंभः संभवात्। तदेवं
इदं स्यात् तत्सदृशं वेति संदेहः। उपलब्धरि तु संदेहोऽपि न कदाचिद्भवति स एवाहं स्यां तत्सदृशो वेति। य एवाहं पूर्वेद्युरद्राक्षं स एवाहमद्य स्मरामी
ति निश्चिततद्भावोपलंभात्। तस्मादप्यनुपपन्नो वैनाशिकसमयः॥ नासतोऽदृष्टत्वात्॥ इतश्चानुपपन्नो वैनाशिकसमयो यतः स्थिरमनु
पाख्यं कारणमनभ्युपगच्छतामभावाद्भावोत्पत्तिरित्येतदापद्येत। दर्शयंति चाभावाद्भावोत्पत्तिं नानुपमृद्य प्रादुर्भावादिति विनष्टाद्धि किल बीजा
दंकुर उत्पद्यते। तथा विनष्टात्क्षीराद्दधि मृत्पिंडाच्च घटः॥

मतीत्यर्थः। असतो दृष्टत्वादिविपर्यस्तम्प्रत्यभिज्ञाविरोधात् क्षणिकत्वमतमसंगतमित्युपसंहरति। तस्मादिति। अभावः स्यात् क्षणिकाणां वदसं
तामसन्निसर्गी कृत्समवादिनाऽसत्तो घटादिकं जायत इति सुगता वदंति तद्दूषयति। नासत इति। न केवलं बलादापद्यते किंतु स्वयं दर्शयंति च।
हीनजैऽप्रकृतार्थे गमयतः। मृदादिकं उपमृद्य घटादेः प्रादुर्भावादित्यर्थः। इममर्थमाह। विनष्टादिति॥

कारणं विना तु कार्यजन्मेत्यत्र युक्तिमाह॥ कूटस्थादिति विनाशहेत्वादिस्पर्शः। निरस्तनिरतिशयस्य कार्यविरुद्धत्वेन कार्याणि सर्वाण्येकस्मि
न्नेव क्षणे स्युस्तथा चोत्तरक्षणे कार्याभावादसत्त्वापत्तिः। न च सहकारिकृतातिशयक्रमात्कार्यक्रम इति युक्तं अतिशयस्यातिशयान्तरापेक्षायामन
वस्था नाद्यन्तपेक्षायां कार्यस्यापत्तिशयानपेक्षत्वेन सहकारित्वेऽप्यप्राप्तिः तस्मान्नश्यस्यापि भावात्कार्यजन्मेत्यर्थः। क्षणिकभावस्य हेतुत्वखण्डनारो

कूटस्थाच्चेत्कारणात्कार्यमुत्पद्येत अविशेषात्सर्वं सर्वदैवोत्पद्येत। तस्मादभावग्रस्तेभ्यो बीजादिभ्योंकुरादीनामुत्पद्यमानत्वात् अभावादेवोत्पत्ति
रिति मन्यन्ते॥ तत्रेदमुच्यते। नासतो दृष्टत्वादिति नाभावादुत्पद्यते। यद्यभावादभ्युदयोत्पद्येत। अभावस्याविशेषात्कारणविशेषाभ्युपगमो
व्यर्थः स्यात्। न हि बीजादीनामुपमर्दितानां योऽभावस्तस्य शशविषाणादीनां च निःस्वभावत्वाविशेषादभावत्वे कश्चिद्विशेषोऽस्ति। येन बी
जादेवांकुरो जायते क्षीरादेव दधीत्येवं जातीयकः कारणविशेषाभ्युपगमोऽर्थवान्स्यात्। निर्विशेषस्य त्वभावस्य कारणत्वाभ्युपगमे शश
विषाणादिभ्योऽप्यंकुरादयो जायेरन्न चैवं दृश्यते। यदि पुनरभावस्यापि विशेषोऽभ्युपगम्येत॥ उत्पलादीनामिव नीलत्वादिस्ततो विशेषव
त्त्वादेवाभावस्य भावत्वमुत्पलादिवत्प्रसज्येत॥

तदेतेन तन्निरस्तं। अभावस्य हेतुत्वनिराकरणार्थमिदं प्रत्याचष्टे नतेदमिति। यदि बीजाभावस्याभावान्तराद्विशेषः स्यात्तदा विशेषवदभावद्वारा बीजादे
वांकुर इति लोकव्यवस्थानामभ्युपगमोऽर्थवान्स्यात् स तु नास्तीत्याह येनेति। स्पष्टं योजनमिति॥ निर्विशेषस्येति शशविषाणादेः कार्यकारित्वं स्यादिष्टत्वान्ना
भावस्याभावतो हेतुत्वमित्यर्थः। अस्त्वभावस्यापि विशेषस्तत्राह यदीति॥

स्या· र· भा· २
७४

अभावस्य हेतुत्वे तत्प्रसंग इति तत्र कृतकत्वानुमानमाह । नापीति । अभावो न हेतुरसत्त्वात् खपुष्पवदित्यर्थः । अभावो न प्रकृतिः कार्यानन्वितत्वाद्घटाभाववद्
नन्वितरत्तंतुभेदादिप्रकृतिरिति तर्के स्फुटीकुर्वन्नाह । अभावा चेति । अतो । चितत्वान्मृदादिभावविशेषप्रकृतिरित्याह ॥ यदिति । स्थिरः कारणसामग्र
क्रममनुघट्टयति । प तत्क्षणिकत्वादिनाऽनुभवबलात् स्थिरभावानामेव सहकारिसन्निधिक्रमेण कार्यक्रमहेतुत्वसंगीकार्यं न च क्षणिकस्य सहकार्य
पेक्षानुपपत्तेरिति वाच्यं । यतो क्षणिकस्यापि न पेक्षा स्वहेतुकारि विशिष्टं स्यात् । ततः स्वर्णादौ स्वतो निराकृत्य प्रत्ययेऽग्नितापादिसहकारिकृतातिशयपक्षमात् द्रवकादि
नाप्यभावः कस्यचिदुत्पत्तिहेतुः स्यात् । अभावत्वाद्वंध्याविषाणादिवदभावाद्भावोत्पत्ताय भावान्वितमेव सर्वं कार्यं स्यान्नचैवं दृश्यते । सर्वस्यैव
वस्तुनः स्वेन स्वेन रूपेण भावात्मनैवोपलभ्यमानत्वात् । न च मृदन्विताः शरावादयो भावास्तत्वमृदविकाराः केनचिदभ्युपगम्यंते । मृद्विकारत्वेनैव तु
मृदन्विता न लोकः प्रत्येति मृत्कंसरूपोपमर्दमंतरेण कस्यचित्कूटस्य स्ववस्तुनः कारणत्वानुपपत्तेरभावाद्भावोत्पत्तिर्भवितुमर्हतीति तत्र दुरुक्तं
स्थिरस्वभावानामेव सुवर्णादीनां प्रत्यभिज्ञायमानानां रुचकादिकारणभाववदर्शनात् । पिंडपिंडीजादिषु स्वरूपोपमर्दो लक्ष्यते । तेष्वपि नाशावुपमृद्य
मानानां पूर्वावस्थोत्तरावस्थाकारणमभ्युपगम्यते । अनुपमृद्यमानानामेवानुपादिनां बीजाद्यवयवानामंकुरादिकारणभावाभ्युपगमात् । तस्माद्वंध्याः
शशविषाणादिभ्यः सदुत्पत्तिदर्शनात् । सत्त्वश्च सुवर्णादिभ्यः सदुत्पत्तिदर्शनात् ॥ अनुपपन्नोऽयमभावाद्भावोत्पत्त्यभ्युपगमः

कार्यक्रमः ॥ न चातिशयस्यातिशयांतरानपेक्षत्वे कार्यस्याप्यनपेक्षेति वाच्यं घटस्य मृदनपेक्षत्वे कार्यत्वाविशेषात् घटस्यापि मृदनपेक्षाप्रसंगा ७४
दन्वयव्यतिरेकाभ्यामपेक्षा सहकारिप्रयुक्ते तुल्या यदुक्तं कार्याभाववद्दशायां कारणस्य सत्त्वाभावेतिरिति तत्र । अकारणस्यापि वा धामध्येन तत्त्वोपपत्तेः न
ह्यर्थक्रियाकारित्वमेव सत्त्वं अप्रत्यक्तदयोगेन सत्त्वस्यततो भेदात्ततो ह्यर्थक्रियाकारित्वं नासतः अतः कारणतावच्छेदकमबाधितस्वरूपात्मकं सर्वकार
णत्वाद्भिन्नमेवतत्क्षणात्तत्स्य तस्थिरभावानां हेतुत्वमुपपन्नमिति भावः ॥

पूर्वापरविरोधमप्याह। अपि चेति। अभावादुत्पत्तौ स्वरूपविकारापत्त्युक्तिः स्यादित्युक्तं। अथेति प्रसंगांतरमाह। उदासीनानामिति। अनीहमानानामप्रयत्नव
त्नानां अमत्रं घटादिमात्रं तन्तूनामव्यापारयतां। तस्मादुत्पत्तिमूले न क्षणिकवादः स्वार्थवादेन कूटस्थनित्यब्रह्मसमन्वयस्य न विरोध इति सिद्धं॥ नाभाव उपल

अपि च चतुर्भिश्चित्तचैत्ता उत्पद्यंते। परमाणुभ्यश्च भूतभौतिकलक्षणः समुदाय उत्पद्यत इत्यभ्युपगम्य पुनरभावाद्भावोत्पत्तिं कल्पयद्भिरभ्युपगत
मपह्नुवानैर्वैनाशिकैः सर्वो लोक आकुलीक्रियते। उदासीनानामपि चैवं सिद्धिः॥ यदि चाभावाद्भावोत्पत्तिरभ्युपगम्येतैवं सत्युदासीनानामनीहमा
नानामपि जनानामभिमतसिद्धिः स्यात्। अभावस्य सुलभत्वात्। कृषीवलस्य क्षेत्रकर्मण्यप्रयतमानस्यापि सस्यनिष्पत्तिः स्यात्। कुलालस्य च मृ
त्संस्क्रियायामप्रयतमानस्याप्यमत्रोत्पत्तिः। तंतुवायस्यापि तंतूनतन्वानस्यापि तन्वानस्येव वस्त्रलाभः। स्वर्गापवर्गयोश्च न कश्चित्कथंचित्सम
हेत। न चैतद्युज्यते अभ्युपगम्यते वा केनचित्। तस्मादनुपपन्नोऽयमभावाद्भावोत्पत्त्यभ्युपगमः॥ नाभाव उपलब्धेः॥ ॥एवं बाह्यार्थवादमाश्रित्य
समुदायाप्राप्त्यादिषु दूषणेषूद्भावितेषु विज्ञानवादी बौद्ध इदानीं प्रत्यवतिष्ठते॥ ॥

ब्धेः। अप्येवं निर्विशेषब्रह्मविज्ञानं बाह्यार्थापलापेन वदतो वेदांतिनोऽभिमतं साकारं क्षणिकं विज्ञानं न मतोऽन्यो ऽर्थोऽस्तीति योगाचारमतेन विरुध्यते न
वेति तन्मतस्य मानमूलत्वभ्रांतिमूलत्वाभ्यां संशये पूर्वोक्तबाह्यार्थवादनिरासमुपजीव्य पूर्वपक्षमाह एवमित्यादिना। पूर्वोत्तरपक्षयोः विरोधाविरोधौ फलं॥

शा॰ सं॰ भा॰ २ नन्वेकस्य सुगतागमस्य कथं बाह्यार्थसत्त्वासत्त्वोपन्यासं प्रति विरोधादित्यसंभवस्याधिकारिभेदाद्विरोध इति वदन् विज्ञानवादिनः सुगताभिप्रायं वदन्ते
७५ न मंदाधिकारिभ्यो बाह्यार्थवादिभ्यः श्रेयस्माह । केषांचिदिति । उक्तं च धर्मकीर्तिना ॥ देशना लोकनाथानां सत्त्वाशयवशानुगा इति सुगतानामुपदेशाः ।
शिष्यमत्यनुसारिण इत्यर्थः । नन्वसति बाह्यार्थे मानमेयव्यवहारः कथं तत्राह तस्मिन्निति । विज्ञाने नैव कल्पितेन नीलाद्याकारत्वेन प्रमेयमवभासात्मना

केषांचित्किल विनेयानां बाह्ये वस्तुन्यभिनिवेशमालक्ष्य तदनुरोधेन बाह्यार्थवादप्रक्रियेयं विरचिता । नासौ सुगताभिप्रायः । तस्य तु विज्ञानैकस्कन्धवाद एवाभिप्रेतः । तस्मिंश्च विज्ञानवादे बुद्ध्यारूढेन रूपेणान्तस्थ एव प्रमाणप्रमेयफलव्यवहारः सर्व उपपद्यते । सत्यपि बाह्येऽर्थे बुद्ध्यारोहमन्तरेण प्रमाणादिव्यवहारानवतारात् । कथं पुनरवगम्यते । अन्तस्थ एवायं सर्वव्यवहारो न विज्ञानव्यतिरिक्तो बाह्योऽर्थोऽस्तीति । तदसंभवादित्याह । स हि बाह्योऽर्थोऽभ्युपगम्यमानः परमाणवो वा स्युस्तत्समूहा वा स्तम्भादयः स्युः । तत्र न तावत्परमाणवः स्तम्भादिप्रत्ययपरिच्छेद्या भवितुमर्हन्ति । परमाण्वाभासज्ञानानुपपत्तेः । नापि तत्समूहाः स्तम्भादयः तेषां परमाणुभ्योऽन्यत्वानन्यत्वाभ्यां निरूपयितुमशक्यत्वात् ॥ ॥

मानफलं । शाब्दालंबमानं ज्ञानं अर्थाकारेण प्रमाणमिति भेदकल्पनया व्यवहार इत्यर्थः । मुख्य एव भेदः किं न स्यात् तत्राह । सत्यपीति । न हि बुध्य-
नारूढस्य नीलादेः प्रमेयत्वव्यवहार इति । अतो बुध्यारूढाकार एव प्रमेयं न बाह्यमित्यर्थः ; बाह्यार्थासत्त्वे प्रत्यक्षपूर्विकां युक्तीरुपन्यस्यति । कथमित्यादिना द्वे-
यं ज्ञानातिरेकेण सत्त्वं तदतिरेकेणासंभवान्नास्तीत्यंगवदित्याह । तदसंभवादिति । असंभवं विवृणोति । स हीति । परमाणवः स्कंधे देकः स्थूलः स्तंभ इति ॥

७५

अवयव्यभावेपि जात्यादयो व्याख्यार्थाः स्युरत आह। एवमिति। जातिगुणकर्मणां धर्मिणः सकाशाद्भेदे ऽसंतभेदे वा धर्मिवद्रूपांतरवच्च न धर्मधर्मि भावः। भेदाभेदौ च विरुद्धाविति न संति जात्यादयो धर्मा इत्यर्थः। किंच ज्ञानस्य ज्ञेयस्य स्वरूपरूपविशेषसंबंधाभावे सर्वविषयत्वापत्तेर्विशेषयोगाकार्यस्त था च ज्ञानगतविशेषस्यैव ज्ञातानेन विषयीकरणत्र वास्तवार्थसिद्धिर्मानाभावात् गौरवाच्चेत्याह। अपिचेति। पक्षपातो विषयविशेषे धैर्यं शिष्टव्यवहारः

एवं जात्यादीनपि प्रत्याचक्षीत। अपि चानुभवमात्रेणावधारणत्वेनो ज्ञानस्य जायमानस्य योग्यं प्रति विषमं पक्षपातः स्तंभज्ञानं कुड्यज्ञानं घटज्ञानं पटज्ञानमिति। नासौ ज्ञानगतं विशेषमंतरेणोपपद्यत इत्यवश्यं विषयसारूप्यं ज्ञानस्यांगीकर्तव्यं। अंगीकृते च तस्मिन्विषया कारस्य ज्ञानेनैवावरुद्धत्वादपार्थिकार्थसद्भावकल्पना। अपि च सहोपलंभनियमादभेदो विषयविज्ञानयोरापतति। नह्यनयोरेकस्यानु पलंभे ऽन्यस्योपलंभोऽस्ति नचैतत्स्वभावविवेके युक्तं। प्रतिबंधकारणाभावात्। तस्मादप्यर्थाभावः। स्वप्नादिवच्चेदं द्रष्टव्यं। यथाहि स्वप्नमाया मरीच्युदकगंधर्वनगरादिप्रत्यया विनैव बाह्येनार्थेन ग्राह्यग्राहकाकारेण भवंति। एवं जागरितगोचरा अपि स्तंभादिप्रत्यया भवितु मर्हंतीत्यवगम्यते। प्रत्ययत्वाविशेषात्कथं पुनरसति बाह्यार्थे प्रत्ययवैचित्र्यमुपपद्येत॥

किंच स्वप्ने ज्ञानाभिन्नं ज्ञातोपलंभस्वरूपेण नियतोपलंभ्यत्वात्। ज्ञानवदित्याह अपिचेति। ज्ञानार्थयोर्वास्तवे भेदेपि सहोपलंभनं स्यात् ग्राह्यग्राह कभावादित्यत आह। न चैतदिति। क्षणिकज्ञानस्यार्थेन संबंधहेत्वभावान्न ग्राह्यग्राहकभावइत्यर्थः। किंच जाग्रद्विज्ञानं न बाह्यालंबनं विज्ञानत्वात् स्वप्नादिज्ञानवदित्याह। स्वप्नेति। विज्ञानानां वैचित्र्यानुपपत्तिबाधितमनुमानमिति शंकते। कथमिति।

शा॰ स॰ भा॰ २। अन्यथोपपत्त्या परिहरति। वासनेति। अनादिसंतानांतर्गतपूर्वज्ञानमेव वासना तद्वशादनेकस्मात्प्रबंधानेपि नीलाद्याकारज्ञानवैचित्र्यं भवति। यथा
७६ बीजवासनया कार्पासरक्तत्वं तद्वदित्यर्थः। उभयवादिसंमतत्वाच्च वासना एव ज्ञानवैचित्र्यहेतवो न बाह्यार्थ इत्याह॥ अपि चेति। क्षणिकविज्ञानमात्र

वासनावैचित्र्यादित्याह। अनादौ हि संसारे बीजांकुरवत् विज्ञानानां वासनानां चान्योन्यनिमित्तनैमित्तिकभावेन वैचित्र्यं न विप्रतिषिध्यते
। अपि चान्वयव्यतिरेकाभ्यां वासनानिमित्तमेव ज्ञानवैचित्र्यमित्यवगम्यते। स्वप्नादिष्वंतरेणाप्यर्थं वासनानिमित्तस्य ज्ञानवैचित्र्यस्योभाभ्यामप्य
वाभ्यामभ्युपगम्यमानत्वादंतरेण तु वासनामर्थनिमित्तस्य ज्ञानवैचित्र्यस्य मयानभ्युपगम्यमानत्वात्। तस्मादप्यभावो बाह्यस्यार्थस्येत्येवं प्राप्ते ब्रू
मः। नाभाव उपलब्धेरिति॥ न खल्वभावो बाह्यस्यार्थस्याध्यवसातुं शक्यते। कस्मादुपलब्धेः। उपलभ्यते हि प्रतिप्रत्ययं बाह्योर्थः स्तंभः कुड्यं घटः प
ट इति। न चोपलभ्यमानस्यैवाभावो भवितुमर्हति। यथा हि कश्चिद्भुंजानो भुजिसाध्यायां तृप्तौ स्वयमनुभूयमानायामेवं ब्रूयात्। नाहं भुंजे न वा
तृप्यामीति। तद्वदिंद्रियसंनिकर्षेण स्वयमुपलभ्यमान एव बाह्यमर्थं नाहमुपलभे न च सोस्तीति ब्रुवन्कथमुपादेयवचनः स्यात्। ननु नाह
मेवं ब्रवीमि न कंचिदर्थमुपलभ इति किं तूपलब्धिव्यतिरिक्तं नोपलभ इति ब्रवीमि॥ ७६
बादस्यमानतमत्वात्ते न निरसविज्ञानवादे विरुध्यते इति शास्त्रसिद्धांतसूत्रं व्याचष्टे। नाभाव इत्यादिना॥ किं वा बाह्यार्थस्यानुपलब्धेरभावः उतशक्यताद्दे
नानुपलब्धेः नाद्यः स्फुटमुपलब्धेरिति द्वितीयमाशंकते। ननु नाहमिति॥ ॥

ज्ञानस्येष्यमे। विषयविषयिभावेनभेदस्यसाक्षित्प्रत्यक्षसिद्धत्वात्त्वलक्ष्यविरुद्धमभेदाभिधानमित्याह। वाढमित्यादिना।। यद्वचनादपिजनेोवच्छायार्थज्ञाना
देरेवैनोपलभतइत्याह।। अतस्येति।। बाह्यार्थस्यानंतत्वेप्रसक्तोपलंभायोगात् दृष्टांतत्वासंभवाद्बहिर्विषयेनस्यादित्याह। इतरथेति। अबाधित
भेदानुभवविरोधकारी मुक्तेनवकारइत्याह। तस्मादिति। ज्ञेयार्थज्ञानातिरेकेणासत्त्वसंभवादित्यर्थो वा घटकरणमिति शंकते। नन्विति। कोसावसंभवः
वाढमेवं ब्रुवीषि निरंकुशत्वात्तेतुंडस्य। नतु युक्तमुपेतं ब्रवीषि। यतः उपलब्धिव्यतिरेकोपि विलादर्थस्याभ्युपगंतव्यः। उपलब्धेरेव नहि कश्चिदु
पलब्धिमेवस्तंभः कुड्यं चेत्युपलभते। उपलब्धिविषयत्वेनैव तु स्तंभकुड्यादीन्सर्वेलौकिका उपलभंते। अतएवमेव सर्वेलौकिका उपलभंते।
यत्नस्थापिचक्षूषाणा अपिबाह्यार्थमेवमात्यस्ते। यदंतर्ज्ञेयरूपं तद्बहिर्वदवभासतइति। तेपि सर्वलोकप्रसिद्धां बहिरवभासां संविदं प्रतिलभमानाः
प्रत्याख्यातुकामाश्च बाह्यमर्थं बहिर्वदितिवत्कारं कुर्वंति। इतरथाहि कस्माद्बहिर्वदिति ब्रूयुः। नहि विष्णुमित्रो वंध्यापुत्रवदवभासत इति कश्चि
दाचक्षीत। तस्माद्यथानुभवं तत्त्वमुपगच्छद्भिर्बहिरेवावभासत इति युक्तमभ्युपगंतुं नतु बहिर्वदवभासत इति। ननु बाह्यस्यार्थस्यासंभवाद्बहि
र्वदवभासत इत्यध्यवसितं।। नायं साधुरध्यवसायो यतः प्रमाणप्रवृत्त्यप्रवृत्तिपूर्वकौ संभवासंभवावधार्येते। नपुनः संभवासंभवपूर्विके
प्रमाणप्रवृत्त्यप्रवृत्ती।।

ज्ञातत्वं वा असत्त्वनिश्चयो वा। अयुक्तत्वं वा उत्कटकोटिकसंशयापादकसंभवस्याभावोक्त।। नाद्यः साध्याभेदात् द्वितीयः स्थूलौ घटस्तंभाविति समूहा
लंबनस्थूलत्वाद्विलघटत्वस्तंभत्वरूपविरुद्धधर्मवतोरर्थयोरस्थूलादेकस्मात् इत्याकाराहि विज्ञानाभेदे दलत्वनिश्चये नासंभवासिद्धिरित्याह। नायं

शा० सू० भा० २ संभवः सत्तानिश्चयः प्रमाणाधीनः। असंभवोऽसत्त्वनिश्चयः प्रमाणाभावाधीनः॥ नत्वेय इति समितिअवस्थानेन स्फुरयति। यद्धीति। उक्तव्यवस्थायाः फलं
७७ बाह्यार्थस्य सर्वप्रमाणसिद्धिः संभवं बध्नात्येवेत्यतीयं दूषयति। इहेति। प्रमाणानि छित्वा बाह्यार्थस्य स्तंभादेः परमाणुभ्यो भेदाभेदविकल्पैर्युक्तिमात्रेणासत्त्वनिश्च
यो न युक्तः। स्वप्नवत्सर्वप्रयुक्तत्वस्य तुल्यत्वात् स्थूलस्यैकस्य विज्ञानस्य स्थूलानेकसमूहात्मकत्वस्य विषमाभेदेयुक्तेः स्थूलत्वानेकत्वस्य गात् न चेष्टापत्तिः
समूहालंबनेऽच्छेदे विज्ञानानां मिथो वार्ता न भिन्नतया विषयच्छित्या व्यवहारलोपापत्तेः तस्मादयुक्तत्वेपि यथानुभवं व्यवहारयोग्यो बाह्यः स्वीकार्यः। न च

यद्धि प्रत्यक्षादीनामन्यतमेनापि प्रमाणेनोपलभ्यते तत्संभवति यत्तु केनचिदपि प्रमाणेनोपलभ्यते तन्नसंभवति। इह तु यथास्वं सर्वैरेव प्रमाणैर्बा
ह्योऽर्थ उपलभ्यमानः कथं व्यतिरेकाव्यतिरेकादिविकल्पैर्न संभवतीत्युच्यते उपलब्धेरेव न च ज्ञानस्य विषयसारूप्याद्विषयनाशो भवति। असति
विषये विषयसारूप्यानुपपत्तेः बहिरुपलब्धेश्च विषयस्य। अत एव सहोपलंभनियमोऽपि प्रत्ययविषययोरुपायोपेयभावहेतुको नाभेदहेतु
क इत्यभ्युपगंतव्यं॥

तुच्छः निश्चितेनाद्रष्टासंभवस्यानुपयोगात्तस्य कुचित्प्रमाणं पृच्छते एवंगलादिति भावः यच्चोक्तं ज्ञानगतार्थसारूप्यस्यैव ज्ञानालंबनत्वोपपत्ते
र्बहिरर्थाभाव इति तत्राह। न चेति। यत्तु गौरवमुक्तं तत्र दूषणं प्रामाणिकत्वादित्याह। बहिरिति। यत एव ज्ञानार्थयोर्भेदः सर्वे लोके ज्ञानस्य सुखवदसिद्धः ७७
अत एव सहोपलंभनियमोपि न भेदसाधक इत्याह। अत एवेति। यथा भासुखस्य रूपस्यालोकोपलंभनियतोपलब्धिकत्वेपि नालोकाभेदः तथार्थस्य
न ज्ञानाभेदः भेदेपि ग्राह्यग्राहकभावेन नियमोपपत्तेः। न च ज्ञानस्य ज्ञानफलत्वं क्षणिकत्वात्संबंधायोगः स्वापित्यादिति भावः

विज्ञानमनेकार्थेभ्यो भिन्नमेककालत्वात् गोत्ववदिति सत्यमिति प्रसङ्गमाह। अपि चेति। न च हेत्वसिद्धिः ज्ञानं ज्ञानमित्येकाकारप्रतीतेः ज्ञाने ज्ञानत्वनिश्चयात्
न च ज्ञानजातिर्विषमाभ्यामभिन्नेदानिं प्रमादित्याह। न विशेष्यस्येति। घटादेश्चैतन्यान्तरेण मुक्तावृत्तिज्ञानाद्भेदमाह। तथेति। घटो हि स्वाभ्यां भिन्न एकत्वात्

अपि च घटज्ञानं पटज्ञानमिति विशेषणयोरेव घटपटयोर्भेदेन विशेष्यस्य ज्ञानस्य यथा शुक्लो गौः कृष्णो गौरिति द्वौ शुक्लकृष्णयोर्भेदेन गो
त्वस्य। द्वाभ्यां च भेदे एकस्य सिद्धो भवति। एकस्माद्धि द्वयोः तस्मादर्थज्ञानयोर्भेदः। तथा घटदर्शनं घटस्य रूपं भिन्नत्वादपि इति वक्तव्यम्। अत्रापि विशे
ष्ययोरेव दर्शनस्पर्शनयोर्भेदो न विशेषणस्य घटस्य यथा क्षीरे गन्धः क्षीरे रस इति विशेष्ययोरेव गन्धरसयोर्भेदो न विशेषणस्य क्षीरस्येति दृष्टा।
अपि च द्वयोर्विज्ञानयोः पूर्वोत्तरकालयोः स्वसंवेदनेनैवोपक्षीणयोरितरेतरस्याग्राहकत्वानुपपत्तेः तत्त्वविज्ञानभेदप्रतिज्ञास्फाटिक
त्वादिधर्मप्रतिज्ञा॥

क्षीरवदित्यर्थः। ज्ञानभिन्नार्थानङ्गीकारे स्वज्ञानस्य व्यवहारलोपं बाधकमाह। अपि चेति। क्षणिकयोः स्वप्रकाशयोः स्फाटिकज्ञानयोर्मिथो ग्राह्य
ग्राहकत्वमभ्युपगन्तव्यम् नाभ्युपगतं च तयोश्च तयोर्भेदप्रतिज्ञानमुक्ताधर्मिप्रतियोगिनोर्मिथः परेण चाग्रहे तद्भेदग्रहायोगात् तथा च तयोर्भेदग्राहकस्याभावात्
तद्विज्ञानमेवमेवव्य। एवं पक्षसाध्यहेतुदृष्टान्तभेदाभावे दूरस्फाटिकमसदिति प्रतिज्ञानमुक्तम्॥

शा॰ स॰ भा॰ २ सर्वतो व्यावृत्तं व्यक्तिमात्रं स्वलक्षणं अनेकानुगतं सामान्यम् तद्व्यावृत्तिरूपमिति प्रतिज्ञानयुक्ता सर्वानेकार्थानां ज्ञानमात्रत्वेन मिथः परेणवादुत्वीन
७८ त्वात्पृतरनीलज्ञानं वा स्वस्वनीलज्ञानवासनामिति प्रतिज्ञानयुक्ता। तयोर्भिन्नस्वभावत्वात् भावात् किं चाविशेषपञ्चवोगविधासंसर्गः तेननीलमिति
सद्धर्मः। नरविषाणमितिरसदर्थः अन्यत्तमितिसदसद्धर्मः। सतो विज्ञानस्यासतो नरविषाणस्य चामूर्तत्वादितिप्रतिज्ञा दुर्लभा अनेकार्थज्ञान

स्वलक्षणसामान्यलक्षणवास्यवासकत्वाविशेषोपलम्भवसदसद्धर्मैवं धर्मोऽस्याभिप्रतिज्ञाश्च स्वशास्त्रगतास्तैर्हीयेरन् किं चान्यद्विज्ञानं विज्ञान
मित्यभ्युपगच्छता बाह्योर्थस्तंभः कुड्यमित्येवं जातीयकः कस्मान्नाभ्युपगम्यत इति बाह्यं विज्ञानमनुभूयते इति चेत् बाह्योप्यर्थोऽनुभूयत
एवेति युक्तमभ्युपगंतुं। अथ विज्ञानं प्रकाशात्मकत्वात्प्रदीपवत् स्वरूपमेवानुभूयते न तथा बाह्योप्यर्थ इति चेत्। अत्यंतविरुद्धां स्वात्मनि क्रि
यामभ्युपगच्छसि। अग्निरात्मानं दहतीतिवत्। अविरुद्धं तु लोकप्रसिद्धं स्वात्मव्यतिरिक्तेन विज्ञानेन बाह्योर्थोऽनुभूयत इति नेच्छस्यहो पांडि
त्यमहद्दर्शितं॥

साधकत्वाज्ज्ञानेनास्य बंधो ज्ञानेनास्य मोक्ष इति च प्रतिज्ञा वद्ध्येज्ञानसाध्य आदिपदेन सामान्यतद्वद्ग्राह्यमनिर्वचनीयमिति शिष्यहितोपदेशोऽते
कं ज्ञानसाध्योऽगृहीतः तस्मात्प्रतिज्ञादि व्यवहारापग्राह्यग्राहकभेदेनैकार्यमित्यर्थः। ज्ञानार्थयोर्भेदे पुनरंतरमस्तीत्याह। किं वा सदितिविज्ञानवदर्थस्या
प्यनुभवाविरोधात् स्वीकारो युक्त इत्यर्थः। स्वविषयत्वाद्धि ज्ञानं स्वीक्रियते नार्थः परग्राह्यत्वादिति शंकते। अपविज्ञानमिति। विरुद्धस्वीकृत्यविरुद्धस्य

जनावैद्भूतनयेन मौग्ध्यं दर्शितमित्याह। अस्यं तेति॥

७८

ज्ञानं स्ववेद्यमित्यंगीकृत्य मौर्ख्यमापादितं वस्तुतः स्ववेद्यत्वमयुक्तमित्याह। न चेति। कर्तरि क्रियां प्रतिगुणीभूते प्रधानत्वात्कर्मणि व्यापीगात्स्वकर्तृ
कवेदनकर्मत्वं न संभवतीत्यर्थः। न च स्वविषयत्वमात्रं स्ववेद्यत्वमिति वाच्यं। अभेदे विषयविषयित्वस्याप्यसंभवादिति भावः। ज्ञानस्य स्ववेद्यत्वाभावे दोषद्व
यं स्यादिति शंकते॥ नन्विति। अनवस्थाच सामंजस्येति दोषद्वयं परिहरति। तदुभयमप्यसदिति। अनित्यज्ञानस्य जन्मादिमत्त्वेन घटवत्तदुत्पत्तेन स्वीयगत्या

न चार्थव्यतिरिक्तमपि विज्ञानं स्वयमेवानुभूयते। स्वात्मनि क्रियाविरोधात्। ननु विज्ञानस्य स्वरूपव्यतिरिक्तग्राह्यत्वे तदप्यन्येन ग्राह्यं तदप्यन्येनेति
ति अनवस्था प्राप्नोति। अपि च। प्रदीपवदवभासात्मकत्वात् ज्ञानस्य ज्ञानांतरं कल्प्यमानं समत्वादवभास्यावभासकभावानुपपत्तेः कल्पनानर्थक्य
मिति। तदुभयमप्यसत्। विज्ञानग्रहणमात्र एव विज्ञानसाक्षिणो ग्रहणाकांक्षानुत्पादादनवस्थाशंकानुपपत्तेः। साक्षिप्रत्यययोश्च स्वभा
ववैषम्यादुपलब्ध्रुपलभ्यभावोपपत्तेः स्वयंसिद्धस्य च साक्षिणोऽप्रत्याख्येयत्वात्। किं चान्यत्। प्रदीपवद्विज्ञानमवभासकांतरनिरपेक्षं स्वयमे
व प्रथत इति ब्रुवता प्रमाणागम्यं विज्ञानमनवगंतृकमित्युक्तं स्यात्। शिलाघनमध्यस्थप्रदीपसहस्रप्रथनवत्॥ ॥

दित्याह। यो ग्राहकस्ति ग्राहकाकांक्षा साक्षिणः स्वत आपाततो निरपेक्षत्वान्नानवस्था नाविज्ञानमंचिन्तुडत्वे सम्भवादित्यर्थः। साक्षी घटस्य तच्चा
ह। स्वयंसिद्धस्येति। निरपेक्षस्य साक्षिणः सत्वे प्रमाणं किं चित्ताभेदासिद्धेः सोऽंगीकार्य इत्यर्थः। अनित्यज्ञानस्वरूपसाधकत्वाच्च साक्षी स्वीकार्य
इत्याह। किं चेति। विज्ञानं ज्ञानांतरानपेक्षमिति ब्रुवता तस्य प्रामाणिकत्वमुक्तं स्यात्। स्वयं प्रथत इति ब्रुवता ज्ञातृत्वं चोक्तं स्यात्तथा च ज्ञातृज्ञानावि
षयत्वाच्छिलास्थप्रदीपवदसत्त्वं विज्ञानस्य स्यादिति साक्ष्येष्टव्य इत्यर्थः॥ ॥ ॥ ॥

विज्ञानस्वरूपास्पृष्टत्वमत्त्वमिष्टमेवत्वपाक्षधर्मतेनवावस्थापतिः ज्ञानभावादिति वाच्यं। स्वस्मैव ज्ञानत्वादिति ज्ञानकार्यं कं तेवाठमिति। अभेदे ज्ञानस्य
व्यापोगात् ज्ञानतुमावष्यकमिति पर्याहत्तिः। नेति विभिन्नं विज्ञानस्थानिरिक्तवेद्यं घटादेहव्यदिश्यमः। अतिरिक्तः साक्षी किमन्यवेद्यः स्ववेद्योवा
आद्येन वस्थो द्वितीयेविज्ञानवादप्रवेशं प्रसक्तो गौरवः साक्षीतिकल्पते। साक्षित्वादितिलक्षणविज्ञानजन्मविनाशमुक्तमुक्तम्। अतः कार्यस्य जडत्व
गाढमेव मनु भवरूप वा तु विज्ञानस्य हेतोः पक्षस्वरूपमुक्ता एतदितिचेत्। नास्मन्मतं गतुः प्रसुप्तादिसाक्षान्तस्य प्रदीपादिप्रकाशदृष्टान्तात्।
अतो विज्ञानस्यावभासस्त्वादिविरोधास्त्वेन वास्मासिद्धं तरिप्रत्यन्तं प्रदीपवदित्यागम्यते। साक्षिणो गुर्गतुः स्वयंसिद्धताम् पलिपन्ना
स्वयं प्रभते विज्ञानमिलेषएव नमनपक्षस्त्वावाचो पुत्तान्तत्वाधितं॥ ॥वैधर्म्याच्च न स्वप्नादिवत्। यदुक्तं बाह्यार्थापलापिना स्वप्नादिप्र
त्ययवज्जागरितगोचरा अपिस्तंभादिप्रत्यया विनैव बाह्येनार्थेन भवेयुः प्रत्ययत्वाविशेषादिति। तत्प्रतिवक्तव्यं अत्रोच्यते। न स्वप्नादिप्रत्य
यवज्जाग्रत्प्रत्यया भवितुमर्हन्ति कस्मात् वैधर्म्यात् वैधर्म्यं हि भवति स्वप्नजागरितयोः किं पुनर्वैधर्म्यं बाधाबाधाविति ब्रूमः॥ ॥

नियमास्थानितिरिक्तवेद्यत्वमस्माभिः साधितं कूटस्थप्रिदात्मनो ग्राहकानपेक्षत्वात् ज्ञानवत्स्वेतिचोक्तमतो न हठे लक्ष्यापमावृमेरितिपरिहरति।
न विज्ञानस्येति। एवं वेद्यविज्ञानवद्धर्मा स्वप्नपुत्पत्वधेतैर्वा बाधाभावइत्युक्तम् सम्प्रति जाग्रद्धिज्ञानं स्वप्नादिविज्ञानवत्स्वमुघालंबनमित्यनुमानं दू
षयति। वैधर्म्याच्चेति॥ किं मतं निर्विषयत्वं साध्यमुत पारमार्थिकविषयशून्यत्वमथवा व्यावहारिकविषयशून्यत्वं। नाद्यः। स्वप्नादिविभ्रमाणामपि

मिथ्यार्थालंबनत्वेन दृष्टांते साध्यवैकल्यात् न द्वितीयः सिद्धसाधनादिति सत्त्वचक्रार्थः
७९

स्तीमे तु व्यवहारदृष्टानां बाधितत्वं ग्राहित्वं उपाधिरित्याह । बाध्यन्ते हीत्यादिना निद्राग्लानिमित्तिकरणदोषोक्तिः साधनव्यापकत्वं निराह । न चैव
मिति । किं च प्रमाणजातानुभवोपलब्धिः प्रत्यक्षप्रमाणं स्वप्नज्ञानं दृष्टान्त इति वैधर्म्यमितरं । परमतेन स्वप्नस्मृतित्वमंगीकृत्याह । अपि चेति । स्मृति

बाध्यते हि स्वप्नोपलब्धं वस्तु प्रबुद्धस्य मिथ्या मयोपलब्धो न ह्यस्ति जनसमाज इति । न ह्यस्ति मम महान् जनसमागमोऽपि तु निद्राग्लानं तु मे मनो
ऽभूद्वाते नैषा भ्रान्तिरुद्भवेति । एवं मात्रादिष्वपि भवति यथायथं बाधः । न चैवं जागरितोपलब्धं वस्तु संभावितं कस्यांचिदवस्थायां बाध्य
ते । अपि च स्मृतिरेषा प्रत्ययप्रदर्शनं । उपलब्धिस्तु जागरितदर्शनं । स्मृतेस्तूपलब्धौ प्रत्ययस्य समनन्तरं स्वरूपमनुभूयते । अर्थविप्रयोगसंप्रयो
गात्मकं । इष्टं पुत्रं स्मरामि नोपलभे उपलब्धुमिच्छामीति । तत्रैवं सति न स्वप्नान्ते वक्तुं मिथ्या जागरितोपलब्धिरुपलब्धित्वात् स्वप्नोपल
ब्धिवदिति उभयोरन्तरं स्वयमनुभवतां । न च स्वानुभवापलापः प्राज्ञमानिभिर्युक्तः कर्तुं ॥

प्रत्यक्षोपलब्ध्योर्वैधर्म्यान्तरमाह । अर्थविप्रयोगेति । असंबद्धत्वं वर्तमानत्वं स्मृतेरर्थो विप्रमइति निरालंबनत्वं न प्रत्यक्षस्य । कदाचित्स्वचेता म
संप्रयुक्तवर्तमानार्थमात्रग्राहित्वादुपलब्धेरितिभावः । पूर्वोक्तप्रमाणप्रमाणजत्ववैधर्म्यं निष्फलमाह । तत्रैवं सतीति । वैधर्म्ये सतीत्यर्थः । अप्रमाण
जत्वोपाधेर्निरालंबनत्वानुमानं न युक्तमिति भावः । वैधर्म्यासिद्धिं निरस्यति । नचेति ॥

या धर्ममाह। अपि चेति। वस्तुतो घटाद्यनुभवस्य निरालंबनत्वं धर्मो यदि स्यात्तदा किं दृष्टान्तग्रहेणाप्रसक्तत्वे पि वक्तुं शक्यत्वात् तदयुक्तं दृष्टान्तेनैव
वक्तव्यं। यदि न वस्तुतो धर्मोऽस्ति तदापि बाधितत्वाद्दृष्टान्तसहस्रेणापि दुःसाध्यत्वात्ततः स्वतो निरालंबनत्वोक्तिः सालंबनत्वानुभवेन बाधिता स्यात्। समानु
मानुमानध्वंसं तथापि बाधो न मुंचतीत्यर्थः। ऽजैनोपाधिरपि निरस्त इत्याह। दर्शितं त्विति। स्वप्नस्यावसंस्कारपितृत्वं दृष्टं उपपत्तिपदस्थलिङ्गनिरासादिना। भावः

अपि चानुभवविरोधप्रसंगात् जागरितप्रत्ययानां स्वतो निरालंबनतां वक्तुमशक्नुवता स्वप्नप्रत्ययसाधर्म्याद्वक्तुमिष्यते। न च यो यस्य स्वतो धर्मो
न संभवति सोऽन्यस्य साधर्म्यात्तस्य संभविष्यति। न ह्यग्निरुष्णोऽनुभूयमान उदकसाधर्म्याच्छीतो भविष्यति। दर्शितं तु वैधर्म्यं स्वप्नजागरित
योः॥ ॥न भावोऽनुपलब्धेः॥ ॥यदप्युक्तं विनाप्यर्थेन ज्ञानवैचित्र्यं वासनावैचित्र्यादेवावकल्पत इति तत्प्रतिवक्तव्यं॥ अत्रोच्यते॥ न भावो
वासनानामुपपद्यते। त्वत्पक्षेऽनुपलब्धेर्बाह्यानामर्थानां। अर्थोपलब्धिनिमित्ता हि प्रत्यर्थं नानारूपा वासना भवन्ति। अनुपलभ्यमानेषु त्व
र्थेषु किंनिमित्ता विचित्रा वासना भवेयुः। अनादित्वेऽप्यन्धपरंपरान्यायेनाप्रतिष्ठैवानवस्था व्यवहारलोपिनी स्यात्। नाभिप्रायसिद्धिः॥

ऽस्त्विति: सतां कल्पनानुपलब्धावपि पूर्वपूर्ववासनाबलादुत्तरोत्तरविज्ञानवैचित्र्यमस्तु बीजांकुरवदनादित्वादित्यत आह। अनादित्वेऽपीति। बी
जादंकुरो दृष्ट इत्यदृष्टेऽपि तज्जातीययोः कार्यकारणभावकल्पनायुक्ता इह तु यथानुभवति अपेक्ष्य वासनासन्तानान्तरे दायकल्प्या स्यादनादित्वकल्पना निर्मू

[illegible]

८०

ननु निरपेक्ष वासनानां सत्वे धी वैचित्र्यमसत्वे तु नेति व्यभेदसिद्धमिति सफलानवबुध्येत तत्राह। मा भूदिति। वासनानां बाह्यार्थानुभवकार्यत्वे सति नैरपेक्ष्यासि-
द्धेर्नोन्वयादिदृष्टिरसिद्धः। पक्षविग्राहकं व्यतिरेकमाह विनेति। अर्थानुभवकार्याणां वासनानां तदनपेक्षत्वायोगात् न स्वरूपान्वयादिदृष्टिरित्युक्तमभिनया
र्थोपलब्धिवैचित्र्यस्य वासनाविनापि भावेन व्यतिरेकः सिद्धः एव न कापि वासनामात्रकृतं धीवैचित्र्यं किं त्वर्थानुभवैः सह तद्वासनाः सन्ततिनैरपेक्ष्य

सा चेयमन्वयव्यतिरेकावर्थोपलब्धिनोपपन्नस्तो वासनानिमित्तमेवेदं ज्ञानं जातं तन्निमित्तमिति॥ तावप्येवं सति प्रसक्तौ दृष्टौ विनार्थोपलब्ध्या
वासनानुपपत्तेः। अपि च विनापि वासनाभिरर्थोपलब्ध्यनुपगमात् विनार्थोपलब्ध्या वासनोत्पत्त्यनभ्युपगमात् अर्थसद्भाव एवान्वयव्यतिरे
कावपि प्रतिपन्नौ। अपि च। वासनानामसंस्कारविशेषाः संस्कारश्च नाश्रयं मन्तरेणावकल्प्यन्ते। एवं लोके दृष्टत्वात्। न च तद्वासनाश्र
यः कश्चिदस्ति प्रमाणतस्तस्यानुपलब्धेः॥ स्फाटिकत्वाच्च॥ ॥ पदस्फाटिकत्वं विज्ञानेनाश्रयवासनाश्रयत्वेन परिकल्पितं तदपि स्फाटिकत्वाभ्यु
पगमादनवस्थितरूपसम्बन्धि विज्ञानवत् न वासनानामपि कारणं भवितुमर्हति॥

तिरेकाभ्यां वासनामूलानुभवावच्छेदकार्यकृतमेवेति बाह्यार्थसद्भावसिद्धिरित्याह। अपि चेति यः संस्कारस्स साश्रयो लोके दृष्टः यथा वेण्वादिरिषा
द्याश्रयस्ततो विज्ञानसंस्काराणां तद्भावः आश्रयानुपलब्धेरित्यर्थान्तरमाह। अपि चेति। अस्त्वालयविज्ञानं आश्रयस्तत्राह। स्फाटिकत्वाच्चेति। सूत्रं
व्याचष्टे। यदपीति। स हि सत्त्वयोः सन्तेतरविषाणवदाश्रयाश्रयिभावायोगात्सौत्रान्तिकं पर्यायसाधर्म्येण तत्राधारत्वायोगात्सत्वे स्फाटिकत्वव्याघातान्नाधा
रत्वमालयविज्ञानस्य स्फाटिकत्वान्नीलादिविज्ञानवदित्यर्थः॥

अस्तु तर्हि आलयविज्ञानसंतान आश्रयः शासनादित्यत आह। न हीति। सविकारः कूटस्थो वा स्थाय्यात्मा पदितानामिति तत्र संतानस्यावस्तुत्वाद्देशाद्यपेक्षमा
पद्यमाननामाधाने निहेषोपोच स्मृतिप्रत्यभिज्ञे पश्चात्तन्मूलो व्यवहारः तत्सर्वं न संभवतीत्यर्थः। पदि व्यवहारार्थमात्मस्थायित्वं तदापसिद्धांत इत्या
ह॥ स्थिरेति। स्वरूपमतिदेशार्थत्वेनापि व्याचष्टे। अपि चेति। मतद्वयनिरासमुपसंहरति। एवमिति। ज्ञानत्वेनात्मकस्य सर्वस्य सत्वासत्वाभ्यां विचा
रासहत्वाच्छून्यतावशिष्यत इति माध्यमिकपक्षस्यापि मानमूलत्वमाशंक्य चकारः किमिति न निराचकारेत्यत आह। शून्येति। आदरः प्रयत्नः

न हि कालत्रयसंबंधिन्येकस्मिन्ननुयायिनि सति कूटस्थे वा सर्वार्थदर्शिनि देशकालनिमित्तापेक्षा वासनाधानस्मृतिप्रतिसंधानादिव्यवहा
रः संभवति। स्थिरस्वरूपत्वे त्वालयविज्ञानस्य सिद्धांतहानिः। अपि च विज्ञानवादेऽपि क्षणिकत्वाभ्युपगमस्य समानत्वाद्यानि बाह्यार्थवादे क्ष
णिकत्वनिबंधनानि दूषणान्युद्भावितानि उत्तरोत्पादे च पूर्वनिरोधादित्येवमादीनि तानीहाप्यनुसंधातव्यानि। एवमेतौ द्वावपि वैनाशि
कपक्षौ निराकृतौ बाह्यार्थवादिपक्षो विज्ञानवादिपक्षश्च। शून्यवादिपक्षस्तु सर्वप्रमाणविप्रतिषिद्ध इति तन्निराकरणाय नादरः क्रियते॥

नाभावो न किंचित्तत एतावन्मात्रं तन्मतनिराकरणार्थत्वेनापि योज्यं तदित्यर्थः। तथाहि। ज्ञानार्थयोरुभयोरपि भावः प्रमाणत उपलब्धेः। ननु जाग्रत्स्वप्नयोर्ज्ञानार्थयोर
वस्थायामुपलब्धावपि सुषुप्तौ वृत्तिरहितस्यात आह वैधर्म्याच्च न स्वप्नादिवत् स्वप्नः। आदिर्यस्याः सुषुप्तेः तदन्ते तत एवस्थयोः शून्यत्वमुपलब्ध्यनुपलब्धिवैधर्म्य ८१
लक्षणबाधितज्ञानार्थोपलब्धिबाधात्सुषुप्तावप्यात्मतत्त्वानस्तित्वेन साधयैकत्वाच्च नानुमानमित्यर्थः। किंचानिरधिष्ठाननिषेधायोगादधिष्ठानमेव
तत्त्वं वाच्यं। तस्य तत्त्वमतेनभावः प्रमाणतोऽनुपलब्धेरित्याह। तस्याप्यनुपलब्धेः।

तदर्थमाह। नच्छ्रमणिति। पृष्टातित्तत्त्वादिसुत्सर्गतः प्रपंचस्य सन शून्यत्वं बाधाभावादित्यर्थः। नचसत्त्वासत्त्वाभ्यां विचारासहत्वाच्छून्यत्वमिथ्यात्वं समं
वादितिभावः। क्षणिकत्वाच्चेति रूढं क्षणिकत्वोपदेशाच्चेति पदनीयं। शून्यत्वविरुद्धक्षणिकत्वोपदेशादसंगतप्रलापी सुगत इत्यर्थः। सुगतमतासांग
त्यमुपसंहरति। सर्वं चेति। सर्वं तस्य कथाविरुद्धप्रलापस्तत्राह। न द्वेषाद्वेति। वेदबाह्यास्त्वप्रजा याद्यः अतो भ्रांत्येकमूलसुगतसिद्धांते न वेदांतसिद्धांत
स्याविरोध इति सिद्धं नैकस्मिन्नसंभवात्। मुमुक्षुच्छमनने निरस्ते मुमुक्षांतरागां मनं बुद्धिस्थं भवतीति निरस्यत इति प्रसंगसंगतिगमाह। निरस्त इति। एक

नचायं सर्वप्रमाणसिद्धो लोकव्यवहारोन्य तत्त्वमनधिगम्य शक्यतेऽपह्नोतुं अपवादाभावे उत्सर्गप्रसिद्धेः॥ ॥सर्वभावानुपपत्तेश्च॥ ॥किं
बहुना यथायथायं वैनाशिकसमय उपपत्तिमत्त्वाय परीक्ष्यते॥ तथा तथा सिकताकूपवद्विदीर्यत एव॥ नकांचिदप्यत्रोपपत्तिं पश्यामः।
अतश्चानुपपन्नो वैनाशिकतंत्रव्यवहारः। अपि च बाह्यार्थविज्ञानशून्यवादत्रयमितरेतरविरुद्धमुपदिशता सुगतेन स्पष्टीकृतमात्म
नोऽसंबद्धप्रलापित्वं प्रद्वेषो वा प्रजासु विरुद्धार्थप्रतिपत्त्या विमुह्येयुरिमाः प्रजा इति॥ सर्वथाप्यनादरणीयोयं सुगतसमयः श्रेयस्कामैरि
त्यभिप्रायः। नैकस्मिन्नसंभवात्। निरस्तः सुगतसमयः। विवसनसमय इदानीं निरस्यते। सप्त चैषां पदार्थाः संमताः जीवाजीवास्रव
संवरनिर्जरबंधमोक्षा नाम॥

रूपं ब्रह्मेति वैदिकसिद्धांतस्यानेकांतवादेन विरोधोस्ति नवेति तन्न हृदस्य मानभ्रांतिमूलत्वाभ्यां संदेहे मानमूलत्वात्॥ विरोध इति। एवंपक्षप
त्वमभिसंधाय तन्मतमुपन्यस्यति। सप्तचेति। जीवाजीवौ भोक्तृभोग्यौ विषयाभिमुख्येन इंद्रियाणां प्रवृत्तिरास्रवः। तत्संवरणो नीतिः संवरः। पम
यमादिः। निर्जरयति नाशयति कल्मषमिति निर्जरस्तप्तशिलारोहणादिः। बंधः कर्म। मोक्षः कर्मपाशनाशे सत्यलोकाकाशप्रविष्टस्य सततोर्ध्वगमनं।

शा॰द॰भा॰२
८२

नन्वाप्तवादीनां भोग्यं तलभीवाक्यं तत्र तलमिस्त तत्त्वमाह । संक्षेपतस्त्विति । संक्षेपविस्तराभ्यामुक्तार्थे बुभ धयमदीसा विस्तारं तदग्रमाह । तयोरिति । अस्तिका
यशाः सामुक्तिकः पदार्थवाची जीवश्चासावस्तिकायश्चेत्येवं विग्रहः । पूर्यंते गलंतीति पुद्गलाः परमाणुसंघाः कायाः सप्रकृपव सनुमेयो धर्मः ऊर्ध्व
गमनशीलस्य जीवस्य देहस्थितिहेतुरधर्मः । आवरणाभावश्चाकाशद्रव्यार्थः । पंचपदार्थानामवांतरभेदमाह सर्वेषामिति । अप्रमर्थः । जीवास्तिका
यस्त्रिविधः । कश्चिज्जीवो नित्यसिद्धः अर्हन्मुख्यः । केचित्सांप्रतिकमुक्ताः केचिद्बद्धा इति । पुद्गलास्तिकायः षोढा पृथिव्यादिचत्वारि भूतानि स्थावर
जंगमं चेति । प्रवृत्तिस्थितिलिंगौ धर्माधर्मौ उक्तौ । आकाशास्तिकायो द्विविधः । लोकाकाशः सांसारिकः । अलोकाकाशः मुक्ताश्रय इति । बधात्कं कर्मा
ष्टविधं चत्वारि घातिकर्माणि चत्वार्यघातीनि । तत्र ज्ञानावरणीयं दर्शनावरणीयं मोहनीयमंतरायं चेति घातिकर्माणि । तत्त्वज्ञानान्मुक्तिरिति ज्ञानमा

संक्षेपतस्तु द्वावेव पदार्थौ जीवाजीवाख्यौ । प्रपंचयोगं तयोरेवेतमंतर्भावादितिमन्यंते ।। तयोरिमं प्रपंचमाचक्षते । पंचास्तिकाया नाम जी
वास्तिकायः पुद्गलास्तिकायः धर्मास्तिकायः अधर्मास्तिकायः आकाशास्तिकायश्चेति । सर्वेषामप्येषामवांतरभेदान्बहुविधान् ।।

धंकर्म आर्हततत्त्वश्रवणान्मुक्तिरिति ज्ञानं द्वितीयं वस्तुतीर्थकरप्रदर्शितेषु मोक्षमार्गेषु विशेषानवधारणं मोहनीयं मोक्षमार्गप्रवृत्तिविघ्नकरणा
मांतरायं । इमानि चत्वारि श्रेयो हंतृत्वात् घातिकर्माणि । अघातीनि च त्वारि कर्माणि वेदनीयं नामिकं गोत्रिकमायुष्कमिति । तत्र वेदितव्यं तत्त्वमस्ती
त्यभिमानो वेदनीयं । एतज्ज्ञानाहमस्मीत्यभिमानो नामिकं । अहमत्र भवतो देशिकस्यार्हतः शिष्यवंशे प्रविष्टोऽस्मीत्यभिमानो गोत्रिकं शरीरस्थि ८२
त्यर्थं कर्म आयुष्कं । अथवा शुक्लशोणितमिश्रितमायुष्कं । तस्य तत्त्वज्ञानानुकूलदेहपरिणामशक्तिर्गोत्रिकं । शुक्लस्य तस्य द्रवीभावात्मककललावस्था
या बुद्बुदावस्थापाश्चात्मकः क्रियाविशेषो नामिकं । सक्रियस्य जाठराग्निना पुष्यमाणस्य घनीभावो वेदनीयं तत्त्ववेदनानुकूलत्वात् तान्येतानि तत्त्वा

इयं प्रक्रियामाह सप्तभंगीति द्योतयति। स्वसमयपरिकल्पितानिति। स्वीयतंत्रसंकेतमात्रकल्पितानित्यर्थः। एतान्येतानुक्तानामनेकांततत्त्वं दंती
त्याह। सर्वत्रेति॥ अस्तित्वनास्तित्वादिविरुद्धधर्मद्वयमादाय वस्तुमात्रेऽप्ययमेव योजयेति। सप्तानामस्तित्वादीनां भंगानां समाहारः सप्तभंगी तस्या नयो
न्यायः। यद्यदेहि सर्वात्मना सहैकरूपत्वेन प्राप्यात्मनाप्यस्त्येव स इति तत्त्वार्थयम्लो नस्याद्तो घटत्वादिरूपेण कथंचिदस्तित्वमप्यत्वादिरूपेण कथं
चिन्नास्तीत्येवमनेकरूपत्वं वस्तुमात्रस्याद्धेयमिति भावः। के ते सप्तभंगा इत्याह। स्यादस्तीति। स्यादित्यव्ययमनेकांतद्योतकं तत्प्रतिरूपकं कथंचिदर्थकं। स्या
दस्ति कथंचिदस्तीत्यर्थः। एवमन्येपि। तत्र वस्तुनोस्तित्वविवक्षायां स्यादस्तीत्याद्यो भंगः प्रवर्त्तते। नास्तित्वविवक्षायां स्यान्नास्तीति द्वितीयो भंगः। क्रमे
स्वसमयपरिकल्पितान्व्याख्यायंति। सर्वत्र चेमं सप्तभंगीनयं कस्यामप्यवतारयंति। स्यादस्ति। स्यान्नास्ति। स्यादस्ति च नास्ति च। स्यादवक्त- ॥
स्यान्नास्ति चावक्तव्यश्च व्यः। स्यादस्ति चावक्तव्यश्च। स्यादस्ति च नास्ति चावक्तव्यश्चेत्येवं नित्यत्वानित्यत्वादिष्वपीमं सप्तभंगीनयं योजयंति॥ इति
णोभयविवक्षायां स्यादस्ति नास्ति चेति तृतीयो भंगः। युगपदुभयविवक्षायां अस्ति नास्तीति शब्दद्वयस्य क्रमेण प्रवर्तनात्स्यादवक्तव्य इति चतुर्थो भंगः।
आद्यचतुर्थभंगयोर्विवक्षायां स्यादस्ति चावक्तव्यश्चेति पंचमो भंगः। द्वितीयचतुर्थविवक्षायां स्यान्नास्ति चावक्तव्यश्चेति षष्ठो भंगः। तृतीयचतुर्थविवक्षायां स्या
प दस्ति नास्ति चावक्तव्यश्चेति सप्तमो भंग इति विभागः। एवमेकत्वमनेकत्वं चेति द्वयमाश्रयस्यादेकः। स्यादनेकः। स्यादेकोनेकश्च। स्यादवक्तव्यः॥ स्या
देकोऽवक्तव्यः। स्यादनेकोऽवक्तव्यः। स्यादेकोनेकश्चावक्तव्यश्चेति। तथा स्यान्नित्यः। स्यादनित्य इत्यादि बूह्यं॥

स्या·मं·भा·२ एवमनेकरूपत्वेन वस्तुनि प्रमितिप्रमाणादिव्यवहारः संभवति। एकरूपत्वे सर्वं सर्वत्र सर्वदास्त्येवेति व्यवहारविलोपप्रसक्तिः स्यात् तस्मादनेकांतं सर्वमिति से
८३ करूपत्वत्वादाधद्यातिप्रमाने सिद्धांतमति। अथैति। यदस्ति तत्सर्वं सर्वथैवास्त्येव यथा ब्रह्मात्मा। न चैवं तत्त्वात्मसमयेपत्नो नस्मादिति वाच्यं। अत्रापि प्रांसा
पत्नसंभवात् यन्नास्ति तन्नास्त्येव यथा शशविषाणादि प्रपंचस्तु भवविलक्षणः एवेत्येकांत वादस्य युक्तः नानेकांतवादस्तथाहि किं येनाकारेण व
स्तुनः सत्त्वं तेनैवाकारेणासत्त्वमुताकारांतरेण द्वितीये बत्न न आकारांतरमेवासदिति वस्तुनः सदैकरूपत्वमेव नहि दूरस्थ ग्रामस्याप्यसत्त्वे ग्रा

अत्राचक्ष्महे। नायमभ्युपगमो युक्त इति। कुतः। एकस्मिन्नसंभवात्। न ह्येकस्मिन्धर्मिणि युगपत्सदसत्त्वादिविरुद्धधर्मसमावेशः सं
भवति। शीतोष्णवत्। यस्ते सप्तपदार्था निर्द्धारिता एतावंत एवं रूपाश्चेति ते तथैव वा स्युः नैव वा तथा स्युः। इतरथा हि तथा वा स्युरथावे
त्यनिर्द्धारितरूपं ज्ञानं संशयज्ञानवदप्रमाणमेव स्यात्। तस्मादनेकात्मकं वस्त्विति निर्द्धारितरूपमेव ज्ञानमुत्पद्यमानं संशयज्ञानवन्नाप्रमाणं
भवितुमर्हति॥ ८३

मोप्यसन्भवति। ग्रामान्तरस्यासत्त्वेऽपि तत्तादात्म्यानुपपत्तेः। अतो यथा व्यवहारं प्रपंचस्यैकरूपत्वमास्थेयं नानाघटत्वाद्या नापमिति। ननु किमस्मन्मतमनेकात्म
कं वस्तु अत्राचार्यसिंहवदिति चेत्। न घटदृष्टान्तीमस्त्वेवेत्यनुभवबाधात्। किंच जीवादिपदार्थानां सप्तत्वं जीवत्वादिरूपं चास्त्येव नास्त्येवेति वाऽनियतं
इत्यनियतो ह्याद्येऽभिचारस्याहापद इति द्वितीयेऽपदार्थनिश्चयो न स्यादित्याह। इतरथेति। अनेकांतं सर्वमित्येवं निश्चय इति शंकते॥ नन्विति॥

तस्य तिस्थ्रपरूपत्वं नियतमतिपत्तुमशक्यत्वाद्वस्तुसमस्तमस्मिन्नेवैकरूपेण निश्चयेव्यभिचारः। द्वितीयेतस्य संशयत्वं स्यादित्याह। नेति ब्रूमहति।
प्रमाणप्रमुक्तस्यार्थप्रमाणानुगच्छतीति दिशति। एवमिति। निर्धारणं फलं प्रस्य प्रमाणादेरस्तस्येत्यर्थः इत्येवं सर्वत्र निर्धारणे सत्यपदेशो निष्कंप्रव

नेति ब्रूमः। निरंकुशं ह्यनेकांतं सर्ववस्तुषु प्रतिजानानस्य निर्धारणस्यापि वस्तुत्वाद्विशेषणस्याद् अस्तिस्यान्नास्तीत्यादिविकल्पोपनिपातादनिर्धा
रणात्मकत्वं स्यात्। एवं निर्धारयितुर्निर्धारणफलस्य च स्यात्स्यादस्तितास्यात्स्यान्नास्तितेत्येवं सति कथं प्रमाणभूतः संस्तीर्थकरः प्रमाण
प्रमेयप्रमातृप्रमितिषु निर्धारितस्वरूपं देशं ग्रस्तु पातु। कथं वा तदभिप्रायानुसारिणस्तदुपदिष्टेऽर्थे निर्धारितरूपे प्रवर्त्तेरन्। ऐकांतिक
फलत्वान्निर्धारणे हि सति तत्साधनानुष्ठानाय प्रवर्त्तेरन्लौकिकोऽन्नकुलाः प्रयत्नते। नान्यथा। अतश्चानिर्धारितार्थशास्त्रप्रणयनमुन्मत्तवद
नुपादेयवचनः स्यात्। तथा पंचानामस्तिकायानां पंचत्वसंख्या अस्ति वा नास्ति वेति विकल्प्यमानास्यात् तावदेकस्मिन्पक्षे पक्षांतरे तु तस्या दि
सतो न्यूनं संख्यात्वमधिकसंख्यात्वं वा प्राप्नुयात्। नचैषां पदार्थानामवक्तव्यत्वं संभवति। अथ वक्तव्यास्त्वेत्युच्येरन्। उच्यं ते नावक्तव्या इति विप्र
तिषिद्धं॥

तिस्थ्रनस्यादित्याह। एवं सतीति। अनेकांतवादे। अस्तिकायपंचत्वमपि न स्यादित्याह। तथा पंचानामिति। यदुक्तमवक्तव्यत्वं तत्किं केनापि शब्देन
वाच्यत्वं उत सकृच्छब्देनैकशब्दवाच्यत्वं नाद्यः व्याघातादित्याह। नचैषामिति। उच्यंते चावक्तव्यादिपदैरिति शेषः॥ " "

सू॰सू॰भा॰२ नद्वितीयः॥ सकृद्देवदत्तमुखजातानेकशब्दानामप्रसिद्धेर्नित्यैकपक्षोपगमात् नैकस्यापि मुखभेदोऽन्यत्वार्थस्य युगपद्विरुद्धधर्माध्यासाः यांवकुर्मकस्वभा
८४ वमनुत्कृष्टमपदेन विवक्षितमिति वा व्यंतावद्धीयोगाभ्यामाक्षेपणानुत्पत्तेरिति॥ किंच विरुद्धानेकस्वभावापि सत्त्वाद्दर्शनानाह इत्याह। उत्पन्नानामश्रेणादिना। इति
च पलयन्ति संत्वयः॥ अर्हन्निति शेषः। अनाद्यपर्यवसितं तद्गतः स्यान्नाद्यपर्यवसितत्वं तथा। इतश्चानेकान्तोऽत्रैकान्ततया दर्शनाह इत्याहेति। किंचान्य

उच्यमानाश्चतथैवावधार्यते नावधार्यते इति च। तथा तद्वधारणफलं सम्यग्दर्शनमस्ति वा। एवं तद्विपरीतमसम्यग्दर्शनमप्यस्ति वा
नास्ति वेति मलयन्नतोऽन्यत्र पक्षस्यैवस्मात् न पक्षपितत्वमप्यपक्षस्य। स्वर्गापवर्गमोक्षपक्षे भावः पक्षे चाभावस्तथा पक्षे नित्यतापक्षे चानित्य
तेति अनवधारणमपां मध्ये स तु पपतिः। अनादिसिद्धजीवमुक्तीनां च स्वरूपावबद्धतत्स्वभावानामन्यथावबद्धतस्य भावस्यासंगः। एवं जी
वादिषु पदार्थेष्वेकस्मिन्धर्मिणि सत्त्वासत्त्वयोर्विरुद्धयोर्धर्मयोरसंभवात् सत्त्वे वैकस्मिन्धर्मिणि सत्त्वधर्मीतरस्यासंभवात् असत्त्वे चै
वं सत्त्वस्यासंभवादसंगतमिदमार्हतं मतं। एतेनैकानेकनित्यानित्यव्यतिरिक्ताव्यतिरिक्ताद्यनेकान्ताभ्युपगमा निरकृता मंतव्याः। ८४
यत्तु पुद्गलसंहतकृष्णादयः स्कंधाः संभवन्तीति कल्पयन्ति। तन्नैवैते यावणुवादिनिराकरणेन निराकृतं भवतीसतो न पृथक्तन्निरा
करणं प्रयस्यते॥
दिसिद्धोऽर्हन्मुनिः अमेनतुहेतुनुष्ठानान्मुच्यंते। अननुष्ठानाद्बध्यंत इत्याह। तत्तेना बध्नत्स्वभावानां त्रिविधजीवानां त्रैविध्यनियमोऽपि नस्यादित्याह। अ
नादीति। प्रपंचितं स्वमार्थे निगमयति। एवमिति। एतेनेति। सत्त्वासत्त्वयोरेकत्वनिरासेनेतरार्थः परमाणुसंघाताः पृथिव्यादयः इति दिगंबरसिद्धांतः किं

जीवस्य देहपरिमाणत्वं दूषयति। एवं चेति। अकार्त्स्न्यं मध्यमपरिमाणत्वं तेनानित्यत्वं स्यादित्यर्थः। अर्थान्तरमाह शरीराणां चेति। विपाकः कर्मणाम
भिव्यक्तिः जीवस्य कृत्स्नगजशरीरव्यापित्वमकार्त्स्न्यं शरीरैकदेशो निर्जीवः स्यादित्यर्थः। मुत्तिकादेहे कृत्स्नो जीवो न प्रविशेत् देहाद्बहिरपि जीवः स्यादित्यर्थः
॥ किंच बालदेहमात्र आत्मा ततस्थूलेषु देहे हृकोचित्स्यादिति कृत्स्नदेहः स जीवो न स्यादित्याह। समानदिति। प्रदीपवत्पर्यायेण घटे संकोचो गेहे विका

एवं चात्माऽकार्त्स्न्यम्॥ ॥ यथैकस्मिन्धर्मिणि विरुद्धधर्मासंभवो दोषः स्याद्वादे प्रसक्तः। एवमात्मनोऽपि जीवस्याकार्त्स्न्यमपरो दोषः प्रसज्यते।
कथं शरीरपरिमाणो हि जीव इत्यार्हता मन्यन्ते। शरीरपरिमाणतायां च सत्यामकृत्स्नोऽसर्वगतः परिच्छिन्न आत्मेत्यतो घटादिवदनित्यत्वमात्म
नः प्रसज्येत। शरीराणां चानवस्थितपरिमाणत्वान्मनुष्यजीवो मनुष्यशरीरपरिमाणो भूत्वा पुनः केनचित्कर्मविपाकेन हस्तिजन्म प्राप्नुवन्न कृ
त्स्नं हस्तिशरीरं व्याप्नुयात्। पुत्तिकाजन्म च प्राप्नुवन्न कृत्स्नः पुत्तिकाशरीरे संमीयेत। समान एष एकस्मिन्नपि जन्मनि कौमारयौवनस्थावि
रेषु दोषः। स्यादेतत्। अनन्तावयवो जीवस्तस्य त एवावयवा अल्पे शरीरे संकुचेयुर्महति च विकसेयुरिति। तेषां पुनरनन्तानां जीवावयवानां समा
नदेशत्वं प्रतिहन्यते वा न वेति वक्तव्यम्। प्रतिघाते तावन्नानन्तावयवाः परिच्छिन्ने देशे संमीयेरन्। अप्रतिघातेऽप्येकावयवदेशत्वोपपत्तेः
सर्वेषामवयवानां प्रथिमानुपपत्तेः जीवस्याणुमात्रत्वप्रसंगः स्यात्॥

सहत्या जीवावयवानामिति देहमात्रत्वनियमं शंकते। स्यादिति। दीर्घपद्मवत्त्री कांशाभिन्नदेशा एकदेशा वेति विकल्प्याद्ये अल्पदेहाद्बहिरपि जीवः स्या
दिति दूषयति। तेषामित्यादिना। द्वितीयस्य तु न घटादौ हि सत्त्वं अधिकावयवानां विनाशात् द्वितीयं दूषयति। अप्रतिघात इति॥ ॥

शा·सू·भा·२ अवयवानां नित्यत्वं चातिदृष्टमल्पत्वाद्दीपांशुवदित्याह। अपिचेति। एवं जीवावयवा नित्या इति मते देहमानत्वं निरस्तं संप्रति जीवस्य केचिदेव कूट
८५ स्थाः अवयवा अन्ये त्वागमापायिन इति निरस्यते। अथेति। एतत्तु का कल्पना जीवस्यावयवागमापायाभ्यां देहमानत्वमिति पक्षः सूत्रेण परिहरति। तत्रा

अपि च शरीरमात्रपरिच्छिन्नानां जीवावयवानामानंत्यं नोत्प्रेक्षितुमपि शक्यं। अथ पर्यायेण महच्छरीरप्रतिपत्तौ च केचिज्जीवावयवा उपगच्छ
न्ति। तनुशरीरप्रतिपत्तौ च केचिदपगच्छन्तीत्युच्यते। तत्राप्युच्यते॥ ॥न च पर्यायादप्यविरोधो विकारादिभ्यः॥ ॥न च पर्यायेणाप्यवयवोप
गमापगमाभ्यामेतद्देहपरिमाणत्वं जीवस्याविरोधेनोपपादयितुं शक्यते। कुतो विकारादिदोषप्रसंगात्। अवयवोपगमापगमाभ्यां ह्यनिश
मापूर्यमाणस्यापक्षीयमाणस्य च जीवस्य विक्रियावत्त्वं तावदपरिहार्यं विक्रियावत्त्वे च चर्मादिवदनित्यत्वं प्रसज्येत। ततश्च बंधमोक्षाभ्युपग
मो बाध्येत। कर्माष्टकपरिवेष्टितस्य जीवस्यालाबुवत्संसारसागरे निमग्नस्य बंधनोच्छेदादूर्ध्वगामित्वं भवतीति। किंचान्यदागच्छतामपगच्छतां चा
वयवानामागमापायधर्मवत्त्वादेवानात्मत्वं शरीरादिवत्। ततश्चावस्थितः कश्चिदवयव आत्मेति स्यात्। न च स निरूपयितुं शक्यते। अयमसावि ८५
ति॥

पीति। आगमापायौ पर्यायः किमागमापायिनामवयवानामात्मत्वमस्ति न वा आद्ये आह। विकारादिदोषेति केऽप्येवं बंधमोक्षाभ्युपगम इत्यस्य व्याह। कर्माष्टकं
केति। व्याख्यातमेतत्॥ आद्यकल्पे दोषान्तरं वदन्कल्पान्तरमादाय दूषयति। किंचेति। अवशिष्टकूटस्थावयवस्य दुर्ज्ञानत्वाल्लक्षणाभावाच्चामुक्तिरित

यथा शरीरावयवानामाकरस्तेजस्तथा आत्मावयवानामाकरकारणाभावान्नागमापायौ युक्तावित्याह किंचेति सर्वजीवसाधारणः प्रतिजीवम
साधारणो वेत्यर्थः। किंचात्मन आगमापायाविष्टौ तावयवबलेनेति किमन्त आपातस्वयवाः किमन्तोऽपयन्तीत्यस्याज्ञानादात्मनिश्चयाभावादनिर्मोक्षः स्यादि

किंचान्यदागच्छन्तश्चैते जीवावयवाः कुतः प्रादुर्भवन्ति अपगच्छन्तश्च क्व वा लीयन्त इति वक्तव्यम्। न हि भूतेभ्यः प्रादुर्भवेयुः भूतेषु च निलीयेरन्। अभौतिकत्वाज्जीवस्य। नापि कश्चिदन्यः साधारणोऽसाधारणो वा जीवानामवयवाधारो निरूप्यते प्रमाणाभावात्॥ किंचान्यदनवधृतस्वरूपश्चैवं सत्यात्मा स्यात्। आगच्छतामपगच्छतां चावयवानामनियतपरिमाणत्वात्। अत एवमादिदोषप्रसंगान्न पर्यायेणाप्यवयवोपगमापगमावात्मन आश्रयितुं शक्येते॥

त्याह। किंचेति। अपि चान्त्यपरिमाणस्यावस्थितेर्जीवस्य नित्यत्वं चावयवसमूहत्वे चासत्वं आत्मत्वस्यापादवदवयवव्यक्तित्वे चेत्याह। किंचिदवयवापायेऽपि सं
घः शरीरस्य चेतनत्वं गोत्ववत्प्रत्येकं समाप्तौ एकस्मिन् शरीरे आत्मनानात्वस्यापादतो न देहपरिमाणत्वमवयववत्त्वे आत्मन इत्युपसंहरति अत इति॥

शा॰ सू॰ भा॰ २ सै वृत्त्यर्थान्तरमाह । अथवेति । स्थूलत्वसूक्ष्मशरीरप्रापकानां कर्मणां हेतूनामनित्यतया मुक्तावपि सुगतवत् संतानरूपेणात्मनित्यता मा शंकाने
८६ नोक्तरमुच्यत इत्यन्वयः । पर्यायेणेति संस्थानोत्क्रान्तिनेति देहभेदेन परिमाणस्यात्मनश्चानवस्थाने विनाशोपि स्यात्ततः शरीरस्य देहवत्कस्यात्मव्य
क्तिः संतानस्यानित्यतयात्मनित्यता स्यादित्यत्र दृष्टान्तमाह । यथेति स्निग्धस्वं विज्ञानं येभ्यस्ते विज्ञानचोदितं वराः तेषां निस्सर्पः । पर्यायात्संतानाद् व्याप्तमनि

अथवा पर्यायेण संतानेन शरीरपरिमाणस्यात्मन उपचितापचितशरीरांतरप्रतिपत्त्यावकाशात्मप्रसंगेऽनन्तशरीराणां नित्यतामंगीकृत्योदिताप्यनित्यतामांगीकृत्य पुनः प
र्यायेण परिमाणानवस्थानेऽपि स्रोतःसंतानानित्यतान्यायेनात्मनोऽनित्यता स्यात् । यथा रक्तपटानां विज्ञानानवस्थानेऽपि तत्संतानानि
त्यता । तद्दूषयति चाप्यनिर्धिकारेऽनेन सूत्रेणोत्तरमुच्यते । संतानस्यावस्तुत्वेनैरात्म्यवादप्रसंगो वस्तुत्वेप्यात्मनो विकारादिदोष
प्रसंगादस्य पक्षस्यानुपपत्तिरिति ॥

त्यत्वस्याविरोध इति नचकृतः विकारादिभ्यः संतानस्यावस्तुत्वेनात्मत्वे शून्यवादः संतानस्य वस्तुत्वे संतान्यतिरेके च कूटस्थात्मवादः अनति ८६
रेके जन्मादिविकारैर्विनाशो मुद्गाभाववद्घटकदोषप्रसंगात्संतानपक्षोऽनुपपन्न इति सूत्रार्थः ॥ ॥ ॥ ॥

यं स्थूलं सूक्ष्मं वा देहं गृह्णाति तद्देहपरिमाण एव जीव इति नियमं दूषयति। अंत्येति। अंत्यशरीरपरिमाणस्यावस्थितेर्नित्यत्वदृष्टेनाद्युभयो
राद्यमध्यमपरिमाणयोर्नित्यत्वप्रसंगात् अविशेषस्त्वपार्णा नित्यपरिमाणतया सामान्याद् हृद्रूपरिमाणानामनेकत्वायोगादिति सूत्रयोजना। आ
द्यमध्यमपरिमाणयोर्नित्यत्वे आत्मपरिमाणत्वादंत्यपरिमाणवत् न चाद्यमोर्जन्यता परिमाणनाशो न स्यात् ततोपि नाशादंत्यपरिमाणनित्यत्वायोगादि
तिभावः परिमाणत्रयसाम्यापादनफलमाह। एकेति। अंत्यशरीरसमानमेव पूर्वशरीराणामपि तु विषमशरीरपरिमाणानामवस्तुत्वपरिमाणत्वे परिमा

अंत्यावस्थितेश्चोभयनित्यत्वादविशेषः॥ ॥ अपि चांत्यस्य मोक्षावस्थाभाविनो जीवपरिमाणस्य नित्यत्वमिष्यते जैनैस्तद्वत्पूर्वयोर
प्याद्यमध्यमयोर्जीवपरिमाणयोर्नित्यत्वप्रसंगात् अविशेषप्रसंगः स्यात्। एकशरीरपरिमाणतैवस्यात् नोपचितापचितशरीरांतर
प्राप्तिः। अथवा अंत्यस्य जीवपरिमाणस्यावस्थितत्वात् पूर्वयोरप्यवस्थयोरवस्थितपरिमाण एव जीवः स्यात्। ततश्चाविशेषेणानादे
णुर्महान् वा जीवोभ्युपगंतव्यो न शरीरपरिमाणः। अतश्चैकोगतकार्हतमपि मतं असंगतमित्युपेक्षितव्यं॥ ॥

णत्रयसाम्यानुमानविरोधादित्यर्थः। एवं कालत्रयेपि परिमाणत्रयमंगीकृत्यांत्यदृष्टांतेन नित्यत्वमनुमाय साम्यमापादितं। संप्रत्यंत्यस्याणुत्वप
रिमाणस्याणुत्वस्थूलत्वयोरन्यतरत्वे नावस्थितेस्तद्देवांत्याद्यमध्यमकालयोरपि नित्यत्वात् स्यात्। आगमतो नित्यत्वायोगात् तथा चाविशे
षः कालत्रयेपि जीवपरिमाणाभेदस्त्याह। अथवेति। तस्मात् अर्हतैकशरणोस्थूपादकसिद्धांतेनाविरोधः समन्वयस्येति सिद्धं॥ ॥

ब्र॰सू॰भा॰२ पत्युरसामंजस्यात्। लुंचितकेशनिरासानंतरं जटाधारिशैवमतं बुद्धिस्थं निराक्रियते इति प्रसंगसंगतिमाह। इदानीमिति। सामान्यत ईश्वरनिरा
८७ सस्य वाच्यत्वात् किं तस्मादिति शंकते। तदिति। स्वोक्तिविरोधान्नेवमित्याह। प्रकृतिश्चेत्यादिना प्रतिष्ठापितत्वात् केवलनिमित्तेश्वरप्रतिषेधोऽयुक्तमत इत्य
न्वयः। आहतो विरुद्धोऽभिव्याहार उक्तिर्यस्य स तथा। अस्तु इति। पक्षस्य प्रकृतिकं जगदिति वदतो वेदांतसमन्वयस्य कर्तृवेश्वरो न प्रकृतिरिति तर्केण दर्शितन

पत्युरसामंजस्यात्। इदानीं केवलाधिष्ठात्रीश्वरकारणवादः प्रतिषिध्यते। तत्कथमवगम्यते। प्रकृतिश्च प्रतिज्ञादृष्टांतानुपरोधाद
भिध्योपदेशाच्चेत्यत्र प्रकृतिभावेनाधिष्ठातृभावेन चोभयस्वभावस्य ईश्वरस्य स्वयमेवाचार्येण प्रतिष्ठापितत्वात्। यदि पुनरविशेषेणेश्व
रकारणवादमात्रमिह प्रतिषिध्येत पूर्वोत्तरविरोधाद्व्याहताभिव्याहारः सूत्रकार इत्येतदापद्येत। तस्मादप्रकृतिरधिष्ठाता केवलं निमित्तकार
णमीश्वर इत्येष पक्षो वेदांतविहितब्रह्मैकत्वप्रतिपक्षत्वाद्यत्नेनात्र प्रतिषिध्यते। सा चेयं वेदबाह्येश्वरकल्पनानेकप्रकारा। केचित्तावत्सां
ख्ययोगव्यपाश्रयाः कल्पयंति। प्रधानपुरुषयोरधिष्ठाता केवलं निमित्तकारणमीश्वरः इतरेतरविलक्षणाः प्रधानपुरुषेश्वरा इति॥ ८७

विरोधोस्ति नवेति संदेहे तन्मतस्य मानमूलत्वादविरोध इति वेदांतोक्ताद्वयब्रह्मासिद्धिरिति फलमितरथा सत्वयोरेकत्रासंभवात् कर्तृत्वो
पादानत्वयोरेकत्रासंभवात् केवलेश्वर इति पूर्वपक्षं कुर्वन्नवांतरमतभेदमाह। साचेति॥ सेश्वराः सांख्याः सांख्यशास्त्रार्थः॥

चत्वारो माहेश्वराः शैवाः पाशुपताः कारुकसिद्धांतिनः कापालिकाश्चेति। सर्वेप्यमी महेश्वरोक्तागमानुगामित्वान्माहेश्वरा उच्यंते।
कार्यं महदादिकं। कारणं प्रधानं ईश्वरश्च। योगः समाधिः विधिः त्रिषवणस्नानादिः। दुःखांतो मोक्ष इति पंचपदार्थाः पशवो जीवास्तेषां पा
शो बंधस्तन्नाशायोपसंधाः। पाशुपतागमप्रामाण्यात्पशुपतिर्निमित्तमेवेति मतं तु साऽनुमानिकेश्वरमतमाह। तथेति विमतं सकर्तृकं का

माहेश्वरास्तु मन्यंते। कार्यकारणयोगविधिदुःखांताः पंचपदार्थाः पंचपदार्थाः पशुपतिनेश्वरेण पशुपाशविमोक्षायोपदिष्टाः। प
शुपतिः ईश्वरो निमित्तकारणमिति। तथा वैशेषिकादयोपि केचित्कर्तृपंचिरत्वप्रक्रियानुसारेण निमित्तकारणमिति। अत उत्तरमुच्यते
॥ पत्युरसामंजस्यादिति। पत्युरीश्वरस्य प्रधानपुरुषयोरधिष्ठातृत्वेन जगत्कारणत्वं नोपपद्यते। कस्मादसामंजस्यात्। किं पुनरसामंजस्य

र्यत्वात् घटवदिति वैशेषिकाः कर्त्तारमीश्वरं साधयंति कर्मफलं सपरिकराभिज्ञदातृकं कालांतरभाविफलत्वात्सेवाफलवदिति गौतमाधिं
यश्चत्तानैश्वर्योत्कर्षः क्वचिद्विश्रांतः सातिशयत्वात्परिमाणवदिति सांख्ययोगतपातंजला इति मत्वोक्तं केचित्पंचिदिति। सिद्धांतयति॥ अत इति
आगमादिना निरीश्वरसिद्धेः कथं दोषवत्वमित्याह किमिति॥

शा॰स्॰भा॰२ न तावत्सर्वज्ञत्वागमादीश्वरनिर्णयस्तथागमानां निर्मूलत्वेनाप्रामाण्यात् न च सर्वज्ञज्ञानं मूलं तत्र मानाभावात् न चागम एव मानं आगमप्रमाणत्वनिश्च
ये मूलनिश्चयस्तन्निश्चये तन्निश्चय इत्यन्योन्याश्रयात् तत्र पुरुषयत्नसाध्यतो मानत्वं मुक्तं मिथो विरोधेन तत्त्वाव्यवस्थानाच्च । नाप्यनुमानादीश्वरः सर्व
८८ स्य कर्तृत्वेऽनिर्णयः सम्भवस्यानुमानस्य दृष्टानुसारित्वेन दृष्टविपरीतार्थसाधकत्वात् प्रायशो लौकिकपादार्थः कर्त्तारो दृष्टास्तादृश एव जगत्कर्त्तारोऽन
गद्धे स्यादिमतः सिध्येयुर्यद्दिल्लोके विचित्रप्रासादादिकर्तुरेकत्वाद्यदर्शनेऽपि जगत्कर्तुरेकत्वादिलाघवादेकत्वं नित्यज्ञानं निर्दोषत्वं च कल्प्येत तर्हि दृष्टोपाद
नत्वमपि कल्प्यतां कुतुरैर्योपादानत्वेलाघवादन्यथा स्वतन्त्रप्रधानपरमाणवाद्युपादानकल्पनागौरवादृष्टत्वाच्च कर्तुर्दृष्टोपादानत्वासिद्धेरेकत्वादि
कमपि न सिध्येत् । अस्माकं त्वपौरुषेयत्वेन स्वतःप्रमाणश्रुतिस्मृतिन्यायोपबृंहितास्यप्रमेयबोधने दृष्टान्तानपेक्षमाणत्वे लौकिकविपरीतादृष्टार्थ
हीनत्वधर्मोत्तमभावेन हिरण्यगर्भेदासिद्धवत्तदीश्वरस्य रागद्वेषमत्सरादिवदनीश्वरत्वं प्रसज्येत ॥ ॥

कर्तुरुपादानात्मकत्वे तन्निर्दोषेश्वरनिर्णयः निर्णीते च तस्मिन्धर्मिग्राहकमानबाधान्नरागादिदोषापादनसावकाशः इत्यानुमानिकेश्वरवादि
भ्यो वैषम्यं । तदभिप्रेत्याश्रौतस्येश्वरस्यासामञ्जस्यमाह । हीनेति । यदि कर्तुरुपादानत्वं दृष्टत्वान्न कल्प्यते तर्हि निर्दोषत्वस्याप्यदृष्टत्वाद्धोविषमका ८८
रीसदोषत्वानित्यत्वादि दृष्टेश्वरजगत्कर्तृदोषवान्स्यात् । न चात्र धर्मिग्राहकानुमानबाधः कार्यत्वलिङ्गस्य कर्तृमात्रसाधकत्वेन निर्दोषत्वोदासीनत्वात्
पोत्कर्षसमाजातिप्रयोजकधर्मवादनात् दोषाभावे तत्साध्यविषमकर्तृकत्वायोगात्तद्दृष्टान्तस्य व्यापकधर्मो रागादिस्तेष्वापादनं स्वोत्कर्षसमजातिर्यथा द्रष्टो
षदिकृतकत्वेन हेतुना घटवदनित्यः स्यात् हि तेनैव हेतुना सावयवोऽपि स्यादिति । तद्वान्नित्यत्वस्य व्यापकं सावयवत्वं गन्धादेर्व्यभिचारादिति भावः ॥ ॥ ८८

ननु प्राणिकर्मप्रेरित ईश्वरो विषमफलान्प्राणिनः करोतीति न स्वेच्छयेति शंकते। प्राणीति। जडस्य कर्मणः प्रेरकत्वायोगात्मैवमित्याह। नेति। न चेश्व
रप्रेरितं कर्मेश्वरस्य प्रेरकमिति वाच्यमित्याह। कर्मेति। अतीतकर्मणा प्रेरित ईश्वरो वर्तमानं कर्म तत्फलाय प्रेरयतीत्यनादित्वान्न प्रेर्यप्रेरकभावस्य
नानुपपत्तिरिति शंकते। नानादित्वादिति। अतीतकर्मणोपि जडत्वान्नेश्वरप्रेरकता। न च तदपीश्वरेण प्रेरितं सदीश्वरं प्रेरयति। उक्तान्योन्याश्रयात्। ते
प्यतीतकर्मप्रेरितेश्वरप्रेरितं तदेवेश्वरं वर्तमानं कर्म फलदानाय प्रेरयतीति चेन्न मानहीनाया मूलक्षयावहपारम्पर्यस्यानवस्थापातः। अतस्तत्त्वतः कर्मान
पेक्ष एवेश्वरो विषमफलहेतुः सामञ्जस्यं दुर्वारमित्यर्थः। ननु फलदाने ईश्वरस्य कर्म निमित्तमात्रं न प्रेरकमिति नोक्तदोष इति। तन्न विषमकर्म

प्राणिकर्मापेक्षत्वाददोष इति चेत्। न कर्मेश्वरयोः प्रवर्त्यप्रवर्तकत्वे इतरेतराश्रयप्रसंगात्। नानादित्वादिति चेत्। न वर्तमानकालवर्तिनोः
तयोरपि कालेऽपि इतरेतराश्रयदोषाविशेषादन्धपरम्परान्यायापत्तेः। अपि च प्रवर्तनालक्षणा दोषा इति न्यायविदां समयः। नहि कश्चिददोषप्रयु
क्तः स्वार्थे परार्थे वा प्रवर्तमानो दृश्यते। स्वार्थप्रवृत्तश्च सर्वो जनः परार्थेपि प्रवर्तत इत्येवमप्यसामञ्जस्यम्। स्वार्थवत्त्वादीश्वरस्यानीश्वरत्वप्र
संगात्। पुरुषविशेषाभ्युपगमाच्चेश्वरस्य पुरुषस्य चोदनीयाभ्युपगमादसामञ्जस्यम्।

कारणिनुरीश्वरस्य दोषवत्त्वानपायः स्वकर्मापेक्षफलदानमिति वैषम्यं॥ किंच परमतानुसारेणापीश्वरस्य रागादिमत्त्वं प्राप्नोतीत्याह। अपि चेति। प्र
वर्तकत्वलिंगा दोषा इति तार्किकाणां प्राक्कर्मकारणमित्यलेचोक्तसामान्यकानयत्नादस्माकं त्वेतत्त्वेकसाध्यसाधुकारमतीति निरपेक्षमिति चक्रतिन
न स्वकर्मापेक्षफलमिति वैषम्यं॥ किंच परमतानुसारेणापीश्वरस्य रागादिमत्त्वं प्राप्नोतीत्याह। अपि चेति। प्रवर्तकत्वलिंगा दोषा इति तार्किकाणां
स्थितिस्तथा चेश्वरः स्वार्थं रागादिमान्प्रवर्तकत्वात्स्मद्वत्। न च कारुणिके व्यभिचारः परदुःखप्रहाणस्य दुःखनिवृत्त्यर्थित्वात्तस्य स्वार्थः। उदासीनः प्रवर्तक

 प्रधानवादिदोषांतरमाह सूत्रकारः। संबंधेति। ईश्वरेणासंबंधस्य प्रधानादेः प्रेरितत्वायोगात्संबंधो वाच्यः। स च संयोगः समवायो वा नास्तीत्यर्थः। कार्य
 कृत्वात्प्रेरणायोग्यतायाः संबंधः कल्प्यतामित्यत आह। नाप्यन्यदिति। ईश्वरप्रेरितप्रधानकार्यं जगदिति सिद्धे चेत्संबंधः कल्प्यतां तदेवाप्यसिद्धमि
त्यर्थः। मा भूत्प्रधानेन संबंधो निर्वाच्यतादात्म्यसंबंधः देवात्मशक्तिमिति श्रुतेः। किंच वेदस्याप्रामाण्यात्लोकदृष्टकुलालसंबंधो यैर्दृष्टे नानुसर्त्तव्यः।
संबंधानुपपत्तेश्च॥ ॥पुनरप्यसामंजस्यमेव। नहि प्रधानपुरुषव्यतिरिक्त ईश्वरोंतरेण संबंधं प्रधानपुरुषयोरीशिता॥ न तावत्संयोगलक्षणः
संबंधः संभवति। प्रधानपुरुषेश्वराणां सर्वगतत्वान्निरवयवत्वाच्च। नापि समवायलक्षणः। आश्रयाश्रयिभावानिरूपणात्। नाप्यन्यः कश्चित्का
र्यगम्यः संबंधः शक्यते कल्पयितुं। कार्यकारणभावस्यैवाद्याप्यसिद्धत्वात्। ब्रह्मवादिनः कथमिति चेत्। न। तस्य तादात्म्यलक्षणसंबंधोपपत्तेः।
अपि चागमबलेन ब्रह्मवादी कारणादिस्वरूपं निरूपयति। नावश्यं तस्य यथादृष्टमेव सर्वमभ्युपगंतव्यमिति। परस्य तु दृष्टांतबलेन कारणादिस्व
रूपं निरूपयतो यथादृष्टमेव सर्वमभ्युपगंतव्यमित्ययमस्त्यतिशयः। परस्यापि सर्वज्ञप्रणीतागमसद्भावात् समानमागमबलमिति चेत्।
न। इतरेतराश्रयप्रसंगात्। आगमप्रत्ययात्सर्वज्ञत्वसिद्धिः सर्वज्ञप्रत्ययाच्चागमसिद्धिरिति। तस्मादनुपपन्ना सांख्ययोगवादिनामीश्वरकल्पना।
एवमन्यास्वपि वेदबाह्यास्वीश्वरकल्पनास्वनुपपत्तिर्यथासंभवमसामंजस्यं योजयितव्यं॥
आनुमानिके नत्वनुसर्तव्य इति विशेषमाह। अपि चेति॥ सर्वज्ञत्वस्यागमप्रामाण्यस्य च ज्ञप्ताववन्योन्याश्रयः अनुमानात्सर्वज्ञत्वसिद्धेः निरस्तत्वान्न्यायम
नस्कृष्णज्ञानं संभवति तानंततोजस्यमिति व्याप्तिविरोधान्नित्यज्ञानकल्पनाः नवकाशादिति भावः। प्रधानवत्परमाणूनामपि निरवयवेश्वरेणासं
योगाद्यसत्वात्प्रेरितत्वायोगः प्रेरकत्वेनेश्वरस्यैव दोषवत्त्वमित्याह। एवमन्यास्वपीति॥ ॥ ॥ ॥

ईश्वरस्य प्रधानादिप्रेरणानुपपत्तेश्चासामंजस्यमित्याह सूत्रकारः। अधिष्ठानेति। प्रधानादिकं चेतनस्यानधिष्ठेयं अप्रत्यक्षत्वादीश्वरवदिति
रेकेणमृदादिवदित्यर्थः। चक्षुरादौ व्यभिचारमाशंक्य निषेधति। करणवदिति। रूपमनुद्भूतं नास्तीत्यप्रत्यक्षत्वं चक्षुष्यपीति। रूपेति। स्वभोगाहेतुत्वे स
तीति विशेषणान्नव्यभिचार इत्याह। तथापीति। भोगः सुखदुःखानुभवः आदिपदाद्विषयानुभवग्रहः। न च पर्येनाधिष्ठेयं तत्र दीपभोगहेतुत्वेस
तिप्रत्यक्षत्वमितिव्यतिरेकस्योपाकरणेष्वव्यभिचारतादवस्थ्यमिति वाच्यं। भोगाहेतुत्वविशिष्टाप्रत्यक्षत्वस्य हेतुत्वात्करणेषु च विशेषणाभावेन विशिष्ट

अधिष्ठानानुपपत्तेश्च॥ ॥इतश्चानुपपत्तिस्तार्किकपरिकल्पितस्येश्वरस्य स हि परिकल्प्यमानः कुंभकार इव मृदादीनि प्रधानादीन्यधि
ष्ठाय प्रवर्त्तयेत्। न चैवमुपपद्यते। न ह्यप्रत्यक्षं रूपादिहीनं च प्रधानमीश्वरस्याधिष्ठेयं संभवति। मृदादिवैलक्षण्यात्॥ ॥करणवच्चे
न्न भोगादिभ्यः॥ स्यादेतत् यथा करणग्रामं चक्षुरादिकमप्रत्यक्षं रूपादिहीनं च पुरुषोऽधितिष्ठत्येवं प्रधानमीश्वरोऽधिष्ठास्यतीति। तथापि
नोपपद्यते भोगादिदर्शनाद्धि करणग्रामस्याधिष्ठितत्वं गम्यते। न चात्र भोगादयो दृश्यंते। करणग्रामसाम्ये वाभ्युपगम्यमाने संसारिणामिवेश्वरस्या
पि भोगादयः प्रसज्येरन्।

स्यहेतोरभावान्न च विशेष्यवैयर्थ्यं परार्थत्वाच्चक्षुराद्यधिष्ठापकात्तद्व्यभिचारान्न च प्रधानादेरीश्वरप्रत्यक्षत्वाद्धिष्ठेयासिद्धिः। अतीन्द्रियत्वरूपा
प्रत्यक्षत्वस्य मृदादिष्वभिप्रायः। जीवे करणकृता भोगादयो दृश्यंते ईश्वरे तु प्रधानकृता भ्यूस्तेन दृश्यंत इत्यक्षरार्थः। विपक्षे दोषं वदन्नप्रयोजकत्वं
हेतोर्निरस्यति। करणेति। प्रधानादेः प्रेर्यत्वांगीकारे प्रेरकभोगहेतुत्वं स्यादतीन्द्रियस्य प्रेर्यस्य भोगहेतुत्वनियमादित्यर्थः॥ ॥

शा·सू·भा·२ स्तद्द्वयस्यार्थान्तरमाह । अन्यथा चेति । यः प्रवर्तकः स चेतनः सशरीरीति लोके व्याप्तिदृष्टेः ईश्वरस्य च शरीरानुपपत्तेः न प्रवर्तकत्वमिति सूत्रार्थमाह ॥
६० इतश्चेति विमतं सेश्वरं कार्यत्वाद् घटवदिति कल्पयतो राजवत्सशरीर एवेश्वरः स्यादिति कल्कं तत्रेष्टापत्तिं निरस्यति । न च तदुपकल्पयितुमिति न्यायनिसंश
रीरं सर्गाद्यागपि संभवतीति वाच्यं शरीरस्य भौतिकत्वनियमादित्यर्थः । अस्तु अशरीर एवेश्वर इत्यत आह । निरधिष्ठानत्वे चेति । जीववदीश्वरं भो
अन्यथा चासत्त्वद्धर्मसंप्राप्तेः ॥ ॥ अधिष्ठानानुपपत्तेश्च ॥ ॥ इतश्चानुपपत्तिस्तार्किकपरिकल्पितस्येश्वरस्य । साधिष्ठानो हि लोके स
शरीरो राजा राष्ट्रस्येश्वरो दृश्यते । न निरधिष्ठानः । अतश्च दृष्टान्तवशेनादृष्टमीश्वरं कल्पयितुमिच्छत ईश्वरस्यापि किंचिच्छरीरं करणा
यतनं वर्णयितव्यं स्यात् । न च तद्वर्णयितुं शक्यते । सृष्ट्युत्तरकालभावित्वाच्छरीरस्य प्राक्सृष्टेस्तदनुपपत्तेः । निरधिष्ठानत्वे चेश्वरस्य प्रव
र्तकत्वानुपपत्तिः । एवं लोके दृष्टत्वात् ॥ ॥ करणवच्चेन्न भोगादिभ्यः ॥ ॥ अथ लोकदर्शनानुसारेणेश्वरस्यापि किंचित्करणानामायतनं
शरीरं कामेन कल्प्येत एवमप्युपपद्यते । सशरीरत्वे हि सति संसारिवद्भोगादिप्रसंगादीश्वरस्याप्यनीश्वरत्वं प्रसज्येत ॥ अन्तवत्त्वमसर्व
ज्ञता वा ॥ ॥ इतश्चानुपपत्तिस्तार्किकपरिकल्पितस्येश्वरस्य । स हि सर्वज्ञस्तैरभ्युपगम्यते । अनन्तश्च । अनन्तं च प्रधानमनन्ताश्च पुरुषा मिथो
भिन्ना अभ्युपगम्यन्ते । तत्र सर्वज्ञेनेश्वरेण प्रधानस्य पुरुषाणामात्मनश्चेयत्ता परिच्छिद्येत वा न वा परिच्छिद्येत । उभयथापि दोषोऽनुषक्त एव
कथं ॥
तिकं ईश्वरस्यानुस्वेच्छानिर्मितं भोगाधिष्ठानं दिव्यशरीरं न निरस्यतीति । करणवदिति । करणान्यत्र संतीति करणवत्तच्छरीरं । इच्छामयशरीरकल्पने वानु
पपन्नानामभावात् दृष्टभौतिकत्वनियमविरोधाच्चेति मंतव्यं । एवमीश्वरस्य शुष्कतर्केण कल्पितत्वनिरासेनेत्युपपादनस्य सर्वज्ञत्वनिरासोपि न
[illegible] ६०

प्रधानपुरुषेश्वरत्रयमनित्यं इयत्तापरिछिन्नत्वात् घटवदित्याह। पूर्वस्मिन्निति। संख्यायां परिमाणं चेयत्तातत्र चानिश्चितसंख्यत्वान्निश्चितप
रिमाणत्वाद्वेति हेतुद्वयं यद्यपि संख्यावत्त्वमेव हेतुः संभवति तथापि सर्वस्मिन्निश्चयेनहेतुत्व सिद्धिरिति संघोतयितुं निश्चितपदं तत्राप्याह हेतोरसिद्धिमि
त्याह। संख्यापरिमाणमितिसंख्यास्वरूपमित्यर्थः॥ द्वितीयहेतुत्वमभ्युमति। स्वरूपेति। प्रधानस्यानिश्चितपरिमाणत्वं वस्तुतो भिन्नत्वात् घटवदि
त्यर्थः। ननु प्रधानपुरुषेश्वरत्रयमस्ति तन्नैपि जीवानामानंत्यात्कथं संख्यानिश्चयस्तत्राह। पुरुषेति। जीवसंख्यापीश्वरेणानिश्चीयेत

पूर्वस्मिंस्तु बद्धिकल्पइयत्तापरिच्छिन्नत्वात् प्रधानपुरुषेश्वराणामंतवत्त्वमवश्यंभावि। एवं लोके दृष्टत्वात्। यद्धि लोके इयत्तापरिच्छिन्नं
वस्तूपलभ्यं तदंतवद्दृष्टं तथा प्रधानपुरुषेश्वरत्रयमपीयत्तापरिच्छिन्नत्वादंतवत्स्यात्। संख्यपरिमाणता च प्रधानपुरुषेश्वरत्रयरू
पेण परिच्छिन्नस्वरूपपरिमाणमपि तत्कृतमीश्वरेण परिच्छिद्यतेति। पुरुषगता च संख्या। ततश्चेयत्तापरिच्छिन्नानां येषां संसारान्मुच्य
ते तेषां संसारे तत्क्रमेण संसारित्वं च तेषामुक्तत्वं तथा एवमितरेषामपि क्रमेणानुच्यमानेषु संसारस्य संसारिणां चांतवत्त्वं स्यात्। प्रधानं च सविकारं
पुरुषाश्चेश्वरस्याधिष्ठेयं संसारस्य निमित्तं। तद्भूयस्तामामीश्वरः किमधितिष्ठेत्। किं विषये वा सर्वज्ञतेश्वरते स्यातां। प्रधानपुरुषे
श्वराणां चैवमंतवत्त्वे सत्यात्यन्तिकसमस्तं गः॥ आद्यंतवत्त्वे च शून्यवादप्रसंगः॥
अनिश्चयेस्तवृतत्वापत्तेरादित्सर्थः। हेतुसिद्धः फलमाह। ततश्चेति। नापवर्गिश्चरमके चांतिकजीवानां संघमरूपश्चानन्दपेदितेवंभवमुक्तेः इदानीमर्त्यं
जगत्स्यादित्सर्थः॥ निमस्यानवच्छेदादितिभावः॥ ननु ईश्वरः शिष्यतामिति चेन्नत स्यापि भिन्नत्वेनांतवत्त्वात्किंचेश्वरत्वाभावादीश्वराभावः स्यादि

शा. सू. भा. २ इत्यन्तानि स्वमतभाष्याणि मन्तव्यानीति द्वितीयं सूत्रं कृते। अथेति। इयत्ता नास्ति न निश्चीयते चेत्सर्वः। प्रधानादयः संख्यापरिमाणवन्तः इयत्तावत्त्वान्माषादिव
८१ दित्यनुमानादस्तीयत्ता तदज्ञाने स्यादसर्वज्ञता इयत्तायां चान्तवत्त्वमप्यस्तीति परिहरति। ततः इति। तस्मात्केवलकर्त्रीश्वरवादस्य निर्मूलत्वात्तत्कर्तृ
च कारणात्मकेश्वरस्य सर्वप्रविरोध इति सिद्धं। एवं च परपक्षदिशा माहेश्वरमतनिरासानंतरं चतुर्व्यूहवादं बुद्धिस्थं निरस्यति उत्पत्त्यसंभवात् इत्यधिकरणान्ता

अथ माभूदेष दोष इत्युत्तरो विकल्पोऽभ्युपगम्येत। न प्रधानस्य पुरुषाणामात्मनश्चेयत्तेश्वरेणापरिच्छिद्यत इति। ततरीश्वरस्य सर्वज्ञत्वाभ्युपगम
महानिरपवादो दोषः प्रसज्येत। तस्मादप्यसंगतस्तार्किकपरिगृहीत ईश्वरकारणवादः॥ उत्पत्त्यसंभवात्॥ येषामप्रकृतिरधिष्ठाता केवलनि
मित्तकारणमीश्वरोऽभिमतस्तेषां पक्षः प्रत्याख्यातः। येषां पुनः प्रकृतिश्चाधिष्ठाता चोभयात्मकं कारणमीश्वरोऽभिमतस्तेषां पक्षः प्रत्याख्या
यते। ननु श्रुतिसमाश्रयणेनाप्येवंरूप एवेश्वरः प्राङ्निर्धारितः प्रकृतिश्चाधिष्ठाता चेति श्रुत्यनुसारिणी च स्मृतिः प्रमाणमिति स्थि
तिः। तत्कस्य हेतोरेष पक्षः प्रत्याचिख्यासित इति। उच्यते यद्यप्येवंजातीयकोंऽशः समानत्वान्न विसंवादगोचरो भवत्यस्ति त्वंशान्तरं विसं ८१
वादस्थानमिति। अतस्तत्प्रत्याख्यानाय आरंभः। तत्र भागवता मन्यन्ते भगवानेवैको वासुदेवः॥

सर्वमाह। येषामिति। अधिकरणारंभमाक्षिपति। नन्विति। वेदाविरुद्धांशस्य स्वीकृतस्य वेदविरुद्धं जीवोत्पत्त्यंशं निराकर्तुमधिकरणारंभ इत्याह।
उच्यत इति। अत्र भागवतपांचरात्रागमो विषयः स किं जीवोत्पत्त्यंशे मानं न वेति संदेहे बाधानुपलंभान्मानमिति पूर्वपक्षयति। तत्रेति। पूर्वपक्षे भा
गमविरोधाज्जीवाभिन्नब्रह्मणस्तत्त्वमन्वयासिद्धिः सिद्धांते तदंशे तस्याऽमानत्वादविरोधात्तत्सिद्धिरिति फलभेदः॥

सावयवत्वं निरस्यति। निरंजनेति। कथं तर्हि द्वितीयेन वासुदेवे मूर्तिभेदस्तत्राह। स इति। व्यूहो मूर्तिः स विशेषेण ज्ञानस्यायेषु रूपस्थेषु तु ग्रहपार्थमा
ह। तमित्थंभूतमभजति। यथोक्तरूपव्यूहवंतं सर्वप्रकृतिं निरंजनविज्ञानरूपं परमात्मानमितियावत्। वाक्यार्थ चेतसा समवधानपूर्वकं देवतागृहग

निरंजनज्ञानस्वरूपः परमात्मैव तत्त्वं स च तुरीयात्मानं प्रविभज्य प्रतिष्ठितो वासुदेवव्यूहरूपेण संकर्षणव्यूहरूपेण प्रद्युम्नव्यूहरूपेणानिरु
द्धव्यूहरूपेण च वासुदेवो नाम परमात्मोच्यते। संकर्षणो नाम जीवः। प्रद्युम्नो नाम मनः। अनिरुद्धो नामाहंकारः। तेषां वासुदेवः परमप्रकृति
रितरे संकर्षणादयः कार्यमित्थंभूतं भगवंतमभिगमनोपादानेज्यास्वाध्याययोगैर्वर्षशतमिष्ट्वा क्षीणक्लेशो भगवंतमेव प्रतिपद्यत
इति। तत्रैतावदुच्यते। योऽसौ नारायणः परोऽव्यक्तात् प्रसिद्धः परमात्मा सर्वात्मा स स्वात्मनात्मानमनेकधा व्यूह्य व्यवस्थित इति तन्न निराक्रि
यते। स एकधा भवति त्रिधा भवतीत्यादिश्रुतिभ्यः परमात्मनोऽनेकधाभावस्याधिगतत्वात्। यदपि तस्य भगवतोऽभिगमनादिलक्षणमारा
धनमजस्रमनन्यचित्ततयाभिप्रेयते। तदपि न प्रतिषिध्यते। श्रुतिस्मृत्योरीश्वरप्रणिधानस्य प्रसिद्धत्वात्॥

मनसाभिगमनं देवतागृहमार्जनाद्युपादानं। इज्या पूजा। स्वाध्यायोऽष्टाक्षरादिजपः। योगो ध्यानं। तत्राधिरूढो ब्रह्मोपास्ते। तत्रेति समाहितः अ
भ्यर्चितोऽभ्यस्येति तं प्रयाणप्रयोगमासते इत्याद्या च श्रुतिः। नन्वेवं तर्हि नन्वस्य तत्र इत्याशंक्य स्तुतिः॥

शा॰ सू॰ भा॰ २ विप्रतिषिद्धांशमनूद्य दूषयति। यत्पुनरिति। कृतहान्यादिदोषश्चादिशब्दार्थः। मायोपेतया अजस्याप्युत्पत्त्यादिकं सापेक्षं वाच्यं ब्रह्मणः स्वतः संबन्धो नास्ति
९२ भावनिष्ठप्रजीवाभिन्नब्रह्मसमन्वयस्यैव मिति भावः॥ जीवस्योत्पत्तिं निरस्य जीवान्मनस उत्पत्तिं निरस्यति। न च कर्तुरिति। यस्मात्कर्तुः करणो
त्पत्तिर्न दृश्यते तस्मादसंगता कल्पनेत्यन्वयः। सिद्धान्ते करणानां प्रमेयो न तु कर्तेति मम सिद्धान्तो हि स्पष्टः। वर्णनं निर्मूलमित्याह॥ नचेति। ननु लो

यत्पुनरिदमुच्यते। वासुदेवात्संकर्षण उत्पद्यते। संकर्षणाच्च प्रद्युम्नः प्रद्युम्नाच्चानिरुद्ध इति। अत्र ब्रूमः। न वासुदेवसंज्ञकात्परमात्मनः
संकर्षणसंज्ञकस्य जीवस्योत्पत्तिः संभवति। अनित्यत्वादिदोषप्रसंगात्। उत्पत्तिमत्त्वे हि जीवस्यानित्यत्वादयो दोषाः प्रसज्येरन्। ततश्च नै
वास्य भगवत्प्राप्तिर्मोक्षः स्यात्। कारणप्राप्तौ कार्यस्य प्रविलयप्रसंगात्। प्रतिषेधिष्यति चाचार्यो जीवस्योत्पत्तिं नात्माश्रुतेर्नित्यत्वा
च्च ताभ्य इति। तस्मादसंगतैषा कल्पना। न च कर्तुः करणम्॥ ॥ इतश्चासंगतैषा कल्पना। यस्मान्न हि लोके कर्तुर्देवदत्तादेः करणं परश्वा
द्युत्पद्यमानं दृश्यते। वर्णयन्ति च भागवताः कर्तुर्जीवात्संकर्षणसंज्ञकात्करणं मनः प्रद्युम्नसंज्ञकमुत्पद्यते। कर्तृजाच्च तस्मादनिरुद्धसंज्ञको
ऽहंकार उत्पद्यत इति। न चैतद्दृष्टान्तमन्तरेणाध्यवसातुं शक्नुमः। न चैवंभूतां श्रुतिमुपलभामहे॥ ९२

के कश्चिच्छिल्पिवरः कुठारं निर्माय तेन वृक्षं छिनत्तीति दृष्टमिति चेत्सत्यं छिदिक्रियायां हस्तादिकरणं तदपेक्षया कुठारकर्तृत्वमुक्तं। जीवस्य तु
करणान्तरमज्ञातमतः कर्तृत्वेऽपि नैव करणं कर्तृजन्यमिति भावः॥

संकर्षणादीनामुत्पत्त्यसंभवेपि व्यूहचतुष्टयं स्यादिति सूत्रं व्याकुर्वन्नाशंकते। अथापि स्यादिति॥ ज्ञानैश्वर्येयो। शक्तिः एतात्वं सामर्थ्यं। बलं धारणसामर्थ्यं
वीर्यं शौर्यं तेजः प्रागल्भ्यं एतैरन्विता यस्मात्संकर्षणादयस्तस्मादीश्वरा एवेत्यर्थः। सर्वेषामीश्वरत्वेपि चत्वारो भिन्ना वासुदेवा एवेति। निर्दोषा इति॥

विज्ञानादिभावे वा तदप्रतिषेधः॥ अथापि स्यान्न चैते संकर्षणादयो जीवादिभावेनाभिप्रेयंते। किंतर्हि ईश्वरा एवैते सर्वे ज्ञानैश्वर्यशक्ति
बलवीर्यतेजोभिरैश्वर्यधर्मैरन्विता अभ्युपगम्यंते। वासुदेवा एवैते सर्वे निर्दोषा निरधिष्ठाना निरवद्याश्चेति। तस्मान्नायं यथावर्णित उत्पत्त्य
संभवो दोषः प्राप्नोतीति। अत्रोच्यते। एवमपि तदप्रतिषेध उत्पत्त्यसंभवस्याप्रतिषेधः प्राप्नोत्येवायमुत्पत्त्यसंभवो दोषः प्रकारांतरेणेत्यभिप्रा
यः। कथं यदि तावदयमभिप्रायः परस्परभिन्ना एवैते वासुदेवादयश्चत्वार ईश्वरास्तुल्यधर्माणो नैषामेकात्मकत्वमस्तीति। ततोनेकेश्व
रकल्पनानर्थक्यमेकेनैवेश्वरेणेश्वरकार्यसिद्धेः। सिद्धांतहानिश्च भगवानेवैको वासुदेवः परमार्थतत्त्वमित्यभ्युपगमात्॥ ॥

दिष्ठत्वान्निरधिष्ठानाः प्रकृत्यजन्याः निरवद्या नाशादिरहिता इत्यर्थः। ईश्वरत्वाज्जन्मासंभवो गुण एवेत्याह॥ तस्मादिति। सूत्रेण सिद्धांतय
ति। अत्रेति। एवमपि चतुर्णामीश्वरत्वेन विज्ञानशक्त्यादिभावेपीत्यर्थः। प्रकारांतरं दर्शयति। कथमिति। किंच चत्वारः स्वतंत्रा भिन्ना उत ते कस्य वि
कारत्वेनाभिन्नाः आद्यमनूद्य दूषयति। यदीत्यादिना॥

शा॰ सू॰ भा॰ २ द्वितीये विकल्पे प्रकृतितुल्यत्वात्तन्नावाऽप्रामाण्यं निषेधति । अथेत्यादिना । ज्ञानत्वपक्षेऽपि सिद्धान्तमाह । न चैवं चेति । यदि सर्वेऽपि भ-
९३ गवन्तोऽशून्यास्तदाऽनुत्पत्त्यादा वा तदुत्पाद्य । न चैतदस्ति । इतरथा जीवो सन्निधाद्युत्पत्तिस्यादित्याह सूत्रकारः विप्रतिषेधाच्चेति । स्वस्यैव गुणत्वं गुणित्वं च विरु-
द्धं । आदिपदात्सपुरुषानिरुद्धौ भिन्नौ वा तत्त्वान्तरलक्षणा एवैते इति विरुद्धोक्तिः एवं पूर्वापरविरोधाद्दसांगत्वमिति सूत्रार्थमुक्त्वा अर्थांतरमाह । वेदे-

अथाप्येवमभिप्रायः । एकस्यैव भगवत एते चत्वारो व्यूहास्तुल्यधर्माण इति । तथापि तदवस्थ एवोत्पत्त्यसंभवः । न हि वासुदेवात्संकर्षणस्योत्पत्तिः
संभवति । संकर्षणाच्च प्रद्युम्नस्य प्रद्युम्नाच्चानिरुद्धस्य अतिशयाभावात् । भवितव्यं हि कार्यकारणयोरतिशयेन । यथा मृद्घटयोः । न ह्यसत्यतिशये
कार्यकारणमित्यवकल्पते । न च पांचरात्रसिद्धान्तिभिर्वासुदेवादिष्वेकस्मिन्सर्वेषु वा ज्ञानैश्वर्यादितारतम्यकृतः कश्चिद्भेदोऽभ्युपगम्यते । वासु-
देवा एव हि सर्वे व्यूहा निर्विशेषा इष्यन्ते । न चैते भगवद्व्यूहाश्चतुःसंख्यायामेवावतिष्ठेरन् । ब्रह्मादिस्तम्बपर्यन्तस्य समस्तस्यैव जगतो भगवद्व्यूहत्वा-
वगमात् ॥ ॥ विप्रतिषेधाच्च ॥ ॥ विप्रतिषेधश्चास्मिन्शास्त्रे बहुविध उपलभ्यते । गुणगुणित्वकल्पनादिलक्षणः । ज्ञानैश्वर्यशक्तिबलवीर्य-
तेजांसि गुणाः आत्मान एवैते भगवन्तो वासुदेवा इत्यादिदर्शनात् । वेदविप्रतिषेधश्च भवति चतुर्षु वेदेषु परं श्रेयोऽलब्ध्वा शाण्डिल्य इदं शास्त्रमधिग-
तवानित्यादिवेदनिन्दादर्शनात् । तस्मादसंगतैषा कल्पनेति सिद्धम् ॥ ॥ इति श्रीशारीरकमीमांसाश्रीमच्छंकरभ॰ द्वि॰ ध्या॰ द्वि॰ पादः समाप्तः ॥ ॥ ९३
ति । एकस्यापि तन्त्रान्तरस्यालाभेन चतुर्वेदिनोऽधिकृ इति निन्दादिपदार्थः । तस्मान्मिथो विरुद्धार्थः पौरुषेयकल्पनाभिर्नापौरुषेयवेदान्तसमन्वयमन्यप-
विरोध इति सिद्धम् ॥ ॥ इति श्रीमत्परमहं॰ प॰ का॰ गोविन्दानन्दभगवतः कृतौ श्रीमच्छा॰ मी॰ भाष्यव्याख्यारत्नप्रभायां द्वि॰ ध्या॰ द्वि॰ पादः समाप्तः ॥ ॥

॥श्रीगणेशाय नमः॥ हरिः ॐ॥ विवर्तादिविधातारं लीलया भ्रमधुरन्तं। नित्यबुद्धिस्वकर्मीलाभिन्नं सर्वेश्वरं भजे १ जीवस्यानुसन्तिमसंयेन्न
कायास्यापुरुषस्य भवमार्गकस्य परिहरन्नादानेकदेशिमतमाह॥ नविपरस्कृते॥ विपत्त्या ... स्वादयो रथ्यं से हि ... वेपादेनस्या तिमाह। वेदांते
ष्विति भिन्नो पक्षम स्थापयन्नाह। केचित्तु सादिना। मतभोक्त्रकृतीनां मिथो विरोधशंकानिरासो विपत्सारूप्यैः लिंगशरीरस्कृतीनांतन्निरासः
मानपानार्थः। पद्मामिश्रो विरोधालस्कौ परवितैधाय परपक्षानूपेक्ष्याः तथाकृति पक्षो पिंड पेस्य इति शंको मानेप्रादृह् प्रसारभास्य वेपादे

श्रीगणेशायनमः॥ ॥श्रीराम॥ ॥नविपरस्कृते॥ वेदांतेषु नजतन्त्र भिन्नमत्यानाडत्यतिस्कृतपदपलभ्यंते • केचिदाकाशास्यो
त्पत्तिमामनंति केचित्तथा केचिद्वायोरुत्पत्तिमामनंति केचित्त्वाएवं जीवस्य मातृगा नाचवएवमेवक्रमादिहारको विप्रतिपेधः स्फुटं त
इ पापलस्य तेवि प्रतिषेधाच्च परपक्षाणामनपेक्षितत्वं स्थापितं। तद्वत्स्वपक्षस्यापि विप्रतिषेधादेवानपेक्षितत्वमाशंक्य तेनेतः सर्ववे
दांतगतसृष्टिक्रमविषयेतिमेलनापपरः अपंचआरभ्यते। तदर्थे निमेलनेचपफलं पथो ... शंका निवृत्तिरेव। तत्र प्रथमं तावदाकाशमा
श्रित्य चिंत्यते। किमस्याकाशस्योत्पत्तिरस्तु तन्नास्तीति॥

न दृष्टांतसंगतिरितिसमुदायार्थः आकाशवायोरुत्पत्तिमामनंतितैत्तिरीयकाः नामनंति छांदोगाः। जीवस्य मातृणांचोत्पत्तिं सर्वे एतत्र आत्मानो
वृत्तुरंनीतिवाजिनः एतस्मात्ज्ञायते प्राणः इत्यार्थर्वणिकाः आमनंतिनान्येवमाकाशः ... क्वचित्स्य ... क्वचित्तेजः पूर्विके ... विरोधः
आदिपदात्स इमांल्लोकानसृजतेत्युक्रमः क्वचित्सस्प्राणः क्वचिदभ्यविमा... विरोधो याः ... प्रपंचः पादद्वयेन तत्पावपादद्वयस्य स्फु
टीनां मिथो विरोधनिरासार्थत्वात् श्रुतिशास्त्रोपा... संगतत्वः सिद्धः॥

ब्र॰भा॰२

२४

अत्राकाशस्योत्पत्त्यनुत्पत्तिश्रुत्योर्मिथो विरोधोऽस्ति न वेति वाक्यभेदैकवाक्यत्वाभ्यां संदेहे प्रथमश्रुतिस्तावद्वाक्यभेदेन विरोधादप्रामाण्यं प्रा नयोः श्रुत्योरिति पूर्वपक्षमभिमतमाशङ्क्यानुत्पत्तिपक्षमेकदेशी गृह्णाति स्म॥ तत्र तावदिति। उत्पत्तिश्रुतिमुख्यत्वान्नास्तीति गौणत्वाभिसंधिः। स

तत्र तावत् प्रतिपद्यते न वियदश्रुतेरिति। न खल्वाकाशमुत्पद्यते कस्मादश्रुतेः न ह्यस्योत्पत्तिप्रकरणे श्रवणमस्ति॥ छान्दोग्ये हि सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमिति सच्छब्दवाच्यं ब्रह्म प्रकृत्य तदैक्षत तत्तेजोऽसृजतेति पञ्चानां महाभूतानां मध्यमं तेज आदिं कृत्वा त्रयाणां तेजोबन्नानामुत्पत्तिः श्राव्यते। श्रुतिश्च नः प्रमाणमतीन्द्रियार्थविज्ञानोत्पत्तौ। न चात्र श्रुतिरस्त्याकाशस्योत्पत्तिप्रतिपादिनी। तस्मान्नास्त्याकाशस्योत्पत्तिरिति॥ ॥ अस्ति तु॥ ॥ तुशब्दः पक्षान्तरपरिग्रहे। मा नामाकाशस्य छान्दोग्ये भूदुत्पत्तिः श्रुता तैत्तिरीयके हि सत्यं ज्ञानमनन्तं ब्रह्मेति प्रकृत्य तस्माद्वा एतस्मादात्मनः आकाशः संभूत इति। ततश्च श्रुत्योर्विप्रतिषेधः। क्वचित्तेजःप्रमुखा सृष्टिः क्वचिदाकाशप्रमुखेति। नन्वेकवाक्यतानयोः श्रुत्योर्युक्ता। सत्यं स्याद्युक्ता न तु सावगन्तुं शक्यते। कुतः तत्तेजोऽसृजतेति सकृच्छ्रुतस्य स्रष्टुः स्रष्टव्यद्वयेन संबन्धानुपपत्तेः तत्तेजोऽसृजत तदाकाशमसृजतेति॥ २४

प्रतिस्वपक्षपतितः सूत्रकारः। अस्ति त्विति। एकवाक्यत्वेनाप्रामाण्यपरिहारं मन्वानः किमिति श्रुत्योरप्रामाण्यमिति शंकते॥ नन्वेकवाक्यतेति एकवा

एकस्य युगपत्कार्यद्वयासंबंधेपि क्रमेण संबंधसंभवादेकवाक्यतेति मुख्यस्त्रिवृंतीहारकृते। ननु सकृदिति। अप्रामाण्यवादी हि भवति। नैवमिति।
क्रमेण युज्यते द्वयोः श्रुतयोः प्रथमभंगापत्तेरित्यर्थः। एकस्मात्तु हि दलबीजात् दलद्वयं परस्परं प्रथममिव्यक्तं आह। नचेति॥ वायोरग्निरिति क्र
मश्रुतिभंगप्रसंगादिति शेषः। छांदोग्यश्रुतेस्तित्तिरिविरुद्धार्थत्वमुक्त्वा तित्तिरिश्रुतेस्तद्विरुद्धार्थत्वमाह। एतेनेति एतत्सदर्थमाह। तस्मादिति। छां

ननु सकृच्छ्रुतस्यापि क्रमेण द्वयेन संबंधो दृश्यते यथा सस्यपक्वौदनं पचतीत्येवं तदाकाशं सृष्ट्वा तत्तेजोसृजतेति योजयिष्यामि।
नैवं युज्यते प्रथमजत्वं हि छांदोग्ये तेजसो गम्यते तैत्तिरीयके चाकाशस्य। नचोभयोः प्रथमजत्वं संभवति एतेनेतरश्रुत्यक्षरविरोधो
पि व्याख्यातः। तस्माद्वा एतस्मादात्मन आकाशः संभूत इत्यत्रापि तस्मादाकाशः संभूतस्तस्मात्तेजः संभूतमिति सकृच्छ्रुतस्यापादानस्य
संभवतस्याविरुद्धत्वेन युगपत्संबंधानुपपत्तेः। वायोरग्निरिति च पंचम्याम्नानात्॥ अस्मिन्विप्रतिषेधे कश्चिदाह॥ ॥

छांदोग्ये श्रुतं तेजसः प्राथम्यमविरुद्धं युक्तमित्यर्थः। किंच सदाख्य आत्मा छांदोग्ये तेजःसृष्टावादानं मन्यते अत्र तु वायुरिति नैकवाक्यतेत्याह वायोरिति
एवं श्रुत्योर्विरोधे धारणासामर्थ्यमिति एवं परस्परासामर्थ्ये स एव विप्रवदनुस्मृतिवादी स्वमते न प्रामाण्यं कल्पनं त्विस्याह अस्मिन्निति॥ ॥

शा॰दी॰भा॰२ एवमाध्यायसमासेऽधिकरणेषु प्रथमे विरोधाच्छ्रुतिप्रामाण्यमिति पूर्वपक्षफलं तत एकदेशिसिद्धांतः पश्चान्मुख्यसिद्धांते श्रुतीनामवि
९५ रोधेनैकवाक्यतया प्रामाण्यमिति समन्वयादिसिद्धिरिति फलं क्रमेण स्थैर्यं गतम्। तत्र श्रुत्योर्विरोधे सत्यस्थापनविषयापातयो रप्रामाण्यायोगाद्धि पदस्य स
संभवरूपतर्कानुगृहीतश्छांदोग्यश्रुतिर्मुख्या तदितरा गौणी सा विरोधः इत्येकदेशिमतं विघटयति। नास्तीत्यादिना। आकाशो नोत्पद्यते सामग्र्य
गौणप्रसंगात्। नास्ति वियत उत्पत्तिरश्रुतेरेवमादिना तत्र वियदुत्पत्तिवादिनी श्रुतिरुदाहृता सा गौणी भवितुमर्हति कस्मात्। असंभवात्।
नह्याकाशस्योत्पत्तिः संभावयितुं शक्या श्रीमत्कणभुगभिप्रायानुसारिषु जीवत्सु ते हि कारणसामग्र्यसंभवादाकाशस्योत्पत्तिं वारयंति स्म
समवाय्यसमवायिनिमित्तकारणेभ्यो हि किल सर्वमुत्पद्यमानं समुत्पद्यते। द्रव्यस्य चैकजातीयकमनेकं च द्रव्यं समवायिकारणं भवति।
न चाकाशस्यैकजातीयकमनेकं च द्रव्यमारंभकमस्ति। यस्मिन्समवायिकारणे सति असमवायिकारणे च तत्संयोगे आकाश उत्पद्येत
तत्तदभावात्तु तदनुग्रहप्रवृत्तं निमित्तकारणं दूरापेतमेवाकाशस्य भवति। उत्पत्तिमतां च तेजःप्रभृतीनां पूर्वोत्तरकालयोर्विशेषः संभा
व्यते प्रागुत्पत्तेः प्रकाशादिकार्यं न बभूव पश्चाच्च भवतीति। आकाशस्य पुनर्न पूर्वोत्तरकालयोर्विशेषः संभावयितुं शक्यते ९५
त्वादात्मवत्। न चाविभागत्वगुणः सत्वादित्वसिद्धिः। विजातीयत्वेनानयोरारंभकत्वायोगादसंयुक्तत्वाच्च। संयोग एव हि द्रव्यस्यासमवायिकार
णम् तत् समवाय्यसमवायिनोरभावान्न हेतुसिद्धिरित्यर्थः। प्रागभाववत्त्वलाभाज्जन्यवदाकाशो नोत्पद्यते इत्याह। उत्पत्तिमतां चेति। प्रकाशस्याभावानु
भवः प्रागुत्पत्तेः परोत्पत्तौ ध्वंसमाकयोर्ग्रहणं कृत्वा इत्याश्रयत्वेनाकाशस्य कल्पितं तत्प्रत्यक्षमस्ति परमाणवाश्रयत्वात्। अतो न प्रागभाववत्त्वम्॥

मात्मा वा स लिंगं स्फुटयति। किं हीति। इच्छाद्यो गुणाः। स स्वाश्रयः। छिद्रमत्राश्रयः सुषिरमिति भेदः। किं चात्मवदाकाशो न जायते विवक्षाद
स्पर्शिद्रव्यत्वात्मेत्याह। पृथिव्यादीति। तस्मादित्यन्तर्केवलान्वयी लिंगं इच्छाद्यन्वयः भेदीति। गौणत्वे वेदिको दाहरणमाह वेदेष्वारण्यानिति। आकाशेति
किं हि प्रमुखमन्तरेण काशमस्तु पिरिच्छिद्रं च भवेतिरुक्तेयवक्तुं। पृथिव्यादिवैधर्म्याच्च विभुत्वादिलक्षणाद्याकाशाज्जनयति च्छिद्रत्वा
घ्राणालोके अप्याकाशं करुराकाशो जातइत्येवं जातीयको गौणः शब्दो भवति। यथा च घटाकाशः करकाकाशो गृहाकाश इत्येकस्याप्याकाश
स्यैवं जातीयको भेदव्यपदेशो भवति वेदेष्वारण्यानाकाशेष्वालभेरन्निति वसुमत्तिश्रुतिरपि गौणी द्रष्टव्या॥ ॥शब्दाच्च॥ ॥शब्दः ख
ल्वप्याकाशस्यानत्वं स्थापयति यतश्चाह वायुश्चान्तरिक्षं चैतदमृतमिति न ह्यमृतस्योत्पत्तिरुपपद्यते आकाशवत्सर्वगतश्च नित्य इति
चाकाशेन ब्रह्म सर्वगतत्वनित्यत्वाभ्यां धर्माभ्यामुपमिमान आकाशस्यापि तौ धर्मौ सूचयति। न चैवंजातीयकस्योत्पत्तिरूपपद्यते। सयथानं
तोयमाकाश एवमनन्त आत्मा वेदितव्य इति चोदाहरणं आकाशशरीरं ब्रह्म आकाशात्मेति च। न ह्याकाशस्योत्पत्तिमत्वे ब्रह्मणा तेन विशेष
णं संभवति नीलेनेवोत्पलस्यात तस्मान्नित्यमेवाकाशेन साधारणं ब्रह्मेति गम्यते॥ ॥ ॥ ॥
ति भेदव्यपदेशो गौण इति संबंधः। न केवलं तर्कादाकाशस्यानुत्पत्तिः किंतु श्रुतितोपीत्याह सूत्रकारः शब्दाच्चेति नित्यभावस्याकाशादिशादिति भा
वः आत्मेति च शब्दे दृष्टोदाहरणमित्यन्वयः। आकाशः शरीरमस्येति वहुव्रीहिणा संततात्म्यभावात् अस्य वदाकाशस्यानादित्वमित्यर्थः॥ ॥

शा॰ सू॰ भा॰ २ परोक्तमिति। शंकोत्तरत्वेनास्ति मावत्। तामेव शंकां पदानि पठति। स्यादेतदिति। अधिकारे प्रकरणे यथैकस्मिन्ब्रह्मप्रकरणे ऽन्नं ब्रह्मानंदो ब्रह्मे-
९६ तिवाक्यभेदे ब्रह्मशब्दस्यान्ने गौणत्वमानंदे मुख्यत्वं तथैकवाक्यस्थस्यैकस्यापि संभूतशब्दस्य गुणमुख्यत्वं यथाभेदेप्योपतावतादिशा हस्याच्चैकेति उदाहर-

स्याच्चैकस्य ब्रह्मशब्दवत्॥ ॥इदं पदोत्तरं सूत्रं॥ स्यादेतत्। कथं पुनरेकस्य संभूतशब्दस्य तस्माद्वा एतस्मादात्मन आकाशः संभूत इत्य-
स्मिन्नधिकारे परेषु तेजःप्रभृतिष्वनुवर्तमानस्य मुख्यत्वं संभवति। आकाशे च गौणत्वमिति। अत उत्तरमुच्यते। स्याच्चैकस्यापि संभूतशब्द-
स्य विषयविशेषवशाद्गौणो मुख्यश्च प्रयोगो ब्रह्मशब्दवत्। यथैकस्यापि ब्रह्मशब्दस्य तपसा ब्रह्म विजिज्ञासस्व। तपो ब्रह्मेत्यस्मिन्नधिकारेऽन्ना-
दिषु गौणः प्रयोगः आनंदे च मुख्यः। यथा च तपसि ब्रह्मविज्ञानसाधने ब्रह्मशब्दो भक्त्या प्रयुज्यते। अंजसा तु विज्ञेये ब्रह्मणि तद्वत्। कथं पुन-
रनुत्पत्तौ नभस एकमेवाद्वितीयमितीयं प्रतिज्ञा समर्थ्यते॥ ननु नभसा द्वितीयेन सद्वितीयं ब्रह्म प्राप्नोति। कथं च ब्रह्मणि विदिते सर्वं विदि-
तं स्यादिति। तदुच्यते॥ ९६

णांतरमाह। यथा चेति। अभेदोपचारो भक्तिः। मुख्यत्वमिति ब्रह्मत्वं सिध्यति। कथं पुनरिति। सदेवासेत्युपक्रम्य पठति। नन्विति। अद्वितीयत्वश्रुतिबाधः
सर्वविज्ञानप्रतिज्ञाबाधश्चेत्यर्थः॥

प्रथमसूत्रे यं दृष्टांतं तेन परिहरति। एकमेवेति कार्यरूपाद्द्वितीयशून्यत्वं प्रागवस्थायामवधारणश्रुत्यर्थ इत्यर्थः। कुले गृहे। अमत्राणि घटादी
नि पात्राणि। एकमेवेत्यवधारणव्यावर्त्यं कार्यमेवेति तस्यापायाद्द्वितीयपदस्य वैयर्थ्यमित्याह अद्वितीयश्रुतिरिति। आकाशस्य द्वितीयत्वमंगीकृत्याह द्विती

एकमेवेति तावत्स्वकार्यापेक्षयोपपद्यते। यथा लोके कश्चित्कुंभकारकुले पूर्वेद्युर्मृद्दंडचक्रादीनि चोपलभ्यापरेद्युश्च नानाविधानमत्रा
णि प्रसारितान्युपलभ्य ब्रूयात् मृदेवैकाकिनी पूर्वेद्युरासीदिति। स चैतयावधारणया मृत्कार्यजातमेव पूर्वेद्युर्नासीदित्यभिप्रैति न दंडचा
दि तद्वत्। अद्वितीयश्रुतिरधिष्ठात्रंतरं वारयति यथा मृदो घटप्रकृतेः कुंभकारोऽधिष्ठाता दृश्यते नैवं ब्रह्मणो जगत्प्रकृतेरन्योऽधिष्ठाता
स्तीति। नच नभसापि द्वितीयेन सद्वितीयं ब्रह्म प्रसज्यते। लक्षणान्यत्वनिमित्तं हि नानात्वं। नच प्रागुत्पत्तेर्ब्रह्मनभसोर्लक्षणान्यत्वमस्ति क्षीरो
दकयोरिव संसृष्टयोर्व्यापित्वामूर्तत्वादिधर्मसामान्यात्। सर्गकाले तु ब्रह्म जगदुत्पादयितुं यतते स्तिमितमितरत्तिष्ठति तेनान्यत्वमवसीय
ते। तथाचाकाशशरीरं ब्रह्मेत्यादिश्रुतिभ्योपि ब्रह्माकाशयोरभेदोपचारसिद्धिः। अत एव चैकविज्ञानेन सर्वविज्ञानसिद्धिः।

मादिपदसंकोचः कृतस्तद्दर्शयन्नास्तीत्याह। नच नभसापीति। धर्मसाम्ये ब्रह्मनभसोः कथं भेदस्तत्राह। सर्गकाल इति। धर्मसाम्याद्द्वितीयलोप
चार इत्यर्थे श्रुतिमाह। तथाचाकाश इति। द्वितीयमाक्षेपं परिहरति। अत एवेति। अनेकदोषप्रचारादेवेत्यर्थः॥ ॥

ब्र॰सू॰भा॰२ नभसो ब्रह्मणस्तत्कार्यस्यानन्यत्वे देशकालत्वाच्च तत्सत्त्वे ज्ञानमपि स्यात्। अपि चेति। एवमाकाशस्यानुत्पत्तौ सर्वश्रुतीनामुपरोधः स्यादेकदेशसिद्धान्तः

शाहः तं मुख्यसिद्धान्ती दूषयति। प्रतीति नेति। प्रतिज्ञाहानिरबाधः। सा च मम जुष्टेत्येकमेवाद्वितीयमिति श्रुतेः। न काचनेति॥ आत्मविज्ञानेयेनास्ति

८१ सर्वः। ननु सर्वस्य ब्रह्मणो व्यतिरेकात्प्रतिज्ञायाश्च हानिरस्त्वस्तु तथापि निर्विकारवदनुत्पन्नस्यापि नभसो ब्रह्मणि कल्पितत्वेनाव्यतिरेकात् प्रतिज्ञासिद्धिः

किं नस्यादित्युत्तरेत्यत आह। एकमेवेत्यनेकैवेति। अव्यतिरेकश्चैवमात्मस्तेनेत्सर्वः। अयं भावः। जीवस्यतावदज्ञानत्वात् ब्रह्माव्यतिरेकः। अज्ञानतत्त्वं बुध्योः

अपि च सर्वकार्यमुत्पद्यमानमाकाशेनाव्यतिरिक्तदेशकालमेवोत्पद्यते ब्रह्मणश्चाव्यतिरिक्तदेशकालमेवाकाशं भवतीति। अतो ब्रह्मणा तत्कार्येण

चाविज्ञातेन सह विज्ञातमेवाकाशं भवति। यथा क्षीरपूर्णे घटे कतिचिदपि बिन्दवः प्रक्षिप्ताः सन्तः क्षीरग्रहणेनैव गृहीता भवन्ति। न हि क्षीरग्रह

णादबिन्दुग्रहणं परिशिष्यते। एवं ब्रह्मणा तत्कार्यैश्चाव्यतिरिक्तदेशकालत्वाद्गृहीतमेव ब्रह्मग्रहणेन नभो भवति। तस्मादुत्पद्यते नभः सम्भव

श्रवणमिति। एतमेव प्रपञ्चयति॥ प्रतिज्ञाहानिरव्यतिरेकाच्छब्देभ्यः येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमिति। आत्मनि खल्वरे दृष्टे श्रुते मते

विज्ञात इदं सर्वं विदितमिति। कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवतीति। न काचन मद्बहिर्धा विद्यास्तीति चैवंरूपा प्रतिवेदान्तं प्रतिज्ञा विज्ञाय

ते। तस्याः प्रतिज्ञाया एवमहानिरनुपरोधः स्यात्। यद्यव्यतिरेकः कृत्स्नस्य वस्तुजातस्य विज्ञेयाद्ब्रह्मणः स्यात्। व्यतिरेके हि सति एकविज्ञानेन सर्वं

विज्ञायत इतीयं प्रतिज्ञा हीयेत। स चाव्यतिरेक एवमुपपद्यते। यदि कृत्स्नं वस्तुजातमेकस्माद्ब्रह्मण उत्पद्येत। शब्देभ्यश्च प्रकृतिविकाराव्यतिरेकन्यायेनैव प्रतिज्ञासिद्धिरवगम्यते॥ ८१

कल्पितत्वेनाव्यतिरेकः स्यात्तं ज्ञात्वा नायोगाद्ज्ञानस्य जडद्रव्यस्य तु कार्यत्वेनैवाव्यतिरेकसिद्धिः तस्मात्कार्यत्वे प्रधानवस्तत्वात् व्यतिरेकायोगात् या

अपि विरोधः निस्तद्व्याप्तिस्तं ज्ञात्वा तु सिन्धाव्यतिज्ञानीति तस्मात्प्रतिज्ञासिद्धये आकाशस्य कार्यत्वेनैवाव्यतिरेको वाच्य इति॥ ॥

दृष्टांतस्य हि स्वार्थत्यागस्यानाहतत्वाद्धीति। तेनतेन दृष्टांतेनेति मृत्पिंडमृदादिदृष्टांतेनाप्यविलोहमणिनाद्यादि दृष्टांतेनेत्यर्थः यजुषि प्रतिज्ञाता

तथा हि येनाश्रुतं श्रुतं भवतीति प्रतिज्ञाय मृदादिदृष्टांतैः कार्यकारणाभेदप्रतिपादनपरैः प्रतिज्ञेषा समर्थिते तुल्यान्यायेवचोत्तरैरपि ग्रंथैः सदे
व सोम्येदमग्र आसीदेकमेवाद्वितीयं तदैक्षत तत्तेजोऽसृजत ते सर्वकार्यजातं ब्रह्मणः प्रदर्श्याव्यतिरेकं प्रदर्श्य ऐतदात्म्यमिदं सर्वमित्यारभ्या
प्रपाठकपरिसमाप्तेः॥ तद्यद्याकाशं न ब्रह्मकार्यं स्यात्। न ब्रह्मणि विज्ञाते आकाशं विज्ञायेत। तत श्च प्रतिज्ञाहानिः स्यात्। न च प्रतिज्ञाहा
न्युचिता वेदस्याप्रामाण्यं प्रसज्येत। तथा च प्रतिवेदांतं ते ते शब्दास्तेन तेन दृष्टांतेन तामेव प्रतिज्ञां ज्ञापयंति। इदं सर्वं यदयमात्मा ब्रह्मैवेदममृ
तं पुरस्तादित्येवमादयस्तस्मात् ज्वलनादिवदेव गगनमप्युत्पद्यते। यदुक्तमश्रुतेरिति विप्रतिषिद्धमेतदिति। तदयुक्तं। वियदुत्पत्तिविषयश्रुत्यं
तरस्य दर्शितत्वात्। तस्माद्वा एतस्मादात्मन आकाशः संभूत इति। सत्यं दर्शितं विरुद्धं तु तत्तेजोऽसृजतेत्यनेन श्रुत्यंतरेण। नैकवाक्य
त्वात् श्रुतीनां भवत्येकवाक्यत्वमविरुद्धानामिह तु विरोधः उक्तः सकृच्छ्रुतस्य स्रष्टुः स्रष्टव्यद्वयसंबंधासंभवात् द्वयोश्च प्रथमजत्वासं
भवाद्विकल्पासंभवाच्चेति॥

यकाइदं सर्वमिति शाखाः आथर्वणे ब्रह्मैवेदमिति शाखा इति विभागः एवमाकाशोत्पत्तिनिषेधकैकदेशिमते दूषिते श्रुत्यसामान्यवादिश्लोकं
स्मारयति। सत्यं दर्शितमिति मुख्यसिद्धांत्याह। नैकेति॥

शा॰ सू॰ भा॰
२८

तत्तेजोऽसृजतेति सकृच्छ्रुतस्य स्रष्टुराकाशतेजोभ्यां युगपत्संबंधे तित्तिरिक्रमबाधात् क्रमेणाकाशं सृष्ट्वा तेजोऽसृजतेति संबंधे तेजःप्राथम्यभं
गात्तत्तु निर्विकल्पासंभवेन तयोः शाखाभेदेन साध्यसाध्यवस्थया वा अन्वययोगान्नैकवाक्यतेति शंकामुत्थाप्य पूर्वपक्षयति। ते ष दोष इति श्च सामाप्रक
ल्पनादृत्य अग्नौ द्वैधे श्रुतीनामैकवाक्यत्वेन प्रामाण्यकल्पनं तत्रैकवाक्यत्वं बलवच्छ्रुत्यानुकूल्यश्रुतेः कल्प्यं बलवती च तित्तिरिश्रुतिः प्रकृतिपंचम्या पौ
र्वापर्यात्मक्रमस्य श्रुतत्वात् छांदोग्यश्रुतिस्तु दुर्बला तेजःप्राथम्यश्रुत्यभावात्तेजःसर्गमात्रं तु श्रुतं तत्तृतीयत्वेन परिणेयमित्येकवाक्यतेत्यर्थः। स्य

नैष दोषः। तेजःसर्गस्य तैत्तिरीयके तृतीयत्वश्रवणात्। तस्माद्वा एतस्मादात्मन आकाशः संभूतः आकाशाद्वायुः वायोरग्निरिति॥ अ
शक्या हीयं श्रुतिरन्यथा परिणेतुं शक्या तु परिणेतुं छांदोग्यश्रुतिः॥ तदाकाशं वायुं च सृष्ट्वा तत्तेजोऽसृजतेति। न हीयं श्रुतिः तेजोजनिप्रधा
ना सती श्रुत्यंतरप्रसिद्धमाकाशस्योत्पत्तिं वारयितुं शक्नोति। एकस्य वाक्यस्य व्यापारद्वयासंभवात्। स्रष्टा त्वेकोऽपि क्रमेणानेकं स्रष्टव्यं संसृजेत॥

दुक्तं। एकदेशिना छांदोग्यश्रुत्याकाशोत्पत्तिर्वार्यत इति तन्निरस्तं। किंच सा श्रुतिः किं तेजोजन्मपरा उत तेजोजन्मविधिवदन्यसृष्टिनिषेधेऽप्युभयपरा।
आद्ये न तत्कारणाभिप्रायः। न हीति। अविरोधादित्यर्थः। न द्वितीयः श्रुत्यंतरविरोधेनोभयपरत्वकल्पनायोगाद्वाक्यभेदप्रसक्तेश्चेत्याह एकस्येति। ९८
नन्वेकस्य स्रष्टुरनेकार्थसंबंधवदेकस्या अप्यनेकार्थता किं न स्यादित्याशंक्याह स्रष्टा त्विति। एकस्य कर्तुरनेकार्थत्वं दृष्टं न त्वेकस्य वाक्यस्य
नानार्थत्वं दृष्टं नानार्थकमर्थयोगेनुपपत्त्यानपेक्षा दारा द्युत्साराकर्मभेदेऽपि वाक्यान्वयतस्यानलस्य प्राग्भ्यां युगपत्संबंधादित्यर्थः॥ ॥

फलितमाह। इत्येकेति। एकस्य शरीरस्य। वृत्तिं विनाने कार्यत्वं नास्ति चेदस्य जनेति शरीरस्य लोहितेगन्धउपसंहृताः कारणादिसंबंधार्थमाह। वृत्तिरेव दोषः
स्यादित्यत आह। नचेति। छंदोगपरिस्छन्तेजो जन्माकाशादिजन्म एव कृतं तेजो जन्मत्वाविति। तिरिक्षस्य तेजो जन्मवादित्वाः काशादिजन्मोपसंहारेत द
काशमनस्य जनेति वाक्यांतरस्यैव कल्पनान्नाद इति। द्वेधा सर्पः। श्रुत्यंतरस्थः क्रमः श्रुत्यंतरयोरिदं स्मरतेप्युक्तं तमाह। यद्वा चेति। एतदेतावत्पर्यंत

इत्येकवाक्यकल्पनायां संभवंत्यां न विरुद्धार्थत्वेन श्रुतिर्हितमा। नचास्माभिः सकृच्छ्रुतस्य स्वस्व कुः स्वसृष्ट्यनुपपत्संबंधोऽभिप्रेतः श्रुत्यंतरवशेन
सृष्ट्यंतरोपसंग्रहात्। यथा च सर्वं खल्विदं ब्रह्म तज्जलानिति शांत उपासीतेत्यादेः सर्वस्य वस्तुजातस्य ब्रह्मजत्वं श्रुत्या प्रमाणेन नमर्हेतांतरविहितं ते
जः प्रमुखमुत्पत्तिक्रमं वारयितुं सेवंतेजसोपि अस्मिन्नजस्य प्रमाणेन श्रुत्यंतरविहितं नभः प्रमुखमुत्पत्तिक्रमं वारयितुमर्हति। ननु श्रुतमवि
धातार्थमेनहृत्यास्तं तज्जलानिति शांत उपासीतेति श्रुतेर्नैतस्य छांदोग्याकं॥ तस्मादेतत्तत्र यदेशांतरस्मृतिर्ज्ञेयः क्रममनुरोद्धुमर्हतीति। ततेजोसृज
तेत्येतत्षष्ठिकां। तस्मादत्र यथाश्रुतिक्रमो ग्राह्य इत्यत आह। नेत्युच्यते। नहि तेजः प्राथम्यानुरोधेन श्रुत्यंतरप्रसिद्धो वियत्सत्वार्थः प
रित्यक्तो भवति पदार्थधर्मत्वात्क्रमस्य॥

समीप्यां दृष्टांतश्रुतिवैषम्यं कृतेति। नन्वित्यादिना। तेजः प्राथम्यस्वीकारे आकाशसर्गो धर्मीतद्धर्मः प्राथम्यं चेति द्वयं श्रुतं प्राधान्यमिति गौ
रवमाकाशप्राथम्यत्यक्तौ तु तेजः सर्गप्राथम्यमात्रबाध इति लाघवमिति मत्वाह। नेत्युच्यत इति। किंच प्रधानधर्मिस्त्यागाद्वरं गुणभूतस्य तेजः
प्राथम्यस्य धर्मस्य त्याग इत्याह॥ नहीति॥

छा.सं.भा.
९८

किं चार्थिकं स्पष्टं परश्रुतिसिद्धत्वात्तेजःसाधर्म्यं गृह्यते उत्तमप्रथमस्याने तेजसः सर्गश्रुत्याः पौर्वापर्यमन्यथा नाञ्जसमित्याह॥ अपि चेति। द्वितीयमनृ-
घटादिवदिति। अर्थान्तरमिति। यदुक्तं वस्तुनि विकल्पासंभवादुभयोः प्रथमसंहारे कालभेदेन स्थापवाहितं तेन भवितव्यमित्युभयोर्द्वित्वं क्रियावृत्त्यसमुच्चितेऽसत्स्वप्राप्य
म्। तथा योरग्निरिति क्रमबाधाप्रमाणाभावादिति तत्रेदमेवोत्तरमाह। विकल्पेति। न केवलं श्रुतिद्वयोर्विरोधः किंतु दर्शनस्याप्याह। अपि चेति। विपदुपसंग्रा
अपि च ततस्तेजोऽसृजतेति तात्पर्यं क्रमस्य वाचकः कृत्वा श्रुतिः प्रत्यर्थीनुक्रमो गम्यते। स तु यथाभोग्यभिरिति नेन श्रुतं तस्य स्थितेन क्रमेण निवार्ये
ते विकल्पसमुच्चयौ न तु विपरीततेजसोः प्रथमत्वे विघातेन भवानमुपगमप्राप्तिं निवारितौ। तस्मान्नात्र श्रुत्योर्विप्रतिषेधः। अपि च श्रोत्रेऽपे
क्षेनाश्रुतं श्रुतं भवतीत्येतां प्रतिज्ञां वाक्योपक्रमे श्रुतां समर्थयितुं महाप्राप्तां नमपि क्षिपदुत्सत्तावुपसंख्यातव्ये। किं च गुणसैतिरीयके समा
म्नातं तन्न संगच्छते॥ प्रश्नोत्तरमाकाशस्य वैलान्तरे द्वाकालत्वात् ब्रह्मणो गतकार्यैश्च सह विदितमेव तद्वस्तु तेन श्रौतमाहात्म्यं गम्यते॥ न
चैकमेवाद्वितीयमिति श्रुतिकोपो भवतीत्यपीरोदकवत् ब्रह्मनभसो व्यतिरेकोपपत्तेरिति। अत्रोच्यते॥ न क्षीरोदकन्यायेनेदमुक्तं विज्ञानेन
सर्वविज्ञानं नेतव्यं। मृदादिदृष्टान्तप्रयत्नाद्धि प्रकृतिविकारत्वात्मैवेदं सर्वं विज्ञानं तेनाभिनिगम्यते। क्षीरोदकन्यायेन च सर्वविज्ञानं कल्प्य
मानं न सम्यग्विज्ञानेस्यात्। न हि क्षीरज्ञानग्रहीतस्योदकस्य सम्यग्विज्ञानं गृहीतमस्ति।

प्रमित्सत्त्यपः। विपदनुसत्तिवादिनो क्रमनयप्रमति नाया आद्वितीयतश्रुतेश्च मुख्यार्थतासंभवगमान्नगौणार्थतेति दूषयति। मन्त्रोक्रमित्यादि
नामकृतिविकारत्वाभावः तदनन्यत्वस्य मायः क्रुदकं क्षीरस्थमपि क्षीरज्ञानाविजातमेदादिति भावः॥ ९९

मास्तु सम्मता न श्रुतेर्भ्रान्तिमूलत्वसंभवादित्याशङ्क्याऽपौरुषेयत्वान्नैवमित्याह । न च वेदस्येति । माया भ्रान्तिः । तथाऽसीकमिथ्याभावत्वं तेन वंचनम
यथा भवेद्धनं आदिपदाद्विप्रलिप्साप्रमादकरणापाटवादिग्रहणं । तत्र प्रतिज्ञामुख्यत्वमभिधायाद्वितीयश्रुतिमुख्यतामाह । सावधारणेति ॥ स
न च वेदस्य पुरुषाणामिव मायाशालीकवंचनादिरस्ति यथावधारणमुपपद्यते सावधारणं चेयमेकमेवाद्वितीयमिति श्रुतिः । क्षीरोदकन्याये
ननीयमानापि स्यात । न च स्वकार्यापेक्षयेदं वस्त्वेकमद्वितीयं सर्वविज्ञानमेकाद्वितीयतावधारणं चेति न्याय्यं । मृदादिदृष्टान्तप्रणयनात्
भवानननतदपर्यवदुपपन्नमसितमं भवति चेत केतोपलुसो मेदमहामनाश्रुतं ज्ञानमानीतं ध्योस्तु ततमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवती
त्यादिना । तस्मादस्रो ब्रह्मवस्तुविषयमेवेदं सर्वविज्ञानं सर्वस्य ब्रह्मकार्यतापेक्षयोपन्यस्तमिति द्रष्टव्यं ॥ यत्पुनरेतदुक्तं मसंभवाद्गौणी गगन
स्योत्पत्तिश्रुतिरिति अत्र ब्रूमः ॥ ॥यावद्विकारं तु विभागो लोकवत् ॥ ॥ तु शब्दोऽसंभवाशङ्काव्यावृत्त्यर्थः ॥ न खल्वाकाशोत्पत्त्यसं
संभवाशङ्का कर्तव्या ॥ यतो यावत्किंचिद्विकारजातं दृश्यते ॥ घटघटिकोदञ्चनादि वा कटककेयूरकुंडलादि वा सूचीनाराचनिस्त्रिंशादि वा

॥ तावानेव विभागो लोके लक्ष्यते ॥

वैदैतत्तिविषयपरेत्यर्थः भूमग्नोणत्वेऽश्रुतवदुपन्यासो महदादिदृष्टान्तैस्तत्स्य धनंचनस्यादितिदोषान्तरमाह । न चेत्यादिना । कार्यमेव वस्त्वेकदेशआ
काशोनोत्पद्यते साम ग्रीशत्वादित्याकाशो विकारः विभक्तत्वात् घटादिवदिति सत्वमिति पक्षमाह । यत्पुनरित्यादिना ॥ ॥ ॥

ब्र.सू.भा.२ यो विभक्तः स विकार इत्यन्वयमुक्त्वा परत्वविकारः सन्न विभक्तो यथात्मेति व्यतिरेकमप्याह। ननु विकृतमिति दिगादिषु व्यभिचारमाशंक्य पक्ष-
१०० समत्वान्नैवमित्याह। एतेनेति। विभक्तत्वेनेत्यर्थः। आत्मन्यपि व्यभिचारं शंकते॥ नन्वात्मेति। धर्मिसमानसत्ताकविभागस्य हेतुत्वात्स्वरूपेणात्मनि निर्विभा-
गस्य कल्पितत्वेन भिन्नसत्ताकत्वान्न व्यभिचार इत्याह। नेति। अत्र चाकाशादीनामसद्द्रव्यत्वं विशेषणं। अतो नात्मनि तत्र वंध्यादौ व्यभिचारः। नन्वात्मा कार्यः
विभक्तत्वात् तद्वस्तुत्वाद्घटवदात्मा स्वतुल्यमिदं अनुमानमित्याशंक्यात्मनः परमकारणत्वेन श्रुतस्य कार्यत्वे शून्यताप्रसंग इति बाधकसत्वान्नत्या-

न त्वविकृतं किंचित्कुतश्चिद्विभक्तमुपलभ्यते। विभागश्चाकाशस्य पृथिव्यादिभ्योऽवगम्यते। तस्मात्सोऽपि विकारो भवितुमर्हति। एतेन दिक्का-
लमनःपरमाण्वादीनां कार्यत्वं व्याख्यातं। नन्वात्माप्याकाशादिभ्यो विभक्त इति तस्यापि कार्यत्वं घटादिवत्प्राप्नोति॥ नात्मन आकाशः सं-
भूत इति श्रुतेः। यदि ह्यात्मापि विकारः स्यात्तस्मात्परमन्यन्न श्रुतमित्याकाशादि सर्वं कार्यं निरात्मकमात्मनः कार्यत्वे स्यात्। तथा च शून्यवा-
दः प्रसज्येत॥ आत्मत्वाच्चात्मनो निराकरणशंकानुपपत्तिः॥ न ह्यात्मागंतुकः कस्यचित्स्वयंसिद्धत्वात्॥ ॥ ॥

भासत्वं। नात्र किंचिद्बाधकमस्ति यस्तु तस्याकाशस्याकार्यत्वे नित्यानेकद्रव्यकल्पनागौरवमिति ग्राह्यमाद्यो बाधकाः सन्तीति नाभासतुल्यतेत्या-
ह॥ आत्मन इति। इष्टप्रसंग इति वदन्तं प्रत्याह॥ आत्मत्वादिति। आत्माभावः केनचित्साधयितुं न शक्यः साधकस्यैवात्मत्वात् परिशिष्यत इत्याह नह्यात्मेताद्विती- १००
येपि न ह्यात्मतावाभावादिसर्वं। किंच यदि कार्यं स्यात् कुतश्चिदागमापेक्षं तन्निराकार्यमात्मत्वात्कर्मनिरपेक्षत्वान्न बाधयोग्य इत्याह। नस्यात्मेति। आदिना
॥ कस्यचित्कारणस्य आगंतुकः कार्यो नहि॥ प्रत्यक्षादीनां सिद्धेन स्वप्रकाशत्वादिति लक्षणार्थः॥ ॥ ॥

तत्र स्थूलैरनुमापनत्वं विषयत्वेनेति। नहीति। तदुक्तं सुरेश्वराचार्यैः। प्रमाता च प्रमाणं च प्रमेयं प्रमितिस्तथा। यस्य प्रसादात् सिध्यन्ति तत्सिद्धौ किमपेक्ष्यतइ
ति। तथा श्रुतिरपि पुरुषः स्वयं ज्योतिः तस्य भासा सर्वमिदं विभातीति च। न चात्मनः स्वतः सिद्धेः प्रमाणवैयर्थ्यं तत्राह। तस्येति। ननु प्रमेयप्रसाधिकस्य प्रकृष्ट
त्वं किं न स्यात् इत्यत आह॥ नहीति। अत एव प्रमाणवैयर्थ्यमिति भावः। आत्मापि प्रमाणाधीनसिद्धिकः किं न स्यादित्यत आह। आत्मेति। अयमर्थः।
निश्चितसत्ताकं हि ज्ञानं प्रमेयसत्तानिश्चायकं गेहे घटो दृष्टो नवेति ज्ञानसंशयेन हि घटः इति भाति रेकनिश्चयेवार्थस्वरूपानिश्चयात् ज्ञानसत्तानिश्चय

न ह्यात्मात्मनः प्रमाणमपेक्ष्य सिध्यति तस्य हि प्रसक्तस्यैव प्रमाणान्यसिद्धप्रमेयसिद्धये इष्यन्ते नह्याकाशादयः पदार्थाः प्रमाणनिरपेक्षाः
स्वयं सिद्धाः केनचिदभ्युपगम्यन्ते आत्मा तु प्रमाणादिव्यवहाराश्रयत्वात् प्रागेव प्रमाणव्यवहारात् सिध्यति न चेदृशस्य निराकरणं संभवति
आगन्तुकं हि वस्तु निराक्रियते न स्वरूपं य एव हि निराकर्ता तदेव तस्य स्वरूपं न ह्यग्नेरौष्ण्यं [illegible] अग्निना निराक्रियते॥ ॥ ॥ ॥

अन्यतः कामं स्वप्रकाशत्वाभावे ज्ञातताया तत्रापि ज्ञानान्तरापेक्षायामनवस्थानात् अतः साक्षिणैव ज्ञानसत्तानिश्चयो वाच्यः तत्र साक्षिणोऽप्यन्यज्ञानाधीनसत्तानिश्च
यः अनवस्थाप्रसङ्गः स्यात् अतः सर्वसाधकत्वादात्मा स्वतः सिद्ध इति। स्वप्रकाशस्यापि बाधः किं न स्यादित्यत आह न चेति जडं हि परप्रकाशत्वादाग
न्तुकं बाधयोग्यं न प्रकाशात्मरूपं तस्य सर्वबाधसाक्षिस्वरूपत्वान्निराकर्त्रैव नाभावात् स्वस्य च स्वनिराकर्तृत्वायोगात् नहि सुनिपुणोऽपि नटः स्वस्कन्धमारोढुं
शक्नोतीत्यर्थः॥

न्या॰ कु॰ भा॰
१०१

एवं सतः स्मृतित्वात्प्रमाणबाधः इत्यत आह स्वतः सत्ताफलात्वनवाध इत्याह तथाहमेवेति ह्यानन्तेपयो॰ सत्ताव्यभिचारेपि ज्ञातुः सदैकरूपत्वान्न व
त्ताभिचार इत्यर्थः मातृजीवितो ज्ञातुरन्यथाभावः यतस्तस्मादेव तत्था हतथेति उक्ते हेतुर्विनाशो न्यथाभावत्वं मिथ्यात्वं कासंभावपितुमपि
नशाश्रवमनस्त्वानुभवसिद्धस्तत्त्वभावस्य बाधकाभावादित्यर्थः स्वमात्मनः स्वत्वविनाशे न भूतत्वाप्रसंगस्मानिष्टत्वं उक्तं ततश्चात्मनः का

तथाहमेवेदानीं जानामि वर्तमानं वस्त्वहमेवातीतमतीतं नरं चाज्ञासिषमहमेवानागतमनागतं च ज्ञास्यामीत्यतीतानागतवर्तमानभावेना
न्यथाभावस्यापि ज्ञातत्वेन ज्ञातुरन्यथाभावोस्ति सर्वदा वर्तमानस्वभावत्वात् तथाप्यसौ भवसपि देहेनानन्तरछेदाच्च वर्तमानस्वभावादन्यस्व
भावत्वेन न संभावयितुं शक्यं एवमनया त्यक्तस्वभावत्वादकार्यत्वमात्मनः कार्यत्वं चाकाशस्यापि तुल्यं समानजातीयमनेकं कारणं द्रव्यं दृष्टं
मात्मा नास्तीति नस्तु सुच्यते न तावत्समानजातीयमेवारभ्यते न भिन्नजातीयमपीति नियमोस्ति न हि तन्तूनां तत्संयोगानां च समानजातीयत्वम
स्ति द्रव्यगुणत्वाभ्युपगमात् न च निमित्तकारणानामपि तुरीवेमादीनां समानजातीयत्वनियमोस्ति। ॥ ॥ १०१

पेक्षानुमानं न्यायाभास इत्याह एवमिति अकार्यात्मनः सिद्धेन तस्याविद्यासहितस्योपादानस्य दृष्टादिनिमित्तस्य च सत्वादाकाशानुत्पत्तिहेतोः साम
ग्रीस्वरूपासिद्धेरुक्तसत्प्रतिपक्षबाधाक्षाकाशस्य कार्यत्वं निरवद्यमित्याह कार्यत्वं चेति आत्माविद्ययोर्विजातीयत्वात् कार्यं भक्तमि

किंकारणमात्रस्य साजात्यनियमः कुतस्समवायिनः तथा चानिरस्तद्वितीयं द्व्यणुकं तेस्यादेतदिति। किंसमवायिना वृत्तेरेकधर्मेण साजात्यं तुल्यत्वा
दित्वाद्यद्व्यणुकत्वादिनिबन्धना दित्वादिना द्व्यणुकारम्भितिवाच्यं पटादेरपि तन्त्वाद्यपेक्षया द्वितीयोपत्तेरिति। आत्माविभुर्मावेत्युत्तेजनमात्मा साजात्य
तत्त्वेति। उपादानस्य साजात्यनियमं निरस्यन्संयुक्तानेकत्वानियमनमद्वितीयस्यासंगस्याप्यालम्बनरूपादानत्वासिद्धमेनिरस्यति नानासाध्येत्यादि। किमारं
भकत्वात्स्यापि नियमः कुत इत्यारंभकस्यनानाद्रव्यत्वाह। अस्थितिविभुणुकस्येतनस्यतावत्समवायिकारणसंयोगजनकत्वात् घटपूर्णपदाद्यपदर्शन वदाम
स्यादेतत्समवायिकारणत्वानियमस्य समानजातीयत्वाभ्युपगमेन कारणान्तरविषयत्वे तदप्यनेकान्तिकं स्व इति संयोगो वा लेशेनेकजातीयेरेकारम्भः
स्यात्समानजातीयेतत्रापि स्वरूपादिनिरुपाधिना केवलान्वितत्वेनैव तदनुपपन्नपरमाणुसमानजातीयत्वेनैकत्वानियमानवस्थाने सर्वस्य वा
समानजातीयैकत्वात् नाप्यनेकमेवारंभकमनेकमिति नियमोऽस्ति परमाणुमनसोरारंभकत्वाभ्युपगमात् एकैकोऽहि परमाणुः मनस्यारंभकत्वमारंभकत्वेन द्व
यणुकं संख्याभ्युपगमनेकमेवारंभकमेवमारंभकत्वनियमइतिचेत् न परिमाणाभ्युपगमात् नियमे दिवानियमोऽपि दृष्टसंयोगस्थित्यं
द्व्यणुकत्वात्तस्यारंभकत्वमभ्युपगम्येन तदेव तु द्व्यणुकविशेषवद्वयस्थामासमानत्वेनकार्यजातानाभ्युपगम्यते तच्च क्वचिदनेकं परिमाणमन्ते द्व्यणुकादि
भावेनकश्चिदेकं परिमाणमन्ते सोऽयं दृष्टव्यादित्वादेनानेकारम्भासनस्यानेकमेयकारणकार्यं जनयतीति श्रुतः श्रुतिप्रामाण्यादेकस्याद्व्यणुकत्वाकाङ्क्षा
दिन्द्रियार्थतोऽस्तीति कुतोऽनेनजगज्जातमित्यतितिरिक्षिमते॥
संयुक्तेऽणुमनसी आद्यकर्मारंभकेतत्समवायिकर्मसमवायिनएकत्वादनेकत्वनियमभंगः परमाणुहस्तचक्रकोही निर्यातन्तवः समवायिमिर्संवर्धः द्वितीयम
त्यादौ रंभकादौनं गौकारेणाद्व्यणुकत्वमेवसादिनानत्वाभ्युपगम्यते तस्मान्नैवनियमइतिदोषः यत्तु सो परमाणुद्व्यणुकत्वं तयोरनेकद्व्यारंभकइतितन्नदीर्घ
ता दोषमानाभावात् तरस्मवदृश्योऽप्यकद्व्यारम्भत्वसमवायिद्व्यणुकस्यानस्यैवत्वेऽपिस्थूलस्वनिरूपणाद्वितुत्वादितिभावः॥

शा.स.भा.
१०२

लोकेकर्तुः सहायदर्शनात् अस्य सहायापेक्षणात् कथं सर्ग इति तत्राह तथा चोक्तमिति आगमभावश्च स्वं हेतुरप्यसिद्ध इत्यसिद्धः इत्यपचोक्तमित्यादिना आकाशस्य
संविशेषः आकाशादिमानाकाशः प्रलये नास्तीत्यसिद्ध इत्यतो नेति श्रुतेः ननु आकाशाभावे काठिन्यं स्यादिति चेत् सुषिरस्थितौ यत्नैः आयिकतनयः न स्याका
शाभावस्तद्धर्मो वा काठिन्यं किंतु मूर्तद्रव्यविशेषः। तत्संयोगविशेषो वा काठिन्यं तच्च प्रलये नास्तीति भावः आकाशशरीरं ब्रह्मेति श्रुतेरप्यो स्यव द्रव्यस्य

तथा चोक्तमनुपसंहारदर्शनान्नेति चेन्न सावधीति। यच्चोक्तमाकाशस्यात्मनैव पूर्वोत्तरकालयोर्विशेषः संभाव्यपि तु अत्यन्ततद्वितल स्पृक्तं यथैव हि वि
शेषणमपृथिव्यादिभ्यो अतिरिच्यमानेन भाः स्वरूपवदित्यत्र भवदीयमते स्पर्शविशेषः आगुरुत्वतेजोसीदिति गम्यते यथा च नभसः स्थूलादिभिः
पृथिव्यादिस्वभावैः स्वभावयुद्धस्तु नन्वनन्तरितस्यादिस्पर्शवत्त्वाभावः एवमाकाशस्यापि अन्येनापि तत्स्वभाववद्व्यावृत्तिमित्यर्थेनैव गम्यते तस्मात् आगुरुत्व
छिद्र २ रत्नाकाशत्वमविशेषपदस्य त्वं पृथिव्यादिवैधर्म्यादाकाशसाधनमिति निमित्तद्रव्यसत्त्वकृतिविशेषे तन्तु समवायसंभवात् अनुमानस्याभासत्वोपपत्तेः शब्दस्य
अनुमानस्य चरितार्थत्वात् अनित्यमाकाशमनित्यगुणाश्रयत्वात् घटादिवदित्यादिप्रयोगसंभवात् आत्मना नैकान्तिकमिति चेत् न तस्योपनिषद १०२

प्रत्यक्षनित्यगुणाश्रयत्वादिति हेतुः॥

भावस्याकाशस्य सतिरग्न्याति कथमभावस्तत्राह यथा चेति विभुत्वादाकाशसमं ब्रह्मेति श्रुतेः सर्वः विभुत्वास्यैव द्रव्यत्वे निरवयवद्रव्यत्वलिंगानां वि
सर्वत्वादिलिंगानां हि तागमबाधमाह यदृशेत्यादिना धर्मिविरकारभावे गुणनाशे नश्यादिति तर्कार्थे मनसि परगुणानुपसमेव हेतुः तेन व्यवस्थामानस्या

कगुणवत्त्वमतो निर्गुणत्वमिति न व्यभिचारः भूतत्वमादिशब्दार्थः॥

स्वरूपासिद्धिमप्याह विभुत्वादीनां चेति सर्वमूर्त्तसंयोगः परिमाणविशेषो वा विभुत्वं निर्गुणात्मनि दृष्टांते नास्ति संयोगस्य सावयववृत्तित्वनियतत्वाज्जलसाध्य
विरुद्धता स्वरूपापेच परूपं तु विभुत्वमात्मा काशयोर्न समं स्यापानाकाशादिति श्रुतेः क्वचिदाकाशसाम्यं तु ब्रह्मणो यल्लिंगं विभुत्वं संबंधेन व्यपदिश्य
तेऽस्य कृत्स्नत्वेनापंचीकरणादस्पर्शत्वमसिद्धं कार्यद्रव्यत्वान्नित्यत्वमप्यसिद्धं मद्व्यत्वजातिप्रत्यासत्त्यसिद्धेः निरवयवत्वेन सामान्येन विशेषि
तं न तु समवायं नं तोपमाकाशः एव मनंत आत्मेति श्रुतिर्निरवयवत्वेनैव साम्यं ब्रूते नेत्याह शतेनेति आकाशस्य कार्यत्वे अनित्यत्वादिलक्षणः श्रुतिस्वापेक्षि
विभुत्वादीनां चाकाशसीलं निर्वादिनेम असिद्धत्वात् तत्पक्षोक्तिनेतत्स्यादिति तत्राह नत्वश्रुतिस्वाद्धिपरस्मृताहि वोकसइति वतदृष्टव्याङ्
त्वत्तिमत्वमयो रूपमादित्वात् आकाशवत्सर्वगतश्च नित्य इत्यपि आविद्धमहत्त्वेनाकाशोपमानं श्रुतिमते निरतिशयमहत्त्वमनाकाशसम
त्वापवर्गेषु रविसदृशः धावतीति सिद्धगतित्वाद्योच्यते न तु तुल्यगतित्वापत्तेः तत्र तेनानेन तत्रोपमानश्रुतिर्गौरव्या तातासापाभाकाशादिसाहित्यु
ति भग्न अबुद्धत्वात् आकाशस्य परिमाणत्वसिद्धिः नत स्पष्टमात्मा नित्य ब्रह्मणो नुपमानं त्वं दृष्टं यस्ततो अप्रतिमिति च ब्रह्मणोऽस्येमा काशा
दीनामात्मत्वं दृश्यमितपरिच्छिन्नत्वश्च दृष्टवत् आकाशस्य जन्मश्रुतेर्गौणत्वमित्येतदाकाशस्य अव्ययत्वमनुमानाभासपरिच्छिन्नत्वं तत्स्मात् ब्रह्मैकार्म
विपदितिसिद्धं॥
कालं सहद एमुरत्वानेऽसंबोधयतीति भावः न्यूनत्वाच्चाकाशस्य नमुखोपमानत्वमित्याह स्मापानितिमुखोपमानासत्त्वे श्रुतिर्नत्स्येति तस्मादाका
शस्योपमानत्वमाचेण नित्यत्वं नास्तीति भावः अनित्यत्वे श्रुतिमाह अतो न्यदिति। ननु एकस्यैव संभूतस्य वस्य गौणत्वमुख्यत्वे चेतित न्यायाका शोपितस्य
मुख्यत्वसंभवे भवादित्याह तपसीति बलवत्तिति श्रुत्यन्तरोपपत्तेरपि नादेकवाक्यतयाब्रूते तदेव ब्रह्मानित्यमन्यदिदमेकवचनं हरतितस्मादिति॥

एतेन मातरिश्वा व्याख्यातः अतिदेशत्वात् नष्टप्रकृतं गगनस्यापि तेजोऽसृजतेति श्रुतेराकाशाद्वायुरिति श्रुत्या विरोधोऽस्ति न वेति एकवाक्यभावा
भावाभ्यां संशये पूर्वोत्तरपक्षरूपं सिद्धांतपक्षान्निर्दिष्टमिति तच्चापीत्यादि न पूर्वोत्तरसंख्याकृत शास्त्रं तर्थितेन सः स्थापितं तद्यथा मुते जसो वायुत्पत्तिवदा तेन तयोर्धाये
रग्निरिति क्रमश्रुतिबाधापत्तेः पूर्वपक्षे तेजः प्रथमत्वं तन्मनः कृताकत्वे इति पूर्वपक्षसिद्धिः गतवादनिरूपणमाह तत्त्वेति अस्तमन्वयतिसेधो मुख्यो सत्त्वसंभ
वे लिंगं वा प्रश्नान्तरत्वं चैनं कृमन्तर्भितितस्त्वेवलिंगस्याभ्यासः श्रुत्युपरि तेष्वपि सम्प्रदे श्रुतिसर्वलिंगत्वालिंगानां तस्माद्विपदार्थः तथा संवर्गविद्यायां वायु
वे तान्सर्वान्नक्षरादिन्सेह रतीति हृदयस्थितिः स्वर्गश्रवणलिंगालं तत्र श्रुत्य एतौ लिंगे गौणप्रकरणात् ततः हतिमतीं नेरु सनिगोणत्वात् तद्विरोधः श्रुत्या दितिश्राम

एतेन मातरिश्वा व्याख्यातः अतिदेशोयं एतेन वियद्व्याख्यानेन मातरिश्वापि वियदाश्रयवायुर्व्याख्यातः तत्राप्येतेषामाक्षेपसमाधाने पक्षाश्च पित
व्याः नवायुरुत्पद्यते छंदोगानामुत्पत्तिप्रकरणे नाम्नातादित्येकः पक्षः अस्ति तु तैत्तिरीयाणामुत्पत्तिप्रकरणेऽस्त्याम्नातमाकाशाद्वायुरिति
आम्नातादित्यपक्षांतरं ततश्च श्रुत्योर्विप्रतिषेधे सति गौणी वायोरुत्पत्तिश्रुतिरसंभवादित्यपरोऽभिप्रायः असंभवश्च सैषानस्तमिता देव
तायद्वायुरित्यस्तमयप्रतिषेधादमृतत्वादिश्रवणाच्च इति हानुषंगो ऽधाघ्राविद्विकारं तु विभागात् उपगमाऽद्रुत्पद्यते वायुरिति सिद्धांतः अस्तमय
प्रतिषेधः अपरविद्याविषयः आपेक्षिकः अग्न्यादीनामिव वायोरस्तमयाभावात् कृत अतिविधानं चामृतत्वादिश्रवणं॥ १०३

प्रतिपिपादयिषितमतिज्ञा श्रुतेर्वलीयस्त्वात् तल्लाघवपदार्थतत्वात् ज्ञानस्याप्युक्तिविभक्तत्वादिलिंगानुग्रहाच्च मुख्यैव वायोरुत्पत्तिस्त
था चाकाशे वायुश्च हन्तहं तेजोऽसृजतेति श्रुत्योरेकवाक्यता तथा श्रुत्लिङ्गसमन्वयः लिंगानि तु कास्यतामुक्तावकलादयेश्विक न पाक्यारख्येमानीति मुख्यसिद्धि
तमत्तमाहुश्च तिहेसादिनो फ तंम्रतिविधानं आपेक्षिकत्वेन समाधानेम स्तनतया॥

कारणात्वलिंगस्यासामान्यतो न वस्थातर्केणापि बाधुमाह न च विकारेभ्य इत्यादिना कारणस्यानभ्युपगमेऽपि दृष्टावादप्रसंगः अनादिकार
णानभ्युपगमेन वस्तु अप्रसंगात् तदभ्युपगमेऽप्यहत्ववादप्रसंगः कारणानन्तरस्य प्रधानादेर्निराकृतादिति भावः तेजोऽतस्तथा ह्याह तेजोऽतः जनयामो
रग्निरिति च श्रुतेर्विरोधोऽस्ति न वेति संदेहे सामान्यासामान्यतोत्सहं सर्वेऽपि ब्रह्मणोऽत्पत्तेः एतस्मान्मोस्ति जो रूपादिविशेषोपादानत्वसंभवात्तु त्वव
लनवाप्तिविरोधः इति प्रसक्तसंहरणे न पूर्वपक्षः सर्वत्रास्याप्समासेरेकवाक्यतासंभवसंभवौ संदेहमवीजे दर्शयन्ने श्रुतीनां विरोधा स्मामास्प

न च विकारेभ्यो विकारान्तरोत्पत्तिर्दृष्टा नान्त्रह्मणोऽपि विकारत्वं भवितुमर्हतीति मर्त्त्वप्रकृतस्यानभ्युपगमेऽनवस्थाप्रसंगात् घाम्नलप्रकृ
तिरभ्युपगम्यते तदेवतो ब्रह्मत्वाविरोधः तेजोऽतस्तथा ह्याह छांदोग्ये सन्मूलत्वं तेजसः श्रावितं तैत्तिरीयके तु अमूलत्वं न च तेजोयोनि
प्रति ॰ श्रुतिविप्रतिपत्तौ सत्यां शास्त्रतावत् अहत्वयोनितेजः इति कृतः सर्वेषु रूपक्रमत तेजो स्रजते रूपदेशात् सर्वविज्ञानप्रतिज्ञायाश्च
ब्रह्मप्रभवत्वे सर्वस्य संभवात् तज्जलानिति चाविशेषश्रुतेः एतस्माज्जायते प्राण इति चोपक्रम्य श्रुतं तेरसर्वस्याविशेषेणब्रह्मजत्वोप
देशात् तैत्तिरीयके च स तपस्तप्त्वा इदं सर्वमसृजत यदिदं किंचेत्यविशेषश्रवणात् तस्माद्वायोरग्निरिति क्रमोपदेशेऽप्युभयोः वायोरनंतर
मग्निः संभूत इति॥

फले सिद्धांते सामान्यमित्युक्तं न विस्मर्तव्यं एवं पूर्वपक्षे कार्यमात्रस्याविद्यत्तेऽत्यात्कल्पितस्य वायोस्तेजः कल्पनाधिष्ठानत्वायोगात् ब्रह्मैव तेजु
जसनुपादानं सर्वकार्याणां ब्रह्मैवोपादानमित्यर्थे श्रुतीनामभूतत्वात्स्यात् तद्वस्तुविरोधात् वायोरिति क्रमार्था पंचमी तत्र विरोधः इत्येकदेशिसिद्धान्तमुपपादय
मानस्तावत् अत एवान्तिमे जुरस्यादिना श्रुतीनाविरोधमाशंक्य पत्र्यसे पूर्वपक्षः अपसिद्धान्तेनाविरोधान्तवदेकदेशिपक्ष इति सेयं तदुभयपक्षमपि मुख्य

ब्रा.सू.भा सिद्धांतयन्निएवं प्राप्त इति कदर्थितत्वाद्यभिधितार्थेनिपावतत्वापोत्तेजः प्रकृतित्वं पंचमी श्रुत्या निर्धारितं न च प्रकल्पितस्योपादानत्वासंभवः अधिष्ठान
त्वासंभवेपि मृदादिवत्परिणामित्वसंभवात्तत्त्वस्य अग्नेः छांदोग्ये तद्विषयमात्रं श्रुतं नोपादानत्वं न च बहु स्यामिति कामीनेदेशात् लिंगादुपादानत्व
१०५ सिद्धिः लिंगात् श्रुतेर्बलीयस्त्वेन श्रुत्यविरोधेन लिंगस्य नेयत्वात् न्ययनं चेत्स्वं वायोर्ध्यानं नमत्वात्तादृशजस्यापि तेजसो ब्रह्मप्रकृतिकत्वमविरुद्धमि
सिद्धिः लिंगात् श्रुतेर्बलीयस्त्वेन श्रुत्यविरोधेन लिंगस्य नेयत्वात्

एवं प्राप्ते उच्यते तेजो मातरिश्वनो जायत इति कस्मात् तथा ह्याह वायोरग्निरिति स्वमव्यहिते हि तेजसो ब्रह्मजत्वे सत्यसति वायुजत्वे वायो
रग्निरितीयं श्रुतिः कदर्थिता स्यात् ननु क्रमार्थैषा भविष्यतीत्यस्य क्रमेनेति क्रमः तस्माद्वा एतस्मादात्मन आकाशः संभूत इति पुरस्तात्संभव
स्यापादानस्यात्मनः पंचमीनिर्देशात् तस्यैव संभवतेरिहाप्यधिकारात्तत्परस्तादपि तदधिकारे पठितस्य अपधयः इत्यपादानपंचमीदर्शनात्
वायोरग्निरित्यपादानपंचम्येवैषेति गम्यते अपि च यदा वायोरूर्ध्वमग्निः संभूत इति कल्प्येत उपपदार्थयोगः कृतस्तु कारकार्थयोगः वायोरग्निः १०५
संभूत इति तस्मादेषा श्रुतिर्वायुयोनित्वं तेजसोऽवगमयति तन्वितरापि श्रुतिर्ब्रह्मयोनित्वं तेजसोऽवगमयेत् तत्तेजोऽसृजतेति नैतत्सारं पारंपर्य
जत्वेप्यविरोधात्

नि विरुद्धं तत्पूर्वपक्षमः इहाधिकारादिति वायोरग्निः संभूत इति वाक्ये संबंधादिलक्षणः तदधिकारे संभवत्यधिकारेनिरपेक्षकारकविभक्तेरुपपद
सापेक्षविभक्त्यपेक्षया प्राबल्यात् अनंतरमार्थां पंचमी साह अपि चेति ऊर्ध्वमनंतरमिति चोपपदं विना पंचमीमात्रात्क्रमो न भातीति कल्प्य उपपदा
र्थयोगः प्रकृत्सात् उपादानकारके तु निरपेक्षपंचम्याभिहितविरोधात्तो अप्रकरणादपादानार्थत्वं पंचम्याः क्रमं कृमेनचकल्प्यमस्तीति विरोधेनास्वमिति

अधिकरणारंभमाक्षिप्योक्तमधिकारं कामा छन्दिन्दित्यादिनापसुद्धेर्वैतान्सर्वान्संकल्पेदित्यादिनाध्युपचं चं कामत्वं नार्थ इति द्योतनार्थमात्र
पदं तामेवश्रीकामाह संवर्गेति अधिसमस्तुपास्तिर्वाप्युं दिशांकल्पनेदेशोपास्ति श्यादि ज्ञास्यार्थः असंभवस्तु तत्तोऽनुपपत्तेः अनाघनं तं महतः

ननु वायोराकाशस्य चतुष्पोरुत्तमज्ञिमक्तरोऽस्य वाणाश्चवणयोरेकमेवाधिकरणमस्तु भयविषममस्तु किमतिदेशेनास्ति विशेष इति चेन्
ते समसमेव मतज्ञ्याविंशं दधियोंशाश्च मा चकृता शंकानिवृत्त्यर्थमतिदेशः किं मते संवर्गविद्यादिषूपास्य तया वायोर्महाभागत्वश्रवणा
त् श्रेत्वमप्रतिषेधादिभ्यश्चभवतिनित्यत्वार्थं काकस्याचिदिति असंभवस्तु तत्तोऽनुपपत्तेः विषमवतयोरसंभावमानन्तनोऽस्मिन्नुपत्ति
सुपश्रुत महत्तोऽपि भवेत् कुतश्चिदुत्पत्तिरिति स्यात् कस्यचिन्मतिः

परं ध्रुवं तत्सास्यफ क्षियन्तिते लादिश्रहणानादित्वश्रुतीनां तं जातो भवति विश्वतो मुख इत्युत्पत्तिश्रुसाविरोधो लिङ्गं वदे लेक बाधाभावा भ्या बाधां
संदेहे श्रुतिविरोध इति पूर्वपक्षे यथा वाय्वादेरनन्तत्वादिकमुक्तं श्रुतिबलादापेक्षिकं तथा ब्रह्मानादित्वमापेक्षिकमिति दृष्टान्तसंगत्याप्रकृ
देशोपकर्षं न्यपपत्तिर्विपदिति॥

ब्र·सू·भा·२ अप्यकृतश्चिद्यापतेकारणत्वाद्याकाशवदिति अनुमानानुग्रहस्त्वन्यश्रुतिर्विलीयहीसाहतमेतिनचानादिकारणभावेनानवस्थाबीजांकु
१०४ रवदनादित्वोपपत्तेः तथाचदीपादीपवदुत्पत्तिरप्युत्पत्त्यन्तरेस्यातिरुत्पत्तिश्रुत्याचानादित्वश्रुतिर्नेयेत्यनाद्यनंतब्रह्मसमन्वयासिद्धिरितिप्राप्ते
मुख्यसिद्धांतमाहतामितिअसत्तनजायतेकारणस्यस्वान्तरविशेषणवत्त्वातिरेकेणघटवदिसनुमानानुग्रहाद्धिपक्षेचाकारणकार्यवाद

तथाविकारेभ्यएवाकाशादिभ्यइतरेषांविकाराणामुत्पत्तिरुपपद्यते स्वाकारस्यापिविकारादेवब्रह्मणउत्पत्तिरितिकश्चिन्मन्येततामाशंक्याम
पत्तेतुमिदंसूत्रमसंभवस्त्विति न तु खलु ब्रह्मणः सदात्मकस्यकुतश्चिदन्यतः संभवउत्पत्तिराशंकितव्याकस्मात् अनुपपत्तेः सन्मात्रंहि
ब्रह्मनतस्यसन्मात्रादेवोत्पत्तिः संभवत्यसत्यतिशये प्रकृतिविकारभावानुपपत्तेः नापिसद्विशेषात् दृष्टविपर्ययात् सामान्याद्धिविशेषाउत्पद्य
मानाद्दृश्यंतेमृदादेर्घटादयोनतुविशेषेभ्यः सामान्यंनापिअसतोनिरात्मकत्वात् कथमसतःसज्जायेतेतिचाक्षेपश्रवणात् सकारणंकरणा
धिपाधिपोनचास्यकश्चिज्जनिता नचाधिपइतिचब्रह्मणोजनयितारं वारयति विमतवनमयोः पुनरुत्पत्तिः प्रदर्शितानतुब्रह्मणः सत्तेति
वैषम्यं॥

प्रसंगाद्धूलानादित्वश्रुतयोबलीयस्य इतिकारणत्वलिंगबाधाज्जन्मश्रुतिः कार्यभेदेनव्याख्येयेसत्यनाद्यनंतब्रह्मसमन्वयसिद्धिरितिसि १०४
द्धांतफलंनचहेत्वसिद्धिः कारणस्यानिरूपणात्तथाहिकिंसन्मात्रस्यब्रह्मणः सन्मात्रमेवसामान्यंकारणंसद्विशेषोवाअसद्वानेत्युपाधीसा
हसन्मात्रंहिसादित्वादीपत्वदीपांतरेनिमित्तमित्यनुदाहरणंविपत्वदनयोर्ब्रह्मणश्चविभक्तत्वाविभक्तत्वाभ्यांकारणभावाभावाभ्यांचवैषम्यं॥

न्नारंभपर्यंतस्तमेवाह । यदापीतितस्यायेनोऽम्ल तंतत्पं क्षीरं स्याक्षाल्का र्मंदध्यादिकं तु पारं पर्यंतमित्यर्थः दधिसंस्पृष्टं कुठिलक्षीरमामिक्षा ब्रह्मणो वा मुभावेमानमाह दर्शयतिचेति पारंपर्यंजस्यापितज्जलत्वमपदेनोऽस्यतिमाह तथा चेति श्यंतः करणाद्धिभोजामनानवुध्यारी ताम्रत्त एवेस्वदथा

यदापि त्वाकाशं वायुं च सूक्ष्मवायुभावापन्नं ब्रह्म तेजो सृजतेति कल्प्यते तदापि ब्रह्मजत्वं तेजसो न विरुध्यते यथा तस्याः श्यंतं तस्या दधितस्याश्च श्वामिक्षेत्यादि दर्शयति च ब्रह्मणो विकारात्मनावस्थानं तदात्मानं स्वयमकुरुतेति तथा चेश्वरस्मरणं भवति बुद्धिर्ज्ञानमसंमोहइत्यावतुक्रम्य भवंति भावा भूतानां मत्त एव पृथग्विधा इति यद्यपि बुध्यादयः स्वकारणेभ्यः प्रत्यक्षं भवंतो दृश्यंते तथापि सर्वस्य भावजातस्य साक्षात्परंपरया वा ईश्वरवंशत्वं तु व्यते नाक्रमवत्सृष्टिवादिन्यः श्रुतयो व्याख्याताः तासां सर्वोपपत्तेः क्रमवत्सृष्टिवादिनीनां स्वस्थानुपपत्तेः श्रुतिरपि सर्वं हृप्यत्वमात्मन एवेमत्तेनाव्यवहितजन्यत्वमित्यविरोधः॥

रणं कृष्णमित्यासंकाह यद्यपीत्यादिना अनाद्या परंपरया ईश्वरवंशपत्वात् तज्जत्वात्सरम्भकारणांतरनिरासार्थं अवधारणं युक्तमिति शेषः एतसदार्थमाह तासामिति तज्जलानित्याद्युक्तश्रुतीनां साक्षात्मनीयावा ब्रह्मजत्वमात्रेणोपपत्तेरित्यर्थः अक्रमश्रुतीनां बलवत्क्रमश्रुत्यनुसारेणैकवाक्यता द्धिवदत्रपुष्कलतेजःकारणे ब्रह्मणि समन्वय इति सिद्धं॥

श्रा·सू·भा· आपः अतिदेशोऽयं तथास्याप्रवीणो मुंडकश्रुत्यां येतस्माज्जायते प्राणो मनः सर्वेंद्रियाणि च खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणीति मंत्रे
१०६ अपां ब्रह्मजत्वं श्रुतं अग्नेराप इति श्रुत्यां तस्य विरोधोऽस्ति न वेति संदेहे तुल्यत्वादस्ति विरोध इति प्राप्ते यद्यपि सेश्वपामभिदा स्वसेन विरोधादग्निजत्वा
संभवात् क्रमार्था पंचमीस विरोध इत्यधिकारशंकामपाकृत्य तेजोमाममनति दिरूपमाचष्टे अत इति मसक्ष विरोधे धके पममपामग्निजत्वनिरूपस्त
माह सतिवचन इति त्रिवृत्कृतयोरप्तेजसोर्विरोधेऽग्नेराप इति वचनादत्रीद्रिमपोस्तपोनोस्ति विरोध इति निर्णीयत इत्यर्थः न केवलं श्रुत्या वि

आपः॥ ॥अतस्तथाह्याहेत्यनुवर्त्तते आपो ततस्तेजसो जायंते कस्मात्तथाह्याह तदपोऽसृजतेति अग्नेराप इति च सति वचने नास्ति सं
शयः तेजसस्तु सृष्टिं व्याख्यायापृथिव्या व्याख्यास्यन्नापोंऽतरिपानिता इति स्वापांसंभव॥ ॥पृथिव्यधिकाररूपशब्दांतरेभ्यः॥ [illegible]
॥ता आप ऐक्षंत बह्व्यः स्याम प्रजायेमहीति ता अन्नमसृजंतेति श्रूयते तत्र संशयः किमनेनान्नशब्देन व्रीहियवाद्यभ्यवहार्यं वोद्
नाद्युच्यते किं वा पृथिवीति तत्र प्राप्तं तावत् व्रीहियवाद्योदनादिवा परिगृहीतव्यमिति तत्र ह्यन्नशब्दः प्रसिद्धो लोके वाक्यशेषोप्येतमर्थमुप
द्बलयति तस्माद्यत्र क्व च वर्षति

रोधस्तातापामतिदेशः किंतु पंचभूतोत्पत्तिक्रमनिर्णयार्थश्चेत्याह तेजस्त्विति तस्मात्तेजो भा वापत्तेज्वलति श्रुति समन्वय इति सिद्धं पृथि
व्यधिकाररूपशब्दांतरेभ्यः विषयमनुक्त्वान्नशब्द महाभूतप्रकरणं संशयमाह तादृशि इति अभ्यवहार्यं भक्ष्य ब्रह्मश्रुतौ पद्यन्नो दनादिकं तदन्न १०६
त्वः पृथिवीति श्रुत्या विरोधः यदि पृथिवी तदा न विरोध इति फलं वोध्यं अयं पृथिव्योः कार्यकारणभावादधिकरणसंगतिः अन्नश्रुति बधिम

तदेव तत्रैवेति श्रुत्यर्थः। तथा च क्वचिदन्नं क्वचिदप्यः पृथिवी ततो भूमिमिति हिरण्ये धान्ये कृता सतेति प्राप्ते लिङ्गं तत्पति एवं प्राप्त इति अधिकारः
मकुरत्नं रूपं लिङ्गं वचः शीरं तद्वसां दुरंश्चेतं अङ्गारवद्रोहितं तर्कं यान्तं तरकाहितं स्यानेन्ना चष्टे श्रुत्यन्तरमपीति अवान्तर्यं पृथिव्याः स्यानं श्रु

तदेवमपि स्थितमन्नं भवतीति व्रीहियवाद्येव हि सति वर्षे तेषु बहु भवति न पृथिवीति एवं प्राप्ते ब्रूमः पृथिव्येवेयमन्नशब्देनाभिधीयमानानि
वक्ष्यन्त इति कस्मात् अधिकारात् तद्रूपात् शब्दान्तराच्च अधिकारस्तावत् तत्तेजोऽसृजत तदपोऽसृजतेति च महाभूतविषयो वर्तते न तत्र क्रमप्राप्तां
पृथिवीं महाभूतं विलङ्घ्य अनाकस्मात् व्रीह्यादिपरिग्रहो न्याय्यस्तथा रूपमपि वाक्यशेषे पृथिव्यनुगुणं दृश्यते यत् कृष्णं तदन्नस्येति न ह्योदना
देरभ्यवहार्यस्य कृष्णत्वनियमोऽस्ति नापि व्रीह्यादीनां ननु पृथिव्या अपि नैव कृष्णत्वनियमोऽस्ति पयःपाण्डुरस्याङ्गाररोहितस्य च क्षेत्रस्य दर्श
नात् नायं दोषो बाहुल्यापेक्षत्वात् भूयिष्ठं हि पृथिव्याः कृष्णं रूपं न तथा श्वेतरोहिते पौराणिका अपि पृथिवीच्छायां शार्वरीमुपदिशन्ति सा च कृ
ष्णाभासेत्यतः कृष्णं रूपं पृथिव्या इति श्लिष्यते श्रुत्यन्तरमपि समानाधिकारमद्भ्यः पृथिवीति भवति तद्यदपां शर आसीत् तत्समह
न्यत सा पृथिव्यभवदिति च
त्वं तल्लिङ्गं तेनाप्पन्नस्य पृथिवीत्वमित्यर्थः। तत्र तस्य सृष्टिकाले यदपां शरः सो मण्डवद्दृढीभाव आसीत्स एव समहन्यत कठिनः संघातो भूत्वा अ
पां कठिनपरिणतिः पृथिव्यभवदिति श्रुत्यर्थः॥

न्या· सू· भा·
१०२

श्रीत्वाद्यनन्तसर्गः कस्मिन्नस्थानइतिविवक्षायामाह पृथिव्या इत्यादि पंचमीपंचषष्ठिनवत्वलिंगसहितानन्त्यकृतेः कथंसमकरणलिंगस्थानेवीध
इत्याशंक्याह वायुविशेषोपीतिसवलदुर्बलसमानाणसन्निपाते बहूनां दुर्बलानामसत्तवाधादूरस्यबलसमानानामल्पवाधेन कथंचित्तपत्रतिष्ठेत्
येनकृतिलिंगयोरन्यमात्रनिष्ठत्वं वाधितान्नाबलत्वकपृथिवीनिष्ठत्वं नीयते ताभ्यामन्यमात्रयुहेसकरणादीनां पृथिवीमात्रविषयाणामसत्वं
तवाधापत्तेरितिभावः अभस्मप्रतिजलोक्ति हूरणपृथिव्यास्वएजन्मत्वस्य नते पृथिव्यआपृथिवीत्वादन्यवृद्दिसनुमानादित्यस्तरणर्थः एवंतिति

पृथिव्यास्तु शरीरादेरुत्पत्तिं दर्शयति पृथिव्या ओषधयः ओषधीभ्योन्नमिति चएवमधिकाराद्भिपृथिव्याः प्रतिपादके श्रुत्यस्तु कुतोव्री
त्यादिप्रतिपत्तिः प्रसिद्धिरप्यधिकारादिभिरेव वाध्यते यास्तरोषोपि पार्थिवत्वादन्नावस्पतद्वारेण पृथिव्याएवामघः प्रभवंस्तच पतीति
दृष्टव्यंतस्मात्पृथिवीपरमन्नशब्देति तदभिध्यानादेवतुतल्लिंगात्सः किमिमानिविमदादीनि भूतानि स्वयमेव स्वविकारान्सृजंत्याहो
स्वित्परमेश्वर एवतेनतेनात्मनावतिष्ठमानो भिध्यायंस्तंतं विकारंसृजतीति संदेहे सति प्रा संताववत्स्वयमेव सृजंतीति कुतः आकाशाद्वायु
र्वायोरग्निरित्यादिस्वातंत्र्यश्रवणादिति॥

रिक्त्यनुसारेण छंदोगश्रुतेर्नयतादविरुद्धो भूतसृष्टिश्रुतीनां ब्रह्मणि समन्वयप्रवृत्तिसिद्धं संप्रतितानि भूतान्याश्रित्य साधारणा श्रुतिभावसं
गत्या तेषांस्वातंत्र्यमाशंक्य प्रतिषेधति॥ ॥तदभिध्यानादेवतुतल्लिंगात्सः उक्तभूतान्याश्रित्य संशयपूर्वपक्षौ दर्शयति॥ किमिमानीत्यादिना सं १०२

नन्वत्र भूतानां किं स्यात्तेषां गौणोपादानत्वमात्रं क्वचित्कर्तृत्वं वा नाद्यः रचनानुपपत्तेरित्यादिन्यायविरोधादिति शंकते नन्विति न द्वितीयः अचे-
तनत्वादिति भावः पृथ्व्यामनुष्यादिशरीरेषु तद्देहाभिमानिनो जीवा एवात्रापि तेषां क्वाप्यदृष्टत्वादित्यत आह श्रुताविति आकाशादिशब्दैस्तत्तद्भूताभिमानिदे-
वता उच्यन्ते तेषां स्वस्वकार्ये वाय्वादौ कर्तृत्वं भवत्यन्निरपेक्षनिमित्तत्वं चेत्युभयमर्थः एवं तदात्मानं स्वयमकुरुतेति श्रुतौ स्वपक्षमिति विरोधपरिहारात् ब्रह्म-
णोऽन्यानपेक्षं सर्वकर्तृत्वं श्रुतं तथा च मिथो निरपेक्षेश्वरभूतकर्तृत्वश्रुत्योर्विरोधान्न ब्रह्मणि समन्वय इति सकलं पूर्वपक्षं समाधत्ते नैष दोष इति
भूतानां तदभिमानिदेवतानामित्यर्थः यथाकाशादिभावापन्नब्रह्मणः सर्वोपादानत्वं तथा तदभिमानिदेवताजीवभावमापन्नब्रह्मणः

नन्वचेतनानामस्वतंत्राणां प्रवृत्तिः प्रतिषिद्धा नैष दोषः तत्तेज ऐक्षत ता आप ऐक्षन्तेति च भूतानामपि चेतनत्वश्रवणादिति एवं प्राप्तेऽभि-
धीयते स एव परमेश्वरः तेन तेनात्मनावतिष्ठमानोऽभिध्यायंस्तं तं विकारं सृजतीति कुतः तल्लिंगात् तथा हि श्रूयते यः पृथिव्यां तिष्ठन्यः
पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयतीत्येवंजातीयकस्याध्यक्षस्य भूतानां प्रवृत्तिं दर्शयति॥ ॥

कर्तृत्वमिति परंपरया ईश्वरकर्तृत्वश्रुत्यविरोधः स्वपक्षमिति विशेषणं ईश्वरान्तरनिरासार्थं न जीवभावापेक्षानिराकरणार्थमित्येकदेशिसिद्धान्त
ऊहनीयः सर्वाभिरूढं तमाह एवं प्राप्त इति आकाशादिशब्दैर्न देवतालक्षणा मुख्यार्थबाधकाभावात् लक्षणयाचमाख्य प्रकृतित्वमर्थः तत्र हेतुरुत्तरत्वात
प्याद्याचेतनानां कर्तृत्वमेव नास्ति कुतः ईश्वरानपेक्षकर्तृत्वम् अपि देवतानां कर्तृत्वं संभवति तथापीश्वरनियम्यत्वश्रवणाच्चेतनानामपि
तस्यैतत्प्रशासने हि तु नचेतनानां भूतानां तस्यान्तर्यामित्वमित्यनेनोक्तं तल्लिंगादिति तत्तदचेतनात्मनावस्थितस्य ब्रह्मण उपादानत्वेऽपि जीवभावे
नेश्वरस्याकारे सौव सर्वकर्तृत्वं न जीवत्वद्वारेण सर्वनियन्तृत्वलिंगादित्यर्थः॥

ब्र॰ सू॰ भा॰ प्रकरणाच्च सामर्थ्यात् सर्वकर्तृत्वमिति सा हि तच्छ्रुतिः पूर्वोक्ता मन्त्रव्यतिरस्य तिपादितिपरमेश्वरस्यांतर्यामिभावेनात्मेभ्यः संबंधः तद्दृष्टान्तेनेष्टौ सत्त्वाश्च व
१०८ र्णितेनावृतानेषां चेतनत्वं स्यात् अप्येतेष्वर्थः अतः तदभिध्यानादिलिंगं दृष्ट्वा तद्द्रूपेण तत्स्वरूपोऽजनात् सदृश्यहेतुत्वाद् आत्मना स्थितो विमृश्य देवतावकृत्वेन
सांतर्यामित्वलिंगात् जीववत् ब्रह्मण एव तत्तत्संज्ञा मजीवत्वे वकर्तृत्वमित्यंतर्यामित्वात् कर्तृत्वासिद्धेः तर्यामित्वयोगात् तदभिध्यानादीश्वरस्य लिंगादेव भूतेषु
श्रुतेस्सर्गोपपत्तेश्चेति तत्तेजस्सृजत इति श्रुत इत्यत्रापि परमात्मैवेत्यत्र श्रुतं तत्प्रकरणं चाहत्यात्मस्मृतिः तस्मादीश्वरपदार्थलोपप्रसंगेनेश्वरादस्य

तथा सोऽकामयत बहु स्यां प्रजायेयेति प्रस्तुत्य सच्च त्यच्चाभवत् तदात्मानं स्वयमकुरुतेति च तस्यैव सर्वात्मभावं दर्शयति। यत्तु सलिलस्थाणाम
स्तेजसोऽसृजत परमेश्वर एवेश्वरशब्दवदृश्यं नान्योऽतोऽस्ति द्रष्टेतीश्वरं तत्प्रतिषेधात् प्रकृतत्वाच्च सतः ईक्षितुः तदैक्षत बहु स्यां प्रजायेयेत्यत्र
८ ॥विपर्ययेण तु क्रमोऽत उपपद्यते च॥ भूतानामुत्पत्तिक्रमश्चिंतितोऽथेदानीमप्ययक्रमश्चिंत्यते किमनियतेन क्रमेणाप्यय उतोत्पत्तिक्रमे १०८ [illegible]
णाथवा तद्विपरीतेनेति॥

स्यातंत्र्याभावान्नेश्वरकर्तृत्वश्रुतेरेतत्सूत्राविरोध इति सिद्धं विपर्ययेण तु प्रत्यप्यत्र श्रुतिविरोधेन परिहृतस्य च संगतिस्तथाप्युत्पत्तिक्रमेण ह्यपि
तेलयक्रमो बुद्धिस्थो विचार्यत इति मत्वा संगतिः कार्यो वा दात्तो तस्य गतौ स्मृति मत्वाह भूतानामित्यत्रोत्पत्तिक्रमात् विपरीतक्रमनियमोऽस्ति हो तेभूता
नामाप्ततिलो प्येन लय ध्यान प्रवर्तकस्य क्रमसर्गभावात् मनः समाधानं फलं पूर्वपक्षे तु कारणता वधीत्य निकार्मना इति सर्वलयाधारब्रह्मासिद्धेरुक्तसमा

सति महाभूतानां लयेन क्रमश्चिंत्यत एव नास्तीति केचित्तान्प्रत्याह त्रयोपीति अनियमनदुःसाध्यमोक्तं श्रौतस्य लयस्य क्रमाक्रांत स्वाधीनाश्रौतत्वात्त्रि
क्रम एव ग्राह्यः श्रौतत्वेनांतरंगत्वादित्येव पूर्वपक्षः सतिकारणे कार्यमंतर्भवतीति लोके दृश्यते तथा च श्रौतोप्युत्पत्तिक्रमो लयेन गृह्यते किं तु लौकिक
क्रम एव गृह्यते श्रुतेर्लौकिकदृष्टपदार्थबोधाधीनत्वेन श्रौतादपि लौकिकस्यांतरंगत्वाद्यौगपद्यात्कारणमेव हि कार्यं स्वस्वरूपमितिति तदनन्मत्व

त्रयोपीचोत्पत्तिस्थितिलया भूतानां ब्रह्माधीनाः श्रूयंते यतो वा इमानि भूतानि जायंते येन जातानि जीवंति यत्प्रयंत्यभिसंविशंतीति तस्मा
नियमो विशेषादिति मानं अथवोत्पत्तेः क्रमस्य श्रुतत्वात् लयस्यापि क्रमाकांक्षित्वात् स एव क्रमः स्यादिति एवं प्राप्ते ततो ब्रूमः विपर्ययेण
तु लयक्रमोतउत्पत्तिक्रमादुद्भवितुमर्हति॥ तथा हि लोके दृश्यते येन क्रमेण सोपानमारूढस्ततो विपरीतक्रमेणावरोहतीति अपि च दृश्यते मृ
दो जातं घटशरावादयः पदकालेन द्रवत्वमप्येतदप्सु जातं हिमकरकाद्यावमप्येतीति अतश्चोत्पद्यते एतत्तस्मात् पृथिव्यभ्यो जातासती स्थिति
कालव्यतिक्रांतावप्येपीताद्यप्स्वेते जगत्सेजाताः तत्स्वलत्ते जन्यपीपुः एवं क्रमेणाप्तु स्वं तेजस्तत्तं वायौ नंतरमनंतरं कारणमपीतं स्वस्वकार्यजातं
परमकारणं परमसूक्ष्मं च ब्रह्माप्येतीति वेदितव्यं॥

न्यायेन लब्धापि तं न हि स्वरूपनाशे कार्यस्य स्वकारणमपि विल्लितिमुक्ता तस्माद्यौगपद्यस्यतिक्रमो लयस्य न ग्राह्यो लौकिकक्रमावरोधेन निराकांक्षत्वादिति
सिद्धांतयति ततो ब्रूम इत्यादिना॥

ब्र.सू.भा. क्रमेण परंपरया सर्वकार्यस्वपाधारत्वं ब्रह्मणः किमित्याश्रीयते साक्षादेव तत्किं न स्यादित्यत आह नहि स्वकारणव्यतिक्रमेणेति घटनाशे मृद
१०८ नुपलब्धिप्रसंगादित्यर्थः वायुश्चलीयते ऽम्भोभिस्तच्चाप्यग्नौ प्रलीयत इति स्मृतिशेषः आदिपदार्थः योग्यताधीनः संबंध इति स्वाधारयोग्यक
मवाध इति सिद्धं अंतराविशेषात् उक्तक्रमतो लयोत्पत्तिलयक्रमेणानुपजीव्यमर्कं किं कारणोत्पत्तिक्रमेण विरुध्यते नवेति करणानाम भौतिकत्वभौतिक

नहि स्वकारणव्यतिक्रमेण कार्याणां कारणेऽप्ययो सम्भवः स्मृतावप्युत्पत्तिक्रमविपर्ययेणैवाप्ययक्रमस्तत्र तत्र दर्शितो जगत्प्रतिष्ठा
देवर्षे पृथिव्यप्सु प्रलीयते ज्योतिष्यापः प्रलीयन्ते ज्योतिर्वायौ प्रलीयते इत्येवमादौ उत्पत्तिक्रमस्तु तावदेव श्रुतत्वात् नाप्यये भवितुमर्हति
न चासावप्ययेऽयुक्तत्वादप्यये नाकांक्ष्यते नहि कार्ये ध्रियमाणे कारणस्याप्ययो युक्तः कारणाप्यये कार्यस्यावस्थानानुपपत्तेः कार्याप्यये तु कार
णस्यावस्थानं युक्तं मृदादिष्वेवं दृष्टत्वात् अंतरा विज्ञानमनसी क्रमेण तल्लिंगादिति चेन्नाविशेषात् भूतानामुत्पत्तिप्रलयावनुलोमप्रति
लोमक्रमाभ्यां भवत इत्युक्तमात्मादिरुत्पत्तिः प्रलयश्चात्मांतरमित्युक्तं सेंद्रियस्य तु मनसो बुद्धेश्च सद्भावः प्रसिद्धः श्रुतिस्मृत्योः बुद्धिं तु सारथिं
विद्धि मनः प्रग्रहमेव च इंद्रियाणि हयानाहुरित्यादिलिंगेभ्यः॥ १०९

ताभ्यां संदेहे व्युत्तानुवादपूर्वकं पूर्वपक्षमाह भूतानामित्यादिना करणान्येव न संतीति यदुक्तं तत्राह सेंद्रियस्येति मनसस्तु परा बुद्धिर्यो बुद्धेः परत
स्तु सः श्रोत्रादीनींद्रियाण्यन्य इति स्मृतिरुक्तिः अप्यन्यपराः श्रुत्यालिंगानीत्युच्यते॥

करणानां क्रमाकांक्षामाह तत्पोरिति आकांक्षायां श्रुतिसिद्धः क्रमो याम्यइत्याह अपि चेति विज्ञानमनेन्द्रियेतेनेति विज्ञानं तसें द्रियाबुद्धिः आत्मनो भूतानां
चांतरा मध्ये तल्लिंगात्सृष्टिबोधकादेतस्माज्जायते प्राणो मन इत्यादिरूपाद्धि ज्ञानमनसी श्रुतक्रमो तेनेत्याद्य करणक्रमेण पूर्वोक्तक्रमभंग इति चेत् कास्त
व्यर्थः न च करणानां भौतिकत्वाद्भूतानां तत्पातिरिति वाच्यं तेषां भौतिकत्वे मानाभावात् तथा चात्मनः प्राणमनसोः कार्यात्मस्य जन्म पश्चाद्भूतोरित्यक क्रमस्या
त्मनः करणानि ततो भूतानीति क्रमे प्राप्ते धइति तित्तिर्यपर्वश्रुत्यो विरोधात् ब्रह्मणि समन्वय इति पूर्वपक्षफलं सिद्धान्तयतिनेति आत्मन आकाश
इत्यादि तित्तिरिश्रुतौ पंचम्याः कार्यकारणभावे तात्पर्यतः क्रमो भातिना तस्या पर्वणा पाठेन बाधः अर्थक्रमविरोधिक्रमविशेषस्य श्रुतेः पाठक्रमस्या

तयोरपि कल्पितयोर्द्वयं तराले क्रमेणोत्पत्तिमल्लिंगाद्युपसंग्राहको तद्वस्तुजातस्य ब्रह्मजत्वाभ्युपगमात् अपि या सर्वे एड सतिमकरणो भू
तानामात्मनश्चांतराले करणान्यनुक्रम्यन्ते एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी इति तस्मा
त्पूर्वोक्तोत्पत्तिक्रमलक्षणक्रमभंगप्रसंगो भूतानामिति चेत् नाविशेषात् यदि तावद्भौतिकानि करणानि ततो भूतोत्पत्तिप्रलयाभ्यामेवैषामु
त्पत्तिप्रलयौ भवत इति नैतयोः क्रमांतरं मृग्यं।

र्थक्रमविशेषस्य शेषिबाधकत्वायोगात् नः श्रुतार्थक्रमाविरोधेन पाठस्य नेयत्वात् भूतानंतरं करणानामित्यर्थः किंच भौतिकत्वात्तेषां तदानंतर्यमि
त्याह यदीति न च प्राणस्याविकारत्वायोगात् जन्मप्रमित्यादिमपदे न विकारत्वमेतेनेति वाच्यं करणानां विभक्तत्वेन कार्यतया कारणाकांक्षायामन्न
र्थमित्याह यदीति न च प्राणस्याविकारत्वायोगात् जन्मप्रमित्यादिमपदे न विकारत्वमेतेनेति वाच्यं करणानां विभक्तत्वेन कार्यतया कारणाकांक्षायामन्न
दिश्रुतेः आकांक्षितोऽर्थः प्रमितिबाधके मपदे विकारार्थता मा भूत्स्वात्माद्युपायेन सना कांक्षितोऽपि प्रसंगात् श्रुतेऽन्नमयं हि सोम्य मन इत्युक्त्या मनसो
ऽपि तदभावेऽन्नाद्यैरिति विकारत्वस्य दर्शितत्वान्न विवादावसरः महदस्थूलाभ्यामाधीनानां तेषां प्रकृतिविकारो नयत्र्युत्पत्तिः अक्षरमंतो

भौतिकत्वे लिंगं प्राणेन्द्रियमनांसि भौतिकानि भूताधीनवृद्धिमत्त्वाद्देहवदिति भावः ननु तेषां भौतिकत्वे कथमाथर्वणे पृथक्जन्मकथनं भूत
जन्मोक्तेरेव तन्मात्रेति चेदित्यत आह व्यपदेशोपीति भौतिकवादिनं तेषामभौतिकत्वमुपेत्यापि श्रुतिविरोधमाह आथर्वणेति करणानां भूतानां
चैकदा पाठे मानाभावात् नोक्तभूतक्रमभंगः न चाथर्वणवाक्ये स्थाने पाठमात्रस्यादित्यर्थः तर्हि कुत्र क्रमनिर्णय इत्यत्राह तत्पेतिरिदं स्थूलं डस

भवति च भौतिकत्वे लिंगं करणानामन्नमयं हि सोम्य मन आपोमयः प्राणस्तेजोमयी वागित्येवंजातीयकं व्यपदेशोपि क्वचिद्भूतानां कर
णानां च श्रूयमाणः परिव्राजकन्यायेन नेतव्यः अथ यत्र भौतिकानि करणानि तथापि भूतोत्पत्तिक्रमः न करणोत्पत्तिक्रमेण बाध्यते प्रथमं करणान्यु
त्पद्यन्ते चरमं भूतानि प्रथमं वा भूतानि उत्पद्यन्ते चरमं करणानीति आथर्वणे तु समाम्नायक्रममात्रं करणानां भूतानां च न तत्रोत्पत्ति
क्रम उच्यते तथान्यत्रापि पृथगेव भूतक्रमात्करणक्रम आम्नायते प्रजापतिर्वा इदमग्र आसीत्स आत्मानमैक्षत स मनोऽसृजत तन्मन एवा
सीत्तदात्मानमैक्षत तद्वाचमसृजतेत्यादिना तस्मान्नास्ति भूतोत्पत्तिक्रमस्य भंगः॥ ११०

तेः प्राक् प्रजापतिः स्वात्मा हीत् अत्र सूक्ष्मभूतात्मकप्रजापतिसर्गः प्रथमः ततो मनआदिसर्ग इति क्रमो भातीति भावः एवं च भूतकरणो
त्पत्तिश्रुत्योरविरोधात् ब्रह्मणि समन्वयप्रसिद्धिरिति सिद्धं तत्फलं निगमयति तस्मादिति।

घराचरभावित्वात् एवं तावत्तत्प्रसङ्गात्कारणनिर्णयाय भूतश्रुतीनां विरोधो निरस्तः इदानीमात्मादिस्वरूपसंल्लपदार्थेषु जीवश्रुतीनां विरोधो निरस्यते
इह जीवो न जायते म्रियते इत्यादिश्रुतेः जाते पि श्रुत्यादृष्ट्या तथा विरोधो स्ति न वेति संदेहे विरोधोस्तीति प्राप्ते लोके किल जन्मादिव्यपदेशः सह तथा ज्ञाते सति
स्त्रोण जीवाजत्वादिश्रुतिबाध इति पूर्वपक्षप्राप्ते तत्र उत्तरं चकाराणां सत्ति क्रमेण भूतक्रमस्य बाधा भावेपि जीवोत्पत्ति क्रमेण बाधः स्यादिति प्रसु

चराचरव्यपाश्रयस्तु स्यात्तद्व्यपदेशो भाक्तस्तद्भावभावित्वात् तस्तो जीवस्याप्युत्पत्तिप्रलयौ जातो देवदत्तो मृतो देवदत्त इत्येवं जातीयका लौकिक
व्यपदेशाज्जातकर्मादिसंस्कारविधानाच्चेति स्यात्कस्यचिद्भ्रान्तिः तामपनुदामः न जीवस्योत्पत्तिप्रलयौ स्तः शास्त्रफलसंबन्धोपपत्तेः शरी
रानुविनाशिनि हि जीवे शरीरान्तरगतेष्टानिष्टप्राप्तिपरिहारार्थौ विधिप्रतिषेधावनर्थकौ स्यातां श्रूयते च जीवापेतं वाव किलेदं म्रियते न जीवो
म्रियत इति ननु लौकिको जन्ममरणव्यपदेशो जीवस्य प्रदर्शितः सत्यं दर्शितो भाक्तस्त्वेष जीवस्य जन्ममरणव्यपदेशः किमाश्रयः पुनरयं मु
ख्यो व्यपदेशो यदपेक्षया भाक्त इति उच्यते चराचरव्यपाश्रयः स्थावरजंगमशरीरविषयौ जन्ममरणशब्दौ स्थावरजंगमानि हि भूतानि जायन्ते च म्रियन्
ते चातस्तद्विषयौ जन्ममरणशब्दौ मुख्यौ सन्तौ तत्स्थे जीवात्मन्युपचर्येते तद्भावभावित्वात् शरीरप्रादुर्भावतिरोभावयोर्हि सतोर्जन्ममरणश
ब्दौ भवतः नासतोः न हि शरीरसंबन्धादन्यत्र जीवो जातो मृतो वा केनचिल्लक्ष्यते॥
दाहरणसंगतिः पूर्वपक्षे जीवस्यैक्यासिद्धिः सिद्धान्ते तत्सिद्धिरिति भेदः चेतनजन्माद्युद्देशेन चेतनस्य तस्य जन्मान्तरीयफलसाधनं जातकर्मादि
संस्कारो विधीयते तथा चोद्देश्यविधेययोर्मिथो विरोधे सति विधयो विरोधेतो देहे न प्रयोगमितिस्यात् आत्मादिकं देहोपाधिकं न स्वत इति सिद्धान्तपति
तामित्यादिना जीवापेतं जीवेन त्यक्तं इदं शरीरं जन्मादिव्यपदेशस्य चराचरदेहविषयौ मुख्यः जीवे तु भाक्तो गौणः औपाधिक जन्मादिविषयः स्यादुपाधिज

[illegible]

जीवस्यौपाधिकजन्ममरणयोः श्रुतिमप्याह स वा इति जायमानपदार्थमाह शरीरमिति म्रियमाणपदं व्याचष्टे उत्क्रामन्निति ननु तत्र जीवस्य जन्मा
दि निरस्यते अत्रापि तन्निराकरणे भुवनसृष्टिविरोध इत्याशंक्याह जीवस्येति तदेवं जातेष्ट्यादिश्रुतेरौपाधिकजन्मादिविषयत्वान्न जीवस्य नाद्यन्तत्वश्रु
तिविरोध इति सिद्धं नात्माश्रुतेर्नित्यत्वाच्च ताभ्यः॥ अग्नेर्विस्फुलिंगवदेतस्मादात्मनः सर्वे जीवात्मनो व्युच्चरंतीत्यादिजीवोत्पत्तिश्रुतीनां स एष इह

स वा अयं पुरुषो जायमानः शरीरमभिसंपद्यमानः स उत्क्रामन्म्रियमाण इति च शरीरसंयोगवियोगनिमित्तावेव जन्ममरणशब्दौ दर्शयति जात
कर्मादिविधानमपि देहप्रादुर्भावापेक्षमेव द्रष्टव्यं अभावात् जीवप्रादुर्भावस्य जीवस्य परस्मादात्मन उत्पत्तिर्वियदादीनामिवास्ति नास्ति वे
त्येतदुत्तरेण सूत्रेण वक्ष्यति देहाश्रयौ तावज्जीवस्य स्थूलावुत्पत्तिप्रलयौ न स्तः इत्येतदनेन सूत्रेणावोचत्॥ नात्माश्रुतेर्नित्यत्वाच्च ताभ्यः॥ अ
स्त्यात्मा जीवाख्यः शरीरेंद्रियपंजराध्यक्षः कर्मफलसंबंधी स किं व्योमादिवदुत्पद्यते ब्रह्मण आहोस्वित् ब्रह्मवदेव नोत्पद्यत इति श्रुतिविप्रतिप
त्तेर्विशयः कासुचित् श्रुतिष्वग्निविस्फुलिंगादिनिदर्शनैर्जीवात्मनः परस्मात् ब्रह्मण उत्पत्तिराम्नायते कासुचित्त्वविकृतस्यैव परस्य ब्रह्मणः का
र्यप्रवेशेन जीवभावो विज्ञायते न चोत्पत्तिराम्नायत इति तत्र प्राप्तं तावत् उत्पद्यते जीव इति कुतः प्रतिज्ञानुपरोधादेव एकस्मिन्विदिते सर्वमिदं वि
दितमितीयं प्रतिज्ञा सर्वस्य वस्तुजातस्य ब्रह्मप्रभवत्वे सति नोपरुध्येत तत्त्वांतरत्वे तु जीवस्य प्रतिज्ञेयमुपरुध्येत॥

प्रविष्टस्यानत्वाग्नेर्भ्यः अजन्मात्मेत्याद्यनुत्पत्तिश्रुतीनां च मिथो विरोधात्संशयमाह भूतानां देहजन्मनाशाभ्यां जीवजन्मनाशौ देहांतरभोग्यस्वर्गादिहेतु
विध्याद्यसंभवात् स्याद्यंतयोर्न भवतस्तद्वज्जीवस्यतौ किं न स्यातां तत्संभवादिति प्रत्युदाहरणेन पूर्वपक्षमाह तत्र प्राप्तं तावदिति फलं पूर्ववत् उप १११

नन्वविकृतं ब्रह्मैवात्र प्रविष्टं जीवो न तत्त्वांतरमिति प्रतिज्ञासिद्धिस्तत्राह न चेति जीवः परस्माद्भिन्नः विरुद्धधर्मवत्त्वात् भिन्नत्वाद्विकारत्वे प्रतिज्ञा
बाध इति तर्कोपेतविभक्तत्वलिंगानुगृहीतोत्पत्तिश्रुतेर्बलीयस्त्वात् सर्वेरश्रुतिर्जीवरूपविकारात्मना प्रविष्ट ईश्वर इति व्याख्येयेति समुदायार्थः

न चाविकृतः परमात्मैव जीव इति शक्यते वक्तुं लक्षणभेदात् अपहतपाप्मत्वादिधर्मको हि परमात्मा तद्विपरीतो हि जीवः विभागाच्चास्य वि
कारत्वसिद्धिः यावान्याकाशादिः प्रविभक्तः स सर्वो विकारः तस्य चाकाशादेरुत्पत्तिः समधिगता जीवात्मापि पुण्यापुण्यकर्मा सुखदुः
खभुक् प्रतिशरीरं प्रविभक्त इति तस्यापि प्रपंचोत्पत्त्यवसरे उत्पत्तिर्भवितुमर्हति अपि च यथाग्नेः क्षुद्रा विस्फुलिंगा व्युच्चरंत्येवमेवास्मा
दात्मनः सर्वे प्राणा इति प्राणादेर्भोग्यजातस्य सृष्टिं शिष्ट्वा सर्व एते आत्मानो व्युच्चरंतीति भोक्तॄणामात्मनां पृथक् सृष्टिं शास्ति यथा सुदी
प्तात्पावकात् विस्फुलिंगाः सहस्रशः प्रभवंते सरूपाः तथाक्षराद्विविधाः सोम्य भावाः प्रजायंते तत्र चैवापियंतीति च जीवात्मनामु
त्पत्तिप्रलयावुच्येते सरूपवचनाज्जीवात्मानो हि परमात्मना सरूपा भवंति चैतन्ययोगात् न च क्वचिदश्रवणमन्यत्र श्रुतं वारयितुमर्हति
श्रुत्यंतरगतस्यापि अविरुद्धस्याधिकस्यार्थस्य सर्वत्रोपसंहर्तव्यत्वात् प्रवेशश्रुतिरप्येवं सति विकारभावापत्त्यैव व्याख्याता तथा तदात्मानं स्वय
मकुरुतेत्यादिवत् तस्मादुत्पद्यते जीव इति।

सरूपा इति दृष्टांतश्रुतेर्भावा जीवा इति निश्चीयते ननु आत्मन आकाशः संभूत इत्यादौ जीवस्योत्पत्त्यश्रवणादनुत्पत्तिस्तत्राह न चेति एवं विकारत्वे
सति विकारप्रपंचात्मना स्वात्मानमकुरुतेति वद्विकारजीवात्मना प्रवेश इत्यर्थः॥ ॥ ॥ ॥

शा॰सू॰भा॰ अजत्वादिश्रुतिः कल्पमध्ये जीवस्यानुत्पत्त्यादिविषया तत्त्वमसीति श्रुतिश्च एकदेशत्वे भेदवाक्यवद्गौण्येति प्राप्ते सिद्धान्तयति एवमिति धर्मिविवक्षत्वे
विभागोऽवास्तव औपाधिको वा नाद्यः अग्निविस्फुलिङ्गादिसादृश्यमात्रेण व्याप्तेर्नस्येति द्वितीये जीवस्य न स्वतो विकारत्वसिद्धिः अप्रयोजकत्वादित्याह बुद्ध्यादीति औपा

११२ एवं प्राप्ते ब्रूमः। नात्मा जीव उत्पद्यत इति कस्मात् अश्रुतेः। न ह्यस्योत्पत्तिप्रकरणे श्रवणमस्ति भूयःसु प्रदेशेषु। ननु क्वचिदश्रवणमन्यत्र श्रुतं न वा-
रयतीति। सत्यमुक्तं उत्पत्तिरेव त्वस्य न संभवतीति वदामः। कस्मान्नित्यत्वाच्च ताभ्यः। चशब्दादजत्वादिभ्यश्च। नित्यत्वं ह्यस्य श्रुतिभ्योऽवगम्यते तथ
ाजत्वमविकारित्वमविकृतस्यैव ब्रह्मणो जीवात्मनावस्थानं ब्रह्मात्मना चेति। न चैवंरूपस्योत्पत्तिरुपपद्यते। ताः काः श्रुतयः। न जीवो म्रियते स
वा एष महानज आत्माऽजरोऽमरोऽमृतोऽभयो ब्रह्म। न जायते म्रियते वा विपश्चित्। अजो नित्यः शाश्वतोऽयं पुराणः। तत्सृष्ट्वा तदेवानुप्राविशत्। अ-
नेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि। स एष इह प्रविष्ट आ नखाग्रेभ्यः। तत्त्वमसि। अहं ब्रह्मास्मि। अयमात्मा ब्रह्म सर्वानुभूरित्येवमा-
द्या नित्यत्ववादिन्यः सत्यो जीवस्योत्पत्तिं प्रतिबध्नंति। ननु प्रविभक्तत्वाद्विकारो विकारत्वाच्चोत्पद्यत इत्युक्तं। अत्रोच्यते। नास्य प्रविभागः स्वतो-
ऽस्ति एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मेति श्रुतेः। बुद्ध्याद्युपाधिनिमित्तं त्वस्य प्रविभागप्रतिभानमाकाशस्येव घटादिसंबं- ११२
धनिमित्तं। तथा च शास्त्रं स वा अयमात्मा ब्रह्म विज्ञानमयो मनोमयः प्राणमयश्चक्षुर्मयः श्रोत्रमय इत्येवमादि ब्रह्मण एवाविकृतस्य सतो-
ऽस्यैकस्यानेकबुद्ध्यादिमयत्वं दर्शयति। तन्मयत्वं चास्य तद्विविक्तस्वरूपानभिव्यक्त्या तदुपरक्तस्वरूपत्वं स्त्रीमयो जाल्म इत्यादिवद्द्रष्टव्यं॥

धिकभेदे मानमाह तथा चेति। मयटो विकारार्थत्वमाशंक्याह तन्मयत्वं चेति। जाल्मः कामजडः स्त्रीपरतन्त्रः स्त्रीमय इति वज्जीवस्य स्वरूपाज्ञानाद्बु-
द्ध्यादिपरतन्त्रत्वेन भेदकर्तृत्वादिभाक्त्वात्प्राचुर्यार्थे मयट्प्रयोग इत्यर्थः॥

लिंगं निरस्य तदनुग्राह्यश्रुतेर्गतिमाह यदपीति जीवस्योपाधिकं जन्मनाशयोः श्रुतिमाह तदेति एतेभ्यो देहाकारेणापरिणतेभ्यो भूतेभ्यः साक्ष्येतो
स्यापजनिष्ठानान्येव लीयमानानमनुपश्याद्धि न स्पतिमेत्स्योपाधिकं मरणं न तत्त्वं संज्ञानास्तीत्यर्थः ननु महानघनः संज्ञानास्तीति च विरुद्धमित्य
तश्राह तत्त्वेति उपाधिलक्षाद्धिद्वैतज्ञानाभाव एव संज्ञाभावो नात्मस्वरूपविज्ञानाभाव इत्युक्तं तरं प्रतिपादयन्ति श्रुतिरित्यन्वयः अत्रैवात्मनि विज्ञा
नघने प्रेत्य संज्ञानास्तीत्युक्त्या मां मोहितं मोहमपनीतीमामीपदपादितवानिमं मर्थं न जानामि क्षहि नदुक्तं मोहमपनीतिमेत्रेयीप्रश्नार्थः मु
यदपि क्वचिद्दस्योत्पत्तिप्रलयमयोः श्रवणं तदप्युत एवोपाधिसंबंधान्नेतत्रूपाद्भूलस्यात्मोत्पत्तिस्त्वलये च मलपद्ध इति तथा चेद
रूपीपति प्रज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति न प्रेत्य संज्ञास्तीति तत्रोपाधिमूलप एवापनात्मविलय इत्येतदप्यत्रै
वमा भगवान्मोहितमापीपद्यन्नाअहमिमं विजानामि न प्रेत्य संज्ञास्तीति प्रश्नपूर्वकं प्रतिपद्यति न वा अरे अहं मोहं ब्रवीम्यविनाशी वा
अरेयमात्मानुच्छित्तिधर्मा मात्रासंसर्गस्त्वस्य भवतीति। प्रतितानुपरोधोप्यविकृतस्यैव ब्रह्मणो जीवभावाभ्युपगमात् न कृत्स्नभेदोप्य
नपोरूपाधिनिमित्त एव अतएव द्वैविज्ञानाद्येव ब्रह्मैवेति च प्रकृतस्यैव विज्ञानमयस्यात्मनः सर्वसंसारधर्मसमारंभानेन परमात्मभा
वप्रतीपादनात् तस्मात् नैवात्मोत्पत्तेर्मविलीयतेवेति॥
नित्य हनवा इति मोहं करं वाक्यं उच्छित्तिः पूर्वावस्थानाशो धर्मोस्येत्युच्छित्तिधर्मापरिणामीमनेस्यानुच्छित्तिधर्मास्वपरिणामीतस्मादविनाशी
त्यर्थः तर्हि न प्रेत्य संज्ञेति कथमुक्तं तत्राह मात्रेति विषमेर्संसर्गस्तभ्यो क्रमिसमर्थः विविधमतिविषयप्रेरयाचरुरूधर्मभेदोऽस्य भवत्यत्र हेतुमाह इंद्र
तद्धर्मिति जीवस्याविकारित्वे मुक्तमेणा तत्वानदीजिवाकमरवं जापयति तिकृत्तमंतश्चाच सन ब्रह्मधानयोजापेक्षितजीवनिसबश्रुतीनां बल
वलादुत्सात्कृमध्यस्तमनुवर्तस्तुत्सादिश्रुतपदस्वविरोध इति सिद्धं॥

त्तो न एव चात्मैकस्य ज्योतिरित्यादावात्मस्वप्रकाशत्वश्रुतीनां पक्षस्थत्वाद्धेतुः अत एव न श्रोत्रमित्यनित्यसत्त्वानं वक्ष्य श्रुतिभिर्विरोधो निरस्यते अस
तो कुतश्च सुदृष्टा श्रोत्रं श्रोते सर्वः प्रागुक्तजीवानुत्पत्तिहेतुकादापरस्य प्रकाश्यत्व साधनाद्धेतुसाध्याभावः संगतिः अनुसन्ते हि स्वप्रकाश
जस्वैवोपहितं जीव इति जीवस्य स्वप्रकाशत्वासिद्धिर्न चैवं गताः तान्यनुत्पन्नत्वादिजीवस्य स्वप्रकाशत्वेन साधनेनैव पक्षमिति त
र्कसहितानित्यत्वानत्र्हति बले न स्वप्रकाशत्वश्रुतेर्बाधितत्वात्तस्मात्त्वं काम्यं तदैक्ययोग्यतायै स्वप्रकाशत्वस्य सु साधनात्तत्पाच प्र

ननु एव सत्किं कारणं भुजानामिवागन्तुकचैतन्यः स्वतः अचेतनं ह्यात्महे स्थितं सारक्ष्यानामिव नित्यचैतन्यस्वरूप एवेति वादिविप्रति
पत्तेः संशयः किं तावत्प्राप्तं आगन्तुकं आत्मनश्चैतन्यमात्ममनःसंयोगजमग्निघटसंयोगजरोहितादिगुणवदिति प्राप्ते नित्यचैत
न्यत्वे हि सुषुप्तमूर्छितग्रहाविष्टानामपि चैतन्यं स्यात् ते पृष्टाः संतः न किंचिद्वयमचेतयामहीति जल्पन्ति स्वस्थाश्च चेतयमाना दृश्य
ते अतः कादाचित्कचैतन्यत्वादागन्तुकचैतन्य आत्मेत्येवं प्राप्ते अभिधीयते नित्यचैतन्योऽयमात्मा अत एव यस्मादेव नोत्पद्यते परमे
व ब्रह्माविकृतमुपाधिसंपर्काज्जीवभावेनावतिष्ठते परस्य हि ब्रह्मणश्चैतन्यस्वरूपत्वमाम्नातं। विज्ञानमानन्दं ब्रह्म सत्यं ज्ञानमनं
तं ब्रह्म अनन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एवेत्यादिषु श्रुतिषु तदेव चेत्परं ब्रह्म जीवस्तस्माज्जीवस्यापि नित्यचैतन्यस्वरूपत्वमग्न्यौ
ष्ण्यप्रकाशवदिति गम्यते॥

वेपक्षे जीवस्य ब्रह्मत्वे काऽयोग्यता सिद्धं तेन तद्योग्यतेत्यादसमाप्ते फलं अवगन्तव्यं पूर्वपक्षे निराकृतच्चेतनेपक्षा इति साधनाधीनत्वान्नत्वा
स्वप्रकाशो जीवो व्यतिरेकेण ईश्वरवदित्यसाहसं अतः कादाचित्कोऽतिप्रकाशश्रुतेर्भास्यहेतोः साध्याविशेषरतिमतं अत्र तो जीवस्य स्वप्रकाशत्व

न केवलं स्वप्रकाशत्वप्रमाभेदज्ञानीवस्य स्वप्रकाश्यता किंतु श्रुतितोपीत्याह विज्ञानमयेति योयं विज्ञानमय इति प्रकरणस्थाः अमुतः स्व
प्रभासमानत्वात्सुप्तान् लुप्तप्रकाशान् वागादीनभिलक्ष्य चाकशीतीति स्वभासान्यन्प्रकाशयतीति यावत् अत्र स्वप्ने विज्ञातुर्दृष्टिस्वस्वसाक्षित्वेनोपि ज्ञा
तेर्विनाशो नास्तीत्यर्थः घ्राणादिजन्यगंधादिज्ञानानुसंधानसिद्धये आत्मनो ज्ञानरूपत्वं वाच्यमिति श्रुत्यंतरेणाह अथेति आत्मनो नित्यचि

विज्ञानमयप्रक्रियायां च श्रुतयो भवंति असुप्तः सुप्तानभिचाकशीतीति अत्रायं पुरुषः स्वयंज्योतिर्भवतीति न हि विज्ञातुर्विज्ञातेर्वि
परिलोपो विद्यत इत्येवंरूपाः अथ यो वेदेदं जिघ्राणीति स आत्मेति च सर्वैः करणद्वारैरिदं वेदेदं वेदेति विज्ञानेनानुसंधानात्तद्रूपत्व
सिद्धिः नित्यस्वरूपचैतन्यत्वे घ्राणाद्यानर्थक्यमिति चेत् न गंधादिविषयविशेषपरिच्छेदार्थत्वात् तथा हि दर्शयति गंधाय घ्राणमित्या
दि यत्तु सुप्तादयो न चेतयंत इति तस्य श्रुत्यैव परिहारोऽभिहितः सुषुप्तं प्रकृत्य यद्वै तन्न पश्यति पश्यन्वै तन्न पश्यति न हि द्रष्टुर्दृष्टेर्विपरि
लोपो विद्यतेऽविनाशित्वात्

द्रूपत्वेपि स्वतोऽसंगत्वाद्गंधाद्यसंबंधात्तत्संबंधघटनात्मकवृत्त्यर्थानि ज्ञानसाधनानीन्द्रियाणि तेषां वैयर्थ्यमित्याह नगंधेति परिच्छेदो वृ
त्तिः गंधायेति गोचरांतःकरणवृत्त्यर्थमित्यर्थः सुप्ताद्यवस्थास्वात्मनश्चेत् चैतन्यस्वभावत्वात् चिद्रूपत्वे सुप्तं दृष्टं न पश्यतीति तत्तदा सुप्तो न
पश्यतीति पश्यन्स्वरूपचैतन्येनैव ज्ञानस्य स्वरूपस्य प्रकाशतोऽसत्त्वे हेतुः न हीति नाशायोग्यत्वादित्यर्थः॥

ब्र॰सू॰भा॰

११४

त्ना

किमिति न प्रस्पतीत तत्राह नहि खल्विति वृत्तेः साधनाधीनत्वेऽपि ज्ञानरूपज्ञानस्य साधनाधीनत्वं हेतुरसिद्ध इत्युक्तं साधनवैयर्थ्यतर्कोऽपि निरस्तः
प्रत्यक्षत्रिस्य साधनिरपेक्षतानश्रुतीनां वृत्तिविषयत्वं व्याख्यातं आत्मज्ञानेऽप्यसत्त्वात् इत्यादिना श्रवणमवाधिताः फलवत्त्वाधानवाक्यापेक्षितत्व
प्रकाशत्वागमस्य बलवत्त्वात् तर्किंचमिदं वपेत्यात्मनो मनः संयोगायोगान्तानिसत्ता नगुणगतमहत्तमाभावाच्च नस्वसमवेततत्तानवेद्यताकर्मिकृति
त्वविरोधाच्च किंचतानलूसैकवृत्तिसेलायवादालैवज्ञानेऽवृत्तेश्च मनःपरिणामत्वश्रुत्याकामः संकल्पइत्यादिश्रुत्याधापाजडत्वान्नास्माकं ज्ञानहानि
नतु तत्त्वहितीयमस्तितत्तोऽपि द्विकांपसहोपरित्यादिनाएतदुक्तं भवतिविषयाभावादिप्रमचेतयमानानन्तैतन्याभावादितिप्रत्यावेधस्य श्रयस्य
संकोचास्यप्रकाशाभावादन्भिव्यक्तिर्नस्वरूपाभावात्तद्वतदेशोषिकादितर्कश्रुतिविरोधे आभासी भवतितस्मान्नित्यचैतन्यस्वरूपस्त्यात्मेति
सिद्धिनुमः १३ उत्क्रान्तिगत्यागतीनां॥ ॥इदानीं तु किं परिमाणो जीव इति चिंत्यते किमणुपरिमाणउतमध्यमपरिमाणआहोस्वित् महापरि
माणइति ननु चनात्मोत्पद्यते नित्यश्चेतन्यश्चेत्यादिनासूत्रेणउक्तं अतस्त्वपरएवात्मा जीवइत्यापततिपरस्यचात्मनो भूतत्वमाम्नातं तत्र कुतो जीवस्य
परिमाणचिन्तावतारइति उच्यते सत्यमेतत् उत्क्रान्तिगत्यागतिश्रवणानि तु जीवस्य परिच्छेदं प्रापयंति स्वशब्देन चास्य कचिदणुपरिमाण
त्वमाम्नायते तस्य सर्वस्यानाकुलत्वोपपादनायायमारंभः॥
श्वेरेवमिति स्वतचय मामन स्वप्रकाशत्वमितिसिद्धं स्वप्रकाशत्वादात्मस्वरूपादीष्टादृष्टिं परिमाणमेवाश्रमत्वेनान्तर्विहिर्भावेन वासंगत्याविचा
रयति उत्क्रान्तिगत्यागतीनां विषयसंशयौ दर्शयति इदानीमिति नात्रास्पष्टश्रुतिसिद्धिविरोधः कार्यं तमस्यासंगत्यापादनस्य श्रुतीनां महत्वश्रुतीनां च विरो
धकत्वान्नाधिमन्साधिकरणसारंभइत्याहतन्त्वंसाहित्येनाकेचिलंश्रुतीनां साधनुपपत्याऽनेन लक्ष्यं किं विरोधेनएतेनेति श्रुत्यापीत्याहत्वयाचे ११५

पूर्वपक्षे जीवस्याणुत्वात् अहमे मा सिद्धिः सिद्धांते तत्सिद्धिरिति मत्वा सूत्रं व्याकुर्वन् पूर्वपक्षमाह तत्र मा भवति स्यादिना श्रुतेरणुरिति उत्तरसूत्रादाणु
त्वमपि सूत्रे पूरितं उत्क्रांतिः श्रूयत इति शेषः स प्राणः सर्वैः जीवस्यैतैर्बुद्ध्यादिभिः तस्मात् अयं लोकादिमं लोकं प्रतिकर्मैककर्मा यातीत्यर्थः उत्क्रांति वलना
देहाभिमानो न भवति येनाणुत्वं स्यात् किंतु स्वाम्यनिवृत्तिरिति के चित्तं दृग्गीरूसाप्यणुत्वमावर्त्यप्रकृतिमाह स्वात्मनेति उत्क्रांते कृत्वा योगस्यागतोः स्वा
तत्र मा भवतापि उत्क्रांतिगत्यागतीनां श्रवणात् परिच्छिन्नोऽणुपरिमाणो जीव इति उत्क्रांतिः स वा एष एतस्मात् शरीराद् उत्क्रामति सहैवैतैः सर्वैरु
त्क्रामतीति गतिरपि ये वै के चास्माल्लोकात् प्रयन्ति चंद्रमसमेव ते सर्वे गच्छंतीति आगतिरपि तस्माल्लोकात् पुनरेत्यस्मै लोकाय कर्मणा इति आसा
मुत्क्रांतिगत्यागतीनां श्रवणात् परिच्छिन्नस्तावत् जीव इति प्राप्नोति न हि विभोश्चलनमवकल्पत इति सति च परिच्छेदे शरीरपरिमाणत्वस्याहंतप
रीक्षायां निरस्तत्वादणुरात्मेति गम्यते ॥ ॥स्वात्मना चोत्तरयोः॥ ॥उत्क्रांतिः कदाचिदचलतोऽपि ग्रामस्वाम्यनिवृत्तिवद्देहस्वाम्यनिवृत्त्या क
र्मक्षयेण वा कल्प्येत उत्तरे तु गत्यागती नाचलतः संभवतः स्वात्मना हि तयोः संबंधो भवति गमेः कर्तृस्थक्रियात्वात् अमध्यमपरिमाणस्य च
गत्यागती अणुत्व एव संभवतः सत्योश्च गत्यागत्योरुत्क्रांतिरप्यपसृतिरेव देहादिति प्रतीयते न ह्यनपसृतस्य देहाद्गत्यागती स्यातां देहप्रदेशानां
चोत्क्रांतावपादानत्वेन च नाड्या मुखेन वा मूर्ध्नो वान्येभ्यो वा शरीरदेशेभ्य इति।
त्मनाकृतौ संबंधादणुत्वमिति सूत्रयोजना प्रकृतानामप्यसपक्षत्वादुक्तताश्च यस्माधिगं तत्तोक्तिः किं तस्मादि सत आहागमेरिति गमन सपर्कतारि
संयोगविभागरूपा तिष्ठति अहेतुत्वाल्लोकसिद्धेश्च त्वल्लोकसिद्धिमित्यर्थः जीवोऽणुरमध्यमपरिमाणत्वे सति गतिमत्त्वात् परमाणुवदित्याह अमध्यमेति अंगी
कारः स्वजूति सैषाक्षिति स्वाम्यनिवृत्तिमात्रं उत्क्रांतिरित्यर्थः देहाभिमान एवोत्क्रांतिरित्यत्रालिंगांतरमाह देहप्रदेशानामिति अपादानत्वेनाव
धित्वेन अन्येभ्यो वा पुरवादिभ्यश्चक्षुष्टो वा लानि क्रामतीति शेषः

किंच देहमध्येपि जीवस्य गत्यागतिश्रुतेरणुत्वमित्याह स इति इंद्रियाण्युपहृत्य स्वापे हृदयं स जीवो गच्छति शुक्रं प्रकाशात्मकं इंद्रियमादाय पुन
जागरितस्थानमागच्छतीत्यर्थः इतराधिकारात् ब्रह्मप्रकरणत्वात् ननु महत्त्वश्रुतेः कथं परप्रकरणस्थत्वमित्यत आह परस्यैवेति पावेदंतेश्रुतिः

स एतास्तेजोमात्राः समभ्याददानो हृदयमेवान्ववक्रामति शुक्रमादाय पुनरैति स्थानमिति चांतरपि शरीरे शारीरस्य गत्यागती भवतस्तस्मा
दप्यस्याणुत्वसिद्धिः॥ ॥नाणुरतच्छ्रुतेरिति चेन्नेतराधिकारात्॥ ॥अथापि स्यान्नाणुरयमात्मा कस्मादतत् श्रुतेरणुत्वविपरीतप
रिमाणश्रवणादित्यर्थः सवा एष महानज आत्मा योयं विज्ञानमयः प्राणेषु आकाशवत्सर्वगतश्च नित्यः सत्यं ज्ञानमनंतं ब्रह्मेत्येवं जातीय
का हि श्रुतिरात्मनोणुत्वं विप्रतिषेधतीति चेत् नैष दोषः कस्मादितराधिकारात् परस्य ह्यात्मनः प्रक्रियायामेषा परिमाणांतरश्रुतिः पर
स्यैवात्मनः प्राधान्येन वेदांतेषु वेदितव्यत्वेन प्रकृतत्वात् विरजः पर आकाशादित्येवंविधाच्च परस्यैवात्मनस्तत्र तत्र विशेषाधिकारात् ननु
योयं विज्ञानमयः प्राणेष्विति शारीर एव महत्त्वसंबंधित्वेन प्रतिनिर्दिश्यते शास्त्रदृष्ट्या त्वेष निर्देशो वामदेववत् द्रष्टव्यः तस्मात्प्राज्ञविषयत्वात्प
रिमाणांतरश्रवणस्य न जीवस्याणुत्वं विरुध्यते॥ ११५

सा परप्रकरणस्थेत्यत्र गमकमाह तस्यैवं ब्रह्मण आधीतत्वाच्चेत्याह विरज इति निर्देशादित्यर्थः विज्ञानमयश्रुतेः प्रकरणं बाधमिति शंकते ननु इति
श्रुतौ जीवस्य ब्रह्मणाभेदांगीकाराच्छास्त्रीयाऽभेददृष्ट्या महत्त्वोक्तिर्यथा वामदेवस्याहं मनुरिति सर्वात्मत्वोक्तिरिति विरोधमाहृत्याहेति॥

एवमुक्त्वां सादिश्रुत्यात्माणुत्वमनुमितं तत्र श्रुतिमप्याह स्वशब्देति वालाग्रादुद्धृतः शततमो भागस्तस्मादप्युद्धृतः शततमो भागो जीव इति। उद्धृतः समान
मुन्मानमसंतारतम्यमिति यावत् वालः केशः तेषां ततः शलाकाग्रमारा अग्रं तस्मादुद्धृतानामात्रामानं यस्य स जीवः तथा चात्मा संयुक्तमात्रत्वाच्चो देहव्या

प्यदृष्टोऽन्मानामंगाच्च॥ ॥ इतश्चाणुरात्मा यतः साक्षादेवास्याणुत्ववाची शब्दः श्रूयते एषोऽणुरात्मा चेतसा वेदितव्यो यस्मिन्प्राणः पंचधा सं
विवेशेति प्राणसंबंधाच्च जीव एवायमणुरभिहित इति गम्यते तथोन्मानमपि जीवस्याणिमानं गमयति वालाग्रशतभागस्य शतधा कल्पितस्य
तु भागो जीवः स विज्ञेय इति आराग्रमात्रो ह्यवरोऽपि दृष्ट इति चोन्मानांतरं नन्वणुत्वे सत्येकदेशस्थस्य सकलदेहगतोपलब्धिर्विरुध्यते दृश्य
ते च जाह्नवीह्रदे निमग्नानां सर्वांगेषु शैत्योपलब्धिर्निदाघसमये च सकलशरीरपरितापोपलब्धिरिति। अत उत्तरं पठति॥ अविरोधश्चंदनव
त्॥ यथा हि हरिचंदनबिंदुः शरीरैकदेशसंबद्धोऽपि सन् सकलदेहव्यापिनमाह्लादं करोति एवमात्मापि देहैकदेशस्थः सकलदेहव्यापिनीमुपल
ब्धिं करिष्यति त्वक्संबंधाच्चास्य सकलशरीरगता वेदना न विरुध्यते त्वगात्मनोर्हि संबंधः कृत्स्नायां त्वचि वर्तते त्वक् च कृत्स्नशरीरव्यापिनी
ति॥ अवस्थितिवैशेष्यादिति चेन्नाभ्युपगमाद्धृदि हि॥ ॥ अत्राह परः यदुक्तमविरोधश्चंदनवदिति तदयुक्तं दृष्टांतदार्ष्टांतिकयोरतुल्यत्वात्॥

पिस्यात्रोपलब्धिकरणासमहिम्नात्मनो व्यापिकार्यकारित्वमविरुद्धं स्यात् आत्मनो रिषि संबंधस्य त्वगवस्थाविनिष्ठत्वादयमविनश्चैकत्वादात्मस
योगस्य कृत्स्नत्वङ्निष्ठत्वे। त्यर्थः॥

ब्र.सू.भा. ११६

सिद्धेरिति न तु सिद्धमित्यनुषज्यते सर्पेः विशेष एव वैशेष्यं चंदनविंदोरल्पत्वस्य प्रसक्तत्वात् त्वग्व्यापिका र्यकारित्वकल्पनापुष्कला जीवस्य
त्वणुत्वेपि देहव्यापिकार्यकृत्स्ना व्यापित्वकल्पनमेव पुष्कलं व्यापिकार्यं प्रयोजकमुपलभ्य सुलगी इति तत्त्वराक्षराभावार्थः। आत्मानुव्यापिकार्यकारित्वा

सिद्धेह्यात्मनो देहैकदेशस्थत्वे चंदनदृष्टांतो भवति प्रत्यक्षं तु चंदनस्यावस्थितिवैशेष्यमेकदेशस्थत्वं सकलदेहाह्लादनं चात्मनः पुनः
सकलदेहोपलब्धिमात्रं प्रत्यक्षं नैकदेशवर्तित्वं अनुमेयं तदिति यदप्युच्येत न चात्रानुमानं संभवति किमात्मनः सकलशरीरगता वेदनालिंगि
मस्येव सकलदेहव्यापिनः सतः किं वाणोर्नभस इवाहोस्विच्चंदनविंदोरिवैकदेशस्थस्येति संशयानिवृत्तेरिति। अत्रोच्यते। नायं दो
षः कस्मादभ्युपगमात्। अभ्युपगम्यते ह्यात्मनोपि चंदनस्येव देहैकदेशवृत्तित्वमवस्थितिवैशेष्यं। कथमिति उच्यते। हृदि ह्येष आत्माप
ठ्यते वेदांतेषु हृदि ह्येष आत्मा। स वा एष आत्मा हृदि कतम आत्मेति योयं विज्ञानमयः प्राणेषु हृद्यंतर्ज्योतिः पुरुष इत्याद्युपदेशेभ्यः।
तस्माद्दृष्टांतदार्ष्टांतिकयोरवैषम्याद्युक्तमेवैतच्चंदनवदिति॥ ॥गुणाद्वा लोकवत्॥ चैतन्यगुणव्याप्तेर्वाणोरपि सतो जी
वस्य सकलदेहव्यापि कार्यं न विरुध्यते। यथा लोके मणिप्रदीपप्रभृतीनामपवरकैकदेशवर्तिनामपि प्रभापवरकव्यापिनी सती कृत्स्नेप
वरके कार्यं करोतीति तद्वत्

चंदनबिंदुवदिति अनुमानमप्रत्यक्षत्वे व्यभिचारादित्याह न चात्रानुमानमिति एवंभूतश्रुतिभिर्जीवस्याणुत्वनिश्चये हृदिस्थत्वश्रुतिभिरेकदेशस्थ
त्वनिश्चयाच्च न दृष्टांतवैषम्यमिति परिहारभाष्यार्थः मा हृद्यद्योत्यत इति आत्मवत्तद्धर्मज्ञानस्याप्यणुत्वं स्वतः कादाचित्कं तु देहपरिमाणत्वमिति स्वा

११६

शशादेन चंदनदृष्टांतापरितोषः सूचितस्तमाह स्यादिति उत्तरसूत्रव्यावर्त्यं शंकते कथमिति ज्ञानं न गुणिव्यतिरिक्तदेशमपि गुणत्वात् रूपव
त् प्रभायां व्यभिचारः तस्या अपि द्रव्यत्वादिति मासेंगंधे व्यभिचारमाह अत उक्तमिति गुणस्य व्यतिरेके आश्रयविश्लेषः ननु विश्लिष्टावयवानाम

स्यात् कदाचिच्चंदनस्य सावयवत्वात् सूक्ष्मावयवविसर्पणेनापि सकलदेहव्याप्त्या ह्लाद उपपत्स्यते न तु गौणजीवस्यावयवाः संति ये रूपं स कले
देहं विसर्पयेदिति सांशत्वगुणत्वात् आलोकवदिति सूत्रं कथं पुनर्गुणो गुणि व्यतिरेकेणान्यत्र वर्तेत न तावत् हि पटस्य शुक्लो गुणः पटव्यतिरेकेणान्य
त्र वर्तमानो दृश्यते यदि प्रभावद्भवेदिति चेत् न तस्या अपि द्रव्यत्वाभ्युपगमात् निविडावयवं हि तेजो द्रव्यं प्रदीपः प्रविरलावयवं तु तेजोद्र
व्यमेव प्रभेति अत उत्तरं पठति द्रव्यव्यतिरेकात् गंधवत् ॥ यथा गुणस्यापि सतो गंधस्य गंधवत् द्रव्यव्यतिरेकेण वृत्तिर्भवति अप्राप्तेष्वपि कु
सुमादिषु गंधवत्सु कुसुमगंधोपलब्धेरेवमणोरपि सतो जीवस्य चैतन्यगुणव्यतिरेको भविष्यति अत एवानैकांतिकमेतत् गुणत्वाद्रूपादिवत्
आश्रयाविश्लेषानुपपत्तिरिति गुणस्यैव सतो गंधस्याश्रयविश्लेषदर्शनात् गंधस्यापि सह एवाश्रयेणाविश्लेष इति चेन्न यस्मान्मूलद्रव्याद्वि
श्लेषस्तस्य क्षयप्रसंगात् अक्षीयमाणमपि तत्पूर्वावस्थातो गम्यते अन्यथा तत्पूर्वावस्थैर्गुरुत्वादिभिर्हीयेत ॥

त्वात् द्रव्यस्यापि न भातीत्यत आह अक्षीयमाणमपीति अपरिच्छेदधारणे पूर्वावस्थालिंगेनाक्षीयमाणमेवतद्द्रव्यमनुमीयत इत्यर्थः विमतं द्र
विश्लिष्टावयवं पूर्वावस्थातो गुरुत्वाद्युपचयहीनत्वात् तत्त्वमतवदिति भावः ॥ ॥ ॥ ॥

न्या० सू० भा० २ र्यं कृते स्यादेतदिति विश्लिष्टानामल्पत्वादिस्कपलक्षणमवमवांतराणां प्रवेशादिसपिंडष्टवंचिज्ञेषोऽवयवानांविश्लेषप्रवेशरूपः सन्नपिन
११७ ज्ञापतेतथाचगुरुत्वापचयो न भवतीतिहेतोरस्याप्यसिद्धिरिति शंकार्थः आगच्छंतोवयवाः परमाणवस्त्रसरेणवोवानावयवकृतरूपवद्गंधस्य
प्यनुपलब्धिप्रसंगादितिपरिहरंतिनेतिहृतीयंसप्ताह स्फुटेति त्रसरेणुगंधश्चैत्स्फुटो न स्यादिसर्थः अतोनैंगंधस्यपुष्पादिस्थस्यैवगुणित्व
स्यादेतत् गंधाश्रयाणांविश्लिष्टानामवयवानामल्पत्वात्सन्नपिविशेषोनोपलभ्यते सूक्ष्मा हि गंधपरमाणवः सर्वतोविप्रसृता गंधबुद्धि
मुत्पादयंतिनासिकापुटमनुप्रविशंतीति चेत् तत्रातीन्द्रियत्वात् परमाणूनां स्फुटगंधोपलब्धेश्च नागकेसरादिषु न च लोके प्रतीतिर्गंध
वत् द्रव्यमाघ्रातमिति गंधस्त्वाघ्रात इति तु लौकिकाः प्रतीयंति रूपादिषु चाश्रयव्यतिरेकेणानुपलब्धेर्गंधस्यापि पुष्पाश्रयव्यतिरेकेणेति
चेत् न प्रसुप्तत्वादनुमानाप्रवृत्तेः तस्माद्यथा लोके दृष्टं तत्तथैवानुमंतव्यं निरूपकैर्न्यायात् न हि रसो गुणो जिह्वयोपलभ्यत इति श्र
तो रूपादयोपि गुणा जिह्वयैवोपलभ्येरन्निति निर्यंतुं शक्यते। तथा चदर्शयति॥ हृद्यायतनत्वमणुपरिमाणत्वं चात्मनोभिधानमनसै
वालोमभ्य आनखाग्रेभ्य इति चेतन्येन गुणेन समस्तशरीरव्यापित्वं दर्शयति॥ ११७

तिरेको वा अत इति भावः गंधो न गुण इति विश्लिष्टः गुणत्वात् रूपवदिति शंकते रूप इति विश्लेषस्य मस्तत्वादधः इत्याह न इति आत्मनश्चैतन्यगु
णेनैव देहव्यापित्वमिति श्रुतिमाह सूत्रकारः तथा चदर्शयतीति तद्याचष्टे हृदयेति॥

तत्रैव श्रुतं तत्र एवं सूत्रं प्रगितिविज्ञानमिंद्रियाणां ज्ञानशक्तिं विज्ञानेन चैतन्यगुणेनादाय शेते इत्यर्थः एवं चैतन्यगुणव्याप्तिगोचरम
भिप्रायेण तत्रात्माणुत्वविभुत्वश्रुतीनां विरोधाद् अणुमात्रप्रमाणस्याणुत्वं जीवस्य विभुत्वमीश्वरस्येव स्वदेहे इत्येकदेशिपक्षो दर्शितस्तं दूषयन्सि
द्धांतसूत्रं व्याचष्टे तु शब्द इत्यादिना तस्मात् ब्रह्माभिन्नत्वात् विभुर्जीवः अणुत्वादिस्तु मानानुगृहीते श्रुतिस्मृती आह तथा च सर्व एव प्रतिनिसः

पृथगुपदेशात्॥ ॥प्रज्ञया शरीरं समारुह्येति चात्मप्रज्ञयोः कर्तृकरणभावेन पृथगुपदेशात् चैतन्यगुणेनैवास्य शरीरव्यापिता ग
म्यते तद्देशानां प्राणानां विज्ञानेन विज्ञानमया इत्येतच्चक्षुः श्रोत्रं शरीरं त्वचमित्यादि तस्योपदेशस्यैतमेवाभिप्रायमनुबोद्धुमर्हति तस्मादणुरात्मेति
तिएवं प्राप्ते ब्रूमः॥ ॥तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवत्॥ ॥तु शब्दः पक्षं व्यावर्तयति नैतदस्त्यणुरात्मेति उत्पत्त्यश्रवणाद्धि प
रस्यैव ब्रह्मणः प्रवेशश्रवणात् तादात्म्योपदेशाच्च परमेव ब्रह्म जीव इत्युक्तं परमेव चेद्ब्रह्म जीवः तस्माद्यावत्परं ब्रह्म तावानेव जीवो भवि
तुमर्हति परस्य च ब्रह्मणो विभुत्वमाम्नातं तस्माद्विभुर्जीवः तथा स वा एष महानज आत्मा योऽयं विज्ञानमयः प्राणेष्विति एवंजातीय
काजीवविषयका विभुत्ववादाः श्रौताः स्मार्ताश्च समर्थिता भवंति॥

सर्वगतः स्यादणुरित्यादयः स्मार्ता वादाः एतेन जीवस्य ब्रह्माभेदज्ञाने अणुत्वाद्यवधीः तत्सांतरितत्वान्नाश्रय इति निरस्तं तथा च महावाक्यानु
गुणश्रुतिस्मृतिभिरणुत्वाभावनिश्चयानंतरमभेदज्ञानात्प्रथमं तु वाक्यविरोधे गुणभूताणुत्वश्रुतीनामौपाधिकाणुत्वविषयत्वेन कल्पनानुगुणत्व
व्यापकत्वसमेतेत्यापादितिभावः॥

किंच सर्वदेहव्यापिशैत्यानुभवान्यथानुपपत्त्याऽणुत्वश्रुतयोऽप्यस्याणुत्वविषयत्वेन नेयाः कथंचिदर्थवादा नेयाः लौकिकन्यायादपि तेषां दु
११८ र्बलत्वादिति न्यायाच्चेति मत्वाह नचाणोरिति शंकते त्वगिति यद्यपि बाल्यसंबंधस्य त्वग्व्याप्या देहव्यापिनी वेदनास्मात्तत्र्यथेति प्रसंग इति हृषमाने तिनेति
प्रसंगश्लेषत्वं निरस्यति कंटकेति न एवेति तस्याल्पमहतोः संयोगेन महद्व्यापीकंटकसंयोगस्य देहव्याप्त्यदर्शनात् तथा चाणवात्मसंयोगस्त्व
गेकदेशस्य एवेति देहव्यापिवेदनानुपपत्तिः नच सिद्धान्तेऽप्यात्मसंबंधस्य व्यापित्वात्कंटकसंबंधे देहव्यापिवेदनाप्रसंग इति वाच्यं पादवतीविध

नचाणोर्जीवस्य सकलशरीरगता वेदनोपपद्यते त्वक्संबंधात्स्यादिति चेत् न कंटकतोदनेऽपि सकलशरीरगतैव वेदना प्रसज्येत त्व
क्कंटकयोर्हि संयोगः कृत्स्नायां त्वचि वर्तते त्वक्च कृत्स्नशरीरव्यापिनीति पादतल एव तु कंटकनुन्नां वेदनां प्रतिलभंते नचाणोर्गुणव्या तु॰ कं॰
प्तिरुपपद्यते गुणस्य गुणिदेशत्वात् गुणत्वमेव हि गुणिनमनाश्रित्य गुणस्य हीयेत प्रदीपप्रभायाश्च द्रव्यान्तरत्वं व्याख्यातं गंधोऽपि गुण
त्वाभ्युपगमात्साश्रय एव संचरितुमर्हति अन्यथा गुणत्वहानिप्रसंगात्॥

प्रसंबंधात्त्वक्तावद्व्याप्यात्मसंबंधस्तावद्व्यापिवेदनाहेतुरिति नियमाच्चैवं विषमत्वक्संबंध एव तद्धेतुरस्तु किमात्मव्याप्त्येति वाच्यं। वेदना हि सुखं ११८
दुःखं तदनुभवश्च न चैषां व्यापकत्वात्कर्मणामनन्यसमुत्पादानेसंभवति किंतु अस्य प्रादेशिकत्वे सोपपत्तेः नचैषां व्यापकत्वमसिद्धं सूर्यतप्तस्य सर्वां
गाणि मग्नस्य सर्वांगव्यापिदुःखसुखानुभवस्य दुरपह्नवत्वात् यद्गुणस्य व्याप्तिगुणिविश्लेषो गंधवदिति तन्नेत्याह नचाणोरिति॥ ॥

ंधो नाश्रयाद्विश्लिष्टः गुणत्वाद्रूपवत् इत्यत्रागममाह तथा चोक्तमिति न च मत्स्यस्य गंधः गंधस्य प्रसिद्धत्वेपि निराश्रयत्वस्याप्रसिद्धत्वा
न्महत्त्वाच्च परेणूनामनुद्भूतस्पर्शानामुद्भूतगंधानामागमनात्सुरगंधोपलंभसंभवः अवयवांतरमवेक्ष्यान्ममहसा मूलद्व्यस्तमइति

तथा चोक्तं द्वैपायनेन उपलभ्याप्सु चेद्गंधं केचिद्ब्रूयुरनैपुणाः पृथिव्यामेव तं विद्यादपो वायुं च संश्रितमिति यदि चैतन्यं जीवस्य सम
स्तशरीरं व्याप्नुयात् नाणुर्जीवः स्यात् चैतन्यमेव ह्यस्य स्वरूपमग्नेरिवौष्ण्यप्रकाशौ नात्र गुणगुणिविभागो विद्यत इति शरीरपरिमाण
त्वं च मध्यमपरिमाणत्वं परिशेषाद्विभुर्जीवः अणुत्वं यस्यात्मनः तस्याणुत्वादिव्यपदेश इत्यत आह तद्गुणसारत्वात्तु तद्व्यपदेश इति तस्या बुद्धेर्गुणा
स्तद्गुणाः इच्छा द्वेषः सुखं दुःखमित्येवमादयस्तद्गुणाः सारः प्रधानं यस्यात्मनः संसारित्वे संभवति तद्गुणसारः तस्य भावस्तद्गुणसारत्वं नहि बु
द्धेर्गुणैर्विना केवलस्यात्मनः संसारित्वमस्ति बुद्ध्युपाधिधर्माध्यासनिमित्तं हि कर्तृत्वभोक्तृत्वादिलक्षणं संसारित्वमकर्तुरभोक्तुश्चासंसारि
त्वं नित्यमुक्तस्य सतश्चात्मनः तस्मात् तद्गुणसारत्वात् बुद्धेः परिमाणेनास्य परिमाणव्यपदेशः तदुत्क्रांत्यादिभिश्चास्योत्क्रांत्यादि
व्यपदेशो न स्वतः॥

भावः पूर्वं चैतन्यस्य गुणत्वमुपेत्य तच्छ्रुत्याद्याभासाद्गुणत्वादणुत्वं निरस्तं संप्रति तस्य गुणत्वमसिद्धमित्याह॥ यदि चैतन्यमिति॥ तिष्ठतु जीवविभुत्वं
यस्याणुत्वाद्युक्तेः गतिप्रदर्शनार्थं सूत्रं व्याचष्टे कथमित्यादिना अभ्यंतरा विज्ञानमनसी हृदि हीति च प्रकृता बुद्धिर्योग्यत्वात्तच्छब्देनोच्यते॥

बुद्धिगुणानामात्मन्यध्यासादणुत्वायुक्तिर्निरस्तः। आनंत्यश्रुतिविरोधादित्याह तथा चेति अकार्यकारणद्रव्यसमानाधिकरणतया तत्त्वमसी
तिवाक्यस्यैवोपमितिवाक्यवदखंडार्थे तात्पर्यत्वादानंत्यस्य समगुणत्वमध्यस्तमित्यर्थः। उक्तं चैतदंगुष्ठाधिकरणे प्रतिपाद्य विरुद्धं मुहूर्तमुपगतवि
क्षेपणैरविघटितमिति वालाग्रमात्रकर्मारग्रवाक्यं चेत्कन्मा नद्य पमुक्तं तत्राद्यं निरस्य द्वितीयं निरस्यति तथेतरस्मिन्नपीति बुद्धेर्गुणेन निमित्ते

तथा च बालाग्रशतभागस्य शतधा कल्पितस्य तु भागो जीवः स विज्ञेयः स चानंत्याय कल्पते इत्यणुत्वं जीवस्योक्तं तस्यैव पुनरानंत्यमा
हतं चेदेवमेव स मंजसं स्यात्‌ पर्यायोपचारिकमणुत्वं भवेत्‌ पारमार्थिकं चानंत्यं न ह्युभयं मुख्यमवकल्प्येत न चानंत्यमौपचारिकमिति शक्यं
विज्ञातुं सर्वोपनिषत्सु ब्रह्मात्मभावस्य प्रतिपिपादयिषितत्वात्‌ तथेतरस्मिन्नप्युन्माने बुद्धेर्गुणेनात्मगुणेन चैवाराग्रमात्रो ह्यवरोऽपि दृष्ट इ
ति बुद्धिगुणसंबंधेनैवाराग्रमात्रतां शास्ति न स्वेनैवात्मना एषोऽणुरात्मा चेतसा वेदितव्य इत्यत्रापि न जीवस्याणुपरिमाणत्वं शिष्यते परस्यै
वात्मनश्चक्षुराद्यनवग्राह्यत्वेन ज्ञानप्रसादगम्यत्वेन च प्रकृतत्वात्‌ जीवस्यापि च मुख्याणुपरिमाणत्वानुपपत्तेः तस्मात्‌ दुर्ज्ञानत्वाभिप्रा
यमिदमणुत्ववचनमुपाध्यभिप्रायं वा द्रष्टव्यं॥ ११६

तास्यम्यध्यस्तो गुणो भवतीति तेनाल्पगुणेन तानाध्यस्तेनैवाराग्रपरिमाणोपकृष्टश्च जीवो दृष्टः स्वतस्त्वनंतस्त्वसंख्येयर्थः न च स्वगुणाध्यासे तेनापि वाच्या
नास्मोर्दैवैस्तपसा कर्मणा वा ज्ञानप्रसादेन विशुद्धसत्त्वस्ततस्तु तं पश्यते निष्कलं ध्यायमान इत्युक्तापरेणाणुत्वेनोक्तः पर एव पदि जीवः तथा

प्यध्यस्ताणुत्वं अणुशब्दार्थ इत्याह जीवस्यापीति॥

यदुक्तंस्य च गुणोपदेशाच्चैतन्यगुणो नैवात्मनो देहमात्रमिति तत्राह। तथा प्रज्ञयेति। बुद्धिः प्रज्ञेत्यर्थः। यद्धि चैतन्यं प्रज्ञानं तदाभेदोपचार इत्याह। व्य-
पदेशमात्रं वेति। ननु चैतन्यं गुण इति भेदो मुख्योऽस्त्वित्यत आह। न ह्यत्रेति। निर्गुणत्वश्रुतेरित्यर्थः। अन्यदपि रूपो जीवोऽणुर्बुद्ध्याद्युपाधिकल्पित इत्याह। हृदये-

तथा प्रज्ञया शरीरं समारुह्येत्येवंजातीयकेष्वपि भेदव्यपदेशेषु बुद्ध्येवोपाधिभूतया जीवः शरीरं समारुह्येत्येवं योजयितव्यम्। व्यपदेशमा-
त्रं वा शिलापुत्रकस्य शरीरमित्यादिवत्। न ह्यत्र गुणगुणिविभागोऽपि विद्यत इत्युक्तम्। हृदयायतनत्ववचनमपि बुद्धेरेव
तदायतनत्वात्। तथोत्क्रान्त्यादीनामप्युपाध्यायत्ततां दर्शयति। कस्मिन्न्वहमुत्क्रान्त उत्क्रान्तो भविष्यामि कस्मिन्वा प्रतिष्ठिते प्रतिष्ठास्या-
मीति स प्राणमसृजतेति। उत्क्रान्त्यभावे हि गत्यागत्योरप्यभावो विज्ञायते। न ह्यनपसृप्तस्य देहाद्गत्यागती स्याताम्। एवमुपाधिगुणसारत्वा-
ज्जीवस्याणुत्वादिव्यपदेशः प्राज्ञवत्। यथा प्राज्ञस्य परमात्मनः सगुणेषूपासनेषूपाधिगुणसारत्वादणीयस्त्वादिव्यपदेशोऽणीया-
न्व्रीहेर्वा यवाद्वा मनोमयः प्राणशरीरः सर्वगन्धः सर्वरसः सत्यकामः सत्यसंकल्प इत्येवंप्रकारस्तद्वत्। स्यादेतत्। यदि बुद्धिगुणसार-
त्वादात्मनः संसारित्वं कल्प्येत ततो बुद्ध्यात्मनोर्भिन्नयोः संयोगावसानमवश्यंभावीत्यतो बुद्धिवियोगे सत्यात्मनो विभक्तस्यानालक्ष्य-
त्वादसत्त्वमसंसारित्वं वा प्रसज्येतेति। अत उत्तरं पठति॥ ॥यावदात्मभावित्वाच्च न दोषस्तद्दर्शनात्॥ नेयमनन्तरनिर्दिष्टदोषप्राप्तिरा-
शङ्कनीया। कस्मात्। यावदात्मभावित्वाद्बुद्धिसंयोगस्य। यावदयमात्मा संसारी भवति यावदस्य सम्यग्दर्शनेन संसारित्वं न निवर्तते
तावदस्य बुद्ध्या संयोगो न शाम्यति॥

त्यादिना। सोऽयं दृष्टान्तविरुद्ध इति। प्रश्नेति। अत्र सत्त्वमित्यापातता असंसारित्वमापाद्यं शेषं सुबोधं॥

ब्र॰ सू॰ भा॰ ननु स्वतः संसारित्वमस्तु किं बुद्ध्युपाधिनेत्यत आह॥ यावदेव चायमिति। समानो बुद्ध्या तादात्म्यापन्नः सन्नविज्ञानं ब्रह्मलोककामयो विकारोः

१२० यावदेव चायं बुद्ध्युपाधिसंबंधस्तावदेव जीवस्य जीवत्वं संसारित्वं च। परमार्थतस्तु न जीवो नाम बुद्ध्युपाधिपरिकल्पितस्वरूपव्यतिरे
केणास्ति॥ न हि नित्यमुक्तस्वरूपात्सर्वज्ञादीश्वरादन्यश्चेतनधातुर्द्वितीयो वेदांतार्थनिरूपणायामुपलभ्यते। नान्योतोस्ति द्रष्टा श्रो
ता मंता विज्ञाता नान्यदतोस्ति द्रष्टृ श्रोतृ मंतृ विज्ञातृ तत्त्वमसि अहं ब्रह्मास्मीत्यादिश्रुतिशतेभ्यः। कथं पुनरवगम्यते यावदात्मभावी
बुद्धिसंयोग इति। तद्दर्शनादित्याह। तथा हि शास्त्रं दर्शयति। योयं विज्ञानमयः प्राणेषु हृद्यंतर्ज्योतिः पुरुषः स समानः सन्नुभौ लोका
वनुसंचरति ध्यायतीव लेलायतीवेत्यादि। तत्र विज्ञानमय इति बुद्धिमय इत्येतदुक्तं भवति। प्रदेशांतरे विज्ञानमयो मनोमयः प्राणमय
श्चक्षुर्मयः श्रोत्रमय इति विज्ञानस्य मनआदिभिः सह पाठात्। बुद्धिमयत्वं च तद्गुणसारत्वमेवाभिप्रेयते। यथा लोके स्त्रीमयो देवद
त्त इति स्त्रीरागादिप्रधानोभिधीयते तद्वत्। स समानः सन्नुभौ लोकावनुसंचरतीति च लोकांतरगमनेप्यवियोगं बुद्ध्या दर्शयति। केन समा
नस्तयैव बुद्ध्येति गम्यते सन्निधानात्। तच्च दर्शयति ध्यायतीव लेलायतीवेति। एतदुक्तं भवति। नायं स्वतो ध्यायति नापि चलति ध्यायंत्यां बुद्धौ
ध्यायतीव चलंत्यां चलतीवेति। अपि च मिथ्याज्ञानपुरःसरोयमात्मनो बुद्ध्युपाधिसंबंधः न च मिथ्याज्ञानस्य सम्यग्ज्ञानादन्यत्र निवृत्तिर
स्तीत्यतो यावद्ब्रह्मात्मतानवबोधस्तावदयं बुद्ध्युपाधिसंबंधो न शाम्यते॥ ३०॥ उपाधिरस्य बुद्धिः किं न स्यादत आह प्रदेशांतर इति। विज्ञानमयो बु १२०

द्धिप्रचुर इत्यर्थः। केन समान इत्याकांक्षायामिति शेषः। श्रुतिबलाद्बुद्धेर्यावदात्मभावित्वमुक्तं संप्रति मूलेऽनुमानमस्य वियोगासंभवाच्चेति मु

[illegible]

सम्यक्ज्ञानादेव बुध्यादिसंबंधध्वंस इत्यत्र श्रुतिमाह। दर्शयतीति। मृत्युमत्येतीत्यन्वयः। आदित्यवर्णं स्वप्रकाशं तमसः परस्तादज्ञानात् इत्यभिसंध्यः
।यावदात्मभावित्वस्याभिव्यंशंकते नन्विति। सुषुप्तौ बुद्धिसंबंधस्य प्रतीतिर्न स्यात्। मलापेतत्वस्य मलमयमाहतिरित्यर्थः। स्थूलत्वस्य आत्मना बुद्धेर्मो

दर्शयति च। वेदाहमेतं पुरुषं महांतं। आदित्यवर्णं तमसः परस्तात्॥ तमेव विदित्वाति मृत्युमेति नान्यः पंथा विद्यतेऽयनायेति। ननु सुषुप्त
त्वप्रयोर्न शक्यते बुद्धिसंबंधः आत्मनोऽभ्युपगंतुं। सता सोम्य तदा संपन्नो भवतीति वचनात्। कृत्स्नविकारप्रलयाभ्युपगमाच्च। तत्कथं या
वदात्मभावित्वं बुद्धिसंबंधस्योच्यते॥ पुंस्त्वादिवत्त्वस्य सतोऽभिव्यक्तियोगात्॥ यथा लोके पुंस्त्वादीनि बीजात्मनाविद्यमानान्येव बाल्यादि ना
ष्वनुपलभ्यमानान्यविद्यमानवदभिप्रेयमाणानि यौवनादिष्वाविर्भवंति। नाविद्यमानान्युत्पद्यंते षंढादीनामपि तदुत्पत्तिप्रसंगात्।
एवमयमपि बुद्धिसंबंधः शक्त्यात्मना विद्यमान एव सुषुप्तप्रलययोः पुनः प्रबोधप्रसवयोराविर्भवति। एवं ह्येतद्युज्यते। न ह्याकस्मिकी क
स्यचिदुत्पत्तिः संभवति। अतिप्रसंगात्। दर्शयति च सुषुप्तादुत्थानमविद्यात्मकबीजसद्भावकारितं। सति संपद्य न विदुः सति संपद्यामह इति।
त इह व्याघ्रो वा सिंहो वेत्यादिना। तस्मात्सिद्धमेतत् यावदात्मभावी बुद्ध्याद्युपाधिसंबंध इति॥

यदात्मभावित्वमस्तीत्याह। पुंस्त्वेति। पुंस्त्वं रेतः आदिपदेन श्मश्र्वादिग्रहः। अस्य बुद्धिसंबंधस्येत्यर्थः। स्वापे बीजात्मनासतो बुध्यादेः प्रबोधेऽभिव्य
क्तिरित्यत्र श्रुतिमाह। दर्शयतीति। न विदुरित्यविद्यात्मकबीजसद्भावोक्तिः। ते व्याघ्रादयः पुनराभवंतीत्यभिव्यक्तिनिर्देशः॥ ॥

ब्र॰सू॰भा॰२ बुद्धिसद्भावे मानमाह स्वरूपकाहः । मिसेति मनसा ह्येव पश्यति । बुद्धिश्च न विचेष्टति । विज्ञानं यज्ञं तनुते । चेतसा वेदितव्यः । चित्तं च चेतयितव्यं चेति । तु.
अमना अश्रुतिषु मनआदिपदस्यान्तःकरणवाचित्वात् बुद्धिरूपं प्रसिद्धमित्यर्थः ॥ कथमेकस्यानेकेतिरत आह । क्वचिच्चेति । एवं च जिज्ञासोहंकारो विज्ञानं चित्तमवधान
१२१ स्मृति प्रधानं वा चित्त मिश्रमपि द्रष्टव्यं । यद्यपि श्रुत्यन्तरसिद्धं अन्तःकरणं श्रुत्यन्तरादिति तथापि सर्वसुखसोर्विषयमानं प्रति अस्माकं अनुपपन्नात्
साधयति । तत्त्रैलोक्याक्तरूपं मे उपपत्तिः अस्येति । पंचेन्द्रियाणां पंचविषमसंबंधे सति नित्यं प्रगत्योपलंभोपलब्धिप्रसंगः । मनो नित्युक्तसामग्र्यां सत्यां

नित्योपलब्ध्यनुपलब्धिप्रसंगोऽन्यतरनियमो वान्यथा ॥ तच्चात्मन उपाधिभूतमन्तःकरणं मनो बुद्धिर्विज्ञानं चित्तमिति चानेकधा तत्र तत्राभिल
प्यते । क्वचिच्च वृत्तिविभागेन संशयादिवृत्तिकं मन इत्युच्यते । निश्चयादिवृत्तिकं बुद्धिरिति । तच्चैवंभूतमन्तःकरणमवश्यमस्तीत्यभ्युपगन्तव्यं ।
अन्यथा ह्यनभ्युपगम्यमाने तस्मिन्नित्योपलब्ध्यनुपलब्धिप्रसंगः स्यात् । आत्मेन्द्रियविषयाणामुपलब्धिसाधनानां सन्निधाने सति नित्यमे
वोपलब्धिः प्रसज्येत । अथ सत्यपि हेतुसमवधाने फलाभावस्ततो नित्यमेवानुपलब्धिः प्रसज्येत । न चैवं दृश्यते । अथवान्यतरस्यात्मन इन्द्रि
यस्य वा शक्तिप्रतिबन्धोऽभ्युपगन्तव्यः ॥ १२१

तः यदि सत्तामपि सामग्र्यामुपलब्ध्यभावस्तर्हि सर्वदैवानुपलब्धिप्रसंगात् इत्यर्थः । अतः कादाचित्कोपलंभनियामकं मनः करणं वाच्यमिति भावः । ननु सत्स
पि करणान्तरेषु योगेन हृत्का कादाचित्कत्वमुपलब्धिकादाचित्कत्वमस्तु किं मनसेत्याशंक्यान्यतरनियमो वेति व्याचष्टे । अथवेति । सत्यां सामग्र्यां नित्यो
पलब्धिर्योगिकापी । आत्मनः करणस्य केनचित्कालेन प्रतिबंधनियमो वांगीकार्यः । यथा मणिना मंत्रेण शक्तिप्रतिबंध इति वाक्यार्थः ॥

अस्तु प्रतिबंधस्तत्राह। नचेति। नचेंद्रियस्यैवास्तु शक्तिप्रतिबंध इति वाच्यं। प्रतिबंधकाभावात्॥ नन्वदृष्टस्य मनसो वासंगोऽदृष्टं प्रतिबंधकमिति पु
रुषाभिमतसंगात्। नचेष्यासंगः प्रतिबंधकः मनोसत्वेतस्यासंभवात्। तथाहि। रसादीनां सहोपलब्धिप्रसंगे रसबुभुत्सारूपोऽप्यासंगो रूपाद्युपलब्धिप्रति
बंधको वाच्यः सच गुणत्वाद्रूपवद्गुणाश्रयः तत्रात्मनोसंगनिर्गुणकूटस्थस्य गुणित्वायोगान्मनएव गुणित्वेनेष्टव्यमिति तथासंगानुपपत्तेर्मनः सि

नचात्मनः शक्तिप्रतिबंधः संभवति। अविक्रियत्वात्। नापींद्रियस्य। नहि तस्य पूर्वोत्तरयोः क्षणयोरस्ति वद्धशक्तिकस्य सतोकस्माच्छक्तिः
प्रतिबध्येत। तस्माद्यस्यावधानानवधानाभ्यामुपलब्ध्यनुपलब्धी भवतस्तन्मनः। तथा च श्रुतिः अन्यत्रमना अभूवं नादर्शमन्यत्रमना अभू
वं नाश्रौषमिति। मनसा ह्येव पश्यति मनसा शृणोतीति। कामादयोप्यस्य वृत्तय इति दर्शयति। कामः संकल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिर
धृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एवेति। तस्माद्युक्तमेतत्तद्गुणसारत्वात्तद्व्यपदेश इति॥

द्धिः एतदभिप्रेत्योपसंहरति। तस्मादिति। अवधानं बुभुत्सा। नचानिच्छतोपि दुर्गंधाद्युपलंभान्न बुभुत्सोपलब्धिनियामिकेति वाच्यं। अनेकवि
षयसन्निधौ कचिदेव तस्या नियामकत्वांगीकार एतद्विषया मते पुनरिच्छादीनामात्मधर्मत्वे तेषां मनो दुर्लभमिति मंतव्यं। इच्छादिधर्मिणात्म
नाप्यासंगोपपत्तेः संप्रतिपन्नासंगस्य मानसत्वे श्रुतिमाह। तथा चेति। नकेवलं व्यासंगान्मनः सिद्धिः किंतु कामाद्याश्रयत्वेनापीत्याह। कामादय इति।
बुद्धेः प्रामाणिकत्वोक्तिफलमाह। तस्मादिति॥

शा॰ सू॰ भा॰ एवमात्मनो ऽणुत्वाद्यासीत्तत्र गत्वाऽऽगमाविकं महत्त्वं स्थापितं संप्रति तत्तो वहिष्टं कर्तृत्वं साधयति। कर्ता शास्त्रार्थवत्त्वात्॥ सनिलप्रचिद्रूपो महानात्मा
कर्त्ता न वेत्यसंगत्वश्रुतीनां विध्यादिश्रुतीनां च विप्रतिपत्तेः संशये बुद्धिकर्तृत्वेनैव विध्यादिशास्त्रोपपत्तेः कर्त्तात्मेति संख्यपक्षसत्रा सोसिद्धांत
१२१ पत्नेव तद्गुणसारत्वात्तात्मनि कर्तृत्वाध्यासस्यापि सिद्धत्वात्तु न स्यात्किमात्मकं सांख्यपक्षनिरासार्थमात्मनि कर्तृत्वाध्यासस्य पंचु नात्र पुनरुक्तिरि
त्याह। तद्गुणेति। अधिकारसंगतिः। बुद्ध्युक्तो ऽसंगत्वस्य विघातः कर्तृत्वमिति संगत्वकर्तृत्वश्रुतीनां अविरोधोक्तेः कर्तृत्वविचारात्मकाऽधि
करणत्रयस्य पादसंगतिः। श्रुतीनां मिथो विरोधाविरोधौ पूर्वोत्तरपक्षयोः फलं पक्षान्तपूर्वपक्षे बंधाभावापत्त्या शास्त्रवैयर्थ्यं फलं सिद्धान्ते कर्तृत्वादिवं
कर्ता शास्त्रार्थवत्त्वात्॥ ॥ तद्गुणसारत्वाधिकरणेनोपपादितोऽपि जीवधर्मः प्रपंच्यते। कर्ता चायं जीवः स्यात्कस्मात् शास्त्रार्थवत्त्वात्। एवं च यजे
त जुहुयाद्दद्यादित्येवं विधिशास्त्रमर्थवद्भवति। अन्यथा तदनर्थकं स्यात्तद्धि कर्तुः सतः कर्तव्यविशेषमुपदिशति। न चासति कर्तृ
त्वे तदुपपद्येत। तथेदमपि शास्त्रमेवमर्थवद्भवति एष हि द्रष्टा श्रोता मन्ता बोद्धा कर्ता विज्ञानात्मा पुरुष इति॥ ॥विहारोपदेशात्॥ इतश्च जी
वस्य कर्तृत्वं यज्जीवप्रक्रियायां संध्ये स्थाने विहारमुपदिशति। स ईयतेऽमृतो यत्र कामम् इति। स्वे शरीरे यथाकामं परिवर्तते इति च॥ उपादा
नात्॥ इतश्चास्य कर्तृत्वं यज्जीवप्रक्रियायामेव करणानामुपादानं संकीर्तयति। तदेषां प्राणानां विज्ञानेन विज्ञानमादाय इति प्राणान् गृहीत्वेति
धर्मस्य स्वार्थवत्त्वे तिमेदः। ननु बुद्धिकर्तृत्वेन शास्त्रार्थवत्तास्तु किं जीवकर्तृत्वेन तत्राह। तद्धि कर्तुः सत इति। न चेदं कर्तृत्वमिति बोधे च॥ ११२
स्वमर्थस्य चेतनस्यैव कर्तृत्वं संभवं। नत्वचेतनाया बुद्धेः॥ किंच भोक्तृत्व एव कर्तृत्वे याऽऽस्य शास्त्रफलसंबन्धो कर्तरीति स्यात्पर इति भावः॥ संध्ये स्था
ने स्वप्ने। अमृतः सम्प्रसादः पक्षे ऽमीमतेऽगच्छतीति विहारोपदेशात्। आत्मा कर्ता प्राणानां मध्ये विज्ञानं नबुध्या विज्ञानसमर्थमिन्द्रियजातं आदाय
ते इति प्राणान् गृहीत्वा परिवर्तत इति उपादानकर्तृत्वमात्मनः अकर्तृत्वे उपादानानुपपत्तेरिति भावः॥

विज्ञानशब्देन जीवस्य निर्देशो न चेत्तदा प्रथमानिर्देशाद्विपर्ययः करणत्वद्योतिततृतीयया निर्देशः स्यात् तस्मादिह श्रुतौ तनुत इत्याख्यातेन कर्तृवाचि
नाविज्ञानपदस्य सामानाधिकरण्यनिर्देशात् क्रियायामात्मनः कर्तृत्वे सत्यत इति सूत्रभाष्ययोरर्थः सूत्रान्तरमवतारयति। अत्राह इति। जीवः स्व

व्यपदेशाच्च क्रियायां न चेन्निर्देशविपर्ययः॥ ॥इतश्च जीवस्य कर्तृत्वं यदस्य लौकिकीषु वैदिकीषु च क्रियासु कर्तृत्वं व्यपदिशति। विज्ञा
नं यज्ञं तनुते। कर्माणि तनुतेऽपि चेति। ननु विज्ञानशब्दो बुद्धौ समधिगतः कथमनेन जीवस्य कर्तृत्वं सूच्यत इति नेत्युच्यते जीवस्यैवैष निर्दे
शो न बुद्धेः। न चेज्जीवस्य स्यान्निर्देशविपर्ययः स्याद्विज्ञानेनेत्येवं निरदेक्ष्यत्। तथा ह्यन्यत्र बुद्धिविवक्षायां विज्ञानशब्दस्य करणविभक्तिनिर्देशो
दृश्यते॥ तदेषां प्राणानां विज्ञानेन विज्ञानमादायेति। इह तु विज्ञानं यज्ञं तनुत इति कर्तृसामानाधिकरण्यनिर्देशात् बुद्धिव्यतिरिक्तस्यैवा
त्मनः कर्तृत्वं सूच्यत इत्यदोषः। अत्राह यदि बुद्धिव्यतिरिक्तो जीवः कर्ता स्यात्स स्वतंत्रः सन् प्रियं हितं चैवात्मनो नियमेन संपादयेन्न विपरीतं।
विपरीतमपि तु संपादयन्नुपलभ्यते। न च स्वतंत्रस्यात्मन ईदृशी प्रवृत्तिरनियमेनोपपद्यत इत्यत उत्तरं पठति उपलब्धिवदनियमः॥ यथा
यमात्मोपलब्धिं प्रति स्वतंत्रोऽप्यनियमेनेष्टमनिष्टं चोपलभते। एवमनियमेनैवेष्टमनिष्टं च संपादयिष्यति॥ उपलब्धावप्यस्वातंत्र्यमुपल
ब्धिहेतूपादानोपलंभादिति चेत्। न विषयप्रकल्पनामात्रप्रयोजनत्वादुपलब्धिहेतूनाम्। उपलब्धौ त्वनन्यापेक्षत्वमात्मनश्चैतन्ययोगात्॥

तंत्रश्चेदिष्टमेव कुर्यादस्वतंत्रश्चेन्न कर्ता स्यात् स्वतंत्रः कर्तेति स्मरणादित्यर्थः। सत्यपि स्वातंत्र्ये कारकवैचित्र्यादनियमा प्रवृत्तिरिति सूत्रेण परिहरति।
यथेति। दृष्टान्तासंप्रतिपत्त्याशंकते। उपलब्धावपीति। चक्षुरादीनां चैतन्येन विषयसंबंधार्थत्वात् स्वसंबंधोपलब्धौ चात्मनश्चैतन्यस्वभावत्वेन

शा॰ स॰ भा॰ २ न्वात्मा विषयसंबंधापकरणान्यपेक्षते चेत्कथं स्वतंत्र इत्याशंक्याह। अपि चेति। स्वातंत्र्यं नाम न स्वान्यानपेक्षत्वं ईश्वरस्यापि प्राणिकर्मापेक्ष
त्वेनास्वातंत्र्यप्रसंगात्। किं तु स्वेतरकारकप्रयोक्तृत्वे सति कारकाप्रेरितत्वं स्वातंत्र्यं। तेन स्वतंत्रोपि जीवः इष्टसाधनत्वभ्रांत्यानिष्टसाधनमप्य

१२३

अपि चायं क्रियायामपि नात्यंतमात्मनः स्वातंत्र्यमस्ति देशकालनिमित्तविशेषापेक्षत्वात् न च सहायापेक्षस्य कर्तुः कर्तृत्वं निवर्तते।
भवति ह्येधोदकाद्यपेक्षस्यापि पक्तुः पक्तृत्वं सहकारिवैचित्र्याच्च इष्टानिष्टव्यामिश्रक्रियायामनियमेन प्रवृत्तिरात्मनो न विरुध्यते॥ ॥शक्तिवि
पर्ययात्॥ ॥इतश्च विज्ञानव्यतिरिक्तो जीवः कर्ता भवितुमर्हति। यदि पुनर्विज्ञानशब्दवाच्या बुद्धिरेव कर्त्री स्यात् ततः शक्तिविपर्य
यः स्यात् करणशक्तिर्बुद्धेर्हीयेत कर्तृशक्तिश्चापद्येत॥ सत्यां च बुद्धेः कर्तृशक्तौ तस्या एवाहंप्रत्ययविषयत्वमभ्युपगंतव्यं। अहंकारपू
र्विकाया एव प्रवृत्तेः सर्वत्र दर्शनादहं गच्छाम्यहमागच्छाम्यहं भुंजेहं पिबामीति एतस्याश्च कर्तृशक्तियुक्तायाः सर्वार्थकारि करणमन्यत्क
ल्पयितव्यं शक्तोपि हि सन्कर्ता करणमुपादाय क्रियासु प्रवर्तमानो दृश्यते। ततश्च संज्ञामात्रे विवादः स्यान्न वस्तुभेदः कश्चित्करणव्य
तिरिक्तस्य कर्तृत्वाभ्युपगमात्॥

१२३

नुतिष्ठतीत्यनियमता प्रवृत्तिः स्वातंत्र्ये चेत्यविरुद्धमित्यर्थः। जीवस्य कर्तृत्वे हेत्वंतरार्थं सूत्रं। शक्तीति। बुद्धेः करणशक्तिविपरीता कर्तृशक्तिः
स्यादित्यर्थः। ततः किं तत्राह। सत्यां च बुद्धेरिति। योहं धीगम्यः स कर्ता स एव जीवो यत्तदपेक्षितं करणं तन्मन इति जीवकर्तृत्वसिद्धिरिति भावः॥

त्मनः साधनविधानस्यानुपपत्त्यात्मनः कर्तृत्वं वाच्यमित्याह। समाधीति। मुक्तिफलभोक्तुरेव तदुपायसमाधिकर्तृत्वं युक्तं। अन्यथा
त्मनोऽकर्तृत्वे तु देहादेरभोक्तुः कर्तृत्वायोगात्समाध्यभावप्रसंग इत्यर्थः। यथा च तक्षोभयथा। उक्तमात्मनः कर्तृत्वमुपजीव्य संहत्य पूर्वप
क्षमाह। एवं तावदित्यादिना सांख्यनिरासेनात्मनः कर्तृत्वे साधिते बाधकाभावात्तत्स्वाभाविकमिति मीमांसकादिपक्षः प्राप्तः। न चासंगत्वागमेन वा

समाध्यभावाच्च॥ ॥योऽप्ययमौपनिषदात्मप्रतिपत्तिप्रयोजनः समाधिरुपदिष्टो वेदांतेषु आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मंतव्यो नि
दिध्यासितव्यः सोऽन्वेष्टव्यः स विजिज्ञासितव्य ओमित्येवं ध्यायथ आत्मानमित्येवंलक्षणः सोऽप्यसत्यात्मनः कर्तृत्वे नोपपद्येत। तस्मा
दप्यस्य कर्तृत्वसिद्धिः॥ यथा च तक्षोभयथा॥ ॥एवं तावच्छास्त्रार्थवत्त्वादिभिर्हेतुभिः कर्तृत्वं शारीरस्य प्रदर्शितं तत्पुनः स्वाभा
विकं वा स्यादुपाधिनिमित्तं वेति चिंत्यते तत्रैतैरेव शास्त्रार्थवत्त्वादिभिर्हेतुभिः स्वाभाविकं कर्तृत्वमपवादहेत्वभावादित्येवं प्राप्ते ब्रू
मः॥ न स्वाभाविकं कर्तृत्वमात्मनः संभवत्यनिर्मोक्षप्रसंगात्। कर्तृत्वस्वभावत्वे ह्यात्मनो न कर्तृत्वान्निर्मोक्षः संभवति। अग्नेरि
वौष्ण्यात्। न च कर्तृत्वादनिर्मुक्तस्यास्ति पुरुषार्थसिद्धिः। कर्तृत्वस्य दुःखरूपत्वात्। ननु स्थितायामपि कर्तृत्वशक्तौ कर्तृत्व
कार्यपरिहारात्पुरुषार्थः सेत्स्यति॥

घुः अहंकर्तेत्यनुभवसहितकर्तृत्वश्रुतिबलेन तस्यागमस्य स्तोकत्वादिति भाष्ये उत्सूत्रमेव सिद्धांतयति। न स्वाभाविकमिति। पदु
क्तं बाधकाभावादिति तदसिद्धमित्याह। अनिर्मोक्षेति॥ ननु कर्तृत्वं नाम क्रियाशक्तिर्मुक्तावप्यस्ति तथापि क्रियाकार्यक्रियारूपदुः
खस्याभावान्मुक्तेः पुरुषार्थत्वसिद्धिरिति शंकते। ननु स्थितायामिति॥

शा॰ सू॰ भा॰ २ | सत्वांशशक्तौ कथं कार्यपरिहारः स्यात्तत्राह । तत्परिहारश्चेति । मुक्तौ शक्तिसत्वे कार्यं न पि स्यात् शक्त्याभावेरासंयोगात् । अस्ति हि प्रलयेपि का-
र्यपुनरुद्भवयोग्यस्य सूक्ष्मं शक्त्यं तथा च श्रुता धर्मादिति निर्णीतैः सहितकामी स्यान्मुक्तिलोप इति परिहर्तितन्निमित्तानामपीति । तन्निमि-
१२४ त्तस्य कार्यस्य शक्त्यात्मा शक्तत्वेन तत्संबंधान्निमित्तानामपि परपारमार्थिकसंबंधत्वमुक्तं मंतव्यं । संबंधेन संबंधिनेत्यर्थः । यद्वा शक्तिलक्षण-
नाक्षेपकं यस्य कार्यस्य तेन कार्येण यः संबंधस्तेनेत्यधिकरणेन तन्निमित्तेन नतु नरस्य कर्मणा देवत्वब्राह्मणत्वादिना कर्तृत्वेवाकर्तृत्वानामपि हि

तत्परिहारश्च निमित्तपरिहार एव यथाग्नेर्दहनशक्तियुक्तस्यापि काष्ठवियोगाद्दहनकार्याभावस्तद्वत्तन्निमित्तानामपि । अपि च सतो
नसंबंधेन संबंधानामसंतपरिहारासंभवात् । ननु मोक्षसाधनविधानान्मोक्षः सेत्स्यति ॥ तत्साधनापेक्षस्यानित्यत्वात् । अपि च
नित्यशुद्धबुद्धमुक्तात्मप्रतिपादनान्मोक्षसिद्धिरभिमता । तादृगात्मप्रतिपादनं च तस्याभाविके कर्तृत्वे ऽवकल्पेत । तस्मादुपाधिधर्मा
ध्यासेनैवात्मनः कर्तृत्वं न स्वाभाविकं । तथा च श्रुतिः ध्यायतीव लेलायतीवेति । आत्मेंद्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिण इति चोपाधि
संपृक्तस्यैवात्मनो भोक्तृत्वादिविशेषलाभं दर्शयति ॥

रिति शंकते । नन्विति । ज्ञानादकर्तृत्वात्मनोऽस्य कर्तृत्वमाविद्यकं स्याद्यतो ज्ञानमज्ञाननाशकं न वस्तुनिवर्तकं । परिहरति अतो मोक्षस्तत्राह नेति । आत्मनः १२४
स्वाभाविकं कर्तृत्वमभ्युपगम्यानिर्मोक्षः स्यादतः संस्पृष्टसंगनिर्विकारत्वानेकश्रुतिव्याकोपात्तस्याभाविकमित्याह । अपि चेति । न चात्मस्तावनेकश्रु-
तीनां स्तावकत्वकल्पने युक्तं । न चाहं कर्तेत्यनुभवो विरुध्यते । तस्य सांसर्गिकत्वाद्यथादाहो न कर्तृत्वादयागाहिनोध्याससत्वेनाप्युपपन्नेरित्यर्थः । कर्तृत्वस्या

[illegible]

विहृतस्तु भयबाधितं चकर्त्तव्यमित्याह। नहीति। बुद्ध्यादिसंघाताद्व्यतिरिक्ते। यदि परस्मादन्यश्चेतनो न स्यात्तदा पर एव संसारी प्रसज्येतेत्यत आह। निष्प्रप
रस्यनित्यमुक्तत्वबाधाघातादिति शंकते। पर एवेति। नव पंगु द्वस्यच्छिद्रतो: परस्य बंधं वदामः। किंतु तस्यैवाविद्याबुद्ध्यादिप्रतिबिंबितस्याविद्यप
भिन्नस्य जीवसंज्ञस्य सत्त्वं धर्माद्यावितिब्रूमः। कस्मिंतर्भेदोपि लोके बिंबप्रतिबिंबयोर्धर्मव्यवस्थापको दृष्ट इति परिहरति। नाविद्येति। अ

नहि विवेकिनां परस्मादन्यो जीवो नाम कर्त्ता भोक्ता वा विद्यते। नान्यो तोस्ति द्रष्टेत्यादिश्रवणात्। पर एव तर्हि संसारी कर्त्ता भोक्ता च प्रसज्येत।
परस्मादन्यश्चेतनो ज्ञातिमान् जीवो वा बुद्ध्यादिसंघातव्यतिरिक्तो न स्यात्। तन्नाविद्याप्रत्युपस्थापितत्वात्कर्तृत्वभोक्तृत्वयो: तथा च शास्त्रं यत्र हि द्वैत
मिव भवति तदितर इतरं पश्यतीत्यविद्यावस्थायां कर्तृत्वभोक्तृत्वे दर्शयित्वा विद्यावस्थायां त एव कर्तृत्वभोक्तृत्वे निवारयति। यत्र त्वस्य
सर्वमात्मैवाभूत्तत्केन कं पश्येदिति। तथा स्वप्नजागरितयोरात्मन उपाधिसंपर्ककृतं श्रमं श्येनस्येवाकाशे विपरिपततः श्राविपित्वा
तदभावं सुषुप्तप्रज्ञेनात्मना संपरिष्वक्तस्य श्रावयति। तद्वा अस्येतदाप्तकाममात्मकाममकामं रूपं शोकांतरमित्यारभ्य एषास्य परमा गतिरे
षास्य परमा संपदेषोऽस्य परमो लोक एषोऽस्य परम आनंद इत्युपसंहारात्॥

विशेषहितेयंबोधानुशुद्धात्मनीत्यत्र श्रुतिमाह। तथा चेति। कर्तृत्वस्य बुद्ध्युपाध्यन्वयव्यतिरेकानुविधायित्वात्श्रुतेश्च न स्वाभाविकत्वमित्याह।
तदभावमेति। आत्मैव काम्यते आनंदत्वात्। इत्यात्मकामत्वरूपं स्वातिरिक्तकाम्याभावादकामं। आप्तकामत्वादकामत्वाच्चाप्तकामं विशेषयत्याच्चेत्याह।
शोकेति। शोकांतरं दुःखास्पृष्टमित्यर्थः। तस्यैव सुषुप्तात्मरूपस्य परमपुरुषार्थतामाह। एषेति। गतिः प्राप्यं संपदैश्वर्यं लोको भोग्यः सुखं चैतस्मा बृ॰ भा॰ टि॰

शा॰ सू॰ भा॰ २ आत्मा त्वतोऽकर्त्तैव बुद्ध्याद्युपाधिना तु कर्तृत्वं तु न तथा। भा॰ यं च कस्तत्र शार्ये स्वरूपो भवति। तदेतदाहेत्यादिना। संप्रसादः सुषुप्तिः यथा स्फटिकस्य लौ-
हित्यं कुसुमाद्युपाधिकं न तथात्मनः कर्तृत्वं बुद्ध्याद्युपाधिकं किन्त्वन्वयव्यतिरेकाभ्यां सिद्धं न चैतावता बुद्धेरात्मकर्तृत्वे करणत्वविरोधो नोपादानत्वविरुध्य-
१२५ बितिपुक्तं करणत्वात्कामान्यपुपादानत्वस्यांतरंगतयाचित्संबंधिनि तु बुद्धेस्ताभ्यामुपादानत्वस्यैव सिद्धेः एवं चिदभेदाध्यस्तबुद्ध्यात्माहंकारस्य कर्तृ-
तदेतदाह यथा च तक्ष्णो ऽभयथेति। त्वर्थे चापंचः पठितः। नैवं मंतव्यं स्वाभाविकमेवात्मनः कर्तृत्वमग्नेरिवौष्ण्यमिति। यथा तु तक्षा लोके
वास्यादिकरणहस्तः कर्त्ता दुःखी भवति स एव स्वगृहं प्राप्तः विमुक्तवास्यादिकरणः स्वस्थो निर्वृत्तो निर्व्यापारः सुखी भवत्येवमविद्याप्रत्युप-
स्थापितद्वैतसंपृक्त आत्मा स्वप्नजागरितावस्थयोः कर्त्ता दुःखी भवति स तच्छ्रमापनुत्तये स्वमात्मानं परं ब्रह्म प्रविश्य विमुक्तकार्यकरणसं-
घातोऽकर्त्ता सुखी भवति संप्रसादावस्थायां तथा मुक्त्यवस्थायामप्यविद्याध्वान्तं विद्याप्रदीपेन विधूयात्मैव केवलो निर्वृत्तः सुखी भवति। त-
क्षदृष्टांतश्चैतावतांशेन द्रष्टव्यः। तक्षा हि विशिष्टेषु तक्षणादिव्यापारेष्वपेक्ष्यैव प्रतिनियतानि करणानि वास्यादीनि कर्त्ता भवति स्वश- १२५
रीरेण त्वकर्त्तैव। एवमयमात्मा सर्वव्यापारेष्वपेक्ष्यैव मनआदीनि करणानि कर्त्ता भवति स्वात्मना त्वकर्त्तैवेति। न त्वात्मनस्तक्ष्ण इवावय-
वाः संति यैर्हस्तादिभिरिव वास्यादीनि तक्षा मनआदीनि करणान्यात्मोपाददीत न्यसेद्वा। तु कश्चास्त्यर्थवत्त्वादिभिर्हेतुभिरस्वाभाविक-
मात्मनः कर्तृत्वमिति। तत्र विधिशास्त्रं तावद्यथाप्राप्तं कर्तृत्वमुपादाय कर्तव्यविशेषमुपदिशति। न कर्तृत्वमात्मनः प्रतिपादयति।।
लोपादानत्वे महावाक्यसमन्वितिः स्यादिति भावः। ननु तक्ष्णः स्वहस्तादिना वास्यादिग्रहणकर्तृत्वात्स्वतः कर्त्ता आत्मा तु निरवयवत्वादकर्त्ता इति दृष्टांत-
वैषम्यमाशंक्यौपाधिके कर्तृत्वांशेन विवक्षितेन साम्यमाह। तक्षदृष्टांतश्चेति।।

शास्त्रेणानूद्यमानं कर्तृत्वं स्वाभाविकमेव किं न स्यादित्यत आह। न च स्वाभाविकमिति। उपाध्यभावकालेश्रुतं कर्तृत्वं स्वाभाविकमेवेति शंकते।
ननु संध्य इति। किंच करणैर्विशिष्टस्य कर्तृत्वे तेषां कर्तृत्वे भीवात्मनोऽपि कर्तृविभक्तिः स्यात्॥ न चैवमस्ति ततः केवलात्मनः कर्तृत्वमित्याह।

न च स्वाभाविकमस्य कर्तृत्वमस्ति ब्रह्मात्मतोपदेशादित्यवोचाम तस्मादविद्याकृतं कर्तृत्वमुपादाय विधिशास्त्रं प्रवर्तिष्यते। कर्ता विज्ञा
नात्मा पुरुष इत्येवं जातीयकमपि शास्त्रमनुवादरूपत्वाद्यथाप्राप्तमेवाविद्याकृतं कर्तृत्वमनुवदिष्यतीति एतेन विहारोपादाने परिहृते तयोर
प्यनुवादरूपत्वात्। ननु संध्ये स्थाने प्रसुप्तेषु करणेषु स्वे शरीरे यथाकामं परिवर्तत इति विहार उपदिश्यमानः केवलस्यात्मनः कर्तृत्व
मावहति। तथोपादानेऽपि तदेषां प्राणानां विज्ञानेन विज्ञानमादायेति करणेषु कर्मकरणविभक्ती श्रूयमाणे केवलस्यैवात्मनः कर्तृत्वं ग
मयत इति। अत्रोच्यते। न तावत्संध्ये स्थानेऽत्यन्तमात्मनः करणविरमणमस्ति सधीः स्वप्नो भूत्वेमं लोकमतिक्रामतीति तत्रापि धीसंबंध
श्रवणात्। तथा च स्मरन्ति। इन्द्रियाणामुपरमे मनोऽनुपरतं यदि सेवते विषयानेव तद्विद्यात्स्वप्नदर्शनमिति। कामादयश्च मनसो वृत्तय इति श्रु
तिः॥ ताश्च स्वप्ने दृश्यन्ते। तस्मात्समना एव स्वप्ने विहरति। विहारोऽपि च तत्रत्यो वासनामय एव न तु पारमार्थिकोऽस्ति। तथा च श्रुतिरिवकारानुब
द्धमेव स्वप्नव्यापारं वर्णयति। उतेव स्त्रीभिः सह मोदमानो जक्षदुतेवापि भयानि पश्यन्निति। लौकिका अपि तथैव स्वप्नं कथयन्ति। आरुक्षमिव गि
रिशृंगमद्राक्षमिव वनराजिमिति तथोपादानेऽपि यद्यपि करणेषु कर्मकरणविभक्तिनिर्देशः तथापि तत्संपृक्तस्यैवात्मनः कर्तृत्वं द्रष्टव्यं के
वले कर्तृत्वासंभवस्य दर्शितत्वात्॥

तथेति। स्वप्ने विहारे तावदुपाध्यभावोऽसिद्ध इत्याह॥ न तावत्संध्य इति। विहारस्य मिथ्यात्वात्तत्कर्तृत्वमपि मिथ्येत्याह। विहारोऽपीति। जक्षद्भुंजान इव॥

ब्र॰सू॰भा॰२ करणविशिष्टस्य कर्तृत्वे करणेषु कर्तृविभक्तिः स्यात्करणविभक्तिरिष्टेत्यत आह । भवति च लोक इति । कर्तुरपि करणविभक्तिर्न विरुध्यते इ
१२६ ष्टत्वात् । अस्ति च कर्तृत्वप्रयोगः । विज्ञानं यज्ञं तनुत इत्यत्राविवक्षितभावः । उपादानस्य सकर्तृकत्वमङ्गीकृत्य केवलात्मनः कर्तृत्वं निरस्तं । इदानीं तत्त्वा
त्रिपत्वान्न कर्त्रपेक्षेत्याह । अपि चेति । एवं विज्ञानजीववदसङ्गी कृत्स्नजीवस्य कर्तृत्वेनत्वह इति श्रुतिरुक्तास्मृतितत्र श्रुत्साऽनुपहितात्मनः कर्तृत्वमितिभ्रा
न्तो विज्ञानं बुद्धिरिव तस्या एवात्र कर्तृत्वमुच्यते । तदुपहितात्मनः कर्तृत्वसिद्धये पदत्वमभिप्रेत्याह । यस्त्विति । योऽयं विज्ञानमय इत्यादिश्रुतिषु विज्ञानशब्दस्य

भवति च लोके नैकप्रकारा विवक्षा यथा पुरुषं तेऽसौ धोरजापुञ्जत इति च । अपि चास्मिन्नुपादाने करणव्यापारोपरमकाले विवक्ष्यते न स्वातन्त्र्यं क
स्यचिदबुद्धिरेव कस्यापि सापेक्षकरणव्यापारोपरमस्य दृष्टत्वात् । यत्त्वयं व्यपदेशो दर्शितो विज्ञानं यज्ञं तनुत इति स बुद्धेरेव कर्तृत्वं प्रापयति । विज्ञा
नशब्दस्य तत्र प्रसिद्धत्वान्मनोनन्तरं पाठाच्च । तस्य श्रद्धैव शिर इति च विज्ञानमयस्यात्मनः श्रद्धाद्यवयवत्वसंकीर्तनात् श्रद्धादीनां च बुद्धिधर्मत्व
प्रसिद्धेः । विज्ञानं देवाः सर्वे ब्रह्म ज्येष्ठमुपासत इति च वाक्यशेषात् ज्येष्ठत्वस्य च प्रथमजत्वस्य बुद्धौ प्रसिद्धत्वात् स एष वाचश्चित्तस्योत्तरोत्तरक्र
मो यद्यज्ञ इति च श्रुत्यन्तरे यज्ञस्य वाग्बुद्धिसाध्यत्वावधारणात् ॥

बुद्धौ प्रसिद्धत्वादत्र च मनोमयकोशानन्तरं पठितत्वात् श्रद्धादिलिङ्गाच्च बुद्धिरेव विज्ञानमित्यर्थः । तत्रैव । तत्रैव लिङ्गान्तरमाह विज्ञानं देवा इति । १२६
महद्यक्षं प्रथमजं य इत्यादिश्रुतौ हिरण्यगर्भबुद्ध्यात्मकबुद्धेर्ज्येष्ठत्वोक्तेः ॥ अत्र देवैरिन्द्रियैरुपास्यमानत्वं ज्येष्ठत्वं च विज्ञानं बुद्धिरेवेत्यर्थः । यत्संपूर्णं । किं
च श्रुत्यन्तरेऽपि यज्ञस्य बुद्धिकार्यत्वोक्तेः । अत्रापि यज्ञकर्तृ विज्ञानं बुद्धिरित्याह । स एष इति । चित्तेन ध्यात्वा वाचा मन्त्रोच्चारणं ततोऽपि तत्तच्चिन्तनमवाक्यः

॥ कर्त्रधिकरणम्

यद्योक्तं बुद्धेः कर्तृत्वे शक्तिवैपरीत्यप्रसंग इति। तन्न। विक्लिद्यंते तंदुलाः ज्वलंति काष्ठानि बिभर्ति स्थाली इति स्वस्वव्यापारेषु सर्वकारकाणां कर्तृत्व स्वीकारादित्याह। नचेति। तर्हि बुद्ध्यादीनां कर्तृत्वे करणत्ववार्त्ता नेव स्यादित्यत आह। उपलब्धीति। यथा काष्ठानां स्वव्यापारे कर्तृत्वेपि पाकापेक्षायां करणत्वं। तथा बुद्ध्यादीनां अध्यवसायसंकल्पादिक्रियाकर्तृत्वेप्युपलब्ध्यपेक्षया करणत्वमित्यर्थः। ननु तर्ह्युपलब्धिः कस्य व्यापार इत्यत

न च बुद्धेः शक्तिविपर्ययः करणानां कर्तृत्वाभ्युपगमेन भवति सर्वकारकाणामेव स्वस्वव्यापा
रेषु कर्तृत्वस्यावश्यंभावित्वात् तदुपलब्ध्यपेक्षं त्वेषां करणानां करणत्वं सा चात्मनः न च तस्या
प्यस्य कर्तृत्वमस्ति नित्योपलब्धिस्वरूपत्वात् ॥

आह। सा चेति। तर्हि तस्यात्मनः केवलः कर्ता स्यात् तस्य यो व्यापारः स तस्य कर्तृत्वे निष्पद्यते इत्यत आह। नचेति। उपलब्धेर्नित्यत्वे बुद्ध्यादीनां कथं करणत्वमुक्तमिति चेत् उच्यते। अखंडसाक्षिचैतन्यं बुद्धिवृत्तिभिर्भिन्नं सद्विषयावच्छिन्नत्वेन जायते। तथा च विषयावच्छिन्नचैतन्यापरपर्यायोपलब्धौ बुद्ध्यादीनां करणत्वं बुद्ध्याद्युपहितात्मनः कर्तृत्वं न केवलस्य। न च बुद्धेरेव तत्कर्तृत्वं चैतन्यस्य जडव्यापारत्वायोगादिति भावः ॥

शा॰ सू॰ भा॰ २
१२७

यच्चोक्तं बुद्धेः कर्तृत्वे स एवाहंधीगम्यो जीव इति तस्य करणान्तरं कल्पनीयं तथा च नाममात्रे विवाद इति तत्र केवलात्मनः कर्तृत्वमुक्तमिति चोदितं नि
रस्यति। अहंकारेति। मां त्यनिरामार्थं बुध्यभेदेनाध्यस्तचिदात्मकाहंकारगतकर्तृत्वं यदुक्तं तदहंधीगम्यस्य बुद्धिविशिष्टात्मन एव न केवलस्य
साक्षिणो भवितुमर्हति। दृश्यधर्मस्य साक्षिस्वभावत्वायोगात्। एवं विशिष्टात्मनः कर्तृत्वे विशेषणीभूतजडबुद्धेरेव करणत्वोपपत्तेर्न करणान्त
रकल्पनाप्रसंगः। अध्यासं विना केवलबुद्धिकर्तृत्ववादिनस्तु करणान्तरप्रसंगो दुर्वार इत्यर्थः। एवं शास्त्रार्थवत्त्वादिहेतूनामात्मनः कर्तृत्व

अहंकारपूर्वकमपि कर्तृत्वं नोपलब्धुर्भवितुमर्हति। अहंकारस्याप्युपलभ्यमानत्वात्। न चैवं सति करणान्तरकल्पनाप्रसंगः बुद्धेः क
रणत्वाभ्युपगमात्। समाध्यभावस्तु शास्त्रार्थवत्त्वेनैव परिहृतः। यथाप्राप्तमेव कर्तृत्वमुपादाय समाधिविधानात्। तस्मात्कर्तृत्वम
प्यात्मन उपाधिनिमित्तमेवेति स्थितं॥ ॥ परात्तु तच्छ्रुतेः॥ ॥ यदिदमविद्यावस्थायामुपाधिनिबन्धनं कर्तृत्वं जीवस्याभिहितं तत्किं
मनपेक्ष्येश्वरं भवति आहोस्वित् ईश्वरापेक्षमिति भवति विचारणा॥

मात्रसाधकत्वेपि स्वाभाविककर्तृत्वसाधनसामर्थ्याभावाद् अध्यस्तमेव कर्तृत्वं विध्यादिकर्तृत्वश्रुतीनामुपजीव्यं। तस्मादसंगत्वविध्यादिकर्तृ १२७
त्वश्रुतीनामविरोध इति सिद्धं। परात्तु तच्छ्रुतेः। यथा स्फटिकलौहित्याध्यासे लोहितद्रव्यं कारणं तेनासंस्फटिको लोहित इत्यनुभवात् तथा कामादिपरि
णामिबुद्धिरात्मनि कर्तृत्वाध्यासे कारणमित्युक्तं। तत्र अध्यस्तं कर्तृत्वमुपजीव्य जीवस्य कारकसंपन्नत्वादीश्वरस्य कारयितृत्वश्रुतेश्च संशयमा
ह। यदिदमिति। अत्रैवमपेक्षत्वे स्वातन्त्र्यश्रुतीनां कर्तृत्वाभावे तु विध्यादिश्रुतिभिर्विरोधसमाधानात्संगतिः॥ ॥ ॥

कर्ममीमांसकमते न एवं प्रसज्यते । तत्रेत्यादिना । वृष्ट्यादिकारकसंपन्नत्वादीश्वरव्यतिरिक्ते कर्तृत्वव्यतिरेकानुपलब्धेर्नेश्वरः प्रयोजकः । किंच प्र
योजकत्वे नैर्घृण्यादिप्रसंगादित्याह । क्लेशात्मकेन चेति । इतो जरमिदं चोद्यमिति शंकते । तन्नेति । पूर्वं जीवस्य धर्माधर्मवत्त्वे सिद्धे बलात्तत्तत्सापे
क्षत्वाद्विषमजगत्कर्तृत्वमविरुद्धमित्युक्तं संप्रति ईश्वराधीने जीवस्य कर्तृत्वे सिद्धे धर्माधर्मवत्त्वसिद्धिः तद्वत्त्वसिद्धौ तत्सापेक्षकारयितृत्वसिद्धिः

तत्र शास्त्रं तावन्नेश्वरमपेक्षते जीवः कर्तृत्वे इति कस्मात् अपेक्षाप्रयोजनाभावात् । अयं हि जीवः स्वयमेव रागद्वेषादिदोषप्रयुक्तः कारकां
तरसामग्रीसंपन्नः कर्तृत्वमनुभवितुं शक्नोति तस्य किमीश्वरः करिष्यति ॥ न च लोके प्रसिद्धिरस्ति । कृष्यादिकासु क्रियासु अनडुहादि
वदीश्वरोऽपेक्षित इति क्लेशात्मकेन च कर्तृत्वेन जंतून् संसृजत ईश्वरस्य नैर्घृण्यं प्रसज्येत विषमफलं चैषां कर्तृत्वं विदधतो वैषम्यं
। ननु वैषम्यनैर्घृण्ये न सापेक्षत्वादित्युक्तं सत्यमुक्तं सतीश्वरस्य सापेक्षत्वसंभवे ॥ सापेक्षत्वं चेश्वरस्य संभवति सतोर्जंतूनां धर्मा
धर्मयोस्तयोश्च सद्भावः सति जीवस्य कर्तृत्वे तदेव चेत्कर्तृत्वमीश्वरापेक्षं स्यात् किंविषयमीश्वरस्य सापेक्षत्वमुच्यते अकृताभ्यागमश्चै
वं जीवस्य प्रसज्येत तस्मात्स्वत एवास्य कर्तृत्वमिति ॥

ईश्वरस्य कारयितृत्वे सिद्धे जीवस्य कर्तृत्वसिद्धिरिति चक्रकापत्तेः कर्मसापेक्षत्वं न संभवतीत्युच्यत इत्याह । सत्यमिति । अस्तु कर्मनिरपेक्षस्य प्र
वर्तकत्वं तत्राह । कृतेति । अनपेक्षस्य प्रवर्तकत्वे धर्मवर्जितान् दुःखेन अधर्मवतः सुखे न प्रयोजयेत् । कारुणिकत्वे वा सर्वे सुखिन एकरूपाः स्यु
रिति जगद्वैचित्र्यं विध्यादिशास्त्रं च न स्यात् । तस्माद्विध्यादिशास्त्रार्थवत्त्वाय रागद्वेषाप्तं स्वत एव जीवस्य कर्तृत्वं वाच्यं । तथापि कारयितृत्व

[illegible]

ईश्वरत्वाविकाशास्त्रा श्रुतिरितिशास्त्रेतिद्धं तृप्ति एतामिति। यथा चंदनादिसामग्रीरसां धर्मव्यतिरेकेतु खध्यतिरेकेऽपि हा... पुण्ये वैकुण्ठे न
कर्मणा भवती सादिसामग्रीरूपा एवादि धर्मस्य हेतुत्वसिद्धिः एवमीश्वरस्यापि शास्त्र्वान्यथाकारयित्वे ते सिद्धिरिति भावः। धर्माधर्मौ धर्माभ्यामेव फलं न

एतत्प्राप्तिं तु सूत्रेण व्यावर्त्य प्रतिजानीते परादिति। अविद्यावस्थायां कार्यकरणसंघाताविवेकदर्शिनो जीवस्याविद्यातिमिरान्धस्य सतः परस्मा
दात्मनः कर्माध्यक्षात्सर्वभूताधिवासात्साक्षिणश्चेतयितुरीश्वरात्तदनुज्ञया कर्तृत्वभोक्तृत्वलक्षणस्य संसारस्य सिद्धिस्तदनुग्रहहेतुकेनैव
च विज्ञानेन मोक्षसिद्धिर्भवितुमर्हति। कुतः। तच्छ्रुतेः। यद्यपि दोषप्रयुक्तः सामग्रीसंपन्नश्च जीवः यद्यपि च लोके कृष्यादिषु कर्मसु नेश्वरका
रणत्वं प्रसिद्धं तथापि सर्वास्वेव प्रवृत्तिष्वीश्वरो हेतुकर्तेति श्रुतेरवसीयते। तथा हि श्रुतिर्भवति एष ह्येव साधु कर्म कारयति तं यमेभ्यो लोके
भ्य उन्निनीषत एष उ एवासाधु कर्म कारयति तं यमधो निनीषते इति। य आत्मनि तिष्ठन्नात्मानमन्तरो यमयतीति चैवंजातीयका।
नन्वेवमीश्वरस्य कारयितृत्वे सति वैष×व्यावर्त्तनार्थः। कृतो यः प्रयत्नो जीवस्य धर्माधर्मलक्षणः तदपेक्ष एवैनमीश्वरः कारयति। अ
तश्चैते चोदिता दोषाः न प्रसज्यन्ते। जीवकृतधर्माधर्मवैषम्यापेक्ष एव तत्तत्फलानि विषमं विभजेत् पर्जन्यवदीश्वरो निमित्तत्वमात्रे १२८
ण॥

वैषम्यसिद्धेरलमीश्वरेणेत्याशंक्य बीजैरेवांकुरवैषम्यसिद्धेः पर्जन्यवैयर्थ्यं स्यात्। यदि विशेषहेतूनां साधारणहेत्वपेक्षत्वात्तद्वैयर्थ्यं
तर्हीश्वरस्यापि साधारणहेतुत्वान्न वैयर्थ्यमिति लाह। पर्जन्यवादिति॥ ॥पिनाकिने नमः॥

× म्यनैर्घृण्ये स्यातां अकृताभ्यागमश्च जीवस्येति। नेत्युच्यते। कृतप्रयत्नापेक्षस्तु विहितप्रतिषिद्धावैयर्थ्यादिभ्यः। तुश
त × ब्दश्चोदितदोष२

दृष्टांतं बिवृणोति। यथेति। अतिदीर्घा वृक्षीयं यथोगुच्छाः पुष्पलवकाः। गुल्मास्तु ह्रस्वव एवमादि इति भेदः। किमीश्वरस्य कारयितृत्वे जीवस्य
कर्तृत्वं न स्यात् इत्याशंक्यते। उत चक्रकापत्तिर्वा। नाद्य इत्याह। नैष दोष इति। अध्यापकाधीनस्य वटोः मुख्याध्ययनकर्तृत्ववदीनादिति भावः। चक्र
कं निरस्यति। अपिचेति। अनवद्य जीवस्य कर्तृत्वं ईश्वरस्य कारयितृत्वं चेति शेषः। ईश्वरस्य सापेक्षत्वे विध्यादिशास्त्रप्रामाण्यमन्यथा त्वनुपपत्तिमत्ता

यथा लोके नानाविधानां गुच्छगुल्मादीनां व्रीहियवादीनां चासाधारणेभ्यः स्वस्ववीजेभ्यो जायमानानां साधारणं निमित्तं भवति पर्जन्यः। नह्यस
ति पर्जन्ये रसपुष्पफलपलाशादि वैषम्यं तेषां जायेत। नाप्यसत्सु स्वस्ववीजेषु। एवं जीवकृतप्रयत्नापेक्ष ईश्वरस्तेषां शुभाशुभं विदध्यादिति
श्लिष्यते। ननु कृतप्रयत्नापेक्षत्वमेव जीवस्य परायत्ते कर्तृत्वे नोपपद्यते नैष दोषः परायत्तेऽपि हि कर्तृत्वे करोत्येव जीवः कुर्वन्तं हि तमीश्वरः का
रयति अपि च पूर्वप्रयत्नमपेक्ष्येदानीं कारयति पूर्वतरं च प्रयत्नमपेक्ष्य पूर्वमकारयत् इत्यनादित्वात् संसारस्य नवद्यं। कथं पुनरव
गम्यते कृतप्रयत्नापेक्ष ईश्वर इति विहितप्रतिषिद्धावैयर्थ्यादिभ्य इत्याह। एवं हि स्वर्गकामो यजेत ब्राह्मणो न हन्तव्य इत्येवं जातीयकस्य विहि
तस्य प्रतिषिद्धस्य चावैयर्थ्यं भवति अन्यथा तदनर्थकं स्यात्। ईश्वर एव विधिप्रतिषेधयोर्नियुज्येत अत्यन्तपरतन्त्रत्वात् जीवस्य तथा विहि
तकारिणमप्यनर्थेन संसृजेत्। प्रतिषिद्धकारिणमपि अर्थेन ततश्च प्रामाण्यं वेदस्यास्तमियात् ईश्वरस्य चात्यन्तानपेक्षत्वे लौकिकस्यापि पुरु
षकारस्य वैयर्थ्यं॥

ापत्ति॥ कृपणिसादिना॥ एवं सापेक्षत्वे सत्यवैयर्थ्यं भवति अन्यथा तु अनपेक्षत्वे वैयर्थ्यं प्रपंचयति। ईश्वर इति। तयोः स्थाने स एव नियुज्येतेत्यत्र
भिषिञ्चेत्। तयोः कार्यं स एव कुर्यात् इति यावत्। तथा च जीवस्य निरपेक्षेश्वरपरतन्त्रत्वात् विध्यादिशास्त्रमकिंचित्कारमनर्थकं स्यादिति संबंधः। पुरु

शा॰ स॰ भा॰ २ आदिश्रुत्यर्थमाह। तथेति। पूर्वोक्तदोषो कृताभ्यागमादिः। तस्मात्कर्मसापेक्षेश्वरस्य कारयितृत्वाद्वैषम्येवेत्यादिश्रुतेर्विध्यादिश्रुत्यविरोध इति सिद्धं॥
१२६ अंशः एके॥ निःस्वः स्वप्रकाशो न णुः अकर्त्ता जीव इति शोधितत्त्वंपदार्थस्याद्वयब्रह्मैक्यसाधनेन भेदाभेदश्रुतीनां विरोधसमाधानात् संगतिः। पूर्व
पक्षे फलगभिन्नब्रह्मासिद्धिः। सिद्धान्ते तत्सिद्धिरिति भेदः। पूर्वोक्तोपकार्योपकारकभावाक्षिप्तं जीवेश्वरयोः संबंधं विषयीकृत्य द्विविधदृष्टान्तदर्शना
त्संशयमाह। ततश्चेति। स्वामिभृत्ययोरिवात्मसंबंधः संभवाद्यः कश्चित्संबंध इति पर्यनुयुक्तः उत्सूत्रेण हि। अथवेति। अनेन पञ्चाग्निनिस्थितिस्त्रिसा
तया देशकालनिमित्तानां पूर्वोक्तदोषप्रसंगश्चेत्सर्वजातीयकं दोषजातमादिग्रहणेन दर्शयति॥ ॥अंशो नानाव्यपदेशादन्यथा चापि दाशकि
तवादित्वमधीयत एके॥ ॥जीवेश्वरयोरुपकार्योपकारकभाव उक्तः स च संबंधो रेवलोके दृष्टो यथा स्वामिभृत्ययोर्यथा वाग्निविस्फुलिंग
योः ततश्च जीवेश्वरयोरुपकार्योपकारकभावाभ्युपगमात् किं स्वामिभृत्यवत्संबंधः आहोस्वित् अग्निविस्फुलिंगवदिति। अस्यां विचिकित्सा
यामनियमो वा प्राप्नोति अथवा स्वामिभृत्यप्रकारेष्वेवेशित्रीशितव्यभावस्य प्रसिद्धत्वात्तद्विध एव संबंध इति प्राप्नोति। अतो ब्रवीत्यंश इति। जी
व ईश्वरस्यांशो भवितुमर्हति यथाग्नेर्विस्फुलिंगः॥
दिश्रुतिप्रसिद्धभेदकोटिर्दर्शिता। एवं तत्त्वमस्यादिश्रुतिसिद्धभेदकोटिर्द्रष्टव्या। तथा च भेदाभेदश्रुतीनां समबलत्वाद्विरोधे सति संबंधानिश्चया
त्संबंधापेक्षस्य पूर्वोक्तोपकार्योपकारकभावस्यासिद्धिरित्याक्षेपात्संगतिः। लोकसिद्धान्यत्वकभेदानुवादित्वेन भेदश्रुतीनां दुर्बलत्वाद्दृष्टान्तफल १२६
वदभेदश्रुत्यनुसारेण मंकल्पितभेदनियंयधर्मांशांशीभावसंबंध इति सिद्धं। तपाप्। अत इत्यादिना॥ ॥ ॥ ॥

अग्नेः सांशत्वेऽपि निष्फलेश्वरस्य कथं सांशत्वमत आह। अंश इवेति। जीवस्य त्वनुषंगः। भेद एव चेत्तस्य स्वामिभावो युक्तो नांशांशिभाव इति शंकते ननु
चेति। अभेदस्यापि सत्वाद् अंशांशिभाव इत्याह। अत इति। अत इति। वंचकितव इति पदांतसंज्ञो नामरूपे निमित्तविशिष्टमुक्तमन्वेति। तं विद्वानमृतो
अंश इवांशः न हि निरवयवस्य मुख्योंऽशः संभवति। कस्मात्पुनः निरवयवत्वात् तस्य खलु न भवति नानाव्यपदेशात् सोऽन्वेष्टव्यः स विजिज्ञासितव्य
एतमेव विदित्वा मुनिर्भवति। पश्चात्मनि तिष्ठन्नात्मानमंतरो यमयतीति चेत्यजातीयको भेदनिर्देशो नासति भेदे युज्येत। ननु चापं नानाव्यपदेशः
सुतरां स्यात् भिन्नस्वरूपे युज्यत इत्यत आह। अन्यथा चापीति। न च नानाव्यपदेशादेव केवलादंशत्वप्रतिपत्तिः किं तर्ह्यन्यथा चापि व्यपदेशोऽभ
वस्य नानात्वस्य प्रतिपादकः न हि यथोक्ते शाखिनो दाशकितवादिभावं ब्रह्मणः आमनंति आथर्वणिकाः ब्रह्मसूक्ते ब्रह्मदाशा ब्रह्मदासा ब्रह्मैवेमे कि
तवा इत्यादिना दाशा य एते कैवर्ताः प्रसिद्धाः ये चामी दासाः स्वामिष्वात्मानमुपक्षिपंति ये चान्ये कितवा द्यूतकृतस्ते सर्वे ब्रह्मैवेति निहीनजंतू
दाहरणेन सर्वेषामेव नामरूपकृतकार्यकरणसंघातप्रविष्टानां जीवानां ब्रह्मत्वमाह। तथान्यत्रापि। ब्रह्मप्रक्रियायामेवायमर्थः प्रपद्यते। त्वं स्त्री त्वं
पुमानसि त्वं कुमार उत वा कुमारी त्वं जीर्णो दंडेन वंचसि त्वं जातो भवसि विश्वतोमुख इति। सर्वाणि रूपाणि विचित्य धीरः। नामानि कृत्वाभिवदन्यदा
स्ते इति। चा। नान्योऽतोऽस्ति द्रष्टेत्यादि श्रुतिभ्यश्चास्यार्थस्य सिद्धिः। चैतन्यं चाविशिष्टं जीवेश्वरयोः यथाग्निविस्फुलिंगयोरौष्ण्यं अतो भेदाभेदावगमाभ्यां
अंशत्वावगमः कुतश्चांशत्वावगमः॥ ॥मंत्रवर्णाच्च॥ मंत्रवर्णाच्चैतमर्थमवगम्यते। तावानस्य महिमा ततो ज्यायांश्च पूरुषः पादोऽस्य सर्वा भूतानि
त्रिपादस्यामृतं दिवीति॥ अत्र भूतशब्देन जीवप्रधानानि स्थावरजंगमानि निर्दिशति॥
भवतीति श्रुत्यर्थः। श्रुतिसिद्धभेदस्य युक्तिमाह। चैतन्यं चेति। जीवो ब्रह्मैव चेतनत्वादित्यर्थः। अस्य सहस्रशीर्षाः पुरुषस्य तावानयं चो महिमा विभूतिः
पुरुषस्त्वस्मात्सर्वस्मात्ज्यायान्महत्तरः॥

शा॰ सू॰ भा॰ २ भूतानि देहिनो जीवा इत्यत्र नियामकमाह। अहिंसन्निति। तीर्थानि शास्त्रीयकर्माणि तेभ्योऽन्यत्र प्राणिहिंसामकुर्वन् ब्रह्मलोकं प्राप्नोतीत्यर्थः। अत्र
भूतशब्दस्य प्राणिषु प्रयोगात् मन्त्रोक्तं मन्त्रेऽपि तथेति भावः। भूतानां पादत्वेऽपि अंशत्वं कुतस्तत्राह। अंशः पाद इति। जीवस्य पुरुषांशत्वं मन्त्रोक्तं भग-
१३० वद्वचनेन भगवद्गीतामुपदाहरति सूत्रकारः। अपि चेति। अखण्डभिन्ने ह्यच्छिन्नेऽच्छिन्ने तत्स्वभावप्रसिद्धेः ईशितृत्वं जीवस्य कृपणत्वमीश्वरांशत्वमित्यादौ व्य-
कल्पितभेदेनापीशितृत्वलोपपत्तेरन्यथासिद्धं भेदशास्त्रबलाद्दृशत्वमित्याह। परिच्छिन्ना दिना। औपाधिकेश्वरस्य निर्मलत्वे जीव एव तन्नियन्ता किं
अहिंसन्सर्वभूतानि अन्यत्र तीर्थेभ्य इति प्रयोगात्। अंशः पादो भाग इत्यनर्थान्तरं। तस्मादंशत्वावगमः कुतश्चांशत्वावगमः। अपि च स्मर्य-
ते॥ अपि च ईश्वरगीतास्वपि चेश्वरांशत्वं जीवस्य स्मर्यते। ममैवांशो जीवलोके जीवभूतः सनातन इति तस्मादप्यंशत्वावगमः॥ यत्तूक्तं स्वामि-
भृत्यादिषु वैशिष्ट्याशितृत्वभावो लोके प्रसिद्ध इति। यद्यप्येवं लोकप्रसिद्धिः तथापि शास्त्राच्छ्रयत्वमीशितृत्वं तस्य भावश्च नि श्रूयते।
निरतिशयोपाधिसंपन्नश्चेश्वरो निहीनोपाधिसंपन्नान् जीवान् प्रशास्तीति न किंचिद्विप्रतिषिध्यते। अत्राह। ननु जीवस्येश्वरांशत्वाभ्युप-
गमे तदीयेन संसारदुःखोपभोगेनांशिन ईश्वरस्यापि दुःखित्वं स्यात् यथा लोके हस्तपादाद्यन्यतमाङ्गगतेन दुःखेनाङ्गिनो देवदत्तस्य दुःखित्वं
तद्वत्।
तस्मात् इत्यत आह। निरतिशयेति नितरां हीनः शरीराद्युपाधिः आज्ञानिकोपाधितारतम्यादीशेशितव्यव्यवस्था न वस्तुतः। तदुक्तं सुरेश्वरा- १३०
चार्यैः। ईशितृत्वसंबन्धः प्रत्यग्ज्ञानहेतुजः। सम्यग्ज्ञाने तमोध्वस्तावीश्वराणामपीश्वर इति। इतरस्य जगतस्तारयति। अत आह इति। ईश्व-
रः स्वांशदुःखेन दुःखी अस्मिता देवदत्तवदित्यर्थः॥

ततः किं तत्राह। ततश्चेति। ऐक्यात्सर्वजीवदुःखसमष्टिमात्मपेक्ष्य परमात्मनः संसारो वरं। तत्रस्थदुःखमात्रानुभवादित्यर्थः। नैवं पर इति प्रतीतितस्तावद्विभज्ये
ते यथा जीव इति। देवदत्तदृष्टान्ते भ्रान्तिकामकर्मरूपदुःखसामग्रीसत्त्वमुपाधिः। तदभावाच्चेश्वरस्य दुःखित्वसप्राप्तिः। दृष्टं चैतदभेदेपि बिंबप्र

ततश्च तत्प्राप्तानां महत्तरं दुःखं प्राप्नुयात्। अतो वरं पूर्वावस्थः संसार एवास्त्विति सम्यग्दर्शनानर्थक्यप्रसंगः स्यादिति। अत्रोच्यते। प्रकाशा
दिवच्चैवं परः॥ ॥यथा जीवः संसारदुःखमनुभवति नैवं पर ईश्वरोनुभवतीति प्रतिजानीमहे। जीवो ह्यविद्यावेशवशात् देहाद्यात्मभावमि
वगत्वा तत्कृतेन दुःखेन दुःख्यहमिति अविद्याकृतदुःखोपभोगमभिमन्यते नैवं परमेश्वरस्य देहाद्यात्मभावो दुःखाभिमानो वास्ति। जीवस्यापि
अविद्याकृतनामरूपनिर्वृत्तदेहेंद्रियाद्युपाध्यविवेकभ्रमनिमित्त एव दुःखाभिमानः न तु पारमार्थिकोस्ति। यथा च स्वदेहगतदाहछेदादि
निमित्तं दुःखं तदभिमानभ्रान्त्यानुभवति। तथा पुत्रमित्रादिगोचरमपि दुःखं तदभिमानभ्रान्त्यैवानुभवत्यहमेव पुत्रोहमेव मित्रमित्येवं स्नेहव
शेन पुत्रमित्रादिष्वभिनिविशमानः ततश्च निश्चितमेतदवगम्यते। मिथ्याभिमानभ्रमनिमित्त एव दुःखानुभव इति व्यतिरेकदर्शनाच्चै
वमवगम्यते। तथा हि पुत्रमित्रादिमत्सु बहुषूपविष्टेषु तत्संबंधाभिमानिष्वितरेषु च पुत्रो मृतो मित्रं मृतमित्येवमाद्योषिते येषामेव पुत्रमित्रा
दिमत्त्वाभिमानस्तेषामेव तन्निमित्तं दुःखमुत्पद्यते नाभिमानहीनानां परिव्राजकानां॥

तिबिंबयोर्धर्मव्यवस्थेतीति भावः। दुःखस्य भ्रान्तिकृतत्वं प्रपंचयति। जीवस्यापीत्यादिना॥ भ्रान्तौ सत्यां दुःखमित्यन्वयमुक्त्वा भ्रान्त्यभावे दुःखाभावद
र्शनाच्च भ्रान्तिजं तद्दुःखमिति निश्चीयत इत्याह॥ व्यतिरेकेति। इतरेषु अभिमानशून्येष्वित्यर्थः॥

जीवस्यापि सम्यग्ज्ञानिनो दुःखाभावो दृष्टः किमु वाच्यं नित्यसर्वज्ञेश्वरस्येत्याह। अत एवेति। एवमंशित्वहेतोः सोपाधिकत्वमुक्त्वा योंऽशी स वस्तुतः स्वां-
शधर्मवानिति व्याप्तिः स्थलद्वयेप्यभिचारयति। प्रकाशादिवदिति। वस्तुतः स्वांशदुःखित्वमस्माभिरप्यस्मदेवदत्तदृष्टांते वैकल्यमप्याह जीवस्येति। क-

अतश्च लौकिकस्यापि पुंसः सम्यग्दर्शनार्थवत्त्वं दृष्टं किमुत विषयशून्यादात्मनो न्यत्वं तरमय रूपतो नित्यचैतन्यमात्रस्वरूपस्येति त-
स्मान्नास्ति सम्यग्दर्शनानर्थक्यप्रसंगः। प्रकाशादिवदिति निदर्शनोपन्यासः। यथा प्रकाशः सौरश्चान्द्रमसो वा वियद्व्याप्यावतिष्ठमानोऽङ्गु-
ल्याद्युपाधिसंबंधात्तेषु ऋजुवक्रादिभावं प्रतिपद्यमानेषु तद्भावमिव प्रतिपद्यमानोपि न परमार्थतस्तद्भावं प्रतिपद्यते यथा वाकाशो घटा-
दिषु गच्छत्सु गच्छन्निव भाव्यमानोपि न परमार्थतो गच्छति यथा वोदशरावादिकंपनात्तद्गते सूर्यप्रतिबिंबे कंपमानेपि न तद्वान्सूर्यः कंप-
ते एवमविद्याप्रत्युपस्थापितबुद्ध्याद्युपहिते जीवाख्येंऽशे दुःखायमानेपि न तद्वानीश्वरो दुःखायते। जीवस्यापि दुःखप्राप्तिरविद्यानिमित्तैवेत्यु-
क्तं। तथा चाविद्यानिमित्तजीवभावव्युदासेन ब्रह्मभावमेव जीवस्य प्रतिपादयंति वेदवादास्तत्त्वमसीत्येवमाद्याः तस्मान्नास्ति जैवेन दुःखेन
परमात्मनो दुःखित्वप्रसंगः॥

ल्पितदुःखित्वसाधर्म्यं तु अंशत्वसाधनाभावादीश्वरे नास्तीति तर्कः। किंच जीवस्येश्वरस्य वा वस्तुतो दुःखित्वानुमानं न युक्तं। आगमबाधादित्याह। तथा चे-

स्मृत्याप्यनुमानं वाच्यमित्याह। स्मरंति चेति। सूत्रं व्याचष्टे स्मरंतीति। तत्र जीवपरयोर्मध्ये कर्मात्मा कर्मी अयं जीवः दशेंद्रियाणि पंच प्राणाः मनो
बुद्धिश्चेति सप्तदशसंख्याको राशिर्लिंगं सूक्ष्मं च शरीरं श्रुतिस्मृत्युक्तमर्थं दृष्टांतेनाह। प्रकाश दृष्टांतेति। यथा आदित्यः प्रकाशरूपो देहैर्न लिप्यते तथेत्यर्थः। यतो वाल्पैः
संगः तस्मान्न लिप्यते। एवमंशित्वकृतमीश्वरे दोषं निरस्याग्रे तूक्तं जीवस्यांशत्वं देहाद्युपाधिकमिति स्फुटयितुमलं तत्स्वरूपे समादायाक्षिपति। अ

स्मरंति च॥ ॥स्मरंति च व्यासादयः। यथा जीवो दुःखेन न परमात्मा दुःखायत इति। तत्र यः परमात्मा हि स नित्यो निर्गुणः स्मृतः। न लिप्यते फ
लैश्चापि पद्मपत्रमिवांभसा। कर्मात्मा त्वपरो योऽसौ मोक्षबंधैः स युज्यते। स सप्तदशकेनापि राशिना युज्यते पुनरिति चशब्दात् समामनंति चेति वाक्यशे
षः। तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीति एकस्तथा सर्वभूतांतरात्मा न लिप्यते लोकदुःखेन बाह्य इति चात्राह। यदि तर्हि एक
एव सर्वेषां भूतानामंतरात्मा स्यात् कथमनुज्ञापरिहारौ स्यातां लौकिकौ वैदिकौ चेति। ननु चांशो जीव ईश्वरस्येत्युक्तं तद्भेदाच्चानुज्ञापरिहारौ तद
आश्रयावव्यतिकरावपि व्युपपद्येते किमत्र चोद्यत इति उच्यते। नैतदेवं। अनंशत्वमपि जीवस्याभेदवादिन्यः श्रुतयः प्रतिपादयंति। तत्सृष्ट्वा तदेवानुप्रा
विशत्। नान्योऽतोऽस्ति द्रष्टा। मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति। तत्त्वमसि। अहं ब्रह्मास्मीत्येवंजातीयकाः। ननु भेदाभेदावगमाभ्यामंशत्वं सिद्
ध्यतीत्युक्तं स्यादेतदेवं यद्युभावपि भेदाभेदौ प्रतिपिपादयिषितौ स्यातां। अभेद एव त्वत्र प्रतिपिपादयिषितः ब्रह्मात्मत्वप्रतिपत्तौ पुरुषार्थसिद्धेः स्वभाव
प्राप्तस्तु भेदो नूद्यते न च निरवयवस्य ब्रह्मणो मुख्योंऽशो जीवः संभवतीत्युक्तं तस्मात्पर एवैकः सर्वेषां भूतानामंतरात्मा जीवभावेनावस्थित इत्
यतो वक्तव्यानुज्ञापरिहारोपपत्तिः॥
चाहेत्यादिना। कथं तर्ह्यन्वयः तद्भेदात् अंशः अभेदात् निरवयवब्रह्मणो मुख्योंऽशो न संभवतीति वदता सिद्धांतिना अभेदो नास्तीत्युक्तं भवति। भेदा
भावे चांशांशित्वाभावादनुज्ञादिभेदेऽस्य व्यवहारानुपपत्तिरित्याक्षेपाभिप्रायः। एवमपि भेदस्यासत्त्वं न रज्जूरगवद् ब्रूमः किंतु मिथ्यात्वं वदामः॥

तथा च देहाद्युपाधिभेदेनांशजीवानामाब्रह्मबोधात्कल्पितभेदात्तद्भेदव्यवहारोपपत्तिरिति सर्वं समाधत्ते। तामित्यादिना। ननु भ्रान्तेः कृतत्वे
शा. स. भा. तन्निवृत्तौ व्यवहारविच्छेदः स्यात् इत्यत आह। नचखाइत्यादिना। प्रततेति। संततताविशेषो भेदः। अनियोज्यत्वाद्ब्रह्मविदः शास्त्रानर्थक्यमिति भिन्न
१३२ हानतस्येति। नियोगविषयद्वैताभावादात्मन्यसाध्ये नियोगानुपपत्तेर्न ब्रह्मविन्नियोज्य इत्यर्थः। नन्वामुष्मिकफलहेतुककर्मणि देहभिन्नात्मविवे

तां ब्रूमः॥ ॥अनुज्ञापरिहारौ देहसंबन्धाज्ज्योतिरादिवत्॥ ऋतौ भार्यामुपेयादित्यनुज्ञा गुर्वङ्गनां नोपगच्छेदिति परिहारः तथाग्नीषोमीयं प
शुं संज्ञपयेदित्यनुज्ञा न हिंस्यात्सर्वा भूतानीति परिहारः एवं लोके मित्रमुपसेवितव्यमित्यनुज्ञा शत्रुः परिहर्तव्य इति परिहारः। एवंप्रका
रावनुज्ञापरिहारावेकत्वेऽप्यात्मनो देहसंबन्धात्स्याताम्। देहैः संबन्धो देहसंबन्धः कः पुनर्देहसंबन्धो देहादिरयं संघातोऽहमेवेत्यात्मनि विपरीतप्रत्य
योत्पत्तिः दृष्टा च सा सर्वप्राणिनामहं गच्छाम्यहमागच्छाम्यहमन्धोऽहमनन्धोऽहं मूढोऽहममूढ इत्येवमात्मिका न ह्यस्याः सम्यग्दर्शनादन्य
न्निवारकमस्ति प्राक्तु सम्यग्दर्शनात्प्रततैषा भ्रान्तिः सर्वजन्तुषु तदेवमविद्यानिमित्तदेहाद्युपाधिसंबन्धकृतादविशेषादेकत्वाभ्युपगमे
ऽप्यनुज्ञापरिहारावुपकल्पेते सम्यग्दर्शिनस्तर्ह्यनुज्ञापरिहारानर्थक्यं प्राप्तं न तस्य कृतार्थत्वान्नियोज्यत्वानुपपत्तेः हेयोपादेययोर्हि नियो
ज्यो नियोक्तव्यः स्यात् आत्मनस्त्वतिरिक्तं हेयमुपादेयं वा वस्त्वपश्यन्कथं नियुज्येत न चात्मात्मन्येव नियोज्यः स्यात् शरीरव्यतिरेकदर्शि
न एव नियोज्यत्वमिति चेत् न तत्संहतत्वाभिमानात् सत्यं व्यतिरेकदर्शिनो नियोज्यत्वं तथापि व्योमादिवद्देहाद्यसंहतत्वमपश्यत आत्मनो नियो
ज्यत्वाभिमानः॥ तथा च ब्रह्मविन्नियोज्यः विवेकिनां कर्माधिकारविदिति शङ्कते। शरीरव्यतिरेकेति। परोक्षतद्व्यत्यभिमानः॥
वेकस्यापरोक्षभ्रमाविरोधित्वात्कर्मणि देहादभेदभ्रमोऽस्ति तथा च भ्रम उपाधिरिति परिहरति। नेत्यादिना। व्योमवद्देहाद्भिन्नत्वं देहभिन्नत्वमपश्यतः॥ १३२

आत्मविन्ननियोज्यः अभ्रांतत्वात्सुषुप्तवदित्याह नहीति। देहादिष्वसंहतत्वदर्शिनः संहतत्वदर्शिनस्तु तस्य भेदभ्रांतिरहितस्य सुषुप्तस्येति यावत्। अ
ज्ञस्यापि भ्रांत्यभावकाले नियोज्यत्वं न दृष्टं किमु वाच्यमात्मविद इत्यर्थः। अनियोज्यत्वे बाधकमाशंक्य परिहरति। नचेति। विषयवैराग्यस्य ज्ञानार्थम

नहि देहाद्यसंहतत्वदर्शिनः कस्यचिदपि नियोगो दृष्टः किमुतैकात्म्यदर्शिनः। नच नियोगाभावात्सम्यग्दर्शिनो यथेष्टचेष्टाप्रसंगः सर्वत्राभि
मानस्यैव प्रवर्त्तकत्वात्। अभिमानाभावाच्च सम्यग्दर्शिनः। तस्माद्देहसंबंधादेवानुज्ञापरिहारौ ज्योतिरादिवत्। यथा ज्योतिष एकत्वेप्यग्निः क्र
व्यात्परिह्रियते नेतरः। यथा च प्रकाशः एकस्यापि सवितुरमेध्यदेशसंबंधः परिह्रियते नेतरः शुचिभूमिष्ठः। तथा भौमाः प्रदेशाः वज्रवै
डूर्यादयः उपादीयंते भौमा अपि संतो नरकलेवरादयः परिह्रियंते। तथा मूत्रपुरीषं गवां पवित्रतया परिगृह्यते तदेव जात्यंतरे परिवर्ज्यते तद्
वत्॥

भ्यस्तस्य ज्ञानानंतरमनुवृत्त्या विषयेषु प्रवर्त्तकरागनिवृत्तेर्नातिप्रसंग इत्यर्थः। तदुक्तं भगवता रसोप्यस्य परं दृष्ट्वा निवर्त्तत इति। एवमनुज्ञादिप्रसं
गेनानियोज्यत्वं विदुषः उक्त्वा प्रकृतमुपसंहरति। तस्मादिति। एकस्याप्युपाधिभेदात् अनुज्ञापरिहारयोर्दृष्टांतमाह। ज्योतिरिति॥ ॥क्रव्यं मांस
मत्तीति क्रव्यात् स्मशानाग्निरित्यर्थः॥

शंकोत्तरत्वेन सूत्रं व्याचष्टे। स्यातामित्यादिना। यद्यपि स्थूलदेहसंबंधादुपादानपरित्यागौ स्यातां तथाप्यस्मत्कृतकर्मफलमितरेणापि भुज्येतेति क
र्मफलव्यतिकरः सांकर्यं स्यात्। देहविशिष्टस्य स्वर्गादिभोगयोगेनाविशिष्टात्मन एकस्यैव भोक्तृत्वात् तस्मात् स्वर्गी नरकी चेति व्यवस्थासिद्धये आत्मस्व
रूपभेदो वाच्य इति शंकार्थः। भवेत्तदा सांकर्यं यद्यनुपहितात्मन एव भोक्तृत्वं स्यात् न त्वेतदस्ति। तद्गुणसारत्वादिसूत्रे ऽस्माभिरुपाध्युपहितस्यैव कर्तृ
त्वादिस्थापनात्। तथा च बुद्धेः परदेहासंबंधात्तदुपहितजीवस्य नास्ति परदेहसंबंध इति बुद्धिभेदेन भोक्तृभेदान्न कर्मादिसांकर्यमिति समाधानार्थः। अं

असंततेश्चाव्यतिकरः॥ ॥स्यातां नामानुज्ञापरिहारा एकैकस्यात्मनो देहविशेषयोगात्। यस्त्वयं कर्मफलसंबंधः स ऐकात्म्याभ्युपगमे व्यति
कीर्येत। स्वाम्येकत्वादिति चेत्। नैतदेवमसंततेः। न हि कर्तुर्भोक्तुश्चात्मनः संततिः सर्वैः शरीरैः संबंधोऽस्ति। उपाधितंत्रो हि जीव इत्युक्तं। उ
पाध्यसंतानाच्च नास्ति जीवसंतानः ततश्च कर्मव्यतिकरः फलव्यतिकरो वा न भविष्यति॥ ॥आभास एव च॥ ॥आभास एव चैष जी
वः परस्यात्मनो जलसूर्यकादिवत् प्रतिपत्तव्यः। न स एव साक्षात् नापि वस्त्वंतरं॥ ॥

इत्याद्यसूत्रे जीवस्यांशत्वं घटाकाशस्येवोपाध्यवच्छेदबुद्ध्योक्तं संप्रति एवकारेणावच्छेदपक्षारुचिं सूचयन् रूपं रूपं प्रतिरूपो बभूवेत्यादिश्रुति १३३
सिद्धं प्रतिबिंबपक्षमुपन्यस्यति भगवान्सूत्रकारः। आभास एव चेति। परस्मात्मा नैवानुपहितो जीवो न भवति उपाध्यनुभवात् नापि ततो भिन्न आभास ए
व इह प्रविष्ट इत्याद्यभेदश्रुतिस्मृतिविरोधात् तस्मादविद्यातत्कार्येषु ध्यादिषु प्रतिबिंब एव जीव इत्यर्थः॥

अस्मिन्पक्षे बुद्धिप्रतिबिंबभेदात्स्वर्गीनरकी सादिव्यवस्था जीवत्वस्याविद्यकत्वाद्विघ्नप्रामोक्षश्चोपपद्यत इत्याह। अतश्चेत्यादिना। यत्स्वरूपं भास्कर
स्यप्रलापः प्रतिबिंबस्य नोपाधिसंसृष्टतया कल्पितत्वं किंतु स्वरूपेणैवातः कल्पितप्रतिबिंबस्यानुक्तौ स्थितस्य मोगान्न जीवत्वमिति सिद्धांतरहस्याज्ञान
कृतइत्युपेक्षणीयः। यदि दर्पणे मुखं शुक्तौ रजतवत्कल्पितं स्यात्तदा नेदं रजतमितिस्वरूपबाधवन्नेदं मुखमिति बाधः स्यात्। अतो नास्ति दर्पणे मुख

अतश्च यथा नैकस्मिन्जलसूर्ये कंपमाने जलसूर्यांतरं कंपते। एवं नैकस्मिन्जीवे कर्मफलसंबंधिनि जीवांतरस्य तत्संबंधः एवमव्यतिक
रएव कर्मफलयोः आभासस्य चाविद्याकृतत्वात् तदाश्रयस्य संसारस्याविद्याकृतत्वोपपत्तिस्तद्व्युदासेन च पारमार्थिकस्य ब्रह्मात्मभावस्योपदेशो
पपत्तिः। येषां तु बहव आत्मानस्ते च सर्वगतास्तेषामेवैष व्यतिकरः प्राप्नोति। कथं बहवो विभवश्चात्मानश्चैतन्यमात्रस्वरूपा निर्गुणा निरतिशया
श्च तदर्थं साधारणं प्रधानं तन्निमित्तैषां भोगापवर्गसिद्धिरिति सांख्याः। सति बहुत्वे विभुत्वे च घटकुड्यादिसमाना द्रव्यमात्रस्वरूपाः स्वतोऽचेतना
आत्मानस्तदुपकरणानि चाणूनि मनांसि अचेतनानि तत्रात्मद्रव्याणां मनोद्रव्याणां च संयोगान्नव इच्छादयो वैशेषिका आत्मगुणा उत्पद्यंते ते चा
व्यतिकरेण प्रत्येकमात्मसु समवयंति स संसारस्तेषां नवानामात्मगुणानामत्यंतानुत्पादो मोक्ष इति काणादाः। तत्र सांख्यानां तावच्चैतन्यस्व
रूपत्वात्सर्वात्मनां संनिधानाद्यविशेषाच्च एकस्य सुखदुःखसंबंधे सर्वेषां सुखदुःखसंबंधः प्राप्नोति॥ ॥ ॥

मितिसंसर्गमात्रबाधान्मदीयं मुखमेवेदमित्यबाधितमुखाभेदानुभवात्संसृष्टत्वेनैव कल्पितत्वं प्रवेशवाक्येष्वविकृतब्रह्मण एव प्रतिबिंबभावा
त्मप्रवेशोक्तेः न स्वरूपकल्पना। पूर्णानंदं चात्र दर्पणोरीकामा मा चार्यैरिस्फुः परमन्यते। एवं स्वमते स्वरूपैक्येप्युपाधितो जीवभेदादसांकर्यमुक्तं। संज्ञ
तिस्तत्रेव च कारस्त्वितिं परेषां सांकर्यमेव स्फुटमुपक्रमते। येषामित्यादिना। बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावनानवात्मविशेषगुणाः साति

ब्र॰ सू॰ भा॰ २ सांख्यः स्वाभिप्रायं शंकते। स्यादेतदिति। सर्वेषां पुंसां प्रकृतिसान्निध्याद्यविशेषेऽपि प्रकृतिरेव प्रतिपुरुषं नियमेन भोगापवर्गार्थं प्रवर्त्तते। तथा
चोद्देश्यपुरुषार्थनियमात्प्रधानप्रवृत्तिरिति भोगादिव्यवस्थाऽस्य या नियतत्वं च सत्ताङ्गीकार्यमाह। तस्य व्यापकताद्यपि प्रधानस्य प्रवृत्तिरित्युद्देश्य
१३४ विघातः स्यादित्यर्थः। जडप्रधानस्योद्देश्यविवेकाभावात्पुरुषार्थस्याप्यनागतस्याचेतनस्यानियामकत्वान्न व्यवस्थामानमुक्तिशून्यत्वादित्सा

स्यादेतत्। प्रधानप्रवृत्तेः पुरुषकैवल्यार्थत्वात्तदर्थैव व्यवस्था भविष्यति। अन्यथा हि स्वविभूतिख्यापनार्था प्रधानप्रवृत्तिः स्यात्। तथा चानि
र्मोक्षप्रसंगः प्रसज्येतेति। नैतत्सारम्। न ह्यभिलषितसिद्धिनिबन्धना व्यवस्था उपपत्तुमर्हति। उपपत्त्या तु कयाचिद्व्यवस्थोच्यते। असंभवे
पुनरुपपत्तेः कामं मा भूदभिलषितं पुरुषकैवल्यम्। प्राप्नोति तु व्यवस्थाहेत्वभावाद्व्यतिकरः। काणादानामपि यदैकेनात्मना मनः संयु
ज्यते तदात्मान्तरैरपि नान्तरीयकः संयोगः स्यात् संनिधानाद्यविशेषात्। ततश्च हेत्वविशेषात्फलाविशेष एकस्यात्मनः सुखदुःखयोगे स
र्वात्मनामपि समानं सुखदुःखित्वं प्रसज्येत। स्यादेतत्। अदृष्टनिमित्तो नियमो भविष्यतीति॥

ह। नैतदिति। यो हि नियामकाभावेनोद्देश्यविघातमापादयति। तं प्रति तस्यैवापादनमिष्टमिति भावः। तार्किकमतेऽपि भोगादिसांकर्यमित्याह। काणादा १३४
नामिति। हेतुर्मनःसंयोगः फलं सुखादि। यदात्माऽदृष्टकृतो योऽमनःसंयोगः स तदात्मन एव सुखादिहेतुरिति व्यवस्थां शंकते। स्यादेतदिति॥ ॥

स्त्रेण परिहरति। नेत्याहेति। पूर्वीयत मनःसंयोगवददृष्टस्यापि सर्वात्मसाधारण्यात्तन्न व्यवस्थेत्यर्थः रागादिनियमान्नत ज्ञा दृष्टनियमनरसाशङ्क्यो

नेत्याह। अदृष्टानियमात्॥ ॥बहुष्वात्मस्वाकाशवत्सर्वगतेषु प्रतिशरीरं बाह्याभ्यन्तराविशेषेण संनिहितेषु मनोवाक्कायैर्धर्माधर्मल
क्षणं अदृष्टमुपलघतेषां रम्यानां तावत्तदनात्मसमवायि प्रधानवर्त्ति प्रधानसाधारणत्वान्न प्रत्यात्मं सुखदुःखोपभोगस्य नियामकमुपपद्यते। काणा
दानामपि पूर्ववत्साधारणेनात्ममनःसंयोगेन निर्वर्त्तितस्यादृष्टस्याप्यस्यैवात्मन इदमदृष्टमिति नियमे हेत्वभावादेष एव दोषः स्यादेतत्। अहमिदं
फलं प्राप्नवानीदं परिहराणीत्थं प्रयतेऽयं करवाणीत्येवंविधा अभिसंधादयः प्रत्यात्मं प्रवर्त्तमाना अदृष्टस्यात्मनां च स्वस्वामिभावं नियंस्यन्तीति
नेत्याह॥ ॥अभिसंध्यादिष्वपि चैवं॥ ॥अभिसंध्यादीनामपि साधारणेनैवात्ममनःसंयोगेन सर्वात्मसंनिधौ क्रियमाणानां नियमहेतुत्वानुपप
त्तेरुक्तदोषानुषंग एव॥ ॥प्रदेशादिति चेन्नान्तर्भावात्॥ ॥अथोच्येत विभुत्वेऽप्यात्मनः शरीरप्रतिष्ठेन मनसा संयोगः शरीरावच्छिन्न एवात्म
प्रदेशे भविष्यति। अतः प्रदेशकृता व्यवस्थाभिसंध्यादीनामदृष्टस्य सुखदुःखयोश्च भविष्यतीति तदपि नोपपद्यते। कस्मादन्तर्भावात्। विभुत्वा
विशेषाद्धि सर्व एवात्मानः सर्वशरीरेष्वन्तर्भवंति॥
तरत्वेन सूत्रं व्याचष्टे। स्यादेतदित्यादिना। अनियमः उक्तदोषः आत्मान्तरप्रदेशस्य परदेहेऽन्तर्भावाद्व्यवस्थितेरित्यर्थः किं मनसा संयुक्तात्मैव
मनःप्रदेशः उत कल्पितः। आद्ये सर्वात्मनां सर्वदेहेष्वन्तर्भावादव्यवस्था॥

न्या० स० भा० २

१३५

द्वितीयं दूषयति। तत्र नवैशेषिकैरिति। सर्वात्मसान्निध्ये सति कस्यचिदेव प्रदेशः कल्पयितुमशक्यः नियामकाभावादित्यर्थः। प्रदेशकल्पनामं
गीकृत्याह। कल्प्येति। कार्यमभिसंधायादि- प्रसात्मनोपकशरीरं तत्र तस्यैव भोग इति व्यवस्थामाशंक्याह। शरीरमपीति। प्रदेशापर्देरप्यंतरमा
ह। प्रदेशेति। यस्मिन्नात्मप्रदेशे ऽदृष्टं स्यात् तैः स किं चलः स्थिरो वा। नाद्य ॥ अचले ह्यन्यशस्य चलनविभागयोरसंभवादलत्वादापाताच्च। द्वि

तत्र नवैशेषिकैः शरीरावच्छिन्नो ह्यात्मनः प्रदेशः कल्प्ययितुं शक्यः। कल्प्यमानो ह्यपर्यन्तनिष्ठदेशस्यात्मनः प्रदेशः काल्पनिकत्वादेव न परमा
र्थिकं कार्यं नियंतुं शक्नोति। शरीरमपि सर्वात्मसन्निधावुत्पद्यमानमस्यैवात्मनो नेतरेषामिति न नियंतुं शक्यं प्रदेशविशेषाभ्युपगमेपि द्वयो
रात्मनोः समानसुखदुःखभाजोः कदाचिदेकेनैव तावच्छरीरेणोपभोगसिद्धिः स्यात् समानप्रदेशस्यापि द्वयोरात्मनोरदृष्टस्य संभवात्। तथा
हि देवदत्तो यस्मिन् प्रदेशे सुखं दुःखं वानुभवति तस्मात् देशादपक्रांते तच्छरीरे यज्ञदत्तशरीरे च तं देशमनुप्राप्ते तस्यापीतरेण समानः सुख
दुःखानुभवो दृष्टेनैव न स्यात् यादृशो देवदत्तयज्ञदत्तयोः समानप्रदेशमदृष्टं न स्यात्॥ स्वर्गाद्यनुपभोगप्रसंगश्च प्रदेशवादिनः स्यात्। ब्राह्म
णादिशरीरप्रदेशेष्वदृष्टनिष्पत्तेः प्रदेशान्तरवर्तित्वाच्च स्वर्गाद्युपभोगस्य॥ ॥

तीये तस्मिन्नेव प्रदेशे परस्यापि भोगदर्शनाददृष्टमस्तीत्येकेनापि शरीरेण द्वयोरात्मनोर्भोगप्रसंगः। यद्यात्मभेदात्तद्देशयोर्भेदः तदापि तयो
रेकदेहान्तर्भावाद्भोगसांकर्यं तदवस्थमेव प्रयत्नाद्यात्मवादप्रसंगश्च। किंच यत्र यत्रात्मनः प्रदेशे शरीरादिसंयोगाददृष्टमुत्पन्नं तत्तत्रैवाचलप्रदेशे स्थि
तमिति स्वर्गादिशरीरावच्छिन्नात्मन्यदृष्टाभावाद्भोगो न स्यात्। अतः प्रदेशभेदो न व्यवस्थापकः यत्तु अत्रोत्पन्नमदृष्टं स्वाश्रयेणत्र क्वचिद्भोगहेतुरि

तिस्वर्गो हि भोगसिद्धिरिति तन्न भोगशरीरे तु दूरस्था
दृष्टे मानाभावादिति भावः॥ १३५

यद्यपि केचिदाहुः मनसः एकत्वेप्यात्मनां भेदेन संयोगव्यक्तीनां भेदात्कस्यचित्संयोगव्यक्त्या कस्मिंश्चिद्देवात्मन्यदृष्टादिकमित्यसांकर्यमिति। तन्न।
संयोगव्यक्तीनां वैजात्याभावेन सर्वासामेवैकदेहं ततः सर्वात्मस्वादृष्टहेतुत्वापत्तेः। तथा च सर्वात्मना एकस्मिन् देहे भोक्तृत्वं दुर्वारं। किंच बहूनां विभु
त्वमंगीकृत्यसांकर्यमुक्तं। संप्रति कर्तृणां विभुत्वमसिद्धमहमिहैवास्मिन् इति सम्यक्त्वानुभवात्। मानाभावाच्चेत्याह। सर्वगतत्वानुपपत्तिश्चेति। किंच

सर्वगतत्वानुपपत्तिश्च बहूनामात्मनां दृष्टान्ताभावात् यद्यावत् त्वं केवहवः समानदेशाश्चेति रूपादय इति चेत्। न तेषामपि धर्मधर्मिणोर्नाभे
दात् लक्षणभेदाच्च। न तु बहूनामात्मनां लक्षणभेदोस्ति॥ ॥

बहूनां विभुत्वे समानदेशत्वं वाच्यं। तच्चायुक्तं अदृष्टत्वादित्याह। बहेति। ननु रूपरसादीनामेकघटस्थत्वं दृष्टमिति चेत्। न अप्रमाणत्वमतो दृष्टां
तः। रूपस्य तेजोमात्रत्वात् रसस्य जलमात्रत्वात् गंधस्य पृथिवीमात्रत्वात् इत्येवं तत्तद्गुणस्य स्वस्वधर्मिणोर्नाभेदात्तेजआदिधर्म्यतिरिक्तघटा
भावात्। किंचात्मनां बहुत्वमप्यसिद्धं। आत्मस्वरूपलक्षणस्याभेदात् तथा च देवदत्तात्मा यज्ञदत्तात्मनो न भिन्नः आत्मत्वाद्यज्ञदत्तात्मवत्।

अत्र वैशेषिकः शंकते। अंत्यविशेषेति। नित्यद्रव्यमात्रवृत्तयो विशेषास्ते च स्वयंव्यावृत्ता अन्यव्यावर्त्तकाश्च न त्वेषां व्यावर्त्तकमपेक्षंते इत्यंत्या उच्यंते। तयाच विशेषरूपलक्षणभेदाद्व्यवसायभेद इत्यर्थः। न तावदात्मन्यनात्मनः सकाशाद्भेदज्ञानार्थो विशेषकल्पना। आत्मत्वाद्देहादात्मभेदसिद्धेः। नाप्यात्मनां मिथो भेदज्ञानार्थं तत्कल्पना। आत्मभेदस्याप्यसिद्धेः। क्वचिद्विशेषभेदकल्पना तदेवात्मभेदकल्पनायुक्ता। आत्मभेदस्याभावात्तु न विशेषभेदसिद्धिस्तत्सिद्धौ तत्सिद्धिरित्यन्योन्याश्रयादिति परिहारार्थः। यत्तु बहूनां विभुत्वे आकाशादिवत्स्यादृष्टांत इति सोऽप्यसंमत इत्याह॥ आकाशादीनामिति

अंत्यविशेषवशाद्भेदोपपत्तिरिति चेत् न भेदकल्पनाया अंत्यविशेषकल्पनायाश्चेतरेतराश्रयत्वात् आकाशादीनामपि विभुत्वं ब्रह्मवादिनोऽसिद्धं कार्यत्वाभ्युपगमात् तस्मादात्मैकत्वपक्ष एव सर्वदोषाभाव इति सिद्धं॥ ॥ इति श्रीमच्छारीरकमीमांसाभाष्ये शंकरभगवत्पादकृतौ द्वितीयाध्यायस्य तृतीयः पादः॥ श्रोम्॥ ॥

विभुत्वस्यैकवृत्तित्वेलाघवाच्चविभुभेदः। यथैकस्मिन्नाकाशे भेरीवीणादिभेदेन तारमंदादिशब्दव्यवस्था एवमेकस्मिन्नप्यात्मनि बुद्ध्युपाधिभेदेन सुखादिव्यवस्थोपपत्तेरात्मभेदेऽपि व्यवस्थानुपपत्तेरुक्तत्वान्मुधा भेदकल्पनेत्युपसंहरति। तस्मादिति। एवं भूतभोक्तृश्रुतीनामविरोधाभावात् ब्रह्मण्येव समन्वय इति सिद्धं॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीगोविंदानंदभगवत्कृतौ शारीरकमीमांसाव्याख्यायां भाष्यरत्नप्रभायां द्वि १३६

॥श्रीगणेशाय नमः॥ हरिः ओम्॥ ॥पूर्वाधिकरणे कर्तुः स्वरूपं विचार्य तदुपकरणानामिन्द्रियाणामुत्पत्तिं साधयति। तथा प्राणाः॥ भूतभो
क्तृविचारानन्तरं भौतिकप्राणविचार इति हेतुहेतुमद्भावं पादयोः संगतिमाह। वियदादीति। तमेव विप्रतिषेधमाह। तत्रेत्यादिना। यद्यपि प्राणानामनुत्प
त्तौ एकविज्ञानप्रतिज्ञानुपपत्तेर्वियदधिकरणन्यायात्तेषामुत्पत्तिः सिध्यति तथापि प्रलये प्राणसद्भावश्रुतेर्गतिकथनार्थमेतदधिकरणमित्य

ओम्॥ तथा प्राणाः॥ ॥वियदादिविषयः श्रुतिविप्रतिषेधस्तृतीयेन पादेन परिहृतः। चतुर्थेनेदानीं प्राणविषयः परिह्रियते तत्र ताव
त् तत्तेजोऽसृजत तस्माद्वा एतस्मादात्मन आकाशः संभूत इति चैवमादिषूत्पत्तिप्रकरणेषु प्राणानामुत्पत्तिर्नाम्नायते क्वचिच्चानुत्पत्तिरेवैषामाम्ना
यते असद्वा इदमग्र आसीत्तदाहुः किं तदसदासीदित्यृषयो वाव तेऽग्रे सदासीत्तदाहुः के ते ऋषय इति प्राणा वा ऋषय इत्यत्र प्रागुत्पत्तेः
प्राणानां सद्भावश्रवणात् अन्यत्र तु प्राणानामप्युत्पत्तिः पठ्यते यथाग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्त्येवमेवैतस्मादात्मनः सर्वे प्राणा इति।
एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि चेति सप्त प्राणाः प्रभवन्ति तस्मादिति स प्राणमसृजत प्राणाच्छ्रद्धां खं वायुर्ज्योतिरापः पृथिवीन्द्रियं मनो
ऽन्नमिति चैवमादिप्रदेशेषु तत्र तत्र श्रुतिविप्रतिषेधादन्यतरनिर्धारणकारणानिरूपणाद्वाऽप्रतिपत्तिः प्राप्नोति अथवा प्रागुत्पत्तेः सद्भावश्रव
णात् गौणी प्राणानामुत्पत्तिश्रुतिरिति प्राप्नोति॥

पौनरुक्त्यं। अत्र प्राणाः विषयः। ते किमुत्पद्यन्ते न वेति श्रुतीनां विप्रतिपत्त्या संशये तासां समबलत्वादनिर्णय इत्यप्रामाण्यमिति पूर्वपक्षफलं तत्र गौ
णवादि समाधानमाह। अथवेति। प्राणानां प्रलये सद्भावश्रुतेर्निरवकाशत्वेन बलीयस्त्वादुत्पत्तिश्रुतिर्जीवोत्पत्तिश्रुतिवद्गौणी लयविरोध इत्यर्थः। अप्र
माणपक्षवद्गौणपक्षोऽपि मुख्यसिद्धान्तिनः पूर्वपक्ष एवेति ज्ञापना [illegible]॥

मुख्यप्रसिद्धेरित्याह॥ अत इति। तथाशब्दमाक्षिपति। कथमिति। आनुलोम्यमाजस्यमित्यर्थः। सामर्थ्यमस्फुटमिति। यथा दृष्टस्येति। दूषणावकाशाद्

अत इदं पठति तथा प्राणा इति। कथं पुनरत्र तथेत्यस्यानुलोम्यं प्रकृतोपमानाभावात्सर्वगतात्मबहुत्ववादिदूषणेन हि तदनन्तरपादान्ते
कृतं तत्तावन्नोपमानं संभवति साध्यत्वाभावात् साध्येन हि सतः उपमानं स्यात् यथा सिंहस्तथा बलवर्मेति। अदृष्टसाम्यप्रतिपादनार्थमिति
यद्युच्येत यथा अदृष्टस्य सर्वात्मसन्निधावुत्पद्यमानस्यानियतत्वं एवं प्राणानामपि सर्वात्मनः प्रत्यनियतत्वमिति तदपि देहानियमेनैवो
क्तत्वात् पुनरुक्तं भवेत्। न च जीवेन प्राणा उपमीयेरन् सिद्धान्तविरोधात्। जीवस्य ह्यनुत्पत्तिराख्याता प्राणानां तूत्पत्तिराचिख्यासिता
तस्मात्तथेत्यसंबद्धमिव प्रतिभाति। न उदाहरणोपात्तेनाप्युपमानेन संबन्धोपपत्तेः। अत्र प्राणोत्पत्तिवादिवाक्यजातमुदाहरणं। एतस्मा
दात्मनः सर्वे प्राणाः सर्वे लोकाः सर्वे देवाः सर्वाणि भूतानि व्युच्चरन्तीत्येवंजातीयकं तत्र यथा लोकादयः परस्माद्ब्रह्मण उत्पद्यन्ते तथा प्राणा अ
पीत्यर्थः। तथा एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च। खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणीत्येवमादिष्वपि खादिवत्प्राणानामुत्प
त्तिरिति द्रष्टव्यं॥ ॥

सनान्वेति। यद्यप्यदृष्टवत्प्राणा अप्यनियता इति सूत्रमन्वेति तथापि पुनरुक्तं जीववत्प्राणा नोत्पद्यन्त इति सूत्रार्थश्चेदपसिद्धान्त इत्याक्षेपार्थः

दृष्टांतो दार्ष्टांतिकसन्निहितो वाच्य इत्यंगीकृत्यैकवाक्यत्वेन सान्निध्यमुक्तं संपत्तिसाधनतियमः जैमिनिना भगवताप्यवहिताव्यवहि
त दृष्टांतस्याश्रितत्वादित्याह । अपवेति । अस्मिन्नेतौ माध्याये ऽश्वप्रतिग्रहेष्ट्यधिकरणे तस्येदं विषयवाक्यं प्रावतो ऽश्वान्प्रतिगृह्णीयात्तावतो वा
रुणांश्चतुष्कपालान्निर्वपेदिति । एतदुक्तमधिकरणे किमियं वारुणीष्टिर्दातुरुत प्रतिग्रहीतुरिति विशये प्रतिगृह्णीयादिति श्रुतेः प्रतिग्रहीतुरिस्या
र्थं प्रजापतिर्वरुणायाश्वमनयदिति स्वपक्रमे दातृकीर्तनात्तल्लिंगाद्दश्वदातुरेवेति सिद्धान्तः । अतः प्रतिगृह्णीयादित्यस्य पदस्याश्वाः प्रति
ग्राहयेदित्यर्थः । दद्यादिति यावत् । यो ऽश्वदाता स वारुणीमिष्टिं कुर्यादिति वाक्यार्थे स्थितेत्र चिन्ता । अश्वदाननिमित्तेयमिष्टिः किं लौकिकेश्वदाने वैदि

अथवा ॥

के चेति तत्र न केसरिणो ददातीति निषिद्धलौकिकाश्वदाने दोषसंभवान्नन्निरसार्थेयमिष्टिरिति दोषाल्लिंगाल्लौकिके स्यादिति सत्रेणाप्राप्ते सिद्धां
तः ॥ अत्र हि वरुणो वा एतं गृह्णाति यो ऽश्वं प्रतिगृह्णातीति दातुर्दोषसंकीर्तनेष्टिर्विहिता । वरुणग्राहो जलोदरव्याधिरोगः रूढः । नच लौकिकेश्वदाने
यं रोगो भवतीति प्रसिद्धं । नचानेनैव वाक्येन प्रसिद्धिः दानेदोषस्तन्निरसार्थे चेष्टिरित्यर्थे नेदो वाक्यभेदात् । नच वरुणेनेति वक्तुं वरुणग्राहो १८
निषेधातिक्रमकृते दोषानुवादकं इतिपुक्तं ॥ रुद्धिस्याग्रायाग्रात् तत्प्रयोगे च वैदिके पिदाने ऽश्वस्यागजन्यदुःखंप्रसंगात् मुमसासाक्षात्समनुवदि

तस्मात्सामान्यानुवादार्थवादोपमितिमात्रसंबंधिन्यश्चवदानेदमपिनिष्ठिरिलेखविवार्यौक्तं। पानव्यापच्चतद्रदिति। सोमपानेक्रियमाणेव्यापद्वमनंप्रदि
ष्टात्तद्वारेतंसोमेंद्रद्रूपात्नाकंचरुं निर्वपेदितिश्रूयते। तत्राश्चप्रतिस्मृहेस्याधिकरणपूर्वपक्षस्याप्यो बहुस्तत्र्यव्यवहितस्तद्वदितिपरास्तस्यनेतद्रुक्तौकिं
केधातुसाम्यार्थंपीतसोमस्यवमनेपंचहःस्याद्वमननिमित्तेंद्रियशोषाख्यदोषस्यदृष्टस्येंद्रियेणवीर्येणव्यध्यतेयःसोमंवमतीत्यनुवादादितिपूर्वप
पानव्यापच्चतद्रदित्येवमादिषुव्यवहितोपमानसंबंधस्याप्याश्रितत्वात् यथातीतानंतरपादयुक्तादिपदादयःपरस्यब्रह्मणोविकाराःसमधि
गम्यास्तथाप्राणाअपिपरस्यब्रह्मणोविकाराइतिमेजपितव्यं। कःपुनःप्राणानांविकारत्वेहेतुःश्रुतत्वमेवननुकेषुचित्प्रदेशेषुनप्राणानामुत्प
त्तिःश्रूयतइत्युक्तंतदयुक्तं। प्रदेशांतरेश्रवणात्। नहिक्वचिदश्रवणमन्यत्रश्रुतंनिवारयितुमुत्सहते तेनश्रुतत्वाविशेषादाकाशादिवत्प्राणा
अपिउत्पद्यंतइतिसूक्तं॥ ॥गौण्यसंभवात्॥ यत्पुनरुक्तंप्रागुत्पत्तेःसद्भावश्रवणात् गौणीप्राणानामुत्पत्तिश्रुतिरितितत्प्रत्याह। गौण्यसंभवादि
ति। गौण्याअसंभवोगौण्यसंभवः। नहिप्राणानामुत्पत्तिश्रुतिर्गौणीसंभवतिप्रतिज्ञाहानिप्रसंगात्। कस्मिन्नुभगवोविज्ञातेसर्वमिदंविज्ञातंभ
वतीतिह्येकविज्ञानेनसर्वविज्ञानंप्रतिज्ञायतत्साधनायेदमाम्नायते एतस्माज्जायतेप्राणइत्यादिसाचप्रतिज्ञाप्राणादेःसमस्तस्यजगतःब्रह्मवि
कारत्वेसतिप्रकृतिव्यतिरेकेणविकाराभावात्सिध्यतिगौण्यांतुप्राणानामुत्पत्तिश्रुतौप्रतिज्ञाहीयेत।
सिद्धांत्यार्थेः। वैदिकेतुसोमपानेऽऋद्धिप्रतिपत्तेर्जातत्वाद्वमनेपिनदोषइतिप्राप्तेसिद्धांतः। लोकेवमनकृतेंद्रियशोषस्यधातुसाम्यकरत्वेनगुणत्वान्नदोष
ता। वेदेतुमामेवाङ्मभिमतिगाइतिसम्यग्जरणार्थमंत्रलिंगाद्वमनेकर्मवैगुण्यात्तस्यदोषता। तस्माद्वैदिकसोमवमनेसौमिंद्रश्चरुरितिस्थितमित्येवमा

ननु प्रतिज्ञापि गौणी किं न स्यात्तत्राह तथा च प्रतिज्ञार्थमिति। उपक्रमोपसंहाराभ्यां प्रतिपिपादयिषिताद्वितीयत्वप्रतिज्ञानुरोधेन
गौणो सति मुख्ये वेति भावः। मुंडकवच्छुत्यंतरेपि प्रतिज्ञादर्शनात्सामुख्येत्याह। तद्वेति। एषा प्रतिज्ञाश्रुति मुख्यत्वे हेतुत्वेन द्रष्टव्येत्यर्थः। इदा
नीं प्रलये प्राणसत्त्वश्रुतेर्गतिं प्रश्नपूर्वकमाह। कथमित्यादिना। नेदं वाक्यं महाप्रलयेपरमकारणस्य ब्रह्मणः प्राणवत्त्वपरं किं त्ववांतरप्रलये हिरण्य
गर्भीयावांतरप्रकृतिरूपप्राणसद्भावपरमित्यर्थः। ननु हिरण्यगर्भरूपविकारस्य ब्रह्मैकत्वं तत्राविकारत्वं कथं नं तत्राह। स्वविकारेति स्व

तथा च प्रतिज्ञार्थमुपसंहरति पुरुष एवेदं विश्वं कर्म तपो ब्रह्म परामृतमिति ब्रह्मैवेदं विश्वमिदं वरिष्ठमिति च तथा आत्मनो वा अरे द
र्शनेन श्रवणेन मत्या विज्ञानेनेदं सर्वं विदितमित्येवंजातीयकासु श्रुतिषु एषैव प्रतिज्ञा योजयितव्या॥ कथं पुनः प्रागुत्पत्तेः प्राणनं सद्भाव
श्रवणं नेतन्मूलप्रकृतिविषयं। अप्राणो ह्यमनाः शुभ्रो ह्यक्षरात्परतः परइति मूलप्रकृतेः प्राणादिसमस्तविशेषरहितत्वावधारणात्।
अवांतरप्रकृतिविषयं चैतत् स्वविकारापेक्षं प्रागुत्पत्तेः प्राणनांसद्भावावधारणमिति द्रष्टव्यं व्याकृतविषयाणामपि प्रसिद्धानामव
स्थानां श्रुतिस्मृत्योः प्रकृतिविकारभावप्रसिद्धेः॥

कार्यब्रह्मणोपक्रमे स्थूलं तस्योत्पत्तिरित्यर्थः ननु प्रथमश्रुतिमहाप्रलये प्राणसद्भावरूपं लिंगं प्राणोत्पत्तिश्रवणाद्बाधकं किमित्यवांतरप्रलयप
रतया नीयत इति चेन्न तस्माज्जायते प्राण इत्यादिप्रबलजन्मश्रुतिबलादिति बद्धमः। ननु विकारस्य ब्रह्मणः कथं प्रकृतित्वमित्यत आह। व्याकृते
ति। हिरण्यगर्भः समवर्तताग्र इत्यादिश्रुतायादिकर्तृसंभृतानामित्यादिस्मृतौ च विकाराणामपि मूलकारणावस्थारूपाणां ब्रह्मविराडादी
नां प्रकृतिविकारभावेन प्रसिद्धिरस्ति। स्थूलापेक्षया विकारस्याप्युत्तरापेक्षया प्रकृतित्वमित्यर्थः —

शा.सू.भा.२ केचिद्वियदधिकरणानुरोधेनेदं सूत्रं व्याचक्षते तान्दूषयति॥ वियदिति। तस्माज्जायत इति पदस्याकाशादिषु मुख्यस्य पाठापेक्षया प्राचीनेषु प्रा
१३९ णेषु श्रुतेर्मुख्यं जन्मेति सूत्रयोजना। तन्मात्रान्यादिति। तेनाकाशादिजन्मनाम्नामनेकशब्दोक्तत्वं तस्मादित्यर्थः॥ ॥एकस्मिन्वाक्ये एकस्य

वियदधिकरणे हि गौण्यसंभवादिति पूर्वपक्षसूत्रत्वात् गौणी जन्मश्रुतिरसंभवादिति व्याख्यातं प्रतिज्ञाहान्या चतन्नसिद्धं तेनाभिहितः। इहतु
सिद्धान्तसूत्र। ~~तत्प्राक्श्रुतेश्च॥~~ ॥इतश्चाकालात् गौणापाजन्मश्रुतेरसंभवादिति व्याख्यातं तदनुरोधेन त्विहापि गौणी जन्मश्रुतिरसंभ
वादिति व्याचक्षाणैः प्रतिज्ञाहानिरुपेक्षिता स्यात्॥ ॥तत्प्राक्श्रुतेश्च॥ ॥इतश्चाकाशादीनामिव प्राणानामपि मुख्यैव जन्मश्रुतिः
यज्जायत इत्येकं जन्मवाचि पदं प्राणेषु प्राक्श्रुतं सदुत्तरेष्वप्याकाशादिषु अनुवर्त्तते। एतस्माज्जायते प्राण इत्यत्राकाशादिषु च मुख्यं ज
न्मेति प्रतिष्ठापितं तत्सामान्यात्प्राणेष्वपि मुख्यमेव जन्म भवितुमर्हति नह्येकस्मिन्प्रकरणे एकस्मिंश्च वाक्ये एकः शब्दः सकृदुच्चरितो बहु
भिः संबध्यमानः क्वचिन्मुख्यः क्वचिद्गौण इत्यध्यवसातुं शक्यः वैरूप्यप्रसंगात्। तथा स प्राणमसृजत प्राणाच्छ्रद्धामित्यत्रापि प्राणेषु श्रु १३९
तः सृजतिः परेष्वपि उत्पत्तिमत्सु श्रद्धादिष्वनुषज्यते यत्रापि पश्चाच्छ्रुतः उत्पत्तिवचनः शब्दः पूर्वैः संबध्यते॥ तत्राप्येष एव न्यायः यथा स
र्वाणि भूतानि व्युच्चरन्तीत्यत्रान्ते पठितो व्युच्चरन्तीति शब्दः पूर्वैरपि प्राणादिभिः संबध्यते॥
शब्दस्य क्वचिन्मुख्यत्वं क्वचिद्गौणत्वमिति वैरूप्यं न युक्तमिति न्यायमनुज्ञापयति दिशति॥ यत्रापि पश्चाच्छ्रुत इति॥ ॥ ॥

यत्त्वोक्तं छांदोग्येपि प्राणानामुत्पत्तिर्न श्रूयत इति तत्राह। तत्पूर्वकत्वाद्वाच इति। अत्र सूत्रे वाक्पदं प्राणमनसोरुपलक्षणं। वाक्प्राणमनसां ते
जोबन्नपूर्वकत्वोक्तेरश्रवणमसिद्धमिति योजना। तैत्तिर्यादिभिश्च श्रुतीनां सामान्यंकरणत्वं तत्साम्यादित्यर्थः। अत्र मयष्ठिकारे मुख्य

तत्पूर्वकत्वाद्वाचः॥ यद्यपि तत्तेजोऽसृजतेत्यस्मिन् प्रकरणे प्राणानामुत्पत्तिर्न पठ्यते तेजोबन्नानामेव त्रयाणां भूतानां उत्पत्तिश्रवणात्
तथापि ब्रह्मप्रकृतिकतेजोबन्नपूर्वकत्वाभिधानाद्वाक्प्राणमनसां तत्सामान्याच्च सर्वेषामेव प्राणानां ब्रह्मप्रभवत्वं सिद्धं भवति। तथा च
तस्मिन्नेव प्रकरणे तेजोबन्नपूर्वकत्वं वाक्प्राणमनसामाम्नायते अन्नमयं हि सोम्य मनः आपोमयः प्राणः तेजोमयी वागिति। तत्र यदि
तावन्मुख्यमेवैषामन्नादिमयत्वं ततो वृत्तं तत एव ब्रह्मप्रभवत्वं अथ भाक्तं तथापि ब्रह्मकर्तृकायां नामरूपव्याक्रियायां श्रवणात् येना
श्रुतं श्रुतं भवतीति चोपक्रमात् ऐतदात्म्यमिदं सर्वमिति चोपसंहारात् श्रुत्यंतरप्रसिद्धेश्च ब्रह्मकार्यत्वप्रपंचनार्थमेव मनआदीनामन्नादिम
यत्ववचनमिति गम्यते तस्मात् प्राणानां ब्रह्मविकारत्वसिद्धिः॥

इति पक्षे वर्त्तत एव प्राणानां ब्रह्मकार्यत्वं तेजोबन्नानां ब्रह्मविकारत्वात्। यदि प्राणस्य तोयमयत्वं तैलविकारत्वयोगात् तदधीनस्थितिकत्वमात्रेण भाक्त
त्तथापि प्राणानां विकारत्वे भूताधीनस्थितिकत्वलिंगमप्रयोजकमिति सिद्धं ब्रह्मकार्यत्वं। सप्राणमसृजतेत्यादिश्रुत्यंतरे स्पष्टं ब्रह्मकार्यत्वोक्तेश्च।
तस्मात् प्राणानामुत्पत्तिश्रुतीनां सद्भावश्रुतविरोधात् कारणे ब्रह्मणि समन्वय इति सिद्धं॥

ब्र.सू.भा.२ लिंगशरीरविचारप्रकृताधिकरणानां लिंगात्त्वंपदार्थभेदधीः फलमिति द्रष्टव्यं। एवं जन्मलब्धसत्ताकानां प्राणानामुपजीव्योपजीवकत्व
संगत्या संख्यानिर्णीतं श्रुतीनां विरोधात्संशये पूर्वपक्षयति॥ ॥सप्तगतेर्विशेषितत्वाच्च। विषयः संशयः संशयः इंद्रियाण्येतावंति विषयः। पंच
१४० धीन्द्रियाणि वाक्च नष्टेति सप्त प्राणाः सप्त एव हस्तेन सहाष्टौ। ग्रहत्वं बंधकत्वं गृह्णंतीति बध्नंतीति ग्रहा इंद्रियाणि तेषां बंधकत्वं विषयाधीनमिति
ग्रहाः अतिग्रहा इति क्रांता विषया इत्यर्थः॥ द्वे श्रोत्रे द्वे चक्षुषी द्वे घ्राणे वागेकेति सप्त शीर्षण्याः प्राणाः द्वाववाञ्चौ पायूपस्थौ चेति नव प्राणा न कर्मेन्द्रिया

सप्तगतेर्विशेषितत्वाच्च॥ ॥उत्पत्तिविषयः श्रुतिविप्रतिषेधः प्राणानां परिहृतः संख्याविषय इदानीं परिह्रियते। तत्र मुख्यं प्राणमु
परिष्टाद्वक्ष्यति। संप्रति कतीतरे प्राणा इति संप्रधारयति श्रुतिविप्रतिपत्ते[illegible] परिहृतः संख्याविचात्र विप्रतिपत्तिः क्वचित्सप्त प्राणाः १४०
संकीर्त्यन्ते सप्त प्राणाः प्रभवन्ति तस्मादिति क्वचिदष्टौ प्राणा ग्रहत्वेन गुणेन संकीर्त्यन्ते॥ अष्टौ ग्रहा अष्टावतिग्रहा इति क्वचिन्नव सप्त वै
शीर्षण्याः प्राणा द्वाववाञ्चाविति क्वचिद्दश नव वै पुरुषे प्राणा नाभिर्दशमीति क्वचिदेकादश दशेमे पुरुषे प्राणा आत्मैकादश इ
ति। क्वचिद्द्वादश सर्वेषां स्पर्शानां त्वगेकायनमित्यत्र क्वचित्त्रयोदश चक्षुश्च द्रष्टव्यं चेत्यत्र एवं हि विप्रतिपन्नाः प्राणेयत्तां प्रति श्रुतयः
किं तावत्प्राप्तं सप्तैव प्राणा इति कुतः गतेः यतस्तावन्तोऽवगम्यन्ते सप्त प्राणाः प्रभवन्ति तस्मादित्येवंविधासु श्रुतिषु विशेषिताश्चैते सप्त वै
णा दशेमे पुरुषे देहे प्राणाः आत्मा मन एकादश प्राणा इति सिद्धान्तकोटिरुक्ता। तत्र बहुत्वद्वारेणाधिगम्या शीर्षण्याः प्राणा इत्यन्तः॥
तदहदशमोऽहंकारेणासह त्रयोदश। श्रुतितः सप्तत्वावगतेर्ये शीर्षण्याः सप्त ते प्राणा इति शीर्षण्यपदेनेन प्राणत्वविशेषणाच्छीर्षण्यानां प्राण

सप्तत्वं वीप्साविरुद्धमिति शंकते। नन्विति। गुहाभ्यां हृदयेशेरत इति गुहाशयाः स्वस्थानेषु निहितानि क्षिप्ता इत्यर्थः। चित्तेन चतुर्दशत्वं मंतव्यं पूर्वप
क्षीपरिहरति। नैष दोष इति। सिद्धांतिनाप्येकादशसु मनोवृत्तिभेदान्निश्चयात्मिका बुद्धिरभिमानात्मको हंकारः स्मरणात्मकं चित्तमिति ह्यदशादिसंख्यांत

ननु प्राणा गुहाशया निहिताः सप्त सप्तेति वीप्सा श्रूयते। सा सप्तभ्योतिरिक्तानुप्राणानामप्रतीतिनैष दोषः पुरुषभेदाभिप्रायेयं वीप्सा प्र
ति पुरुषं सप्त सप्त प्राणा इति न तत्त्वभेदाभिप्राया सप्त सप्ताम्रेडेण इति। नन्वष्टत्वादिकमपि संख्याप्रातेषु तहृता कथं सप्तैव स्युः सत्सु नु दृष्ट
ता विरोधात्वतमात्र संख्या भूयसा तस्मात्तत्रत्तो कल्पनानुरोधात्सप्तसंख्याध्यवसाने वृत्तिभेदोपेक्षं च संख्यांतरश्रवणमिति मन्यते। अत्रो
च्यते॥ ॥ हस्तादयस्तु स्थिते तो नैवं॥ ॥ हस्तादयस्तु परे सप्तभ्योतिरिक्ताः प्राणाः श्रूयंते हस्तौ वै ग्रहः स कर्मणातिग्राहेण गृहीतः हस्ता
भ्यां हि कर्म करोतीत्येवमाद्यासु श्रुतिषु स्थितेषु च सप्तातिरिक्तेषु सप्तत्वमंतर्भावाद्व्याख्यायते संभावयितुं हीनाधिकसंख्याविप्रतिपत्तौ ह्यधिकसंख्या
संग्राह्या भवति। तस्यां हीनांतर्भवति। न तु हीनायामधिकायास्तस्यां नैवमंतर्भावः तस्मात्कल्पनानुरोधात्सप्तैव प्राणाः स्युरिति॥ ॥

भाव्यनीया। ततो वरं सप्ताधिकसप्तत्वेंतर्भावः लाघवादिति शंकते सिद्धांतपति। अत्रेति। आदानेन कर्मणाऽगृहीतः संबंधमेवाह। हस्ताभ्यामिति। अ
तोऽधिकसंख्यायां न्यूनायामंतर्भावः क्षमे। गास्तस्मैव प्राणाः स्युः लाघवानुरोधादिसेवन मंतव्यमित्यन्वयः॥ ॥

शा·सू·भा·२ तर्हिकतीन्द्रियाणीत्याकांक्षायामाहोत्तरेति। श्रुतीनांमिथोविरोधेसतिमानांतरानुगृहीताश्रुतिर्बलीयसीतिन्यायेनकार्यलिंगानुमानानुगृहीतै
कादशप्राणश्रुत्यनुसारेणसप्तश्रुतयोनेयाइत्यभिसंधायाहसत्यमिति एकादशकार्यलिंगान्याह।शब्देति। त्रयःकालास्त्रैकाल्यंतद्विषयावृत्तिर्यस्य
१४१ उत्तरसंख्यानुरोधादेकादशैवतेप्राणाःस्युरिति। तथाचोदाहृताश्रुतिः दशेमेपुरुषेप्राणाआत्मैकादशइति। आत्मशब्देनचात्रांतःकरणंप
रिगृह्यतेकरणाधिकारात्। ननुएकादशत्वादप्यधिकेएकादशत्रयोदशत्वेइत्युक्तेसत्यमुदाहृतेनत्वेकादशभ्यःकार्यजातेभ्योऽधिकंकार्यजा
तमस्तियदर्थमधिकंकरणंकल्प्येत शब्दस्पर्शरूपरसगंधाविषयाः पंचबुद्धिभेदास्तदर्थानिपंचबुद्धींद्रियाणिवचनादानविहरणोत्सर्गा
नंदाःपंचकर्मभेदास्तदर्थानिचपंचकर्मेंद्रियाणिसर्वार्थविषयंत्रैकाल्यवृत्तिमनस्त्वेकमनेकवृत्तिकंतदेववृत्तिभेदात्क्वचिद्भिन्नवद्व्य
पदिश्यते।मनोबुद्धिरहंकारश्चित्तंचेति।तथाचश्रुतिःकामादीन्नानाविधावृत्तीरनुक्रम्याह।एतत्सर्वंमनएवेति।अपिचसप्तैवशीर्षण्या
न्प्राणानभिमन्यमानस्यचत्वारएवप्राणाअभिमताःस्युःस्थानभेदाद्ध्येतेचत्वारःसंतःसप्तगण्यंते।द्वेश्रोत्रेद्वेचक्षुषीद्वेनासिकेएकावा
गिति नचतावतामेववृत्तिभेदाइतरेप्राणाइतिशक्यतेवक्तुंहस्तादिवृत्तीनामत्यंतविजातीयत्वात्।तथानववैपुरुषेप्राणानाभिर्दशमीत्य
त्रापिदेहच्छिद्रभेदाभिप्रायेणैवदशप्राणाउच्यंतेनप्राणतत्त्वभेदाभिप्रायेणनाभिर्दशमीतिवचनात् नहिनाभिर्नामकश्चित्प्राणःप्रसिद्धोस्ति। १४१
नतत्रैकाल्यवृत्ति।इंद्रियांतराणांवृत्तिमात्रमग्राहित्वादतीतादिज्ञानायमनोंगीकार्यमित्यर्थः।विशेषितत्वादित्यस्यार्थंनिरस्यति।अपिचसप्तेति।न
चतावतामिति।आदानादीनांश्रोत्रादिभ्योत्यंतवैजात्यादित्यर्थः।तेषांतद्वृत्तित्वेबधिरादीनामादानादिनस्यादितिभावः॥ ॥

कथंतर्हिछिद्रेभ्यएषः इत्याहं कालस्त्वणपेत्याह।मुख्यस्यतितिसत्सप्ताणाः प्रभवंतीस्थानासनार्थी।अष्टौग्रहाइतिश्रुतिस्तुउपलक्षणार्थो
।प्राणपस्त्वश्वादानामपिबंधकत्वाद्विशेषादितिविवेक्तव्यं।नन्विदंसूत्रव्याख्यानमसंगतंपंचधीद्रियवाङ्मनसांसप्तत्वावगतेःशीर्षण्यानांचतु
र्णांविशेषितत्वमितिहेत्वोर्वैमधिकपाप्पाद्युक्तेपरिसंख्यादेवाङ्गविष्टचेरह।इयमपरेति।इंद्रियाणिकतीतिसंदेहेपूर्वपक्षसूत्रंयोजयति।सप्ते

सुखस्यस्तुप्राणास्तुभवतिनाभिरपिएकंविशेषायततनमित्यतोनाभिर्दशमीस्पृश्यतेकचिदुपासनार्थंकतिचित्प्राणगणएपंतेकुचित्सद्दृश्यन्ते
पंतिदेवंविचित्रेशालेप्रमाण्यानेसतिकिंपरमार्थानामितिविवेक्तव्यंकामैजानवृषालेकादशत्वामानंप्रमाणविवयंप्रमाणमितिस्थितं।इ
यमपराह्नत्रइष्ठपयोजना।समेवप्राणाःस्तुःपतःसप्तानामेवगतिःश्रूयतेतेनमुत्क्रामंतंप्राणोनुउत्क्रामतिप्राणमनुत्क्रामंतंसर्वेप्राणाअनु
क्रामंतीत्यत्रानुसूर्वदादशेत्वपद्यतेपक्षेसंसप्तानामेवगतिःप्रतितत्वप्रतइतिविशेषितत्वमदत्याह।सप्तैवहिप्राणाश्चकुराःप्रमःतत्वेषुपर्य
ताविशेषिताःइहप्रकृताःसप्तवैकचारसुषःपुरुषःपरइःपर्याववर्तंतेश्चथारूपतोभवतिरकीभवतिनपश्यतीत्याहुरित्येवमादिनाउत्क
मणेनप्रकृतगामीचसर्वशब्दोभवति।यथासर्वेब्राह्मणाःभोजयितव्याइतियेनिमंत्रिताःप्रकृताब्राह्मणास्तस्वसर्वशब्देनोच्यंतेनान्ये

ति।तंजीवात्मानंयेप्राणाःसहगच्छंतितेषामेवभोगहेतुत्वादिंद्रियत्वमित्यर्थः।यचावस्थायांएकतामुपगच्छंतितेनुयाहकत्रयेण्ड्रू
पराङ्पर्यावर्तंतेबहिर्देशात्स्वातिनंहृदयंप्रतिगच्छंति।अथतदानीमयंमुमूर्षुररूपज्ञोभवतिदेशांतरेदेवंप्रविष्टेलिंगात्मासुहृदयेमनसे
कीभवतितदायंनपश्यतीतिपाठ्यस्थाआहुरित्यर्थः।आदिपदात्जिघ्रतिनवदतिनरसयतेनशृणोतिनमनुतेनस्पृशतिनविजानातीति

ब्र·सू·भा·२ समानामेवामी वेन सह गतिरिति सिद्धं ग्रहत्वश्रुत्या हस्तादीनामपि गतिमत्तेति सिद्धान्तयति । एवमित्यादिना । हस्तादिरिं बंधस्यामोक्षात्तस्य ग
तौ स्थितिमाह । पुर्यष्टकेनेति । प्राणादिपंचकं भूतसूक्ष्मपंचकं ज्ञानेन्द्रियपंचकं कर्मेन्द्रियपंचकमन्तःकरणचतुष्टयमविद्याकामकर्माणि चेति
१४२ [illegible]
एवमिहापि विवक्षिताः सप्तप्राणास्त एव सप्तवेदाद्वैतेनोक्तं तेनान्य इति नन्वत्र विज्ञानमष्टममनुक्रान्तं कथं सप्तानामेवानुक्रमणं नैष दोषः ।
मनोविज्ञानयोस्तत्त्वाभेदाद्वृत्तिभेदेऽपि सप्तत्वोपपत्तेः तस्मात्सप्तैव प्राणा इत्येवं प्राप्ते ब्रूमः हस्तादयस्त्वपरे सप्तभ्योऽतिरिक्ताः प्राणाः प्रतीयन्ते
हस्तो वै ग्रह इत्यादिश्रुतिषु ग्रहत्वं चैव बंधनभावो गम्यते बध्यते क्षेत्रज्ञोऽनेन ग्रहसंज्ञकेन बंधनेनेति । स च क्षेत्रज्ञो नैकस्मिन्नेव शरीरे बध्यते
शरीरान्तरेष्वपि तुल्यत्वात् बंधनस्य । तस्माच्छरीरान्तरसंचारीदं ग्रहसंज्ञकं बंधनमित्यर्थोऽर्थाद्भवति । तथा च स्मृतिः पुर्यष्टकेन लिंगे
न शं प्राणाद्येन स युज्यते । तेन बद्धस्य वै बंधो मोक्षो मुक्तस्य तेन चेति प्राङ्मोक्षाद्ग्रहसंज्ञकेनानेन बंधनेनावियोगं दर्शयति । आथर्वणे च
विषयेन्द्रियानुक्रमणे च बुद्ध्यादि दृष्टव्यं बुद्धितत्तुल्यत्व हस्तादीनीन्द्रियाणि सविषयाण्यनुक्रामति हस्तौ चादातव्यं चोपस्थश्चानन्दयितव्यं च
पायुश्च विसर्जयितव्यं च पादौ च गन्तव्यं चेति तथा दशेमे पुरुषे प्राणा आत्मैकादश इति तेषु दशस्मात् शरीरान्मर्त्यादुत्क्रामन्त्यथ रोदयन्तीत्येकादशानां
प्राणानामुत्क्रान्तिं दर्शयति । सर्वशब्दोऽपि च प्राणशब्देन संबध्यमानोऽशेषान् प्राणानभिदधानो न प्रकरणवशेन सप्तस्वेवावस्थापयितुं शक्यते प्र
करणाच्छब्दस्य बलीयस्त्वात् । सर्वे प्राणा भोजयितव्या इत्यत्रापि सर्वेषामेव श्रवणान्निवर्तिनां ज्ञातव्यानां ग्रहणमाप्नं सर्वशब्दस्य मर्थ्यात्तु सर्वभोज
नासंभवाच्चतत्र ज्ञानिमंत्रितमात्रविषयावर्वशब्दस्य व्यवस्थितिरिह तु न किंचित्सर्वशब्दार्थसंकोचकारणमस्ति तस्मात्सर्वशब्देनात्रशेषाणां प्राणा १४२
पुर्यष्टकमात्मनो ज्ञापकत्वाल्लिंगं सति च संभवे सर्वश्रुतिसंकोचो न युक्त इत्याह सर्वश्रुतिरिति तस्मात्संख्याश्रुतीनामविरोधादेकादशेन्द्रियकारणान्नस्मिन्
समन्वय इति सिद्धम् ॥

नां परिग्रहः प्रदर्शिता पंचित समानानामनुक्रमणमित्यन
वधतस्मादेकादशैव प्राणाः शब्दतः कार्यतश्चेति सिद्धं ॥

अनंतावस्था॥ प्राणाः सर्वेनंताइतिश्रुतेः इंद्रियाणां विभुत्वात्तेषामुत्क्रांतिरसिद्धा किंतु तत्तद्देहे तेषामभिव्यक्तिरूपाः प्रादेशिक्यो वृत्तयः संति तत्ता
सामुत्क्रांत्यादिरिति सांख्यानां मोक्षपक्षस्तत्संगत्या प्राणाः किंपरिमाणा इति संदेहे सिद्धांतयति अथ धुनेत्यादिना। उत्क्रांतिसंख्यानिर्णयानंतरं परिमा
णं निरूप्यत इत्यर्थः अनुद्भूतरूपस्पर्शत्वे सति सूक्ष्मत्वं परिच्छेदोऽल्पत्वं तु ध्यादीनां विभुत्वेन तदुपाधिकमात्मनोऽणुत्वादिकं न सिध्येदिति कृत्स्नापर्यविरो

अणवश्च॥ ॥अधुना प्राणानामेव स्वभावांतरमभ्युच्चिनोति। अणवश्चैते प्रकृताः प्राणाः प्रतिपत्तव्याः अणुत्वं चैषां सौक्ष्म्यपरिच्छेदेन
परमाणुतुल्यत्वं कृत्स्नदेहव्यापिकार्यानुपपत्तिप्रसंगात् सूक्ष्मा एते प्राणाः स्थूलाश्चेत्स्युः मरणकाले शरीरान्निर्गच्छंतो बिलादहिरिवोपल
भ्येरन् म्रियमाणस्य पार्श्वस्थैः परिच्छिन्नाश्चैते प्राणाः सर्वगताश्चेत्स्युः उत्क्रांतिगत्यागतिश्रुतिव्याकोपः स्यात् तद्गुणसारत्वं च जीवस्य न
सिध्येत् सर्वगतानामपि वृत्तिलाभः शरीरदेशे स्यादिति चेत् न वृत्तिमात्रस्य करणत्वोपपत्तेः। परिच्छेदस्तूपलब्धिसाधनं वृत्तिः अन्यद्वा त
स्यैव तु करणत्वं संज्ञामात्रे विवादः इति करणानां व्यापित्वकल्पना निरर्थिका तस्मात् सूक्ष्माः परिच्छिन्नाश्च प्राणा इत्यध्यवस्यामः॥ ॥
श्रेष्ठश्च॥ मुख्यश्च प्राणः इतरप्राणवत् ब्रह्मविकार इत्यतिदिशति तच्चाविशेषेणैव सर्वप्राणानां ब्रह्मविकारत्वमाख्यातं एतस्माज्जायते प्रा
णो मनः सर्वेंद्रियाणि चेति सर्वेंद्रियमनोव्यतिरेकेण प्राणस्योत्पत्तिश्रवणात् सप्राणमसृजत इत्यादिश्रवणाभ्यश्च॥ ॥ ॥ ॥

धृमाह। तद्गुणसारत्वमिति। उत्क्रांत्यपेक्षमनूद्य निरस्यति। सर्वगतानामिति। आनंत्यश्रुतेरुपासनार्थत्वात् नोत्क्रांत्यादिश्रुतीनां तथा विरोध इति सिद्धं
श्रेष्ठश्चातिदेशत्वात् संगत्याद्यपेक्षा न प्राणा इत्यनुक्रम्यामोह्यत इति दृश्यते॥

शा. सू. भा. २ ननु प्राणो जायते नवेति संशयाभावादतिदेशो न युक्त इत्याक्षिपति किमर्थमिति। निश्चितमप्युत्पत्तिमुपलम्भेन प्राणस्य श्रुत्याधिकारांकामाह नासदासीपे
हीति नासदासीदित्यारभ्याधीते त्यर्थः। तर्हि तदा प्रलयकाले मुख्यप्राणोऽप्यस्तु मनःकार्यवान्नासीदप्यतं च देवभोग्यं नासीत्प्राणः प्रकृतः चिहरूपश्चं
१५३ प्रहः प्रकृतः सूर्यश्चन्द्रमास्तस्य स्वधया सहैकलग्नः। पितृभ्यो दीयमानं स्वधा मद्यस्त्वेन धनं मायास्वधा तया सह तदेकं ब्रह्मानीदासीदिति परमार्थः।
किमर्थं पुनरतिदेशः अधिकारांकानिरासार्थः। नासदासीपेहि ब्रह्मप्रधाने सूक्ते मंत्रवर्णो भवति न मुख्यप्राणसीदप्रतं तन्न तर्हि न प्राणश्रुतं
प्राणी प्रकृतः प्रानीद्वातं स्वधया तदेकं तस्माद्धान्यन्नपरः किंचनासेति स आनीदिति प्राणकर्मोपादानात्प्राणस्य सत्त्वेः संतमिव प्राणं सूचय
ति। तस्मादजः प्राण इति जायते कृत्स्नविकृतिः तामृतिदेशो नोपपन्न इति प्रानीदत्र हेपि न प्राणसत्त्वेः प्राणसद्भावं सूचयति। अवातमिति विशेष
णात इति प्राणाद्यपमना शुभ्रं इति च मूलप्रकृतेः प्राणादिसमस्तविशेषरहिततास्य दर्शितत्वात्। तस्मात्कारणसद्भावप्रदर्शनार्थमेवाप
मानीदुच्छ्वसिति। श्रेष्ठ इति च मुख्यं प्राणमभिदधाति प्राणो वाव ज्येष्ठश्च श्रेष्ठश्चेति श्रुतिनिर्देशात् तज्ज्येष्ठश्च प्राणः शुक्रनिषेककालादारभ्य
तस्य वृत्तिलाभात् चेतस्पतदानीं वृत्तिलाभः स्यात्तस्मान्नेति विकॢप्तः श्रुतेः पूर्वेतनसंभवे द्वाश्रोत्रादीनां तु कर्णाद्यङ्कुलाद्विस्थानविभागनिष्पत्तौ
वृत्तिलाभान्न ज्येष्ठत्वं श्रेष्ठश्च प्राणः गुणाधिक्यान्न वैशस्यादस्त्वदर्ते जीवितुमिति।
आनीदिति तद्वेष्टा कृतवादिति पूर्वपक्षार्थः। तस्माद्गुणः परः मु
ख्यप्राणस्य किमपि तद्वत् भेलर्थः। परिहारः सुबोधः। ननु श्रेष्ठत्वं द्रव्यप्राणे प्रसिद्धभावात्कथमस्य अमितितन्नाह। श्रेष्ठ इति चेति श्रुतिं व्याचष्टे।
ज्येष्ठश्च प्राणो शुक्रादिनापूर्वेन पञ्चवेतनसंभवे कृभेनिभवेदित्यर्थः। यागादिजीवनहेतुत्वं प्राणस्य गुणः एवमानीच्छुसविरोधाप्राणोत्पत्ति

ब्र.सू.भा.२
१४४

प्रमाणाभावादिति श्रोत्रादीनामिव प्राणानामेकस्य कृत्स्नानुकूलपरिस्पंदेषु नानाभावात् तस्य वृत्तिहीनामपरिस्पंदत्वेन विज्ञानं प्रत्यापरिस्पंदरूपप्राणानां नतु फ
लत्वाद्वांतरव्यापाराभावान्न समस्तकरणवृत्तिः प्राण इत्यर्थः । किंच प्राणस्य द्विसिद्धिवागादीनामेव प्राधान्यं वाच्यं नैतद्युक्तमित्याह । तथा प्राणस्येति । प्रथमस्

प्रमाणाभावात् असंततविजातीयत्वाच्च श्रवणादिभ्यः प्राणस्य तथा प्रमाणस्पष्टं दृष्टान्तादिप्रयोगं गुणभावोपगमश्रुतं प्रति वागादीनां न करण
वृत्तिमात्रे प्राणोपलक्षकत्वेन तस्माद्द्वयोर्वायुक्रियाभ्यां प्राणः पृथक् न हीयं श्रुतिः प्राणः सर्ववृत्तिरिति । उच्यते । वायुरेवाध्यात्ममापन्नः पंचव्यू
हो विशेषात्मनावतिष्ठमानः प्राणो नाम भण्यते तेन तत्त्वांतरं नापि वायुमात्रं स्यात् अभेदप्रतिभेदाभेदश्रुती न विरुध्येते स्यादेतत् प्राणोपि तर्हि जी
ववदस्मिन् शरीरे स्वातंत्र्यं प्राप्नोति श्रेष्ठत्वात् गुणभावोपगमाच्च तं प्रति वागादीनामिंद्रियाणां तथा हि अनेकविधा विभूतिः प्राणस्य श्राव्य
ते सुप्तेषु वागादिषु प्राण एको जागर्ति प्राण एवैको मृत्युनानाप्तः प्राणः संवर्गः वागादीन्संवृङ्क्ते प्राण इतरान्प्राणान्रक्षति मातेव पुत्रानिति त
स्मात् प्राणस्यापि जीववत्स्वातंत्र्यप्रसंगः तं परिहरति ॥ १४४

दोषेण वस्त्वंतरं नापि नत्वा तद्विकारत्वात् तथा वायोर्विकारः प्राण इत्यभेदश्रुतेरिति माह । उच्यत इति । देहस्थानः पंचावस्थोपि विकारात्मना
स्थितो न वायुरेव प्राण इत्यर्थः । प्राणस्य करणत्वमिति भावे जीववत् भोक्तृत्वं स्यादिति शंकते स्यादेतदिति ॥

ण्डिमाणि विचार्येत घ्राणादन्यानं दृष्टकूर्त्तनुसत्तिरतिदिष्ट। संप्रसुलन्नस्य एतस्वरूपं पृथक् करोति। न वायुक्रिये पृथगुपदेशात् मुख्यः प्राणः किं वा
युमात्रं। उत करणानां साधारणव्यापारः। आहोस्वित् तत्त्वान्तरमिति विप्रतिपत्तौ प्राणो भेदश्रुतीनां मिथो विरोधात् संशये पूर्वपक्षमाह। तत्रेति। द्वितीयसां
ख्यपक्षं दर्शयति। अथवेति सिद्धान्तसेन सूत्रस्य दत्ते इत्यत इति मनोरूपप्रसङ्गेनाक्रमणं च सत्। श्रोत्रेष्वतुष्कास्त्व श्रुतावुक्तं तत्र प्राणो वायुर्नाधि
न वायुक्रिये पृथगुपदेशात् ॥ स पुनर्मुख्यः प्राणः किंस्वरूप इतीदानीं जिज्ञास्यते। तत्र प्राप्तं तावच्छ्रुतेर्वायुः प्राण इति। एवं हि श्रूयते यः प्राणः स वा
युः स एष वायुः पंचविधः प्राणोऽपानो व्यान उदानः समान इति। अथवा तन्त्रान्तरीयाभिप्रायात्समस्तकरणवृत्तिः प्राण इति प्राप्तं। एवं हि तन्त्रान्तरी
या आचक्षते सामान्या करणवृत्तिः प्राणाद्या वायवः पंचेति। अत्रोच्यते। न वायुः प्राणः नापि करणव्यापारः। कुतः। पृथगुपदेशात्। वायोस्तावत्प्राण
स्य पृथगुपदेशो भवति प्राण एव ब्रह्मणश्चतुर्थः पादः स वायुना ज्योतिषा भाति च तपति चेति न हि वायुरेव सन्वायोः पृथगुपदिश्येत। तथा करण
वृत्तेरपि पृथगुपदेशो भवति। वागादीनि करणान्यनुक्रम्य तत्र तत्र पृथक्प्राणस्यानुक्रमणात् तद्वृत्तिमत्त्वाभेदात्। न हि करणव्यापार एव सन्करण
भ्यः पृथगुपदिश्येत। तथैतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च खं वायुरित्येवमादयोऽपि करणेभ्यः प्राणस्य पृथगुपदेशा अनुस
र्त्तव्याः। न च समस्तानां करणानामेका वृत्तिः संभवति। प्रत्येकमेकैकवृत्तित्वात्समुदायस्य चाकारकत्वात्। ननु पंजरचालनन्यायेनैतद्भवि
ष्यति। यथैकपंजरवर्तिन एकादश पक्षिणः प्रत्येकं प्रतिनियतव्यापाराः संतः संभूयैकं पंजरं चालयंति। एवमेकशरीरवर्तिन एकादश प्राणाः
प्रत्येकं नियतवृत्तयः संतः संभूयैकां प्राणाख्यां वृत्तिं प्रतिलप्स्यंत इति। नेत्युच्यते। युक्तं तत्र प्रत्येकवृत्तिभिरवान्तरव्यापारैः पंजरचालनानुरूपैरे
वोपेताः पक्षिणः पंजरचालनं प्रतिपद्येरन्निति दृष्टत्वात्। इह तु श्रवणाद्यवान्तरव्यापारोपेताः प्राणा न संभूय प्राण्युरिति युक्तं॥
देविके न नाभिसन्नसन्नेभ्यो भिन्नकः संस्तुपतिकाधिस्रमो भवतीत्यर्थः। श्रुतिषु तन्त्रम्यायासवाणादीनां चामिथः संवादलिंगेन पृथक्त्वं तिरोहितं तैत्ति
यत इभिन्नत्वापारेभ्यो विभिन्नत्वमित्याह। नथेति। प्राणास्येंद्रियवृत्तित्वे श्रुत्यनिरस्यमुख्याविनिरस्यति। न च समस्तानामिति। प्रा चसु: साधारणवृत्तिः चेत् तत्रो

प्राणो न भोक्ता भोगोपकरणत्वात् चक्षुरादिवदिति सूत्रार्थमाह तनुग्रहणं स्थूलादिनामथाप्युह इह देहांतरयोः सर्वत्र सहप्रयुज्यमानत्वेन साम्लत्वेन वा सा
म्यात् तनुग्रहणं पाठस्तथा करणैः सहोपकरणत्वेन सामान्यात् प्राणस्यापाठ इति न हेतोरसिद्धिरित्यर्थः। किंच प्राणो न भोक्ता सावयवत्वात् घटवदेतेति कल्पनीये

चक्षुरादिवत्तु तत्सहशिष्ट्यादिभ्यः॥ ॥ नन्विंद्रियः प्राणस्तस्य तज्जीव्यापर्णयति। यथा चक्षुरादीनि राजप्रकृतिवत् जीवस्य कर्तृत्वं भोक्तृत्वं प्रत्यु
पकरणानि तस्य तत्र। तथा मुख्योपि प्राणो राजमंत्रिवत् जीवस्य सर्वार्थत्वेन उपकरणभूतो न स्वतंत्रः। अतः तत्सहशिष्ट्यादिभ्यः। तैश्च
क्षुरादिभिः सहैव प्राणः शिष्यते प्राणसंवादादिषु समानधर्मिणां च सह शासनं युक्तं। बृहद्रथंतरादिवत्। आदि शब्देन संहतत्वाचेतनत्वादी
न् प्राणस्य स्वातंत्र्यनिराकरणहेतून् दर्शयति। स्यादेतत् यदि चक्षुरादिवत् प्राणस्य जीवं प्रतिकरणभावोभ्युपगम्येत विषयांतरं रूपादिव
त्स्य संप्रेत रूपाद्यालोचनादिभिर्हि वृत्तिभिर्यथा चक्षुरादीनां जीवं प्रतिकरणभावो भवति। अपि चैकादशैवैकार्यजातानि रूपालोचनादी
नि परिगणितानि यद्यर्थमेकादशप्राणाः संगृहीताः नतु द्वादशमपरं कार्यं ज्ञातमवगम्यते यदर्थमयं द्वादशः प्राणः प्रतिज्ञायतेति। अ
तउत्तरं पठति अकरणत्वाच्च न दोषस्तथाहि दर्शयति॥

हवत् ननु पञ्चैषोपकरणं तत्त्वविषयं ह्यन्यथा चक्षुरादिकं प्राणस्य तु निर्विषयत्वात् धारणाकार्याभावाच्च नोपकरणत्वमिति शंकते स्यादेतदिति॥

श्वे॰स॰भा॰२ उत्क्रान्तेः शरीरेष्वभिमानात् देहेन्द्रियधारणेन तत्कर्मसाधनत्वाधारणकामेत्वाच्च निर्विषयत्वाभिप्रायेण स्वशरीर एवाङ्गोपकरणत्वमुक्तं ननु चक्षुरा
१४५ दिवत् ज्ञानकर्मकरणत्वमस्मिन्नेव न स्वविषयत्वं स्यादिति परिहरति न तावदित्यादिना। अङ्गुष्ठमात्रेत्वस्यैवाङ्गुष्ठतानिमित्तं पूर्वं दिदिशिवान्दचक्रिरेत द

न तावदिन्द्रियमात्रप्रसंगो दोषः। अकरणत्वात्प्राणस्य नहि चक्षुरादिवत्प्राणस्य विषयपरिच्छेदेन करणत्वमभ्युपगम्यते न च सैतावता कर्मा
भावस्वकस्मात्तथा हि श्रुतिः प्राणान्तरेष्वसंप्रयमानं मुख्यप्राणस्य वैशेषिकं कार्यं दर्शयति प्राणसंवादादिषु। अथ ह प्राण उच्चिक्रमिषन्स यथा सुहि
रेड्डुष्कपकम्यपस्मिल्लुत्क्रान्तदं शरीरं पापिष्ठतरमिव दृश्यते स वः श्रेष्ठ इति चोपन्यस्य प्राणे कं वाण्यायुत्क्रमणेन तद्वृत्तिमात्रहीनं यथापूर्वं जी
वनं दर्शयित्वा प्राणोच्चिक्रमिषायां वागादिशैथिल्यापत्तिं शरीरपातमसंगं च दर्शयन्ती श्रुतिः प्राणनिमित्तां शरीरेन्द्रियस्थितिं दर्शयति तान्वरिष्ठः
प्राण उवाच। मा मोहमापद्यथाहमेवैतत्पञ्चधात्मानं प्रविभज्यैतद्बाणमवष्टभ्य विधारयामीति चैतमेवार्थं श्रुतिराह प्राणेन रक्षन्नवरं कुलायमि
ति तेनेतरप्राणानवतीति च प्राणनिमित्तां शरीरेन्द्रियपुष्टिं दर्शयति। कस्मिन्न्वहमुत्क्रान्त उत्क्रान्तो भविष्यामि कस्मिन्वा प्रतिष्ठिते प्रतिष्ठा
स्यामीति स प्राणमसृजतेति प्राणनिमित्ते जीवस्योत्क्रान्तिप्रतिष्ठे दर्शयति॥

त्रिमात्रहीनमिति मृत्कादिभावेन स्थितमित्यर्थः अवरं नीचं कुलायं देहत्वंगं इत्याराग्रे नरक्षन्नजीवः स्वपितीत्यर्थः तद्दैवतदानीमेवतेनप्रा १४५
ण न पदस्यातिजीवस्तेन प्राणकृतानि तेति भावः॥

एवंभूतेः प्राणस्यास्य प्राणनं कार्यमस्तीत्यर्थः ॥ तत्रैव हेत्वंतरं पर्यस्त्रं व्याचष्टे । इत्यश्वेश्वासादिना । वृत्तिरवस्था । अग्निमंथनादिकं वीर्यवत्कर्म
।कामादिवृत्तिवज्ज्ञानेपि पंचत्वनियमो नास्तीत्यरुचिं स्वमनेनोद्घाटयन् सांतरं गृह्णातीति तत्त्वात्रापीत्यादिना । प्रमाणं प्रमितिः विपर्ययो भ्रमः ।
पंचवृत्तिर्मनोवद्व्यपदिश्यते ॥ ॥ इतश्चास्ति मुख्यप्राणस्य वैशेषिकं कार्यं यत्कारणं पंचवृत्तिरयं व्यपदिश्यते श्रुतिषु प्राणोऽपानो व्यान उद
ानः समान इति वृत्तिभेदश्चायं कार्यभेदापेक्षः प्राणः प्राग्वृत्तिरुच्छ्वासादिकर्मा अपानोऽवाग्वृत्तिर्निःश्वासादिकर्मा व्यानः तयोः संधौ वर्तमानो वी
र्यवत्कर्महेतुः उदान ऊर्ध्ववृत्तिरुत्क्रांत्यादिहेतुः समानः समं सर्वेष्वंगेषु योऽन्नरसान्नयतीति । एवं पंचवृत्तिः प्राणः मनोवत् यथा मनसः
पंच वृत्तयः एवं प्राणस्यापीत्यर्थः । श्रोत्रादिनिमित्ताः शब्दादिविषयाः मनसः पंचवृत्तयः प्रसिद्धाः । ननु कामः संकल्प इत्याद्याः परिप
ठिताः तैरन् पंचसंख्यातिरेकात् । नन्वत्रापि श्रोत्रादिनिरपेक्षा भूतभविष्यदादिविषयापरा मनसो वृत्तिरस्तीति समानः पंचसंख्यातिरे
कः । एवं तर्हि परमतमप्रतिषिद्धमनुमतं भवतीति न्यायादिहापि योगशास्त्रप्रसिद्धा मनसः पंचवृत्तयः परिगृह्यंते प्रमाणविपर्ययवि
कल्पनिद्रास्मृतयो नाम बहुवृत्तित्वमात्रेण वा मनः प्राणस्य निदर्शनमिति द्रष्टव्यं । जीवोपकरणत्वमपि प्राणस्य पंचवृत्तित्वान्मनोवदिति
योजयितव्यं ॥
शशविषाणादिज्ञानं विकल्पः । तामसी वृत्तिर्निद्रा स्मृतिः प्रसिद्धा । भ्रमनिद्रयोरविद्यावृत्तित्वान्न मनोवृत्तित्वमित्यरुच्यास्वमनेन माहाबहूनीति स
ख्यार्थांतरमाह जीवेति तदेवं प्राणवायोर्भेदाभेदश्रुत्योरविरोध इति सिद्धं ॥

शा॰सू॰भा॰२ एवं मुख्यप्राणस्योत्पत्तिं स्वरूपं चोक्त्वा परिमाणं संदेहेऽणुत्वमतिदिशति। अणुश्चेति। अधिकाशंकामाह। ननु विभुत्वमपीति। प्लुषिर्मशकादपि सू-
१४६ क्ष्मो जन्तुः पुत्तिकेत्युच्यते। नागो हस्ती। प्राण उत्क्रामतीति श्रुत्याल्पत्वं प्राणस्य भाति समोऽनेन सर्वेणेति श्रुत्या विभुत्वमिति विरोधे आध्यात्मिकप्राणस्याल्प-
त्वमाधिदैविकस्य विभुत्वमिति विषयभेदाच्छ्रुत्योरविरोध इति समाधत्ते। तदुच्यत इति। किं चौपाधिकेनेव प्राणस्य प्लुष्यादिसमत्वेनाल्पत्वोक्तेः सम एभिस्त्रि-

अणुश्च ॥ ॥ अणुश्चायं मुख्यः प्राणः प्रत्येतव्यः। इतरप्राणवदणुत्वं चेह अपि सौक्ष्म्यपरिच्छेदौ न परमाणुतुल्यत्वं पञ्चभिर्वृत्तिभिः कृत्स्नशरी-
रव्यापित्वात् सूक्ष्मः प्राणः उत्क्रान्तौ पार्श्वस्थेनानुपलभ्यमानत्वात्परिच्छिन्नश्चोत्क्रान्तिगत्यागतिश्रुतिभ्यः ननु विभुत्वमपि प्राणस्य समाम्नायते
समः प्लुषिणा समो मशकेन समो नागेन सम एभिस्त्रिभिर्लोकैः समोऽनेन सर्वेणेत्येवमादिप्रदेशेषु तदुच्यते आधिदैविकेन समष्टिव्यष्टिरूपेण
हैरण्यगर्भेण प्राणात्मनैवैतद्विभुत्वमाम्नायते नाध्यात्मिकेन अपि च समः प्लुषिणेत्यादिना साम्यवचनेन प्रतिप्राणिवर्तिनः प्राणस्य परिच्छेद ए-
वं प्रदर्श्यते तस्माददोषः॥ ॥ [illegible] १४६

भिर्लोकैरिति विराड्देहसाम्यं समोऽनेनेति सूत्रात्मत्वमिति विषयव्यवस्था। सूक्ष्मेत्याह। अपि चेति। अणुश्चेत्यत्र सर्वेणानन्ता इति रं द्वियानं समुपास्ते नार्थाभिधि-
ति सन्ना हि तं। अत्र तु प्राणाविभुत्वमाधिदैविकमिति समाधानान्तरे केरमौ न रुचं। अन्ये तु प्रसंगात्तत्र सांख्याक्षेपो निरस्तः अत्र तु श्रुतिविरोधो निरस्त

एवं प्राणस्याध्यात्मिकाधिदैविकविभागेनाप्यणुत्वविभुत्वव्यवस्थोक्ता । तत्प्रसंगेनाध्यात्मिकानां प्राणानामाधिदैविकाधीनत्वमाह ॥ ज्योतिराद्यधिष्ठानं तु तदामननात् । वाचा हि नाम्नाभिवदति चक्षुषा रूपाणि पश्यतीति तृतीयाश्रुत्यान्वयव्यतिरेकबलाद्वा वागादीनां निरपेक्षसाधनत्वोक्तिविरोधादग्निर्वाग्भूत्वेत्यादिश्रुतिस्तेषामचेतनाग्न्याद्युपादानकत्वपरा । न तु तेषामधिष्ठातृदेवतापरा । न च स्वकार्ये शक्तानामपि वागादीना

ज्योतिराद्यधिष्ठानं तु तदामननात् । ते पुनः प्रकृताः प्राणाः किं स्वमहिम्नैव स्वस्मै स्वस्मै कार्याय प्रभवन्ति आहोस्विद्देवताधिष्ठिताः प्रभवन्तीति विचार्यते । तत्र प्राप्तं तावद्यथा स्वकार्यशक्तियोगात्स्वमहिम्नैव प्राणाः प्रवर्तेरन्निति । अपि च देवताधिष्ठितानां प्राणानां प्रवृत्तावभ्युपगम्यमानायां तासामेवाधिष्ठात्रीणां देवतानां भोक्तृत्वप्रसंगात् न शारीरस्य भोक्तृत्वं प्रतीयेत अतः स्वमहिम्नैवैषां प्रवृत्तिरित्येवं प्राप्त इदमुच्यते ज्योतिराद्यधिष्ठानं त्विति तुशब्देन पूर्वपक्षो व्यावर्त्यते ज्योतिरादिभिरग्न्याद्यभिमानिनीभिर्देवताभिरधिष्ठितं वागादिकरणजातं स्वकार्येषु प्रवर्तत इति प्रतिजानीते हेतुं चाचष्टे । तदामननादिति तथा ह्यामनन्ति अग्निर्वाग्भूत्वा मुखं प्राविशदित्यादि ॥ ॥

मचेतनत्वादधिष्ठात्रपेक्षा न विरुध्यत इति वाच्यं । जीवस्याधिष्ठातृत्वात् । किंच देवानामधिष्ठातृत्वे जीववद्भोक्तृत्वमस्मिन्देहे स्यात् तथा चैकत्र नेकभोक्तृत्वं विरोधात् तद्दुर्बलस्य जीवस्य भोक्तृत्वं न स्यादिति पूर्वपक्षप्राप्तेः सिद्धान्तयति । एवं प्राप्त इत्यादिना ॥ ॥ ॥

एवं प्राणस्याध्यात्मिकाधिदैविकविभागेनाण्वणुत्वविभुत्वव्यवस्थोक्ता। तत्प्रसंगेनाध्यात्मिकानां प्राणानामाधिदैविकाधीनत्वमाह॥ ज्योतिरा
द्यधिष्ठानं तु तदामननात्। वाचा हि नामान्यभिवदति चक्षुषा रूपाणि पश्यतीति तृतीयाश्रुत्यान्वयव्यतिरेकवत्ता वागादी। नां निरपेक्षसाधनत्वो
क्तिविरोधादग्निर्वाग्भूत्वेत्यादिश्रुतिस्तेषामचेतनानामग्न्युपादानकत्वपरा। न तु तेषामधिष्ठातृदेवतापरा। न च स्वकार्ये शक्तानामपि वागादीना

ज्योतिराद्यधिष्ठानं तु तदामननात्। ते पुनः प्रकृताः प्राणाः किं स्वमहिम्नैव स्वस्मै स्वस्मै कार्याय प्रभवन्ति आहोस्विद्देवताधिष्ठिताः प्रभवं
तीति विचार्यते। तत्र प्राप्तं तावद्यथास्वं कार्यशक्तियोगात्स्वमहिम्नैव प्राणाः प्रवर्त्तेरन्निति। अपि च देवताधिष्ठितानां प्राणानां प्रवृत्ताव
भ्युपगम्यमानायां तासामेवाधिष्ठात्रीणां देवतानां भोक्तृत्वप्रसंगात् न शारीरस्य भोक्तृत्वं प्रतीयेत। अतः स्वमहिम्नैवैषां प्रवृत्तिरित्येवं प्राप्त
इदमुच्यते ज्योतिराद्यधिष्ठानं त्विति। तुशब्देन पूर्वपक्षो व्यावर्त्यते। ज्योतिरादिभिरग्न्याद्यभिमानिनीभिर्देवताभिरधिष्ठितं वागादिकरण
जातं स्वकार्ये प्रवर्त्तत इति प्रतिजानीते हेतुं चाचष्टे। तदामननादिति तथा ह्यामनन्ति अग्निर्वाग्भूत्वा मुखं प्राविशदित्यादि॥ ॥

मचेतनत्वादधिष्ठात्रपेक्षा न विरुध्यत इति वाच्यं॥ जीवस्याधिष्ठातृत्वात्। किंच देवानामधिष्ठातृत्वे जीववद्भोक्तृत्वमस्मिन्देहे स्यात्तथा चैकत्रा
नेकभोक्तृणां विरोधात् दुर्बलस्य जीवस्य भोक्तृत्वं न स्यादिति पूर्वपक्षप्राप्तौ सिद्धान्तयति। एवं प्राप्त इत्यादिना॥ ॥ ॥

शा॰ स॰ भा॰ २ अग्निर्वाग्भूत्वादित्यश्चक्षुर्भूत्वेति च तत्र वागाद्याद्यधिदैवताधिष्ठेयत्वरूप एव संबंधो न तदुपादानफलरूपो दूरस्थादित्यमंडलादेर्मुखस्थ
चक्षुराद्युपादानत्वासंभवादित्याह। अग्नेरवागपीतिवा मुः प्राणाधिष्ठाताभूत्वा नासिके प्राविशदिति श्रुत्यैवोपनिषत्स्वाह। तथेति। भाविहोप्यतेत पति
१४७ त्वं कार्यं करोतीत्यर्थः। एतस्मिन्नधिष्ठात्रधिष्ठेयत्वरूपार्थे लिंगांतरमाह। तथैवा च भित्यादि। स ब्राह्मणो वा यं मध्यमा मुख्यः प्रकर्मणो प्रधानानन्ताद्

अग्नेर्वाग्भूत्वा मुखं प्राविशदित्यादि देवतात्मनोऽधिष्ठातृत्वमंगीकृत्योच्यते। न हि देवतासंबंधं प्रत्याख्याय वाग्नेर्वाचि मुखे वा कश्चिद्विशेषसं
बंधो दृश्यते॥ तथा वायुः प्राणो भूत्वा नासिके प्राविशदित्येवमाद्यपि योजयितव्यं। तथान्यत्रापि वागेव ब्रह्मणश्चतुर्थः पादः सोऽग्निना ज्योति
षा भाति च तपतीति वाचोऽवमादिना वागादीनामग्न्यादिज्योतिष्ट्वादिवचनेनैतमेवार्थं द्रढयति। स वै वाचमेव प्रथमामत्यवहत्सा यदा मृत्यु
मत्यमुच्यत सोऽग्निरभवदिति चैवमादिना वागादीनामग्न्यादिभावापत्तिवचनेनैतमेवार्थं द्योतयति सर्वत्र चाध्यात्माधिदैवतविभागेन वा
गाद्यग्न्याद्युत्क्रमणानन्यैवप्रत्ययासत्याभवतिस्म तावपि बाक्यप्यात्मनिनिमित्तकृः आत्मनोऽस्तित्वदर्शितः वाक्यमनधिभवतं तु वो हि देवतानि   रत्नप्र॰ पि॰ २
त्यादिना वागादीनामग्न्यादिदेवताधिष्ठितत्वं स्वशक्त्या प्रवर्तमानं दर्शितं पदुक्तं स्य च कार्यकारित्वे मुख्यमहिमैव मानः प्राणः प्रवर्तेरन्न इति तदुक्तं श
र्कानामपि ब्रह्मादीनामनुग्रहाधिष्ठितानांगच्छतीति दर्शनात्॥ १४७

पापरूपं मत्यलमतीतासहं त्वस्तकनामुक्तं कृत्वा अग्निदेवतात्वं प्रापिता वानित्यर्थः किं च मत्तस्याग्निर्वागत्येति वार्तं प्राणः चक्षुरादित्यमित्यादि
श्रुतिरप्यधिष्ठात्रधिष्ठेयत्वसंबंधं द्योतयतीत्याह। सर्वे चेति। सांबसदाशिवः॥

ननु शकटादीनां बलीवर्दादिभिरितानां प्रवृत्तिर्दृष्टा क्षीरादीनां चानधिष्ठितानामपि दध्यादिभावप्रवृत्तिर्दृश्यते। तथा चोभयथासंभवे कथं नियम
इत्यत आह। ऽभयथोपपत्तौ चेति। ऽक्तदेवतांतरनिरसनाय सूत्रमवतारयति प्राणवतेति शारीरे तौ वेति भोक्तेति शेषः। संघातो भोक्तृभोग्यभावः। अथ
देहे प्राणप्रवेशोऽनंतरं पश्चाज्जीवप्रवेशे नतु दृश्यमनुप्रविश्य सूर्यः इंद्रियं तेन च चक्षुष्याभिमानी सन् शास्त्रोपतः तस्य रूपदर्शनाय च क्षुः। यथ

ऽभयथोपपत्तौ चागमाद्देवताधिष्ठितत्वमेव निश्चीयते। यदप्युक्तं देवतानामेवाधिष्ठातॄणां भोक्तृत्वमसंगोन्न शारीरस्येति तत्परिह्रियते॥
॥प्राणवता शब्दात्॥ ॥सतीष्वपि प्राणनानाधिष्ठात्रीषु देवतासु प्राणवता कार्यकरणसंघातस्वामिना शारीरेणैवैषां प्राणानां सं
बंधः श्रुतेरवगम्यते। तथा हि श्रुतिः अथ यत्रैतदाकाशमनुविषण्णं चक्षुः स चाक्षुषः पुरुषो दर्शनाय चक्षुरथ यो वेदेदं जिघ्राणीति
स आत्मा गंधाय घ्राणमित्येवंजातीयिका शारीरेणैव प्राणानां संबंधं श्रावयति। अपि चानेकत्वात् प्रतिकरणमधिष्ठात्रीणां देवतानां
न भोक्तृत्वमस्मिन्छरीरेऽवकल्पते। एको ह्ययमस्मिञ्छरीरे शारीरो भोक्ता प्रतिसंधानादिसंभवादवगम्यते॥

प्याला करणान्यपेक्षते। तथापि ज्ञेयज्ञानतदाश्रयाहंकारान्यो वेदसमात्मा चिद्रूपस्य करणानि तु गंधादिज्ञप्त्यपेक्षस्तेन चैतन्याधिपतिम्ब्रुत्यर्थः।
किं च योऽहं रूपमद्राक्षं सोऽहं स्पृशामीति प्रतिसंधानादेकः शारीर एव भोक्ता न बहवो देवा इत्याह। ॥अपि चेति॥ ॥

कदाचिद्देवतानामत्र भोक्तृत्वं कदाचिज्जीवस्येति श्रुतिमनोरिति ताभ्यां कारुवकर्मार्जिते देहे जीवस्य भोक्तृत्वमिति प्रमात्मैवमित्याह सूत्रकारः। तस्य
चेति। उक्तमर्णादिषु जीवस्य प्राणाभिमानित्वस्येव प्राणस्वामित्वं देवतानां तु परस्वामिकरणस्याधिष्ठातृत्वमात्रमिति व्याख्यान्तरमाह। शा
रीरेतौ न वचनि सद्दिति। यथा मदीयादिः करणोपकारकृतमाकरणोपरसस्यां तगी तस्त्र याद्देवाः करणोपकारिण एव न भोक्तार इत्यर्थः। जीवस्या
दृष्टद्वारा करणाधिष्ठातृत्वात् स्वस्वामिवद्भोक्तृत्वं देवतानां तु करणोपकारणभिज्ञतमात्रा रथिवदधिष्ठातृत्वमिति न जीवेनान्यथासिद्धिः। देवाना

तस्य च नित्यत्वात्॥ ॥ तस्य च शारीरस्यास्मिञ्छरीरे भोक्तृत्वेनावस्थानं नित्यत्वं पुण्यपापोपलेपसंभवात् सुखदुःखोपभोगसंभवाच्च न देवतानां।
ता हि परस्मिन्नैश्वर्यपदेऽवतिष्ठमाना न हीनेऽस्मिञ्छरीरे भोक्तृत्वं प्रतिलब्धुमर्हति श्रुतिश्च भवति पुण्यमेवामुं गच्छति न ह वै देवान्पापं गच्छती
ति शारीरेणैव च नित्यः प्राणानां संबंधः उत्क्रान्त्यादिषु तदनुवृत्तिदर्शनात् तमुत्क्रामन्तं प्राणोऽनूत्क्रामति प्राणमनूत्क्रामन्तं सर्वे प्राणा अ
नूत्क्रामन्तीत्यादिश्रुतिभ्यः तस्मात्सतीष्वपि करणानां नियन्त्रीषु देवतासु न शारीरस्य भोक्तृत्वमपगच्छति करणपक्षस्यैव हि देवता न भोक्तृ
पक्षस्येति॥ ॥ त इन्द्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठात्॥

मधिष्ठातृत्वेनास्मिन्देहे भोक्तृत्वानुमानं तु न ह वै देवान्पापं गच्छतीत्युक्तश्रुतिबाधितं। तस्माच्चक्षुषा हि रूपाणि पश्यतीति श्रुतेः साधनत्वमात्रं बोधि
तादग्निर्वाग्भूत्वेत्याद्यधिष्ठातृदेवतापेक्षाबोधकश्रुतिभिरविरोध इति सिद्धं। तस्मिन्निन्द्रियेषु तदधिष्ठातृदेवताचिंतास्वेव प्राणव्यक्तिव्यतिरेकेण

[illegible]

प्राणादीं इंद्रियाणां भेदाभेदश्रुतिभ्यां संशयं वदन् पूर्वपक्षयति मुख्यस्यैवेत्यादिना। हंत इदानीमस्यैव मुख्यप्राणस्य सर्वे वयं रूपं भवामेति संक
ल्प्य ते वागादयस्तस्यैवाभवन्निति सभेदश्रुत्यर्थः। ते प्राणा इत्यभिन्नाः प्राणपदवाच्यत्वाच्छ्रोत्रवदित्याह। प्राणेभ्य इति ते प्राणाः श्रेष्ठादन्यत्रान्य इति प्रतिज्ञा

मुख्यश्चैकदेतरे चैकादश प्राणा अनुक्रांताः तत्रेदमपरं संदिह्यते किं मुख्यस्यैव प्राणस्य वृत्तिभेदा इतरे प्राणा आहोस्वित्तत्त्वांतराणीति किं
तावत्प्राप्तं मुख्यस्यैवेतरे वृत्तिभेदा इति कुतः श्रुतेः तथा हि श्रुतिः मुख्यमितरांश्च प्राणान् संनिधाप्य संवदमानामितरेषां ख्यापयति हंता
स्यैव सर्वे रूपमसामेति त एतस्यैव सर्वे रूपमभवन्निति प्राणैकशब्दत्वाच्चैकत्वोपसंहारः इतरथा ह्यन्याय्यमनेकार्थत्वं प्राणशब्दस्य प्रसज्येत
एकत्र वा मुख्यस्येतरत्र वा लाक्षणिकत्वमापद्येत। तस्माद्यथैकस्यैव प्राणस्य प्राणाद्याः पंचवृत्तयः एवं वागाद्या अप्येकादशेत्येवं प्राप्ते ब्रूमः। तत्त्वां
तराण्येव प्राणाद्वागादीनीति कुतः व्यपदेशभेदात्। कोयं व्यपदेशभेदः ते प्रकृताः प्राणाः श्रेष्ठवर्जिता एकादश इंद्रियाणीत्युच्यंते
श्रुतावेवं व्यपदेशदर्शनात् एतस्माज्जायते प्राणो मनः सर्वेंद्रियाणि चेति ह्येवंजातीयके व्यपदेशे पृथक्प्राणो व्यपदिश्यते। पृथक् चेंद्रियाणि॥

श्रैष्ठ्येन पदत्रयं व्याचष्टे। तत्त्वांतराण्येवेति। तद्व्यपदेशादित्यत्र तच्छब्दः प्रतिज्ञातान्यत्वपरामर्श इति प्राणा इंद्रियाणीत्यधर्मीपरामर्शाभ्यामन्यत्वे फलेऽपि
हेतूपपादनार्थत्वेन पुनरुक्तानि सूत्रपदानि योजयति। कुत इत्यादिना। सूत्रस्य विश्वतो मुखत्वात् भाष्यार्थत्वमलंकार एव न दूषणं। एतेन प्रतिज्ञाध्याहार
स्तच्छब्दस्याप्रकृतभेदपरामर्शित्वे चेति दोषद्वयमपास्तं॥

ब्र॰ सू॰ भा॰ र॰

१४९

शब्दभेदाद्वस्तुभेदस्याधत्ते प्रतिप्रसंगं शंकते। नन्विति। प्राणवन्मनसोपि इंद्रियेभ्यो भेदः स्यादित्यर्थः। अपर्यायसंज्ञाभेदात्तत्र संज्ञिवस्तुभेद इत्युत्सर्गः। स च मनःषष्ठानींद्रियाणीत्यादिस्मृतिबाधान्मनस्यपोद्यते। प्राणे तु बाधकाभावादुत्सर्गसिद्धिरिति समाधत्ते। न समित्यादिना। मनइंद्रियाणि चेति भेदोक्तिर्गोबलीवर्दन्यायेनेनेपा। सिद्धांते मनसः प्रमोपादत्वादात्मवदनिंद्रियत्वमिष्टं स्मृतौ नोत्सर्गबाध इति केचित्। किं चेतस्मा ज्ञा

ननु मनसोप्येवं सति वर्जनमिंद्रियत्वेन प्राणवत्स्यात्। मनः सर्वेंद्रियाणि चेति पृथग्व्यपदेशदर्शनात्। सत्यमेतत्। स्मृतौ तु एकादशेंद्रियाणीति मनसोपींद्रियत्वेन श्रोत्रादिवत्संग्रहणं। प्राणस्य त्विंद्रियत्वं न श्रुतौ स्मृतौ वा प्रसिद्धमस्ति। व्यपदेशभेदश्चायं तत्त्वभेदपक्षेऽवकल्पते। तत्त्वैकत्वे तु स एवैकः सन्प्राण इंद्रियव्यपदेशं लभते न लभते चेति विप्रतिषिद्धं। तस्मात्तत्त्वांतरभूता मुख्यादितरे॥ कुतश्च तत्त्वांतरभूताः

॥ ॥ भेदश्रुतेः॥ भेदेन वागादिभ्यः प्राणः सर्वत्र श्रूयते॥ १४९

श्रुते प्राणइंद्रियाणि चेति पृथक्जन्मव्यपदेशात्तत्त्वतत्रवस्तुभेदस्त्वाह। व्यपदेशभेदश्चापि तितिरेकस्मिन्नेव प्राणे इंद्रियपदप्रवृत्तौ निमित्तेन पुनरु क्तिभयान्न लभते चेति व्याघातदुस्थः। एवं भेदेनापर्यायसंज्ञाभ्यामुक्तेः पृथक्जन्मोक्तेश्चेति तद्व्यपदेशादिति हेतुर्व्याख्यातः। भेदश्रुतेरिति सूत्रेण

ते देवाः शास्त्रीयेंद्रियमनोवृत्तिरूपा असुराणां पाप्मनां निरूपणांजयार्थं मुद्गीथकर्मणि प्रथमं व्याप्तं तां वाचमूचुः त्वं न उद्गायास्वास्वाभाविकीत
थास्तिसंगीह्यत्सो ह्यमंतीवाचमनंताद्दिदृष्टे णाविध्वंसितवंतोऽसुरा इत्येवं क्रमेणसर्वे । घ्रिंद्रियेषु पापग्रस्तेषु पश्चाद्दोमिप्रकरणं विशिष्यप्रसिद्ध

ते ह वाचमूचुरित्युपक्रम्य वागादीनसुरपाप्मविद्धत्वानुपन्यस्योपसंहृत्य वागादिप्रकरणमथ ह य एवायं मुख्यः प्राण
मूचुरित्यसुरविध्वंसिनो मुख्यस्य प्राणस्य च अगुप्तकरणा तथा मनो वाचं प्राणं तान्यात्मनेकुर्वत ते तेन वमा घ्राणःप्रिभे
दश्रुतयः पदार्थसुर्णाः तस्मादपितत्वांतरभूता मुख्यादितरे कुतश्च तत्वांतरभूताः॥ ॥ ॥

मास्मे भव मासमंमुख्यं प्राणं मुचुः त्वं न उद्गायेति तस्य प्राणेनोद्गानानि विष्णमतयासंगदोषस्वन्येनासुराननष्टा इत्यसुराणां विध्वंसिनो मुख्यप्राणस्ये
ते भेदः सिद्धिरिसाह। तेहेति॥ तानि श्रीरप आत्मात्मनेस्वार्थं प्रजापतिः कृतवानित्यर्थः॥ ॥ ॥ ॥

शा.सू.भा.२ विरुद्धमेव लक्षणभेदमाह ॥ वैलक्षण्याच्चेति ॥ मत्तु एवं गदोषः । वाग्दध्रे व्रतं धृतवतीत्यर्थः । बहुभिर्भेदलिंगैर्विरोधाद्वागादीनां प्राणरूप

१५० वैलक्षण्याच्च ॥ ॥ वैलक्षण्यं च भवति मुख्यस्येतरेषां च सुप्तेषु वागादिषु मुख्य एको जागर्ति स एव चैको मृत्युनानाप्तः । आप्तास्त्वितरे तस्यै
व स्थितिलयाभ्यां देहधारणपतनहेतुत्वं नेंद्रियाणां विषयालोचनहेतुत्वं चेंद्रियाणां न प्राणस्येत्येवंजातीयको भूयांल्लक्षणभेदः प्राणें
द्रियाणां तस्मादप्येषां तत्त्वांतरभावसिद्धिः यदुक्तं त एतस्यैव सर्वे रूपमभवन्निति श्रुतेः प्राण एवेंद्रियाणीति । तदयुक्तं । तत्रापि पौर्वापर्यालो
चनाद्भेदप्रतीतेः । तथा हि वदिष्याम्येवाहमिति वाग्दध्र इति वागादीनींद्रियाण्यनुक्रम्य तानि मृत्युः श्रमो भूत्वोपयेमे । तस्माच्छ्राम्यत्येव वागि
ति च श्रमरूपेण मृत्युना ग्रस्तत्वं वागादीनामभिधायाथेममेव नाप्नोद्योयं मध्यमः प्राण इति पृथक्प्राणं मृत्युनानभिभूतं तमनुक्रामति अयं वै
नः श्रेष्ठ इति च श्रेष्ठतामस्यावधारयति । तस्मात्तदविरोधेन वागादिषु परिस्पंदलाभस्य प्राणायत्तत्वात्तद्रूपभवनं वागादीनामिति मंतव्यं न
तादात्म्यं अत एव च प्राणशब्दस्येंद्रियेषु लाक्षणिकत्वसिद्धिः । तथा च श्रुतिः । त एतस्यैव सर्वे रूपमभवन् । तस्मादेत एतेनाख्यायंते प्राणा इ १५०
ति मुख्यप्राणविषयस्यैव प्राणशब्दस्येंद्रियेषु लाक्षणिकत्वं दर्शयति । तस्मात्तत्त्वांतराणि प्राणादिंद्रियाणीति ॥ ॥

भवनं प्राणाधीनस्थितिकत्वरूपं व्याख्येयं । एतदेव प्राणशब्दस्येंद्रियेषु लक्षणाबीजं श्रुतौ तस्मादेत एतेनाख्यायंत इति पदास्पष्टमिति न भेदाभे

उत्पत्तिरूपादनेतिचकारार्थे कर्त्रीयं पारमैश्वर्ये इति तेजआदिजगदुत्पत्तिश्रुतिविरोधः श्रुतौ तेनपादद्वयेन निरस्तः। संप्रत्याकाशादुत्पत्तिश्रुतिविरोधो निरस्य
तेनाऽपि सूक्ष्मभूतोपादानं परमेश्वरमेवेति श्रुतिष्वविप्रतिपन्नं स्थूलभूतोपादाने त्वस्ति श्रुतिविप्रतिपत्तिरिति तन्निराकरणार्थमाह। संज्ञामूर्ति
क्लृप्तिस्तु त्रिवृत्कुर्वत उपदेशात्। नामरूपभेदाकरणं भिन्नः प्राण इत्युक्तं तत्प्रसंगेन स्थूलनामरूपक्लृप्तिः किंकर्तृकेति चिंत्यते तद्वावांतरसंग

॥ संज्ञामूर्तिक्लृप्तिस्तु त्रिवृत्कुर्वत उपदेशात्॥ ॥सत्प्रक्रियायां तेजोबन्नानां सृष्टिमभिधायोपदिश्यते॥ सेयं देवतैक्षत हंताहमिमा
स्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति। तासां त्रिवृतं त्रिवृतमेकैकां करवाणीति तत्र संशयः किं जीव
कर्तृकमिदं नामरूपव्याकरणमुत परमेश्वरकर्तृकमिति॥

तिः प्रक्रियाप्रकरणं ईक्षणमेवाह। हंतेत्यादिना हंत इदानीं देवताः सूक्ष्मा अनुप्रविश्येति संबंधः। तासां त्रिसृणां देवतानामेकैकां देवतां तेजो
बन्नात्मना त्र्यात्मिकां करिष्यामीति श्रुतिः पंचीकरणोपलक्षणार्था इंद्रियपिप्पलाद्याप्तोपसंहारस्तो कृत्वा तत्स्थूलीकृतेषु भूतेषु प्राणि
नां व्यवहारः संस्यतीति परदेवतामात्मात्मेन जीवेनेति पदस्य व्याकरवाणीत्यनेन संबंधः संभवासंभवाभ्यां संशयमाह। तत्रेति। पूर्वपक्षे जी

पृथिव्यंशेन कल्प्यता स्ताः सर्वस्य व्यापित्वं हि॥ इति
इंद्रियं तत्क्ष्वेदितिपक्षे॥

जीवेनेत्यस्य व्याकरवाणीति प्रधानक्रियापदेन संबंध इति पूर्वपक्षमाह ॥ तत्र प्राप्तमिति । परदेवतायाः स्वकर्तृत्वे कथमुत्तमपुरुषप्रयोग
इत्याशंक्य प्रयोजककर्तृत्वोपचारादित्याह । यथा लोक इति । सिद्धान्तयति ॥ तुशब्देनेत्यादिना अस्याः कॢप्तिप्रतिजाती यच्च अनेन स्थूलसर्वस

तत्र प्राप्तं तावत् जीवकर्तृकमेवेदं नामरूपव्याकरणमिति । कुतः अनेन जीवेनात्मनेति विशेषणात् । यथा लोके चारेणाहं परसैन्यमनुप्र
विश्य संकलयानीत्येवंजातीयके प्रयोगे चारकर्तृकमेव सत् सैन्यसंकलनं हेतुकर्तृत्वाद्राजात्मन्यध्यारोपयति संकलयानीत्युत्तमपु
रुषप्रयोगेणैवं जीवकर्तृकमेव सन्नामरूपव्याकरणं हेतुकर्तृत्वाद्देवतात्मन्यध्यारोपयति व्याकरवाणीत्युत्तमपुरुषप्रयोगेण । अपि च डि
त्थडवित्थादिषु नामसु घटशरावादिषु च रूपेषु जीवस्यैव व्याकर्तृत्वं दृष्टं तस्मात् जीवकर्तृकमेवेदं नामरूपव्याकरणमित्येवं प्राप्तेऽभिध
त्ते संज्ञामूर्तिकॢप्तिस्त्विति तुशब्देन पक्षं व्यावर्तयति संज्ञामूर्तिकॢप्तिरिति नामरूपव्याक्रियेत्येतत् त्रिवृत्कुर्वत इति परमेश्वरं लक्षयति त्रिवृ
त्करणे तस्य निरपवादकर्तृत्वनिर्देशात् येयं संज्ञाकॢप्तिर्मूर्तिकॢप्तिश्च अग्निरादित्यश्चन्द्रमा विद्युदिति तथा कुशकाशपलाशादिषु पशुमृग
मनुष्यादिषु च प्रत्याकृति प्रतिव्यक्ति चानेकप्रकारा सा खलु परमेश्वरस्यैव तेजोबन्नानां निर्मातुः कृतिर्भवितुमर्हति । कुतः उपदेशात् । तथा
हि सेयं देवतेत्युपक्रम्य व्याकरवाणीत्युत्तमपुरुषप्रयोगेण परस्यैव ब्रह्मणो व्याकर्तृत्वमिह निर्दिश्यते ननु जीवेनेति विशेषणाज्जीवकर्तृ
त्वं व्याकरणस्याध्यवसितं नैतदेवं जीवेनेत्येतदनुप्रविश्येत्यनेन संबध्यते आनन्तर्यान्न व्याकरवाणीत्यनेन नहि तेन संबन्धे व्याकरवाणीत्ययं देव
ताविषय उत्तमपुरुष औपचारिकः कल्प्येत न च गिरिनदीसमुद्रादिषु नानाविधेषु नामरूपेष्वनीश्वरस्य जीवस्य व्याकरणसामर्थ्यमस्ति येष्वपि वा
ऽपि जीवस्य सामर्थ्यं येति तं । तथा च परत्वमस्य पदा । प्रमेयोग्यताधीनत्वाज्जीवरूपेणाभिविश्याहमेव व्याकरवाणीत्यन्वयः । न तु जीवेन व्याकरवाणीति ॥

१५१

ननु तर्हि प्रवेशक्रियाजीवकर्तृका व्याकरणमीश्वरकृतमिति कथं भेदः स्यात्तत्रापत्स्यमानस्यादित्यत आह। न च जीवो नामेति वस्तुतः स्वरूपेण जलेऽपि
ष्ट दति प्रतिबिंब भावापन्नप्रवेशे सूर्यस्येव कर्तृत्वप्रयोगः जीवात्मनानुप्रवेश्यपीश्वरस्य वक्रोतीति स्मा श्रुतिर्ने केतिबोध्यं। तत्र भेदश्रुतिर्जीवस्य व्याक
र्तृ किं न स्यादित्याशंक्य तत्पराभिन्नत्वस्य तस्मात्कृतावच्छ्रुतिविरोधाच्चमेवमित्याह। परमेश्वर इति। प्रत्येकं मद्धा भूतसर्गस्य प्राग्कृत्वादि हत्वा

न च जीवो नाम परमेश्वरादसंततभिन्नश्चार इवराजतः। आत्मनेति विशेषणात् तादुपाधिमात्रनिबंधनत्वाच्च जीवभावस्य तेन तत्कृतमपि नाम
रूपव्याकरणं परमेश्वरकृतमेव भवति। परमेश्वर एव च नामरूपयोर्व्याकर्तेति सर्वोपनिषत्सिद्धांतः। आकाशो ह वै नाम नामरूपयोर्नि
र्वहितेत्यादिश्रुतिभ्यः। तस्मात्परमेश्वरस्यैव त्रिवृत्कुर्वतः कुर्मनामरूपव्याकरणं त्रिवृत्करणपूर्वकमेवेदमिह नामरूपव्याकरणं विवक्ष्य
ते। प्रत्येकं नामरूपव्याकरणस्यैव तेजोबन्नोत्पत्तिवचनेनैवोक्तत्वात्तत्त्वत्रिवृत्करणमग्न्यादित्यचंद्रविद्युत्सु श्रुतिर्दर्शयति। यदग्ने रोहितं रू
पं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्येत्यादिना। तत्राग्निरितीदं रूपं व्याक्रियते सति च रूपव्याकरणे विषयप्रतिलंभादग्निरितीदं ना
म व्याक्रियते एवमेवादित्यचंद्रविद्युत्स्वपि द्रष्टव्यं॥

करणवाक्ये प्रत्यक्षपूर्वकं स्थूलभौतिकसर्गं उच्यते इति पाठक्रमस्य नस्वराः स्वचितं श्रुत्यर्थमाह त्रिवृत्करणपूर्वकमिति। ईश्वरकर्तृत्वं प्रमाणमिति
द्वयमित्यत आह॥ तत्रेति॥ इदानीं नामरूपव्याकरणोक्तमाह। तत्राग्निरिति। यद्यप्यतः मनवा। हृदित्यत्र वेदान्ताप्रसर्वे कार्ये सत्प्रकृतत्वात् तथाप्यत्र
स्तातः प्रथमस्त्यान्तरत्वस्फुटनामसंबंधाभिव्यक्तिरग्न्यादेर्न विरोधः॥ ॥ ॥ ॥

नन्वग्न्यादीनां तैजसानामेव श्रुतावुदाहरणं दृष्टं लोहितात्मकत्वेन चित्रवस्थितमित्यत आह। अन्नेन चेति। उपक्रमे तासां मध्य इति शेषः। यद्रूपेण रू-
पादिकं कृष्णत्वादिविशेषाकारेण विज्ञातमिव भवति तद्देवतानां समुदायरूपमित्यर्थः। बाह्यं त्रिवृत्करणमुक्त्वाध्यात्मिकमपरं पूर्वोक्तलक्षणं च

अनेन चाग्न्युदाहरणेन भौमाम्भसतैजसेषु त्रिष्वपि द्रव्येषु विशेषेण त्रिवृत्करणमुक्तं भवति। उपक्रमोपसंहारयोः साधारणत्वात्। तथा हि
अविशेषेणैवोपक्रमः। इमास्तिस्रो देवतास्त्रिवृत्त्रिवृदेकैका भवतीति। अविशेषेणैव चोपसंहारः। यदु रोहितमिवाभूदिति तेजसस्तद्रूपमित्येव-
मादिर्यद्विज्ञातमिवाभूदित्येतासामेव देवतानां समास इत्येवमन्तस्तासां तिसृणां देवतानां बहिस्त्रिवृत्कृतानां सतीनामध्यात्ममपरं त्रिवृत्क-
रणमुक्तं इमास्तिस्रो देवताः पुरुषं प्राप्य त्रिवृत्त्रिवृदेकैका भवतीति। तदिदानीमाचार्यो यथाश्रुतमेवोपदर्श्य स्मार्तं कंचिद्दोषं परिहरिष्यन्॥
मांसादि भौमं यथाशब्दमितरयोश्च। त्रिवृत्कृतायाः पुरुषेणोपभुज्यमानाया भूमेर्मांसादिकार्यं यथाशास्त्रं निष्पद्यते। तथा हि श्रुतिः। अन्नमशि-
तं त्रेधा विधीयते तस्य यः स्थविष्ठो धातुस्तत्पुरीषं भवति यो मध्यमस्तन्मांसं योऽणिष्ठस्तन्मन इति॥ १५२

दन्तु त्रिवृत्करणमवतारयति तासामित्यादिना। पुरुषं शरीरं प्राप्यैकैका त्रिवृद्भवतीति कार्यत्रयात्मना भवतीत्यर्थः। उत्तरसूत्रेणाशङ्कितं दोषं निरसितु-
माशङ्काविषयमाध्यात्मिकत्रिवृत्करणं दर्शयतीति भाष्यार्थः॥

शा॰ सू॰ भा॰ २ नन्वन्नमयं मांसादिकार्यं भौममिष्यते तत्राह त्रिवृत्कृता भूमिरेवेति॥ प्राणस्य वायोरपकार्यत्वं औपचारिकं द्रष्टव्यं। एवं विषयमुक्त्वा दोषं शंक-
२५३ ते। अत्राहेति। तदुत्तरत्वेन सूत्रं व्याचष्टे। तुशब्देनेति। स्वभागाधिक्यं वैशेष्यं किमर्थं कृतमित्यत आह। व्यवहारप्रसिद्ध्यर्थमिति सर्वं स्फुटं। तस्मा-

त्रिवृत्कृता भूमिरेवैषा व्रीहियवाद्यन्नरूपेणाद्यत इत्यभिप्रायः। तस्याश्च स्थविष्ठं रूपं पुरीषभावेन बहिर्निर्गच्छति। मध्यममध्यात्मं मांसं
वर्धयति। अणिष्ठं तु मन एवमितरयोरपि तेजोऽबोर्यथाशब्दं कार्यमवगंतव्यं। मूत्रं लोहितं प्राणश्चापां कार्यं अस्थि मज्जा वाक् तेजस इ-
ति। अत्राह। यदि सर्वमेव त्रिवृत्कृतं भूतभौतिकमविशेषश्रुतेः तासां त्रिवृतं त्रिवृतमेकैकामकरोदिति। किंकृतस्तर्ह्ययं विशेषव्यपदेशः। इदं
तेज इमा आप इदमन्नमिति। तथाध्यात्ममिदमन्नस्याशितस्य कार्यं मांसादि इदमपां पीतानां कार्यं लोहितादि इदं तेजसोऽशितस्य कार्यमस्
थ्यादीति। अत्रोच्यते। वैशेष्यात्तु तद्वादस्तद्वादः। तुशब्देन चोदितदोषमपनुदति। विशेषस्य भावो वैशेष्यं भूयस्त्वमिति यावत्। सत्यपि त्रिवृत्क-
रणे क्वचित्कस्यचिद्भूतधातोर्भूयस्त्वमुपलभ्यते। अग्नेस्तेजोभूयस्त्वमुदकस्याब्भूयस्त्वं पृथिव्या अन्नभूयस्त्वमिति। व्यवहारप्रसिद्ध्यर्थं चे-
दं त्रिवृत्करणं॥ व्यवहारश्च त्रिवृत्कृतरज्जुवदेकत्वापत्तौ सत्यां न भेदेन भूतत्रयगोचरो लोकस्य प्रसिध्येत्। तस्मात्सत्यपि त्रिवृत्करणे वैशेष्यादे-
व तेजोबन्नविशेषवादो भूतभौतिकविषय उपपद्यते तद्वादस्तद्वाद इति पदाभ्यासोऽध्यायपरिसमाप्तिं द्योतयति॥ इति श्रीशारीरकमीमांसाभा-
ष्ये द्वितीयाध्यायस्य चतुर्थः पादः॥ अध्यायश्च समाप्तः॥

न्मतांतरश्रुतिभिरविरोधो ब्रह्मणि वेदांतानां समन्वयस्येति सिद्धं॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमद्गोविंदानंदभगवत्पादकृतौ शारीरमी-
मांसाव्याख्यायां द्वितीयाध्यायस्य चतुर्थः पादः॥ अध्यायश्च समाप्तः॥

॥ ॥ ॥

१५२

शारीरकसूत्रभाष्यद्वितीयाध्यायः समाप्तः

शारीरक सूत्रभाष्यतृतीयाध्यायप्रारंभः

शा॰ सू॰ भा॰ ३ ॥श्रीगणेशाय नमः॥श्रीगुरुभ्यो नमः॥ ॐ॥ यं हि वैराग्यसंपन्नास्त्वमर्थविवेकिनः॥ लभंते साधनैर्युक्तास्तं सीतानायकं भजे १ तदंतर
१ प्रतिपत्तौ रंहति संपरिष्वक्तः प्रश्ननिरूपणाभ्यां। वृत्तमनूद्य तृतीयाध्यायमाह॥ द्वितीये स्मृत्यादिना। अथेदानीं साधनाध्यायः विरुद्धेऽद्वैतार्थे

श्रीगणेशाय नमः॥ हरिः। ओं॥ ॥तदंतरप्रतिपत्तौ रंहति संपरिष्वक्तः प्रश्ननिरूपणाभ्यां॥ द्वितीयेऽध्याये स्मृतिन्यायविरोधो वे-
दांतविहिते ब्रह्मदर्शने परिहृतः॥ परपक्षाणां चानपेक्षत्वं प्रपंचितं॥ श्रुतिविप्रतिषेधश्च परिहृतः। तत्र च जीवव्यतिरिक्तानि तत्त्वानि
जीवोपकरणानि ब्रह्मणो जायंत इत्युक्तं। अथेदानीमुपकरणोपहितस्य जीवस्य संसारगतिप्रकारस्तदवस्थांतराणि ब्रह्मसतत्त्वं विद्याभेदाभे-
दौ गुणोपसंहारानुपसंहारौ॥

तत्र ज्ञानसाधनचिंतावसरे इत्युक्तत्वाद्धेतुहेतुमद्भावः लिंगोपाधिसिद्धेः तदपहितजीवसंसारचिंतेति पादयोरपि तद्भावः संगतिः॥ अत्र प्रथमपादे १
वैराग्यं॥ द्वितीये स्वप्नाद्यवस्थोक्त्या त्वंपदार्थो ब्रह्मतत्त्वं चोच्यते॥ तृतीये वाक्यार्थस्तदर्थमुपासनाश्च विचार्यंते॥ ॥ ॥ ॥

चतुर्थपादार्थमाह। सम्यग्दर्शिनामिति। दर्शितोपायाः संन्यासादयः। मुक्तिरूपफलस्य स्वर्गादिवत्तारतम्यनियमाभाव एकरूपत्वमिति यावत्। प्रसंगागतं देहात्मदूषणं। पंचसु द्युपर्जन्यपृथिवीपुरुषयोषित्स्वग्नित्वध्यानं पंचाग्निविद्या। यस्मात्कर्मणां गतिरूपोनर्थस्तस्मात्कर्मफले जुगुप्सां घृणां विरक्तिं कुर्वीतेति पंचाग्निविद्योपसंहारे श्रवणाद्वैराग्यार्थं प्रदर्श्यत इत्यन्वयः। शास्त्रादिसिद्धे नित्यानित्यविवेककृतं वैराग्यमुक्तं इह तु दृष्टपापगत्यागतिदुःखभावनाकृतं तदुच्यत इत्यपौनरुक्त्यं। अधिकरणविषयमाह। जीव इति। अविद्याप्रसिद्धा विद्येति पाठे उपासना ग्राह्या। कर्म धर्माधर्मरूपं। पूर्वप्रज्ञा जन्मांतरसंस्कारः।

सम्यग्दर्शनात्पुरुषार्थसिद्धिः सम्यग्दर्शनोपायविधिप्रभेदः मुक्तिफलानियमश्चेत्येतदर्थजातं तृतीये निरूपयिष्यते॥ प्रसंगागतं च किमप्यन्यत्। तत्र प्रथमे तावत्पादे पंचाग्निविद्यामाश्रित्य संसारगतिप्रभेदः प्रदर्श्यते। वैराग्यहेतोः तस्माज्जुगुप्सेतेति चांते श्रवणात्। जीवो मुख्यप्राणसचिवः सेंद्रियः समनस्को विद्याकर्मपूर्वप्रज्ञापरिग्रहः पूर्वदेहं विहाय देहांतरं प्रतिपद्यत इत्येतदवगंतव्यं। अथैनमेते प्राणा अभिसमायंति इत्येवमादेः संसारप्रकरणस्थाच्छब्दात् धर्माधर्मफलोपभोगसंभवाच्च। स किं देहबीजैर्भूतसूक्ष्मैरसंपरिष्वक्तो गच्छति। आहोस्वित्संपरिष्वक्त इति चिंत्यते। किं तावत्प्राप्तं। असंपरिष्वक्त इति। कुतः। करणोपादानवद्भूतोपादानस्याश्रुतत्वात्॥ ॥

अथ मरणकाले मारणहृदये जीवेनैकीभवंतीत्यर्थः। रूपं शरीरं पंचीकृतभूतमात्राः उत्तरदेहपरिणामिनो भूतसूक्ष्माः वेदांतार्थज्ञानसाधनविचारत्वात् सर्वाधिकरणानां श्रुतिशास्त्राध्यायसंगतयः वैराग्यफलकत्वादेतत्पादसंगतिः। सर्वाधिकरणे व्यवहारार्थं पंचीकरणमुक्तं स व्यवहारोत्र निरूप्यत इति फलफलिभावो वानंतरसंगतिः। अत्र पूर्वपक्षे निरनुशयप्राणागमनाभावान्नैव वैराग्यं। सिद्धांते भूताश्रयप्राणागतेर्वैराग्यमिति फलभेदः॥

ब्र॰सू॰भा॰३ ते सोमाज्याश्चसुरादयः पयःपर्यन्ता जिघ्रतीति याज्ञिकप्रसिद्धेर्वा धान्तु। आपः पंचस्वग्निषु हुताः पंचम्यामाहुतौ हुतायां यथा पुरुषशब्दवाच्याः पुरुषात्मना परिण-
२ मंते तथा किं तं वेत्थेति श्वेतकेतुं प्रति राज्ञः प्रश्नः तस्योत्तरं शाखिनेन स्थित्वा प्रतिराज्ञो वाचासौ वाव लोको गौतमाग्निरित्यत्र श्रद्धाख्या आपः। आहुतिः पर्जन्या-
ग्नौ सोमरूपाः इह खल्वग्निहोत्रे श्रद्धया हुताद्दध्यादिरूपा आपो यजमानसंलग्नाः स्वर्गं लोकं प्राप्य सोमाख्यदिव्यदेहात्मना स्थिताः कर्मान्ते हुताः पर्जन्ये ह
स एतास्ते सोमाज्याः समभ्याददानइति स्य श्रुते सोमाज्याशब्देन करणानामुपादानं संकीर्तितमिति वाच्यं यो वेच सुरादिसंकीर्तनान्नैयं भूतमात्रोपादान
संकीर्तनमिति चेन्न भाष्यसर्वत्र भूतमात्राः यदैव देहस्यारंभकास्तत्रैव संतितासां न पृथक् निष्प्रयोजनं। तस्माद्देहपरिष्वक्तोपाती लेवमात्रे पठत्याचा-
र्यः। तदंतरप्रतिपत्तौ रंहति संपरिष्वक्त इति। तदंतरप्रतिपत्तौ देहांतरप्रतिपत्तौ देहबीजैर्भूतसूक्ष्मैः संपरिष्वक्तो रंहति गच्छतीत्यर्थः तथ्यं।
कुतः प्रश्ननिरूपणाभ्यां॥ तथाहि प्रश्नः॥ वेत्थ यथा पंचम्यामाहुतावापः पुरुषवचसो भवंतीति। निरूपणं च श्रुतिवचनं द्युपर्जन्यपृथि-
वीपुरुषयोषित्सु पंचस्वग्निषु श्रद्धासोमवृष्ट्यन्नरेतोरूपाः पंचाहुतीर्दर्शयित्वा। इति तु पंचम्यामाहुतावापः पुरुषवचसो भवंतीति। तस्मादद्भिः
परिवेष्टितो जीवो व्रजतीति गम्यते। नन्वन्या श्रुतिर्जलौकावत्पूर्वदेहं न मुंचति यावन्न देहांतरमाक्रमतीति दर्शयति। तद्यथा तृणजलायुकेति॥ २
यं ते ततो वृष्टिरूपाः पृथिव्यामन्नरूपाः पुरुषे रेतोरूपाः योषिति हुताः आपः पुरुषशब्दवाच्या भवंतीति निरूपणं कृतं नन्वेतदेहं त्यक्ताद्भिः सह
गतस्य पश्चाद्देहांतरप्राप्तिरित्ययुक्तं। यथा तृणजलायुका तृणांतरं गृहीत्वा पूर्वतृणं त्यजति। तथा जीवो देहांतरं गृहीत्वा पूर्वदेहं त्यजतीति श्रुतिविरोधा-

[illegible]

इहैव कर्मायत्तभाविदेहं देवोऽहमित्यादिभावनया गृहीत्वा प्रवृद्धे देहं त्यजतीति श्रुत्यर्थः। अतो न विरोधः इति समाधत्ते। तत्रापीति। भावनाप्रदीर्घभागो
भाविदेहविषयत्वं। घटाकाशवदवहितो जीवः स्वस्योपाधिं गत्वा लोकान्तरं गच्छतीति पंचाग्निश्रुत्युक्तः प्रकारस्तु द्विरोधात्तस्मात् कल्पनाः सर्वाण्यनादर्त्ते

तत्राप्यपरिवेष्टितस्यैव जीवस्य कर्मोपस्थापितप्रतिपत्तव्यदेहविषयभावनादीर्घीभावमात्रं जलूकयोपमीयत इत्यविरोधः। एवं श्रुत्युक्ते देहा-
न्तरप्रतिपत्तिप्रकारे सतिपाः पुरुषमतिप्रभवाः प्रकल्पनाः व्यापिनां करणानामात्मनश्च देहान्तरप्रतिपत्तिकर्मवशाद् वृत्तिलाभस्तत्र भवति। केव-
लस्य चात्मनो वृत्तिलाभस्तत्र तत्र भवति इन्द्रियाणि तु देहवदभिन्नान्येव तत्र तत्र भोगस्थानेषु सृज्यन्ते। मनस्त्वेवाकेवलं भोगस्थानमभिप्रतिष्ठते।
जीवश्चोत्क्रान्तः स्थूलदेहाद् देहान्तरं प्रतिपद्यते शुकवदित्यथवा स्थानान्तरमित्येवमाद्याः सर्वा एवानादर्त्तव्याः। श्रुतिविरोधात्। ननु दृष्टताभ्यां प्रश्नप्रति
वचनाभ्यां केवलाभिरद्भिः संपरिष्वक्तो रंहतीति प्राप्तोऽल्पत्वश्रवणसामर्थ्यात्। तत्र कथं सामान्येन प्रतिज्ञायते सर्वैरेवभूतसूक्ष्मैः संपरि
ष्वक्तो रंहतीति। अत उत्तरं पठति। आत्मकत्वात्तु भूयस्त्वात्। ॥ तु शब्देन चोदितामाशंकामुच्छिनत्ति। आत्मिका ह्यापस्त्रिवृत्करणश्रुतेः। ता
स्वारंभिकास्वभ्युपगतास्वितरदपि भूतद्वयमवश्यमभ्युपगतं भवति। त्र्यात्मकश्च देहस्त्रयाणामपि तेजोबन्नानां तस्मिन् कार्योपलब्धेः॥ —

स्यादित्यन्वयः॥ सांख्यकल्पनामाह व्यापिनामिति। सुगतकल्पनामाह। केवलस्येति। त्रिविकल्पकस्तानसंतानरूपस्यात्मनो देहान्तरेऽदृष्टादिस्वविक-
ल्पसानात्म्यवृत्तिलाभो भवतीत्यर्थः। काणादकल्पनामाह मनइति। देहान्तरस्थानमनो मात्रं गच्छति। इन्द्रियाणि तु तत्र तत्रान्येवारभ्यन्ते। दिगंबरकल्पनामा-

इहैव कर्मायत्तभाविदेहं देवोहमित्यादिभावनया गृहीत्वाहमेव देहं सृजतीति श्रुत्यर्थः। अतो न विरोधः इति समाधत्ते। तत्रापीति। भावनाप्रकर्षाद्भाविभो
भाविदेहविषयत्वं। यथा कान्तावरुद्धहितो जीवः स्वस्योपाधिगतलोकान्तरं गच्छतीति पंचाग्निश्रुत्युक्तः प्रकारस्तु द्वितीयो धात्मनः कृत्स्नतः सर्वाश्रयतादर्शी

तत्राप्युपपरिवेष्टितस्यैव जीवस्य कर्मोपस्थापितप्रतिपत्तव्यदेहविषयभावनादीर्घीभावमात्रं जलूकयोपमीयत इत्यविरोधः। एवंश्रुत्युक्ते देहं-
तरप्रतिपत्तिप्रकारे सतिपाः पुरुषमतिप्रभवाः सकल्पनाः व्यापिनां करणानामात्मनश्च देहांतरप्रतिपत्तिः कर्मवशाद्वृत्तिलाभस्तत्र भवति। केव
लस्य चात्मनो वृत्तिलाभस्तत्र तत्र भवति इंद्रियाणि तु देहवदभिनवान्येव तत्र तत्र भोगस्थाने तु त्पद्यंते। मन एव वा केवलं भोगस्थानमभिप्रतिष्ठते।
जीव एको तु सुखदेहाद्देहांतरं गतिं प्रपद्यते शुक्रवदयं स्थानात् स्थानांतरमित्येवमाद्याः सर्वा एवानादर्तव्याः। श्रुतिविरोधात्। ननूदहताभ्यंप्रति
वचनात् आत्मा केवलाभिरद्भिः संपरिष्वक्तो रंहतीतिश्रावणात्। तत्र कथं सामान्येन प्रतिज्ञायते सर्वैरेव भूतसूक्ष्मैः संपरि
ष्वक्तो रंहतीति। अत उत्तरं पठति॥ आत्मकत्वात्तु भूयस्त्वात्॥ ॥ तु शब्देन चोदितामाशंकामुच्छिनत्ति। आत्मिकात्वापस्त्रिवृत्करणश्रुतेः। ता
स्वारंभिका स्वभ्युपगता स्थितरदपि भूतद्वयमवश्यमभ्युपगंतव्यं भवति। आत्मकश्च देहस्त्रयाणामपि तेजोबन्नानां तस्मिन्कार्योपलब्धेः॥ —

भूयस्त्वमपः॥ सांख्यकल्पनामाह व्यापिनामिति। सुगतकल्पनामाह। केवलस्येति। निर्विकल्पकज्ञानसंतानरूपस्यात्मनो देहांतरे दृग्धारित्वविक-
ल्पसानात्मवर्द्धतिलाभो न यतीत्यर्थः। काणादकल्पनामाह मन इति। देहांतरसमिति मनो मात्रं गच्छति। इंद्रियाणि तु तत्रान्येवारभ्यंते। दिगंबरकल्पनामाह

ब्र॰सू॰भा॰३ ननु पाकस्वेदगंधस्वरूपकार्यत्रयोपलब्धेस्त्र्यात्मको देह इत्युक्तं प्राणावकाशयोरप्युपलब्धेर्देहस्य पंचभूतात्मत्वादित्यस्वास्थ्यात्तदंतरमाह। पु
३ नश्चेति। देहधारकत्वाद्धातवस्ते त्रिधातुत्वात् त्र्यात्मकत्वमन्वयः। देहस्य केवलाप्त्वे वातं पित्तं च यापत्वं तैजसं न स्यातामिति भावः। पृथिवीतरभूताप

पुनश्च त्र्यात्मकस्त्रिधातुत्वात्त्रिभिर्वातपित्तश्लेष्मभिर्न स भूतान्तराणि प्रत्याख्याप्य केवलाभिरद्भिरारब्धुं शक्यते। तस्माद्भूयस्त्वापेक्षोयमापः पुरुष
वचस इति प्रश्नप्रतिवचनयोरप्शब्दो न कैवल्यापेक्षः। सर्वदेहेषु हि रसलोहितादिद्रवभूयस्त्वं दृश्यते। ननु पार्थिवो धातुर्भूयिष्ठो देहेषूप
लक्ष्यते। नैष दोषः। इतरापेक्षयाऽपां बाहुल्यं भविष्यति। दृश्यते च शुक्रशोणितलक्षणेपि देहबीजे द्रवबाहुल्यं। कर्म च निमित्तकारणं देहान्त
रारंभे कर्माणि चाग्निहोत्रादीनि सोमाज्यपयःप्रभृतिद्रवद्रव्यव्यपाश्रयाणि। कर्मसमवायिन्यश्चापः श्रद्धाशब्दोदिताः। सह कर्मभिर्द्युलोका
ख्येऽग्नौ हूयंत इति वक्ष्यति। तस्मादप्यपां बाहुल्यप्रसिद्धिः। बाहुल्याच्चाप्शब्देन सर्वेषामेव देहबीजानां भूतसूक्ष्माणामुपादानमिति निरवद्यं॥
॥ प्राणगतेश्च॥ ॥प्राणानां च देहांतरप्रतिपत्तौ गतिः श्राव्यते। तमुत्क्रांतं प्राणोनूत्क्रामति प्राणमनूत्क्रामंतं सर्वे प्राणा अनूत्क्रामंती
त्यादिश्रुतिभिः। सा च प्राणानां गतिः नाश्रयमंतरेण संभवतीत्यतः प्राणगतिप्रयुक्ता तदाश्रयभूतानामपामपि भूतांतरोपसृष्टानां गतिर
वगम्यते। नहि निराश्रयाः प्राणाः क्वचिद्गच्छंति तिष्ठंति वा जीवतोऽदर्शनात्॥ ॥ ३
क्षयाऽपां बाहुल्यं। किंच देहनिमित्तानां कर्मणामप्बहुलद्रव्यसाध्यत्वाभिर्भूतानामप्युपलक्ष्यत इत्याह। कर्म चेत्यादिना। उक्तां तेषां प्राणानां देहबीजं पंचभूता
श्रयाः। प्राणानां जीवदेहस्य प्राणवदित्याह। प्राणगतेश्चेति॥

प्राणानां गतिरसिद्धेत्याशंक्य निषेधति। अग्न्यादीति॥ अदर्शनादोषधिवनस्पतिगमनस्येति शेषः। लोमान्यपि यंतीत्यर्थः॥ प्राणानामग्न्यादि-
षु लयस्य मुख्यत्वे जीवगतिभोगयोरयोगात्सर्वे प्राणा अनूत्क्रामंतीति विस्पष्टश्रुतेर्लोमादिगौणलयपाठाच्च गौणत्वमित्यर्थः॥ भूतांतरपुक्ता

अग्न्यादिगतिश्रुतेरिति चेन्न भाक्तत्वात्॥ स्यादेतत् नैव प्राणा देहांतरप्रतिपत्तौ सह जीवेन गच्छंत्यग्न्यादिगतिश्रुतेः। तथाहि श्रुतिः मरणकाले वा-
गादयः प्राणाः अग्न्यादीन्देवान्गच्छंतीति दर्शयति। यत्रास्य पुरुषस्य मृतस्याग्निं वागप्येति वातं प्राण इत्यादिनेति चेन्न। भाक्तत्वाद्वागादीना-
मग्न्यादिगतिश्रुतिर्गौणी लोमसु केशेषु चादर्शनात् ओषधीर्लोमानि वनस्पतीन्केशा इति तत्राम्नायते। न हि लोमानि केशाश्चोत्प्लुत्यौषधीर्वनस्पतीं-
श्च गच्छंती। संभवति। न च जीवस्य प्राणोपाधिप्रत्याख्याने गमनमवकल्पते। नापि प्राणैर्विना देहांतर उपभोग उपपद्यते। विस्पष्टं च प्राणा-
नां सह जीवेन गमनमन्यत्र श्रावितं। अतो वागाद्यधिष्ठात्रीणामग्न्यादिदेवतानां वागाद्युपकारिणीनां मरणकाले उपकारनिवृत्तिमात्रमपेक्ष्य वागा-
दयोऽग्न्यादीन्गच्छंतीत्युपचर्यंते॥ ॥ प्रथमेऽश्रवणादिति चेन्न ता एव ह्युपपत्तेः। स्यादेतत् कथं पुनः पंचम्यामाहुतावापः पुरुषवचसो भवं-
तीत्येतन्निर्धारयितुं पार्यते। यावता नैव प्रथमेऽग्नावपां श्रवणमस्ति इह हि द्युलोकप्रभृतयः पंचाग्नयः पंचानामाहुतीनामाधारत्वेनाधीतास्तेषां च प्र-
मुखे असौ वाव लोको गौतमाग्निरित्युपन्यस्य तस्मिन्नेतस्मिन्नग्नौ देवाः श्रद्धां जुह्वतीति श्रद्धा होमद्रव्यत्वेन वेदिता। न तत्रापो होमद्रव्यतया श्रुताः॥

नामपां गतिमुक्त्वा पुरुषवचस्त्वं नाहामाक्षिप्य समाधत्ते॥ प्रथम इति॥ ॥ ॥ ॥

शा॰ सू॰ भा॰

४

ननु प्रथमपर्याये द्युलोकाग्निष्वप्प्रथमामश्रवणात् इत्याशंक्य सोमवदप्सु तरेतसामरूपत्वादुत्तरग्रासांश्रवणमस्तीति न प्रथमसूत्रेऽसाह। पदिनामेति। पंचा
मेति । सत्यहर्षहेतोरपि शुक्तिरूप्यस्य स्वप्नादर्शनादिति भावः । यथाकथंचिद्द्वारा लांगलस्य गवादिजीवननिमित्तत्वं तथा स्वप्नभोक्तुरदृष्टद्वारा एव स्वप्नसृष्टिनि
मित्तत्वं न तु कुंभं प्रति कुंभकारस्येव साक्षात्स्वप्नकर्तृत्वं तामसभावबाधो हस्तकं दर्शितमाह । यदुक्तमित्यादिना तथा च स्वप्नस्य सफलत्वे फलमुख्यं ना

[illegible]

श्रुतितात्पर्यविरोधात्स्वप्नस्य मृषात्वमिति भावः। अपि चेति। व्यतिकरः संकरः श्रुत्यान्तरेषु सर्वे जाग्रतादिविशेषादिति भावः। फलितमाह। तस्मादिति
एतेनेति भाष्यस्थेनेत्यर्थः। द्वितीयसूत्रोक्तात्कर्तृत्वहेतुरपि स्वप्नस्य किं श्रुतिसिद्धः उत प्राज्ञस्य सर्वैश्वर्यात्सिद्धः नाद्य इत्याह। यदुक्तमित्यादिना। स्व

॥ अपि च जागरिते विषये दृष्टिसंयोगादादित्यादिज्योतिर्व्यतिकरात्स्वप्ने ज्योतिष्ट्वं दुर्विवेचनमिति तद्विवेचनाय स्वप्नप्रपञ्चः। तत्र यदि श्या
दिसृष्टिवचनं श्रुत्यानीयेत स्वयंज्योतिष्ट्वं न निर्णीतं स्यात्। तस्माद्यथाभाववचनं श्रुत्यारथादिसृष्टिवचनं तु भक्तेति व्याख्येयम्। एतेन निर्माणश्र
वणं व्याख्यातं। यदप्युक्तं प्राज्ञमेतं निर्मातारमामनन्तीति। तदप्यसत्। श्रुत्यन्तरे स्वयं विहत्य स्वयं निर्माय स्वेन भासा स्वेन ज्योतिषा प्रस्वपितीति जी
वव्यापारश्रवणादिहापि य एष सुप्तेषु जागर्तीति प्रसिद्धानुवादाज्जीव एवायं कामानां निर्माता संकीर्त्यते॥ तस्य तु वाक्यशेषेण तदेव शुक्रं
तद्ब्रह्मेति जीवभावं व्यावर्त्य ब्रह्मभाव उपदिश्यते। तत्त्वमसीत्यादिवदिति न ब्रह्मप्रकरणं विरुध्यते॥

स्वयं विहत्य जाग्रद्देहं निश्चेष्टं कृत्वा स्वयं वासनामयं देहं निर्माय स्वेन भासा स्वीयबुद्धिवृत्त्या स्वेन ज्योतिषा स्वरूपचैतन्येन चास्य मनुभवतीत्यर्थः २१
न केवलं व्यवहारोपकं जीवस्य स्वप्नकर्तृत्वं श्रुतं। किं तु प्राज्ञवाक्येऽपीत्याह। इहापीति। जीवोक्तौ ब्रह्मप्रकरणविरोध इत्यत आह॥ तस्येति॥

एवं हेतोः श्रुतिसिद्धत्वं निरस्य द्वितीयमङ्गीकरोति। न चास्माभिरिति नहि हेतुसिद्धेः स्वप्नस्य सत्यत्वमिति सार्धं स्वप्नस्य सत्यत्वं व्यावहारिकं पारमार्थिकं
चेति विकल्प्य व्यवहारकाले बाधदर्शनान्नाद्य इत्याह। पारमार्थिकत्वमिति। द्वितीये दृष्टान्तस्य साध्यवैकल्यमित्याह॥ ॥न चेति। कस्तर्हि स्वप्नस्य जा

न चास्माभिः स्वप्नेऽपि प्राज्ञव्यापारः प्रतिषिध्यते। तस्य सर्वेश्वरत्वात्सर्वास्ववस्थास्वधिष्ठातृत्वोपपत्तेः। पारमार्थिकस्तु नायं संध्याश्रयः स
र्गो वियदादिसर्गवदित्येतावत्प्रतिपाद्यते। न च वियदादिसर्गस्याप्यात्यन्तिकं सत्यत्वमस्ति। प्रतिपादितं हि तदनन्यत्वमारम्भणशब्दादिभ्यः सम
स्तस्य प्रपञ्चस्य मायामात्रत्वं। प्राक्तु ब्रह्मात्मदर्शनाद्वियदादिप्रपञ्चो व्यवस्थितरूपो भवति। संध्याश्रयस्तु प्रपञ्चः प्रतिदिनं बाध्यत इत्य
तो वैशेषिकमिदं संध्यस्य मायामात्रत्वमुदितं॥ ॥पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ॥ ॥अथापि स्यात्परस्यैव तावदा
त्मनोंऽशो जीवः॥ अग्नेरिव विस्फुलिंगाः॥ तत्रैवं सति यथाग्निविस्फुलिंगयोः समाने दहनप्रकाशनशक्ती भवतः। एवं जीवेश्वरयोरपि ज्ञा
नैश्वर्यशक्ती ततश्च जीवस्यैश्वर्यवशात्सांकल्पिकी स्वप्ने रथादिसृष्टिर्भविष्यतीति। अत्रोच्यते। सत्यपि जीवेश्वरयोरंशांशिभावे प्रत्यक्षमेव जी
वस्येश्वरविपरीतधर्मत्वं॥

ततो विशेषो न कृप्यत इत्याशंक्य प्रातिभासिकत्वमित्याह॥ पराभीति। एवं कृत्स्नस्वप्नस्य मायात्वमीमांस्य तत्कृतं संकल्पमात्रेणापि सत्यसृष्टिः स्यादिति
भवान् इति शंकां कृत्वा परिहरत्सूत्रं व्याचष्टे। अथापि स्यादित्यादिना सत्यसंकल्पस्य हि संकल्पात्सृष्टिः सत्या भवति जीवस्य त्वीश्वरसत्यसंकल्पत्वं स्य सत्य

ब्र·सू·भा·२

तर्हि विरुद्धधर्मवत्त्वाज्जीवस्यैश्वर्यं नास्त्येवेति शङ्कते किमिति। नास्तीति न किं त्वाच्छन्नमस्ति तत्तु नरोश्वरप्रसादात्कस्यचिदेवाभिव्यज्यत इत्याह नना

२२ स्तीति। विधूतध्वांतस्य निध्यापस्य संसिद्धस्याणिमादिविशिष्टस्येत्यर्थः ब्रह्मैवाहमिति देवं ज्ञात्वा तस्य स्वप्रकृतस्य सर्वपाशानामविद्यादिक्लेशाना

मपहानिरपक्षयस्तद्रूपो भवति। क्षीणैः क्लेशैस्तत्कार्यैर्जन्ममरणैश्च कृतबंधध्वंस इति निर्गुणविद्याफलमुक्तं सगुणविद्याफलमाह॥ तस्य

किं पुनर्जीवस्येश्वरसमानधर्मत्वं नास्त्येव। न नास्ति विद्यमानमपि तत्तिरोहितं। अविद्यादिव्यवधानात्। तत्पुनस्तिरोहितं सत्परमेश्वरमभि
ध्यायतो यतमानस्य जंतोर्विधूतध्वांतस्य तिमिरतिरस्कृतेव दृक्शक्तिरौषधवीर्यादीश्वरप्रसादात्संसिद्धस्य कस्यचिदेवाविर्भवति। न स्वभाव
त एव सर्वेषां जंतूनां। कुतः ततो हीश्वराद्धेतोः तस्य जीवस्य बंधमोक्षौ भवतः। ईश्वरस्य स्वरूपापरिज्ञानाद्बंधः तत्स्वरूपपरिज्ञानात्तु मोक्षः।
तथा च श्रुतिः॥ ज्ञात्वा देवं सर्वपाशापहानिः क्षीणैः क्लेशैर्जन्ममृत्युप्रहाणिः। तस्याभिध्यानात्तृतीयं देहभेदे विश्वैश्वर्यं केवल आप्तकाम इ
त्येवमाद्याः॥

ति। परस्याभिमुख्येनाहंग्रहेणाध्यानाद्बंधमोक्षापेक्षया मंत्रोक्तहानिद्वयापेक्षया वा तृतीयं विश्वैश्वर्यमणिमादिरूपमन्त्यदेहपाते सति सिद्धदेहे २२
भवति तद्भोगानंतरमालस्यानात्केवलो द्वैतशून्य आप्तकामः प्राप्तस्वयंज्योतिरानंदो भवतीति क्रममुक्तिरित्यर्थः॥ ।। ॥

उ ज्ञानैश्वर्ययोस्तिरोभावे देहाभिमानो हेतुरिति कथनार्थं सूत्रं तन्निरस्याशंकामाह ॥ कस्मादिति। सत्यावरणं नास्तीसंगी कृत्स्नकल्पितावरणं साधयति। उ
च्यत इत्यादिना। जीवस्येश्वरत्वमंगीकृत्यावरणकल्पनातोऽपरमन्यत्वकल्पनेत्याशंक्य मुख्यप्रसंगमुत्सार्य निरस्यति। नन्वित्यादिना। स्वप्नेष्वालोकादेः
देहयोगाद्वा सोऽपि ॥ ॥ कस्मात्पुनर्जीवः परमात्मांश एव सन् तिरस्कृतज्ञानैश्वर्यो भवति। युक्तं तु ज्ञानैश्वर्ययोरतिरस्कृतत्वं विस्फुलिंगस्येव दह
नप्रकाशनयोरिति। उच्यते। सत्यमेतत् सोऽपि तु जीवस्य ज्ञानैश्वर्यतिरोभावो देहयोगात् देहेन्द्रियमनोबुद्धिविषयवेदनायोगाद्भवति। अस्ति चा
त्रोपमा यथाग्नेर्दहनप्रकाशनसंपन्नस्यापि अरणिगतस्य दहनप्रकाशने तिरोहिते भवतः। यथा च भस्मच्छन्नस्य एवमविद्याप्रत्युपस्थापितना
मरूपदेहाद्युपाधियोगात् तदविवेकभ्रमकृतो जीवस्य ज्ञानैश्वर्यतिरोभावः। वाशब्दो जीवेश्वरयोरन्यत्वाशंकाव्यावृत्त्यर्थः। नन्वन्य एव जीव ईश्वरा
दस्तु तिरस्कृतज्ञानैश्वर्यत्वात्। किं देहयोगकल्पनया। नेत्युच्यते। न ह्यन्यत्वं जीवस्येश्वरादुपपद्यते। सेयं देवतैक्षतेत्युपक्रम्याऽनेन जीवेनात्मनानु
प्रविश्येत्यात्मशब्देन जीवस्य परामर्शात्। तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो इति च जीवायोपदिश्यत ईश्वरात्मत्वं। अतोऽनन्य एवेश्वरात् जीवः
सन् देहयोगात्तिरोहितज्ञानैश्वर्यो भवति। अतश्च न सांकल्पिकी जीवस्य स्वप्नेऽर्थसृष्टिर्घटते। यदि च सांकल्पिकी स्वप्ने सृष्टिः स्यात् नैवा
निष्टं कश्चित्स्वप्नं पश्येत्। न हि कश्चिदनिष्टं संकल्पयते। यत्पुनरुक्तं जागरितदेशश्रुतिः स्वप्नस्य सत्यत्वं ख्यापयतीति। न तत्साम्यवचनं सत्यत्वाभि
प्रायं स्वयंज्योतिष्ट्वविरोधात् श्रुत्यैव च स्वप्ने रथाद्यभावस्य दर्शितत्वात् जागरितप्रभववासनानिर्मितत्वात्तु स्वप्नस्य तत्तुल्यनिर्भासत्वाभिप्रायं तत्। तस्मादुप
सत्यत्वे आयतीत्यात्मनः स्वप्रकाशत्वमस्फुटं स्यात् ॥ प्रातिभासिकत्वेनालोकेन्द्रियाद्यसत्त्वेऽप्यर्थापरोक्ष्यमात्मज्योतिषा ॥ एवं स्वप्नस्य मायामात्रत्व ॥
वितिस्फुटं स्यादिति। तस्माद्देशादिसाम्यवचनं स्वप्नस्य जाग्रत्तुल्यभानाभिप्रायमित्यर्थः ॥ ॥

एवं नामरूपकरणोपरमे सति मनोवासनोद्दीपितविषयाविर्भावात्मकं स्वप्नमात्मनः साक्षिणः स्वयंज्योतिष्ट्वार्थं विचार्य प्रतिमोगपनुयोगिभावं संप्रसादस्व
प्नावस्थमनोलयात्मिकां सुषुप्तिं विचारयति। तदभावो नाडीषु तच्छ्रुतेरात्मनि च। तदेतत्स्वप्नं यथा स्यात्तथा। यत्रकाले सुषुप्तः समस्तो निरस्तवाह्य
करणो मनोलयात्स्वप्नरूपसकलद्वैतदर्शनः स्वापे नाडीस्थानमुक्तानाडीषु ततो नाडी परमात्मनोश्च समुच्चयश्रुतीराह॥ अस्य चेति परमात्मनश्च श्रुतीः॥

तदभावो नाडीषु तच्छ्रुतेरात्मनि च॥ ॥स्वप्नावस्था परीक्षिता सुषुप्तावस्थेदानीं परीक्ष्यते। तत्रैताः सुषुप्तिविषयाः श्रुतयो भवन्ति॥ क्वचिच्छ्रूयते तद्यत्रै
तत्सुप्तः समस्तः संप्रसन्नः स्वप्नं न विजानाति आसु तदा नाडीषु सृप्तो भवतीति॥ अन्यत्र तु नाडीरनुक्रम्य श्रूयते। ताभिः प्रत्यवसृप्य पुरीतति शेते इ
ति। तथान्यत्र नाडीरेवानुक्रम्य तासु तदा भवति यदा सुप्तः स्वप्नं न कंचन पश्यति। अथास्मिन्प्राण एवैकधा भवतीति। तथान्यत्र य एषोऽन्तर्हृदय आ
काशस्तस्मिञ्छेत इति तथान्यत्र सता सोम्य तदा संपन्नो भवति स्वमपीतो भवतीति। प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किंचन वेद नान्तरमिति च। त
त्र संशयः। किमेतानि नाड्यादीनि परस्परनिरपेक्षाणि भिन्नानि सुषुप्तिस्थानानि। आहोस्वित्परस्परापेक्षयैकं सुषुप्तिस्थानमिति। किं तावत्प्रा
प्तं। भिन्नानीति कुतः एकार्थत्वात्। न हि एकार्थानां क्वचित्परस्परापेक्षत्वं दृश्यते व्रीहियवादीनां॥ ॥ २३

ह। तथान्यत्र य एष सादितानाडीपुरीतद्ब्रह्मसुषुप्तिश्रुतेः समुच्चयश्रुतेश्च संशयमाह। तत्रेति। पूर्वपक्षे स्वेच्छया विकल्पाज्जीवस्य ब्रह्मलयैकान्तिर्णि
यः सिद्धं ते नाडीभिः पुरीततं गत्वा तदेकाङ्ग्रिब्रह्मण्येव शेते इति समुच्चयान्निर्णय इति विवेकः॥ ॥ ॥ ॥

एकपुरीतद्व्याप्यत्वं यो हि यत्र योऽर्थं नाड्यादीनामेकस्मिन्नपि रूपार्थे निरपेक्षस्य तत्त्वं तु कुत इत्यत आह । नाड्यादीनां चेति । सति सप्तम्यन्तता
यामुतेने सप्तमीतिशंकार्थ ॥ आपततस्त्वात्सप्तम्यर्थः आधारत्वं गम्यत इत्यादौ नैव दोष इति । अन्यत्रात्वे स्थित्वे तद्येतान् नीलेति स्थानं

नाड्यादीनां लोकार्थितासुषुप्तौ इष्यते नाडीषु सुप्तो भवति पुरीतति शेत इति चेत् तत्र सप्तमीनिर्देशात् तुल्यत्वात् । ननु च न सतिसप्तमी
निर्देशो इष्यते । स नाडीभ्यस्तत्र सप्तम्यो भवतीति । नैव दोषः ॥ तत्रापि सप्तम्यर्थस्य गम्यमानत्वात् वाक्यशेषो हि तत्राप्यतनेषु जीवः स
दपसपितो भवति । अन्यत्रापततमलब्ध्या नामेवोपाश्रयत इति । आनन्दमयेन तत्र प्रकृतस्य सतस्तत्परत्वात् । आपतनं च सप्तम्यर्थः । सप्त
मीनिर्देशोऽपि तत्र्यायात्रैवेष्यते । सति संपद्य न विदुः सति संपद्यामह इति । सर्वत्र विज्ञानोपरमलक्षणं सुषुप्तं न विशिष्यते । तस्मादेकार्थ
त्वान्नाड्यादीनां विकल्पेन कदाचित्किंचित्स्थानं स्वापोपलब्धौ सेवं प्रोपपत्तिप्रापद्यते ॥ तदभावो नाडीषु आत्मनि चेति । तदभावस्तस्य प्रकृ
तस्य स्वप्नदर्शनस्याभावः सुषुप्तमित्यर्थः । नाडीष्वात्मनि चेति समुच्चयेनैतानि नाड्यादीनि स्वापायोपसर्पंतीति न विकल्पेनेत्यर्थः । कुतः तच्छ्रुतेः ।
तथाहि सर्वेषामेव नाड्यादीनां तत्र तत्र सुप्तिस्थानत्वं श्रूयते । तत्र समुच्चये संगृहीतं भवति ॥

आणत्वं सद्गुलोपसर्पेति सुषुप्ताविरुद्धः । सप्तमी श्रुता निरपेक्षाधारत्वमवाधिकत्वमास्थेयः क्वचित् समुच्चितानामपि नाड्यादीनां स्थानत्व
मितिन समुच्चयाविरोध इति रवेपसार्थः । सिद्धांतयति ॥ एवं प्राप्त इति ॥

स्त्वे चकारः पुरीतत्समुच्चयार्थः। यदा नाड्यः सुषुप्तिस्थानं तदा पुरीतत्स्थानं न भवतीति श्रुतस्थानत्वस्य पक्षे बाधः स्यात्तत्समुच्चय इत्याह। वि
कल्पे त्वेषामिति। व्रीहियववत्स्थानत्वस्य गत्या विकल्प इति भावः। यत्तु सप्तमीश्रुत्या नाड्यादीनामेकफलत्वकल्पनमिति तत्रेत्याह। न ह्येकेति। प्रासादश्च पर्यं

विकल्पेऽपि पक्षे बाधः स्यात्। न चैकार्थत्वाद्विकल्पो नाड्यादीनां व्रीहियवादिवद्विकल्पं निरुच्यते। न ह्येकविभक्तिनिर्देशमात्रेणैकार्थत्वं
विकल्पश्च भवति॥ नानार्थत्वसमुच्चययोरप्येकविभक्तिनिर्देशदर्शनात्। प्रासादे शेते पर्यङ्के शेत इत्येवमादिषु। तथेहापि नाडीषु पुरीत
ति ब्रह्मणि च स्वपितीत्येतदुपपद्यते समुच्चयः। तथा च श्रुतिः॥ तासु तदा भवति यदा सुप्तः स्वप्नं न कंचन पश्यति। अथास्मिन्प्राण एवैक
धा भवतीति समुच्चयं नाडीनां प्राणस्य च सुषुप्तौ श्रावयति। एकवाक्योपादानात्। प्राणस्य ब्रह्मत्वं समधिगतं प्राणस्तथानुगमादित्यत्र। य
त्रापि निरपेक्षा एव नाडीः सुषुप्तस्थानत्वेन श्रावयति आसु तदा नाडीषु सृप्तो भवतीति। तत्रापि प्रदेशान्तरप्रसिद्धस्य ब्रह्मणोऽप्रतिषेधान्नाडीद्वा
रेणैव ब्रह्मण्येवावतिष्ठत इति प्रतीयते॥ ॥

कधारणमर्थः पर्यङ्कस्य तु उपनमितिफलभेदेऽप्येकविभक्तिर्दृश्यते॥ व्यवधानाव्यवधानाभ्यां शयनसाधनत्वात् समुच्चयपक्षः। तथेहापि ना २४
डीपुरीततोर्जीवस्य संचारद्वारं ब्रह्मण्येव तु स्थितिरिति समुच्चयपद इत्यर्थः। नाडीनां प्राणस्य च एकेन वाक्येनोपादानान्निश्चयः समुच्चय इत्याह। एकवाक्येति॥

आधारत्वमात्रेणास्मत्पक्षेण निरपेक्षत्वं अतो न समुच्चयपक्षस्तस्माद्बाध इत्याह। न चैवमपीति। समुच्चयेऽपीत्यर्थः। अत्र नाडीश्रुतौ नाडीषु सृप्तोक्तः
सुषुप्तिर्न विवक्षिता। रश्मिसंबद्धनाडीरूपमार्गस्तुत्यर्थत्वादित्याह। अपि चेति। पित्तेन विषयेक्षणाभावे सुखदुःखयोरभावान्नाडीषु तु धर्माधर्मनि

न चैवमपि नाडीषु सप्तमी विरुध्यते। नाडीद्वारापि ब्रह्मोपसर्पणं सुषुप्त एव नाडीषु भवति। यो गंगां पारमार्गेण गच्छति गत एव स गंगायां भ
वति। अपि चात्र रश्मिनाडीद्वारामृतस्य ब्रह्मलोकमार्गस्याविवक्षितत्वान्नाडीस्तुत्यर्थस्थितं कीर्तनं। नाडीषु सृप्तो भवतीत्युक्त्वा तं न क
श्चन पाप्मा स्पृशतीति ब्रुवन्नाडीः प्रशंसति॥ प्रवेशेऽपि च पाप्मस्पर्शाभावे हेतुं। तेजसा हि तदा संपन्नो भवतीति तेजसा नाडीगतेन पित्ताख्ये
नाभिव्याप्तकरणत्वान्न बाह्यविषयानीक्षत इत्यर्थः। अथवा तेजसेति ब्रह्मण एवायं निर्देशः। श्रुत्यंतरेऽपि ब्रह्मैव तेज एवेति तेजःशब्दस्य ब्रह्मणि
प्रयुक्तत्वात्॥ ब्रह्मणा हि तदा संपन्नो भवति नाडीद्वारेण अतस्तं न कश्चन पाप्मा स्पृशतीत्यर्थः। ब्रह्मसंपत्तिश्च पाप्मस्पर्शाभावे हेतुः
समधिगतः सर्वे पाप्मानोऽतो निवर्तंते अपहतपाप्मा ह्येष ब्रह्मलोक इत्यादिश्रुतिभ्यः एवं च सति प्रदेशांतरप्रसिद्धेन ब्रह्मणा सुषुप्तिस्थाने
नानुगतो नाडीनां नयः समधिगतो भवति॥

कपाप्मास्पर्श इत्यर्थः। अपहतपाप्मब्रह्मसंपत्त्या पाप्मास्पर्श इत्याह। अथ यत्रेति। अस्मिन्व्याख्याने लाभमाह। एवं तेनेतीति। तौ तु तदा भवत्यस्मि
न्प्राणा एवैकधा भवतीति श्रुतः समुच्चयपक्ष आश्रितो भवतीत्यर्थः॥

नाडीप्रततोर्गुणप्रधानभावेन समुच्चयवत् पुरीततब्रह्मणोरपीत्याह ॥ तयोरित्यादिना । आकाशो ब्रह्म तस्मिन् शेत इत्युक्तं परम्पराभिः प्रसवस्य
पुरीतति शेत इत्युक्तं तथा च नाडीद्वारा पुरीततं गत्वा ब्रह्मणि शेत इति समुच्चयः सिद्ध इत्याह । तथा नाडीति । सता संपन्नो भवति प्राज्ञेन संपरिष्वक्त
इति समनन्तमयोः श्रुतेः पंचसुप्तिस्थानानीति तत्राह । सत्यास्वयोरिति ॥ किंच प्रकृतदहरादिसाधनैकपुरीतन्नाडीनिष्पन्नो विषयो नपेक्षतया समर्थ

तथा पुरीततोऽपि ब्रह्मप्रक्रियायां संकीर्तनात् तदनुगुणमेव सुषुप्तिस्थानत्वं ताम्यते पराणां तद्दहरमस्मात्काश इत्यस्मिन् शेत इति हृदया
काशे सुप्तिस्थाने प्रकृते इदमुच्यते पुरीतति शेत इति । पुरीतदिति हृदयपरिवेष्टनमुच्यते । तदन्तर्वर्तिन्यपि हृदयाकाशे पुरीतदन्तः शब्दा
ते पुरीतति शेत इति वक्तुं शक्यं प्राकारपरिक्षिप्तेपि पुरे वर्तमानः प्राकारे वर्तते इत्युच्यते ॥ हृदयाकाशस्य ब्रह्मत्वं समधिगतं दहर उत्तरेभ्य
इत्यत्र । तथा नाडीपुरीततसमुच्चयोपि ताभिः प्रत्यवसृप्य पुरीतति शेत इत्येकवाक्यतोपादानादवगम्यते । सत्या सप्तम्योश्च प्रसिद्धमेव
ब्रह्मत्वं एवमेतासु श्रुतिषु त्रीण्येव सुषुप्तिस्थानानि संकीर्तितानि । नाड्यः पुरीतद्ब्रह्म चेति । तत्रापि द्वारमात्रं नाड्यः पुरीतच्च । ब्रह्मैव
लोके सुप्तिस्थानं । अपि च नाड्यः पुरीतद्वा जीवस्योपाध्याधारा एव भवति । तत्रास्य करणानि वर्तन्त इति । न ह्युपाधिसंबंधमन्तरेणास्वत
एव जीवस्याधारः कश्चित् संभवति । ब्रह्माव्यतिरेकेणास्य स्वमहिमप्रतिष्ठितत्वात् ॥ ॥ २५
त्याद्युक्तो ब्रीहियवयोर्विकल्पः नाड्यादीनां तु ब्रह्मनिरपेक्षतया सुषुप्त्याधारत्वाभावान्नैवं विकल्प इत्याह ॥ अपि च नाड्य इति । उपाधिलिं
गाश्रयनाडीपुरीततोर्ह्युपाहितजीवाश्रयत्वं परम्परयार्थाद्द्वयमपि सुषुप्तौ न संभवति उपाधिलयादित्यर्थः ॥ ॥ ॥ ॥

ननु अस्त्वापि जीवस्य न मुख्यं स्थानं अभेदादित्यत आह। ब्रह्माधारत्वमिति। जीवस्य ब्रह्मणा भेदेनावस्थानं नाडीपुरीततोस्तु लीनोपाधेर्जीवस्य
स्थितिरेव न संभवतीत्येकार्थ्यमामध्यीभावात्रविकल्पदूषणस्थले:। सुषुप्तौ जीवस्य भेदकोपाधिलयाज्जीवस्य गिकब्रह्माभेदस्य विकल्पो न युक्त इ

ब्रह्माधारत्वमप्यस्य सुषुप्ते नैवाधाराधेयाभिप्रायेणोच्यते। कुतस्तर्हि तादात्म्याभिप्रायेण यत आह सता सोम्य तदा संपन्नो भवतीति स्वम
पीतो भवतीति स्वशब्देनात्माभिलप्यते स्वरूपमापन्नः सुप्तो भवतीत्यर्थः। अपि च न कदाचिज्जीवस्य ब्रह्मणा संपत्तिर्नास्ति स्वरूपस्यान
पायित्वात्। स्वप्नजागरितयोस्तु उपाधिसंपर्कवशात् पररूपापत्तिमिवापेक्ष्य तदुपशमात् सुषुप्तेः स्वरूपापत्तिर्विवक्ष्यते। अतश्च सुषु
वस्थायां कदाचित्सता संपद्यते कदाचिन्न संपद्यत इत्ययुक्तं॥ अपि च स्थानविकल्पाभ्युपगमे विशिष्टविज्ञानोपशमलक्षणं ताव
त्सुषुप्तं न कचिद्विशिष्यते। तत्र सति संपन्नस्तदेकत्वान्न विजानातीति युक्तं। तत्केवलं विजानीयादिति श्रुतेः॥ नाडीषु पुरीतति च श
यानस्य न किंचिद्विज्ञाने कारणं अस्ति विज्ञातु भेदविषयत्वात्। यत्र चान्यदिव स्यात्तत्रान्योऽन्यत्पश्येदिति श्रुतेः॥ ननु भेदविषयस्याप्यतिदू
रादिकारणं अविज्ञाने स्यात्॥
त्याह। अपि चेति। किंच नाड्यादीनामस्थानत्वमस्थाने कचित्सुप्तिवादिनापि सुप्तं न विशिष्यत इति वक्तव्यं तच्च वक्तुं न शक्यत इत्याह। अपि च स्थाने
ति। भेदाभावो हि भेदज्ञानाभावे हेतुः। नाडीपुरीतद्गतस्य तु जीवस्य भेदवस्तुत्वात् न भेदाविज्ञाने कारणं नास्तीत्यर्थः। द्वैतावस्थायामपि द्वैताज्ञाने हेतु

शा० सू० भा० ३

२६ द्रष्टृदृश्यात्मकत्वं स्वाभाविकमौपाधिकं वा तत्राद्यं सदृष्टान्तमनूद्य प्रत्याह। घटमित्यादिना। द्वितीयमनूद्य दूषयति। उपाधिगतमेवेति। उपा
धिभिन्नस्यैव नाशादेः स्वापेक्षितिपद्यस्मिन् रूपार्थ्यज्ञानप्रसंगात्। सुषुप्तिव्याघातः स्यात्। उपाधिलये च तत्र जीवस्य स्थितिलयोगात् ब्रह्मलोपवस्था

वादमेवं यदि जीवः स्वतः परिच्छिन्नो ऽभ्युपगम्येत। यथा विष्णुमित्रः प्रवासी स्वगृहं न पश्यतीति। ननु जीवस्योपाधिव्यतिरेकेणापरिच्छेदे वि
घटे। उपाधिगतमेवात्तिरात्रादिकारणमविज्ञान इतिमद्युच्यते। तथाप्युपाधेरुपरमे तत्वात् स्वस्वे ब्रसंपन्नो नाविज्ञानातीति युक्तं। न च वय
मिहतुल्यवन्नाड्यादिसमुच्चयं प्रतिपादयामः। नहि नाडीः सुप्तिस्थानं पुरीतहेतुनेन विज्ञानेन किंचित्प्रयोजनमस्ति। न ह्येतद्विज्ञानप्रति
बद्धं फलं किंचित्श्रूयते। नाप्येतद्विज्ञानं फलवतः कस्यचिदंगं उपदिश्यते। अस्तावनपापि सुप्तिस्थानमिलितं प्रतिपादयामः। तेन तु वि
ज्ञानेन प्रयोजनमस्ति जीवस्य ब्रह्मात्मत्वावधारणस्वप्नजागरितव्यवहारविमुक्तत्वावधारणं च। तस्मादात्मैव सुप्तिस्थानं॥ ॥अ २६
बद्धमित्यर्थः॥
पच्चाच्छेद्य इत्यर्थः। एवं विकल्पं निरस्य नाडीपुरीतद्ब्रह्मणां सहतुल्यवत्समुच्चयमफलत्वेन दूषयन् गुणप्रधानत्वेन समुच्चयमुपसंह

ष्विंच ब्रूमः । सकामाज्जीवस्योत्थानश्रुतेर्ब्रह्मैव सुषुप्तिस्थानमित्याह स्म चकारः । प्रबोधइति ॥ नाडीपुरीततोः क्वाप्युपसंतापादनन्तरमवगत
त्र सुषुप्तिस्थानत्वमित्यर्थः । तस्मादुपाधिलये जीवस्य ब्रह्माभेदात्तदुपाधिकृतस्वभेदइति विवेकः । तस्मात्प्रमाणे दृष्टिरिति स्थितं स एव कर्मानुस्मृति

अतः प्रबोधोऽस्मात् ॥ ॥ यस्माच्चात्मैव सुप्तिस्थानं । अत एव कारणान्नित्यवदेवास्मादात्मनः प्रबोधः स्वापाधिकारे शिष्यते । कुत एतद
गादित्यस्य प्रश्नस्य प्रतिवचनावसरे यथाग्नेः क्षुद्रा विस्फुलिंगा व्युच्चरंत्येवमेवैतस्मादात्मनः सर्वे प्राणा इत्यादिना । सत आगम्य न विदुः सत
आगच्छामह इति । विकल्प्यमानेषु सुषुप्तिस्थानेषु कदाचिन्नाडीभ्यः प्रबुध्यते । कदाचित्पुरीततः कदाचिदात्मन इत्यशासिष्यत । तस्माद
प्यात्मैव सुप्तिस्थानमिति ॥ ॥ स एव तु कर्मानुस्मृतिशब्दविधिभ्यः ॥ ॥ तस्याः पुनः सत्संपत्तेः प्रतिबुध्यमानः किं य एव सत्संपन्नः स एव प्र
तिबुध्यते । उतान्यो वेति चिंत्यते । तत्र प्राप्तं तावत् । अनियम इति । कुतः । यदा हि जलराशौ कश्चिज्जलबिंदुः प्रक्षिप्यते जलराशिरेव स तदा
भवति । पुनरुद्धरणे स एव जलबिंदुर्भवतीति दुःसंपादं । तद्वत्सुप्तः परेणैकत्वमापन्नः संप्रसीदतीति न स एव पुनरुत्थातुमर्हतीति त
स्मात्स एवेश्वरो वान्यो वा जीवः प्रतिबुध्यत इत्येवं प्राप्त इदमाह ॥ ॥

शब्दविधिभ्यः । सुषुप्तौ उपाधिनाशात् कर्मानुस्मृत्यादेर्दर्शनाच्च संशये सत्संपत्तौ जलराशिगतजलबिन्दुवत् जीवस्योत्थानश्रुतेर्ब्रह्मैव सुषुप्तिस्थानमिति क्रमप्राप्तं
सुप्तादन्यस्योत्थानसंभवेन सुप्तस्य नाशादिस्थानत्वसंभवादित्याक्षेपसंगत्या निपातमक्रमभावादनियम इति पूर्वपक्षमाह । तस्याः पुनरित्यादिना ॥

शा॰ रू॰ भा॰ ३ पूर्वपक्षे ज्ञानवैयर्थ्यं सुषुप्तस्यैवापुनरावृत्तिरूपमुक्तिसिद्धेः। सिद्धान्ते तु अज्ञानतत्कार्यात्मनास्थितस्य ज्ञानबलेन पुनस्तस्यैवोत्थानावसंभावाद्

२७ ज्ञाननाशार्थमज्ञानापेक्षेति फलं। ईश्वरो वेदनियमनदार्ढ्यायोक्तं सत्ताकामो वेदेलेखं पूर्वपक्षः ज्ञानं विना तु ध्वान्तरूपाधेरसं तन्नाशमात्रावबुद्ध्योप

हितो जीवः सुषुप्तौ कारणात्मना स्थितस्तत्रैव नानाकर्मानुभवसंस्कारवत्सोपहित उत्तिष्ठतीति सिद्धान्तयति। स एव विलयादिनाशाभिक्रू तस्मादेक

स एव तु जीवः सुप्तः स्वाप्यं गतः पुनरुत्तिष्ठति। नान्यः। कस्मात्। कर्मानुस्मृतिशब्दविधिभ्यः। विभज्य हेतुं दर्शयिष्यामि। कर्मशेषानुष्ठानदर्शना

त्तावत् स एवोत्थातुमर्हति। नान्यः। तथा हि। पूर्वेद्युरनुष्ठितस्य कर्मणोऽपरेद्युः शेषमनुतिष्ठन्दृश्यते। न चान्येन सामिकृतस्य कर्मणोऽन्यः शेष

क्रियायां प्रवर्तितुमर्हति। अतिप्रसङ्गात्। तस्मादेक एव पूर्वेद्युरपरेद्युश्चैकस्य कर्मणः कर्तेति गम्यते॥ ॥इतश्च स एवोत्तिष्ठति॥ ॥यत्कार

णमतीतेऽहन्यहमदोऽद्राक्षमिति पूर्वानुभूतस्य पश्चात्स्मरणमन्यस्योत्थाने नोपपद्यते। न ह्यन्यदृष्टमन्योऽनुस्मर्तुमर्हति। सोऽहमस्मीति चात्मा

नुस्मरणमात्मान्तरोत्थाने नावकल्पते। शब्देभ्यश्च तस्यैवोत्थानमवगम्यते तथा हि पुनः प्रतिन्यायं प्रद्रवति योन्याद्रवति बुद्धान्तायैव सर्वाः प्रजा अहरह

र्गच्छन्त्य एतं ब्रह्मलोकं न विन्दन्तीति। तद्य इह व्याघ्रो वा सिंहो वा वृको वा भवन्ति यत्तदाभवन्तीत्येवमाद्याः शब्दाः स्वापप्रबोधाधिकारे पठिता ना

त्मान्तरोत्थाने सामञ्जस्यमुपेयुः॥

तस्मै पुत्रोऽतिछेलादेरनेकयजमानकलापात्मानुप्रसङ्गः स्फूर्तिप्रसक्तानुतुल्यवत्स्थितं प्रत्यभिज्ञामाह। सोऽहमिति। अपवर्गगमनं ज्ञापकः। योनिस्तर्हि इम

स्यानं प्रतिनियतं गमनमपां भवति तथा प्रतिपौमागच्छति तज्जेय वेनिश्चलस्वर्पः। न विन्दन्तीत्यस्य ज्ञानसत्त्वान्न सुप्तस्योत्थाननियमः कः इहपूर्व प्रबोधे २७

[illegible]

विधिं व्याचष्टे। कर्मेति। स एवोत्तिष्ठतीति निश्चीयते इत्यर्थः। अत्रैवोत्तरं तन्त्रमुक्तमन्तरमाह। अपि चेत्यादिना। अन्यो त्थाने सुखादेर्न फलमेकार्थे
ते सवृत सुखाद्यागमः फलं सु सजीववृत्तकर्मेना शब्देस्यर्थः। पूर्वपक्षसूक्तं दृष्टांतवैषम्येण दूषयति॥ यत्तु नरीत्यादिना॥ अस्य दायस्याप्यपि विवे
कर्मविद्याविधिभ्यश्चैवमेवगम्यते॥ अन्यथा हि कर्मविद्याविधयोनर्थकाः स्युः। अन्यो त्थानपक्षे हि सुप्तमात्रो मुच्यत इत्यापद्येत। एवं चेत्स्यात् वद किं
कालांतरफलेन कर्मणा विद्यया वा कृतं स्यात्। अपि चान्यो त्थानपक्षे यदि तावच्छरीरांतरे व्यवहरमाणो जीव उत्तिष्ठेत्। तत्रत्यव्यवहारलोपप्रसंग
स्यात्। अथ तत्रस्तु प्रतिष्ठेत कल्पनानर्थक्यं स्यात्। यो हि यस्मिन् शरीरे सुप्तः स तस्मिन्नोत्तिष्ठति। अन्यस्मिन् शरीरे सुप्तोन्यस्मिन्नुत्तिष्ठती
ति कोऽसौ कल्पनायां लाभः स्यात्। अथ मुक्त उत्तिष्ठेत। अंतवान्मोक्ष आपद्येत। निवृत्ताविद्यस्य पुनरुत्थानमनुपपन्नं। एतेनेश्वरस्योत्थानं
प्रत्युक्तं नित्यनिवृत्ताविद्यत्वात्। अकृताभ्यागमकृतविप्रणाशौ च दुर्निवारावन्यो त्थानपक्षे स्यातां तस्मात्स एवोत्तिष्ठति नान्य इति। यत्तु न
क्तं। यथा जलराशौ प्रक्षिप्तो जलबिंदुर्नोद्धर्तुं शक्यते एवं सति संपन्नो जीवो नोत्थातुमर्हतीति। तत्परिह्रियते। युक्तं तत्र विवेककारणाभावा
ज्जलबिंदोरनुद्धरणं। इह तु विद्यते विवेककारणं कर्म चाविद्या चेति। वैषम्यं। दृश्यते च दुर्विवेचयोरपि अस्मज्जातीयैः क्षीरोदकयोः संसृष्टयोर्हं
सेन विवेचनं॥

चनं शालापदक्षापेक्षः ईश्वरः करोति निमित्तं दृष्टांतमाह॥ दृश्यते चेति॥ ॥ ॥ ॥ ॥

शा॰सू॰भा॰३ ब्रह्माभेदाच्च जीवस्य जलबिंदुवैषम्यमित्याह। अपि चेति। अभेदे सत्यम्भोवेत्ति स्थितीति चिंता न वक्तव्या इत्याशंक्य बुद्धिभेदेन जीवभेदाच्चिंतेत्याह॥ ॥

२८ एवं सतीति। सुषुप्तौ बुद्धिनाशेन सलई बुध्युपाधिभेदाद्देकजीवव्यवहारेण न स्यादित्यत आह। स एवायमिति॥ स्थूलत्वस्मात्सत्त्वतिष्ठत्येकोपाधिरित्यर्थः॥

अवस्थात्रयपरात्मानं विविच्य मूर्छितो विवेचयति। मुग्धेऽर्धसंपत्तिः परिशेषात्। मूर्छा प्रसिद्धावस्था न गीतावाम्यं चमवस्थाबेति अवस्थाचतुष्टयप्रसि

अपि च न जीवो नाम कश्चित्परस्मादन्यो विद्यते यो जलबिंदुरिव जलराशेः सतो विविच्येत। सदेव तूपाधिसंपर्काज्जीव इत्युपचर्यत इत्यसकृत्प्र
पंचितं। एवं सति यावदेकोपाधिगता बंधानुवृत्तिस्तावदेकजीवव्यवहारः। उपाध्यंतरगतायां तु बंधानुवृत्तौ जीवांतरव्यवहारः। स एवायमुपा
धिः स्वापप्रबोधयोर्बीजांकुरन्यायेनेत्यतः स एव जीवः प्रतिबुध्यत इति युक्तं॥ ॥मुग्धेऽर्धसंपत्तिः परिशेषात्। अस्ति मुग्धो नाम यं मूर्छित
इति लौकिकाः कथयंति। स तु किमवस्थ इति परीक्षायामुच्यते। तिस्रस्तावदवस्थाः शरीरस्थस्य जीवस्य प्रसिद्धाः। जागरितं स्वप्नः सुषुप्तमि
ति। चतुर्थी शरीरादपसृप्तिः॥ न तु पंचमी काचिदवस्था जीवस्य श्रुतौ स्मृतौ वा प्रसिद्धास्ति॥ तस्माच्चतसृणामेवावस्थानामन्यतमावस्था मू
र्छेत्येवं प्राप्ते ब्रूमः॥ २८

देहे मुग्धस्य तद्देहे लक्षणाच्चावस्थांतरापेक्षो हस्तीति प्रसक्तिर्भिन्नमेवेत्यतस्तत्सुषुप्ताभेदवादिनो ज्ञानाभावाविशेषेण लिंगेन सुषुप्तिरेव सा। ईति प्रसक्तिमिताना
सुषुप्त्या तु गीता मूर्छेति जं दृष्टांत संगमात्प्रवेश्य स्माह प्रतिबंधत्वाविदिति॥

पूर्वपक्षे जागरसिद्धत्वस्मात्ः एष मूर्छाल्लेनोमूर्छाते विवेकार्थं यत्नासिद्धिः फलं सिद्धांते एष कृत्स्नत्वं ध्रौव्यभिन्नत्तिभेदः परिशेषदर्शी यत्न सिद्धांत

ननावन्मुग्धो जागरितावस्थो भवितुमर्हति॥ नहि अयमिंद्रियैर्विषयानीक्षते स्यादेतत् इषुकारस्यायेन मुग्धो भविष्यति। यथेषुका
रो जाग्रदपि इषासक्तमनस्तया नान्यान्विषयानीक्षते एवं मुग्धो मुद्गलघातादिजनितदुःखानुभवव्यग्रमनस्तया नान्यान्विषयानीक्षि
ष्यते इति। न। अचेतयमानत्वात्। इषुकारो व्यापृतमना ब्रवीति इषुमेवाहमेतावंतं कालमुपलभमानो भूवमिति। मुग्धस्तु लब्धसंज्ञो ब्र
वीति अंधे तमसि अहमेतावंतं कालं प्रक्षिप्तो भूवं न किंचिन्मया चेतितमिति जाग्रतश्चैकविषयविषक्तचेतसो देहो ध्रियते। मुग्ध
स्य देहो धरण्यां पतति॥ तस्मान्न जागर्त्ति नापि स्वप्नान्पश्यति। निःसंज्ञकत्वात्॥ ॥ ॥ ॥

पति। ननावदिस्तादिना॥ जाग्रदपि जागरावस्थोपी सत्वष्ठे। ऐंद्रियकमर्थज्ञानं देहधारणं च तस्याप्तिन मुग्धस्येति वैषम्योक्ता दूषयति॥ नेत्यादिना॥

मूर्छामाजागरस्वप्नेदमुक्त्वा स्वसमस्तिमां भेदमाह। नापीत्यादिना। आलभंते स्पृशंति। दिष्टं मरणं सुषुप्तिमूर्छयोः किंचित्साम्येपि वैलक्षण्य
द्भेदमाह। नेति। लक्षणभेदमुक्त्वा निमित्तभेदमाह। निमित्तेति। प्रसिद्धिभेदमप्याह॥ नचेति। उक्तसाम्यवैरूप्याभ्यामर्द्धसंपत्तिः सर्वैः सुषु

नापि मृतः प्राणोष्मणोर्भावात्। मुग्धे हि जंतौ मृतो यं स्यान्न वा मृत इति संशयानाः ऊष्मास्ति नास्तीति हृदयदेशमालभंते निश्चयार्थं प्राणो
स्ति नास्तीति च नासिकादेशं। यदि प्राणोष्मणोरस्तित्वं नावगच्छंति ततो मृतो यमित्यध्यवसाय दहनायारण्यं नयंति। अथ तु प्राणमूष्माणं वा प्र
तिपद्यंते। ततो नायं मृत इत्यध्यवसाय संज्ञालाभाय भिषज्यंति। पुनरुत्थानाच्च न दिष्टं गतः। न हि यमराष्ट्रात्प्रत्यागच्छति। अस्तु तर्हि सुषुप्तः निः
संज्ञत्वात् अमृतत्वाच्च न वैलक्षण्यात् मुग्धः कदाचिच्चिरमपि नोच्छ्वसिति सवेपथु शरीरं भवति। भयानकं च वदनं विस्फारिते नेत्रे सुषुप्तस्तु
प्रसन्नवदनः तुल्यकालं पुनरुच्छ्वसिति निमीलिते अस्य नेत्रे भवतः। न चास्य देहो वेपते पाणिपेषणमात्रेण च सुषुप्तमुत्थापयंति। न
तु मुग्धं मुद्गरघातेनापि। निमित्तभेदश्च भवति मोहस्वापयोः मुसलसंपातादिनिमित्तत्वान्मोहस्य श्रमनिमित्तत्वाच्च स्वापस्य॥ न च लोकेस्ति
प्रसिद्धिः मुग्धः सुप्त इति पारिशेष्यादर्धसंपत्तिर्मुग्धतेत्यवगच्छामः। निःसंज्ञत्वात्संपन्नः इतरस्माद्वैलक्षण्यादसंपन्न इति॥ ॥ २९

प्तिधर्मैरसंपन्नो मुग्धः सुषुप्तो न भवति। सर्वैर्मरणावस्थाधर्मैरसंपन्नत्वेन मृतोपि न किंतु अवस्थांतरं गत इति सूत्रार्थः॥ ॥

अत्र स्वप्ने जीवस्य ब्रह्मणा संपत्तिरुक्तेति भ्रान्तः शङ्कते। कथमिति। यत्सुषुप्तं भवति संपन्नत्वं श्रुतं तदुपाध्यभावाभिप्रायं उपाध्यभावश्च मुग्धस्यापि
सममिति यतः तस्मात् कृत्स्नसंपत्तिरेवेत्यर्थः॥ सुषुप्तकाले कर्मासंबन्धे पुनरुत्थानं कथमित्याशङ्क्य सतत्कार्यभावान्तरं संबन्धोऽस्तीत्याह। जीवे हि
कर्षणपुनरर्धसंपत्तिर्मुग्ध इति शङ्कते। वक्तुं मावत्सुषुप्तमिति तावदुक्तं सुषुप्ते सता सोम्य तदा संपन्नो भवति अत्र स्वे नेष्टस्ते नोभयतीति नैनं सेतु
महोरात्रे तरतो न सुकृतं दुःकृतमित्यादि। जीवे हि सुकृतदुष्कृतयोः प्राप्तिः सुखित्वप्रत्ययो दुःखेन भवति। न च सुखित्वप्रत्ययो दुःखित्वप्र
त्ययो वा सुषुप्ते विद्यते मुग्धेऽपि तौ प्रत्ययौ न विद्येते। तस्मादुपाध्युपशमात् सुषुप्तवन्मुग्धेऽपि कृत्स्नसंपत्तिरेव भवितुमर्हति नार्धसंपत्ति
रिति। अत्रोच्यते। न वयं मुग्धेऽर्धसंपत्तिं जीवस्य ब्रह्मणा भवतीति। किं तर्हि अर्धेन सुषुप्तपक्षस्य भवति मुग्धत्वं अर्धेनावस्थान्तरपक्षस्येति ब्रूमः।
दर्शिते च मोहस्य स्वापेन साम्यवैषम्ये। द्वारं चैतन्मरणस्य यदास्य सावशेषं कर्म भवति। तदा वाङ्मनसे प्रत्यागच्छतः। यदा तु निरवशेषं क
र्म भवति तदा प्राणोष्माणावपगच्छतः। तस्मादर्धसंपत्तिं ब्रह्मविद इच्छन्ति। यत्तूक्तं न पञ्चमी काचिदवस्था प्रसिद्धास्तीति नैष दोषः। कादा
चित्कीयमवस्थेति न प्रसिद्धा चेत्स्यात् तत्प्रसिद्धा चैषा लोकायुर्वेदयोः॥
ति। ब्रह्मणा कृत्स्नसंपत्तिमङ्गीकृत्य परिहरति। न वयमिति। मुग्धत्वं हि सुषुप्तस्यार्धेनेति। संज्ञत्वादिधर्मेण साम्ये न संपन्नं भवति मरणस्यार्धेन
कंपादिना संपन्नमित्यर्धसंपत्तिरित्यर्थः। इतोऽपि सुषुप्तिवैषम्यमित्याह॥ द्वारं चेति। अप्रसिद्धिमङ्गीकृत्यापि प्रसिद्धिरस्तीत्याह। प्रसिद्धा चेति आयु

प्रसिद्धेकथंचिद्विषादइत्याशंक्य पंचमत्वेनाप्रसिद्धेरित्याह। अर्द्धेति। सुषुप्तिमृतिधर्माद्धर्मसंपन्नत्वात् तन्मोहबुद्धिर्लौकानामित्यर्थः। सर्वोभिर्वस्तु
भिरिति सत्त्वमर्थः इतिरिचाभीपादसमाप्तेः स्वतः सर्वार्थनिरूपणकामः प्रथमं तस्य निर्विशेषत्वमाह। नस्थानतोपिपरस्योभयलिंगंसर्वत्रहि। उद्देश्यप
त्वं पदार्थं जिज्ञासोः परमात्मनंतरं तत्स्वरूपब्रह्मविचारस्यावसरसंगतिमाह। येनेति। सविशेषत्वं निर्विशेषत्वं चेत्युभयं लिंगं यते ज्ञाप्यते याभि

अर्धसंपत्त्यमुग्धतामावनपंचमीगएतदुक्तं भवति॥ ॥नस्थानतोपिपरस्योभयलिंगंसर्वत्रहि॥ ॥येन ब्रह्मणा सुषुप्त्यादिषु जीवउ
पाध्युपशमात्संपद्यते। तस्येदानीं स्वरूपं श्रुतिवशेन निर्धार्यते। संत्युभयलिंगाः श्रुतयः ब्रह्मविषयाः। सर्वकर्मा सर्वकामः सर्वगंधः सर्व
रसइत्येवमाद्याः सविशेषलिंगाः। अस्थूलमनण्वह्रस्वमदीर्घमित्येवमाद्याश्च निर्विशेषलिंगाः। किमासु श्रुतिषूभयलिंगं ब्रह्म प्रतिपत्तव्य
मुतान्यतरलिंगं। यदान्यतरलिंगं तदापि सविशेषं निर्विशेषं वेति मीमांस्यते। तत्रोभयलिंगश्रुत्यनुग्रहात् उभयलिंगमेव ब्रह्मेत्येवं प्राप्ते
ब्रूमः। न तावत्स्वत एव परस्य ब्रह्मण उभयलिंगत्वमुपपद्यते। न ह्येकं वस्तु स्वत एव रूपादिविशेषोपेतं तद्विपरीतं चेत्यवधारयितुं शक्यं वि
रोधात्॥ ॥ ३०

त्याउभयलिंगाः श्रुतयः संशयबीजत्वेन संतीत्यर्थः। यथाविरुद्धसुषुप्तिमरणाभ्यामुभयरूपत्वं मुग्धत्वं तथा श्रुतिभ्यामपाद्युभयरूपं ब्रह्मध्येयमिति
दृष्टांतेनपूर्वपक्षः। निर्विशेषमेकरूपमेव ध्येयमिति सिद्धांतमतिः। एवमिति॥

किमुभयरूपत्वं स्वतः उत स्वतो निर्गुणस्य सर्वगंधत्वादिविशेषः उपाधितः सतः आहोस्वित् स्वतः सविशेषमेव ब्रह्मेति। तत्राद्यं निरस्य द्वि
तीयमनूद्य दूषयति। अस्तु तर्हीति॥ स्थानमुपाधिः अस्मिन् विशेषः कल्पितः औपाधिकत्वात् स्फटिकलौहित्यवदित्यर्थः उपाधेः सत्वेपि तत्कृते

अस्तु तर्हि स्थानतः पृथिव्याद्युपाधियोगादिति। तदपि नोपपद्यते। नह्युपाधियोगादप्यन्यादृशस्य वस्तुनोन्यादृशः स्वभावः संभवति। नहि स्व
च्छः सन् स्फटिकोऽलक्तकाद्युपाधियोगादस्वच्छो भवति॥ भ्रममात्रत्वादस्वच्छताभिनिवेशस्य। उपाधीनां चाविद्याप्रत्युपस्थापितत्वात्। अतश्चा
न्यतरलिंगपरिग्रहेपि समस्तविशेषरहितं निर्विकल्पकमेव ब्रह्म प्रतिपत्तव्यं। न तद्विपरीतं सर्वत्र हि ब्रह्मप्रतिपादनपरेषु अशब्दमस्पर्शमरूप
मव्ययमित्येवमादिष्वपास्तसमस्तविशेषमेव ब्रह्मोपदिश्यते॥ न भेदादिति चेन्न प्रत्येकमतद्वचनात्॥ ॥ अथापि स्यात्। यदुक्तं निर्विक
ल्पकमेकलिंगमेव ब्रह्म नास्य स्वतः स्थानतो वोभयलिंगत्वमस्तीति। तन्नोपपद्यते। कस्मात्। भेदात्। भिन्ना हि प्रतिविद्यं ब्रह्मण आकारा उप
दिश्यंते॥ चतुष्पात् ब्रह्म षोडशकलं ब्रह्म वामनीत्वादिलक्षणं ब्रह्म त्रैलोक्यशरीरं वैश्वानरशब्दोदितं ब्रह्मेत्येवंजातीयकाः। तस्मात्सविशेषत्वम
पि ब्रह्मणोभ्युपगंतव्यं॥

मिथ्येति दृष्टं ब्रह्मण उपाधीनां मिथ्यात्वात् तत्कृतो विशेषो मिथ्येति किमु वाच्यमित्याह। उपाधीनामिति। तृतीयं निरस्यति। अतश्चेति। सर्वस्य विशेष
स्य कल्पितत्वादेव सर्पः। निषेधश्रुतेश्चैवमित्याह सर्वत्र हीति। भिद्यत इति भेदो विशेषः निर्विशेषत्वश्रुतावपि विशेषश्रुतेरुभयरूपत्वं स्यादि
ति शंकां व्याचष्टे। अथापि स्यादिति॥

पूर्वोक्तविरोधं स्मारयति। न चोक्तमिति। भेदश्रुतिप्रामाण्यार्थमौपाधिकरूपभेदस्वीकारादविरोध इति समाधत्ते। किमुपाधिगतस्वरूपभेदो

ब्रह्मण्युपचर्यते ध्यानार्थममुतोपाधियोगात्स्वतो विरुद्धरूपवत्त्वमाब्रह्मणो भेदो भवतीति। आद्येऽस्मदिष्टसिद्धिः द्वितीये न भेदश्रुत्या रूपमिति। नेति ब्रू

ननूक्तं नोभयलिंगत्वं ब्रह्मणः संभवतीति। अयमप्यविरोधः उपाधिकृतत्वादाकारभेदस्य। अन्यथा हि निर्विषयमेव भेदशास्त्रं प्रसज्येतेति चेत्। नेति ब्रूमः। कुतः। प्रत्येकमतद्वचनात्। प्रत्युपाधिभेदं ह्यभेदमेव ब्रह्मणः श्रावयति शास्त्रं। यश्चायमस्यां पृथिव्यां तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं शारीरस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेत्यादि। अतश्च न भिन्नाकारयोगो ब्रह्मणः शास्त्रीय इति शक्यते वक्तुं। अपि चैवमेके। अपि चैवं भेददर्शननिंदापूर्वकमभेददर्शनमेवैके शाखिनः समामनंति। मनसैवेदमाप्तव्यं नेह नानास्ति किंचन। मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति। तथान्येऽपि भोक्ता भोग्यं प्रेरितारं च मत्वा सर्वं प्रोक्तं त्रिविधं ब्रह्ममेतदिति समस्तस्य भोग्यभोक्तृनियंतृलक्षणस्य प्रपंचस्य ब्रह्मैकस्वभावतामधीयते। कथं पुनराकारवदुपदेशिनीष्वनाकारोपदेशिनीषु च ब्रह्मविषयासु श्रुतिषु सतीष्वनाकारमेव ब्रह्मावधार्यते ३१
न पुनर्विपरीतमित्यत उत्तरं पठति॥

न इति। द्वैतनिंदापूर्वकमद्वैतोक्तेश्च निर्विशेषं तत्त्वमिति सूत्रार्थमाह। अपि चेति। भोक्ता जीवो भोग्यं शब्दादि तयोः प्रेरितारमीश्वरं च मत्वा विचार्य मे म
मप्रोक्तं तत्सर्वं त्रिविधं ब्रह्मैवेति जानीयादित्यर्थः। द्विविधश्रुतीषु सतीषु निर्विशेषबलेन किं विनिगमकमिति शंकोत्तरत्वेन सूत्रमवतारयति॥ ॥ ॥

तस्य तत्परविरोधेन तत्परं बलवदिति न्यायो निर्णायक इत्याह । अरूपवदेवेति । उपासनापरवाक्येषु आकारे तात्पर्याभावेपि देवताविग्रहवदाका
रसिद्धिमाशंक्य निष्प्रपंचपरश्रुतिविरोधान्नैव मित्याह तेषु सतीति ॥ ॥ कल्पितद्वैते सावकाशत्वाच्च सम
अरूपवदेव हि तत्प्रधानत्वात् ॥ ॥ रूपाद्याकाररहितमेव ब्रह्मावधारयितव्यं । न रूपादिमत् । कस्मात् । तत्प्रधानत्वात् । अस्थूलमन
ण्वह्रस्वमदीर्घमशब्दमस्पर्शमरूपमव्ययं । आकाशो वै नाम नामरूपयोर्निर्वहिता ते यदन्तरा तद्ब्रह्म दिव्यो ह्यमूर्त्तः पुरुषः सबाह्याभ्यन्तरो ह्यजः ।
तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यमयमात्मा ब्रह्म सर्वानुभूरित्येवमादीनि वाक्यानि निःप्रपंचब्रह्मात्मतत्त्वप्रधानानि नार्थान्तरप्रधाना
नीति स्थितमेतत्तु समन्वयादित्यत्र । तस्मादेवंजातीयकेषु वाक्येषु यथाश्रुतं निराकारमेव ब्रह्मावधारयितव्यं । इतराणि त्वाकारवद्ब्र
ह्मविषयाणि वाक्यानि न तत्प्रधानानि उपासनानि उपासनाविधिप्रधानानि हि तानि । तेषु सति विरोधे यथाश्रुतमाश्रयितव्यं । सति तु विरोधे
तत्प्रधानान्यतत्प्रधानेभ्यो बलीयांसि भवंतीति । एष विनिगमनायां हेतुः येनोभयीष्वपि श्रुतिषु सतीषु निराकारमेव ब्रह्मावधार्यते न पुनर्विपरीतमिति । का
तर्हि आकारवद्विषयाणां श्रुतीनां गतिरित्यत आह । प्रकाशवच्चावैयर्थ्यात् ॥ ॥ यथा प्रकाशः सौरश्चान्द्रमसो वा वियद्व्याप्यावतिष्ठमानो
ऽङ्गुल्याद्युपाधिसंबंधात्तेषु ऋजुवक्रादिभावमापद्यमानेषु तद्भावमिव प्रतिपद्यते एवं ब्रह्मापि पृथिव्याद्युपाधिसंबंधात्तदाकारमिव प्रतिपद्यते त
दालंबनो ब्रह्मण आकारविशेषोपदेश उपासनार्थो न विरुध्यते एवमवैयर्थ्यमाकारवद्ब्रह्मविषयाणामपि वाक्यानां भविष्यति
पंचत्वश्रुतयो दुर्बला इत्याह ॥ प्रकाशवच्चेति ॥

शा॰सू॰भा॰३ नन्वाकारवाक्यानामुपाधिकल्पितसर्वगंधत्वादिनार्थवत्त्वं किमिति निरस्यते। दैवस्पृष्टीमिवोच्यतां। तत्राह। न हि वेदवाक्यानामिति॥ नन्वेवमद्वैते। उक्त
रीत्योभयरूपत्वांगीकारे श्रुतीनां व्यवस्थितत्वेपि सर्वथाः। उपाधीनां कल्पितत्वात्सोपाधिकस्य सत्यत्वानुपपत्तेर्न सत्यमुभयरूपत्वमिति एवमुक्तं संप्र

३२ न हि वेदवाक्यानां कस्यचिदर्थवत्त्वं कस्यचिदनर्थकत्वमिति युक्तं प्रतिपत्तुं। प्रमाणत्वाविशेषात्। नन्वेवमपि यत्पुरस्तात्प्रतिज्ञातं नोपा
धियोगादप्युभयलिंगत्वं ब्रह्मणोस्तीति तत्तु हीयते॥ नेति ब्रूमः। उपाधिनिमित्तस्य वस्तुधर्मत्वानुपपत्तेः। उपाधीनां चाविद्याप्रत्युपस्था
पितत्वात्। सत्यामेव च नैसर्गिक्यामविद्यायां लोकवेदव्यवहारावतार इति तत्र तत्रावोचाम॥ ॥आह च तन्मात्रं॥ ॥आह च श्रुतिश्चैतन्यमा
त्रं विलक्षणरूपांतररहितं निर्विशेषं ब्रह्म स यथा सैंधवघनोऽनंतरोऽबाह्यः कृत्स्नो रसघन एवैवं वा अरेयमात्मानंतरोऽबाह्यः कृत्स्नः प्रज्ञान
घन एवेति। एतदुक्तं भवति॥ नास्यात्मनोंतर्बहिर्वा चैतन्यादन्यद्रूपमस्ति। चैतन्यमेवास्य निरंतरं स्वरूपं। यथा सैंधवघनस्यांतर्बहिश्च ल
वणरस एव निरंतरो भवति। न रसांतरं तथैवेति॥

इति स संनिर्विशेषत्वं मिथ्या सविशेषत्वमित्युक्त्वा नेदमुभयरूपत्वांगीकारेपि न श्रुतीनां परविरोध इत्याह॥ नेति ब्रूम इति। द्वैतस्य मिथ्यात्वेनतानेन बाधादु ३२
पासनादिव्यवहारो न स्यादित्याशंक्य व्याघातमागेवसदित्याह। सत्यामिति। मतः श्रुतिश्चिन्मात्रमाह। अतश्च विशेषो मिथ्येति सूत्रार्थमाह॥ आह चेति सैंधव
सः लोलवणपिंडः॥

किंच श्रुतिरस्य सोऽपरनिषेधेनब्रह्मोपदेशं निष्प्रपंचं ब्रह्मेत्याह॥ दर्शयतिचेति। अथ यद्वैतो ऽपनंतरं शानहेतुत्वान्नेति उपदेशः क्रियत इत्यर्थः।
अधि अन्यत्पुनः पुनरधीहि भो इति निर्बंधकारिणं तं हूनि मेत्ततो येच मन्येत तूष्णींभावं सत्कोऽ वाचा उपशांतोनि रत्वद्वैतः अतस्तस्मात्तूष्णींभा

दर्शयतिचापिश्रुतिरपिस्मर्यते॥ ॥ दर्शयति। चश्रुतिः परप्रतिषेधेनैवब्रह्मनिर्विशेषंस्म यातस्मादेशोनेतिनेतिअन्यदेवतद्विदितादथो अवि
दितादधि॥ यतो वाचोनिवर्ततेअप्राप्य मनसा सहेत्येवमाद्या बाष्कलिना बाध्वः पृष्टः सन्नवचनेनैव ब्रह्मप्रोवाचेतिश्रूयते। सहोवाचाधीहि भो
इति स तूष्णीं बभूव तं हद्वितीये वा तृतीये वा वचनउवाच ब्रूमः खलु त्वं तु नविजानासि उपशांतोयमात्मेति तथा स्मृतिष्वपि परप्रतिषेधेनै
वोपदिश्यते। सर्वमयमात्मवेत्स्यामि यत्तज्ज्ञात्वामृतमश्नुते। अनादिमत्परं ब्रह्म न सत्तन्नासदुच्यत इत्येवमाद्यासु। तथा विश्वरूपधरो नारायणो ना
रदमुवाचेति स्मर्यते। माया ह्येषा मया सृष्टा यन्मां पश्यसि नारद सर्वभूतगुणैर्युक्तं नैवं मां ज्ञातुमर्हसि॥

वक्ष्योत्तरमिति। सैवः अधो शहस्तत्रार्थकेः आदिमत्कार्यं तन्न भवती त्यनादिमत्तत्सत्त्वं इंद्रियवेद्यात्यसत्प्रसंचन स्वप्रकाशत्वादित्यर्थः सर्वभूत
गुणैरिंद्रियग्राह्यादिभिर्युक्तं मां मूर्तिमंतं पश्यसीति यत्तन्माया अतस्सर्वं सद्द्वैतो भगवानिति मा द्रष्टुं नार्हसि स्वरूपतो द्वैतातीतत्वादित्यर्थः॥ ॥

किंच यथा जलाद्युपाधिकल्पितः सूर्यचंद्रादेर्भेदश्चलनादिधर्म एव मात्मन इति दृष्टांतश्रुतेश्च निर्विशेषत्वमित्याह॥ अत एव चोपमेति जलसूर्यप्रति
बिंबत्वाकारेण सूर्यस्याभासत्वद्योतनाय सूर्यकेति कप्रत्ययः॥ यथा ह्ययं ज्योतिरात्मा विवस्वान् स्वतः एकोपि घटभेदेन भिन्नाः अपोऽनुगच्छन् बहुधा क्रियत एव

अत एव चोपमा सूर्यकादिवत्॥ यत एव चायमात्मा चैतन्यरूपो निर्विशेषो वाङ्मनसातीतः परप्रतिषेधोपदेश्योऽत एव चास्योपाधिनिमित्तामपारमा
र्थिकीं विशेषवत्तामभिप्रेत्य जलसूर्यकादिवदित्युपमोपादीयते मोक्षशास्त्रेषु। यथा ह्ययं ज्योतिरात्मा विवस्वानपो भिन्ना बहुधैकोऽनुगच्छन्।
उपाधिना क्रियते भेदरूपो देवः क्षेत्रेष्वेवमजोऽयमात्मेति। एक एव तु भूतात्मा भूते भूते व्यवस्थितः। एकधा बहुधा चैव दृश्यते जलचंद्रवदित्येवमा
दिषु। अत्र प्रत्यवस्थीयते। अंबुवदग्रहणात्तु न तथात्वं॥ न जलसूर्यादितुल्यत्वमिहोपपद्यते तद्वदग्रहणात्। सूर्यादिभ्यो हि मूर्तेभ्यः पृथ
ग्भूतं विप्रकृष्टदेशं मूर्तं जलं गृह्यते। तत्र युक्तः सूर्यादिप्रतिबिंबोदयः। न त्वात्मा मूर्तो न चास्मात्पृथग्भूता विप्रकृष्टदेशाश्चोपाधयः। सर्वगत
त्वात् सर्वानन्यत्वाच्च। तस्मादयुक्तोऽयं दृष्टांत इति। अत्र प्रतिविधीयते॥ ॥वृद्धिह्रासभाक्त्वमंतर्भावादुभयसामंजस्यादेवं॥ ॥युक्त एव त्व
यं दृष्टांतः विवक्षितांशसंभवात्। न हि दृष्टांतदार्ष्टांतिकयोः क्वचित्कंचिद्विवक्षितांशं मुक्त्वा सर्वसारूप्यं केनचिद्दर्शयितुं शक्यते सर्वसारूप्ये हि दृष्टां
तदार्ष्टांतिकभावोच्छेद एव स्यात्॥

मजोपमात्मा देवः स्वप्रकाश एकोऽप्युपाधिना मायया क्षेत्रेष्वनुगच्छन् भेदरूपः क्रियत इति योजना। इहात्मसु युक्तदृष्टांतवैषम्यशंकासूत्रं व्याचष्टे। आत्म
नोऽरूपत्वात् दूरस्थोपाध्यभावाच्च। न यथांबुघटादिषु प्रतिबिंबभेदो न युक्त इत्यर्थः। उपाध्यंतर्भावेण तत्कल्पितधर्मवत्त्वमत्र विवक्षितांशस्तेन साम्येन समा १२२

दृष्टांतसाम्येपि नीरूपात्मनः प्रतिबिंबत्वं युक्तं कथं कल्प्यत इत्यत आह। नचेदमिति। स्वमतेन कल्प्यत इत्यर्थः। श्रुतदृष्टांतस्य सूर्यकादिवत् इत्युपन्यासेन किं
फलमित्यत आह। शास्त्रेति। आत्मनो निर्विशेषत्वं फलमित्यर्थः। अविरोध इति। नवैषम्यमित्यर्थः। आत्मा प्रतिबिंबशून्यः नीरूपद्रव्यत्वात् वायुवत् इत्यनुमा
नेऽआकाशे व्यभिचारः। अल्पजलेपि दूरस्थाकाशप्रतिबिंबदर्शनात् उपाधिदूरस्थत्वमपि क्वचिदनपेक्षितमिति भावः। एवं श्रुतेर्भ्रांत्यनुमानबाध इ

नचेदं स्वमनीषिकया जलसूर्यकादिदृष्टांतप्रणयनं। शास्त्रप्रणीतस्य प्रयोजनमात्रमुपन्यस्यते किं पुनरत्र विवक्षितं सारूप्यमिति। तदुच्यते।
वृद्धिह्रासभाक्त्वमिति। जलगतं हि सूर्यप्रतिबिंबं जलवृद्धौ वर्द्धते जलह्रासे ह्रसति जलचलने चलति जलभेदे भिद्यत इत्येवं जलधर्मानुविधायि भव
ति। नतु परमार्थतः सूर्यस्य तथात्वमस्ति एवं परमार्थतोऽविकृतमेकरूपमपि सत् ब्रह्म देहाद्युपाध्यंतर्भावात् भजत इवोपाधिधर्मान् वृद्धिह्रासादीन्
एवमुभयोर्दृष्टांतदार्ष्टांतिकयोः सामंजस्यादविरोधः। दर्शनाच्च॥ दर्शयति च श्रुतिः परस्यैव ब्रह्मणो देहादिषूपाधिष्वंतरनुप्रवेशं पुरश्चक्रे
द्विपदः पुरश्चक्रे चतुष्पदः पुरः स पक्षी भूत्वा पुरः पुरुष आविशत इति। अनेन जीवेनात्मनानुप्रविश्येति च। तस्माद्युक्तमेतत् अत एव चोपमा
सूर्यकादिवदिति॥

त्याह सूत्रकारः। दर्शनाच्चेति। द्विपदः पुरो मनुष्यादिदेहांश्चक्रे चतुष्पदः पुरः पशून् कृत्वा पुरस्य सृष्टेरग्राभिव्यक्तेः पुरस्तात्स ईश्वरः पक्षीलिंगशरी
रो भूत्वा पुरउक्तानि शरीराण्याविशत् स च प्रविष्टोपि पुरुषः पूर्ण एवेत्यर्थः। तैत्तिरीयके लिंगस्य पक्षत्वोक्तेः पक्षित्वं मंतव्यं॥ ॥

एवं प्रतिबिंबभावेन भेदादेः कल्पितत्वात् निर्विशेषं ब्रह्मेति स्वमतमुपसंहरति। तस्मादिति। एकदेशिव्याख्यामुत्थापयति। अन्ये इति। न स्थानतोपीत्याद्येक मधिकरणं तत्र ब्रह्मणो निष्प्रपंचत्वे स्थिते किं लक्षणा प्रकृतिरिति संदेहे प्रकाशवच्चेत्यादि द्वितीयमधिकरणं प्रवृत्तं न तद्रूपमेव ब्रह्म किंतु प्रकाशवत् सविद्रूपं च कुतः। अवैयर्थ्यात्। सत्यं ज्ञानं सदेव सोम्येदमग्र आसीत् इत्यादि रूपे ब्रह्मणः प्रपंचवत्वादिति पूर्वपक्षे सिद्धांतः। आह च तन्मात्रं चिन्मात्रं ब्रह्मश्रुतिराह ज्ञान

तस्मान्निर्विकल्पकैकलिंगमेव ब्रह्म नोभयलिंगं विपरीतलिंगं चेति सिद्धं॥ अत्र केचिन्न द्वे अधिकरणे कल्पयंति। प्रथमं तावत् किं समस्तमिताशेषप्रपंचमेकाकारं ब्रह्म उत प्रपंचवदनेकाकारमिति। द्वितीयं तु किं तेन समस्तमितप्रपंचत्वेपि किं सच्चिद्रूपलक्षणं ब्रह्म उत बोधलक्षणं उत उभयलक्षणमिति अन्यथायं भेदः। सर्वथाप्यानर्थक्यम् अधिकरणांतरं भवेदिति। यदि तावदुक्तैकलिंगत्वपरत्वं ब्रह्मणो निराकर्तुमित्यभिप्रायः। तत्सर्वं पूर्वेणैवाधिकरणेन निराकृतमिति उत्तरमधिकरणं प्रकाशवच्चेत्यर्थमेव भवेत्। न च सत्त्वलक्षणमेव ब्रह्म न बोधलक्षणमिति शक्यं वक्तुं। विज्ञानघन एवेत्यादिश्रुतिवैयर्थ्यप्रसंगात्। कथं वा निरस्तचैतन्यं ब्रह्म चेतनस्य जीवस्यात्मत्वेनोपदिश्येत॥ ३४

सत्त्वानतिरेकादिति। इदं द्वितीयमधिकरणं दूषयति। अत्र वयमिति द्वितीयोधिकरणस्य किं ब्रह्मणोनेकरूपत्वनिरासः फलं उत बोधनिरास॥ आहो स्वित् सत्तानिरास इति विकल्प्य सर्वथाप्यानर्थक्यं प्रपंचयन् आद्येऽगतार्थतामाह। यदि तावदिति॥ न द्वितीय इत्याह। न चेति। ब्रह्मणो बोधरूपत्वनिरासे तु जीवाभेदश्रुतिबाधः स्यादित्याह॥ कथं चेति॥

नन्वत्रीयमुक्तमाह ॥ नापीति । सत्तातिरेकेण बोधस्य तु छलं चस्यादित्याह । कथमिति ॥ न च बोधस्य सत्तानतिरेकान्न तुच्छतेति वाच्यं । सद्बोधपदयोर्वै
यानतिरेके पर्यायत्वप्रसंगात् । एवं सिद्धांतेऽप्यभावेन दूषयितुमिष्टं विपक्षं दूषयति । प्रसंगमेवाह । घटेति । व्यावृत्तत्वं भिन्नत्वं । तिष्ठतु पर्यायत्वे रूपत्व
सिद्धांतविरोधात् भिन्नोभयरूपत्व एव पक्षानुत्थानमित्यर्थः । उभयरूपश्रुतिवलादुत्थानमिति शंकते । श्रुतत्वादिति । नेत्यविं ध्यवत् परस्परं भिन्न

नापि बोधलक्षणमेव ब्रह्म न सल्लक्षणमिति शक्यं वक्तुं । अस्तीत्येवोपलब्धव्य इत्यादिश्रुतिवैयर्थ्यप्रसंगात् ॥ कल्प्यमानिरस्तसत्ताको बोधो
ऽभ्युपगम्येत । नाप्युभयत्वलक्षणमेव ब्रह्मेति शक्यं वक्तुं । पूर्वाभ्युपगमविरोधप्रसंगात् सत्तासामान्येन बोधेन बोधसामान्येन यावत्सत्तमोपेतं
ब्रह्मस्यादिति ज्ञानानन्तस्वतदेव पूर्वाधिकरणप्रतिपादितसमपंचत्वं भज्येत । श्रुतत्वाददोषमिति चेत् । न एकस्यानेकस्वभावत्वानुपपत्तेः । अ
पसनैव बोधो बोध एव च सत्ता । नानयोः परस्परव्यावृत्तिरस्तीति यद्युच्येत । तथापि किं सल्लक्षणं ब्रह्म उत बोधलक्षणमुतोभयलक्षण
मिति । अयं विकल्पो निरालंबन एव स्यात् सूत्राणि सेकाधिकरणत्वेनैवास्माभिर्नीतानीति ॥ ॥ ॥ ॥

सत्ताबोधयोरेकब्रह्माभेदशंकाश्रुतिशतेनापि न युक्तेत्याह । नेति । सद्बोधयोर्भेदेऽस्तिनवाश्रायेश्रुतेरपि विरुद्धार्थत्वानुपपत्तेर्न पूर्वपक्षोत्थानमि
त्यकंसप्रतिद्धिती यशंकते । अथ सत्तैवेति सद्बोधपदयोरत्यभेदेऽपि लक्ष्यैकत्वापर्यायत्वे रखंडार्थस्वीकारादित्यर्थः । अखंडार्थस्य पूर्वपक्षत्वं न
स्यात् सिद्धांतत्वात् किं चात्र संशयोऽप्ययुक्त इत्याह । तथापीति । एकाधिकरणपक्षे सूत्राणि कथं नियानीयंत इत्याह । सूत्राणीति ॥ ॥

ब्र॰ सू॰ भा॰ ३ स्वपक्षे सूत्राणामांजस्यं चेत्याह। अपि चेति। अवश्यापेक्षितगत्यर्थत्वेनोत्तरसूत्राणां स्वैकवाक्यत्वान्नाधिकरणभेद इति भावः। आकारश्रुतीनां कल्पि

३५ ताकारोपगतिरिति स्वमतमुक्त्वा प्रपंचविलयवादिनस्तु मनोमयः प्राणशरीरः सत्यकाम इत्याद्याकारश्रुतीनां तद्दत्तनिराकारप्रविलयो गतिरित्याहुः। म

नोमय इति कोऽर्थः। मनोतिरिक्तोपाधिशून्य इत्यर्थः। एवं प्राणशरीरपदेन प्राणातिरिक्तोपाधिनिषेधान्मनसोप्यभाव इति तु अप्रवंसवेद्य शास्त्र

अपि च ब्रह्मविषयासु श्रुतिष्वाकारवदनाकारप्रतिपादनेन विप्रतिपन्नास्वनाकारे ब्रह्मणि परिगृहीतेऽवश्यं वक्तव्येतरासां श्रुतीनां गतिः। तादर्थ्येन प्रकाशवच्चेत्यादीनि सूत्राणि अर्थवन्ति संपद्यंते॥ यदप्याहुः। आकारवादिन्योपि श्रुतयः प्रपंचप्रविलयमुखेनानाकारप्रतिपत्त्यर्था एव न पृथगर्था इति तदपि न समीचीनमिव लक्ष्यते कुतः। ये हि परविद्याधिकारे केचित्प्रपंचा उच्यंते। यथा युक्ता ह्यस्य हरयः शता दशेत्ययं वै हरयोऽयं वै दश च सहस्राणि बहूनि चानंतानि चेत्येवमादयः। ते भवंतु प्रविलयार्थाः। तदेतद्ब्रह्मापूर्वमनपरमनंतरमबाह्यमित्युपसंहारात्। ये पुनरुपासनाधिकारे प्रपंचा उच्यंते यथा मनोमयः प्राणशरीरो भारूप इत्येवमादयो न तेषां प्रविलयार्थत्वं न्याय्यं सक्रतुं कुर्वीतेत्येवंजातीयकेन प्रकृतेनैवोपासनविधिना तेषां संबंधात्॥

नाकारब्रह्मपरा एवेति तन्मतमनूद्य दूषयति। यदप्याहुरित्यादिना। किं ज्ञेयं ब्रह्मप्रकरणस्थानामाकारश्रुतीनां निषेधपरत्वं उतोपासनाप्रकरणस्था ३५

नामपि तत्राद्यमंगीकरोति। ये हीति। अस्य जीवभावं प्राप्तस्येश्वरस्य हरयो विषयाहरणादिंद्रियाणि प्राणिभेदे बहूनि शतानि सहस्राणि

यते पामीश्वर एवेदमाह। अयमिति। ईश्वर एव हरय इत्यर्थः। द्वितीयं दूषयति। ये पुनरिति॥ ॥ ॥

मनोमयादिशब्दानां मुख्यत्वबलात् गुणपरत्वाभेदे निषेधलक्षणापत्तिप्रसक्तेराह । श्रुतत्वाच्चेति । किंचाकारानाकारश्रुतिद्वैविध्ये सति ब्रह्मानाकारमेवे
त्यत्र किंचिन्निगमकमिति शंकोत्थानादस्थूलादिश्रुतीनां निराकारतार्थे नियामकमिति कल्पनार्थमिदं सूत्रमर्थवद्भवति । सर्वश्रुतीनां निषेधा
र्थत्वे तु शंकानुत्थानान्निगमकसूत्रमनर्थं स्यादित्याह । सर्वेषां चेति । ननूपासनार्थवाक्यानां स्वार्थे फलाभावात्तत्फलनिषेधवाक्यशेषत्वमित्याशंक्य स

श्रुताश्चैवंजातीयकानां गुणानामुपासनार्थत्वेनैव कल्प्यमानेन लक्षणाप्रविलयार्थत्वमवकल्पते । सर्वेषां साधारणे प्रविलय्यार्थत्वे सति
स्वरूपवदेव हि तत्प्रधानत्वादिति विनिगमनकारणवचनमनवकाशं स्यात् । फलमप्येषां यथोपदेशं क्वचिद्दुरितक्षयः क्वचिदैश्वर्यं क्व
चित् क्रममुक्तिरित्यवगम्यत एवेति । अतः पार्थगर्थ्यमेवोपासनावाक्यानां ब्रह्मवाक्यानां च न्याय्यं । कथं चैषामेकवाक्यतावगम्यत इति वक्त
व्यं । एकनियोगप्रतीतेः प्रयाजदर्शपूर्णमासवाक्यवदिति चेत् । न ब्रह्मवाक्येषु नियोगाभावात् ॥ वस्तुमात्रपर्यवसायीनि हि ब्रह्मवाक्यानि न
नियोगोपदेशीनीति एतद्विस्तरेण प्रतिष्ठापितं तत्तु समन्वयात् इत्यत्र । किंविषयश्चात्र नियोगोऽभिप्रेयत इति वक्तव्यं । पुरुषो हि नियुज्यमा
नः कुर्विति स्वव्यापारे कस्मिंश्चिन्नियुज्यते ॥

तस्य श्रुतत्वाच्चान्यशेषत्वे साह । फलमपीति स्वार्थे फलाभावाच्छेषत्वे कल्प्यमाने तत्राह । कथं चेति । आर्थैकवाक्यत्वं शंकते । एकेति । यथा फलवत्प्रधानापूर्वोत्पत्ति
योगैक्यादंगप्रधानवाक्यानामेकवाक्यता । तथात्र तत्त्वावबोधकानामप्यप्रपंचप्रविलयविधिपरत्वे एको नियोगरूपोऽर्थोऽस्तीति साकारानाकारवाक्यानां सर्वेषामेक
वाक्यतेत्यर्थः । नियोगासिद्ध्या दूषयति ॥ नेति ॥

विषयं शंकते। ननु द्वैतेति। प्रत्यनीकं प्रतिबंधकं। ननु प्रपंचविलये ब्रह्मत्वमस्मदादेः इत्यत आह। ब्रह्मस्वभावो हि प्रपंच इति। कारणं हि कार्यस्य स्वरू
पं अतः कार्यनाशेऽपि कारणस्य न लयः। घटनाशेऽपि मृदो नाशादित्यर्थः। प्रपंचस्य सत्यस्य कल्पितस्य वा लयो यो विधिरिति विकल्प्याद्यं दूषयति। तत्र यदि ता

ननु द्वैतप्रपंचप्रविलयोऽनियोगविषयो भविष्यति। अप्रविलापिते हि द्वैतप्रपंचे ब्रह्मतत्त्वावबोधो न भवति॥ अतो ब्रह्मतत्त्वावबोधप्रत्यनीकभू
तो द्वैतप्रपंचः प्रविलाप्यो यथा स्वर्गकामस्य यागोऽनुष्ठातव्य उपदिश्यते। एवमपवर्गकामस्य प्रपंचप्रविलयः। यथा च तमसि व्यवस्थितं घटादि
तत्त्वमवबुभुत्समानेन तत्प्रत्यनीकभूतं तमः प्रविलाप्यते। एवं ब्रह्मतत्त्वमवबुभुत्समानेन तत्प्रत्यनीकभूतः प्रपंचः प्रविलापयितव्यः। ब्रह्म
स्वभावो हि प्रपंचः न प्रपंचस्वभावं ब्रह्म तेन नामरूपप्रपंचप्रविलापनेन ब्रह्मतत्त्वावबोधो भवतीति। अत्र वयं पृच्छामः। कोऽयं प्रपंचप्रविलयो नाम
किमग्निप्रतापसंपर्कात् घृतकाठिन्यप्रविलय इव प्रपंचप्रविलयः कर्त्तव्यः। आहोस्विदेकस्मिन्चंद्रे तिमिरकृतानेकचंद्रप्रपंचवदविद्या
×इति तत्र यदि तावद्विद्यमानोऽयं प्रपंचो देहादिलक्षण आध्यात्मिको बाह्यश्च पृथिव्यादिलक्षणः प्रविलापयितव्य× कृतो ब्रह्मणा नामरूपप्रपं
चो विद्यमानः प्रविलापयितव्य इत्युच्यते स पुरुषमात्रेणाशक्यः प्रविलापयितुमिति। तदुपदेशोऽशक्यविषय एव स्यात् एकेन चादिमुक्तेन ३६
पृथिव्यादिप्रविलयः कृतः इदानीं पृथिव्यादिशून्यं जगदभविष्यत्॥

वदिति। सत्यस्य ज्ञानाद्ध्वस्तेः मुक्तादिना च कृत्स्नद्वैतध्वंसायोगाच्च भोग्यस्य न विधिविदशक्यविषयोऽयं विधिः। किं च शुकादिमुक्त्या सर्वमुक्तिः स्या

द्वितीयमनूद्य दूषयति॥ अपेत्यादिना। उपदेशजन्यज्ञानादेवाविद्यातत्कार्यप्रपंचलयसिद्धेर्नियोगो वृथेत्यर्थः। किंच ब्रह्मज्ञानादौ विधिः। किं ब्रह्मण
ज्ञाने ज्ञाते वा नाद्यः अज्ञातत्वादित्याह॥ अनावेदितेति॥ द्वितीयं शंकते॥ नन्विति। उपदेशादेव ज्ञाते ब्रह्मणि साक्षात्कारहेतवो धर्माः सिद्धा विधि

अथाविद्याध्वस्तौ ब्रह्मण्येकस्मिन्नपि प्रपंचो विद्यमानो विलाप्यत इति ब्रूयात्॥ ततो ब्रह्मैकविद्याध्वस्तप्रपंचप्रत्याख्यानेनावेदितव्यं। एकमेवा
द्वितीयं ब्रह्म। तत्त्वमस्यात्मा तत्त्वमसीति तस्माद्विद्या स्वयमेवोल्लघ्यते। तथा चाविद्या बाध्यते॥ ततश्चाविद्याध्वस्तरूपलोपं नामरूपप्रपंचः स्व
प्रप्रपंचवत्स्वयं विलीयते। अनावेदिते तु ब्रह्मणि ब्रह्मविज्ञानं कुरु प्रपंचप्रविलयं चेति श्रुतफलोपयुक्ते न ब्रह्मविज्ञानं प्रपंचप्रविलयो वा जायेत।
नन्वावेदिते ब्रह्मणि तद्विज्ञानविषयः प्रपंचविलयविषयो वा नियोगः स्यात्। न निष्प्रपंचब्रह्मात्मतावेदनेनैव तत्सिद्धेः। रज्जुस्वरूपप्रका
शनेनैव हि तत्स्वरूपविज्ञानमविद्याध्वस्तसर्पादिप्रपंचप्रविलयश्च भवति। न च कृतमेव पुनः क्रियते। नियोज्योऽपि च प्रपंचावस्थायां यो
ऽवगम्यते जीवो नाम स प्रपंचपक्षस्यैव वा स्यात्। ब्रह्मपक्षस्यैव वा। प्रथमे विकल्पे निष्प्रपंचब्रह्मात्मत्वप्रतिपादनेन पाषाणादिवज्जी
वस्यापि प्रविलापितत्वात् कस्य प्रपंचप्रविलये नियोगः। अथैतत्कस्य वा नियोगनिष्ठतया प्राप्तो सोऽवास्तव उच्येत। द्वितीयेऽपि ब्रह्मैवानियोज्यस्व
भावं जीवस्य स्वरूपं॥ जीवत्वं त्वविद्याकृतमेवेति प्रतिपादिते ब्रह्मणि नियोज्याभावान्नियोगाभाव एव॥

वैयर्थ्यं सिद्धस्य विधिना कर्तुमयोगादित्याह। नेति। एवंविधप्रमाभावान्नियोगाभावमुक्त्वा नियोज्याभावान्नियोगाभावमाह। नियोज्योऽपि चेति। प्रपंचान्तर्भू
तो ब्रह्मरूपो वेत्यर्थः॥ आद्ये जीवनाशाद्विध्ययोगः द्वितीये नियोज्यासिद्धिः॥

शा०सू०भा०३ । तर्हि ज्ञाने विधिप्रत्ययानां का गतिरित्यत आह । द्रष्टव्यादिश्रुतय इति । ननु श्रुतं ज्ञानं स्वफलात्तत्त्वं धनवत्पारार्थ्य विधिः किमिति कल्प्यत इत्यत आह । ज्ञानस्य
३७ पुरुषबुद्ध्यसाध्यत्वादित्याह । ज्ञेयाभिमुखस्यापीति । किंच ज्ञानं विधिबाधादिना तेषु अज्ञाकरूपं वेदांतैर्ज्ञापयतीयं विधिमानमवबोधो विधित्वाभावो गतः । तथा
च वेदांतैरेव ज्ञानोत्पत्तेर्विध्यानर्थक्यमित्याह । तस्मादिति । तं ज्ञानार्थिनं प्रतीत्यर्थः । ननु तत्त्वं ज्ञानमन्यथा कर्तुं विधिरर्थवानिति नेत्याह । नचेति । न

द्रष्टव्यादिशब्दा अपि परविद्याधिकारपठितास्तत्त्वाभिमुखीकरणप्रधाना न तत्त्वावबोधविधिप्रधानाः ॥ लोकेपीदं पश्येदमाकर्णयेति
चैवंजातीयकेषु निर्देशेषु प्रणिधानमात्रं कुर्विल्युच्यते न साक्षात् ज्ञानमेव कुर्विति । ज्ञेयाभिमुखस्यापि ज्ञानं कदाचिज्जायते । तस्मात्तं प्रति ज्ञा
नविषय एव दर्शयितव्यो ज्ञापयितुकामेन । तस्मिन् दर्शिते स्वयमेव यथाविषयं यथाप्रमाणं च ज्ञानमुत्पद्यते । नच प्रमाणांतरेणान्यथाप्रसिद्धेर्थे
न्यथाज्ञानं नियुक्तस्याप्युपपद्यते । यदि पुनर्नियुक्तोहमित्यन्यथा ज्ञानं कुर्यात् । नतु तत् ज्ञानं किंतर्हि मानसी सा क्रिया स्वयमेव चेदन्यथोत्पद्येत भ्रां
तिरेव स्यात् । ज्ञानं तु प्रमाणजन्यं यथाभूतविषयं च न नियोगशतेनापि कारयितुं शक्यते । नच प्रतिषेधशतेनापि वारयितुं शक्यते । नहि तत्
पुरुषतंत्रं । वस्तुतंत्रमेव हि तत् । अतोपि नियोगाभावः ॥ ३७

त्वनग्नियोषिदिति प्रत्यक्षप्रमाणादुत्पन्नमपि ज्ञानं तामग्निं ध्यायेदिति विधिनान्यथा क्रियत इत्यत आह । यदीति । अस्य ध्याधीः कृतिसाध्या
चेत्क्रियैव वह्निरिति धीर्नैव चेद्भ्रांतिरेवातो मानं विना विधितो ज्ञानासिद्धेर्मानवस्तुतंत्रे ज्ञाने विधिर्मुधेत्यर्थः ॥ ॥

वेदांतेषु विधिवादिनोऽभ्युपगमदूषणमस्तीत्याह। किंचान्यदिति। अपरस्मात्मैकेन नियोगे च वेदांतवाक्यसमन्वयप्रमाणमात्रं कार्यभेदात् द्वावपि भेदौ विरुद्धावित्याप्रामाण्य
मेवेति दूषयति। अप्येतस्मादिना। किंच श्रुतं ब्रह्म न श्रुतो विधिर्वेदांतेषु तत्कल्पने च कर्मजन्यत्वान्मोक्षस्यानित्यत्वसातिशयत्वादिप्रसंग इत्याह। नियोगप
रतायां चेति फलितमाह। अतश्चेति॥ इदानीं प्रौढवादेन नियोगमंगीकृत्य तदेकत्वं खंडयति। अभ्युपगम्यमानेऽपीति भिन्नः किमेकवाची शब्दः

किंचान्यत् नियोगनिष्ठतयैवमप्येवं सत्याभ्युपगतत्वं नियोगस्य ब्रह्मणश्च त्वं जीवस्य तत्प्रमाणकमेव स्यात् अप्रशस्तमेव नियोगस्य
ब्रह्मात्मत्वमाचक्षीत। तदवबोधे च पुरुषं नियुंजीत। ततो ब्रह्मशास्त्रस्यैकस्य द्व्यर्थपरता विरुद्धार्थपरता च प्रसज्येयाताम्। नियोगपरतायां च
श्रुतहानिरश्रुतकल्पना कर्मफलवन्मोक्षस्य दृष्टफलत्वम् अनित्यत्वं चेत्येवमादयो दोषाः न केनचित् परिहर्तुं शक्याः। तस्मादवगति
निष्ठान्येव ब्रह्मवाक्यानि न नियोगनिष्ठानि। अतश्चैक नियोगप्रतीतेरेकवाक्यतेत्ययुक्तम्। अभ्युपगम्यमानेऽपि च ब्रह्मवाक्येषु नियो
गसद्भावे तदेकत्वं निष्प्रपंचोपदेशेषु सप्रपंचोपदेशेषु च सिद्ध्यति। नहि शब्दांतरादिभिः प्रमाणैः नियोगभेदेऽवगम्यमाने सर्वेष्वेको नियो
ग इति शक्यमाश्रयितुम्॥

शब्दांतरं यथा यजति ददाति जुहोतीति॥ तथेहापि वेद उपासीतेति शब्दभेदः। निर्गुणसगुणरूपभेदः प्रकरणभेदः अभ्युदयफलभेद इत्येतैः प्रमाणैर्नि
र्गुणज्ञानसगुणोपासनाविषयकनियोगभेद इत्यर्थः — — — —

कुर्यात् स्वर्गांगितया कर्मसु प्रवृत्तियोगी कथं तत्राह। प्रयोजेति। एकस्यैव स्वर्गकामस्य संगप्रधानाधिकारात् तत्तत्फलापूर्वैक्यादेकवाक्यते पर्यायः॥ इहा
पि निर्गुणसगुणविषयोरेकाधिकारित्वे योगैकमस्तु नेत्याह। न विहितमुक्त्युभयसाधर्म्ये इत्यस्मिन् विरुद्धधर्मविषययोरंगांगित्वायोगात् तत्र तियो
गैक्यं। न च निर्गुणविद्यानियोग एक एव सगुणविद्यानंगीकारादिति वाच्यं। अहो विपरीतं शाण्डिल्यमुख्यतः विध्ययोग्यविद्यायां विधियोग्यायां

प्रयाजदर्शपूर्णमासवाक्येषु अधिकारांशे नाभेदबुद्धेरुत्कर्षे कल्प्यं। नहि सगुणनिर्गुणचोदनासु कश्चिदेकस्याकारांशोऽस्ति॥ नहि भारूप
त्वादयो गुणाः प्रपंचविलयोपकारिणः नापि प्रपंचविलयो भारूपत्वादिगुणोपकारी परस्परविरोधित्वात् नहि कृत्स्नप्रपंचप्रविलापनं
प्रपंचैकदेशापेक्षणं च एकस्मिन् धर्मिणि युक्तं समावेशयितुं॥ तस्मादस्मदुक्त एव विभाग आकारवदनाकारोपदेशो नायुक्ततर इति॥

न विधिरिति तस्मात्साकारवाक्यानामाकारलयद्वारा निर्गुणवाक्यैकवाक्यतागतिरसङ्गतिरेव किंतु तेषां कल्पिताकारो गतिस्तदुपासनयाभ्युदयसि ३८
द्धेः निर्गुणवाक्यार्थानां तु परमार्थालंबनत्वमित्यस्मदुक्त एव विभागः साधीयानित्युपसंहरति॥ तस्मादिति।

ब्रह्मणो निर्विशेषचिन्मात्रत्वमुक्त्वा सर्वनिषेधावधित्वेन सद्रूपत्वमाह प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः पृथिव्यप्तेजो भूतत्रयं
मूर्तं वाय्वाकाशद्वयममूर्तमिति राशिद्वयमुक्त्वा भूतद्वयस्यामूर्तस्य सारः कारणात्मा हिरण्यगर्भः परामृष्टः तस्मिन्सूर्यमण्डले पुरुषोऽध्यात्मं दक्षिणे
ऽक्षिणि पुरुष उक्तः। तस्य चासनामयानि स्वरूपाणि तद्यथा माहारजनं वासो यथा पाण्ड्वाविकं यथेन्द्रगोप इत्युपमाभिरुक्तानि विचित्राणि तत्र माहार

प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः॥ ॥द्वे वाव ब्रह्मणो रूपे मूर्तं चैवामूर्तं चेत्युपक्रम्य पंच महाभूतानि द्वैराश्येन प्रविभज्यामू-
र्तरसस्य च पुरुषशब्दितस्य माहारजनादीनि रूपाणि दर्शयित्वा पुनः पठ्यते। अथात आदेशो नेति नेति न ह्येतस्मादिति नेत्यन्यत्परमस्ती-
ति

जनं हरिद्राक्तमाविकं वस्त्रं माहारजनं पाण्डुरविकमतिधवलं कंबलादिकं चित्तु श्रुतिमुपलक्षणं कृत्वा सूक्ष्माणि पंच भूतान्यमूर्तानि पंचीकृतानि
मूर्तानि तत्रत्यामूर्तरसस्योक्त्या करणानां पंचभौतिकत्वं सिद्धमिति ध्यायते। अप्यसत्यदात्मकप्रपंचोऽनन्तरं अथात आदेश इत्यस्य निषेधार्थत्वा-
न्नेतिनेतीति निषेधेनोपदेशः क्रियत इत्यर्थः। नेतिशब्दार्थमाह। न हीति। एतस्मादात्मनोऽन्यन्नास्तीति नेतीत्युच्यत इत्यर्थः। शून्यतानिरासार्थं परं
ब्रह्मास्तीति विशिनष्टीत्यर्थः॥

शा॰ सू॰ भा॰ र॰ अत्र निषेध्यविशेषानुपलंभात् संशयमाह। तत्र कोस्येत्यादिना। नञ्प्रयोगस्तु नकारस्येतिशब्दोपस्थापितवस्तुनिषेधकत्वादित्यर्थः। इतिशब्देनि-
३९ षेध्यसामान्यसमर्पणे विशेषाकांक्षायां प्रकरणाद्रूपद्वयस्य रूपिब्रह्मणश्च निषेध्यत्वभानात् संशयमुक्त्वा पूर्वोक्तं निर्विशेषं ब्रह्म नास्तीत्याक्षेपसंग-

तत्र कोस्य प्रतिषेधस्य विषय इति जिज्ञास्यते। न ह्यत्रेदं तदिति विशेषितं किंचित्प्रतिषेध्यमुपलभ्यते इतिशब्देन त्वत्र प्रतिषेध्यं किमपि स-
मर्प्यते नेति नेतीति इतिपरत्वान्नञ्प्रयोगस्य इतिशब्दश्चायं संनिहितालंबनः एवंशब्दसमानवृत्तिः प्रयुज्यमानो दृश्यते। इति ह स्मोपाध्या-
यः कथयतीत्येवमादिषु। सन्निहितं चात्र प्रकरणसामर्थ्याद्रूपद्वयं सप्रपंचं ब्रह्मणः। तच्च ब्रह्म यस्य ते द्वे रूपे। ततश्च नः संशयो जायते। किमयं प्र-
तिषेधो रूपे रूपवच्चोभयमपि प्रतिषेधति। आहोस्विदेकतरं। यदाप्येकतरं तदापि किं ब्रह्म प्रतिषेधति रूपे परिशिनष्टि। आहोस्विद्रूपे प्र-
तिषेधति ब्रह्म परिशिनष्टीति। तत्र प्रकृतत्वाविशेषादुभयमपि प्रतिषेधतीत्याशंकामहे। द्वौ चैतौ प्रतिषेधौ द्विर्नेतिशब्दप्रयोगात्। तयो-
रेकेन सप्रपंचं ब्रह्मणो रूपं प्रतिषिध्यते ऽपरेण रूपवद्ब्रह्मेति भवति मतिः। अथवा ब्रह्मैव रूपवत्प्रतिषिध्यते॥ तद्धि वाङ्मनसातीतत्वाद-
संभाव्यमानसद्भावं प्रतिषेधार्हं न तु रूपप्रपंचः प्रत्यक्षगोचरत्वात्प्रतिषेधार्हः। अभ्यासस्त्वादरार्थ इति॥ ॥ ॥ ॥ ३९

त्यापूर्वपक्षयति तत्र प्रकृतत्वेति पूर्वपक्षे तत्पदार्थाभावाद्वाक्यार्थभेदासिद्धिः। सिद्धान्ते तत्सिद्धिरिति फलं। निरधिष्ठाननिषेधादर्शनात्सर्वनिषे-
धो न युक्त इत्यरुच्या प्रपंचब्रह्मनिषेधद्वयमाह। अथवेति। एकब्रह्मण एव निषेधेन कारणद्वयस्यापि न रूपमित्यत आह। अभ्यासस्त्विति॥ ॥

इत्यस्त्वमेव तावत्सिद्धांतमुपक्रमते। एवमिति। शून्यप्रसंगदूषणमितिवदंतं प्रत्याह। किंचिद्धीति। तच्चेति। प्रतिषेधनमित्यर्थः। अधिष्ठानानव
शेषे तस्य मारूपहेत्वभावाद्विशेषविधयाकाशादिप्रमा न स्यात्। इदमत्र नास्तीति लोके निषेधस्य साधिष्ठानस्यैव प्रमितिदर्शनादित्यर्थः। किं च यद्गति तत्सदित्यु
त्सर्गस्याभावापि भावाधिष्ठानप्रमितिरपवादः तया पूर्वभानस्य भ्रमत्वनिश्चये नाप्युत्सर्गापलापात् अपवादात्मकाकारेत्त्वुत्सर्गतः प्रपंचस्य सत्त्वापत्तेः

एवंप्राप्ते ब्रूमः। न तावदुभयप्रतिषेध उपपद्यते। शून्यवादप्रसंगात्। किंचिद्धि परमार्थमालंब्यापरमार्थः प्रतिषिध्यते। यथा रज्ज्वादिषु सर्पादयः
तच्च परिशिष्यमाणं कस्मिंश्चिद्भावेऽवकल्पते। उभयप्रतिषेधे तु कोऽन्यो भावः परिशिष्येत। अपरिशिष्यमाणे चान्यस्मिन्य इतरः प्रतिषेद्धुमार
भ्यते तस्यैव परमार्थत्वापत्तेः प्रतिषेधानुपपत्तिः। नापि ब्रह्मप्रतिषेध उपपद्यते। ब्रह्म ते ब्रवाणीत्याद्युपक्रमविरोधात्। असन्नेव स भवति। असद्ब्र
ह्मेति वेद चेदित्यादिनिंदाविरोधात्। अस्तीत्येवोपलब्धव्य इत्यवधारणविरोधात्। सर्ववेदांतव्याकोपप्रसंगाच्च। वाङ्मनसातीतत्वमपि ब्रह्मणो
नाभावाभिप्रायेणाभिधीयते। नहि महता परिकरबंधेन ब्रह्मविदाप्नोति परं सत्यं ज्ञानमनंतं ब्रह्मेत्येवमादिना वेदांतेषु ब्रह्म प्रतिपाद्य तस्यैव पुन
रभावोऽभिलप्येत। प्रक्षालनाद्धि पंकस्य दूरादस्पर्शनं वरमिति हि न्यायः। प्रतिपादनप्रक्रिया त्वेषा यतो वाचो निवर्तंते अप्राप्य मनसा सहेति। एत
दुक्तं भवति। वाङ्मनसातीतमविषयांतःपाति प्रत्यगात्मभूतं नित्यशुद्धबुद्धमुक्तस्वभावं ब्रह्मेति तस्माद्ब्रह्मणो रूपप्रपंचं प्रतिषेधति परिशिनष्टि
ब्रह्मेत्यवगंतव्यं॥

निषेधानुपपत्तिरित्याह। अपरिशिष्यमाणे चेति। अधिष्ठानसत्त्वं विना भ्रांतिनिषेधयोरयोगात् शून्यवादे न मुक्तिरित्युक्त्वा पूर्ववादिनः पुसांत
रं दूषयति। नापीति। देहात्माभिमानवल्लौकिकमानगम्यत्वे तस्य निषेधो युक्तो न वेदांतप्रमितब्रह्मण इति भावः। यदुक्तं वाङ्मनसातीतत्वान्निषेधार्हं

ब्रह्मेति तत्राह वाङ्मनसेति। ब्रह्मणो वागाद्यतीतत्वं निषेधा
र्थं न चेत्किमर्थं तर्हि श्रुतिरित्यत आह। प्रतिपादनेति॥

ऽकार्यैः संयोगो न भवति। तदेतद्द्वितीयं देवाव ब्रह्मणो रूपे इति रूपद्वयस्यैवाप्रधान्येन प्रकृतत्वान्नेतीतीति निषेध इत्यर्थः। नन्वादित्यमण्डले पुरुष इति ब्रह्मणः प
शा॰ सं॰ भा॰ २ रप्राधान्येनोक्तमिति शंकां पुरुषो लिंगात्मा मूर्तामूर्तरसत्वश्रुतेस्तज्जनितत्वभानात् स्वप्रधानवत्वश्रुतेश्चेत्याह। तज्जनितमेवेति। रूपद्वयोरभेदश्च:
४० ननु ब्रह्मणोऽप्यरूपमेव किमिति रूपमीयते प्रसिद्धरूपमेव किं न स्यादित्यत आह। अमूर्तरसस्येति। रूपद्वयस्यैवाप्राधान्येन प्रकृतत्वे फलितमाह। तदि

तदेतदुक्तो प्रकृतैतावत्त्वं हि प्रतिषेधतीति प्रकृतं यदेतावत् परिच्छिन्नं मूर्तामूर्तलक्षणं ब्रह्मणो रूपं तदेष शब्दः प्रतिषेधति। तद्धि प्रकृतं प्र
पंचितं पूर्वस्मिन्ग्रन्थे। अधिदैवतमध्यात्मं च तज्जनितमेव च वासनालक्षणमपरं रूपममूर्तरसभूतं पुरुषशब्दाभिधेयं लिंगात्मव्यपाश्रयं महार
जनाद्युपमाभिर्दर्शितममूर्तरसस्य पुरुषस्य च सत्यस्य स्वरूपमोविशेषानुपपत्तेः तदेतत्सप्रपंचं ब्रह्मणो रूपं सन्निहितालंबनेनेतिकरणेन प्रति
षेधकेन नञ् प्रत्युपनीयत इति गम्यते। ब्रह्मणस्तु रूपविशेषणेन षष्ठ्या निर्दिष्टं पूर्वस्मिन्ग्रन्थे न स्वप्रधानत्वेन। प्रपंचिते च तदीये रूपद्वये रूपवतः
स्वरूपजिज्ञासायामिदमुपन्यस्तं। अथात आदेशो नेति नेतीति। तत्र कल्पितरूपप्रत्याख्यानेन ब्रह्मणः स्वरूपावेदनमिदमिति निर्णीयते। त
दास्पदं हीदं समस्तं कार्यं नेति नेतीति प्रतिषिद्धं। युक्तं च कार्यस्य वाचारंभणशब्दादिभ्योऽसत्त्वमिति नेति नेतीति प्रतिषेधनं॥ ॥ ४०

ति। प्रतियोगित्वेन समर्प्यत इत्यर्थः। न चार्थतः प्राधान्यात् ब्रह्मणोऽपि निषेधः राज्ञो भृत्यो नास्तीत्यत्र राजनिषेधप्रसंगादिति भावः। किं च ब्रह्मणः प्रति
षेधत्वान्न निषेध इत्याह। प्रपंचिते चेति। ननु ब्रह्मणि विधिरुक्तस्याप्यवस्थागस्थितिसंभवात्कथं कल्पितत्वमित्यत आह। तदास्पदमिति। ऽपादानेऽपि निषिद्धस्या
न्यत्र न स्थितिरित्यर्थः। यत्तु द्वैतनिषेधे प्रमाणाभावादि विरोध इति तत्राह। युक्तं चेति। स्थापितं हि वाचारंभणाधिकरणे प्रत्यक्षादेर्व्यावहारिकं प्रामाण्यं न तत्त्वावे

[illegible]

ननु वस्तुत्वात् द्वैतवत् ब्रह्मणोपि निषेधः स्यादित्याशङ्क्याह । नहीति । द्वैतभावाभावसाक्षित्वात् द्रष्टुर्न निषेध इत्यर्थः । न चेत्सादिरूपशब्दार्थपदद्वयोर्निषेधाभ्यां
रूपं रूपि ब्रह्म च निषिध्यते इति तत्राह । द्वौ चैताविति । द्वे रूपे विधेयार्थे तांसंख्यासाम्येन यथाक्रमसंबंध इति न्यायो यथासंख्यमनुदेशः समानामिति

ननु ब्रह्मणः सर्वकल्पनामूलत्वात् न चात्रेयमाशङ्का कर्तव्या कथं हि शास्त्रं स्वयमेव ब्रह्मणो रूपद्वयं दर्शयित्वा स्वयमेव प्रतिषेधति प्रक्षालना
द्धि पङ्कस्य दूरादस्पर्शनं वरमिति । यतो नेदं शास्त्रं प्रतिपाद्यत्वेन ब्रह्मणो रूपद्वयं निर्दिशति । लोकप्रसिद्धं त्विदं रूपद्वयं ब्रह्मणि कल्पितं परामृ
शति प्रतिषेध्यत्वाय शुद्धब्रह्मस्वरूपप्रतिपादनाय चेति निरवद्यं । द्वौ चैतौ प्रतिषेधौ यथासंख्यन्यायेन द्वे अपि मूर्त्तामूर्त्ते प्रतिषेधतः यद्वा पूर्वः प्रति
षेधो भूतराशिं प्रतिषेधति उत्तरो वासनाराशिं । अथवा नेति नेतीति वीप्सेयमितीतिमावत् किंचिदुत्प्रेक्ष्यते तत्सर्वं न भवतीत्यर्थः । यदि नाम न प्रतिषेधं
हि किं प्रमाणं यदि नैतत् ब्रह्म किमन्यत्तर्हि ब्रह्म भवेदिति जिज्ञासा स्यात् । वीप्सायां तु समस्तस्य विषयजातस्य प्रतिषेधाद्विषयः प्रत्यगात्मेति जिज्ञा
सा निवर्त्तते । तस्मात्प्रपञ्चमेव ब्रह्मणि कल्पितं प्रतिषेधति परिशिनष्टि ब्रह्मेति निर्णयः । इतश्चैष एव निर्णयः । यतस्ततः प्रतिषेधाद्भूयो ब्रवीति श्रु
त्यन्यत्परमस्तीति अभावावसाने हि प्रतिषेधे किं प्रमाणे किमन्यत्परमस्तीति ब्रूयात् । तत्रैषा स्वरसोऽऽदेशो नानेति नेतीति ब्रह्मणो द्विरूपतमेवादेशं पुनर्निर्वि
क्ति नेति नेतीत्यस्य कोऽर्थः न ह्येतस्मात् ब्रह्मणो व्यतिरिक्तमस्तीति अतो नेतीत्युच्यते । न पुनः स्वयमेव नास्तीत्यर्थः ।। ।। ।।

पाणिसूत्रमिदमुक्तं नात्र रूपद्वयोर्द्वयोर्न निषेधः द्वयविधिरित्यर्थः । वीप्सापक्षे सर्वद्वैतस्य निषेधाज्जिज्ञासाशान्तिरिति विशेषमाह । परिगणितेति । मूर्त्तं नाम मू
र्त्तेनित्येव विशिष्य निषेधे जिज्ञासा न शाम्यतीत्यर्थः सूत्रशेषं व्याचष्टे । इतश्चेति । प्रतिषेधानुपपत्त्या ब्रह्मास्तीत्यवगतं भूयः पुनः परमस्तीति श्रुतिः साक्षाद्

 तच्चेति। अवशिष्टं अतेलर्थः। स्पष्टमन्यत्। नन्वग्राह्यत्वाद्ब्रह्म नास्तीति शंकानिरासार्थं सूत्रं व्याचष्टे यत्तदिति निषिद्धादिति रूपाद्यभावादव्यक्तमिंद्रियाग्राह्यं
५१ न त्वसत्वादित्यर्थः। अन्यैर्देवैरिंद्रियांतरैर्न गृह्यत इत्यत इत्यन्वयः। तर्हि कदाप्यग्राह्यमिति शंकोत्तरं सूत्रमारभति। अपि चैनमिति। चस्त्वर्थः। इंद्रियैरगृह्य
तत्वं दर्शयति अन्तस्सरमप्रतिषिद्धं ब्रह्मास्तीति। यदा पुनरेवमस्तु एतिप्योमंते नह्येतस्मादिति नेति नेति प्रपंचप्रतिषेधरूपादेशनादन्यत्परमादे-
शनं ब्रह्मणोऽस्तीति तदा ततो ब्रवीति च भूमपदस्येन नामधेयं विनिर्मिमीते तत्संज्ञं अथ नामधेयं सत्यस्य सत्यमिति। प्राणा वै सत्यं तेषामेष सत्य-
मिति हि ब्रवीतीति। तच्च ब्रह्मावसाने प्रतिषेधे समंजसं भवति अभावावसाने तु प्रतिषेधे किं सत्यस्य सत्यमित्युच्येत तस्माद्ब्रह्मावसानोऽयं प्र-
तिषेधो नाभावावसान इत्यध्यवस्यामः॥ तदव्यक्तमाह हि। यत्तत्प्रतिषिद्धप्रपंचजातादन्यत्परं ब्रह्म तदस्ति चेत्कस्मान्न गृह्यत इत्यत आह।
तदव्यक्तमनिंद्रियग्राह्यं सर्वदृश्यसाक्षित्वात्। आह ह्येवं श्रुतिः। न चक्षुषा गृह्यते नापि वाचा नान्यैर्देवैस्तपसा कर्मणा वा। स एष नेति नेत्यात्मा
अगृह्यो न हि गृह्यते यत्तदद्रेश्यमग्राह्यं यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयने इत्याद्या। स्मृतिरपि। अव्यक्तोऽयमचिंत्योऽयम-
विकार्योऽयमुच्यत इत्याद्या॥ ॥ अपि संराधने प्रत्यक्षानुमानाभ्यां। अपि चैनमात्मानं निरस्तसमस्तप्रपंचमव्यक्तं संराधनकाले पश्यं- ५१
ति योगिनः। संराधनं भक्तिध्यानप्रणिधानाद्यनुष्ठानं कथं पुनरवगम्यते संराधनकाले पश्यंतीति प्रत्यक्षानुमानाभ्यां श्रुतिस्मृतिभ्यामित्यर्थः
तेऽपि तु संराधनेन शास्त्रसंस्कृतमनसेत्यर्थः। भक्तिध्यानाभ्यां प्रत्यगात्मनि क्रियते प्रकर्षेण निधानं स्थापनं प्रणिधानं नतपनमस्कारादिरादिश

स्वयंभूरीश्वरः खानीन्द्रियाणि पराञ्चि अनात्मग्राहकाणि कृत्वा प्रत्यगात्माहितया न तु हि तेषां गाढोपदस्रद्ध्या हितया सृष्टं तं तस्मात्तेषां तथा
स्वभावात्सर्वो लोकः पराग्रूपमेव पश्यति नान्तरात्मानं कश्चित्तु धीरो धीमानावृत्तचक्षुर्निरुद्धेन्द्रियः शुद्धचित्तः सन् प्रत्यगात्मानं ह्यैक्षत् पश्यति मोक्षा
र्थीत्यर्थः। ततः कर्मणा विशुद्धचित्तो ज्ञानाभ्यासलोकेन्द्रियेण ध्यानमन्तं निष्कलं पश्यतीत्यर्थः। वितमस्काः तत्र हेतुर्जितश्वासत्वं सात्वप्राणनिष्टलं सुजां

तथा हि श्रुतिः पराञ्चि खानि व्यतृणत्स्वयंभूः तस्मात्पराङ् पश्यति नान्तरात्मन्। कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्व।
मिच्छन्निति ज्ञानप्रसादेन विशुद्धसत्त्वः ततस्तु तं पश्यति निष्कलं ध्यायमान इति चैव माया। ननु सराधसंराधस्यतिरपि पेविनिद्र
जितश्वासाः सन्तुष्टाः संयतेन्द्रियाः। ज्योतिः पश्यन्ति ते स्वात्मनि॥ ॥ सूक्ष्मांशादिवचोवैरोष्यप्रकाशश्च कर्मण्यभ्यासात् यथाऽकाशाक
ाशस्य विततस्य घटमठगुलिकाकोटरकमण्डल्वादिषु कर्मरूपाधिभूतेषु सावयवविशेषाद्वा वभासन्ते। न चस्य स्वाभाविको विशेषोऽस्ति तं जनितं हानि। एव
मुपाधिनिमित्तश्चैवाप्यात्मभेदः स्वतस्त्वेकात्म्यमेव। तथा हि वेदान्ते घटाभासे नाऽऽकाशजीवयोर्भेदः प्रतिपाद्यते अतो नं तेन तथा हि
लिंगे अतः स्वाभाविकत्वाद्भेदस्याविद्याकृतत्वाच्च भेदस्याविद्यापाठविद्या विधयाजीवः परेणानन्तेन साहैकत्वं गच्छति। तथा हि लिंगं स यो
ह वै तत्परं ब्रह्म वेद ब्रह्मैव भवति। ब्रह्मैव सन् ब्रह्माप्येतीत्यादि॥
मा ध्याहि नः योगलभ्यः आत्मा योगात्मा यथाकाशादयः उपाधिभिन्नं ते न तत्त्वतः एवं प्रकारश्चिदात्मापि ध्यानादिकर्मरूपाद्यौपाधिकतेस्व
तत्त्वस्याद्वैतैष्यमेकत्वमेव तत्त्वमसीत्यभ्यासादिति सूत्रयोजना। जीवस्य ब्रह्मात्मत्वफलश्रुतिरूपलिंगादपि भेद औपाधिक एवेत्याह सूत्रे

शा.सू.भा.३ भेदाभेदपूर्वपक्षसूत्रद्वयस्य संगतिमाह तस्मिन्नेवेति। यथाहित्वेनाभेदः कुंडलाद्यवस्थापन्नविशेषस्य कुंडलत्वेन भेदस्तथा जीवस्य ब्रह्म
५२ त्वेनाभेदो जीवत्वेन भेदः यद्वा सूर्यप्रकाशयोरेकतेजस्त्वधर्मावच्छेदेन भेदाभेदवज्जीवपरमात्मनोश्चिदचित्त्वेनात्मत्वधर्मेणाभेदाभेदौ श्रुतिबलात्स्वी

॥ उभयव्यपदेशात्त्वहिकुंडलवत्॥ तस्मिन्नेव संराधकभावे मतांतरमुपन्यस्यति स्वमतविशुद्धये क्वचिज्जीवप्राज्ञयोर्भेदो व्यपदि
श्यते ततस्तु तं पश्यते निष्कलं ध्यायमान इति ध्यातृध्यातव्यत्वेन द्रष्टृद्रष्टव्यत्वेन च परात्परं पुरुषमुपैति दिव्यमिति गंतृगंतव्यत्वेन यः
सर्वाणि भूतान्यंतरो यमयतीति नियंतृनियंतव्यत्वेन। क्वचित्तु तयोरेवाभेदो व्यपदिश्यते। तत्त्वमसि अहं ब्रह्मास्मि अयमात्मा सर्वांतर एष त आत्मांत
र्याम्यमृत इति। तत्रैवमुभयव्यपदेशे सति परात्तेरस्यैकात्म्यमुच्यते। भेदव्यपदेशो निरालंबन एव स्यात्। अतः उभयव्यपदेशदर्शनादहिकुं
डलवदत्र तत्त्वं भवितुमर्हति। यथाहिरित्यभेदः कुंडलाभोगप्रांशुत्वादीनीति भेदः। एवमिहापीति॥ ॥ प्रकाशाश्रयवद्वा तेजस्त्वात्॥
॥ अथवा प्रकाशाश्रयवदेतत्प्रतिपत्तव्यं यथा प्रकाशः सावित्रः तदाश्रयश्च सविता नात्यंतभिन्नौ उभयोरपि तेजस्त्वाविशेषात्। अथ भे
दव्यपदेशभाजौ भवतः एवमिहापीति॥ ॥ ५२

कापीविति सूत्रद्वयार्थः। कुंडलत्वं वलयाकारत्वं आभोगत्वं वक्राकारत्वं प्रांशुत्वं दीर्घदंडाकारत्वं उन्नतमुखत्वं आदिशब्दार्थः॥ ॥

सिद्धांतसूत्रं पूर्ववदिति । धर्मभेदेनैकधर्मिणो वा भेदाभेदस्वीकारे भेदस्य सत्त्वादभेदवादनिवृत्तिः स्यात् एकत्रैव भेदाभेदस्वीकारे लोके विरोध

पूर्ववत् ॥ यथा पूर्वमनुक्तं तं प्रकाशादिवच्चावैशेष्यमितिततथैवेतद्द्रष्टुमर्हति । तथा ह्यविद्याकृतत्वाद्बंधस्य विद्यया मोक्ष उपपद्यते । यदि पुनः परमार्थत एव बद्धः कश्चिदात्मा हि कुंडलत्वमापन्नपरस्या लनः स स्यान्न ततः प्रकाशाप्रवृत्तमेन न वेद देशभूतो प्रपगमेत । न तत्परमार्थ रूपस्य व धस्पति रस्यन्तेमहा ता सत्वा सज्जस्यैव पर्यंवसज्जेत । न चात्रोभावपि भेदाभेदौ श्रुतिस्तुल्यवद्व्यपदिशति । अभेदमेव हि प्रतिपाद्य त्वेन निर्दिशति । भेदं तु पूर्वप्रसिद्धमेवानुवदति अर्थांतरविवक्षया । तस्मात्प्रकाशवद्वैशेष्यमित्येव एव सिद्धांतः ॥ प्रतिषेधाच्च ॥ इतश्चैव एव सिद्धांतः यत्कारणं परस्मात्मनोऽन्यं चेतनं प्रतिषेधति शास्त्रं नान्योऽतोऽस्ति द्रष्टेत्येवमादि अथात आदेशो नेति नेति । तदेतद् ब्रह्मापूर्वमनन्त परमनंतरमबाह्यमित्येव च ब्रह्मव्यतिरिक्तप्रपंचनिराकरणात् ब्रह्ममात्रपरिशेषाच्चैवमेव सिद्धांत इति गम्यते ॥

कथोच्छेदइत्यपि इष्टमंतस्मान्निप्रपंचं चिदेकरसं ब्रह्मतत्सदलक्षणमस्तीति सिद्धं ॥

यदुक्तं नेत्यादिश्रुतिभिः ब्रह्मातिरिक्तं वस्तु निषिध्यत इति तदयुक्तं सेत्वादिश्रुतिभिर्वस्त्वंतरस्यास्तित्वभानादित्याक्षिपति । परमइति । यद्यपि द्युभ्वाद्य
धिकरणे सेतुशब्दो विधारकत्वेन गौणो व्याख्यातः । तथाप्युन्मानादिश्रुतीनां गतिमजानतोयं पूर्वपक्षः । तत्रोन्मानादिश्रुतीनां मुख्यत्वात्सद्वयं ब्रह्मे
तिफलं सिद्धांते तु ब्रह्माद्वितीयमतसद्वलक्ष्यसिद्धिरिति विवेकः । अत्र सद्वयं सेतुत्वात्तल्लौकिकसेतुवत् तीर्णत्वश्रुतेसाध्यः । सेतुं तीर्त्वेति जांगलं प्राप्त इव पि ब्र

परमतः सेतून्मानसंबंधभेदव्यपदेशेभ्यः ॥ यदेतन्निरस्तसमस्तप्रपंचं ब्रह्म निर्धारितं । अस्मात्परमन्यत्तत्त्वमस्ति नास्तीति श्रुतिविप्रतिपत्तेः
संशयः । कानिचिद्धि वाक्यान्यापातेन प्रतिभासमानानि ब्रह्मणोपि परमन्यत्तत्त्वं प्रतिपादयंतीव तेषां हि परिहारमभिधातुमयमुपक्रमः । कि
मतो । परं ब्रह्मणोन्यत्तत्त्वं भवितुमर्हति । कुतः सेतुव्यपदेशात् । उन्मानव्यपदेशात् । संबंधव्यपदेशात् । भेदव्यपदेशाच्चेति । सेतुव्यपदेश
स्तावत् । अथ य आत्मा स सेतुर्विधृतिरित्यात्मशब्दाभिहितस्य ब्रह्मणः सेतुत्वं संकीर्तयति । सेतुशब्दो हि लोके जलसंतानविच्छेदकरे का
ष्ठपाषाणादौ प्रसिद्धः । इह तु सेतुशब्द आत्मनि प्रयुक्त इति लौकिकसेतोरिवात्मसेतोरन्यस्य वस्तुनोस्तित्वं गमयति । सेतुं तीर्त्वेति च तरतिशब्द
प्रयोगात् । यथा लौकिकं सेतुं तीर्त्वा जांगलमसेतुं प्राप्नोति गम्यते । एवमात्मानं सेतुं तीर्त्वानात्मानमसेतुं प्राप्नोतीति गम्यते । उन्मानव्यपदेश
श्च भवति । तदेतत् ब्रह्म चतुष्पादष्टाशफं षोडशकलमिति । यच्च लोके उन्मितमेतावदिदमिति परिच्छिन्नं कार्षापणादि ततोन्यद्वस्त्वस्तीति प्रसि
द्धं । तथा ब्रह्मणोप्युन्मानात्ततोन्येन केनचिद्वस्तुना भवितव्यमिति गम्यते ॥ ४३

मिति विवेकः । गतमपुरोदेशो जांगलं इह तु देशमात्रं ग्राह्यमिति द्रष्टव्यं । तत्र कलात्मकाश्चत्वारः पादाः । पृथिव्यंतरिक्षं द्यौः समुद्र इत्यनंतवान्नाम पादः
अग्निः सूर्यश्चंद्रो विद्युदिति ज्योतिष्मान्नाम पादः । चक्षुः श्रोत्रं वाङ्मन इत्यायतनवान्नाम पाद इति चतुष्पाद्ब्रह्म नामरूपात्मकत्वात् अष्टाशफं प्रत्येकं पादेषु
चतुष्प्रत्येकं चतस्रः कला इति षोडशकलमित्यर्थः । षोडशपणपरिमितं ताम्रकार्षापणसंज्ञं भवति । तद्वत् ब्रह्म परिमितत्वादित्यर्थः ॥ ॥

संबंधित्वात्सुतगरवदिताह । तथा सर्वं घेति श्यमदमितातिः । असंख्यातमित्यर्थः । अस्मदर्थे अत्यन्तेन मितत्वनियमादिति मंतव्यं भेदेनोक्तत्वाद्
घटवदिदिताह । भेदव्यपदेशाच्चेति । अस्मात्सिद्धस्यामुनादित्यस्थे न मस्ते इति पावत । आधारतोऽतिदेशात्तस्य भेदव्यपदेशो वेधितो पितमाह । तावधिकं चे
तथा सर्वं व्यपदेशो भवति । एतत्तासोम्य तदा संपन्नो भवतीति शारीरस्यात्मा प्राज्ञेनात्मना संपरिष्वक्त इति च मितानां च मितेन संबंधो दृष्टः ।
प्रधानराणामन्यारेणाजीवानां ब्रह्मणा सर्वं धं व्यपदिशति सुषुप्तौ । अत स्तानतः परमन्यदमितमस्तीति गम्यते । भेदव्यपदेशाच्चेन मर्थं गम्यते
। तथा हि य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यत इत्यादित्याधारमीश्वरं व्यपदिश्य ततो भेदेनाक्ष्याधारमीश्वरं व्यपदिशति । अथ य एषोऽक्षिणि
पुरुषो दृश्यत इति । अतिदेशं चास्यामुना रूपादिषु करोति तस्यैतस्य तदेव रूपं यदमुष्य रूपं यावमुष्य गेष्णौ तौ गेष्णौ यन्नाम तन्नामेति । सावधि
कं चेश्वरत्वमुभयोर्व्यपदिशति । ये चामुष्मात्पराञ्चो लोकास्तेषां चेष्टे देवकामानां चेत्यधिकस्य । येचैतस्मादर्वाञ्चो लोकास्तेषां चेष्टे मनुष्यकामा
नां चेत्येकस्य । यथेदं मागधस्य राज्यमिदं वैदेहस्येति । एवमेभ्यः सेत्वादिव्यपदेशेभ्यो ब्रह्मणः परमस्तीत्येवं प्राप्ते प्रतिपद्यते सामान्यात्तु ॥ ॥
तु शब्देनास्मदर्शितान्शंकितां निरुणद्धि । न ब्रह्मणोऽन्यत्किंचिद्वस्तु भवितुमर्हति प्रमाणाभावात् । न ह्यन्यस्यास्तित्वे किंचित्प्रमाणमुपलभामहे । सर्वस्य हि ज
नि मतो वस्तुजातस्य जन्मादि ब्रह्मणो भवतीति निर्धारितं । अनन्यत्वं च कारणात्कार्यस्य । न च ब्रह्मव्यतिरिक्तं किंचित् जं संभवति । सदेव सोम्येद
मग्र आसीदेकमेवाद्वितीयमित्यवधारणात् । एकविज्ञानेन च सर्वविज्ञानप्रतिज्ञानान्न ब्रह्मव्यतिरिक्तवस्त्वस्तित्वमवकल्प्यते ॥ ॥
तिसिद्धं तत्सूत्रं व्याचष्टे तु शब्देनेत्यादिना । यदप्युक्तं सेत्वादिव्यपदेशाद्भावात्कार्यस्य ब्रह्मणोऽन्यस्यानिर्णयाच्चेत्युक्तान्तद्विदितीयः प्रायुक्त
त्वेतेरवधारणादित्याह । न च ब्रह्मव्यतिरिक्तमिति । इत्थं नु मानानां मागमानां वा धृत इति भावः

इत्यं स्मारयित्वा हेतूनामसिद्धिमाह। ननु सेतुत्वादिना किं सेतुत्वमुत्सापरसिद्धिरर्थ्या ह्यात्मा ह्यसङ्ग इत्यसङ्गत्वोक्तेरयं शङ्कते। नत्वपरस्मिन्नितीति। सेतुत्वलिं-
गेनाङ्कितेत्यत्र श्रुतिबाधनमन्याप्यमित्याह। न चेति। लिङ्गत्वासिद्धमित्याह। अपि चेति। विधारकत्वं तु कल्पितं द्वितीयापेक्षमपि पुरस्तादिति भावः।

ननु सेतुत्वादिव्यपदेशाः ब्रह्मव्यतिरिक्तं तत्त्वं सूचयन्तीत्युक्तं नेत्युच्यते सेतुव्यपदेशस्तावन्न ब्रह्मणो बाह्यस्य सद्भावं प्रतिपादयितुं समर्थते। से-
तुरन्येनेत्याह नातः परमस्तीति। तत्र परस्मिन्नसति सेतुत्वं नावकल्प्यते इति परं किमपि कल्प्येत। न चैतन्न्याय्यं दृष्टोऽप्यप्रसिद्धकल्पना। अपि च
सेतुव्यपदेशाद्वात्मनो लौकिकसेतुनिदर्शनेन सबाह्यवस्तुतां प्रसज्यमानामप्रसङ्गत्वमानपि शास्त्रं स्थित न चैतन्न्याय्यं। अजत्वादिश्रुतिविरोधात्।
सेतुसामान्यात्तु सेतुशब्दप्रयोगनियुक्त इति श्लिष्यते। जगतस्तन्मर्यादानां च विधारकत्वं सेतुसामान्यमात्मनः। अतः सेतुरिव सेतुरिति प्र-
कृतश्रुत्या मात्रपरे। सेतुं तीर्त्वेत्यपि तरतिरतिक्रमार्थं भवितुमर्हति। सर्व एव व्रजन्ति। यथा व्याकरणं तीर्ण इति प्राप्य इत्युच्यते। नातिक्रमस्त-
द्वत्॥ ॥बुद्ध्यर्थः पादवत्॥ यदप्युक्तमुन्मानव्यपदेशादस्ति परमिति। तत्राभिधीयते। उन्मानव्यपदेशोऽपि न ब्रह्मव्यतिरिक्तवस्त्वस्तित्व-
प्रसिद्ध्यर्थः। किमर्थस्तर्हि बुद्ध्यर्थः उपासनार्थ इति यावत्। चतुष्पादष्टशफं षोडशकलमित्येवंरूपा बुद्धिः कथं नाम ब्रह्मणि स्थिरा स्यादिति
विकारेण ब्रह्मण उन्मानकल्पनेव क्रियते। न ह्यविकारेऽनन्तेन ब्रह्मणि सर्वैः पुंभिः शक्या बुद्धिः स्थापयितुं मन्दमध्योत्तमबुद्धित्वात् पुंसामिति पाद- ४४
वत्। यथा मनआकाशयोरध्यात्ममधिदैवतं च ब्रह्मप्रतीकयोराम्नातयोश्चत्वारो वागादयो मनसः संबन्धिनः पादाः कल्प्यन्ते। चत्वारश्चाग्न्याद्य-
श्चाकाशसंबन्धिनः आध्यानाय तद्वत्॥ ॥
गौणो हेतुरप्यसिद्ध इत्याह। सेतुं तीर्त्वेति। परिमितत्वमप्यसिद्धमित्याह। बुद्ध्यर्थ इति। वाक्प्राणचक्षुःश्रोत्राणि मनसः पादाः। अग्निवाय्वादित्यदि-
शश्चाकाशस्य पादाः ध्यानार्थं कल्पिताः। तद्ब्रह्मण उन्मानमित्यर्थः॥

लौकिकं दृष्टांतमाह। अथवेति। पादकल्पनां विनापि व्यवहारः किं न स्यादित्यत आह। नहीति। कार्षापणस्य व्यवहारो यथा पादकल्पनया विना न तथं दृषिमा।
ध्यानव्यवहाराय ब्रह्मणश्चतुष्पात्त्वकल्पनेत्यर्थः। संबंधभेदे कल्पितो। न सल्लक्षितो यत्साधको ऽत्राह। स्थानेति। स्थानमुपाधिर्बुद्ध्यादिः एकस्मिन्नेवोपाधि
॥ अथवा पादवदिति। यथा कार्षापणे पादविभागो व्यवहारप्रसिद्ध्यर्थमेव कल्प्यते। नहि सकले नैव कार्षापणेन सर्वदा सर्वे जना व्यवहर्तुमीशते। क्रय
विक्रये परिमाणानि यस्मात् तद्वदित्यर्थः। स्थानविशेषात् प्रकाशादिवत्॥ ॥ इह सूत्रे द्वयोरपि व्यपदेशयोः परिहारोऽभिधीयते। यदुक्तं संबं
धव्यपदेशाद्भेदव्यपदेशाच्च परमतः स्यादिति। तदप्यसत्। यत एकस्यापि स्थानविशेषापेक्षया एतौ व्यपदेशावुपपद्येते। संबंधव्यपदेशो
तावदयमर्थः। बुद्ध्याद्युपाधिस्थानविशेषयोगादुद्भूतस्य विशेषविज्ञानस्योपाध्युपशमे य उपशमः स परमात्मना संबंध इत्युपमोपादानाय
थैकस्य प्रकाशस्य सौर्यस्य चांद्रमसस्य वोपाधियोगादुपजातविशेषस्योपाध्युपशमात् संबंधव्यपदेशो भवति। उपाधिभेदाच्च भेदव्यपदेशः
। यथा वा सूचीपाशाकाशाद्युपाध्यपेक्षयैवैतौ भेदव्यपदेशौ भवतः॥

नाभिन्नस्योपाधिंशोनो समासं संबंध उपचर्यते। यथा हैरण्यलोकादेरंगुल्याद्युपाधिनाभिन्नस्योपाधियोगे महालोकाद्यात्मनां संबंधोपचारस्तद्
न्ततथा दिस्य च सूर्यस्य स्थानयोर्भेदाद्विराण्यपुरुषं भेदकल्पनेत्यर्थः॥ ॥ ॥ ॥

शा॰ सू॰ भा॰ ३

८५

मुख्यावेव संबंधभेदौ किं न स्यातामित्यत्र सूत्रं। उपपत्तेश्चेति। स्वरूपेण ब्रह्मजीवयोः संबंधो भेदनिवृत्तिरूपो युज्यते न तु रत्नस्य संयोगादिः
वस्तुद्वयासत्त्वात्तथा भेदोपि न स्वान्तरात्मक श्रुतेरित्यर्थः। ननु द्वितीयाभावे सर्वगतत्वश्रुतिविरोध इत्यत आह। अनेन सर्वगतत्वमिति। द्वितीयस्य संचोदे
उपपत्तेश्च॥ ॥उपपद्यते चात्रेदृश एव संबंधो नान्यादृशः। स्वमपीतो भवतीति स्वरूपसंबंधमेनमामनंति। स्वरूपस्य चानपायित्वात् न नष्टरत्न
गत्यागमेन संबंध उपपद्यते। उपाधिकृतस्वरूपतिरोभावात्तु स्वमपीतो भवतीत्युपपद्यते। तथा भेदोपि नान्यादृशः संभवति। बहुतरश्रुतिप्रसि
द्धैकेश्वरत्वविरोधात्। तथा च श्रुतिः॥ एकस्याप्याकाशस्य स्थानकृतं भेदव्यपदेशमुपपादयति। योयं बहिर्धा पुरुषादाकाशो योयमन्तः पुरुष आका
शो योयमन्तर्हृदय आकाश इति। तथान्यप्रतिषेधात्। एवं सेत्वादिव्यपदेशान्परपक्षहेतूनुन्मथ्य संप्रति स्वपक्षं हेत्वन्तरेणोपसंहरति। तथान्य
प्रतिषेधादपि न ब्रह्मणः परं वस्त्वन्तरमस्तीति गम्यते। तथाहि। स एवाधस्तात्। अहमेवाधस्तात्। आत्मैवाधस्तात्। सर्वं तं परादाद्योन्यत्रात्मनः सर्वं वे
द। ब्रह्मैवेदं सर्वं नेह नानास्ति किंचन यस्मात्परं नापरमस्ति। तदेतद्ब्रह्मापूर्वमनपरमनाद्यमित्येवमादीनि वाक्यानि स्वप्रकरणस्थान्यनन्यार्थत्वेन परि
णेतुमशक्यानि ब्रह्मव्यतिरिक्तं वस्त्वन्तरं वारयंति। सर्वांतरश्रुतेश्च न परमात्मनोन्योंतरात्मास्तीत्यवगम्यते॥ ॥अनेन सर्वगतत्वमायाम
शब्दादिभ्यः। अनेन सेत्वादिव्यपदेशनिराकरणेनान्यप्रतिषेधसमाश्रयणेन च सर्वगतत्वमप्यात्मनः सिद्धं भवति। अन्यथा हि तन्न सिध्येत्।
सेत्वादिव्यपदेशेषु मुख्येष्वंगीक्रियमाणेषु परिच्छेद आत्मनः प्रसज्येत। सेत्वादीनामेवमात्मकत्वात्। तथान्यप्रतिषेधेप्यसति वस्तु वस्त्वंत
राद्व्यावर्तत इति परिच्छेद आत्मनः प्रसज्येत। सर्वगतत्वं चास्यायामशब्दादिभ्योवगम्यते। आयामशब्दो व्याप्तिवचनः। यावान्वा अयमाकाशस्तावाने
षोन्तर्हृदय आकाशः। आकाशवत्सर्वगतश्च नित्यः। ज्यायान् दिवो ज्यायानाकाशात्। नित्यः सर्वगतः स्थाणुरचलोयं सनातनो। हि श्रुतिस्मृ
त्यादिभ्यो ब्रह्मणोल्पतास्मात्पञ्चाप्यसद्रूपस्तेन दत्त्वमिति श्रुतेः किंच निरवयवासंग ब्रह्मणः सत्त्व तिन्यायाः सर्वगतत्वमात्मनोवबोधयंति॥ ॥

पंचसंबंधप्रयोगात् तत्त्वेव सर्वगतत्वश्रुतिविरोध इति भावः॥ अधिष्ठानेनाध्यस्तं जगदात्मसंबध्यते तत्र रज्ज्वा
भ्रामसर्पवदितिन्यायः। ८५

एवं तत्परत्वं संशोध्य वाक्यार्थमाह । फलमत उपपत्तेः । निर्विशेषत्वादन्यः स्वभावः फलहेतुत्वाख्यः । इष्टं सुखं देवादीनाम् अनिष्टं दुःखं नारकिणां
व्यामिश्रं मनुष्याणां संसारो जन्मप्रतिप्रवाहः गोचरः आश्रयो यस्य तत्संसारगोचरं । अत्र कर्मेश्वरयोः फलहेतुत्वश्रुतेः संशयमाह किमिति । अत्र पू
र्वपक्षे फलदातुरीश्वरस्य तत्सर्ववाच्यस्यासिद्धेर्लेस्यासिद्धिः । सिद्धान्ते तत्सिद्धिरिति फलभेदः । पूर्वोक्तनिर्विशेषत्वमुपजीव्य फलदातृत्वमपीश्वर

फलमत उपपत्तेः । तस्यैव ब्रह्मणो व्यावहारिक्यामीशित्रीशितव्यविभागावस्थायामयमन्यः स्वभावो वर्ण्यते यदेतदिष्टानिष्टव्यामिश्रलक्ष
णं कर्मफलं संसारगोचरं त्रिविधं प्रसिद्धं जन्तूनां किमेतत्कर्मणो भवत्याहोस्विदीश्वरादिति भवति विचारणा । तत्र तावत्प्रतिपद्यते । फल
मतः ईश्वराद्भवितुमर्हति । कुतः उपपत्तेः । स हि सर्वाध्यक्षः सृष्टिस्थितिसंहारान्विचित्रान्विदधद्देशकालविशेषाभिज्ञत्वात्कर्मिणां कर्मानुरूपं फलं
संपादयतीत्युपपद्यते । कर्मणस्त्वनुक्षणविनाशिनः कालांतरभावि फलं भवतीत्यनुपपन्नं । अभावाद्भावानुत्पत्तेः । स्यादेतत् कर्म विन
श्यत्स्वकालमेव स्वानुरूपं फलं जनयित्वा विनश्यति । तत्फलं कालांतरितं कर्त्रा भोक्ष्यत इति । तदपि न परिशुध्यति । प्राक् भोक्तृसंबंधा
त्फलत्वानुपपत्तेः । यत्कालं हि यत्सुखं दुःखं वात्मना भुज्यते तस्यैव लोके फलत्वं सिद्धं । न ह्यसंबद्धस्यात्मना सुखस्य दुःखस्य वा फल
त्वं प्रतिपन्ति लौकिकाः ॥

स्य नास्तीति पूर्वपक्षे व्याख्यानात्संगतिः । यद्यपि सर्वगतत्वमस्य लक्षणत्वं व्यवहारदशायां सिध्यति तथापि कर्मण एव फलदातृत्वमिति शंकानिरासे
नो फलस्यार्थे निर्वाहकवाक्यार्थनिर्णयार्थमस्याधिकरणस्यारंभ इति मन्तव्यं । तं तावदाह तत्रेत्यादिना । स्वर्गादिकं विशिष्टदेशकालकर्माभिज्ञ
दातृकं कर्मफलत्वात् सेवाफलवत् इत्युपपत्तिः । मायादिकिं यास्यं कर्मनाशवत्त्वात् किं न किं स्वनाशफलं जनयति उत तत्फलं कर्ता पालयतीत्याह
स्विदपूर्वात्फलसिद्धिः नाघटत्वाह । अभावादिति द्वितीयं शंकते स्यादिति । कर्मनाशक्षणमारभ्य न भविष्यत्फलस्य सुखादिसत्त्वेमानेनास्तीति दूषयति

शा॰स॰भा॰३

४६

स्त्वीयं शंकते। अपेति। अपूर्वं किं स्वतन्त्रमेव फलदानाय प्रवर्तते चेतनाधिष्ठितं वा नाद्य इत्याह। तदपीति। द्वितीये त्वदृष्टानभिज्ञजीवस्याधिष्ठातृत्वायोगा
दीश्वरस्याधिष्ठातृत्वसिद्धिरिति भावः। स्वेष्टवादेन पूर्वेण साक्षी सिद्ध इत्याह। न दृष्टिरित्यु इति। स्वामिकृपागादेः श्रुतत्वागोदिहेतुत्वानुपपत्तात्स्वाप्यपूर्वसिद्धिरिति
चेन्न कर्मभिराराधितादीश्वरादेव तस्यापि फलसिद्धेरित्यर्थः। केवलं तर्केणापूर्वं न सिध्यतीति भावः। कृतात्ययेनुशयवानिति सूत्रोक्तदृष्टानभिय दृहस्मातीय
च्युपे चेत। कर्मकार्यादपूर्वात्फलमुत्पद्यत इति तदपि नोपपद्यते। अपूर्वस्याचेतनस्य काष्ठलोष्ठसमस्य चेतनेनाप्रवर्तितस्य प्रवृत्त्यनुपपत्तेः तद
स्तित्वे एव प्रमाणाभावात्। अर्थापत्तिः प्रमाणमिति चेन्न। ईश्वरसिद्धेरर्थापत्तिक्षयात्॥ श्रुतत्वाच्च॥ ॥ न केवलमुपपत्तेरेवेश्वरं फलहेतुं क
ल्पयामः किं तर्हि श्रुतत्वादीश्वरमेव फलहेतुं मन्यामहे। तथा च श्रुतिर्भवति। स वा एष महानज आत्मान्नादो वसुदानः इत्येवं जातीयका॥ धर्मं जैमिनिरत
एव॥ ॥ जैमिनिस्त्वाचार्यो धर्मं फलस्य दातारं मन्यते। अत एव हेतोः श्रुतेरुपपत्तेश्च श्रूयते तावदयमर्थः। स्वर्गकामो यजेतेत्येवमादिषु वाक्येषु
तत्र च विधिश्रुतेर्विषयभावोपगमाद्यागः स्वर्गस्योत्पादक इति गम्यते। अन्यथा ह्यननुष्ठातृकोपागमापद्येत। तत्रास्योपदेशवैयर्थ्यं स्यात्। नन्वस्य
णविनाशिनः कर्मणः फलं नोपपद्यत इति परित्यक्तोयं पक्षः। नैष दोषः। श्रुतिप्रामाण्यात्। श्रुतिश्चेत्प्रमाणं यथायं कर्मफलसंबंधः श्रुत उपपद्य
ते तथा कल्पयितव्यः। न चानुत्पाद्य किमप्यपूर्वं कर्म विनश्यत्कालान्तरितं फलं दातुं शक्नोति। अतः कर्मणो वा सूक्ष्मा काचिदुत्तरावस्था फलस्य वा
पूर्वावस्थाऽपूर्वं नामास्तीति तर्क्यते। उपपद्यते चायमर्थः उक्तेन प्रकारेण। ईश्वरस्तु फलं ददातीत्यनुपपन्नं॥

चरणा इत्यादिश्रुतिस्मृतिभिरपूर्वसिद्धिरित्येताभिरीश्वरस्यापि फलदातृत्वस्वीकार्यमित्याह। श्रुतत्वाच्चेति सूत्रकारः। अत्रेमाः समन्तात्प्राणिभ्योऽन्नं ददातीत्यन्नादः
वसुदानो धनदाता। कर्मिणोऽपूर्वस्य जडत्वेनोपकरणमात्रत्वात्स्वतंत्र ईश्वर एव फलदातेति सिद्धान्तो दर्शितः। इदानीं पूर्वपक्षयति धर्ममिति। विधिश्रुतिर्वि
धायार्थः। तस्य लिङ्‌र्थस्य प्रेरणात्मनो यागो विषय इत्यादिना यागः स्वर्गहेतुरिति गम्यते। यागस्येष्टसाधनत्वाभावे प्रेरणानुपपत्तेरित्यर्थः। अपूर्वेऽ

पूर्वं तु बादरायणो हेतुव्यपदेशात्॥

४६

ईश्वरः किं कर्मानपेक्षः फलं ददाति तत्सापेक्षो वा आद्य आह अविचित्रस्येत्यादिना । द्वितीये संबन्धे छन्नसंस्कारमात्रात्कृतादेवेष्टनवत्कर्मणो ह्यपि देव
फलसिद्धेः किमीश्वरेणेति भावः । अत्र वर्णयन्ति । चन्दनकृष्टकारिदृष्टसंपन्नैव सुरवादिसंभवे हन्त धर्माधर्मावामिति श्रुतिस्मृतिबलात्तदपेक्षा
पामीश्वरेण किमपराद्धं अतः ईश्वरानपेक्षात्केवलात्कर्मणः फलमित्युक्तमिति सिद्धान्तयति । पूर्वं त्विति । अचेतनस्य कर्मणः स्वतः प्रवृत्त्ययोगात् स्ते

अविचित्रस्य कारणस्य विचित्रकार्यानुपपत्तेर्वैषम्यनैर्घृण्यप्रसंगात् तदनुष्ठानवैयर्थ्यापत्तेश्च तस्मादीश्वरादेव फलमिति पूर्वं तु बादरायणो
हेतुव्यपदेशात् बादरायणस्त्वाचार्यः पूर्वोक्तमेवेश्वरं फलहेतुं मन्यते केवलात्कर्मणोऽपूर्वाद्वा केवलात्फलमित्ययं पक्षस्तुशब्देन व्यावर्त्य
ते । कर्मापेक्षादपूर्वापेक्षाद्वा यथास्तु ईश्वरात्फलमिति सिद्धान्तः कुतः हेतुव्यपदेशात् । धर्माधर्मयोरपि हि कारयितृत्वेनेश्वरो हेतुर्व्यपदिश्य
ते । फलस्य च दातृत्वेन एष ह्येव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषते । एष उ एवासाधु कर्म कारयति तं यमधो निनीषत इति स्मर्य
ते चायमर्थो भगवद्गीतासु । यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति । तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहं स तया श्रद्धया युक्तस्तस्याराध
नमीहते । लभते च ततः कामान्मयैव विहितान्हि तानिति सर्ववेदान्तेषु चेश्वरहेतुका एव सृष्टयो व्यपदिश्यन्ते । तदेव चेश्वरस्य फलहेतुत्वं
। यत्स्वकर्मानुरूपाः प्रजाः सृजति विचित्रकार्यानुपपत्त्यादयोऽपि दोषाः कृतप्रयत्नापेक्षत्वादीश्वरस्य न प्रसज्यन्ते इति श्रीमच्छारीरकमीमां
साभाष्ये शंकरभगवत्पादकृतौ तृतीयस्याध्यायस्य द्वितीयः पादः ॥ ॥

वादिदृष्टान्तानुसारिश्रुतेर्बलीयस्त्वात् सर्ववेदान्तेष्वीश्वरस्य जगद्धेतुत्वश्रुतेश्चेश्वराधिष्ठितात्कर्मणो जगदन्तःपातिफलसिद्धिरिति समुदायार्थः ।
इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीगोविन्दानन्दभगवत्कृतौ शारीरकमीमांसाभाष्यरत्नप्रभायां तृतीयस्याध्यायस्य द्वितीयः पादः ॥ श्रीसदाशिवः ॥

शा. सू. भा. ३ श्रीमंगलमूर्त्तये नमः ॥ ॐ ॥ मार्च्छीं इष्टांतनाम्नापतिलकस्वामिनं मुदे । विघ्नेशं विघ्नविध्वस्त्यै प्रणमामि मुहुर्मुहुः ब्रह्मस्वरूपं निर्द्धार्य तत्
४७ ज्ञानसाधनोपासनास्वरूपमाह । सर्ववेदांतप्रत्ययं चोदनाद्यविशेषात् । पादसंगतिमाह व्याख्यातमिति । पूर्वपादे तत्त्वंपदार्थविवेकः कृतः । इह
तत्फलवाक्यार्थज्ञानमानंदादयः प्रधानस्येति सूत्रेण पुनरुक्तापेक्षितपदतत्वार्थसमाहारेण निर्धार्यत इति फलफलीभावः संगतिः स्मृ [illegible]

ॐ सर्ववेदांतप्रत्ययं चोदनाद्यविशेषात् । आरभ्यातं विशेषस्य ब्रह्मणः तत्त्वंइदं नीतु प्रतिवेदांतं विज्ञानानि भिद्यंते न वेति विचार्यते ननु वि
ज्ञेयं ब्रह्मपूर्वोपाधिरहितं एकरसं सैंधवघनवदवधारितं तत्र कुतो विज्ञानभेदाभेदचिंतावकाशः । नहि कर्मवद्बहुत्वकृत ब्रह्मबहुत्वमपि वेदां
तेषु प्रतिपिपादयिषितमिति शंकां वक्तुं । ब्रह्मण एकत्वात् एकरूपत्वाच्च ॥ ॥

ण वाक्यार्थविद्याचिंतातु न हि द्यानां चिंतैक्यप्रकारेण निर्गुण ज्ञानसाधनत्वाक्षिप्यत इति मंतव्यं । संप्रति निर्गुणज्ञानं भेदाभेदविचारविषयत्वे
नोक्तमिति मन्वान आक्षिपति । नन्विति । वेद्यभेदे विद्याभेदचिंतास्यात् । ब्रह्मणस्तु वेद्यस्यैकत्वान्न चिंतावसर इत्यर्थः । अस्यैवैतदपि धर्मभेदाच्चिंतेत्यत ४७

एकरूपेपि ब्रह्मण्यनेकप्रकारसंभवाद् इदं शंकेत तत्राह न चेत्यादिना पूर्वपक्षे ज्ञानभेदं शंक्यानुपपत्तिमुक्त्वा चोदनाद्यभेदहानाभेद इति सि
द्धांतोप्युक्तः इत्याह नाप्यस्येति सर्वपादारंभमाक्षिप्य समाधत्ते तदुच्यत इति सगुणविद्यास्वेव भेदाभेदचिंता क्रियते निर्गुणविद्यासु तैक्यसिद्धेर्नि

न चैकरूपे ब्रह्मण्यनेकरूपाणि विज्ञानानि संभवंति न ह्यन्यथार्थोऽन्यथा ज्ञानमिति भ्रांतं भवति यदि पुनरेकस्मिन् ब्रह्मणि बहूनि
विज्ञानानि वेदांतांतरेषु प्रतिपिपादयिषितानि तेषामेकमभ्रांतं भ्रांतानीतराणीत्यनाश्वासप्रसंगो वेदांतेषु तस्मान्न तावत्प्रतिवेदांतं ब्रह्म
विज्ञानभेद आशंकितुं शक्यते नाप्यस्य चोदनाद्यविशेषादभेद उच्यते ब्रह्मविज्ञानस्याचोदनालक्षणत्वात् अविधिप्रधानैर्हि वस्तुप
र्यवसायिभिर्ब्रह्मवाक्यैर्ब्रह्मविज्ञानं जन्यत इत्यवोचदाचार्यः तत्तु समन्वयादिति। अत्र तत्कथमिमां भेदाभेदचिंतामारभत इति तदुच्यते
सगुणब्रह्मविषया प्राणादिविषया चेयं विज्ञानभेदाभेदचिंतेत्यदोषः

तिवाच्यार्थरूपगुणोपसंहारमात्रं क्रियते वाक्यार्थनिर्णयायेति भावः पंचाग्निप्राणदहरशांडिल्यवैश्वानरादिविद्याभिर्यो भिन्ना इति नानाश्रु
त्यादिभेदादिसर्वत्र स्पष्टं। अत्र तु भिन्ना भिन्नाः किं प्रतिशाखं भिद्यंते न वेति नामादिभेदाच्चोदनाद्यविशेषाच्च संशयः पूर्वपक्षे विद्याभेदाद्गुणा
नुपसंहारः सिद्धांते त्वभेदादुपसंहार इति फलभेदः

शा.सू.भा.२
४८ एवंतंत्रे शाखांतराधिकरणे पूर्वपक्षसूत्रं नामरूपधर्मविशेषपुनरुक्तिनिंदाशक्तिसमाप्तिवचनप्रायश्चित्तान्यार्थदर्शनाच्छाखांतरेकर्मभे
दः स्यादिति तत्रोक्ता हेतवो नामादयो विद्याभेदस्यापीहोच्यंते अथैष ज्योतिरथैष सर्वज्योतिरिति तेन सहस्रदक्षिणेन यजेतेत्यत्र प्रकृतज्योतिष्टोमा
अत्र हि कर्मवदुपासनानां भेदाभेदौ संभवतः कर्म च हेतुचोदनासत्त्वान्निर्दिष्टफलान्यदृष्टफलानि चोच्यंते कर्ममुक्तिफलानि कानिचित्सम
ग्दर्शनोत्पत्तिद्वारेण तेषां चिंता संभवति किं प्रतिवेदांतं विज्ञानभेदः स्यादाहोस्विदभेद इति तत्र पूर्वपक्षहेतवस्तावदुपन्यस्यंते नाम्नस्तावद्भेदप्रति
पत्तिहेतुत्वं प्रसिद्धं ज्योतिरादिषु अस्ति चात्र वेदांतांतरविहितेषु विज्ञानेषु अन्यदन्यन्नाम तैत्तिरीयकं वाजसनेयकं कौथुमकं शाट्यायनक
मित्येवमादि तथा रूपभेदोऽपि कर्मभेदस्य प्रतिपादकः प्रसिद्धः वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनमित्येवमादिषु अस्ति चात्र रूपभेदः यथ
था केचिच्छाखिनः पंचाग्निविद्यायां षष्ठमपरमग्निमामनंति अपरे पुनः पंचैव पठंति तथा प्राणसंवादादिषु केचिदूनान्वागादीनामनं
ति केचिदधिकान् तथा धर्मविशेषोऽपि कर्मभेदस्य प्रतिपादक आशंकितः कारीर्यादिषु अस्ति चात्र धर्मविशेषः यथाथर्वणिकानां
शिरोव्रतमिति एवं पुनरुक्त्यादयोऽपि भेदहेतवो यथासंभवं वेदांतांतरेषु योजयितव्याः तस्मात्प्रतिवेदांतं विज्ञानभेद इति॥ ॥ ४८

नुवादेन सहस्रदक्षिणरूपगुणविधिमाशंक्य ज्योतिरिति पदस्य कर्मांतरनामत्वसंभवे ज्योतिष्टोमलक्षकत्वायोगादयेति॥ ॥

प्रकरणविच्छेदाज्ज्योतिष्टोमात्कर्मांतरं विशिष्टदक्षिणाकं विधीयत इति नाम्नः कर्मभेदकत्वमुक्तं ज्योतिरादिषिलादिपदेनाद्यर्थवंहौत्रमि
तिसंज्ञाभेदात्कर्मभेदो ग्राह्यः तप्ते क्षीरे दध्याक्षिप्तं कठिनमामिक्षा तत्र द्रवं जलरूपं वाजिनमिति भेदः तप्ते पयसि दध्यानयति सा वैश्वदेव्या
मिक्षा वाजिभ्यो वाजिनमिति तत्र वैश्वदेवआमिक्षायागे वाजिनाख्यगुणविधिः वाजिभ्य इति विश्वेदेवानुवादादिति शंकायां मिक्षांप्रलुपस्
जीनत्वेनोक्तविश्वेदेवानां वाजिभ्य इत्यनुवादासंभवात् उत्पत्तिशिष्टामिक्षावरुद्धे कर्मणि वाजिनद्रव्यस्यानाकांक्षितत्वाद्विध्ययोगाद्वाजिदेवताको
वाजिनयागः कर्मांतरमिति द्रव्यदेवतास्वरूपभेदात्कर्मभेदः सिद्धांतितः ग्रहादिपदार्थेद्रव्यदेवे द्रव्यपद इति द्रव्यभेदाद्यागभेदो ग्राह्यः एव
मिहापि पंचाग्निषडग्निरूपभेदाद्विद्याभेदो वाजिष्ठस्तोमयोः तथा रेतोमूत्रादानाख्यो दमः छंदोगैः सहिता वाजिनामिति शाखाविद्याभेदः कारी
रीवाध्ययने तैत्तिरीयकाणां भूमौ भोजनं धर्मविशेषो नान्येषां अंगाध्ययने केषांचिदुपाध्यायार्थमुदकुंभाहरणं धर्मो नान्येषां मध्यमे
ध्याध्ययने अश्वघासानयनं केषांचिद्देवतान्येषां नचतावता कारीयादीनि कर्माणि धर्मविशेषमपेक्षंते नापेक्षंते चेति युक्तमतो धर्मवि
शेषात् शाखांतरे कर्मभेदः शंकितः तस्याथर्वणिकाध्ययने केषांचिद्देवशिरस्यंगारपात्रधारणरूपं व्रतं नान्येषामिति विद्याभेदः स्या
त्पुनरुक्तिरभ्यासः यथा समिधो यजति तनूनपातं यजतीति यजत्यभ्यासात्प्रयाजानां भेदः कर्मांतरत्वं न शाखांतरेभ्यासाद्विद्याभेदः अ
दिपदाग्निहोत्रादिग्रहः प्रातःप्रातरनृतं ते वदन्ति पुरोदयाज्जुह्वति येऽग्निहोत्रमिति अनुदितहोमस्य पदुदिते तस्य यं प्रातर्जुहुयात् यथाग्निहोत्रेप्र
दुताप भूत्या पावसथा पाहार्थं हरंतिता दगेव तदिलुदितहोमस्य च निंदाश्रुते भेदः एकस्यैवोदितेनुदिते वोनुष्ठानासंभवात् न चोदि

तानुदितहोमातिक्रमकृतप्रायश्चित्तादग्निहोत्रभेदः शंकितः एतेनेंद्राग्न्यप्रायश्चित्ते वेदांतविद्यास्तु न विद्यंते इति नोदाहृयेते यथा सर्वशाखा
विहितस्य कर्मणो ज्ञातुकर्तृवा ऽशक्तिभेदः तथा सर्ववेदाध्ययनज्ञानाद्यशक्तेस्तच्छेदेनतविद्याभेदः स्यात् तथा शाखानां सर्वासामेकरू
पास्मा हि नीयते किं तु कस्याश्चित्कुचित्कर्मणि समाप्तिरतः समाप्तिवचनभेदात्प्रति शाखं कर्मभेदः शंकितः तथा कस्यचिद्देवतासोंकार
सावित्रीसमाप्तिः कस्यचिन्मन्त्रैरिति विद्याभेदः अन्यार्थदर्शनमर्पवाद्दस्त्वे दर्शकर्मभेदवद्द्विधाभेदः इति पूर्वपक्षस्तन्नोक्ताहेतवो दर्शि
तास्तेके चित्सिद्धांते पूर्वपक्षे चानोपयुज्यंत इति तथा शाखांतराभ्यासस्त्वा प्रगुणामक्तिमाताम न धेमा निकर्मभेदकानि तत्र नामधेयं गुणो
रूपमभ्यासश्चेति त्रयं आख्यातं पतेदृधा स्नु कुर्यादिति प्रकृतिशब्दभेदेन धात्वर्थभेदात्तत्र वाछिन्नभावनाख्य कर्मभेदकं तस्मान्नवेदोपास्त
हुत्यादिशब्दभेदाद्द्विधाभेदः तिस्र आहुतीर्जुहोतीति संख्यया कर्मभेदवद्वागुणो संवर्गविद्विति संख्यया संवर्गविद्याभेदः स्यात्
निसाग्निहोत्र प्रकरणात् प्रकरणांतरेऽकुंडपायिनामयने मासमग्निहोत्रं जुहोतीति श्रुतमग्निहोत्रं प्रकरणांतरस्थं लोकर्मांतरमिति सिद्धांति
तं तथा चेवेदांता॥

सिद्धांतपतिः। एवमिति सर्वैर्वेदांतैः प्रतीयंत इति सर्ववेदांतप्रत्ययानि तैर्विहितानीत्यर्थः उक्तन्यायादिभिरग्निहोत्रादिकर्मणां प्रतिशाखं
भेदे प्राप्ते शाखांतराधिकरणसिद्धांतसूत्रं एकं वा संयोगरूपचोदनाख्याविशेषादिति तत्र चोदना विधायकः शब्दः स्वोदितः प्रयत्नो वा लक्षः

एवं प्राप्ते ब्रूमः सर्ववेदांतप्रत्ययानि विज्ञानानि तस्मिंस्तस्मिन् वेदांते तानि तान्येव भवितुमर्हंति कुतश्चोदनाद्यविशेषात् आदिग्रहणेन
गुणग्रहणं शाखांतराधिकरणसिद्धांतसूत्रोदिता अभेदहेतवो दर्श्यंते संयोगरूपचोदनाख्याविशेषादित्यर्थः यथैकस्मिन्नग्निहोत्रे शा
खाभेदेपि पुरुषप्रयत्नः तादृश एव चोद्यते जुहुयादिति एवं यो ह वै ज्येष्ठं च श्रेष्ठं च वेदेति वाजसनेयिनां छांदोग्यानां च तादृश्येव चोद
ना प्रयोजनसंयोगोप्यविशिष्ट एव ज्येष्ठश्च श्रेष्ठश्च स्वानां भवतीति रूपमप्युभयत्र तदेव विज्ञानस्याभिधानं ज्येष्ठश्रेष्ठादिविशेषणान्वित
मूप्राणतत्त्वं यथा द्रव्यदेवते यागस्य रूपं एवं विज्ञेयं रूपं विज्ञानस्य तेन हि तद्रूप्यते समाख्यापि सैव प्राणविद्येति तस्मात्सर्ववेदांत
प्रत्ययत्वं विज्ञानस्य एवं पंचाग्निविद्यावैश्वानरविद्याशांडिल्यविद्यासेव माहि ... योजयितव्यं॥ ॥ ॥ ॥

अविशेषमाह यथैकस्मिन्निति एकधात्वर्थे होमावच्छिन्नप्रयत्ने स्ववदुपास्तिप्रयत्नेप्यभिन्नत्वर्थः यथा ज्येष्ठत्वादिगुणक प्राणविद्या सर्वशाखा
स्वेकात्तथा पंचाग्निविद्याप्येकाफलसंयोगाद्यविशेषात् प्रायान्यापि विद्याभिन्नेत्याह एवं पंचाग्नीति॥ ॥ ॥

सिद्धांतयति। एवमिति। सर्वैर्वेदांतैः प्रतीयंत इति सर्ववेदांतप्रत्ययानि तैर्विहितानीत्यर्थः उक्तन्यायमहिम्नाग्निहोत्रादिकर्मणां प्रतिशाखं
भेदे प्राप्ते शाखांतराधिकरणसिद्धांतसूत्रं एकं वा संयोगरूपचोदनाख्याविशेषादिति तत्र चोदना विधायकः शब्दः श्वोदितः प्रयत्नो वाख्याः

एवं प्राप्ते ब्रूमः सर्ववेदांतप्रत्ययानि विज्ञानानि तस्मिंस्तस्मिन्वेदांते तानि तान्येव भवितुमर्हंति कुतश्चोदनाद्यविशेषात् आदिग्रहणेन
न्यायखंडतदधिकरणसिद्धांतसूत्रोदिता अभेदहेतवो गृह्यंते संयोगरूपचोदनाख्याविशेषादित्यर्थः यथैकस्मिन्नग्निहोत्रे शा
खाभेदेऽपि पुरुषप्रयत्नः तादृश एव चोद्यते जुहुयादिति एवं यो ह वै ज्येष्ठं च श्रेष्ठं च वेदेति वाजसनेयिनां छांदोग्यानां च तादृश्येव चोद
ना प्रयोजनसंयोगोऽप्यविशिष्ट एव ज्येष्ठश्च श्रेष्ठश्च स्वानां भवतीति रूपमप्युभयत्र तदेव विज्ञानस्य यद्युत ज्येष्ठश्रेष्ठादिविशेषणान्वित
मुख्यप्राणतत्त्वं यथा च द्रव्यदेवते यागस्य रूपं एवं विज्ञेयरूपं विज्ञानस्य तेन हि तद्रूप्यते समाख्यापि सैव प्राणविद्येति तस्मात्सर्ववेदांत
प्रत्ययत्वं विज्ञानस्य एवं पंचाग्निविद्या वैश्वानरविद्यादिश्च शांडिल्यविद्येत्येवमादिषु योजयितव्यं॥ ॥ ॥ ॥

अविशेषमाह भवेदेकस्मिन्निति एकधात्वर्थे होमादावृद्धिरूपप्रयत्नैक्यवदुपास्तिप्रयत्नैक्यमित्यर्थः यथा ज्येष्ठत्वादिगुणकप्राणविद्या सर्वशाखा
स्वेका तथा पंचाग्निविद्याप्येका फलसंयोगाद्यविशेषात् अन्या अपि विद्या भिन्नेत्याह एवं पंचाग्नीति। ॥ ॥

पूर्वपक्षे हेतुं निराचष्टे यो हीति काठकमित्यादिना न कर्मभेदो न युक्तः कुतः अचोदनाभिधानत्वात् काठकादिशब्दानां ग्रन्थनामत्वात् कर्मवाचि-
त्वाभावात् ततो भिन्ननामकशाखास्थं यत्कर्म तदपि न द्विहितं कर्मैकमेव अल्परूपभेदेऽपि तच्च ह्युक्तं पिन कर्मैक्यविरोधी धर्मविशेषस्तत्र ध्ययनाङ्गं न कर्म-
गमनतो न कर्मभेदकं शाखाभेदे पुनरुक्तिरसि इति तदन्यार्थदर्शनयोरपि न भेदकं स्वतन्त्रद्विधिस्तुतिमात्रत्वात् बहुशाखाध्ययनाशक्तावपि
स्वशाखानुक्तविशेषस्यान्यतो ग्रहणसंभवात् दर्शपूर्णमासादिका एकस्मिन्नपेक्षमेतं पञ्चगलेपादिना सामञ्जस्यं संभवति एवं समाप्तिवचनभेदोऽप्यपो-

ये तु नामरूपादयो भेदहेत्वाभासास्ते अपूर्व एव काण्डे न नाम्नः स्यादचोदनाभिधानत्वादित्यारभ्य परिहृताः इहापि कैंचिद्विशेषमाशंक्य परिह-
रति भेदान्नेति चेन्नैकस्यामपि स्यादेतत्सर्ववेदान्तप्रत्ययत्वमेकविज्ञानानां गुणभेदान्नोपपद्यते तथा हि वाजसनेयिनः पञ्चाग्निविद्यां प्र-
स्तुत्य षष्ठमपरमग्निमामनन्ति तस्याग्निरेवाग्निर्भवतीत्यादिना छन्दोगास्तु तं नामनन्ति पञ्चसंख्ययैव च ते उपसंहरन्ति अथ ह य एतानेवं
पञ्चाग्नीन्वेदेति येषां च स गुणोऽस्ति येषां च नास्ति कथमुभयेषामेका विद्योपपद्येत॥ ॥ ॥ ॥

न केवलं कर्मभेदप्रमाणाभावात् भेदहेतवः परिहृता इत्यर्थः तर्हि एकत्वान्तरस्यापि नैव कर्मैक्यवादिद्वेषप्रसिद्धेः पुनरुक्तिरित्यत आह रूप-
तोऽल्पत्वं क्वचिदल्पत्वे विशेषः पञ्चाग्नीन्वेदेत्युपासनोत्पत्तिविधिस्थपञ्चाग्न्यादिरूपभेदादुपासनाभेदः स्यादभिसन्धायाति न रूपभेदात्कर्मभेदे यदि ५०
स्वधिकारीकाभिरसाध्यत्वाद्योपनरुक्तम स्वाधिकरणस्येति मत्वा शङ्कां व्याचष्टे स्यादित्यादिना अस्पष्टपक्षे एकत्वात्कर्मण्यापन्नं तं मानसविद्यासु वि-
नाशत्वं दुर्योजत्वाद्यपुनरुक्तिं गन्धोऽपि नास्तीति मन्तव्यम्॥

ननु समस्तसमस्तोपास्यार्थमग्निरहस्ये हि गतः षष्ठोग्निः प्रसिद्ध बृहदाजिभिरुक्तः स छान्दोग्येषूपसंहार्य इति न रूपभेदस्तत्राह न चात्र विरूपस्य
ज्ञानं ननु एव वृत्तो हि मतो गानजितः आवापच्छन्दोगानां च तस्योदापस्तनः किं भिन्नत्वात्तत्राह आवापेति छान्दोग्येषु षष्ठाग्न्यभावमंगीकृत्यास्मद्रूपभेदान
विधैक्याविरोधादिति परिहरति नैव इत्यादिना अंगीकारं स्वजनितप्र ह्न तेपीति श्लोकस्यार्थो लोकादि इह लोकान्तरं प्रेतं गतं हातमेध्यमेहरंतीत्यर्थः न
न चात्र गुणोपसंहारः शक्यते प्रत्येतुं पंचसंख्याविरोधात् तथा प्राणसंवादे श्रैष्ठ्यादयः प्राणान्वाक्चक्षुः श्रोत्रमनांसि छन्दोगाः
आमनन्ति वाजसनेयिनस्तु पंचानामप्यामनन्तीति रेतो वै प्रजापतिः प्रजायते ह प्रजया पशुभिर्य एवं वेदेति आवापोद्वापभेदाच्च वेद्यभेदो
भवति वेद्यभेदाच्च विद्याभेदो द्रव्यदेवताभेदाद्यागवत् प्राप्नोतीति चेत् नैष दोषः यतः एकस्यामपि विद्यायामेवं जातीयको गुणभेद उपपद्य
ते यद्यपि षष्ठस्याग्नेरुपसंहारो न संभवति तथापि द्युप्रभृतीनां पंचानामग्नीनामनुभवः त्रैमप्यभिज्ञानमन्यत्र विद्याभेदो भवितुमर्
हतीति नहि षोडशिग्रहणाग्रहणयोरतिरात्रो भिद्यते पद्यतेपि च पठ्यते ह्यग्निः छान्दोग्ये तं प्रेतं दिष्टमितोऽग्नय एव हरंतीति वाजसनेयिनस्तु सं
पादिकेषु पंचस्वग्निषु नवगत्या तथा: समिद्धूमादिकल्पनामानिवृत्तये तस्याग्निरेवाग्निर्भवतीत्यमिस्समिदित्यादि समामनन्ति सन्निध्यानुवा
दः सम्पाद्यसमापत्त्येव वादः स्तथापि सगुणः शक्यते छान्दोग्येरुपसंहर्तुं न चात्र पंचसंख्याविरोधः शंक्यः संपादिकाग्न्यभिप्रायत्वेषा
पंचसंख्यानित्यानुवादभूता न विधिसमवायिनीत्यदोषः एवं प्राणसंवादादेरेष्वप्यधिकस्य गुणस्येतरत्रोपसंहारो न विरुध्यते ॥ ॥
ननु छान्दोग्ये गणनिमात्रं तत्राजिभिस्तु समिदादिविशेषः कथ्यतइति रूपभेदस्तदवस्थस्तत्राह वाजसनेयिनस्त्विति षष्ठाग्नेस्तादृशविशेषस्य चानु
वादमात्रत्वेनानुपास्यत्वात् सर्वात्र गणभेदोपपत्तेरिति न रूपभेद इत्यर्थः सविशेषषष्ठाग्नेरुपास्यत्वेपि न रूपभेद इत्याह अथापीति द्युलोका
दीनां पंचानामग्नीनां अग्नित्वसम्पत्ति विधिनैव बोध्या संचलत्संपत्ति कल्पितानामिसिद्धमतिः पर्यत्नध्येयमत्वेन विधीयत इत्यर्थः ॥ ॥

ब्र॰सू॰भा॰३ छंदोगैर्वाजिसनेयिशाखास्थं षष्ठं रूपं संहर्तव्यमिति युक्तमनुपसंहारेऽपि न विद्याभेदस्स्यात्तथाप्नोति एवंरूपभेदेन विद्याभेदः कल्प्यः खलु क्वचिद्धर्मविशेषो
५१ ऽपि न भेदकः कस्मात्शाखान्तरेष्वाम्नानादिति गोदानवदध्ययनाङ्गत्वेन शिरोव्रतमाथर्वणिकानां स्वे वेदे विहितं न विद्याङ्गमित्यर्थः अधिकारादिति शिष्याचष्टे नै
तदिति एतत्प्रकृतं मुण्डकमननुष्ठितशिरोव्रतो नरो नाधीत इत्यन्वयः तेन मुण्डकाध्ययनाङ्गमेव शिरोव्रतमित्यर्थः चेत्तु विद्याङ्गत्वे नापीदं व्रतं कृतमिति
ति शंकते नन्वित्यादि सर्वशाखासु ब्रह्मविद्यैकैवेत्युच्यते हि विद्यासंयुक्तं व्रतमपि सर्वत्र संबध्येत न च संबध्यत इति विद्याभेद इत्यर्थः प्रकृतं शृणु यथा चेत
न ज्ञायते कस्य भेदाद्विद्याभेदो विद्याभेदस्याप्यग्रहः कस्यचिद्विद्यां प्रत्यवगमो द्वयोरपि न स्यादेव विद्याया ऐक्ये भेदागमात् तस्मादेकविद्य
मेव स्वाध्यायस्य तथात्वेन हि समाचारेऽधिकाराच्च सववच्च तन्नियमः ३ यदप्युक्तमाथर्वणिकानां विद्यां प्रति शिरोव्रताद्यपेक्षणादन्येषां च
तदनपेक्षणाद्विद्याभेद इति तत्प्रत्युच्यते स्वाध्यायस्यैष धर्मो न विद्यायाः कथमिदमवगम्यते यतस्तथात्वेन स्वाध्यायधर्मत्वेन समा
चारे वेदव्रतोपदेशपरे ग्रन्थे आथर्वणिका इदमपि वेदव्रतत्वेन व्याख्यातमिति समामनन्ति नैतदचीर्णव्रतोऽधीत इति चाधिकृतविषयादे
तच्छब्दादध्ययनशब्दाच्चोपनिषदध्ययनधर्म एवैष इति निर्धार्यते ननु तेषामेवैतां ब्रह्मविद्यां वदेत शिरोव्रतं विधिवद्यैस्तु चीर्णमिति
ब्रह्मविद्यासंयोगश्रवणादेकैव सर्वत्र ब्रह्मविद्येति संकीर्तितैव धर्मः न तत्राप्येतामिति प्रकृतमपेक्षमाणत्वात् प्रकृतत्वं च ब्रह्मविद्याया ग्र
न्थविशेषापेक्षमिति ग्रन्थविशेषसंयोग्येवैष धर्मः सववच्च तन्नियम इति निदर्शनं निर्दिशति यथा च सवाः सप्तसूर्यादयः शतौदनप
र्यन्ता वेदान्तरोदितत्रेताग्न्यनभिसंबन्धादाथर्वणोदितैकाग्न्यभिसंबन्धाच्चाथर्वणिकानामेव नियम्यन्ते तथायमपि धर्मः स्वाध्यायविशेषसं
छ एवला इति प्रकाश कथं परो ब्रह्मविद्या इति परिहरति नेति तस्य विसंबन्धात्तत्रैव नियम्यते तस्मादप्यनवद्यं विद्यैकत्वम् ॥ ॥
ऐ व्रतस्य मुण्डकाध्ययनेनियमस्तत्र सववदिति निदर्शनं निर्दिशति सवाः होमाः आथर्वणोक्ताः सप्तसूर्यादय एकोऽग्निरेकर्षिः संज्ञमामसिद्धकासि ऽग्नौ कार्या इति यथा नियम्यन्ते तथैवेत्यर्थः ॥ ५१

किं च वेदैर्वैक्येन निर्गुणब्रह्मविद्येयं तावच्छ्रुतिर्दर्शयति तस्मान्निर्विशेषब्रह्मगुणविद्यानामपि सर्वशाखासु ऐक्यसिद्धिरित्याह ॥ इदमत्रकारः दर्शयति
चेति सगुणमप्येकं वेदत्रयवेद्यं दर्शयति ॥ आह तत्र यत्तेति किं च सर्वशाखांतरोक्तपदार्थैक्यरूपशाखांतरे सिद्धवस्तु एव सर्वौ विद्येति दर्शयतीत्याह तथा महद्
भयमित्यादिना एव च ब्रह्मत्वेन तस्मिन्नद्वैतेऽल्पमप्यंतरं भेदं यः पश्यति तस्य संसारभयं भवत्येव यस्मादिदं द्वितीयस्य भेददर्शिनः तत्त्वदेवब्र
ह्म भयंकरं भवति यतो विद्वान् निर्भयस्तं नश्यति सर्वथा ॥ प्रादेशमात्रमुपास्य इति सिद्धवदुपादानं वैश्वानरविद्यैक्यं दर्शयतीत्याह तत्रेति किं च सर्वेषु
वेदांतेषु प्रश्नादीनामप्रतीयमानत्वेन हेतुनैतदवगम्यते अप्रसक्तानां तेषामसंभवो पादानस्यैव युक्तत्वात् सर्वविदानुगतेन मे उपाख्याताम पिसर्ववेदांतप्रमा
दर्शयति च ॥ दर्शयति च वेदोऽपि विधेयैकत्वं सर्ववेदांतेषु वैदिके वोपदेशात् सर्वे वेदा यत्पदमामनंतीति तथैतमेव बह्वृचा महत्युक्थे मीमांसंते एत
मग्नावध्वर्यव एतं महाव्रते छंदोगा इति तथा महद्भयं वज्रमुद्यतमिति काठके कृतं तस्येश्वरगुणस्य भयहेतुत्वस्य तैत्तिरीयके भेददर्शिनो निंदाया
प्रयत्नेनाहुरुदरमंतरं कुरुते अथ तस्य भयं भवति तदेव भयं विदुषोऽमन्वानस्येति तथा वाजसनेयके प्रादेशमात्रमिव ह
वा एतं तस्य वैश्वानरस्य च्छांदोग्ये सिद्धवदुपादानं तत्स्वेव मितं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्त इति तथा सर्ववेदांतप्रत्यये
नाम वाजिनां विहितानामुक्थादीनां मन्त्रो क्तानां विद्यानां पाठेऽनाभिप्रायस्य वैश्वानरवत्सर्वेदांतप्रत्ययत्वसिद्धिः ॥ उपसंहारोऽर्थाभे
दाद्विधिशेषवत्समाने च ॥ इदमिदानीं प्रयोजनं सर्ववेदांतप्रत्ययत्वे सर्वविद्यानां नानाशाखाध्यायिभिरुक्तानां विशेषगुणानामन्यत्रापि समानविद्या
नेऽनुपसंहारे भवतीति ॥ अर्थाभेदात् तस्य विहितेषां गुणानामेकत्वाभेदाद्विशिष्टविद्यानोपकारः समानार्थत्वात्तत्र विहितं तद्वैकल्पिकमेतत्तदुपसं
हारणं तेन कर्तव्यं तेनासिध्यतीत्याह तत्रेति ॥ अन्यविधेयकल्पवदित्यादि तदेकाभिप्रायः सर्वशाखासु विद्येयस्य चिंतायाः फलमाह उपसंहार इति तत्र
शाखाभेदे समानविद्यायां प्रकृतानां गुणानामपि तथाभूतिविशिष्टतां तत्स्वरूपत्वाद्रूपत्वादितरशाखोक्तोपसंहर्तव्या इति संदेहे विद्येक्ये पि तत्र तत्रोक्तेरेव गुणैर्विद्योप
कारसिद्धेः शाखाभेदेन गुणानां व्यवस्थितत्वादिति पूर्वपक्षः ॥ तत्र ज्ञानविषये यत्किंचिन्नैष्फल्यमिति फलसिद्धांतत्वेन स्वशाखाशेषो कि तेनैव समादिनाप्युपान्तंगुणान्

विनाभावादेतस्या विद्याशाखांतरोक्त तद्विद्यागुणावर्तीन
दर्शिता कांत तद्विद्याविधिवशान्मानाद्विद्यैके गुणोपसंहार इति
सिद्धिरित्यर्थः ॥

शा.स.भा.३ प्रधानैकोत्तदुपकारकाणामंगानामुपसंहारे दृष्टांतमाह विधिरिति जवदितिडक्रमेव व्यतिरेकमुखेनाह परिहीति। तत्र्यम्येवप्राग्यवरुद्धानामंगुणानांततो
भिन्ने सौपेक्षासिवृद्धियांतरस्तु गुणमनां विधांतरेणाम्निः किं नस्यादित्यत आह प्रकृतीति। प्रकृतिगुणानां विकारे ना सिद्धेः क्षा विधानां तु प्रकृतिविकृतिभा
५२ वासिद्धेर्न तत्र सिरिलक्षणः तैवमिति। गुणानुपसंहारे नेसर्वः उत्तरस्तु ब्राह्मणमनेन सत्रेणापो नरूसंवारम्पति। अस्मैवेति एवं चोदनया विशेषानुक्त
त्वेनो विधेका मुर्धः तस्मादवारवक्तुमाह अन्यथात्वमिति। अत्राग्निजिनानुष्ठाने पञ्चाग्नालक्षणं छंदोगानामुद्गाथाध्यायं चविषममाह वाजेत्यादिनाते हदेवाः
विधिरोपवत्प्रथाहि विधिरोषाणाम अग्निहोत्रादि धर्माणां तद्वैकमग्निहोत्रादि कर्मसर्वचेत्स्थाने हा उपसंहरणं एवमिहापि मदिहिविज्ञा
नभेदे भवेत्ततो विद्यानां तरनिबद्धत्वाद्गुणानां प्रकृतिविकारभावाभावाच्चेनस्याद् उपसंहारः विद्यानेकत्वे तु नैवमिति। अस्यैवमुप्रमोजनस्त्रत्रम
सपंचः सर्वाभेदादित्याद्यभ्युविष्यति अन्यथात्वं शब्दादितिचेन्नाविशेषात्॥ वाजसनेयके ते ह देवा ऊचुर्हंतासुरान्यज्ञ उद्गीथेनात्ययामे
ति ते ह वाचमूचुस्त्वं न उद्गायेति तथेति तेभ्यो वागुदगायदित्यारभ्य वागादीन्प्राणान् असुरपाप्मविद्धत्वेन निंदित्वा मुख्यप्राणपरिग्रहः पठ्यते। अथ हेममासन्यं प्राणमू
चुस्त्वं न उद्गायेति तथेति तेभ्य एष प्राण उदगायदिति। तथा छांदोग्ये पि तद्ध देवा उद्गीथमाजह्रुरनेनैनानभिभविष्याम इति प्रक्रम्येतरान्प्राणा
न्सुरपाप्मविद्धत्वेन निंदित्वा तथैव मुख्यप्राणपरिग्रहः पठ्यते अथ ह य एवायं मुख्यः प्राणस्तमुद्गीथमुपासांचक्रिर इत्युभयत्रापि च प्राणप्र
शंसनमाप्राणविधिर्ध्यवसीयते॥
तालिकः पूर्वपक्षः प्राणं अन्योन्यमूचुर्हंतेदानीं मत्स्मिन्यज्ञे उद्गीथेनेत्यो ज्ञात्रेणा कर्मणा रजस्तमो व्यतिरूपान सुरानतीत्य देवत्वं गच्छामेति तिनेचैव नि
र्देशमुख्यप्रकृतीरमुपास्य निर्धारयितुं कृतसंवादः अथ मंत्राच्च पूर्वीस्थितवं तस्त्वमो दात्रं नोस्माकं कुर्विति विद्याप्राप्त्यर्थं तं कृतं तथा प्राणवृत्तुः श्रोत्र
मनसांपि कर्मेना सुरपाप्मनावस्तानीति निंदित्वा आसन्यमास्ये भवं मुख्यमध्यस्थं प्राणमुपास्यं निर्धारितवंतमहत्पर्थः। तत्रात्रानीमाभिभवा
५२

भेदाभेदमानाभ्यां संशयमाह तत्रेति अत्र पूर्वाधिकरणसिद्धान्तन्यायेनोद्गीथविधेतिसंसैके नविधेयमिति पूर्वपक्षे मिथ्यो गुणोपसंहारः फलश्रुतेरिति सं
सैकयोपिविधेयावपवादाद्गुणोपसंहारपाति एवं पत्र पूर्वन्यायेन पूर्वपक्षः तत्रापवादे को संगतिरिति मतमधिसूत्रस्य सिद्धं तुवं काभागंधाचुष्टेनतु नष्टक्रमि
तिसपूर्वोद्गीथकर्मकर्त्तृप्राणोवा जितामुपास्यः उद्गीथेति कर्त्तृ ह्रस्वात् छन्दोगानां तद्गीथावयवः चयुओंकारः प्राणदृष्ट्योपास्य ओमित्येतदक्षरमुद्गीथ
मित्युपक्रम्य प्राणमुद्गीथमिति कर्मरूपत्वं श्रुतपाकर्तृकर्मणोरुपास्यमोर्भेदाद्बृहस्योरन्यथात्वं भेदृश्यतेर्द्धं कार्य्यः उद्गीथत्वेनेति ओंकारत्वेनेत्यर्थः
तत्रसंशयः किमत्रविद्याभेदः स्यात् आहोस्विद्विधेकत्वमिति किंतावत् प्राप्तं पूर्वेण न्यायेन विधेकत्वमिति ननु नमुक्तं विधेकत्वं भक्रमभेदात् अत्र
पादिप्रक्रमं तेवाजसनेपिनः अन्यथार्द्ध छन्दोगाः त्वं वऽउत्तमेतिवाजसनेपिन उद्गीथस्य कर्त्तृत्वेन प्राणमामनंति । छन्दोगास्तुद्गीथत्वेन तमुद्गीथमुपासां
चक्रिरे इति तत्कथं विधेकत्वं स्यादिति चेत् नैषदोषः । नह्येतावता विशेषेण विधेकत्वमपगच्छति अविशेषस्यापि बहुतरस्य प्रतीयमानत्वात् तथा
हि देवासुरसंग्रामोपक्रमत्वं असुराभिभवाभिप्रायत्व उद्गीथोपक्रमाः सोद्गानार्हत्वं कीर्त्तनं तत्त्रिंदपामुख्य प्राणव्यपाश्रयस्त दीयोपाश्मासुरविध्वंसनमुक्तम्
लोष्टनिदर्शनेनेत्येवं बहवो धर्मभूयस्त्वाविशिष्टाः प्रतीयन्ते वाजसनेयके चोद्गीथसामानाधिकरण्यश्रवणात् अस्मैतत्कर्मैष उवाचउद्गीथश्छान्दोग्ये
पिकर्त्तृत्वं लक्षयितव्यं तस्मात् समविधेकत्वमिति । नचात्र प्रकरणभेदात् एवरीमस्त्वादि युक्तम् ॥७ न विधेकत्वमनुमाप्यविद्याभेदशोभावात्र न्याय्यः कस्मा
त्प्रकरणभेदात् प्रक्रमभेदादित्यर्थः तथाहि हप्रक्रमभेदोदृश्यते । छान्दोग्ये तावत् । ओमित्येतदक्षरमुद्गीथमुपासीतेसेवमुद्गीथावयवस्योंकारस्य
उपास्यत्वं प्रस्तुत्य रसतमादिगुणोपव्याख्यानं कृत्वा अथ खल्वेतस्यैवाक्षरस्योपव्याख्यानं भवतीति पुनरपि तमेवोद्गीथावयवमोंकारमनुवर्त्य
देवासुरा ह वै यत्र संयेतिरे इत्याह । अत्र स्वरूपभेदे न विधेकत्वविरोधोन्नतस्य मे नपूर्व पक्षी परिहरति नैवं इत्यसुरसपाप्मसाधः अस्य
उद्गीथविवादः प्रथमं त्वानुमाप्यलोष्टे विध्वंसनेत तथा प्राणहन्तुमागताअसुरास्तस्य वीर्य्येति ... एवमेव ... अत्र स्वरूपभेदमंगीकृ
त्यापि विधेकत्वे ... नास्तीत्याह वा जेति । उद्गीथस्वरूपत्वेन प्राणमाभत्रस्य ... वाक्यत्वेक ... नैतस्यपरिपर्य्यत्रपतिलयं । बहुविवृतस्वरूपभेदे
नविधेयम् इति सिद्धान्तपतिनवेति ॥ असुरविधिनमुद्गीथमितितत्वब्धमित्यर्थः ... छान्दोग्ये हि ... रसतमम् ओंकारः प्राणमिति ... द्विगुणोऽकायः

श्री॰ सू॰ भा॰

५२

न तु वाजिनां कैकवाक्यत्वात् पंक्त्यां देशोपक्रमस्थतुच्छमुद्गीथपदं संपूर्णसाम भक्तिपरमलक्षणा प्राणमुद्गीथमित्युद्गीथकर्तृप्राणदृष्टिपास इति व्या॰
ख्यातमिति तत्राह तत्रयमुद्गीथेति ॐकारोपास्त्युपक्रमभंगादुद्गीथपदे कृत्स्नलक्षणा चेति देशकृत्स्नसादिसर्थः। ननु सिद्धांतेऽपि तस्य देवपक्षलक्ष
णास्वीकारो ततो वरं कृत्स्नलक्षणाश्रयणं सतत्रानुग्रह तथा चोपसंहारे कृत्स्नप्राणोपास्तिनिश्चयादुपक्रमेऽपि तन्निश्चयमङ्गलन्त्याह। उपक्रमेति संदिग्धो
पक्रमो हि यावच्चरमनिश्चयं तन्नेयाकाः शर्कराइसन्नां जनकस्य संदेहे तेजो घृतमिति द्वितान्निश्चयः। इह तूपक्रमे ओंकारस्योपास्त्यत्वं निश्चितं तत्समानाधि

तत्र यद्युद्गीथशब्देन सकला भक्तिरभिप्रेयेत ततस्तस्या वाक्योपक्रमे ज्ञातार्थीकृतत्वात् तत उपक्रमश्चोपरुध्येत लक्षणा च प्रसज्येत। उपक्रमतन्त्रेण चैकस्मिन्वाक्ये
उपसंहारेण भवितव्यं तस्मादत्रावयवोद्गीथ। पावयव ॐकारे प्राणदृष्टिरुपदिश्यते वाजसनेयके तु उद्गीथशब्देनावयवग्रहणकारणाभावात्स
कृत्स्नैव भक्तिरवधृता तेन तद्धा पितस्य कर्तृगीतलिब्ध्याणत्वेन निरूप्यत इति ग्रहणानन्तर्यं यदपि तद्वै उद्गीथसामान्याधिकरण्यं प्राणस्य तद
प्युद्गीथत्वेनैवादित्यदृष्टिविधित्सया प्राणस्य सर्वात्मत्वप्रतिपादनार्थमिति न विधेयकुसमायहति सकलभक्तिविषयत्वात्तत्राप्युद्गीथशब्द इति
वैषम्यं न च प्राणलक्षणात्वप्रसंभवे नहि तु नापरित्यज्यते उद्गीथभाववदभ्यात भावः प्राणस्योपास्तनार्थत्वेनोपदिश्यमानत्वात्। प्राणवीर्यैण चोद्गात्रं
करोतीति नास्य संभवः तथा च तत्रश्रावितं वाचा चत्येव सम्भ्रागीनच्चोदगायदिति ॥ ॥ ॥ ॥

धिकरणे उद्गीथपदस्यावयवलक्षणा विनिश्चितेति प्राणमुद्गीथमित्युपसंहारस्तत्रैकार्थ्येन यानेक इत्यर्थः एवं छांदोग्य ॐकार उपास्य उक्तः इतरत्र
तु प्राण इत्युपास्यभेदाद्विद्याभेदः इत्याह वाजेति। मदुक्तं वा निश्चयाद्विप्राणस्योद्गीथरूपत्वश्रुतेरुपास्यैक्यमिति तत्र दृष्टप्रतिमदपी सादिना। तत्रो
द्गीथरूपास्य तथा नोक्तः किं तु प्राणस्योपास्यगुणत्वेनेत्यर्थः किं चोद्गीथ ॐकारः छांदोग्ये अन्यत्र तु भक्तिरित्युपास्यभेदः रूपाद्दृसकुलेति प्राणस्य ज
ड़त्वाच्चोद्गातृत्वं किं तु हीपत्वमेव वा निमित्तरूपि प्राणमित्येव सम्भाङ्गं काहनचेति। वाचा च ह्येवेति सङ्गत्वाबाग्विरहित्वे प्राणे नोद्गातृत्वं रूढवानितिश्रुतेर

[illegible] ५२

॥ [illegible]

मदुक्तं कृतरापां विशेषाद्धि देवकर्मिति तन्नाह तन्नेचेति एकत्रोक्ता ताप्राणाद पास्योग्मचेकारइत्यं तद्गोपास्वरूपमेदेस्यस्तिविहितं गार्ध्यवार

सामर्थ्याज्ञातौ पासते कं मुक्त मिलर्थः यात्सहामासाने त्लार्थे कंना स्तीलम्ध्ह ष्टातमा हतथा हीति। विवाहतंप्रजमा पशुभिर्ध पतिय धर्म

तस्प्राग्न्यर्थपस्महविर्निःस्तपुरस्ता चं हुमासुभ्रुति नेधातं तुलालिभिर्गोपेम धर्मासुत्ता नग्रपेदा ने पुरो डाश मष्टा कपालं कुमी पोश्च विष्णता

निंद्र पमुदान्द्रेंधं आरु पेतिछालालि लवेशिपि विष्णुपम्नृतेच स्विस्मुदुम्यवाकं स्वस्त्यर्थः। पत्स्वपजनमा तस्वच तुदं स्यामेवा मावास्यायां सा

दर्श कर्मार्थं पूर्वं तस्य पुरस्तात्सू र्वेहविस्तं तुलदधिपयो रूपं निरु संदर्श देवता भोग्मा दिभिः संकल्पितं तंच दुमाथ्य पक्षाद्दमुदेतितमिनकालस्य

समयापराधा त्तदेवनि रुप्तं हविः प्रजादिना धर्मपति विपोजयति तु तुंचास्यवर्धयति पस्माकालं भ्रांतिना न्यजमानो पेम धर्मादित्रावेन ने धाभूता

तं तुला दध्यादिताद्विता निह माता लिभिर्जे दुमा दि भ्रो विपोजयेद्धि मोमुख दातल्ला दियुण का स्यादि भ्रो दर्श देव भिर्ज भ्रो निवेपेदिति दधन दध

निरुप्ता विष्णु तंतुलचरूसत तेन दुग्धोति एचाहमिलर्थः। अत्रकालापरा धेदेवानरपुरुषं त्राम्प्रश्निनरूपं दर्शो द्विर्ज कर्मविधी प तदर्जिनादि तं दुलेने

नचविवक्षितं तौ मेदेः वग मम्मा नेत्रा मच्छायानु सरमानेनि मस्मानार्धे तन्म धमवता तुं मुक्तः। तया होमुदधयाकेपशुका नयावेसत्र धातं

दुलानि भज्जेत पेम धर्मासुत्ता नग्र पेदा ने पुरो डा गम द्दाकथ। पालंकु मदिता दिनिर्दे त्रासो सुपक्त मभेदाद मुदपवा कदेवापत्नपोध्य

घालाधनुवादेन विभजे दितिह विषः मकृ तदेव विपोगेन तस्मिन्नैवदर्श कर्मणिं देवतांतरस्य ॥ वर्सितः॥ पशुकाम वामेतुम्मगविधिः तमेहाभुप

वधमाच विधा नन्नकर्मा तरमितिपिदुंति तं एवम भुदपवाके का ला पदा धेनो पुक्र मा दर्श कर्मणो वह विषः र्घ्यदेवता पोप सपो विपोगे धर्म

सिता। पशुकाम त्वमेनुपदा विपुस्तेविष्णुस्ता नग्रपे सनिमनेद्रा कपालं निर्वपेद्धिम धर्मास्तालिश्चम वेद्दि पिविष्णुपुरुं तेचरू पशो हि स्तानि

डपपदाने दर्धं स्वरूमितिनिर्दे श्रो भुदपवाक समो हितत थापिम पशुकामस्तालो माता स्ता मिश्राचवत्सा नयाकमीदिति निसंदर्श कमेस माप्युपतई ह

श्रौं पूर्वेत्सापकरणविधिपक्रमासमुकाममस्यगांतर कमभेदाद्विधाभेदः॥

शा.भा.टी. स्तुत्युक्तं दृष्टांतमाचष्टे। परोवरीयस्त्वादिवदिति परः इति सकारांतं परस्मात्परस्मात् स एव परश्च वरतरश्चेति परोवरीयान् इति लोके पदं अनंतश्चा
काशाख्यः परमात्मा न ह्यस्मात्लब्धनउद्गीथस्तस्योक्तः। आकाशात्मना हिरण्यश्मश्रुपुरुषात्मना चोद्गीथोपास्तिसाम्येपि विषयभेदाद्विद्याभि
५४ भेद इत्यर्थः। संज्ञैक्यं पूर्वपक्षबीजमनूद्य दूषयति संज्ञातश्चेदिति उपास्यरूपभेदाद्विधानानात्वं प्रयुक्तं तच्छ्रुत्यक्षरानुगतं बलवत्त्वं तात्पुरुषे

परोवरीयस्त्वादिवत्। यथा परमात्मदृष्ट्यध्याससाम्येपि आकाशो ह्येवैभ्यो ज्यायानाकाशः परायणं स एष परोवरीयानुद्गीथः स एषोनं
त इति परोवरीयस्त्वगुणविशिष्टमुद्गीथोपासनमक्ष्यादित्यादिहिरण्यश्मश्रुत्वादिगुणविशिष्टोद्गीथोपासनाद्भिन्नं। न चेतरेतरगुणो
पसंहार एकस्यामपि शाखायामानह्यच्छां शाखांतरस्थेष्वप्येवंजातीयकेषूपासनेष्विति संज्ञातश्चेत्तदुक्तमस्ति तु तदपि॥ ॥अथोच्येत
संज्ञैकत्वाद्विद्यैकत्वमत्रोभयत्राप्युद्गीथविद्येत्युभयत्राप्येका संज्ञेति तदपि नोपपद्यते। उक्तं ह्येतत् न वा प्रकरणभेदात्परोवरीयस्त्वादिव
दिति तदेवात्राभ्यतरं श्रुत्यक्षरानुगतं हि तत्। संज्ञैकत्वं तु श्रुत्यक्षरबाह्यमुद्गीथशब्दमात्रयोगाल्लौकिकैर्व्यवहर्तृभिरुपचर्यते।
अस्ति चैतत्संज्ञैकत्वं प्रसिद्धभेदेष्वपि परोवरीयस्त्वाद्युपासनेषूद्गीथविद्येति। तथा प्रसिद्धभेदानामपि अग्निहोत्रदर्शपूर्णमासादीनां का
ठकैकग्रंथपठितानां काठकसंज्ञैकत्वं दृश्यते। तथेहापि भविष्यति। यत्र तु नास्ति कश्चिदेवंजातीयको भेदहेतुः तत्र भवेत्संज्ञैकत्वाद्विद्यै
कत्वं यथा संवर्गविद्यादिषु॥ ॥ ५४

यि दुर्बलेत्यर्थः। संज्ञैक्यं क्वचिद्भेदे व्यभिचारीत्याह अस्ति चेति। किं संज्ञैक्यं सर्वत्राप्रमाणमेवेत्याह यत्र त्विति। असति बाधके संज्ञैक्यमपि मानं य
था संवर्गविद्येति संज्ञैक्यात् सर्वशाखास्वाम्नातविद्यैक्यं तथा पंचाग्न्यादिविद्यैक्यमित्यापद्यत्र दृष्टांतमित्यर्थः॥ ॥ ॥

मासेश्च समंजसं ॥ सामानाधिकरण्येऽपि विधर्मी कृत स तत्र समस्ताह ओमित्येतदिति। अध्यासादिपदार्थानाचष्टे तत्रेति। अध्यास इत्यादिना बुद्धिपूर्वक
व्यासेश्च समंजसं ओमित्येतदक्षरमुद्गीथमुपासीतेत्यत्राक्षरोद्गीथशब्दयोः सामानाधिकरण्ये श्रूयमाणेऽध्यासापवादैकत्वविशेष
णपक्षाणां प्रतिभानात्कतमोऽत्र पक्षो न्याय्य इति विचारः। तत्राध्यासो नाम द्वयोर्वस्तुनोरनिवर्तितायामेवान्यतरबुद्धावन्यतरबुद्धिरध्यस्य
ते। यस्मिन्नितरबुद्धिरध्यस्यते अनुवर्त्तत एव तस्मिंस्तद्बुद्धिरध्यस्तेतरबुद्धावपि। यथा नाम्नि ब्रह्मबुद्धावध्यस्तायामप्यनुवर्त्तत एव नाम
बुद्धिर्न ब्रह्मबुद्ध्या निवर्त्तते। यथा वा प्रतिमादिषु विष्ण्वादिबुद्ध्यध्यास एवमिहाप्यक्षर उद्गीथबुद्धिरध्यस्यते उद्गीथे वाक्षरबुद्धिरिति। अ
पवादो नाम यत्र कस्मिंश्चिद्वस्तुनि पूर्वनिविष्टायां मिथ्याबुद्धौ निश्चितायां पश्चादुपजायमाना यथार्था बुद्धिः पूर्वनिविष्टाया मिथ्या
बुद्धेर्निवर्तिका भवति यथा देहेन्द्रियसंघाते आत्मबुद्धिः आत्मन्येवात्मबुद्ध्या पश्चाद्भाविन्या तत्त्वमसीत्यनया यथार्थबुद्ध्या निवर्त्तते।
यथा वा दिग्भ्रान्तिबुद्धिः दिग्याथात्म्यबुद्ध्या निवर्त्तते। एवमिहाप्यक्षरबुद्ध्योद्गीथबुद्धिर्निवर्त्तते उद्गीथबुद्ध्या वाक्षरबुद्धिरिति। एकत्वं तु
क्षरोद्गीथशब्दयोरनतिरिक्तार्थवृत्तित्वं यथा द्विजोत्तमो ब्राह्मणो भूमिदेव इति। विशेषणं पुनः सर्ववेदव्यापिन ओमित्येतस्याक्षरस्य ग्र
हणप्रसंगे औद्गात्रविषयस्य समर्पणं यथा नीलमुत्पलमानयेति। एवमिहाप्युद्गीथो य ओंकारस्तमुपासीतेति। एवमेतेऽस्मिन्सामाना
धिकरण्यवाक्ये विमृश्यमाने एते पक्षाः प्रतिभान्ति। तत्रान्यतमनिर्धारणे कारणाभावादनिर्धारणप्राप्तौ विशेषमुच्यते। व्यासेश्च समंजस
मेदारोपोऽध्यासः। बाधोऽपवादः। एकत्वं वास्तवाभेदः। विशेषणं व्यावर्तकमिति विवेकः। पूर्वमुक्तान्तकर्मात्मकोद्गीथावयवत्वमोंकारस्येति ॥
सच्छब्दे यस्य विशेषणं हि युक्तं सच्छेयमभेदाद्विधा भेदः सिद्धान्तितः सन पुरस्तात्संगत्या पूर्वपक्षमाह तत्रेति ॥ ॥

शा·स·भा·३ अत्र एवं पक्षे पूर्वोक्तसिद्धान्तासिद्धिः फलं सिद्धान्ते न त्विष्टसिद्धिरिति मत्वा सिद्धान्तसूत्रं व्याचष्टे चशब्द इत्यादिना। पक्षत्रयमप्यदुष्टं मन्यमानो ध्या
नपक्षे दोषमाह तत्राध्यास इति यस्मिन् प्रतीकबुद्धिरोंकारे ध्यस्यते न ह्यत्र चकोऽपि पञ्चषष्ठोंकारे लक्षणास्यात् बुद्धिविषयत्वगुणपरत्वा
५५ प्याहं वं धोप्यसिद्धः फल्यनीयः प्रतीकोपास्तेः फलं च फल्यमिति गौरवं स्यादित्यर्थः। फलं न फल्यमिति निराकृते त्र्य यतद्इति। आस्या दीतिउ॰
कारस्याप्तिः सम्यद्धिरिति मउपास्तेस्तत्र कामाना मोती निश्रुतफलं नाध्यासस्येत्यर्थः। उङ्गीथोंकारयोरन्यतरबुध्यान्यतरबुध्यपवादेनगीफसा
चृशाखे यन्तुद्या शास्त्रानविवेशी यस्तत्र मध्यावर्जनप्रयोजनः तदिह त्रयः पक्षाः सावद्या इति यथुदर्शयतेविरोधेन एकस्यैवकोनिरवद्य इत्युपा
दीयते। तत्राध्यासेनावधावुद्धिरितरत्राध्यस्यते तत्त्वह्सलक्षणात्रजितं यसप्येतफलं च कल्प्येत अत एव फलं श्रापपिता हवैकामानां
भवतीत्यादिश्रुतिचेत् न। तस्यान्यफलत्वात्। आस्यादिदृष्टिफलं हि तत् नोङ्गीथाध्यासफलं अपवादेपि समानः फलाभावः मिथ्यात्वा
न निवृत्तिः फलमिति चेत् न। अपुरुषार्थोपयोगानवगमात्। न च कदाचिदप्योंकारे ओंकारबुद्धिर्निवर्तते तउङ्गीथादौ प्रबुद्धः। नचे
दंवासवस्तुतत्त्वप्रतिपादनपरं उपासनाविधिपरत्वात्। नाप्येकत्वपक्षः संगच्छते निःप्रयोजनं हि तदा शब्दद्वयोच्चारणं स्यात् एकेनैव
विवक्षितार्थसमर्थत्वात्॥
स्य तर मिथ्याबुद्धिनिवृत्तिवैफल्यमुक्तं संजगत्त्वन्यतरबुद्धेर्भ्रान्तित्वापवादत्वाहन च कदाचिदपीति भ्रान्तिश्च निवर्त्येत न तु निवर्ततइत्य ५५
भ्रान्तिरित्यर्थः किं तत्त्वबोधकात्वाक्यात्ध्रान्तिपवादो भवतीति नेत्याकांतत्वपरमित्याह नचेति घटके भक्ष्यप्रयोरिवोंकारोङ्गीथशब्दयोः पर्यायत्वपक्षे

पर्मीमत्वमपिनास्तिइत्याह नचेति। परिशिष्टविशेषणपक्षेस्तत्त्वंमोजमुनिमाहेति ॐमित्येतदक्षरमुपासीतेत्युक्तेसर्ववेदव्याप्योंकारइहो
पात्तोप्रसज्यतेतन्निराशार्थमुद्गीथावयवत्वंविशेषणं संमंजसमित्यर्थः अध्यासपक्षेतद्बुद्धिविषयत्वगुणकोगरूपःसंबंधः कस्यइति
विप्रकृष्टलक्षणा। अवयवलक्षणातुसन्निकृष्टा अवयवावयविसंबंधस्यक्लृप्तत्वात्सदावयवेऽवयविनःप्रत्ययइतिलोकेप्रयोगाच्चनाम
नचहोत्रविषमआग्नेयमविषयेचाक्षर ॐकारशब्दवाच्य उद्गीथस्यप्रसिद्धिरस्तितामितकलामांसाहोतृद्वितीयामांमक्षरउद्गीथग्रहणात्क
ध्यामामोंकारशब्दप्रसिद्धिःमेनानतिरूढार्थतास्यात्। परिशेषाद्विशेषणपक्षःपरिगृह्यते। आप्तेःसर्ववेदसाधारण्यात्सर्वव्याप्यस्यसर्वसंनिह
तामसंज्ञीत्वतउद्गीथशब्देनासर्वविशेष्यते। कथंनाम उद्गीथावयवभूत ॐकारोगृह्येतेति। नन्वस्मिन्नपिपक्षेसमानालक्षणाउद्गीथशब्दो
द्गीथावयवलक्षणार्थत्वात्॥ सत्यमेवमेतत्लक्षणापितुसंनिकर्षविप्रकर्षैभवतएव॥ अध्यासपक्षेत्वर्थान्तरबुद्धिरर्थान्तरेनिक्षि
प्यतइतिविप्रकृष्टालक्षणा विशेषणपक्षेत्ववयवविवृत्तेनशब्देनावयवःसमर्प्यतइतिसन्निकृष्टात प्रदामेषुहिप्रवक्ता। इदाञ्चवमवे
षपिप्रत्यक्षादृष्टाः पदस्यामादिषु। अतस्त्रिष्वपिपक्षेष्वितिसिद्धेतद्वरमितिएतत्स्योद्गीथमित्येतद्विशेषणमितिसमंजसमेतन्निरवद्यमित्यर्थः॥
दैवत्वलक्षणस्यसगतावलवृद्धिर्यात्समयगुणलक्षणाश्रितात्तत्रप्रतीकोपास्तेर्विवक्षितत्वात्तरहतुप्रतीकोपास्तिविधिकल्पनेऽप्याप्त्यादिगुणकों
कारोपासनदृष्टिविधानेचवाक्यभेदःस्यात् अतःसर्ववेदव्याप्योंकारनिरूपसेनोंकारोपासनदृष्टिविधानार्थविशेषणमेवसमंजसंकल्पनालाघ
वादितिसिद्धं॥ ॥

शा॰स॰भा॰२
५६

सर्वाभेदाम्नाते मे॥ विषयं वर्ण्य सम्प्रत्ययमाह वाजिनामिति वाचो वसिष्ठत्वं गुणः वाग्मिनः सुखेनासदर्शनात् चक्षुषः प्रतिष्ठागुणश्च
क्षुष्मतः पादप्रतिष्ठादर्शनात् श्रोत्रं संपद्गुणकं श्रवणात्सर्वार्थसंपत्तेः मन आयतनत्वं गुणः तस्य चित्तिरूपं सर्वभोग्याश्रयत्वात् ते च गुणाः
प्राणस्य श्रैष्ठ्यं निखिलवागादिभिस्तस्मिन्नर्पिता इति शालाह्यसंमतोर्थः विषयमाह अन्येषामित्यादिना निःश्रेयसस्य श्रैष्ठ्यस्यादानं निर्धा

सर्वाभेदाम्नाते मे॥ १०॥ वाजिनां छन्दोगानां च शाखासंवादे श्रैष्ठ्यगुणान्वितस्य प्राणस्योपास्यत्वमुक्तं वागादयोपि हि तत्र वसिष्ठत्वादि
गुणान्विता उक्ताः। ते च गुणाः प्राणे पुनः प्रत्यर्पिताः यद्वा अहं वसिष्ठास्मि त्वं तद्वसिष्ठोसीत्यादिना॥ अन्येषामपि तु शाखिनां कौषीतकि
प्रभृतीनां प्राणसंवादे वृषपातो निःश्रेयसादानं एता ह वै देवता अहं श्रेयसे विवदमाना इत्येवं जातीयकेषु प्राणस्य श्रैष्ठ्यमुक्तं न त्विमे वसि
ष्ठादयोपि गुणा उक्ताः तत्र संशयः किमिमे तत्र वसिष्ठत्वादयो गुणाः क्वचिदुक्ता अन्यत्राप्युपसंहर्तव्या उत नेति॥ ॥ ॥ ५६

रणं प्रस्तूयत इत्यर्थः देवता वागादयो अहं श्रेयसे इत्यैक्यापेत्यर्थः। एवं शङ्कायां श्रैष्ठ्यगुणकप्राणप्रत्यभिज्ञानाच्च संशयमाह। तत्रेति गुणाना
मनुपसंहार उपसंहार एव पूर्वोत्तरपक्षयोः फलं॥ ॥

उद्गीथत्वविशेषणादोंकारस्य सर्ववेदव्याप्तिव्यावृत्तिवत्प्रकृतगुणमात्रग्राहकैर्वंशब्दैश्छंदांतरगुणव्यावृत्तिरितिदृष्टांतेन पूर्वपक्षमतिरत्र
प्राप्तमितिमुख्यावागादिप्राणाश्रेष्ठ्यसिद्धमथो तथापि एवंश्रेष्ठगुणविशिष्टानुपास्तेऽसमानोऽश्रेष्ठंविदित्वा ध्यात्वा श्रेष्ठो भवतीतिश्रुत्यर्थः एवंजा
तीयकविधेकास्त्राप्नमार्थिकं वसिष्ठत्वादिगुणजातमेवंशब्देनगृह्यतेश्रुतावलंबित्वादि तिमा मे तिष्ठं त पतिस्थेरन्नितिवाजसनेयिब्रा ॥

तत्रश्रुतंतावन्नास्येरन्निति। कुतः स्ववाक्योपसंयोगात्। श्रुयोमुख्येवैवंश्विद्धान्स्याणेनिःश्रेयसंविदितेति तत्रतत्रैवंशब्दैनवेदवस्तु
निवेद्यते। वेदशब्दस्य सन्निहितावलंबनो नस्याब्दांतरपरिपठितमेवंजातीयकंगुणजातंग्राह्यमितिनिर्बंधयितुं। तस्मात्स्वप्रकरणस्थैरेवगु
णैर्नियतकांक्षत्वमित्येवंप्राप्तेसमस्ताहारस्यैरन्नित्येगुणः क्वचिद्रूपावसिष्ठत्वादयोऽन्यत्रापिकृतः सर्वाभेदात्। सर्वत्रैव हितदेवैकूआणावि
त्तानमभिन्नंप्रत्यभिज्ञायते। प्राणसंवादादिसारूप्याच्चतेन्नेदेचविज्ञानस्यकथमिमेगुणाः क्वचिदुक्ताः अन्यत्रनास्येरन्। नन्वेवंशब्दोत्त
नतत्रभेदेनैवंजातीयकंगुणजातंवेद्यत्वासमर्पयतीत्युक्तं। अत्रोच्यते। यद्यपिकौषीतकिब्राह्मणगतेनैवंशब्देनवाजसनेयिब्राह्म
णगतंगुणजातमसंशब्दितमसंनिहितत्वात्। तथापितस्मिन्नेवविज्ञानेवाजसनेयिब्राह्मणगतेनैवंशब्देन तत्संशब्दितमितिपरशा
खागतमप्यभिन्नविज्ञानावरुद्धंगुणजातंस्वशाखागतादृष्टिद्युच्यते

तस्मात्पूर्वदेवंशब्देन वसिष्ठत्वादिगुणजातस्य प्राणविद्यासंबंधः सिद्धः सैवविद्याकौषीतकिश्रुतौ प्रत्यभिज्ञायतेतथाच्चगुणानांगुणविना
भावेनार्थतः प्राप्तानामपिश्रुत्यगुणैरविरोधात्संहैवश्रूतमार्थं चगुणजातंश्रुत्यर्थोभ्यां सन्निहितत्वाद्विशेषात्कौषीतकिगतेनैवंशब्देनपराम

शा॰सू॰भा॰३ कौषीतकिश्रुतिस्थः प्राणो वसिष्ठत्वादिगुणकः श्रेष्ठप्राणत्वाद्बृहच्छ्रुतिस्थप्राणवदित्यस्यां शङ्कायां तद्गुणानुमाने सति श्रुतहानिर्नास्ति अविरोधादि
५७ त्युक्ते सप्रयति नचैवं सतीति अपरिगणितानामपि गुणानां शङ्काया एवं सर्वत्र संशये तमाह नहीति फलितमाह तस्मादिति॥ आनंदादयः प्रधानस्य॥

नचैवं सति श्रुतहानिरश्रुतकल्पना वा भवति। एकस्यामपि शाखायां श्रुता गुणाः श्रुता एव सर्वत्र भवंति गुणवतो भेदाभावात्
नहि देवदत्तः शौर्यादिगुणत्वेन स्वदेशे प्रसिद्धो देशान्तरगतस्तद्देशैरविभावितशौर्यादिगुणोऽप्यतद्गुणो भवति। यथा चात्र परिचय
विशेषाद्देशान्तरेपि देवदत्तगुणा विभाव्यंते एवमभियोगविशेषाच्छाखान्तरेषूपास्या गुणाः शाखान्तरेप्युपसंह्रियेरन्। तस्मादेकप्रधा
नसंबद्धा धर्मा एकत्राप्युच्यमानाः सर्वत्रैवोपसंहर्तव्या इति। आनंदादयः प्रधानस्य ११ ब्रह्मस्वरूपप्रतिपादनपरासु श्रुतिषु आ
नंदरूपत्वं विज्ञानघनत्वं सर्वगतत्वं सर्वात्मत्वमित्येवंजातीयका ब्रह्मणो धर्माः क्वचित्केचिच्छ्रूयंते तेषु संशयः किमानंदादयो
ब्रह्मधर्मा यत्र यावंतः श्रूयंते तावंत एव तत्र प्रतिपत्तव्याः किं सर्वे सर्वत्रेति। तत्र यथाश्रुतिविभागं धर्मप्रतिपत्तौ प्राप्तायाम्॥ ५७

ब्रह्मणोऽनेकप्रसिद्धेर्निर्विशेषत्वाच्च संशयमाह तेषु संशय इति पूर्वपक्षे सत्यादिपदानुपसंहार एकवाक्यार्थानवधारणं सिद्धांते त्ववधार
णमिति फलं नानात्वविशेषत्वाद्युक्तः शाखान्तरीयवसिष्ठत्वाद्युपसंहारः ब्रह्मणस्तु निर्विशेषत्वात्स्वशाखागतपदैरेव प्रमितिसिद्धेर्थः

सिद्धांतमाह इदमिति आनंदत्वसत्यत्वज्ञानत्वादिसामान्यानि ब्रह्मणि कल्पिता धर्मास्तेषां सर्वशाखासूपसंहारो न मतद्वच्चक्रानंदादिप
दानामेकवाक्यतयोच्चारणमानंदः सत्यं ज्ञानमनंतं ब्रह्मेत्युक्तमद्वयमात्मेति तानि च समानाधिकरणानि पदानि विरुद्धधर्मत्यागेन सर्वाधि
ष्ठानभूतामेकामखंडव्यक्तिं लक्षयंतीति न चैकैकेनैव पदेन लक्ष्यसिद्धेः पदांतरं व्यर्थमिति वाच्यं एकस्मिन्पदे विरोधाभावेन लक्षणानवतारा
त् यद्यपि पदद्वयेपि लक्षणावतारस्तथाप्यानंदो ब्रह्मेत्युक्ते दुःखत्वोत्पत्तिभ्रांतिनिरासेप्यसत्यजडत्वादिभ्रमो भवेत् अतस्तन्निरासार्थं सस
इदमुच्यते आनंदरूपः प्रधानस्य ब्रह्मणो धर्माः सर्वैः सर्वत्र प्रतिपत्तव्याः कस्मात्सर्वाभेदाद्वसर्वत्रैव हि तदेवैकं प्रधानं विशेष्यं ब्रह्म न
भिद्यते तस्मात्सार्वत्रिकत्वं ब्रह्मधर्माणां तेनैव पूर्वाधिकरणोदितेन देवदत्तशौर्यादिनिदर्शनेन नन्वेवं सति प्रियशिरस्त्वादयोपि धर्माः
सर्वे सर्वत्र संक्रामेरन् तथाहि तैत्तिरीयके आनंदमयमात्मानं प्रक्रम्याम्नायते तस्य प्रियमेव शिरः मोदो दक्षिणः पक्षः प्रमोद उत्तर
ः पक्षः आनंद आत्मा ब्रह्म पुच्छं प्रतिष्ठेति अत्रोत्तरं प्रियशिरस्त्वाद्यप्राप्तिरुपचयापचयौ हि भेदे । प्रियशिरस्त्वादीनां धर्माणां ते
त्तिरीयक आम्नातानां नास्ति सर्वत्र प्राप्तिः प्रकारेण प्रियं मोदः प्रमोद आनंद इत्येते परस्परापेक्षया भोक्त्रंतरापेक्षया चोपचितापचितरू
पा उपलभ्यंते उपचयापचयौ च सति भेदे संभवतः निर्भेदं तु ब्रह्मैकमेवाद्वितीयमित्यादिश्रुतिभ्यः ॥
ज्ञानादिपदानि प्रयोक्तव्यानि न च भ्रमस्यानवधित्वात्कमपर्यवसितं स्यादिति वाच्यं सच्चिदानंदात्मकं सर्वधर्मशून्यमद्वयमविकल्पं ब्रह्माहमस्मि
ति विशेषदर्शनेन सर्वभ्रमनिरासात् तच्च विशेषदर्शनं यावद्भिः पदैर्भवति तावंति पदान्युपसंहर्तव्यानीति भावः ब्रह्मैकात्म्येत्वानंदत्वादिधर्माणां सर्वा
त्रशाखासु हि सगुणब्रह्मविद्यागतधर्माणां शिरःपिच्छादीनां शंकानिरासार्थं सूत्रमाचष्टे प्रियेति प्रियदर्शनं सुखं प्रियं तद्दर्शनादिना मोद इत्यादिपाठाति
शये प्रमोद इत्येवं तारतम्यवंतो धर्मास्त्वद्वयेहेपि न प्राप्नुवंति तेषामद्वयब्रह्मस्वरूपाणां ब्रह्मज्ञानानुपयोगादिति भावः ॥

शा.सू. तेषांब्रह्मधर्मत्वंचास्ति किमित्याह नचैतदिति अब्रह्मणि चिन्तावतारोपपत्तेरिति तेषां मा प्रिसम्मा स्मिन्नर्थे काम्रह एवमपीति अत्रेमथ्याद्देषांनत्वेयंब्रह्मणि अ-
प्तिरित्यर्थः किं मन्यन्ते हि एतत्रुमिस्सत आह ब्रह्मधर्मा नितिं कृत्वा चिंताफलमाह सर्चेति हे भेदाद्धर्माणामनुपपोगाद्रप्राप्तिरिति तन्मात्रायामात्वं पदह्याम-
५८ त्यादीनामप्राप्तिरिति सूत्रं व्याख्येममिलत्यर्थः ब्राह्मानुपमोगोपि ध्याने तेषां धर्माणां मुपमोगाद्रुपास्यत्रसेष्याङ्का मिरन्योन्याबेद्या मुख्यादिसाद्दांचा
नचैते प्रियशिरस्त्वाद्यो ब्रह्मधर्माः केवलधर्मा स्वेतद्वल्पदिष्टमादेनंममो भ्यासादित्वत अपि परस्मिन् ब्रह्मणि चिन्तावतारोपाययमात्रत्वेने
तेपरिकल्प्यंते तद्रूपत्वेन एवमपि स्तुतानन्ताप्राप्तिः प्रियशिरस्त्वादीनां ब्रह्मधर्मत्वेनान्नकृत्वा न्यायमात्रमिदमाचार्येण प्रदर्शितं प्रिय
शिरस्त्वाद्यप्राप्तिरिति सचन्यायोन्येषु निश्चितेषु ब्रह्मधर्मेषु पामनाद्योपदिस्यमानेषु नेतव्यः संपद्धमादिषु सत्यकामादिषु चानेषु हि सत्यपुर
स्यत्रुत्तणएकत्वेमक्रमभेदादुपासनभेदे सति नान्योन्यधर्माणामन्योन्यत्र प्राप्तिः यथा द्वेनायपि विविकं नृपतिमुपासीतेच्छत्रेणान्या चामरेणान्यातत्रो
पासकेकत्वेप्युपासनभेदो धर्मव्यवस्थाच भवति एवमिहापीति उपचितापचितगुणत्वं हि भेदे सतीत्यर्थः ॥ ॥ इतरेत्वर्थसामान्यात् १२ इतरे
त्वानंदादयो धर्माः ब्रह्मस्वरूपप्रतिपादनायैवोच्यमानास्वर्थ ✕ सति भेदव्यवहारे सगुणे ब्रह्मण्युपपद्यतेन निर्गुणे परस्मिन् ब्रह्मणि अतो न
सत्यकामादीनां धर्माणां क्वचित्श्रुतानां सर्वत्रप्राप्तिः ✕ सामान्यात् प्रतिपाद्यस्य ब्रह्मणो धर्मिण एकत्वात् सर्वे सर्वत्र प्रतीयेरन्निति वैषम्यं प्रतिपत्ति
मात्रप्रयोजनाहित इति ॥ ॥ ५८

उक्तेषुहीति ध्यानविधिपरंतत्र्यणांधर्माणां यथा विधिव्यवस्थेत्यर्थः संपद्धमत्वादिधर्मेभ्य आनंदादीनां वैषम्यं ज्ञानोपयोगित्वादित्याह इत
रे त्विति सत्यज्ञानानंदात्मब्रह्मशब्दाः पंचसर्वत्रोपसंहर्तव्या इति सिद्धं ॥ ॥ ॥ ॥

आध्यानाय वाक्यभेदाभेदानवधारणात्संशयमाह तत्रेति पूर्वपक्षे वाक्यभेदाद् द्विधा भेदः सिद्धांते वाक्यैकाद्विषेक्यमिति फलं पूर्वत्र ब्रह्मत्वभावा
नामानंत्यादीनामुपसंहार्यत्वं ब्रह्मज्ञानफलं पापत्वमुक्तं अनंतत्वसत्यत्वस्वभावस्यार्थादिपरत्वस्यानुपसंहार्यस्य तदुपास्यत्वमुच्यते इत्येकफलकसं
संगतिः तत्तत्परत्वविशिष्टत्वेनार्थादीनां पूर्ववत्तथा प्रतिपाद्यानां भेदाद्वाक्यभेदो न दोष इति पूर्वपक्षः उत्सूत्रसिद्धांतं प्रतिजानीते सोत्रं हेतुं चाच
आध्यानाय प्रयोजनाभावात् १४ काठके हि पठ्यते इंद्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः मनसस्तु परा बुद्धिरित्यारभ्य पुरुषान्न परं किं
चित्सा काष्ठा सा परा गतिः तत्र संशयः किमिमे सर्वे एवार्थादयः तत्र तत्र परत्वेन प्रतिपाद्यंते उत पुरुष एवैभ्यः परः प्रतिपाद्यत इति तत्र ताव
त्सर्वेषामेषां परत्वेन प्रतिपादनमिति भवति मतिः तथा हि श्रूयते इदमस्मात्परमिदमस्मात्परमिति ननु बहुष्वर्थेषु परत्वेन प्रतिपिपादयि
षितेषु वाक्यभेदः स्यात् नैष दोषः वाक्यबहुत्वोपपत्तेः बहून्येव ह्येतानि वाक्यानि भवंति बहूनामर्थानां परत्वोपेतानां प्रतिपादयितुं तस्मात्प्रत्येक
मेतेषां परत्वप्रतिपादनमित्येवं प्राप्ते ब्रूमः पुरुष एवैभ्यः परः प्रतिपाद्यत इति युक्तं न प्रत्येकमन्येषां प्रतिपादनं कस्मात्प्रयोजनाभावात्
न हीतरेषु परत्वेन प्रतिपन्नेषु किंचित्प्रयोजनं दृश्यते श्रूयते वा पुरुषे त्विंद्रियादिभ्यः परस्मिन्सर्वानर्थजातातीते प्रतिपन्ने दृश्यते प्रयोजनं
मोक्षसिद्धिः। तथा च श्रुतिः निचाय्य तं मृत्युमुखात्प्रमुच्यते इति अपि च परप्रतिषेधेन काष्ठाशब्देन च पुरुषविषयमादरं दर्शयन् पुरुषप्र
तिपत्त्यर्थैव पूर्वप्रवाहोक्तिरिति दर्शयति आध्यानायेत्याध्यानपूर्वकाय सम्यग्दर्शनायेत्यर्थः सम्यग्दर्शनार्थमेव हीहाध्यानमुपदिश्य
ष्टं पुरुष एवेति फलवत्वे सत्यपूर्वत्वात्पुरुषस्यैव प्राधान्येन प्रतिपाद्यत्वं अफलार्थादीनां परत्वं तु त ।। तेन त्वाध्यानमेवस्व प्रधानं ।। ।।
तच्छेषत्वेनोच्यत इत्यर्थः किंच पुरुषान्न परं किंचित्सा काष्ठेति वेदः परनिषेधलिंगेन सर्वावधित्वलिंगेन च पुरुषे तात्पर्यं दृश्यते पूर्वपूर्वस्मात्स्व
र्वस्मात्परस्यापरस्य परत्वोक्तिस्तदर्थेति दर्शयति तमाह अपि चेति अर्थादीनामनौक्तिर आध्यानायेत्यत्र तत्परत्वध्यानपूर्वकपुरुषदर्शनायेत्यर्थस्य

तः प्रयोजनाभावादिति सूत्रं योजयति आध्यानायेति ।।

शा.सू.भा. आत्मत्वादिलिंगेभ्यः पुरुष एव प्रतिपाद्य इत्याह आत्मशब्दाच्चेति किंच तद्विष्णोः परमं पदं पुरुषान्न परं किंचिदित्युपक्रमोपसंहारयोरैकरूप्या
त् कूटस्थवदेकः पुरुषः परत्वेनैकवाक्यत्वनिश्चयेनेति वाक्यभेदफलभेदकल्पनानवकाशो गौरवादित्याह आपिचेति आत्मगृहीतिरितिसूत्रे चल
५२ लोकाना(ह)श्चांभइतिद्युभः स्वर्गः मरीचयोन्तरिक्षलोकः मरो मर्त्यलोकः आपः पाताललोक इत्यर्थः आत्मश इत्यत्र लक्षणा न्यायात्मनि च प्रयोगात्
आत्मशब्दाच्च १५ इतश्च पुरुषप्रतिपत्त्यर्थैवेयमिंद्रियादिपरंपरा हे किं कारणं एष सर्वेषु भूतेषु गूढोत्मा न प्रकाशते दृश्यते त्वग्र्यया बु
द्ध्या सूक्ष्मया सूक्ष्मदर्शिभिरिति प्रकृतं पुरुषमात्मेत्याह अतश्चानात्मत्वमितरेषां विवक्षितमिति गम्यते। तस्यैव च दुर्विज्ञानतां संस्कृतम
तिगम्यतां च दर्शयति तद्धि ज्ञानमेव यच्छेद्वाङ्मनसी प्राज्ञ इत्याध्यानं विदधाति तद्व्याख्यातं आनुमानिकमप्येकेषामित्यत्र एवमनेकप्रकार
आदरातिशयः कृतः पुरुषे न तथेतरेषु अपि च सोध्वनः पारमाप्नोति तद्विष्णोः परमं पदमित्युक्ते किं तदध्वनः पारं विष्णोः परमं पदमित्या
कांक्षायामिंद्रियाद्यनुक्रमणात्परमपदप्रतिपत्त्यर्थ एवायमाम्नाय इत्यवसीयते आत्मगृहीतिरितरवदुत्तरात् १६ ऐतरेयके श्रूयते आत्मा
वा इदमेक एवाग्र आसीन्नान्यत्किंचन मिषत्स ईक्षत लोकान्नु सृजा इति स इमांल्लोकानसृजत अंभो मरीचीर्मरमापइत्यादि। तत्र संशयः किं प
र एवात्मा इहात्मशब्देनाभिलप्यते उतान्यः कश्चिदिति किं तावत्प्राप्तं न परमात्मेहात्मशब्दोभिलप्यो भवितुमर्हति कस्मात् वाक्यान्वयद
र्शनात् ॥ ॥
प्रथमाह तत्रेति। अत्र पूर्वपक्षे वाक्यस्य सृष्टोपास्तिपरत्वात्परब्रह्मधर्माणामानंदादीनामैतरेयकेनुपसंहारः सिद्धांते ब्रह्मपरत्वादुपसंहार इति
फलं पुरुषवाक्ये दृष्टः प्रजापत्याद्यर्थादिवाक्यानां नार्थादिप्रतिपादकत्वमित्युक्तं तद्वदिह प्रजापतेरेतो देवा इति पूर्वस्मात्प्रजापतिवाक्योद्धृत्यसंगाद ५९
माया इत्यादिवाक्यस्य न ब्रह्मपरत्वमिति दृष्टांतेन पूर्वपक्षयति न परमात्मेत्यादिना वाक्यस्य प्रजापतौ तात्पर्यदर्शनादित्यर्थः ॥ ॥

पूर्वं प समासि(?)प्सलोकस्य सूत्रलिंगात्मप्रजापतेर्वाक्यान्वय इत्याह नन्विमानित्यादिना लोकाः स्वर्गमहाभूतानीति सत आह लोकाश्चेति लोकश्रुत्या समहा
भूते घरूढत्वाद्वैतिकाएव लोकाः निर्वचनाच्चेत्याह तथा चेति अंभो मरीचीर्मरमापइति स्ह अपि ताम्ये सुभिकश्चान्तिरुक्ता व्याचष्टे परेणेति दिवं द्युः परस्ता
द्दिवि प्रतिष्ठितत्वाद् अंभसामापूर्णत्वाल्लोकस्य स्वर्गंभः अंतरिक्षं मरीचयः पृथिवीमरोपाभूधस्तानामाप इति ननु लोकसृष्टिरपीश्वरादेवास्तु नेत्याह
ननु वाक्यान्वयः सूत्रं तस्य परमात्मत्वविषयो दृश्यते प्रागुक्तरीत्यैकत्वावधारणात् इमानिति पूर्वोक्तसृष्टत्ववचनाच्च नेत्युच्यते लोकसृष्टिवचना
न परमात्मनि हि सत्त्व रिपरिगृह्यमाणे महाभूतसृष्टिरहेतुका व्यालोकसृष्टिर्विहायैव श्रूयते लोकाश्च महाभूतसंनिवेशविशेषाः तथा चांभः
प्रभृतीनां लोकत्वेनैव निर्वचनिर्वचनीभ्यां दोऽभः परेण दिवमित्यादिना लोकसृष्टिश्च परमेश्वराधिष्ठितेन परेणाकेनचिदीश्वरेणाक्रियत इ ॥
ति श्रुतिभ्यस्तेषां व्युत्पलभ्यते तथा हि श्रुतिर्भवति आत्मैवेदमग्र आसीत्पुरुषविध इत्यादिश्रुतिरपि लये शरीरी प्रथमः स वै पुरुष उच्यते
आदिकर्त्ता स भूतानां ब्रह्माग्रे समवर्तततेति ऐतरेयिणामपि श्रूयते रेतसः सृष्टिः प्रजापते रेतो देवा इत्यत्र एवंविधस्य करणे प्रजापतिकर्तृकोऽपि
विचित्रां सृष्टिमामनन्ति आत्मशब्दोऽपि तस्मिन्प्रयुज्यमानो दृश्यते आत्मैवेदमग्र आसीत्पुरुषविध इत्यत्र एकत्वावधारणमपि प्रागुत्पत्तेः स्व
विकारापेक्षमुपपद्यते ईक्षणमपि तस्य चेतनत्वाभ्युपगमादुपपन्नं अपि च ताभ्यो गामानयत्ताभ्योऽश्वमानयत्ताभ्यः पुरुषमानयत्ताभ्योऽब्रुवन्
इत्येवं जातीयको भूयान्व्यापारविशेषो लौकिकेषु विशेषवत्स्वात्मनुमानेषु इहानुगम्यते तस्मात्तु विशेषवानेव कश्चिदिहात्मा स्यादिति॥ ॥
लोकेति पुरुषविधानएकारस्त्राल्लाहिरण्यगर्भः आपिपीलिकाभ्यः सर्वे भस्म जनतेसर्वः भूतानां लोकानामिति सर्वः प्रकरणं इति लोकसृष्टा प्रजा
पतिरित्याह ऐतरेयिणोपीति रेतः कार्यमिति यावत् अहं लिंगात्मिप्रजापतौ प्रजापतिश्चात्मशब्दोपीत्यादिना किं च प्रजाः सृष्टाः प्रति भोगायतनामा
परमो कस्मात्तथाम्यमानयतात्गवाश्वमास्मान्ततः पुरुषशरीरेऽपिनिनेतान्त्र ब्रुवन्तः मां स्म इति अपंचप्रव्यवहारे लोकसृष्टः प्रजापतित्वे

शा. सू. आत्मग्रहस्यचिदात्मनैवमुख्यत्वान्मुख्यस्यहेत्वाधकाभावादुत्तरस्येक्षणादेरनुकूल्याच्चपरमात्मग्रहणमितिसिद्धांतयति. एवंप्राप्तइतिमहाभा

६०

एवंप्राप्तेब्रूमः परएवात्मेहात्मशब्देनगृह्यते इतरवत् यथेतरेषुसृष्टि श्रवणेषुतस्माद्वाएतस्मादात्मन आकाशः संभूतइत्येवमादि
षुपरस्यात्मनोग्रहणं यथाचेतरस्मिन्लौकिकात्मशब्दप्रयोगेप्रत्यगात्मैवमुख्यआत्मशब्देनगृह्यते तथेहापिभवितुमर्हति यत्रआत्मै
वेदमग्रआसीदित्येवमादौपुरुषविधत्वेवमादिविशेषणांतरंश्रूयतेभवेत्तत्रविशेषवतआत्मनोग्रहणं अत्रपुनःपरमात्मग्रहणा
नुगुणमेवविशेषणमुत्तरमुपलभ्यतेसईक्षतलोकांनुसृजाइतिसइमांल्लोकानसृजतेत्येवमादितस्मात्तस्यैवग्रहणमितिन्याय्यं॥७॥

६०

तस्यैक्षापूर्वकंलोकानसृजतेतिश्रुतिर्योरव्येमेतिभावः॥ ॥ ॥ ॥ ॥ ॥

पर्वपक्षबीजमनूद्य दूषयति अन्वयादिति आत्मा वा इदमेक एवाग्र आसीत् प्रज्ञानं ब्रह्मेति चोपक्रमोपसंहारस्थात्मब्रह्मश्रुतिभ्यामेकत्वावधा
रणात्स्वेशादिलिंगैश्च लोकवत्पूर्वादिलिंगबाधेन परमात्मग्रहणं न्याय्यमिति भावः। स परमेश्वर एतमेव सीमानं मूर्धकेशविभागस्थानं विदार्यैवेति श्रु
अन्वयादिति चेत्स्यादवधारणात् ॥१७॥ वाक्यान्वयमदृष्ट्वा न परमात्मग्रहणमिति पुनर्यदुक्तं तत्परिहर्तव्यमिति। अत्रोच्यते स्यादवधारणा
दिति भवेदुपपन्नं परमात्मनो ग्रहणं कस्मादवधारणात्। परमात्मग्रहणे हि प्रागुत्पत्तेरेकत्वावधारणमांजसमवकल्पते अन्यथा ह्यन्
जसं तत्पारिकल्पेन। लोकस्य हि प्रत्यक्षं तत्तरं प्रसिद्धमहाभूतसृष्ट्यनंतरमितितिस्रो गायत्र्यभिमुख्यात्तेजोऽसृजतेत्येतस्तत्सिद्धविप
द्वपुरःसृष्ट्यनंतरमिति सप्तपूजं एषमिह हि विशेषसंतरश्रविद्धो हि समानविषयो विशेषश्च सन्नरे ह्युपसंहर्तव्यो भवति। यो प्यपं व्यापारविशेषोपक्रान्तत्वा
गोगामानमपदिस्पादिः सोपि विवक्षितत्वावधारणानुगुणोपनैव ग्रहीतव्यः न तु यथासंकल्पः कृत्स्नसंबंधाविवक्षितत्वादितिदयाते बरकु तत्पाति एकोपुरुषा
यीभावात् अल्पात्मसंबंधे हि विवक्षितं तथा च प्रभवः प्रभृतीनां लोकानां लोकपालानां चाप्सादीनां सृष्टिश्च सृष्टकरणानि करणायतनं च शरीरं ऽप्यादिश्य
स एवं स्त्वात्त्वाकथं न्विदं मदृतेस्यादिति वीक्ष्य इदं शरीरं प्रविवेशेति दर्शयति स एतमेव सीमानं विदार्यैतया द्वारा प्रापद्यतेति पुनश्च यदि वाचाभिव्या
हृतं यदि प्राणेनाभिप्राणितं तमित्येवमादिना करणव्यापारविवेचनपूर्वकं अथ को हमितिवीक्ष्य स एतमेव पुरुषं ब्रह्म ततममपश्यदिदमदर्शमिति
मनवधारयति तथा परस्तादेवमं लेखं इदस्मादिना समस्तभेदजातं सह महाभूतैरनुक्रम्य सर्वं तत्प्रज्ञानेत्रं प्रज्ञाने प्रतिष्ठितं प्रज्ञानेत्रो लोकः प्रज्ञा
प्रतिष्ठा प्रज्ञानं ब्रह्मेति ब्रह्मात्मत्वं दर्शयन्नेवमवधारयति तस्मादिहात्मग्रहीतिरिष्यनपवादं ॥ १८ कृत्वा तथा अत्र कर्त्तव्यपाठात्लिंगविशिष्टः प्रविष्ट
वानि सर्वः प्राणविद्यायां आचामति आचामति अथ यदा हं इति तत्पदार्थविचार्य स्वयमेव तमेव बोधितमात्मानं चक्षुरादितत्संख्यातनममपश्य
तत्सकारलोपः छांदसः प्रज्ञा चिदात्मनेन नीयते नेनेतिनिमानकं यस्मात्सहानेत्रं विदितमनियमस्य मिसर्पः॥ ७ ॥ ७ ॥

उक्रमाख्याने गुणोपसंहारस्यास्फुरत्वान्न पादसंगतिरिति मत्वैव आध्यानायेत्याह अपरेति इह प्रयोजनाभावादित्युक्तः उपसंहारः स छन्दस्यालोकानन्दाधारत्वा
शा. सू. भा. त्मैसाम्यमाह तत्रेति पत्रैवपुरुषेलानां लोकानामस्रष्टृत्वात्संपद्यपत्तिः छान्दोग्ये वाजिश्रुतौ निगुणविद्येति भेदात्किंचो गुणानुपसंहारः सिद्धान्ते तु अभमत्रनिर्गु
६१ णविद्यैवापुपसंहार इति फलेभेदः परमात्मेति किं गृह्यात्म छान्दोग्ये विसत्वे जातिवाचौ तु पक्रमस्वानिश्चितार्थत्वादसत आत्मविशेषोपक्रमत्व उक्तमात्मेति
अपरे पुनरात्मगृहीतिरितरवदुत्तरात् १८ वाजसनेयके सत्यमय्यस्मैनिपीयंविज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः इत्यात्मशब्देनोपक्र
म्य तस्यैव सर्वसंगविमुक्तत्वमति पादनेन ब्रह्मात्मतामवधारयति तथा छान्दोग्ये परमहरति सदाख्यमहान्त्तमभ्यासात्मजातां अतो भयोग्रलेति छान्दोग्ये तु
सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमित्यात्मशब्दमनुपक्रम्य उद्दालके स आत्मा तत्त्वमसीति तादात्म्यमुपदिशति तत्र संशयः तुल्यार्थत्वं किमन
योराहोस्विन्नेति अतुल्यार्थत्वमिति तावत्प्राप्तं अतुल्यत्वात् प्राप्तावुपदेशाद्गम्यते छान्दोग्ये तूपक्रमविपर्ययात् उपदेशाविपर्ययः न
तु वाजसनेयिनामप्युपलिङ्गके तादात्म्योपदेशाद्यस्तुल्य उपक्रमस्तन्त्रस्य उपसंहारस्य तादात्म्यसंपत्तिः सेति मन्यते तथा प्राप्तेऽभिधीयते
आत्मगृहीतिः सदेव सोम्येदमग्र आसीदित्यत्र छान्दोग्यानामपि भवितुमर्हति इतरवत् यथा कठनमस्यात्मत्वस्य वाजसनेयिनामात्मगृहीतिः तथैव
कस्मात् उत्तरात् तादात्म्योपदेशात् अन्वयादिति चेत्स्यादवधारणात् १९ पदक्रम॥ ॥ ॥ ॥ ॥
पदेशः संपत्तिपरतया नेयमिति पूर्वपक्षनिष्कर्षः पूर्ववदात्मैकत्वदर्शित्वात् परत्वं स्यात् कार्यविधेयस्य तु कथं हेतुसदात्मशब्दाभ्यां आत्मा लभ्यतामिति चिन्त्या उपक्रम
भेदाद्वाक्यभेद इति शिवाभेद इति प्रत्युदाहरणसंगतिः न चात्मशब्दोऽजातिवाचकः आत्मव्यक्तेरेकत्वादात्मनो जातिः किंतु सर्वांतरवस्तुवाचकः कल्पितजा ६१
तिवाचित्वेऽप्युपक्रमभेदः स्फुट एवं वाक्यान्वयो भेदादिति मंतव्यं सिद्धान्तमति तथैव साहित्॥ ॥ ॥ ॥

उपक्रमान्यथाहृतिरिति उपक्रमाधीनत्वादुपसंहारस्येत्यर्थः तत्रावधारणं सत्सदेनात्मैक्यं हीतो सत्सोम्येत्युपक्रमात्तदात्मेति सदेकमेवेत्यवधारणं अनेन जीवेनात्म
नेति सदेवताकर्तृकोजीवस्यात्मशब्देन परामर्शः सुषुप्तौ जीवः सता संपन्नो भवतीति कथनं भूमत्वमात्मनाम्नाविज्ञानोपपत्तिनिपरिच्छेदनात् सदितिपदेन सन्मात्रा श्र
वणस्यैतेनज्ञातिमात्रे कृत्स्नाविद्याविद्यन्मात्रसमाप्तत्वात् तथा चोपक्रमे सत्ताया प्रसक्तात्मान्यो कैश्चिदाश्रमाद्यलौकिकासाधारणं कस्यैषा हात्मेति निश्चीयत इत्याह न
उपक्रमात्मनामात्मोपक्रमे चात्मन आत्मशब्दप्रयोगाभावात् आत्मैक्यं हीति तस्यैकः परिहार इति चेत् सोऽभिधीयते स्यादवधारणादिति भवेदुपपन्ने हात्मैक्ये हो
तिः अवधारणात् तथा हि येनाश्रुतं श्रुतं भवति अमतं मतमविज्ञातं विज्ञातमिति एकविज्ञानेन सर्वविज्ञानमवधार्यते तदपि पादृगिवभासदेवेत्याह न तु
ज्ञात्मैक्यं हीतोसत्संपद्यते अन्यथा हि योपमुख्यस्यात्मा स्वविज्ञानादिने नैव सर्वविज्ञानं संपद्येत तथाप्यात्मन्येकत्वावधारणं जीवस्य चात्मत्वादृ
न परामर्शः [illegible] पुनस्तत्त्वमसीत्यवधारणमिति च सदेवेति तत्रात्म्यप्रतिपादनात् आत्मैक्यं
कल्पते न तादात्म्यस्य प्रतिपादनात् तथा चोपक्रमे तत्त्वतोऽयमात्मा: तथोपक्रमे आत्मत्वसंकीर्तनमनात्मत्वसंकीर्तनं वास्ति सामान्योपक्रमश्च न वा स
शेषगतेन विशेषेण विरुध्यते विशेषाकाङ्क्षित्वात् सामान्यस्य सत्त्वं स्यादेवेत्यपि च परिपालो च्यमानो नत्वन्यथा ततो न्यः संभवति अतोऽन्यस्य तत्त्वज्ञानस्यात्
मनाशात्यादिभ्योन तत्त्वोपपत्तेः आम्नाय नैवैतस्यमपि नावरूपमर्थवैयर्थ्यमावहति आहरणात्मक्रमात्मरेसादिवदुपसंहारेपिच तद्दर्शनात् तस्मादेवंजातीय
केषु वाक्येषु शक्तिपादनप्रकारभेदेऽपि प्रतिपाद्यार्थाभेद इति सिद्धं॥ ॥

न चेतिसच्छब्दस्यात्मानात्मसाधारणमुपेयोऽस्तु तदपि नास्ति आकाङ्क्षापदवृत्तस्य सदृशस्य व्यक्ति कांचिदात्मव्यक्तिं परामृशायोपपद्यते तस्मात् चैत्तिनवाजिकं देश
मो रूपक्रम वैषम्यमिति साहसं तृप्तेति वैषम्यमुपेत्याह आम्नानेतिवाजिनां केवलमर्थस्य तदर्थपर्यन्तमेकलक्षणस्यप्रतिपादनं छान्दोग्यवाक्ये तु तदर्थस्यसमर्थप
र्यन्तस्थप्रतिपादनमितिप्रकारभेदेऽपि वाक्यार्थैक्यादित्येकमितिफलितमाहतस्मादिति॥ ॥ ॥ ॥ ॥ ॥

श्रा॰ सू॰ भा॰ ३ कामीरस्यानादरत्वं। ननु किमर्थं किं वा स इति प्रासंगेन दृष्टा वा गच्छस्य कस्तु: परिदृष्टं किं वास्य स्वस्या लभिप्रत्यस्तत्वे ऽन्यस्मा पो वा स इति सर्वमालिभि
६२ मुख्यमानं परिदृश्य सिद्धं स्यादिपर्यंतमन्यंतलमाणस्य नवान्नं आपश्चा कृदन्तमिलुपास्ते नर्थि तनीमाभिलषुः स्या स्वा हूये ऽथ विशेषश्च तिमुक्ता
विशेषश्च तिभेदमाहानन्तरं चेति तस्मादर्शमाणवस्थलादशिष्यातो ऽन्नं कुर्वंतः श्रोत्रिया एतत्कुर्वंतिकिं तत्र उच्यते तद्वेदुर्यचा वा मंती ति यत
नदृष्टिः मायणपरिदधत्वा छादयंती सर्वैः दृष्टीं तरचमनमनसं वर्गिनी स्युस्युमाणवा सत्स्वंचिं तनस्य पमनन्यूनत्वध्याने का मेमिति भाव: तत्र
स्मादिसुतार्थ्यतः पूर्वविदुः सोऽहनात्या कृत चचाचामंतनए नमेवानं ज्ञातं तत्तेनाचमनेनानग्रमाच्छादितं कुर्वंतो मन्यंतेचितमंति तस्मादेवं विदि

कामीरस्यानादरत्वं २० छंदोगा वाजसनेयेन श्रूयमाणसंवादेस्यादि ■ पीदंसाणगस्यानुभाष्यामतत्स्येगपो वा स्यश्रामनंति। अनंतरं च छंदो
गाश्चामनंतितस्माद्वा एतद्दशिष्यतः प्रस्तोत्रोपरिष्टादद्भिः परिदधतीति वाजसनेयिनश्चामनंतितद्विद्वांसः श्रोत्रिया अशिष्यं तत्रा
चामंतमशित्वा चाचामंति एतमेव तदनमनग्नं कुर्वंतो मन्यंते तस्मादेवं विदशिष्यन्नाचामेदशित्वा चाचामेदेतमेव तदनमनग्नं कुरुत इति
तत्राचाचमनमनग्नतचिंतनं च श्राणस्य मनीयते तत्किमुभयमपि विधीयते उताचमनमेवाननग्नताचिंतनमेवेति विचार्यते किं तावत्प्रा
प्तमुभयमपि विधीयत इति मत इति कृतः उभयस्याप्यवगम्यमानत्वात् उभयमपि चैतदपूर्वत्वाद्विधेयं॥

दानीं तन्मोप्रपासकत्वं कुर्यादिति वाजिश्रुत्सचे: अत्रोभयोरप्यपूर्वत्वात्संशयमाह तत्किमिति संदिग्धस्तु पक्षः न स्यादाचमनेनाग्निरेवद ६२
चामंतीति पदस्य विधित्वसंहारइति विवेक:॥ विधिविचारात्सादसंगतेर्वेध्याइर्वपक्षमाणविद्यांगत्वेनापूर्वत्वान्नविहितमन्यत्रोपसंहृतत्वमि
तिप्रत्यंमिद्धं तेनस्यावि धेयत्वा नांगत्वेनोपस्थाहात्ये आचामेदितिवाप वासुबुधित्वनिर्णयते इत्यं तत्संगसापूर्वपक्षमाह किं तावदिति॥

इत्यमपविशेधातेवाक्यभेदः स्यादितिसरूपमाप स्नांतरमाहाथर्वेति अर्थः सं हि इदमाचमनं यस्मादनेनप्राणमनगृभ्णस्तं तदिति स्मृतिः प्रसिद्धा
नुवादेनापि सिद्धं विधेयमिति तन्मा मेतत्सिद्धांतयति एवमिति अप्रमतस्य प्रमत्तत्वतोभावः प्राप्तं संत्कृदित्वात् प्राप्ति स्यर्थः स्मृताप्युपयोगिकापि नि
नविहितं सकलकर्मांगतयाप्राप्ताचमनानुवादेनापूर्वमनग्नताध्यानमेव विधीयत इति सूत्रार्थः स्मार्तमाचमनं कृत्स्नमानुवद्यते किं तत्र

अथवाचमनमेव विधीयते विस्मृताहितस्मिन्विधिविनक्तिः तस्मादेवं विद् इशितव्यमाचामेदधिवा वाच्याप्रेदितितस्यैव स्मृतत्वमर्थमन
गतासंकीर्तनमस्येवंशानेस्मृतः नाचमनस्य विधेयत्वमुपपद्यते कार्मीत्वानात् प्राप्तमेवाहीदकार्मत्वेनाचमनं प्राप्तसार्थस्मृति
प्रसिद्धमन्वाख्यायते नन्वियं श्रुतिस्तस्याः स्मृतेर्मूलं स्यात् नेत्युच्यते विषयनानात्वात् सामान्यविषयाहि स्मृतिः पुरुषमात्र
संबद्धं प्राप्तत्वात्प्राचमनं प्रापयति श्रुतिस्तु प्राणविद्याप्रकरणपठिता तद्विषयमेवाचमनं विदधतीति विद्ध्यात् तत्र भिन्नविष
यपोः श्रुतिस्मृत्योर्मूलमूलीभावो वक्तव्ये नचेयं श्रुतिः प्राणविद्यासंयोगपूर्वमाचमनं विधास्यतीति शक्यमाश्रयितुं पूर्वस्मि
न्पुरुषमात्रसंयोगिनस्त्वाचमनस्य विहितस्य प्रत्यभिज्ञायमानत्वात्॥

स्याविहितंस्य स्मानूद्यत इति शंकते नापीति श्रुतिस्मृत्योरनयोर्न मूलमूलीभावः भिन्नविषयत्वादिति परिहरति नेति द्विजो नित्यमुपस्पृ
शेदिति स्मृतिः आचमनंतल्लभ्य विधिमुपेत्य मूलमूलित्वं निरस्तं संगतिविधिरसिद्ध इत्याह नचेयं श्रुतिरिति॥ ॥ ॥

अत एवेति आचमनविध्यभावादेवेत्यर्थः अप्सु स्नाने वा सत्त्वध्यानादेः संकल्पः प्राणविधांगत्वेन विधीयत इत्याह तस्मादिति स्वपंचेति अपूर्वत्वादित्यर्थः
अध्यर्थी तेनिषु कस्याचमनस्य प्राणछादनार्थत्वं विरुद्धमित्याशंक्याह नचैवं सतीति आचमनस्याछादनार्थत्वमसिद्धमित्यर्थः किंचप्रथापूर्ववाक्येप्राणाख्या
न ध्यानमंगांविहितं तत्प्रयाणकाले ध्यानंविधीयते आचमनविधौ पूर्वत्रध्यानविधिरुत्तरत्राणेत्याविधिरित्युभयत्र तस्मादित्याह अपिचेती भसमेदितिश्रु
अतएवचनो भमविधानं भमविधाने चवाक्यंभिद्येत तस्मादाचमनेवाद्भिः प्रिपता महितवर्ता चाद भमतआचमनमनपद्यतमेवतद नस्कुर्वंतीममन्यंतइति
माणस्यानग्रताकरणसंकल्पः तेनवाक्येनचमनीयास्वप्सुप्राणविद्यासंबंधित्वेनापूर्वमुपदिश्यते नचाचमनग्रतावादस्याचमनस्तुत्यर्थ इतिमाध्यं आचम
नस्याविधेयत्वात् अपि चानग्रतासंकल्पस्य विधेयत्वमतीतेः नचैवं सत्येकस्याचमनस्योभयार्थत्वाभ्युपगतो भवति प्रापणार्थताभिधानार्थतावेति क्रियांतर
त्वाभ्युपगमात् क्रियांतरमेव ह्याचमनं नाम नमप्रयोगार्थं पुरुषस्याभ्युपगम्यते तद्विषयस्तु वासः संकल्पनं नाम क्रियांतरमेवपरिधानार्थमाप्रयोगस्याभ्युपगम्यता
लनंवस्त्र अपिचयदिदं किंचाश्वभ्यः आकृमिभ्यः आकृमिभ्य आकीटपतंगेभ्यस्तत्तेन्नमित्यनेनान्नमर्वान्नभवहारासंभवोयतं ननु अन्नवाचमनीयास्तु
परिधानमित्यवधृतमिति प्रयुक्तं नहाथवैस्यसर्वं भवति अपिवाचामंतीतिवर्तमानापदेशिनामपूर्वविधिस्संभवः ननुमन्मतदत्यविसमानवर्तमानापदे
शिलसत्यमेवतत् अपर्वस्य विधेयत्वमतदस्ति नवासः कार्यत्वानात् अर्पणवासः संकल्पनमेवापूर्वविधीयतेनाचमनंपूर्ववद्विहितत्वादित्युपपादितमदपुर्वमिति वि
स्पष्टाचाचमनेविधिविभक्तिरिति तदपि एवंवत्वेनैवाचमनस्यप्रयुक्तं ॥

पूभावाद्यापरेनत्सर्वस्यमनुष्मेणोपासकेनभोक्तुमशक्यत्वाच्चनपूर्ववाक्ये क्रियाविधिरित्यर्थः इतश्चाचमनमत्रनविधेयमित्याह अपिचेति अनग्नमनं ६३
नद्भुत्रवासस्त्वध्यानमपिनविधेयंदोषत्वादितिशंकतेनन्विति भमेरप्यनुवादत्वेवैफल्याद्वक्षमनेकानुवादेनैकंविधेयंतत्रविधेयवासोध्यानमेव
वासः कार्यस्यानमत्वस्यानात्वानादपूर्वत्वाच्चेति समाधानार्थः एवंवरितिश्रुत्यान्नमितिसर्वः ॥

आचामेदिति न विधिः किंतु विध्युरूपां श्रुप एष्प इतिवदनुवाद इत्यत्र लिंगमाह । तद्वेति । तस्मादेवंविदशिष्यन्नाचामेदशित्वा चाचामेदिति वाजस
विधित्वेकारोऽवेरपठनं लिंगमित्यर्थः । तर्हि पाठबलान्माध्यंदिने आचमनविधिः काण्वे ध्यानविधिरिति कस्यचिन्मतं निराकरोति योऽपीति । समान एवं
चाभेदात् । शांडिल्येन दृष्टां तत्राम्नां किल । अंतर्हृदये व्रीह्यादिवत् सूक्ष्मं तिष्ठतीत्यर्थः । अभ्यासमसमभिज्ञानाभ्यां संन्यायमाह तत्रेति । गुणानुपसंहारोप
श्रुत एवाचमनस्याविधित्सितत्वादेतमेव तदनमनग्नं कुर्वन्तो मन्यन्त इत्यस्यैवैकवाक्यतः प्रार्थवत्त्वं जितमनग्नमिति तस्मादेवंविदित्यादि । तस्मात्साध्वं
दिल्लानामपि पाठे आचमनानुवादे नैव विरुद्धमेवमकृतमाणवासो विलंविधीमत इति प्रतिपत्तव्यं योऽपमभ्युपगमः कश्चिदाचमनं विधीयतां किं
वासोविज्ञानमिति सोऽपि न साधुः । आपो वास इत्यादिकामावाक्यभेदेनैः सर्वत्रैकरूप्यात् । तस्माद्वासोविज्ञानमेवेह विधीयते नाचमनमिति सिद्धं । स
मान एवं चाभेदात् वाजसनेयिशाखायामग्निरहस्ये शांडिल्येनाम्नां किल तां विद्यां विज्ञाताः । तत्र गुणाः श्रूयन्ते । स आत्मानमुपासीत मनोमयं प्राणश
रीरं भारूपमित्येवमादयः । तस्यामेव शाखायां बृहदारण्यके पुनः पठ्यते मनोमयोऽयं पुरुषो भाःसत्यस्तस्मिन्नन्तर्हृदये यथा व्रीहिर्वा यवो वा स
एष सर्वस्येशानः सर्वस्याधिपतिः सर्वमिदं प्रशास्ति यदिदं किं चेति तत्र संशयः किमियमेका विद्याग्निरहस्यबृहदारण्यकयोर्गुणोपसंहारश्च उत
द्वे इमे विद्ये गुणानुपसंहारश्चेति । किं तावत्प्राप्तं । विद्याभेदो गुणाव्यवस्था चेति । कुतः । पौनरुक्त्यप्रसंगात् । भिन्नासु हि शाखासु अध्येतृवेदितृभेदात् सोऽन
रूपपरिहारमालोच्य विद्यैकत्वमध्यवसाय एकत्र पठितानां गुणानामितरत्रोपसंहृियन्ते प्राणसंवादादिष्विव युक्तः । एकस्यां पुनः शाखायामध्येतृवेदितृ
संघाते ... पौनरुक्त्यपरिहारेण विप्रकृष्टदेशस्थे एका विद्या भवितुमर्हति ॥
ता ... इहत्वेकशाखायां विप्रकृष्टदेशस्थत्वात् अभेदेक ... विधिलं मन्यस्यानुवादत्वमिति सिद्धान्तात् ... घापि धिलमितिमसुदाहरणे
न पूर्वपक्षे ... किंचिद्वाद इतिमतत्सुनरुक्तं तद्विधान्तरमिति न स्याहिः ... विधासु अभिवादादिसाद्यं स्याभेदे पुनरुक्तिप्रसिद्धेस्सुरूमिष्या हि पिन्ना

यथाग्निहोत्रवाक्ये कर्मणि विधिः दध्ना जुहोतीति इति वाक्ये गुणविधिस्तथात्रापि स्तन विद्याभेद इत्याशङ्क्याह न चात्रैकमिति एकगुणं वा पुनरुक्तिर्व्यर्था स्यात्
अतोऽभ्यासाद्विद्याभेदः प्रयाजभेदवदिति भावः। उक्तगुणोक्तिर्व्यर्थातो कतिपयगुणविशिष्टे पाठाभेदेऽप्यभिज्ञानार्थैवादत उपास्यरूपाभेदाद्भिन्नशाखा

न चात्रैकमाम्नानं विद्याविधानार्थं अपरं गुणविधानार्थमिति विभागः संभवति तदुपातिरिक्तस्यैकगुणस्य इतरत्रेतरत्र चाम्नायेरन्। न
समानाः समाना अपि तूभयत्राम्नायन्ते मनोमयत्वादयः। तस्मान्नामैकगुणोपसंहार इत्येवमात्र ब्रूमहे। यथाभिन्नासु शाखासु विद्यैकत्वं गु-
णोपसंहारश्च भवति। एवमेकस्यामपि शाखायां भवितुमर्हतीत्युपास्याभेदात्। तदेव हि ब्रह्म मनोमयत्वादिगुणकमुभयत्राप्युपास्यमभिन्नं प्रत्यभि-
जानीमः उपास्यं च रूपं विद्यायाः न च रूपाभेदे विद्याभेदमध्यवसातुं शक्नुमः। नापि विद्याभेदे गुणव्यवस्था। ननु पौनरुक्त्यप्रसङ्गाद्विद्याभेदोऽध्यवसि-
तः नेत्युच्यते। अर्थविभागोपपत्तेः। एकं ह्याम्नानं विद्याविधानार्थं अपरं गुणविधानार्थमिति न किंचिन्नोपपद्यते। नन्वेवं सति परपठितमग्नि-
रहस्ये तद्बृहदारण्यके पठितव्यं स्यात् एष सर्वस्येशान इत्यादि। यत्तु पठितं मनोमयत्वादि तत्र पठितव्यं। नैष दोषः। तद्बलेनैव देशान्तरपठित-
विद्याप्रत्यभिज्ञानात्। समानगुणाम्नानेन हि विप्रकृष्टदेशान्तर शाण्डिल्यविद्यां प्रत्यभिज्ञाप्य तस्यामीशानत्वाद्युपदिश्यते। अन्यथा हि कथं तस्यामयं गु-
णविधिरभिधीयते। अपि चापूर्वार्थप्रापिपदेशेनार्थवितिवाक्येसंजातेऽप्राप्तांशप्रमर्शप्रतिलानुवादत्वमाप्युपपद्यमानत्वान्न तद्बलेन प्रत्यभिज्ञोपेक्षि-
तुं शक्यते। तस्मादत्र समानानामपि शाखानां विद्यैकत्वं गुणोपसंहारश्चेत्युपपन्नं॥

शिव समानशाखानामपि विद्यैकत्वमिति सिद्धान्तसूत्रं योजयति। यथेति। सैत्रयके ऐष्टयौ काण्डे रमातः पत्रावहवीगुणः क्रतास्तत्र प्रधानविधिरन्य-

त्रैतदनुवादेन गुणविधिरिति द्विमादग्निरहस्ये प्रधान-
विधिरन्यत्र गुणविधिरिति भावः॥

संबंधादेवमन्यत्रापि सदुत्तत्र यं लघुब्राकाशात्मकं सत्संपरोक्षमात्मानमूर्कं हिरण्यगर्भाख्यं ब्रह्मोपक्रम्य तदुक्तमत्सत्यं तत्सद्योसावादित्यः किं मंडलं
नतत्रस्थो नेपुरुषः करणात्मकः सस्याध्यात्मनश्चिस्थो नस्थइस्मुपादि रूपतस्य भूरिति शिरो भुव इति बाहू स्वरिति पादाविति व्याहृतिरूपशरीरमुक्त्वा
द्वे उपनिषदौ रहस्यदेवतानामनी उपदिश्येते तस्मादित्यमंडलस्थस्याहरिति नाम प्रकाशकत्वात् तस्याक्षिस्थस्याहमिति नाम प्रसलकादिति द्वेना

संबंधादेवमन्यत्रापि २२ बृहदारण्यके सत्यं ब्रह्मेत्युपक्रम्य तद्यत्तत्सत्यमसौ स आदित्यो य एष एतस्मिन्मंडले पुरुषो यश्चायं दक्षिणेऽक्षन्पुरुष इ
ति। तस्यैव सत्यस्य ब्रह्मणोऽधिदैवमध्यात्मं चायतनविशेषमुपदिश्य व्याहृतिशरीरत्वं च संपाद्य द्वे उपनिषदावुपदिश्येते। तस्योपनिषदहरित्यधिदै
वतं। तस्योपनिषदहमित्यध्यात्मं तत्र संशयः। किमविभागेनैवोभे अप्युपनिषदावुभयत्रानुसंधातव्ये उत विभागेनैकाधिदैवतमेकाध्यात्ममिति। त
त्र सूत्रेणैवोपक्रमते। यथा शांडिल्यविद्याविभागेनाप्यधीतान्यगुणोपसंहारेऽन्यत्र एवमन्यत्राप्येवंजातीयके विषये भवितुमर्हति। एकविद्याभिसं
बंधात्। एका हीयं सत्यविद्याधिदैवमध्यात्मं चाधीता उपक्रमाभेदात् प्रतिषक्तपाठाच्च कथं तस्यामुदितौ धर्मौ तस्यामेव न स्यात्॥ ॥

महत्त्वं विषमस्त्वनामिनः सत्यस्यैकस्य ब्रह्मण एकत्वात्स्थानभेदोऽकिंचित्कर इति संशयमाह तत्रेति। पूर्वपक्षे प्रतिस्थानं नामद्वयानुष्ठानं सिद्धांते मथाक्ष्रसेकैक
नाम्नानुष्ठानमिति फलं दृष्टांतसंगत्या पूर्वपक्षसूत्रं व्याचष्टे यथेति यथा विधेकाद्युपसंहारऽङ्गः एवमन्यत्राप्येकविद्यायामुपसंहारेण भवितुमर्हतीत्यर्थः।
सत्यं ब्रह्मेत्युपक्रमाभेदः पाठश्चेत् आदित्यपुरुषावमोऽन्यस्मिन् प्रतिष्ठितौ आदित्यरश्मीनां चक्षुषि च चक्षुषा आदित्ये प्रतिष्ठानादिति व्यतिषक्तपाठो मिथः
संश्लेषपाठस्ताभ्यां विद्यैक्यसिद्धेः विद्यैक्येऽपि किं स्यात्तत्राह कथमिति॥ ॥ ॥ ॥

शा॰सू॰भा॰३
६५

विशेषेऽपि स्थानभेदादुपनिषदोरसंकरः स्यादित्याशंकां दृष्टान्तेन परिहरति यो हीति । नो मे एकनामसंकरो युक्तः । तथा चादित्ये हरिरिति नामवान्सन्ब्रह्म
सादादित्यस्थवदिति प्राप्ते सिद्धान्तसूत्रं योजयति नवेति । नाम्नोरुपासनस्थानविशिष्टसंबंधित्वादित्यर्थः । तस्योपनिषदहरहमिति च वाक्यद्वयेन तत्त्वस्थ

यो ह्याचार्ये कश्चिदनुगमनादिराचारश्चोदितः स ग्रामगतेऽरण्यगते तुल्यवदेव भवति । तस्मादुभयोरप्युपनिषदोरुभयत्र प्राप्तिरित्येवं प्राप्ते प्रतिवि
धत्ते । न वा विशेषात् । न वोभयोरुभयत्र प्राप्तिः । कस्माद्विशेषात् । उपासनस्थानविशेषोपनिबन्धादित्यर्थः । कथं स्थानविशेषोपनिबन्ध इति । उच्य
प्रतिविधत्ते । न वा विशेषात् । नैवं य एष एतस्मिन्मण्डले पुरुष इत्याधिदैविकं पुरुषं प्रकृत्य तस्योपनिषदहरिति श्रावयति । यो ऽयं दक्षिणेऽक्षन्पुरुष
इत्याध्यात्मिकं पुरुषं प्रकृत्य तस्योपनिषदहमिति । तस्येति चैतत्संनिहितालम्बनं सर्वनाम । तस्मादायतनविशेषव्यपाश्रयेणैवैते उपनिषदावुपदि
श्येते कुतस्तयोरुभयत्र प्राप्तिः । नन्वेक एवायमधिदैवतमध्यात्मं च पुरुषः एकस्यैव सत्यस्य ब्रह्मणः स्थानद्वयप्रतिपादनात् सत्यमेवमेतत् । ए
कस्यापि त्ववस्थाविशेषोपादानेनैवोपनिषद्विशेषोपदेशात् । तदवस्थस्यैवसा भवितुमर्हति । अस्ति चायं दृष्टान्तः सत्यप्याचार्यस्वरूपानपाये यदाचार्य
स्यासीनस्यानुवर्तनमुक्तं न तत्तिष्ठतो भवति । यच्च तिष्ठत उक्तं न तदासीनस्येति । ग्रामारण्ययोस्त्वाचार्यस्वरूपानपायात् स्वरूपानुबद्धस्य धर्मस्य ग्रा
मारण्यकृतविशेषाभावादुभयत्र तुल्यवदेव भवेद्दृष्टान्तः । तस्माद्व्यवस्थाऽनयोरुपनिषदोः ॥ ॥

परामृष्टयोः सन्निहितस्थानविशिष्टयोः पुरुषयोर्नामसंबंधपरत्वेनोपसंहारानुमानं बाध्यमिति भावः । विशेषेऽप्यनामसंकर इत्याशंकास्थानभेदेन
विशिष्टपुरुषभेदात् नामव्यवस्थामाह । नन्वित्यादिना । विशिष्टसंबंधे दृष्टान्तमाह । अस्तीति प्रतिदृष्टान्तस्य स्वरूपसंबंधित्वाद्विशिष्टे धर्मे प्रकृते दृष्टान्ता

६५

ऽक्रान्तमव्यवस्थापात्मितिदेशो लिंगमित्याह दर्शयतिचेति। विधैकार्देवोपसंहारसिद्धावतिदेशो व्यासात्र स्यादेकविद्यायामपि स्थानभेदेनोक्तगु
णानांविनातिदेशमनुपसंहार इति सिद्धं। संभृति द्युव्याप्त्यपि चातः। ब्रह्मैककार्ये एककारणं येषां तानि ब्रह्मज्येष्ठानि शिलोपः। वीर्यवन्तः वीर्याणि पराक्रमवि
शेषा आकाशोत्पादनादयः तानि च वीर्याणि संभृतानि निर्विघ्नं सम्पन्नानि सर्वे निर्मातुः कार्ये विघ्नकर्तुरसत्वात् तत्र च ज्येष्ठं ब्रह्माग्रे देवासुरजन्तोः प्रागेव दिवं
दर्शमतिच अपि चैवं जातीयकानां धर्माणांमव्यवस्थेति लिंगदर्शनं भवति तस्मैतस्यतदेव रूपं यदमुष्य रूपं यावमुष्य गेष्णौ तौ गेष्णौ यन्नाम तन्ना
मेतिकपमस्यलिंगत्वं। तद्व्याचष्टे। अक्ष्यादित्यस्थानभेदभिन्नान् धर्मान् मोक्षस्मिन्ननुपसंहारमोनुपश्यन्निहातिदेशोनादित्यपुरुषगतान्रूपादी
नक्षिपुरुष उपसंहरति। तस्यैतस्य तदेव रूपमित्यादिना तस्मान्न भवति इतरेतरं वैते उपनिषत्स्थितिनिर्णयः। संभृति द्युव्याप्त्यपि चातः। ब्रह्मज्ये
ष्ठा वीर्या संभृतानि। ब्रह्माग्रे ज्येष्ठं दिवमाततानेत्येवं राणायनीयानां खिलेषु वीर्यसंभृति द्युव्याप्तिप्रभृतयो ब्रह्मणो विभूतयः पठ्यन्ते। तेषामेव चो
पनिषदि शाण्डिल्यविद्या प्रभृतयो ब्रह्मविद्याः पठ्यन्ते। तासु ब्रह्मविद्यासु ता ब्रह्मविभूतय उपसंह्रियेरन्न वेति विचारणायां ब्रह्मसंबन्धादुपसंहारम्प्रा
प्तौ पठति। संभृतिद्युव्याप्तिप्रभृतयोविभूतयः शाण्डिल्यविद्याप्रभृतिषु नोपसंहर्तव्याः। अत एव चायतनविशेषयोगात्। तथाहि शाण्डिल्यविद्यायां
हृदयायतनत्वं ब्रह्मणउक्तं। एषमआत्मान्तर्हृदय इति। तद्वद्दहरविद्यायामपि दहरं पुण्डरीकं वेश्म दहरोस्मिन्नन्तर आकाश इति। उपकोसलविद्या
यांतुअक्ष्यायतनत्वं यएषोक्षिणिपुरुषोदृश्यत इति। एवंतत्रतत्रतत्तदाध्यात्मिकमायतनमेतासुविद्यासुप्रतीयते। आधिदैविक्यस्त्वेता विभूतयः
स्वर्गिता ततानव्याप्तवत् सदासर्वव्यापकमित्यर्थः। सर्वेशापमस्प्रहूनित्वमितिवाक्य ।। संभृतिद्युव्याप्तिप्रभृतयः तासांकुतएतासुप्राप्तिः॥
शेषत्वाद्गुणाः संभृतिप्रदर्शाद्याः खिलेष्विति विधिनिषेधशून्यवाक्येष्वित्यर्थः। ब्रह्मसंबन्धाद्विशेषेऽभेदभानाच्च संशयमाह। नात्विति। श्रुत्यन्तरस्थाधीत
ब्रह्मविभूतीनां ब्रह्मसंबन्धेन सर्वब्रह्मविद्यासुप्रसक्तिरनुपसंहार इति पूर्वपक्षः। सिद्धान्तमाह संभृतीति संभृतिश्च द्युव्याप्तिश्च संभृतिद्युव्याप्ती तदपि
सर्वं तेनोपसंहर्तव्यमनुपनिबद्धेरिव व्यवस्थापकविशेषयोगादिति सूत्रयोजना॥ ॥ ॥ ॥

शा॰सू॰भा॰३ स्याध्यात्मिकायतनविशिष्टगुणकविद्यास्वाधिदैविकविभूतीनां गुणानामभिज्ञाने हेत्वभावान्नप्राप्तिरित्युक्ते हेतुं करोति नचेतास्विति आधिदैविकत्वसा
म्याद्याध्यात्मिकायतनहीनत्वसाम्याद्धानन्तर्दिविद्यासु संभृत्यादीनां प्राप्तिरितिशंकार्थः। उक्तहेतुदूषणं गुणप्रापकमाधिदैविकविद्यानां शाण्डिल्यदहरा
६६ दीनामायतनहीनविद्यानां चाभियोगुणोऽसौ कश्चिन्न संगात् तस्माल्लक्षणानुपपत्तिरित्यन्यसमानगुणविशिष्टोपास्यरूपैक्यं विद्यैक्ये मानं हेतु गुणप्राप्तिहेतुस्तदभावान्न ॥

नन्वेतास्वप्याधिदैविकविभूतयः श्रूयन्ते आम्नाय दिवोऽभ्यावाने भ्यो लोकेभ्यः एष उ एव भासत्ती: एष हि सर्वेषु भूतेषु भाति। यावान्वा अयमाकाश
स्तावानेषोऽन्तर्हृदय आकाश उभे अस्मिन्द्यावापृथिवी अन्तरेव समाहिते इत्येवमाद्याः संति चाप्यायतनविशेषहीना अपि ब्रह्मविद्याः बहुत्वा
कर्तव्याः सत्यमेवैतत्। तथाप्यत्र विद्यते विशेषः संभृत्याद्यनुपसंहारहेतुः। समानगुणाम्नानेन हि प्रत्युपस्थापिता सु विप्रकृष्टदेशास्वपि वि
द्यासु विप्रकृष्टदेशगुणा उपसंक्रियेरन्निति युक्तं। संभृत्याद्यस्तु शाण्डिल्यादिवाक्यगोचराश्च गुणाः परस्परमाव्यक्तस्वरूपत्वान्न प्रदेशान्तरवर्ति
विद्याप्रत्युपस्थापनक्षमाः। नच ब्रह्मसंबंधमात्रेण प्रदेशान्तरवर्तिविद्याप्रत्युपस्थापनमुच्यते विद्याभेदेऽपि तदुपपत्तेः। एकमपि ब्रह्म विभूतिभेदै
रनेकधोपास्यत इति स्थितिः परोवरीयस्त्वादिवद्भेददर्शनात्। तस्माद्वीर्यसंभृत्यादीनां शाण्डिल्यविद्यादिष्वनुपसंहार इति॥ ॥ ॥ ॥

प्राप्तिरिति परिहरति। सत्यमित्यादिना। स्थानुविशिष्टभेदादाम्नायोर्ध्वस्थावत्संभृत्यादिगुणविशिष्टस्वरूपस्य गुणः शाण्डिल्यादिविद्योक्तगुणविशिष्टब्र
ह्मणोऽभिधेयभेदेन रूपभेदात् संभृत्यादीनां नोपसंहार इत्युक्तम्। अपि तु देशत्वादस्य न संगतस्य घटेऽप्रापश्येक स्मिन्नपि परोवरीयस्त्वादिगुणेऽपि ब्राह्मणाद्ध
रणप्रसङ्गः साधकप्रातिभिरेव नत्वेकस्मिन्नपि ब्रह्मणि विद्याभेदोपपत्तेः अत्र मलमभिज्ञानगुणप्राप्तिके स्याह परोवरीयस्त्वादिवदिति तस्मात् संभृत्यादिगुण ॥ ६६

पुरुषविद्यामारभ्य छांदोग्यस्थां विद्यामाह अस्तीति। पुरुषो वाव यज्ञस्तस्य यानि चतुर्विंशतिवर्षाणि तत्प्रातःसवनमथ यानि चतुश्चत्वारिंशद्वर्षाणि तन्माध्यंदिनं सवनमथ यान्यष्टाचत्वारिंशद्वर्षाणि तत्तृतीयसवनमिति मन्त्रसिद्धं पुरुषसामर्थ्यं सवनत्रयं कल्पितं स यदशिशिषति यत्पिपासति यन्न रमते ता दीक्षा अथ यदश्नाति पिबति यद्रमते तेनोपसदः अथ यद्धसति यज्जक्षति मैथुनं चरति तानि स्तुतशस्त्राणि अथ यत्तपो दानादि ता दक्षिणा मर

पुरुषविद्यायामिकं चेतरेषामनाम्नानात् अस्तितां दर्शयितुं पैङ्गिनां च रहस्यब्राह्मणे पुरुषविद्या तत्र पुरुषो यज्ञः कल्पितः तदीयमायुस्त्रेधा विभज्य सवनत्रयं कल्पितमशिशिषादीनि च दीक्षादिभावेन कल्पितानि अस्ये च धर्मास्तत्र समधिगताः आशीर्मंत्रप्रयोगादयः। तैत्तिरीयका अपि कंचित्पुरुषयज्ञं कल्पयंति। तस्यैवं विदुषो यज्ञस्यात्मा यजमानः श्रद्धा पत्नीत्यत्र तेनानुवाकेन तत्र संशयः किमितरेऽत्रोक्ताः पुरुषयज्ञस्य धर्मास्ते तैत्तिरीयकेषूपसंहर्तव्याः किं वा नोपसंहर्तव्या इति पुरुषयज्ञत्वाविशेषादुपसंहारप्राप्तावाचक्ष्महे ॥ ॥

एवं प्राप्ते ब्रूमः तस्यादिरूपाभेदात् छान्दोग्ये सवनत्रयं यावदायुः संतनुते आशीः अक्षितमस्यच्युतमसि प्राणसंशितमसीति मंत्रत्रयप्रयोगः षोडशाधिकशतवर्षजीवितं फलमिति दर्शितं। संन्यासार्थं शाखान्तरीयपुरुषविद्यामाह तैत्तिरीयकाइति। अत्र विदुषो यज्ञस्येति षष्ठ्योः समानाधिकरणपवैयधिकरण्यानिश्चयमाशंक्याह तत्रेतिः उपसंहारानुपसंहारयोर्वैचफलं॥ ॥ ॥ ॥

पूर्वत्राकाधारणस्य गुणप्रत्यभिज्ञानाभावात्संभृत्यादिविद्याभेद उक्तः इह तु सा धारणा च मरणावभृथादिगुणविशिष्टपुरुषयज्ञरूपैकप्रत्यभिज्ञानादिहैकवि
तिप्रत्युदाहरणेनाह तैत्तिरीयकपठितोपसंहर्तव्या इतित सेवंविदुषो यज्ञस्यात्मा यजमानः श्रद्धा पत्नी शरीरमिध्ममुरो वेदिर्लोमानि बर्हिर्वेदः शिखा हृ
दयं यूपः काम आज्यं मन्युः पशुस्तपोऽग्निर्दमः शमयिता दक्षिणा वाग्घोता प्राण उद्गाता चक्षुरध्वर्युर्मनो ब्रह्मेति विकृतरूपधर्मैर्वैलक्षण्यान्न रूपैकप्रत्य

नोपसंहर्तव्या इति। कस्मात् तद्रूपप्रत्यभिज्ञाभावात्। तदाहाचार्यः पुरुषविद्यायामिवेति। यथैकेषां शाखिनां ताण्डिनां पैङ्गिनां च पुरुषविद्या
यामाम्नानं नैवमितरेषां तैत्तिरीयकाणामाम्नानमस्ति। तेषां हीतरविलक्षणमेव यज्ञसंपादनं दृश्यते। पत्नीयजमानवेदवेदिबर्हिर्यूपाज्यपशु
ऋत्विगाद्यनुक्रमणात्। यदपि सवनसंपादनं तदपीतरविलक्षणमेव यत्प्रातर्मध्यंदिनं च तानि सवनानीति यदपि किंचिन्मरणावभृथत्वा
दिसामान्यं तदल्पीयस्त्वाद्भूयसा वैलक्षण्येनाभिभूयमानं न प्रत्यभिज्ञानक्षमं न च तैत्तिरीयके पुरुषस्य यज्ञत्वं श्रूयते। विदुषो यज्ञस्येति॥ ॥

मिध्मेत्यर्थः वेदः कुशमुष्टिः शमयिता शमोऽदक्षिणोऽन्यत्र किंच छांदोग्ये त्रिधा विभक्तायुषि सवनत्वकल्पना। अत्र तु सायंप्रातःकालादावितिवैरूप्यमाह
यदपीति यन्मरणं तदवभृथोऽयमित्यनेनैतदुपसद इत्यनेन तैत्तिरीयकेतोः सारूप्यमपि भातीत्यत आह यदपि किंचिदिति गजाश्वयोरपि तुच्छात्सारूप्यवदिदं
सारूप्यं नैक्यप्रयोजकमित्यर्थः॥ ॥

किंच छांदोग्ये पुरुषयज्ञयोरैक्यं श्रुतं अत्र तु भेदः शक्यते वैरूप्यांतरमाह न चेति यद्यपि निषादस्थपतिन्यायेन सामानाधिकरण्यं श्रुतौ प्रतीतं तथाप्यप्र
सिद्धैकलकल्पनागौरवापत्तस्याल्लेति भेदोक्तेरैक्यं पुरुषयज्ञयोर्यजमानत्वविरोधादात्मविदो यो यज्ञः अविद्वत्तस्येति वैय्यधिकरण्यमेव युक्तं किंच विद्व
त्संबंधियज्ञरूपविशेष्यानुवादेन विद्वदंगैरंगसंपादिधावैकवाक्यताप्रतीपत्तेस्तस्यासत्त्वे विशेष्यस्यांगानां च रथ्यादिविधिवादिनस्तव वाक्यभेददोषः स्या

न्न चैते समानाधिकरणे षष्ठ्यौ विद्वान्नेव यो यज्ञस्तस्येति । नहि पुरुषमुख्यं यज्ञत्वमस्ति व्यधिकरणेत्वेते षष्ठ्यौ विदुषो यो यज्ञस्तस्येति भवति हि पुरु
षस्य मुख्योपत्तसंबंधः तस्याचगतौ मुख्यापि आश्रयितव्यो न भाक्तः आत्मा यजमान इति च यजमानत्वं पुरुषस्य निर्बुवन् वैय्यधिकरण्ये नैवास्य यज्ञ
संबंधं दर्शयति । अपि च तस्यैवं विदुष इति सिद्धवदनुवादस्य तोऽसत्यां पुरुषस्य यज्ञभावे आत्मादीनां च यजमानादिभावं प्रति विधित्समानस्य वाक्यभे
दः स्यात् । अपि च सन्यासामात्मविद्यां पुरस्तादुपदिश्यानंतरं तस्यैवं विदुष इत्यनुक्रमणात्परत्वतः पूर्वशेषत्वेन आम्नायो न स्वतंत्र इति मतिमान् । तथा
चैकमेव फलं उभयोरप्यनुवाकयोरुपलभ्यामहे ब्रह्मणो महिमानमाप्नोतीति । इतरेषां चानन्यत्वेऽपि पुरुषविद्याम्नायः आयुरभिवृद्धिफलो ह्यसौ
स ह षोडशं वर्षशतं जीवतीति य एवं वेदेतिमनभिधाहात् । तस्माच्छाखांतराधीतानां पुरुषविद्याधर्माणामाशीर्मंत्राणामप्राप्तिस्तैत्तिरीयके ॥

दिसर्थः । किंच सत्यादिभ्यो न्यास एवात्यरेचयदिति सन्यासमुक्त्वा सर्वे वै सर्वमिदं जगदित्येवं तमात्मानं ज्ञात्वा भूयो नमस्तु युक्तानि विद्यानि तस्माप
साधकात्मविद्यां पुरस्तादाम्नायास्यानुवाकेऽपदिश्यानंतरानुवाके तस्यैवं विदुष इत्यनुक्रमात् विद्याङ्गत्वाहेन पश्चात्सार्थत्वेन तच्छेषतयाऽवगतेऽपि तिः किंच
ति फलैकत्वात् तैः छांदोग्यानां तु स्वतंत्रविद्याविधिरित्याह अपि च समसंन्यासामित्यादिना फलमाह तस्मादिति ॥ ॥ ॥

शा॰ र॰ भा॰ ३
६८

वेधाद्यर्थभेदात्। देवतामभिचारकर्त्ता प्रार्थयते सर्वमिति हे देवते मद्रिपोः सर्वमंगं प्रति प्रविध्यारम्य विशेषतश्च हृदयं भिंधि धमनीः शिराः प्रवृज्य त्रोटय शिरश्चाभितो नाशय एवं त्रिधा विपृक्तो विश्लिष्टो भवतु मे शत्रुरित्यर्थः। हे देव सवितः प्रसूतं तस्य तिं च प्रसुव निर्वर्तयेत्यर्थः। उच्चैःश्रवाः श्वेतोऽश्वोपलक्षितेन्द्रस्य त्वं हरितमणिवर्णो नीलोऽसीत्यर्थः। नोऽस्माकं शं सुखकृद्भवत्वित्यर्थः। अग्निष्टोमो ब्रह्मैव समस्तमहर्निक्रियते तदपि ब्रह्म तस्मादेतदहः साध्यं कर्म य उपासनानुतिष्ठंति ते ब्रह्मणैव साधनेन ब्रह्मोपयंतीति तेन क्रमेणामृतत्वमाप्नुवंतीति। पोजनं मंत्रादिषु तत्तदुपनिषद्विद्याशेषत्वेन प्रमाणाभावाभ्यां संश
वेधाद्यर्थभेदात्॥२५॥ अस्त्याथर्वणिकानामुपनिषदारंभे मंत्रसमाम्नायः सर्वं प्रविध्य हृदयं प्रविध्य धमनीः प्रवृज्य शिरोऽभिप्रवृज्य त्रेधा विपृक्त इत्या दिः। तांडिनां देव सवितः प्रसुव यज्ञमित्यादिः शाट्यायनिनां श्वेताश्वो हरितनीलोऽसीत्यादिः कठानां तैत्तिरीयाणां च शं नो मित्रः शं वरुण इत्यादिः वाजसनेयिनां तूपनिषदारंभे प्रवर्ग्यब्राह्मणं पठ्यते देवा ह वै सत्रं निषेदुरित्यादि कौषीतकिनामप्यग्निष्टोमब्राह्मणं ब्रह्म वा अग्निष्टोमो ब्रह्मैतदहर्ब्रह्मणैव ते ब्रह्मोपयंति तेषाममृतत्वमाप्नुवंति य एतदहरुपयंतीति। किमिमे सर्वे प्रविध्यादयो मंत्राः प्रवर्ग्यादीनि च कर्माणि विद्यासूपसंह्रियेरन् किं वा नोपसंह्रियेरन्निति मीमांसामहे किं तावन्नः प्रतिभाति। उपसंहार एवैषां विद्यास्विति। कुतः विद्याप्रधानानामुपनिषद्ग्रंथानां समीपे पाठात्। नन्वेषां विद्यार्थतया विधानं नोपलभामहे। बाढं अनुपलभमाना अप्यनुमास्यामहे। सन्निधिसामर्थ्यात्। नहि सन्निधेरर्थवत्त्वे संभवत्यकस्मादसावनर्थको अभ्युपगंतुं युक्तः॥

यमाह। किमिति कल्प्यं पूर्ववत्। ननु तेषां शेषत्वेमानाभावान्नोपसंहार इति शंकते नन्वेषामिति मंत्रादयस्तावद्विद्याशेषाः फलवद्विद्यासन्निहित त्वात् तैत्तिरीयकगतपुरुषयज्ञवदिति समाधत्ते बाढमिति तत्पाच्च दृष्टांतसंगतिः। सिद्धांतिपक्षे सन्निधिवैयर्थ्यं बाधकमाह नहीति। अफलमंत्रादीनां फलवद्विद्याशेषत्वबोधनं सन्निधेरर्थवत्त्वं तत्संभवे सत्यकस्मादर्थशून्यत्वेनासौ सन्निधिरभ्युपगंतुं नहि युक्त इत्यर्थः। तत्र पाठे लकस्मादिति तुं विना सावधौ का

६८

ननु मंत्राणां विद्यासमवेतार्थप्रकाशनसामर्थ्याभावात्त्वविद्याशेषत्वमिति शंक्य तेनन्विति पुरस्तादुपसदां प्रवर्ग्येण प्रचरंतीतिवाक्येन प्रवर्ग्यप्रसक्तु तुद्देश संस्कृतं अग्निष्टोमादेश्च तत्तद्विधानस्वरूपार्थत्वमतो न विद्यार्थत्वमित्याह कथं चेति। मंत्राणां विद्यासमवेतहृदयनाड्यादिसादृश्यप्रकाशकत्वमस्ति।

ननु नैषां मंत्राणां विषये किंचित्सामर्थ्यं पश्यामः। कथं च प्रवर्ग्यादीनि कर्माणि अन्यार्थत्वेनैव विनियुक्तानि संति विद्यार्थत्वेनापि प्रतिपद्येमहि। नैष दोषः। सामर्थ्यं तावन्मंत्राणां विद्याविषयमपि किंचिद्रूपं कल्पयितुं हृदयादिसंकीर्तनात्। हृदयादीनि प्रायेणोपासनेष्वायतनादिभावेनोपदिष्टानि तद्द्वारेण हृदयं प्रविध्येत्येवंजातीयकानां मंत्राणामुपपन्नमुपासनांगत्वं। दृष्टश्चोपासनेष्वपि मंत्रप्रयोगः भूः प्रपद्येऽमुनामुनेत्यादित एव प्रवर्ग्यादीनां कर्मणामन्यत्रापि विनियुक्तानां सतामविरुद्धो विद्यासु विनियोगः॥ ॥

साह नैष इति उपास्तिषु मंत्रप्रयोगः क्वापि न दृष्ट इत्यत आह दृष्टश्चेति। पुत्रस्य दीर्घायुष्यार्थं छांदोग्ये त्रैलोक्यस्य कोशत्वेनोपास्तिरुक्ता तत्र पितुरयं प्रार्थनामंत्रः। तत्रामुनेति पुत्रस्य त्रिर्नामग्रहणमिति अमुनामुना पुत्रेण सह भूरितीमं लोकमहं तु च प्रपद्ये न मे पुत्रवियोगः स्यादित्यर्थः॥ ७ ॥

शा. सू. भा. ३
६९

तत्तद्गुणकेनाम्नातविनियुक्तानामपि कर्मणां सन्निधिना विद्यासु विनियोगो न विरुध्यत इत्युक्तं दृष्टं तमाह वाजपेय इति प्रसववर्चसकामो बृहस्पतिसवे
न यजेतेति वाक्येन ब्रह्मवर्चसफले विनियुक्तस्यापि बृहस्पतिसवस्य वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेतेति वाजपेयप्रकरणस्थवाक्येन वाजपेयाङ्गत्वं तथा
विनियोगवद् विरोध इत्यर्थः। मध्यमे केनवाक्येन प्रकरणान्तरस्थबृहस्पतिसवस्य प्रत्यभिज्ञानमङ्गत्वविधानं च कर्तुमयुक्तं वाक्यभेदप्रसंगादतो नाग्निहो
त्रवत्कर्मान्तरमेव बृहस्पतिसवाख्यमंगतयापि विधीयत इति न विनियुक्तस्य विनियोग इति भट्टगुरुमतं तत्र दूषयन्ति तथापि पृथगग्निहोत्रस्याश्वमेधप्रकर
णे वाग्पतस्यैतानां त्रिमग्निहोत्रं जुहोतीति तिलकाम्यप्रत्यभिज्ञा यथा वा दर्शपूर्णमासविकृताविष्टावाज्यभागौ यजतीत्येकस्मिन्वाक्ये प्रकृतिस्थाज्यभागयोः पदेन प्रत्य
भिज्ञाने वाक्येन विधानं तथात्रापि बृहस्पतिसवपदेन प्रत्यभिज्ञापवाक्येनांगताविधाने न किंचिद्दूषणम्। न च साप्रमाणा वाक्यविधायकत्वात्तत्परतंत्रेणानपदेन सिद्ध
वाजपेयस्य बृहस्पतिसवस्येवैतस्मिन्निदर्शनम्। तेषामुपसंहारो विद्यास्विति कस्मात्तदेवाह पूर्वमेरातः हृदयं प्रविध्येत्येवं जातीयकानां हि मंत्राणां येऽर्था हृद
यवेधादयो भिन्ना अनभिसंबद्धास्तत्प्रतिपत्तिप्रयुक्ता अपि विद्याभिः तेनैषां ताभिः संगतमपि नास्ति। ननु हृदयमस्योपासनेषूपयोगात्तद्वारकमुपासनासंबंध
इत्याशंक्य तैः नेत्युच्यते। हृदयमात्रसंकीर्तनेनास्यानुपयोगः कथंचिदुपलक्षितः। न च हृदयस्य मात्रमंत्रार्थः। हृदयं प्रविध्य धमनीः प्रवृज्येत्येवं जातीयकोऽहिंसक
लो मंत्रार्थो विद्याभिरभिसंबध्यते। अभिचारविषयो ह्येषोऽर्थस्तस्मादाभिचारिके कर्मणा सर्वं प्रविध्येत्यस्य मंत्रस्याभिसंबंधः तथा देवसवितः प्रसुवयज्ञमिति
कर्मप्रत्यभिज्ञानमिति वाक्यं सिद्धस्यार्थस्य गतप्रापुनः सामर्थ्यत्वसंभवेन यथासिद्धं स्यात तस्यैव श्रुतिसिद्धार्थक्रमा ॥ लक्षणपदगतमस्य लिंगं लात्मयज्ञेन कर्मणा संबंधः ॥ ॥
परतंत्रोपपत्तेः ॥ न चैवं सति कुड्यादिसत्वे प्रयोग तेनन्त्रित्यादिसमभिहारेऽभिविधिः स्यादिति वाच्यम् इष्टत्वान्न च एवं तंत्रं विरोधः इत्यर्थः तंत्रस्थबलीयस्त्वात् पूर्वं तंत्रप्रसत्त
तत्परतंत्रभावनानैहितात्पर्यात् तत्स्यादेकस्यैव बृहस्पतिनामकस्य धात्वर्थस्य ब्रह्मवर्चसे विनियुक्तस्यापि वाजपेयांगतया विनियोग इति भगवत्सादतात्पर्यं ब्रूते
वाचा विनियुक्तस्य विनियोगः सर्वसंमतमुदाहरणं स्वादिरत्वादिकं तस्य क्रतौ विनियुक्तस्य वीर्यादिफले पि विनियोगात्तथा मंत्रकर्मणामन्यत्र विनियुक्तानां विद्याशेषत्व
मिति प्राप्ते सिद्धान्तयति। तेषामिदादीनां विद्यासु हृदयादिसंबंधेपि वेधाद्यर्थानामसंबंधात् कृत्स्नमंत्रार्थो नाम भिचारादिसंबंधलिंगेन सन्निधेर्बलीयस्त्वादभिचारादिवे

६९

देवसवितः प्रसुवेति प्रदक्षिणतोऽग्निं पर्युक्षेदिति वाक्यादग्निपर्युक्षणे सावित्रं जुहोति कर्मणः कर्मणः पुरस्तात्सवने सवने जुहोतीति वाक्याद्वाजपेये कर्मविशिष्टे षष्ठ्यर्थसंबन्धो स्य मंत्रस्येसाहतद्विशेषेति उक्तन्यायान्ध्वेताभ्व इत्यादिदर्शति दिशति एवमन्येषामिति। प्रमाणांतरं प्रकरणादिकं। ननु लिंगादिभिर न्यत्र विनियुक्तानामपि संनिधिना विद्यास्वपि विनियोगोऽस्त्विति विरोधादित्युक्तं तत्राह दुर्बलो हीति समवाये समानविषयत्वे नहु परो विरोधे परस्य दौर्बल्यं कुतः अर्थविप्रकर्षात्। स्वार्थबोधने परस्य पूर्वापेक्षया व्यवधानेन प्रवृत्तेरित्यर्थः। अयमाशयः एकत्र विनियुक्तस्य न एकांततः अन्यत्र विनियोगो विरुद्ध एव परंतु विनियोजकप्रमाणयोः समबलत्वेऽन्यतरविनियोगसाकांक्षयोगात् तुल्यत्वात् सोमप्रसादनेन विनियुक्तं विनियोगाः स्वीक्रियंते यथा स्वादिष्ठो भूमो भवति स्वादिष्ठं वीर्यकामस्य रूपं कुर्यादिति वाक्याभ्यां क्रतौ विनियुक्तस्य स्वादिष्ठस्य वीर्यफले विनियोगः। यत्र प्रमाणयोरतुल्यत्वं तत्र न स्वीक्रियते प्रबलप्रमाणेन दुर्बलो विनियोगो बाध्य

तद्विरोधसंबंधस्तु प्रमाणानां तदनुसर्तव्यः। एवमन्येषामपि मंत्राणां केषांचिल्लिंगेन केषांचिद्वचनेन केषांचित्समाख्यानांतरेणेत्येवमर्थान्तरे भावि नियुक्तानां रहस्यपठितानामपि सतां न संनिधिमात्रेण विधायकत्वोपपत्तिर्दुर्बलो हि संनिधिः श्रुत्यादिभ्य इत्युक्तं प्रथमेऽन्तेऽश्रुतिलिंगवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षादिति सूत्रात्। ॥

तद्यथा कदाचन स्तरीरसि नेन्द्र सश्चसीत्यैन्द्र्या ऋचा गार्हपत्यमुपतिष्ठत इति तत्र तृतीयाविभक्तिश्रुत्या निरपेक्षया गार्हपत्योपस्थाने शेषत्वबोधिका ऐन्द्र्यर्चा शक्त्या ज्ञानसामर्थ्यरूपलिंगमाप्यग्निं इन्द्रशेषत्वं व्यवधाने लिंगं हि ज्ञानसामर्थ्यं वा शेषत्वं बोधयति किं लिंगं प्रकाशनमात्रं करोति तेन च लिंगेनानेन मंत्रेणेन्द्रः प्रकाशयितव्य इति श्रुतिः कल्पनीया तया शेषत्वबोध इति व्यवधानेन शेषत्वबोधकं लिंगं श्रुतिस्तु स्वार्थबोधकत्वेऽनपेक्षा तथा लिंगेन वाक्यं बाध्यं यथा स्योनं ते सदनं करोमि घृतस्य धारया सुशेवं कल्पयामि तस्मिन्सीदामृते प्रतितिष्ठ व्रीहीणां मेध सुमनस्यमान इति मंत्रभागयोः स्योनं सदनं कृ

भा·दी·भा·३ रणे पुरोडाशासादने च न तत्प्रकाशनसामर्थ्यं लिंगेन श्रुतिद्वारविनियोगे सति भवतीतमेकवाक्यत्वं बाध्येत तस्य प्रकृतत्वेपि मंत्रे सदनकरणप्रकाश
८० नसामर्थ्यं पुरोडाशासादनप्रकाशनसामर्थ्यं च लिंगं कल्पयित्वा श्रुतिकल्पनमेव न यत्र कृत्स्नमंत्रविनियोजिकैव श्रुतिः प्रत्यक्षा लिंगश्रुतिभ्यां व्यवधानेन
श्रुतेः कल्पनविहितत्वात् तल्लिंगाद्दुर्बलत्वात्। न च सामर्थ्येन कल्प्यमिति वाच्यं। असामर्थ्यस्य विनियोगायोगात्। अत एव संज्ञापदस्मृतीरबोधविनियोगे लक्ष
णारूपं सामर्थ्यं कल्प्यते। तथा वाक्येन प्रकरणं बाध्यं यथा राजसूयप्रकरणाम्नातद्वादशोपसत्त्वमहीनस्येति वाक्येनाहीनांगत्वबोधकेन प्रकरणप्राप्त
साद्गुण्यांगत्वबाधा दुर्बलः। प्रधानसाकांक्षारूपं प्रकरणं। तत्र ह्यंगप्रधानवाक्यैकवाक्यतया सामर्थ्यश्रुतिभिः कल्प्यमानाभिः स्वार्थविनियोगप्रमितौ व्यव
धानेन सामर्थ्यश्रुत्योर्द्वयोः कल्पकत्वात् दुर्बलत्वात्। तथा प्रकरणेन संनिधिर्बाध्यः। यथा राजसूयप्रकरणे न तदंतर्गताभिषेचनीयासन्नसोमयाग
विशेषसन्निधिपाठमात्रं शुनःशेपाख्यानादेरभिषेचनीयशेषत्वं बाधित्वा कृत्स्नराजसूयशेषत्वमापादितं संनिधेः प्रकरणादिकल्पकत्वे कृत्स्नप्र
करणाद्दुर्बलत्वात्। तथा सन्निधिना समाख्या बाध्यते तथा हि पौरोडाशिकसमाख्याके कांडे आग्नेयपुरोडाशादिकर्मणां क्रमेण मंत्रा आम्नातास्तत्र द
धिपयोरूपसान्नाय्यसन्निधौ शुंधध्वं दैव्याय कर्मणे इति मंत्र आम्नातस्तत्र समाख्याबलेनास्य मंत्रस्य पुरोडाशपात्रशुंधनशेषत्वं प्राप्तं सन्निधिना वा
धित्वा सान्नाय्यपात्रशुंधनशेषत्वमापाद्यते पुरोडाशसंबंधिकांडं पौरोडाशिकमिति पौरुषसमाख्यायाः कांडांतर्गतमंत्रस्य पुरोडाशसंबंधसामान्य
बोधकत्वेपि विशेषशेषिभावरूपविनियोगबोधकत्वे सन्निधापेक्षत्वेन दुर्बलत्वादिति एवं विरोधे सति श्रुतिर्बाधिकैव समाख्या बाध्यैव मध्यस्था ८०
नां तु चतुर्णां पूर्वं बाध्यत्वं परं बाधकत्वं चेति श्रुतिलिंगसूत्रार्थः। तस्माल्लिंगादिनाप्यविनियुक्तानां मंत्राणां दुर्बलसन्निधिनापि विनियो
ग इति सिद्धं॥ ॥

तथा कर्मणामिति कर्मणां विद्योपकारत्वेनापि सहैकफलत्वे च मानं किं चिन्त्यास्तीत्यर्थः अपि चेत्युक्तार्थे ननु तर्हि वेधादिवाक्यानामनुपपत्तिवद्भिः सहपा
तुस्य क्रमानिस्त्रामाहस्त्ररएवेतितस्माद्वेधादिमंत्रकर्मणां विद्यास्वनुपसंहार इति सिद्धं ॥ हानौ तूक्तं । यथाश्वो रजो मुक्तानि जीर्णानि मालिन्यकानि मे लो
भवति तथाहमपि पापानि विधूय कृतात्मानि निर्मलीभूतचित्तः सन् यथा राहुग्रस्तश्चंद्रो राहुमुखात्प्रमुच्य स्वच्छो भवति तथा शरीरं धूत्वा त्यक्त्वा देहाभिमाना
तथा कर्मणामपि शर्वकपादीनां अश्वमेधविनियुक्तानां न विद्यास्वेवलोपपत्तिः । नह्येषां विद्याभिः सहैककार्यत्वं किंचिदस्ति । वाजपेये तु बृहस्पतिसवस्य
र्थं विनियोगो न तु वाजपेयेन स्वाबृहस्पतिसवेन यजेतेति । अपि चैके प्रकर्षः स ह दुर्बलो बली यस्मात्प्रमाणेनान्यत्र विनियुक्तो न दुर्बलेन प्रमाणेना
न्यत्राविधिविनियोगमर्हति । अन्यस्य मानेन क्लिष्टत्वे हि प्रमाणयोरेतद्देवं स्यात् न तु बलवद्दुर्बलयोः प्रमाणयोरन्यस्य प्रमाणविरोधतः संभवति बलवद
बलत्वविरोधाद्देवतस्यादेवं जातीयकानां मंत्राणां कर्मणां वा नसन्निधिमात्रेण विद्यायोगः समाम्नातमरण्यानुवचनादिधर्मसामान्यान्तु सन्निधि
पाठ इति संतोष्टव्यं ॥ ॥ हानौ तूपायनशब्दशेषत्वात्कुशाछंदस्तुत्युपगानवत्तदुक्तं ॥१८॥ श्रीमतां हि नां श्रुतिः अश्व इव रोमाणि विधूय पापं चंद्र
इव राहोर्मुखात्प्रमुच्य धूत्वा शरीरमकृतं कृतात्मा ब्रह्मलोकमभिसंभवामीति । तथाथर्वणिकानां तथा विद्वान्पुण्यपापे विधूय निरंजनः परमं सा
म्यमुपैतीति । तथा शाट्यायनिनः पठंति तस्य पुत्रा दायमुपयंति सुहृदः साधुकृत्यां द्विषंतः पापकृत्यामिति । तथैव कौषीतकिनः तस्य सुकृतदुष्कृते विधू
नुते तस्य प्रिया ज्ञातयः सुकृतमुपयन्त्यप्रिया दुष्कृतमिति तदिह क्वचित्सुकृतमौ हानं श्रूयते न क्वचित्तयोरेव विभागेन प्रियैरप्रियैश्चोपायनं क्वचिदुभयम
नापि हानमुपायनं च । तद्यत्रोभयं श्रूयते तत्र तावन्न किंचिद्वक्तव्यमस्ति । प्रजानामुपायनमेव श्रूयते न हानं तत्राप्यर्थात्स्वहानं सन्निपततीति । अत्रैव दुःकृत
नुक्तस्याकृतं कृत्स्नं महात्मकं लोकं अभिसंभवामीति न संभवामीत्यर्थः यथा नद्यः समुद्रमाप्नुवन्ति सुकृतदुःकृते कृतमोक्षपेक्षमानयोरावश्यकत्वात्तद्धानस्य ॥ ॥
इत्याम्नानात् गच्छन्ति तथा विद्वान्निस्पृहः निरंजनः स्पृहः साम्यं ब्रह्म ततस्म तस्य विदुषः सर्वथा न तेन विद्याबलेन सुकृतदुष्कृते सजतीत्यर्थः उपायनं
यहरणं तस्य त्यागपूर्वकत्वाद्दत्पक्रमो य हेयपोपादानयोगो ऽधिरापाति ॥

शा. सू. भा. ३ यत्र तु त्याग एव श्रुतः तत्र हानोपायनयोः सहभावस्यावश्यकत्वानावश्यकत्वाभ्यां संशयमाह यत्रेति अत्र पूर्वपक्षे स्तुतिप्रकर्षासिद्धिः सिद्धांते
७१ तत्सिद्धिरिति फलं यद्यपि ताण्ड्यानां पूर्व एव श्रुतो निर्गुणविद्यायां तयोः क्रमहानमेव श्रुतं तनोपायनं तथापि कौषीतकिश्रुतौ पर्यंकस्थसगुणब्रह्मविद्यायामु
पायनं श्रुतं तमत्रोपसंहर्तव्यमित्याशंक्य विद्याभेदान्नोपसंहार इत्याह विद्यांतरेति किं यथा मंत्रकर्मणामनावश्यकत्वाद्विद्यास्वनुपसंहार एवमत्र तथाप

यत्र तु हानमेव श्रूयते नोपायनं तत्रोपायनं सन्निपतेद्वा न वेति विचिकित्सायामश्रवणादसंनिपातो विद्यांतरगोचरत्वाच्च श्रुत्यंतरीयस्य श्रव
णस्य अपि चात्मकर्तृके सुकृतदुष्कृते तयोर्हानं परकर्तृकं तदुपायनं तयोरसत्यावश्यकभावे कथं हानेनोपायनमाक्षिप्येत तस्मादसंनिपा
तो हानावुपायनस्येत्यस्यां प्राप्तौ पठति हानौ त्विति। हानौ त्वेतत्स्यात्केवलायामपि श्रूयमाणायामुपायनं सन्निपतितुमर्हति तच्छेषत्वात्। हानश
ब्दशेषो ह्युपायनशब्दः समधिगतः कौषीतकिरहस्ये तस्मादन्यत्र केवलहानश्रवणेप्युपायनानुवृत्तिः। यदुक्तमश्रवणाद्विद्यांतरगोचरत्वाच्चानाव
श्यकत्वाच्चासन्निपात इति॥ ॥

तैरुपादानं विनापि हानसंभवेनोपायनस्यानावश्यकत्वान्न प्राप्तिरिति दृष्टांतसंगत्या प्राप्ते सिद्धांतयति हानौ त्विति। लादिनोपायनशब्दस्य शेष ७१
त्वाद्धानशब्दे नापेक्षितत्वादिति सूत्रार्थः अश्वरोमदृष्टांतेन विधूतयोः पुण्यपापयोः परत्रावस्थानस्यापेक्षितत्वात्परैरुपादानं वाच्यमिति भावः

विद्याभेदे गुणानुपसंहार इति मवस्थानुक्तानविप्रत्यानक्तेतिविषये साह। तदुच्यत इति मन्यते सूत्रकार इत्यर्थः। ननु श्रुतेरर्थवादेनापिस्तुतिरिति
हि किमर्थमुपापन्नोपन्यासः आनीयते तत्राह स्तुतिप्रकर्षेला भायेति तत्र अर्थवादस्य विधिना संबंधः प्रसिद्धो नार्थवादांतरेणेत्यत आह पुरुषिद्धेवेति दृष्टो
भूर्लोकादिलक्षणः हेमंतशिशिरयोरैक्यात्संवत्सरः पञ्चर्तवः पञ्च तस्य पुरुषरूपकल्पनायां सेंद्रियमुखादिभिरुभौ भवतः सुकं वहूच ब्राह्मणेन तत्र विशिष्टो भूमौ देवमात्रसाम्यात्कृत्य
मिंद्रियत्वकल्पनिसाकांक्षामांसतु वीर्यं संवाधत इत्यर्थः। नन्वश्रुतयोः पुण्यपापयोर्हानादानस्य संभवाद्गुणोपसंहार इत्यत आह स्तुत्यर्थत्वाच्चेति विद्यान्तरेष्वेव
तदुच्यते। भवेदेषाव्यवस्था यदि केवलस्तुत्यर्थं किंचिदन्यत्र श्रुतमन्यत्र निनीषेत न त्विह हानमुपायनं वानुष्ठेयत्वेन संकीर्त्यते विद्यास्तुत्यर्थत्वेन यो संकीर्त्यतेऽनंद
त्वमहो भागावि धामप्रतामवध्याद्रस्य विदुषः सुकृतदुष्कृते संसारकारणभूते विधूयेते ते चास्य सुहृद्द्विषद्भ्यां निविशेते इति स्तुत्यर्थं त्वप्रकीर्णं संकीर्त्यते न हानादानंत
स्मावि तेनोपायनस्य कृचित्संकलितस्यान्यत्रापि हानश्रुतावुपायनानुवृत्तिमुच्यते। स्तुतिप्रकर्षेण लाभप्रसिद्धानामर्थवादानां नोपेक्षा ... एकविं
शोवाद्यूतो सावण्ड्स इत्येवमादि ... कथं हीयते कृतविंशतौ दिलस्याभिधीयते न पेक्षमाणोऽर्थवादांतरे द्रष्टव्याः मासाः पञ्चर्तवस्त्रयो मेलोकाः असावादि
त्यः एकविंश इत्यस्मिन्नेव तथा त्रिष्टुभो भवतः सेंद्रियत्वाय इत्येवमादिवाक्येषु ब्राह्मणेषु त्रिष्टुभां विस्तरेणैव माघपर्यवादांतरोपेक्षा दृश्यते। स्तुत्यर्थत्वाच्चासे पायनवाद
स्यकर्मसन्दर्शितेषु कृतदुष्कृते अन्यैरुपेयेते इति तावाभिनिवेष्टव्यं।
तयोः फलं परेषामनुवर्तते विद्याप्राप्त्यादिलुप्तमिति प्रदर्शनोच्यत इत्यर्थः। नन्वन्यनिष्ठकर्मणोऽन्यत्र फलसंचारः कथं ननु वचनबलादिति चेन्नफलमुपगम्यं
तीति श्रुतेः। न च यथा पुत्रकृतेष्ट्या ह्यस्यापि पितृषु फलं तथा प्राप्नोतीति वाच्यं यस्य फलमुद्दिश्य यत्कर्म विहितं तस्यैव तत्फलमितिन्यायेन पितृगामितत्सुहृद्द्वैनकृतकर्मे
तोऽनधिकरणफलत्वेऽपि विदुषः कर्मैकाले न दृष्टव्याधिकरणाफलाभोगात्।

किंचविदुषोदेहपातेकर्मिणोसुखाद्याकर्ज्ञीवंविदुस्तेवकस्य द्वेषिणो वा फलं स्यादित्यत आह नानीचाभिनिवेशस्यमितिविधित्स्तेवा द्वेषाम्भंवा विद्वन्निष्ठपुण्य
पापतुल्यपुण्यपापेसेवकद्वेषिणोर्जायेतेजानस्पो॰फलतःस्वीकारउपायनिमित्तिपरिहारस्तुनलभतांहनुम्भहरुसर्थः॥ उपायनादेस्कंतिवेलिंगमाह उपाय
नेतिउपायस्य विवक्षायामुपायनस्येवोपसंहारं सत्त्वाप्य सूया द्वतः उपाद्स्तंबन्तस्य तिंस्त्वचमतीत्यर्थः। विद्याविचारात्मकपरेक्रतिविचारस्यकात्संगतिरित्यत
आहतस्मादितिप्राक्तनरस्पोविप्रवेशः शाखोतरेपियाः घइत्यत्र दृष्टांतमाहकुशेति। कुशाउद्धाहरणं स्तोत्रगणनार्थं शलाकादारुमय्यःभोकुशापूपंवा
नस्पतासामहान्वृक्षोवनस्पतिःतत्संभवाःसूक्तादृशत्वं भूतापूर्वमापातमारस्पनेतिमजमानमार्पनाश्रवताद्रतिस्त्रीलिंगमितिरेदोदुवर्णइतिभाष्याबुस
उपायनस्यउरोषलादितिचरुपुरुषं समत्ताररंभस्य स्पर्धा मेवस्ता नाबुपायनानुवृत्तिस्तूचयतिगुणोपसंहारविवक्षायांहि उपायनापेस्येवहानावनुवृ
त्तिंस्त्रमात्। तस्मादुपोपसंहारविचारप्रसंगेनस्तस्यपसंहारप्रकारदर्शनार्थमिदंसूत्रं। कुशाछंदस्कस्तुपगानवद्धिसुपनीपाधानंतघ्रथाभाष्येविनाकु
शा वानस्पत्यास्थ तामापातेसेतस्मिन्विगमे कुशा नाम विशेषेण वनस्पतिभ्यो नितेनश्रवणेशाख्यायनिनामी दुंवराः इति विशेषवचनात् एदुंवर्यः कुशा
आश्रीयते। यथा च कश्चित् देवासुरकंदसामविशेषेण पौर्वापर्ये प्रसंगे देवच्छंदांसि पूर्वाणीति पैंग्या म्नाता स्वतीयंते। यथा च षोडशिग्रहणे नैके या चिक्का
लाविशेषणमात्रे समया व्युषितेसूर्य इत्याद्यविशिष्टे कालविशेषमतोति॥

लकासुकुशाशाखस्थाचीले मंत्रपदर्भेविषमस्य नस्त्री कुशाभिसनुशासनात् छंदो दृष्टांतंव्याचष्टे। यथा च्चेति त्वाषाडिणोः छंदांसि आसुपएवनानिर्देवानिते
षांकचिच्छंदोभिस्तवनदुस्तत्ता विशेषणासेपैंगिवाक्याहि उपग्रहइत्यर्थःस्तुतिं विदधातीतिमर्थीति। अतिरात्रेषोडशिनो ग्रहस्यांगभूतं स्तोत्रंकदेतिछंदोग्र
हीनामाकासन्नुपर्दयमसमया विशेषस्तेषोडशिनस्तोत्रमित्याचर्श्रुतेःकालविशेषग्रहइत्यर्थः। इच्छोधीयतइत्याचाः। समयाविषितेसूर्य इतिपजुःशाखासापे
उशिग्रहस्तोत्रपारर्धोत्तमितेविधानात्तत्स्तोत्रसमाप्तेरर्धोत्तमसस्येव मोग्यत्वात् समयाविषितेऽर्धोतमितदतिविशास्ति पैल्लेखनाप्युक्तस्ततरेपितसमानापेक

७२

उपगानं विभजन्ते पर्यायेणर्त्विजउपगायंतीत्यविशेषश्रुतेर्नाध्वर्युरुपगायतीति श्रुत्यंतरएवाध्वर्युभिन्नाऋत्विजउपगायंतीत्यर्थः । ननु कुशादिवाक्या
नामपि किमिति विशेषश्रुत्यंतरैकवाक्यतानुपगम्यते तत्राह श्रुत्यंतरकृतंहीति सामान्यविशेषयोरेकवाक्यतारूपायां गतौ संभवात्प्रभेदकृत्वानाध्वर्यु
रितिनिषेधाद्विशेषश्रुतेरध्वर्युरुपगायतिनोपगायतिचेत्येवं सर्वत्रविकल्पोनयुक्तः । व्रीहियवयोस्तु गत्यभावाद्विकल्पआश्रितइत्यर्थः । विकल्पस्याप्राम

यथैवत्वाविशेषेणोपगानं केचित्समामनंति विशेषेणाध्वर्युवर्जितः यथैवेनैवकुशादिषु श्रुत्यंतरगतविशेषान्वयः एवं हानावप्युपायनान्वयाद्
सर्वः । श्रुत्यंतरकृतं हि विशेषं श्रुत्यंतरेनाभ्युपगच्छतः सर्वत्रैव विकल्पस्यात् । इत्याभाष्यः संगतो ॥ ॥

ण्यमष्टदोषदुष्टत्वात्तथाहि यदि व्रीहिवाक्यप्रामाण्यमभ्युपेतंतदा यववाक्यस्येष्टप्रामाण्यपरित्यागः अनिष्टाप्रामाण्यस्वीकारः कदाचिद्यववाक्यप्रामाण्यस्य कृतप्रमा
ण्यस्वीकारः स्वीकृताप्रामाण्यत्यागश्चेत्येकस्मिन्यववाक्येचत्वारोदोषाः भवंतिएवं व्रीहिवाक्येपिचत्वारोदोषा इति ॥ ॥ ॥

एवं दुष्टविकल्पपरिहाराय भिन्नशाखास्थस्यापि एकवाक्यता जैमिनिसंमतेत्याह । तदुक्तमिति ज्योतिष्टोमप्रकरणे दीक्षितो न जुहोतीति श्रुतं पावज्जी-
वमग्निहोत्रं जुहुयादिति वाक्यान्तरश्रुतं तत्र यदि न दीक्षितवाक्यं होमप्रतिषेधकं स्यात् तदा कृत्स्नर्थत्वात् निषेधो नुष्ठेयः यावज्जीवविधिना होमो वानुष्ठेय इति
विकल्पः स्यात् स चान्याय्यः अपि तु यावज्जीववाक्यं प्रति न दीक्षितवाक्यस्य शेषत्वान्न काररूपस्य पर्युदासार्थकः स्यात् दीक्षितान्यलक्षकः स्यात् होमप्रतिषे-
धस्तस्मात् दीक्षितो यावज्जीवं जुहुयादित्येकवाक्यतेति न दीक्षिताधिकरणसिद्धान्ततस्त्वार्थः अत्र भगवत्सादैः स्त्वमेव पठितं मिश्रैस्तु पर्युदासाधिकर-

तदुक्तं द्वादशलक्षण्यां अपि तु वाक्यशेषत्वादितरपर्युदासः स्यात् प्रतिषेधे विकल्पः स्यादिति अपि चैतास्त्वेवं विधं न नञ्श्रुतिषु एतेन सू-
त्रेणोत्तत्वितमिति तत्वं ॥ ॥

एकसिद्धान्तस्तुत्वं अपि तु वाक्यशेषः स्यादन्याय्यत्वाद्विकल्पस्य विधीनामेकदेशः स्यादिति स्थितमत्रार्थितः पठितमित्युक्तं तद्विस्तरस्त्वार्थस्तु पञ्चमात्रेये
यजामहे इति प्रयोगरूपमिति श्रुतं तेनानूयाजेषु ये यजामहं करोति नानूयाजेष्विति श्रुतं तत्र नकारस्य निषेधकत्वे श्रुति एव षोडशिग्रहणाग्रहणयोरिवानूयाजेषु
तुल्यविकल्पः स्यात् ये यजामहविधेरेवनानूयाजवाक्यमेकदेशः स्यात् पर्युदासवत्वाद्विधिवा-
क्यशेषः स्यादिति यावत् तथा चानूयाजभिन्नेषु यागेषु ये यजामहे इति प्रयोगरूपमित्येकवाक्यतेति । नञ्श्रुतिं तस्माह अपि चैति । एवं च विधं न नञ्कर्म हा निरिति

कृमत्र लक्षणया हान्याह्वेयमिदमाहुः किमिति विधूननस्य हि फलं द्वयमभ्युपोमादिषु दृष्टं पूर्वस्वभावात् च्युतिरन्यत्र संक्रान्तिश्चेति तत्र संक्रान्तिरूपहानि
लक्षणीया किं वा च्युतिरिति संशयार्थः। तत्र विधूननशब्दस्य कंपनं ह्यर्थ इति तावत्सर्वसंमतं तत्र वा प्रवृत्तयोः पुण्यपापयोर्न संभवति। अतस्तयोर्यः
स्वभावः फलदातृत्वशक्तिस्तस्माच्चलनं विधूननमिति वक्तव्यं च्युतिशब्दलक्षणया न हानिरूपेण। तयोरन्यत्र संक्रान्त्यसंयोगादन्यसापेक्षत्वाच्चेति पूर्वपक्षाशयः। सि
द्धान्तयति हानावेवेति यदि च्युतिमात्रं लक्ष्यं तदोपयन्तेसन्नन्वितस्यान्नं चयत्र धुनोते रूपायनशब्दसान्निध्यं तत्र हानिर्लक्ष्या तेन केवलधुनोतेर्हानिर्लक्ष्या

किमनेन विधूननवचनेन सुकृतदुष्कृतयोर्हानिरभिधीयते। किं वार्थान्तरमिति। तत्र चैवं प्राप्तं न हानं विधूननमभिधीयते धूञ् कंपन
इति स्मरणात्। दोधूयते ध्वजाग्राणीति च वायुना चाल्यमानेषु ध्वजाग्रेषु प्रयोगदर्शनात्। तस्माच्चालनं विधूननमभिधीयते। चालनं च सुकृतदुष्कृ
तयोः कंचित्कालं फलप्रतिबंधनादिति। एवं प्राप्ते प्रतिब्रूमः। हानमेवैतद्विधूननं शब्दोऽर्हतीति उपायनशब्दशेषत्वात्। नहि परपरिगृह्य
माणयोः सुकृतदुष्कृतयोरस्थाने हानमन्तरेण परैरुपायनं संभवति। यद्यपीदं परकीययोः सुकृतदुष्कृतयोः परैरुपायनं नाञ्जसं संभाव्यते तथापि तत्संकीर्तना
त्तावत्तदानुगुण्येन हानमेव विधूननं नामेति निर्णेतुं शक्यते। क्वचिदपि चेदं विधूननं सन्निधावुपायनशब्दस्याश्रूयमाणं कुशाच्छन्दस्स्तुत्युपगानवदि
धूननश्रुत्या सर्वत्रापेक्ष्यमाणा वैदिकं निर्णयकारणं संपद्यते॥

अत्र विदुषः सेवकादीन् तुल्यकर्मसंक्रान्तिरितिनात्रभवइति वाच्यं केवलधुनोतेरपि प्रसक्तार्थसंभवेनान्यत्र लक्ष्यतया बुद्धिस्थहानिलक्षणया एव बु
क्तदिति भावः। उपायनस्यानुक्त्यस्थलान्तरकापि हानिलक्षणवीजत्वमिति इदं किं वा पुण्यपापयोः फलतः स्वीकारात्मकमुपायनं हानिं विनानुपपन्नं स्य
स्मरणं निर्णायकमिति परिहरति यद्यपीत्यादिना यथान्यत्राश्रुतमौडुंबरत्वादिकं कुशादिनिर्णायकं तथेदमुपायनं विधूननस्य हानत्वनिश्चायकमित्याह

शा॰ सू॰ भा॰ ३
७४

विधूननं मुख्यं किमिति नोच्यते तत्राह न्वचेति। तथापि हानं कथं लक्ष्यत इत्याशंक्य मुख्यसंबंधादित्याह अश्वइवेति। अनुपपत्तिसंबंधौ लक्षणाबी
जरूपावुक्तौ लक्षकं पदं निर्दिशति अश्वइवेति। विधूयेति पदं दृष्ट्वा तेहानपर्यंतं सदृशंतिवे हानलक्षकमित्यर्थः। यद्वा नैवाचकमेवास्तु न च धूञ्कं
पन इति धातुपाठविरोधस्तस्योपलक्षणार्थत्वादित्याह अनेकेति शाखांतरस्थमुपायनं विधूननस्य हानत्वनिश्चायकमित्यत्र जैमिनिसूत्रं तदुक्तमित्यत्र

न च चालनं धूञ्गुपवस्तु कृतदुष्कृतयोर्मुख्यं संभवति अद्रव्यत्वात्। अश्वश्चरोमाणि विधून्वानस्तज्जनरजः स हैवं तत्र रोमाण्यपि जीर्णानि त्यजत
मति अश्वइव रोमाणि विधूय पापमिति च वाक्यलक्षणं। अनेकार्थत्वाभ्युपगमाच्च धातूनां न स्मरणविरोधः। तदुक्तमित्याख्यातं सांपराये तर्तव्या
भावात्तथा ह्यन्ये ॥२७॥ देवयानेन पथा पर्यंकस्थं ब्रह्माभिसर्पतस्तस्याध्वनि सुकृतदुष्कृतयोर्वियोगं कौषीतकिनः पर्यंकविद्यायामामनंति।
स एतं देवयानं पंथानमापद्याग्निलोकमागच्छतीत्युपक्रम्य स आगच्छति विरजां नदीं तां मनसैवात्येति तत्सुकृतदुष्कृते विधूनुत इति। तत्किं यथा
श्रुतमध्वन्येव वियोगवचनं प्रतिपत्तव्यमाहो स्विदादावेव देहादपसर्पण इति विचारणायां श्रुतिसामर्थ्याद्यथाश्रुतप्रतिपत्तिप्रसक्तौ प
ठति। सांपराय इति ॥

हीतं पूर्वस्मात्तमिसर्थः। एवं विधूननस्य हानित्वसिद्धेः केवलहानश्रुतावुपायनोपसंहार इति सिद्धं। सांपराये ते। अध्वनि। अर्धमार्गे प्रसोर्धं विधू
ननस्य हानत्वमुपजीव्य हानस्य नदीतरणानंतर्यश्रुतेरश्वइव रोमाणीत्यादिदेहत्यागात्प्राक्कालत्वश्रुतेश्च संशयमाह तत्किमिति॥ ब्रह्मलोकमार्ग
मध्ये विरजाख्यनदीं मनसेति तत्सुकृतदुष्कृते विधूनुत इत्यत्र तदिति सर्वनामश्रुत्या तेनैवार्थेन प्रासन्निहितनदीतरणस्य कर्महानिहेतुत्वोक्तेरध्वमध्ये

=

७४

तत्र विद्यायाः कर्मक्षयहेतुत्वासिद्धिः पूर्वपक्षे सिद्धांते तत्सिद्धिरिति मत्वा सिद्धांतमतिसंपश्यन्निति मरणात्प्रागित्यर्थः। संपरेतस्य न तस्य कंचित्कालं
देहत्वे फलाभावाद्देवयानमार्गप्रवेशाभोगाद्वा देवसंपद्यत्यर्थः। क्षयहेतौ विद्यामानध्ये मार्गमध्यत्वाच्चेत्याह विद्याविरुद्धेति। नदीतरणानंतरपाठस्य
नाध्यः अर्थविरोधाद्दित्याह तस्मादिति तदिति सर्वनाम्नापि प्रकृतविद्येवोच्यत इति भावः। किंच मृतस्य छंदतो यथाकामं विद्यानुष्ठानानुपपत्तेरुभ
सांपराये गमन एव देहादपसर्पणादूर्ध्वं विद्यासामर्थ्यात्सुकृतदुःकृतहानं भवतीति प्रतिजानीते हेतुं चाचष्टे। तर्तव्याभावादिति। नहि विदुषः संपरेत
स्य विद्यया ब्रह्म प्रेप्सतो तरणे सुकृतदुःकृताभ्यां किंचित्प्राप्तव्यमस्ति यदर्थं कतिचित्क्षणानक्षीणे ते कल्प्येयातां विद्याविरुद्धफलत्वात्तु विद्यासाम
र्थ्येन तयोः क्षयः। स च यदैव विद्या फलाभिमुखी तदैव भवितुमर्हति। तस्मात्प्रागेव सन्नयसुकृतदुष्कृतक्षयः पश्चात्पठ्यते। तथा ह्यन्येपि शाखिन
स्तांडिनः शाट्यायनिनः श्वशागवस्थायामेव सुकृतदुष्कृतहानमामनंति। अश्व इव रोमाणि विधूय पापमिति तस्य पुत्रा दायमुपयंति सुहृदः साधुकृ
त्यां द्विषंतः पापकृत्यामिति॥ ॥छंदत उभयाविरोधात् ३० यदि चेद्देहादपसृप्तस्य देवयानेन पथा प्रस्थितस्याध्वमध्ये सुकृतदुष्कृतक्षयोऽभ्युपगम्ये
त ततः पतिते देहे यमनियमविद्याभ्यासात्मकस्य सुकृतदुष्कृतक्षयहेतोः पुरुषप्रयत्नस्य छंदतोऽनुष्ठानानुपपत्तेरनुपपत्तिरेव तद्धेतुकस्य सुकृतदु
ष्कृतक्षयस्य स्यात्। तस्मात्पूर्वमेव साधकावस्थायां छंदतोऽनुष्ठानं तस्य स्यात्। तत्पूर्वकं सुकृतदुष्कृतहानं चेति द्रष्टव्यं। एवं निमित्तनैमित्तिकयोरुपप
त्तिस्तांड्यशाट्यायनिश्रुत्योश्च संगतिरिति॥ ॥
यो विद्याकर्मक्षययोः कृतो हेतुफलभावो विरुध्यते किंच सति पुष्कलहेतौ न कार्यविलंब इति न्यायोपेततां याद्दिक्कृति विरोधस्तवस्थादस्मत्पक्षे त्वविरोध इ
त्याह छंदत इति तस्मात्कर्महानस्य विद्याफलत्वात्केवलहानानुपपत्त्योपसंहारे विद्यास्तुतय इति सिद्धं॥ ॥ ॥ ॥

शा. भा. ३ गतेरर्थवत्त्वं। क्वचित्सगुणविद्यायां मार्गः श्रूयते निर्गुणविद्यायां न श्रूयते तत्र हानसंनिधौ मार्गस्य श्रुतत्वादनपेक्षितत्वाच्च संशये दृष्टान्तसंगत्या पूर्वप
७५ क्षमाह यथा तावदिति उपायनवन्मार्गस्यापि क्वचित् श्रुतत्वात्सर्वत्रोपसंहार इत्यर्थः अत्र निर्गुणविद्यायामपि मुक्तस्य मार्गापेक्षा पूर्वपक्षे सिद्धान्ते त्वनपेक्षेति

गतेरर्थवत्त्वमुभयथान्यथा हि विरोधः क्वचित्पुण्यपापापहानसंनिधौ देवयानः पन्थाः श्रूयते क्वचिन्न। तत्र संशयः। किं हानावविशेषेण देवयानः
पन्थाः संनिपतेत्। उत विभागेन क्वचित्संनिपतेत् क्वचिन्नेति। यथा तावद्धानावविशेषेणैवोपायनानुवृत्तिरुक्ता एवं देवयानानुवृत्तिरपि भ
वितुमर्हतीत्यस्यां प्राप्तावाचक्ष्महे। गतेर्देवयानस्य पथोऽर्थवत्त्वमुभयथा विभागेन भवितुमर्हति। क्वचिदर्थवती गतिः क्वचिन्नेति। अ
न्यथा ह्यविशेषेणैवैतस्यां गतावङ्गीक्रियमाणायां विरोधः स्यात्। पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैतीत्यस्यां श्रुतौ देशान्तरप्रापणीग
तिर्विरुध्येत। कथं ह्यनिरञ्जनो देशान्तरं गच्छेत्। गन्तव्यं च परमं साम्यं न तद्देशान्तरप्राप्त्यायत्तमित्यानर्थक्यमेव गतेर्मन्यामहे॥ ॥उपपन्नस्त
ल्लक्षणार्थोपलब्धेर्लोकवत् ३१ उपपन्नश्चायमुभयथाभावः क्वचिदर्थवती गतिः क्वचिन्नेति। तल्लक्षणार्थोपलब्धेः गतिकारणभूतो ह्यर्थः प
र्यङ्कविद्यादिषु सगुणेषूपासनेषूपलभ्यते। तत्र हि पर्यङ्कारोहणं पर्यङ्कस्थेन ब्रह्मणा संवदनं विशिष्टगन्धादिप्राप्तिश्चेत्येवमादि बहु देशान्तरप्रा
प्त्यायत्तं फलं श्रूयते तत्रार्थवती गतिः। नहि सम्यग्दर्शने तल्लक्षणार्थोपलब्धिरस्ति न ह्यात्मैकत्वदर्शिनामाप्तकामानामिहैव दग्धाशेषक्लेश
बीजानामारब्धभोगकर्माशयक्षपणव्यतिरेकेणापेक्षितव्यं किंचिदस्ति। तत्रानर्थिका गतिः। लोकवच्चैष विभागो द्रष्टव्यः। यथा लोके ग्रामनग ७५
रप्राप्तौ देशान्तरप्रापणः पन्था अपेक्ष्यते। नारोग्यप्राप्तौ। एवमिहापीति। भूयश्चैनं विभागं चतुर्थाध्याये निपुणतरमुपपादयिष्यामः॥ ॥

फलं देशादिषु विहितवस्तुप्राप्तौ मार्गसापेक्षेति न्यायानुगृहीतश्रुतिविरोधान्नोपसंहार इति सिद्धान्तः॥ निरञ्जनो लेपः। साम्यं ब्रह्म न कुत्र हि सगुणवि
द्यायामपि मार्गो व्यर्थ इत्यत आह। उपपन्न इति गतिः लक्षणं कारणं यस्यार्थस्य स तल्लक्षणार्थः

अनियमः सर्वासां अन्नाप्य विहितमार्गएव विषमस्तत्र विद्याविशेषप्रकरणादविशेषश्रुतेश्च संशये न पूर्वपक्षमाह। किं तावदिति। सगुणनिर्गुणविद्या
सुमार्गस्य भावाभावयोरव्यवस्था सगुणास्वपि अव्यवस्थेति दृष्टांतेन प्राप्तेसिद्धांते व्यवस्थापवादात्संगतिः। नियमोऽनियम उभयत्र फलं नियमेन प्रकरणानुरूपा पु ॥

अनियमः सर्वासामविरोधः शब्दानुमानाभ्यां ३२ सगुणासु विद्यासु गतिरर्थवती न निर्गुणायां परमात्मविद्यायामिति स्थितं सगुणासु विद्यासु
गतिः श्रूयते। यथा पर्यंकविद्यायां उपकोसलविद्यायां पंचाग्निविद्यायां दहरविद्यायामिति नान्यासु यथा मधुविद्यायां शांडिल्यविद्यायां षोडशकल
विद्यायां वैश्वानरविद्यायामिति। तत्र संशयः। किं यास्वेषा गतिः श्रूयते तास्वेव नियम्येत उतानियमेन सर्वाभिरेवंजातीयकाभिर्विद्याभिरभिसंबध्येत।
किं तावत्प्राप्तं नियम इति। यत्रैव श्रूयते तत्रैव भवितुमर्हति प्रकरणस्य नियामकत्वात्। यद्यन्यत्रश्रूयमाणापि गतिर्विद्यांतरं गच्छेत् श्रुत्यादीनां प्रामा
ण्यं हीयेत। सर्वस्य सर्वार्थत्वप्रसंगात्। अपि चार्चिरादिका एकैव गतिरुपकोसलविद्यायां पंचाग्निविद्यायां च तुल्यवत्पठ्यते। तत्सर्वार्थत्वेनर्थकं पु
नर्वचनं स्यात्। तस्मान्नियम इत्येवं प्राप्ते पठति। अनियम इति। सर्वासामेवाभ्युदयप्राप्तिफलानां सगुणानां विद्यानामविशेषेणैषा देवयानाख्या ग
तिर्भवितुमर्हति। नन्वनियमाभ्युपगमे प्रकरणविरोध उक्तः। नैष दोषः। शब्दानुमानाभ्यां श्रुतिस्मृतिभ्यामित्यर्थः। तथा हि श्रुतिः। तद्य इत्थं विदुरिति
पंचाग्निविद्यावतां देवयानं पंथानमवतारयंती ये चेमेऽरण्ये श्रद्धां तप इत्युपासत इति विद्यांतरशीलानामपि पंचाग्निविद्याविद्भिः समानमार्गतां गम
यति॥ ॥

न तु क्विं लिंगमाह अपि चैते एकत्रोक्तागतेरन्यत्र प्राप्तौ पुनरुक्तिर्व्यर्था स्यादिति पूर्वपक्षः सिद्धांतयति सर्वासामिति अभ्युदयो ब्रह्मलोकः। अविशेषश्रुत्यादिना
प्रकरणबाधे न दोष इत्याह नैष इति तत्र अधिकृतानामिमे ये इमे पंचाग्निविदुर्ये चामी अरण्ये श्रद्धातप इत्युपासते श्रद्धा तप उपलक्षितं ब्रह्मोपासते

ब्र॰सू॰भा॰३ ननुश्रद्धातपोमात्रश्रुतेस्तापसैर्भिक्षुभिर्वार्चिरादिगमनं स्यान्न वैश्वानरादिविद्याशीलानामिति शङ्कते कथं पुनरिति। अविदुषां गतिनिषेधाच्छ्रद्धातपःश्र
श्राभ्यां तत्त्वाभ्यां ब्रह्मविद्या लक्ष्यत इति परिहरति नैष दोष इति। तत्र ब्रह्मलोकस्था न परागताः पराप्ताः कामाः भुक्त्वा येषां ते न सन्ति तथा च तत्र दक्षिणाः केवलक
७६ र्मिणस्तपस्विनोऽप्यविद्वांसो न गच्छन्ति सर्वे। तत्र सत्यशब्दो ब्रह्मणि नेत्याशङ्क्याह वाजसनेयिनामपीति किं च विद्याफलं [illegible] मार्गद्वयभ्रष्टानामधोगतिश्रुतेर्वैश्वान
राद्युपासकानामर्चिरादिमार्गं आह अथ य एतावितिदंदशूकः सर्पः। किं च स्मृतिरपीत्याह शुक्लः [illegible] तत्र समानतां गच्छति अन्यविद
कथं पुनरवगम्यते विद्यान्तरशीलिनामियं गतिरिति। ननु श्रद्धातपःपरायणानामेव स्यात् तन्मात्रश्रवणात्। नैष दोषः। नहि केवलाभ्यां श्रद्धातपोभ्यामन्तरेण
विद्याबलमेषा गतिर्लभ्यते। विद्यया तदारोहन्ति यत्र कामाः परागताः। न तत्र दक्षिणा यन्ति नाविद्वांसस्तपस्विन इति श्रुत्यन्तरात्। तस्मादिह श्रद्धातपोभ्यां वि
द्यान्तरोपलक्षणम्। वाजसनेयिनस्तु पंचाग्निविद्याधिकारेऽधीयते य एवमेतद्विदुर्ये चामी अरण्ये श्रद्धां सत्यमुपासत इति। तत्र श्रद्धालवो ये सत्यं ब्रह्मोपा
सत इति व्याख्येयं। सत्यशब्दस्य ब्रह्मण्यसकृत्प्रयुक्तत्वात्। पंचाग्निविद्याविदां चेत्थंविदितयोपात्तत्वात् विद्यान्तरपरायणानामेवैतदुपादानं न्याय्यं। अथ य ए ७६ ॥
तौ पन्थानौ न विदुस्ते कीटाः पतंगा यदिदं दंदशूकमिति मार्गद्वयभ्रष्टानां कष्टामधोगतिं गमयन्ती श्रुतिर्देवयानपितृयाणयोरेवैनानन्तर्भावयति। तत्रापि विद्यावि
शेषादेषां देवयानप्रतिपत्तिः। स्मृतिरपि शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते। एकया यात्यनावृत्तिमन्ययावर्तते पुनरिति। यत्पुनर्देवयानस्य पथो द्विराम्ना
नमुपकोसलविद्यायां पंचाग्निविद्यायां च तदुभयत्राप्यनुचिन्तनार्थं। तस्मादनियमः॥ ३१॥ जनाः इत्यविद्विषे एणोपासकानामर्चिरादिगतिमुक्त्वोपसंहारस्यातेश्व
नेषां तत्त्वा शिरीरस्याहस्य तिरिक्तिशुक्ला गतिरर्चिरादिका कृष्णा धूमादिका जगतो विद्याकर्माधिकृतस्य शाश्वते अनादी मते तत्रैकया शुक्लया पुनरावृत्तिं कृष्णया
जन्म गच्छति स्वर्गं गत्वा पुनरायातीत्यर्थः। पुनरुक्तिदोषं दूषयति यत्पुनरिति तच्च तत्रमार्गश्रुतिरन्वहं मार्गचिन्तनार्थं प्रकरणे न मार्गध्यानस्य विद्यांगत्वाव
गमात् तथा च वक्ष्यति सूत्रकारः तद्वेषगस्यनुस्मृतियोगाच्चेति ये पुनः श्रुतमार्गास्ते मार्गध्यानं विनापि विद्यासामर्थ्यात् मार्गं लभन्त इति तावता फी पुनरुक्तिरि

यावदधिकारं। निर्गुणविद्यायां गतिर्नास्ति मुक्तिफलत्वात् सगुणविद्यासु सर्वत्राप्यर्चिरादिगतिर्ब्रह्मलोकफलत्वादिति व्यवस्था कृता। सगुणज्ञा तत्त्वज्ञानिनाम
पीतिहासादौ पुनर्जन्मदर्शनात् ज्ञानस्य मुक्तिफलत्वाभावादिति शंकोपात्तं गतिः संगतिः। ऋषीणां पुनर्जन्मदर्शनसम्भवबीजं भाष्ये दर्शितं तं पूर्वपक्षं ज्ञानानुमित्यन्ती

यावदधिकारमवस्थितिराधिकारिकाणाम् ॥३३॥ विदुषो वर्तमानदेहपातानन्तरं देहान्तरमुत्पद्यते न वेति चिन्त्यते। ननु विद्यायाः साधनभूतायाः संपत्तौ कैवल्यनिर्वृत्तिः स्यान्न वेति नेयं चिन्तोपपद्यते। न हि पाकसाधनसंपत्तावोदनो भवेन्न वेति चिन्ता संभवति। नापि भुञ्जानस्तृप्येन्न वेति चिन्त्यते। उपपन्ना त्वियं चिन्ता। ब्रह्मविदामपि केषांचिदितिहासपुराणयोर्देहान्तरोत्पत्तिदर्शनात्। तथा ह्यपान्तरतमा नाम वेदाचार्यः पुराणर्षिर्विष्णुनियोगात्कलिद्वापरयोः संधौ कृष्णद्वैपायनः संबभूवेति स्मरन्ति। वसिष्ठश्च ब्रह्मणो मानसः पुत्रः सन्निमिशापादपगतपूर्वदेहः पुनर्ब्रह्मादेशान्मित्रावरुणाभ्यां संबभूवेति। भृग्वादीनामपि ब्रह्मण एव मानसपुत्राणां वारुणे यज्ञे पुनरुत्पत्तिः श्रूयते। सनत्कुमारोऽपि ब्रह्मण एव मानसः पुत्रः स्वयं रुद्राय वरप्रदानात्स्कन्दत्वेन प्रादुर्बभूव। एवमेव दक्षनारदप्रभृतीनां भूयसी देहान्तरोत्पत्तिः कथ्यते तेन तेन निमित्तेन स्मृतौ। श्रुतावपि मन्त्रार्थवादयोः प्रायेणोपलभ्यते। ते च केचित्पतिते पूर्वदेहे देहान्तरमाददत केचित्तु स्थित एव तस्मिन्योगैश्वर्यवशादनेकदेहादानन्यायेन। सर्वे चैते समधिगतसकलवेदार्थाः स्मर्यन्ते। तदेषां देहान्तरोत्पत्तिदर्शनात्प्राप्तं ब्रह्मविद्यायाः पाक्षिकं मोक्षहेतुत्वमहेतुत्वं वेति। अत उत्तरमुच्यते॥ ॥ ॥

नां ज्ञानस्य कृतिमात्रत्वेन ज्ञानस्य मुक्तिफलाभावे सति ब्रह्मलोकफलत्वाविशेषादर्चिरादिमार्गोपसंहारः फलं सिद्धान्ते तु व्यवस्थासिद्धिरिति विवेकः।
श्रुतावपीति मेधातिथेर्मेषेति मन्त्रे इन्द्रस्य मेषजन्मोपलभ्यते वसिष्ठ उर्वशीपुत्रो जात इत्येवं बह्वृचार्थवादस्यार्थः॥ पाक्षिकमित्याकाततः अहेतु
त्वमेवेति पूर्वपक्षः ज्ञानस्य मुक्त्यहेतुत्वेनेति

शा॰ सू॰ भा॰ सिद्धं तन्मतिनेति लोकव्यवस्थासु स्वाम्यमधिकारः तत्रापकप्रारब्धं यावदस्ति तावत्कालं जीवन्मुक्तत्वेनाधिकारिकाणामवस्थितिः प्रारब्धक्षये प्रतिबं
धकाभावाद्विदेहकैवल्यमित्यत्र मानमाह अथेति अथ प्रारब्धसमाप्त्यनंतरं ततः ऊर्ध्वं ह्यविद्यानिवृत्त्या एकलः केवलः अजरूपः सन्नुदेतोऽस्तमेता देहं त्यक्त्वेति मायावतह कल
७७ एव स्थितिरिति मध्ये उदासीनः स्वस्वरूपेण तिष्ठतीत्यर्थः । ननु ज्ञानितानामपि जन्मांतरं श्रूयते कथं मुक्तिरित्यत आह सकृत्प्रवृत्तमिति यथाहृतानि नोभारब्धातिरिक्तकर्मा
णां तेषामपांतरतमः प्रभृतीनां वेदप्रवर्तनादिषु लोकस्थितिहेतुष्वधिकारेषु नियुक्तानामधिकारतंत्रत्वात्स्थितेः यथासौ भगवान्सविता सहस्रयुगपर्यंतं
जगतोधिकारं चरित्वा तदवसान उदयास्तमयवर्जितं कैवल्यमनुभवति अथ तत ऊर्ध्व उदेत्य नैवोदेता नास्तमेतैकल एव मध्ये स्थाता इति श्रुतेः यथा च वर्तमाना
ब्रह्मविदः आरब्धभोगक्षये कैवल्यमनुभवंति तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्य इति श्रुतेः एवमपांतरतमः प्रभृतयोपीश्वराः परमेश्वरेण तेषु
तेष्वधिकारेषु नियुक्ताः संतः सत्यपि दर्शने कैवल्यहेतावक्षीणकर्माणो यावदधिकारमवतिष्ठंते तदवसाने चापवृज्यंत इत्यविरुद्धं । सकृत्प्रवृत्तमेव हि ते
फलदानाय कर्माशयमतिवाहयंतः स्वातंत्र्येणैव गृहादिव गृहांतरमन्यमन्यं देहं संचरंतः स्वाधिकारनिर्वर्तनायापरिमुषितस्मृतय एव देहेंद्रियप्रकृति
वशित्वान्निर्माय देहान्युगपत्क्रमेण वाधितिष्ठंति॥ ॥ ॥ ॥ ॥

चीर्णं जन्मांतरं स्यात्तदज्ञानान्मुक्त्यभावः स्यान्नैतदस्ति किंतु यत्कृतजन्मफलाम सकृत्प्रवृत्तं प्रारब्धं तेषु पर्यंति जन्मग्रहणेऽपि ज्ञानयोगबलान्नशोचंति प्रारब्ध ७८
समाप्तौ मुच्यंत इत्यर्थः ज्ञानिनां जन्मांतरस्य पूर्वजन्महेतुप्रारब्धाधीनतामाह तस्य स्मृतिलोपहेतुः योग्यज्ञानातिशयत्वे सति कर्मांतराधीनजन्मांतरलाभस
नुवत्स्कृतिरिति भासेः ज्ञानिषु प्रापकाभावाद्विदेहकैवल्याभावसिद्धिः॥

ननु तेषां जातिस्मरत्वाद्बलवत्तमस्मृतिलम्भसंभवासिद्धमित्यत आह न चैतद्दिति तथा च तेषामजातिस्मरत्वरूपविशेषणं सति विशेषे ब्रह्मभावादेव विशिष्टाभावसिद्धिरि
त्यर्थः । पूर्वदेहनाशसमकालमेव हि नाशः परं तेषां तत्र जातिस्मराः सुधिकारिकृतस्वपूर्वनामानः स्वतंत्रा निरभिमाना इति वैषम्यं तेन जनकेन सह त्वध
विना देहान्तरसंबन्धः विदुषः प्रारब्धातिरिक्तकर्माभावान्न बंधः । निमित्ताभावे नैमित्तिकाभाव इति मायानुगृहीतानां ज्ञानान्मुक्तिश्रुतीनां नानकृतिमात्रे तात्पर्यमिति मम
न चैते जातिस्मरा इत्युच्यन्ते तस्वेतदिति स्मृतिप्रसिद्धेः । यथा हि सुलभाप्रभृतयः वादिनी जनकेन विवदितुमागमात्पुरुषस्य देहं ज्ञानकर्माविष्टमपतन पश्चा
त्स्वमेवाविवेशे निष्क्रान्तैः महद्भिरुपयुक्तेः सकृत्संबद्धेनेकर्माणि कर्मान्तरदेहान्तरारंभकाणि अविभवे ततो महद्दग्धबीजकर्मान्तरं तद्देवप्रसज्येतेति
प्रसिद्धा मा पापक्रमास्ते हि तु लभन्ते तुल्यं वाङ्मात्रं न तत्रिम भाशङ्का पुनः । ज्ञानानां कर्मबीजदाहकत्वश्रुतिस्मृतिप्रसिद्धत्वात् । तथा हि श्रुतिः । भिद्यते हृद
यग्रन्थिश्छिद्यन्ते सर्वसंशयाः । क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावर इति स्मृतिर्ज्ञानेन सर्वग्रन्थीनां विप्रमोक इति श्रुतेमाधाः स्मृतिरपि । यथैधांसि समि
द्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन । ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथेति । बीजान्यग्न्युपदग्धानि न रोहन्ति यथा पुनः । ज्ञानदग्धैस्तथा क्लेशैर्नात्मा संप
द्यते पुनरिति चैवमादिवाक्यानि चाभिधायैकजन्मनि हि सति क्लेशबीजस्य कर्मणोऽनुपपत्तेरेकदेशदाहस्यैकदेशारंभकत्वे तदुपपद्यते न हि निर्दग्धस्य शालिबीजस्यैक
देशः प्ररोहति दृश्यते । प्रवृत्तफलस्य कर्माशयस्य मुक्तेषोरिव वेगक्षयान्निवृत्तिः तस्य तावदेव चिरमिति शरीरपातप्रसंगात् । तस्मादुपपन्ना यावद
धिकारमाधिकारिकाणामवस्थितिः । न च ज्ञानफलस्यानैकान्तिकता । तथा श्रुतिरविशेषेणैव सर्वेषां ज्ञानान्मोक्षं दर्शयति । तद्यो यो देवानां प्रत्यबुध्य
त स एव तदभवत्तथर्षीणां तथा मनुष्याणामिति ॥
एवमुपपादितमपि दिलुकृत्स्नात्मज्ञानिस्वप्नुपुरुषार्थत्वमुक्तिमप्याहन्तचातिचेति विद्याफले शंकाहराल्कार्यकर्मसंप्रश्ने तर्हि प्रारब्धस्य कर्मणः स्थितिः
काहमथ तत्फलस्येति विदुषो देहपातावधिकतेरनुभवाज्ज्ञानानुत्पादकज्ञानाज्ञाननिवर्तकस्य प्रारब्धविक्षेपस्थिस्तदनुकूलाज्ञानांशानिवर्तनसामर्थ्या
भावादिति कर्मणि नैव प्रारब्धस्य प्रतिभावः ॥ ॥

शा.सू.भा.३
७८

ज्ञानिनामाधिकारिकफलं कर्माभिसंधानं स्यात्तान्नात्मकृतोपास्त्यादिवृषणादित्याह ज्ञानांतरेषु चेति मतिसंचारो न ह्यात्मनः परस्य हिरण्यगर्भस्य आधिकारिकांते
साक्षात्कृतात्मानो मुच्यंते इत्यर्थः। अज्ञभावफलस्याविभावितस्माद्यज्ञात्मतां निष्कृतिवाधमाह न हीति तस्मान्निर्गुणविद्यायामार्गानुपसंहार इति सिद्धं। अक्षरधियां
श्चात्राहारयज्ञस्यापकाभिषेधश्रुतिविषयास्ते पुनरावर्तन्ते तावत्तामन्त्रेषु द्वैतनिषेधफलत्वं भवति संभवाभ्यां संस्कार्यमाहतामानिजियथा न्यैर्गीविद्या
ज्ञानांतरेषु चैश्वर्यादिफलेष्वासक्ताः सन्तः पश्चादैश्वर्यक्षयदर्शनेन निर्विण्णाः परमात्मज्ञाने परिनिष्ठाः कैवल्यं प्रतिपेदिरे। ब्रह्मणा सह ते
सर्वे संप्राप्ते प्रतिसंचरे। परस्यांते कृतात्मानः प्रविशंति परं पदमिति स्मरणात्। अप्रत्यक्षफलत्वाच्च ज्ञानस्य फलविरहाशंकानुपपत्तिः॥ कर्मफले हि स्वर्गा
दावनुभवानारूढे स्यादाशंका भवेद्वा न वेति अनुभवारूढं तु ज्ञानफलं। यत्साक्षादपरोक्षाद्ब्रह्मेति श्रुतेः। तत्त्वमसीति च सिद्धवदुपदेशात्। नहि तत्त्वमसीत्यस्य
वाक्यस्यार्थः तत्त्वं मृतो भविष्यसीत्येवं परिणेतुं शक्यं तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदे अहं मनुरभवं सूर्यश्चेति च सम्यग्दर्शनकालमेव तत्फलं स
र्वात्मत्वं दर्शयति। तस्मादैकांतिकी विदुषां कैवल्यसिद्धिः॥ अक्षरधियां त्ववरोधः सामान्यतद्भावाभ्यामौपसदवत्तदुक्तं॥ ३४॥ वाजसनेयके श्रूयते। एत
द्वै तदक्षरं गार्गि ब्राह्मणा अभिवदंत्यस्थूलमनण्वह्रस्वमदीर्घमलोहितमस्नेहमित्यादि। तथाथर्वणे श्रूयते अथ परा यया तदक्षरमधिगम्यते।
यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमित्यादि। तथान्यत्रापि विशेषनिराकरणद्वारेणाक्षरं परं ब्रह्म श्राव्यते। तत्र च क्वचित्केचिद्विशेषाः प्र
तिषिध्यंते। तासां विशेषप्रतिषेधबुद्धीनां किं सर्वासां सर्वत्र प्राप्तिरुत व्यवस्थेति संशये श्रुतिविभागात् व्यवस्थाप्राप्तावुच्यते। अक्षरविषयास्तु विशे
षप्रतिषेधबुद्धयः सर्वाः सर्वत्रावरोद्धव्याः। सामान्यतद्भावाभ्यां समानो हि सर्वत्र विशेषनिराकरणरूपो ब्रह्मप्रतिपादनप्रकारः तदेव च सर्वत्र प्र
तिपाद्यं ब्रह्माभिन्नं प्रत्यभिज्ञायते। तत्र किमित्यन्यत्र कृता बुद्धयोऽन्यत्र न स्युः। तथा चानन्दादयः प्रधानस्येत्यत्र व्याख्यातं। तत्र विधिरूपाणि विशेषणानि
र्थमार्गे स्यान्यपेक्षितत्वात्तदुपसंहारस्तथाश्रुतनिषेधानुपलक्षणात्यासर्वद्वैतनिषेधसंभवात् चिंतितानि इह प्रतिषेधरूपाणीति विशेषः।
ऽस्थूलत्वं लक्ष्यते तदा लक्षणादोषः यदि न लक्ष्यंते तदा सर्वद्वैतनिषेधासिद्धेर्निर्विशेषमसिद्धं भावादोष इति विवेकः। अक्षरे धर्मिणि द्वैतनिषेधविशेषोपसंहार
धिपः स्तद्गतः सा इति यावज्ज्ञानामवरोध उपसंहार इति सूत्रयोजना॥ ५॥

७८

२मना

शेषित्वलक्षणः सर्वेषां गुणानामुपभावात्स्वमितैः समानत्वाच्छेषाणामुपसंहार इति चेत्तर्हि स्यात् प्रसक्तम्प्यात् पुनरुक्तिता इत्यस्य निरस्तत आह प्रपंचार्थ इति अ
नेदाद्रीनां रूपत्वादस्त्युपसंहारः निषेधाद्गौर्न सम्बन्धानां साधानुपसंहार इत्यधिकाशंकायां तेषामनात्मत्वेऽपि निर्दिष्टेषु ब्रह्मणि सार्थत्वाद् विधात
ऽनिषेधत्वेन संग्रहसिद्धेश्च निरपेक्षास्थूलत्वान् अणुत्वाद्यस्थूलत्वात् प्रतिषेधरूपत्वानामनन्वयश्च तन्निषेधधर्माणां क्वचित् तत्र योपसंहार इति चिंता पूर्वक स
र्वः ॥ अन्यत्रस्थ तत्रोपाणां अन्यत्र शेषि संबंधे दृष्टांतमाचष्टे यथेति जमदग्निः पुष्टिकामश्चतुरवत्तेन यजते इत्युपक्रम्य विहितं जमदग्निनाहृतो जा
मदग्न्यः श्रुहीतस्य तत्रावत्तः क्रतुस्तस्मिन्पुरोडाशे पंचावत्तीनां तीति पुरोडाशस्य धर्म इत्यपः तेनान्यस्य केवलं विहितास्तासामध्वर्युकर्तृकत्वात् सामवेदोस
त्वेन साम्नां तासु विनियोगाद् ध्वर्युर्गौण प्रयोगो नाम्ना येष्वेव ब्रह्मणस्य होत्रं च ध्वरं च कर्मागोत्वात्तत्रैव संगत्या मंत्राणामग्राह्यः ॥ उत्तानि विधिर्गुणः ॥ प्र
त्यंच यापश्चाद्यं चिंतामेदः ॥ औपसदवदिति निदर्शनं ॥ यथा जामदग्न्येऽहीनेपुरोडाशिनी उपसत्सु चोदितासु पुरोडाशप्रदानमंत्राणां मन्त्रेष्वेहीनो
त्पुंपरध्वरम्मिसेवमादीनामुपांशुत्ववेदोत्पन्नानामध्वर्युभिरभिसंबंधो भवति अध्वर्युकर्तृकत्वात्पुरोडाशप्रदानस्य प्रधानत्वात् तदंगानामेव
मिहाप्युपहारतंत्रत्वात् द्विशेषणानां मंत्राणां चित्स्युत्पन्नानामनुष्ठानेन सर्वेषामभिसंबंधः ध्वर्युः ॥ तदुक्तं प्रधानेन कांडे गुणमुख्यव्यतिक्रमेत तदर्थत्वा
न्मुख्येन वेदसंयोगः सूत्रं ॥
लापेक्षत्वादुत्पन्नस्य फलेविनियोगविधिर्मुख्यः सफलत्वात् तत्पाठ्यमंत्राणामनुष्ठानत्वे वेदोत्पन्नत्वादुद्गात्रा प्रयोगः विनियोगविधिना ध्वर्युणा प्रयोग
इति गुणमुख्ययोर्व्यतिक्रमाद्विरोधे सति मुख्येन बलीयसा मंत्रात्मक वेदस्याध्वर्युणा संप्रयोगः स्यात् विनियोगार्थत्वादिति जैमिनिसूत्रार्थः ॥ यद्यपि ग्रा
वरभाष्ये वाख्यं तौ यादिसान्नामुद्वे: स्वरक साम वेदोत्पन्नत्वादाध्वर्यवं गतत्वेनोद्वै: स्वस्य योगः प्राप्यते तत्रान्यावरवती यंगा प्रतिपन्नाय गायतिया यूदेयं गायती
त्या धारं नेतेषां विनियोगविधिना माजुषेणयाजुषस्यो पांशुत्व स्यप्रयोग इति गुणमुख्यमुख्यविरोधे सत्युत्सर्गो विनियोगार्थत्वान्मुख्यविनियोगबलेनसा मंत्रा
यजुर्वेदस्वरसंयोग इति सूत्रं ध्याख्यातं तथापि त्यामहात्माहिपसरमंत्राः स्तत्र विषयत्वेनोदाहृताइत्सविरोधः ॥   ॥   ॥

श्वे॰ सं॰ भा॰ ३

७८

दृश्यदर्शनलक्षणात्। मंत्रद्वयेपिप्रतिपाद्यमानप्रकारभेदात् त्वेमैक्यमानात्त्वसंशयमाह किंमन्त्रेति कृतपानवाक्ये सुकृतं ब्रह्मपरमिति त्रिगुणाः कृताः सुपर्णवाक्येऽ
नश्नन्नन्योऽभिचाकशीतीत्युपसंहारइतिपूर्वपक्षसुकल्पं सिद्धांतेत्वसंसारिब्रह्मस्वरूपवाक्यार्थेक्यादुपसंहारइति विवेकः। अभ्यासवैरूप्यात् अक्षरदृष्टेर्यायानुपसंहारः
इहतुवेद्यभेदान्नोपसंहारइतिसूत्रोपहरणेनपूर्वपक्षः नन्वियंगुहाधिकरणेनिरस्तइतिचेन्नसार्वज्ञ्याद्यपेक्षायाः स्वतःकल्पनमात्रपक्षान्तरं साध्य
दृश्यदर्शनात्। ३५ द्वासुपर्णासयुजासखायासमानंवृक्षंपरिषस्वजाते। तयोरन्यःपिप्पलंस्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीतीतिइत्यध्यात्माधिकारेमंत्रं
श्चात्वर्णितिकः। ऋतंपिबन्तावितिपठंति। तथाकठवल्ल्यां ऋतंपिबन्तौसुकृतस्यलोकेगुहांप्रविष्टौपरमेपरार्धे। छायातपौब्रह्मविदोवदन्तिपञ्चाग्नयोयेचत्रिणा
चिकेताइति। किमत्रविद्यैकत्वंउतविद्यानानात्वमितिसंशयः। किंतावत्प्राप्तं विद्यानानात्वमिति। कुतः विद्याभेददर्शनात्। द्वासुपर्णेत्यत्रैकस्यभोक्तृत्वमेकस्य
भोक्तृत्वं ऋतंपिबन्तावित्यत्रतूभयोरपिभोक्तृत्वमेवदृश्यते तदेवंरूपभिन्नत्वाद्विद्यानानात्वं इत्येवंप्राप्तेब्रवीति। विद्यैकत्वमितिकुतः। यतउभयोरप्य
नयोर्मंत्रयोरीश्वरजीवावेवोपदिष्टौ। तावेवंरूपमभिन्नत्वमावर्तेति। ननुदर्शितोरूपभेदः नेत्युच्यते। उभावप्येतौमंत्रौजीवद्वितीयमीश्वरंप्रतिपादयतो
नार्थांतरं द्वासुपर्णेत्यत्रतावत्अनश्नन्नन्योऽभिचाकशीतीत्यशनायाद्यतीतःपरमात्माप्रतिपाद्यते। वाक्यशेषेपिचसएवप्रतिपाद्यमानोदृश्यतेजुष्टंय
दापश्यत्यन्यमीशमितिऋतंपिबन्तावित्यत्रतुजीवेपिबत्यशनायाद्यतीतःपरमात्मापिसाहचर्याच्छत्रिन्यायेनपिबतीत्युपचर्यते। परमात्मप्रकरणं
तत् अन्यत्रधर्मादन्यत्राधर्मादित्युपक्रमात् तद्विषयएवचात्रापिवाक्यशेषोभवतियःसेतुरीजानानामक्षरंब्रह्मपरमितिगुहांप्रविष्टावात्मानौहितद्दर्श
नादितिचेत् तस्माज्जाति [illegible] भेदः। तस्माद्विद्यैकत्वं। अपिचत्रिष्वप्येतेषुवेदांतेषुपौर्वापर्यालोचनेपरमात्मविद्यैवावगम्यते। तात्पर्यविवक्षयोर्जी
वोपादानंनार्थांतरविवक्षया न च परमात्मविद्यायोनेदभेदविचार एवतारोहतीत्युक्तं तस्मात्प्रपंचार्थमेवैषप्रयोगः। तस्मादाधिकधर्मोपसंहारइति॥
येवुद्धिजीवावितिवर्णितौयात्रौसुपर्णौतुजीवेश्वरावितिसधिकरणंतत्काण्डमंत्रद्वयेपिद्वितचनद्वास्थानमात्रासाक्षिकूटस्थविविक्तपतात्पर्यकदृष्टसम्भवा
नस्यवाधकाभावात्स्वकरणसेनुग्रहाच्चजीवानुवादेनासंसारिब्रह्मप्रतिपत्तिरेवमंत्रद्वयतात्पर्यमितिप्रपंचार्थमिदंसूत्रमितिभावः॥

अंतराभूतग्रामवत्स्वात्मनः । घटादिकं चिद्विषयत्वेन परोक्षं ब्रह्म तु साक्षाद्विषयत्वेनापरोक्षमिति निमित्तमात्रे पंचमी अन्यत्र तावात्म्यधर्मो परोक्षत्वं
ब्राह्मणपुरुषं धर्मः सर्वांतरत्वमात्मनुक्तं तेन तयोरैक्यं दृष्टं कृत्स्नं तत्यं तन्मे व्याचक्ष्वेत्युषस्तप्रश्ने यो ज्ञेयत्वेन शरीरादिभेदः को दृष्टा दृश्या हीप्रतिपा
दितः तथैव पदे ब्राह्मणे यदपरोक्षाद्ब्रह्म य आत्मा सर्वांतरस्तं मे व्याचक्ष्वेति कहोलप्रश्ने ऽशनायाद्यतीतः प्रतिपादितस्तत्र ब्राह्मणद्वयेपि प्रश्नाभ्यासा

अंतराभूतग्रामवत्स्वात्मनः ३६ यत्साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वांतर इत्येवं द्विरुषस्तकहोलप्रश्नयोर्नैरंतर्येण वाजसनेयिनः समामनंतित
त्र संशयः विद्यैकत्वं वा सामान्यविद्यानानात्वं चेति विद्यानानात्वमिति तावत्प्राप्तं अभ्याससामर्थ्यादन्यथा ह्यन्यूनातिरिक्तार्थे द्विराम्नानमनर्थकं स्यात्
तां तस्माद्यथाभ्यासात् कर्मभेद एवमभ्यासाद्विद्याभेद इत्येवं प्राप्ते प्रसाह । अंतरा आम्नानाविशेषात्स्वात्मनो विद्यैकत्वमिति सर्वांतरो हि स्वात्मोभयत्राप्य
विशिष्टः पृच्छ्यते चोपदिश्यते च न हि द्वावात्मानावेकस्मिन्देहे सर्वांतरौ संभवतः । तदा द्वयोरेकस्यांजसं सर्वांतरत्वमवकल्पेत तस्य तु भूतग्रामवन्नैव
सर्वांतरत्वं स्यात् । यथा च पंचभूतसमूहे देहे पृथिव्या आपोंतरा अद्भ्यस्तेजोंतरमिति सत्यप्यापेक्षिकेंतरत्वे नैव सर्वांतरत्वं भवति तथेहापीत्यर्थः । अ
थवा भूतग्रामवदिति श्रुत्यंतरं निदर्शयति एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतांतरात्मेति तस्मिन्मंत्रे समस्तेषु भूतग्रामेषु एक एव सर्वांतर
आत्माम्नायते एवमनयोरपि ब्राह्मणयोरित्यर्थः । तस्माद्वेद्यैकाद्विद्यैकमिति ॥ ॥
सर्वांतरत्वप्रत्यभिज्ञानात्तु संशये नंत्वमोर्वेद्यैक्यादस्तु विद्यैकं इह तु ब्राह्मणयोर्वेद्यैक्ये ऽप्यभ्यासाद्विद्याभेदः यजस्याभ्यासात् पत्र्याजभेदवदिति प्रत्युदाहरणेन
पूर्वपक्षस्तत्रापि धर्मानुपसंहारः फलं सिद्धान्ते तूपसंहार इति विवेकः ॥ ३६ ॥ सर्वांतरत्वानुपपत्तानावक्ष्यो ब्राह्मणयोरेकवस्तुपरत्वसिद्धं ज्ञाभ्या चवेद्यैकं सि

पाठविशेषेण विवक्षितः ॥

ब्र॰सू॰
८०

तत्त्वमस्यादिश्वेतकेतूपाख्याने भ्यासानुपपत्तिरिति चेदुच्यते सकृद्वाभ्यासः कर्मभेदको यो निरपेक्षः इह तु षष्ठत्वं ब्रह्मणो रूपान्तरस्य ग्रहणाभावाद् भागसमयपूर्वविशेषकथ
नार्थत्वाद् भ्यासो यथाभिहितानुपस्थितविशेषणान्वितः इति समुदायार्थः व्यतिहारः जीवेश्वरयोर्मिथो विशेषणविशेष्यभावो व्यतिहारः स्तनयित्नुः तत्राभ्युपगम्य दर्शितं निरूपितं कृत्वा
अन्यथा भेदानुपपत्तिरिति चेन्नोपदेशान्तरवत् ३६ अथ यदुक्तं ननु भूयस्त्वमत्र ने विद्याभेदः कथमन्यथा भेदानुपपत्तिरिति तत्परिहर्तव्यमत्रोच्यते नायं दोषः।
उपदेशान्तरवदुपपत्तेः। यथा ताण्डिनामुपनिषदि षष्ठे प्रपाठके सदात्मविद्यायां नवकृत्वोऽप्युपदेशे न विद्याभेदो भवति। एवमिहापि भविष्यति।
कथं च नवकृत्वोऽप्युपदेशे विद्याभेदो न भवति। उपक्रमोपसंहाराभ्यामेकार्थतावगमात्। भूय एव मा भगवान् विज्ञापयत्विति चैकस्यैवाधिकृतस्य पुनःपुनः प्रतिवचन
प्रार्थनोपपत्तेः। आशङ्कान्तरनिराकरणेन चासकृदुपदेशोपपत्तेः। एवमिहापि प्रश्नरूपाभेदात् भेदाभ्यासो यदात्मेति परिसमाप्त्यविशेषाद् उपक्रमोपसंहारयोरेकत्वाद्
कार्यविषयो द्रक्ष्यते। यदेव साक्षादपरोक्षाद् ब्रह्मेति द्वितीयप्रश्नेऽप्येवकारं प्रयुञ्जानः पूर्वप्रश्नगतमेवार्थमुत्तरत्रानुकृष्यमाणं दर्शयति एवोऽधिकं शङ्कान्तरं त्वार्थे
कारणम् अतिरिक्तस्यात्मनः सकृत् पुनः कथ्यते। उत्तरस्मिंस्तु तस्यैवाशनायादिसंसारधर्मातीततां कथ्यत इत्येकार्थतोपपत्तिः। तस्मादेका विद्येति॥ व्यतिहा
सौ रो विशिंषन्ति हीतरवत् ३७ तद्योऽहं सोऽसौ योऽसौ सोऽहमित्यादित्यपुरुषं प्रकृत्यैतरेयिणः समामनन्ति। तथा जाबालाः त्वं वा अहमस्मि भगवो देवतेऽहं वै त्वमसी
ति। तत्र संशयः। किं व्यतिहारेणोभयरूपा मतिः कर्तव्या उतैकरूपैवेति। एकरूपैवेति तावदाह। न ह्यत्रात्मन ईश्वरेणैकत्वमुक्त्वान्यत्किंचिदुपचि
न्त्यमस्ति। यदि चैवं चिन्त्यते तस्य विशेषः परिकल्प्येत संसारिणश्चेश्वरात्मत्वमीश्वरस्य संसार्यात्मत्वमिति तत्र संसारिणस्तावदीश्वरात्मत्वे उत्कर्षो भवेत्। ईश्व
रस्य तु संसार्यात्मत्वे निकर्षः कृतः स्यात्। तस्मादेकरूप्यमेवेदं तथा व्यतिहारेणाम्नायपरत्वेऽप्येकरूपैव मतिरित्येवं प्राप्ते ब्रूमः। व्यतिहारोऽयं ध्यानायाम्नायते।
इतरवत्। यथेतरे गुणाः सर्वात्मत्वप्रभृतयः आत्मनो ध्यानायाम्नायन्ते तद्वत्। तथा हि विशिंषन्ति समाम्नातारः। उभयोच्चारणेन त्वमहमस्म्यहं च त्वमसीति तद्यो ८०
भयरूपा मतिः कर्तव्या पाठसामर्थ्याद् भवति। अन्यथा हि इदं विशेषेणोभयाम्नानमनर्थकं स्यात्। एकेनैव तु कृतत्वात्॥ ॥ ॥ ॥

फलवती तिस्याचार्यसंगृहीता वेदिश्वरत्वमतिरेवकार्या उक्तन्यायात् व्यतिहारस्तु तिरस्कृतस्य त्वेवं ढौकरणार्थमेव नायासवस्थयापि द्रष्टेति दृष्टं तेन पूर्वपक्षः
तत्रैव लाघवं फलसिद्धं तस्य सर्वत्वमिति विवेकः॥ एकेनैव त्वमहमस्मीत्युच्चारणेनैव लभ्यते कृतत्वादहं त्वमसीति कथनमादिसमर्थः॥ ध ॥

उत्कर्षे दोषं स्मारयति। नन्विति संदिग्धेऽर्थे न्यायः साधकः। इह तु श्रुतत्वा हन्योन्यात्मत्वं ध्येयं न तु लिंगमेवोत्कृष्य दिवत्तजीवात्मनस्य ध्यानार्थमारोपः स्थि
निकर्षेण सत्यकामादिगुणपरिहरतीति निद्धेदामद इति श्रुतलिंगनिकर्षाद्धि तजीवता हात्म्यध्यानेमदुक्तम् प्रियागतमिति। शंकते नन्वेवमिति मंत्रेहिंदिरूपत्वाल्लदनु
क्रमस्याभिरुच्यते ध्यानपरत्वाद्यमिदमेकत्वं तु मानान्तरविरोधात् स्तुतिरिति समाधत्ते नेत्ययमिति। अहं युवोर्षि पास्य रूपं ध्यात्वा हारे पूर्वं हन्त्रेमद्र सा हत
त्वादिति। सैव हि सत्यादयः। सयः कश्चिदधिकारी महद्यक्षं पूज्यं प्रथमजं भौतिके पुरुषप्रथमजं नेतस्सत्यात्मेति स सं अस्य हिरण्यगर्भो ह्यां वेदोपास्ते तस्य लोक

नन्वभयाध्यानस्यार्थे विशेषेऽपि कल्प्यमाने देवताभ्यः संसाप्यात्मलाभान्निकर्षः अस्मत्येते सुकं नैव दोषः। एकात्मस्वैतत्राने नप्रकारेणानुचिं
त्यमानत्वात्। नन्वेवं तिसएव कल्पते कारणपरेण। नववमेकस्य हृदि कार्यमस्यामः। किं त्वयति हारेणोहविद्रूपामनि ः कर्तव्या वचनमा मा एष
तन्नैकरूपेणतावदुपेयाद्यामः। फलतश्चैकफलमपि दृष्टं भवति यथा ध्यानार्थेपि सत्यकामादिगुणोपदेशे तत्कारणं ईश्वर। अस्मिन्धाति। तस्मादस्मा
द्यातत्रोऽयतिहारः समानेऽपि विशेषे पसंहर्तव्यो भवति सैव हि सत्यादयः ॥३८॥ स यो हैतन्महद्यक्षं प्रथमजं वेद सत्यं ब्रह्मेति वाजसनेयके स
पि चेति अस्तूपास्तिशब्दस्यावृत्तिवाचित्वं तथापि वेदेतिशब्दोक्तवेदनेषु हंयहेषु कथमावृत्तिसिद्धिरित्यत आह विद्युपास्त्योश्चेति॥ ॥ १

शब्दयोरेकार्थत्वमुदाहरति किंचिदिति॥ सदेवेत्युपदेशेन तथा एतदात्म्यं रैक्वादन्योऽपि यः कश्चिद्दृष्टत। फले सर्वमेतदभवतीसेत दुक्तं दर्शयन्नयो हृष्टे ते नैरेकत्वमुक्त
इति हृ संप्रति हंसोत्तरवचनं नकुलो रैक्वं गलो वा जानश्रुतिः हे भगव एतां रैक्व विदितां देवतां मे नु शाधि यमहमुपास इति शेसपर्थः एवं सगुणनिर्गुणसाक्षात्का
रसाधनध्यानस्यावृत्तिश्रौतीचार्थसिद्धा च दृष्टार्थत्वात् श्रवणमननयोस्तत्समुपदेशादर्थसिद्धेवावृत्तिरिति शेषः आदित्यस्यैकस्यैवोद्गीथे संपाद्योपासनात्म
कत्विद्विविनोपक्रम्योपास्तिनोपसंहरति यथा यस्तद्वेद यत्स वेद समयैतदुक्तं रुसत्रानुमए तं भगवो देवतां शाधि यां देवतामुपास्स इति क त्वि
श्रोपास्तिनोपक्रम्य विदिनोपसंहरति यथा मनो ब्रह्मेत्युपासीते तत्र भाति च तपति च कीर्त्या यशसा ब्रह्मवर्चसेन य एवं वेदेति तस्मात्त्व
दुपदेशोभ्यावृत्तिसिद्धिरसकृदुपदेशस्त्वावृत्तेः सूचकः लिंगाच्च। लिंगमपि प्रसंख्यावृत्तिप्रसाधयति तथा हि उद्गीथविज्ञाने प्रस्तुत्वा
वर्तेया दित्यउद्गीथदृष्टेनैकपुत्रतादोषेणापी घरश्मीन् त्वं पर्यावर्तयात् इति रश्मिबहुत्वविज्ञानं बहुपुत्रताये विद्धार्द्धत्वे सिद्धवत्स्यावृत्तिं दर्शयति
तस्मात्त्वामाम्यात् सर्वप्रत्ययेष्वावृत्तिसिद्धिः अत्राह भवतु नाम साध्यफले प्रत्ययेष्वावृत्तिः तेष्वावृत्तिसाध्यस्यातिशयस्य संभवा
त् यस्तु परब्रह्मत्वं समर्पयति तत्र किमर्थावृत्तिरिति नित्यशुद्धस्वभावमेवात्ममूलं परं ब्रह्मत्वं समर्पयति। तत्र किमर्थावृत्तिरिति
मत्वमेक एव पुत्रोऽसीति कौषीतकेः पुत्रमुवाचान स्त्वं तथा मा कृथाः किंतु बहून्रश्मीनादित्ये च पर्यावर्तयनात् पुत्रं गावर्तसेयर्थः। तत्ते पश्चाद्दृसः अ
त्र पर्यावृत्तिशब्दात्सिद्धवदुद्गीथध्यानस्यावृत्तिरुक्ता ततो ध्यानत्वसामान्यात्फलपर्यंतत्वसामान्याद्वा लिंगात् सर्वत्र श्रवणमनननिध्यानेष्वावृत्तिसिद्धिरि
त्याह लिंगाच्चेति॥ एवं तावत्सगुणनिर्गुणसाक्षात्कारसाधनेष्वावृत्तिरुक्ता तत्र सगुणध्यानादेरावृत्तिमंगीकृत्य निर्गुणश्रवणादिष्वावृत्तिमाक्षिपत्यत्राहेत्यादिना॥
× विषयः प्रत्ययानित्यशुद्धबुद्धमुक्तस्वभावमेवात्मभूतं परब्रह्मत्व × ब्रह्मात्मत्वप्रतीत्यनुपपत्तेरावृत्त्यभ्युपगम इति

श्र०स०
२
वाक्यं निर्गुणसाक्षात्कारजनने शक्तं न वा आद्ये सकृच्छ्रुतवाक्यात्साक्षात्कारसिद्धेरावृत्तिवैयर्थ्यमुक्त्वा द्वितीयं शंकते सकृदिति अशक्तस्यावृत्तावपि फलानुपपत्तिरि
त्याह नेति । तथापीति ॥ स्वतो शक्तस्य युक्तिसाहित्यात्कार्यकारित्वमित्यर्थः वाक्ययुक्तिभ्यां परोक्षज्ञाने जातेप्यपरोक्षज्ञानार्थमावृत्तिरिति शंकतेऽथापि स्यादिति । तयोः

सकृच्छ्रुतौ च ब्रह्मात्मत्वप्रतीत्यनुपपत्तेरावृत्त्यभ्युपगम इति चेन्नावृत्तावपि तदनुपपत्तेः । यदि हि तत्त्वमसीत्येवंजातीयकं वाक्यं सकृच्छ्रूयमाणं
ब्रह्मात्मत्वप्रतीतिं नोत्पादयेत्ततस्तदेवावर्त्यमानमुत्पादयिष्यतीति का प्रत्याशा । स्यादेतत् । न केवलं वाक्यं केवलार्थं साक्षात्कर्तुं शक्नो
ति अतो युक्त्यपेक्षं वाक्यमनुभावयिष्यति ब्रह्मात्मत्वमिति तथाप्यावृत्त्यानर्थक्यमेव सापि हि युक्तिः सकृत्प्रवृत्तैव स्वमर्थमनुभावयिष्य
ति अथापि स्यात् युक्त्या वाक्येन च सामान्यविषयमेव विज्ञानं क्रियते न विशेषविषयं यथा अस्ति मे हृदये शूलमित्युक्तो वाक्यात् गात्रकं
पादि लिंगाच्च शूलसद्भावसामान्यमेव परः प्रतिपद्यते न विशेषमनुभवति यथा स एव शूली विशेषानुभवश्चाविद्याया निवर्तकस्तत
स्तदर्थावृत्तिरिति चेन्नासकृदपि तावन्मात्रे क्रियमाणे विशेषविज्ञानोत्पत्त्यसंभवात् नहि सकृत्प्रयुक्ताभ्यां शास्त्रयुक्तिभ्यामनवगतो
विशेषः शतकृत्वोपि प्रयुज्यमानाभ्यामवगन्तुं शक्यते तस्माद्यदि शास्त्रयुक्तिभ्यां विशेषः प्रतिपाद्येत यदि वा सामान्यमेवोभयथापि
सकृत्प्रवृत्ते एव ते स्वकार्यं कुरुत इत्यावृत्त्यनुपयोगः ॥ ॥

परोक्षज्ञानहेतुत्वस्वाभाव्यात् आवृत्तावपि न साक्षात्कारः स्यादिति नास्त्यवृद्धपतितयोः साक्षात्कारसामर्थ्ये यदि वा परोक्षज्ञानसामर्थ्ये उभयथाप्यावृत्त्यनपेक्षेति हेत्वं०
२

प्रमातृवैचित्र्याद्दृष्टव्यत्वस्य नियम इत्याह न चेति प्रमेयस्यानंशत्वाद्बोधतयेत्याह । पि चेति द्विविधो ह्यधिकारी स्यात् कश्चिज्जन्मांतराभ्यासान्निरस्तसमस्तासंभा
वनादिप्रतिबंधः कश्चित्तु प्रतिबंधवानिति तत्राद्यं प्रत्यावृत्तेरानर्थक्यमिष्टं द्वितीयस्य तु प्रतिबंधनिरासाय तदपेक्षेति समाधत्ते अत्रोच्यत इति आ

न च सकृत्प्रयुक्ते शास्त्रयुक्ती कस्यचिदप्यनुभवं नोत्पादयत इति शक्यते नियंतुं विचित्रप्रज्ञत्वात्प्रतिपत्तॄणामपि चानेकांशोपेते लौकिके
पदार्थे सामान्यविशेषवति एकेनावधानेनैकमेवांशमवधारयन्नपरेणापरमिति स्यादभ्यासोपयोगो यथा दीर्घप्रपाठकग्रहणा
दिषु ननु निर्विशेषे ब्रह्मणि सामान्यरहिते चैतन्यमात्रात्मके प्रमोत्पत्तावभ्यासापेक्षा युक्तेति अत्रोच्यते भवेदावृत्त्यानर्थक्यं तं प्र
ति यस्तत्त्वमसीति सकृदुक्तमेव ब्रह्मात्मत्वमनुभवितुं शक्नुयात् यस्तु न शक्नोति तं प्रत्युपयुज्यत एवावृत्तिः तथा हि छांदोग्येन त्व
मसि श्वेतकेतो इत्युपदिश्य भूय एव मा भगवान्विज्ञापयत्विति पुनः पुनः परिचोद्यमानस्तत्तदाशंकाकारणं निराकृत्य तत्त्वमसी
त्येवासकृदुपदिशति तथा च श्रोतव्यो मंतव्यो निदिध्यासितव्य इत्यादि दर्शितं ननूक्तं सकृदुक्तं चेत्तत्त्वमसिवाक्यं स्वमर्थमनुभा
वयितुं न शक्नोति ततः आवर्त्यमानमपि नैव शक्ष्यतीति नैष दोषो न हि दृष्टेऽनुपपन्नं नाम निदर्शनं हि सकृच्छ्रुताद्वाक्यान्मं
दप्रतीतं वाक्यार्थमावर्त्तयंतस्तत्तदाभाससंव्युदासेन सम्यक्प्रतिपद्यमानाः ॥

वृत्ते४ प्रतिबंधनिरासार्थत्वे लिंगमाह तथा हीति यथा ह्य
न्नादिस्वरभेदसाक्षात्कारशक्तमपि श्रोत्रमभ्यासमपेक्षते तथा ब्रह्मात्मसाक्षात्कारशक्तं वाक्यं तदपेक्षमिति सानुभवमाश्रित्याह न हि दृष्टेऽनुपपन्नं

शा॰ स॰ तत्त्वंपदलक्ष्यार्थस्य दुर्बोधत्वादज्ञानप्रयुक्तसंशयादिप्रतिबंधसंभवात्तन्निध्वंसाय आवृत्तिरिष्टेति वाच्यलक्ष्यविवेकपूर्वकमाह अपि चेत्यादिना॥ यदु
क्तमनंतशास्त्राभ्यासमपेक्ष्य वेदान्तस्यानर्थक्यमिति तत्राह यद्यपीति॥ आरोपितानां शनिरासाय न मे देहो नेंद्रियं इत्यभ्यासो मुक्त इत्यर्थः वाक्यार्थज्ञाने सति कथमभ्या
३

अपि च तत्त्वमसीत्येतद्वाक्यं त्वंपदार्थस्य तत्पदार्थभावमाचष्टे न तत्पदेन च पदकृतं सत् ब्रह्मोपेक्षितं जगतो जन्मादिकारणमभिधीयते सत्यं
ज्ञानमनंतं ब्रह्म विज्ञानमानंदं ब्रह्म अदृष्टं द्रष्टृ अविज्ञातं विज्ञातृ अजं अजरममरमस्थूलमनण्वह्रस्वमदीर्घमित्यादिशास्त्रप्रसिद्धं
तत्राजादिशब्दैर्जन्मादयो भावविकाराः निवर्तिताः अस्थूलादिशब्दैश्च स्थौल्यादयो द्रव्यधर्माः विज्ञानादिशब्दैश्च चैतन्यप्रकाशात्मक
त्वमुक्तमेवं व्यावृत्तसर्वसंसारधर्मकोनुभवात्मको ब्रह्मसंज्ञकस्तत्पदार्थो वेदान्ताभियुक्तानां प्रसिद्धः तथा त्वंपदार्थोपि प्रत्यगा
त्मा श्रोता देहादारभ्य प्रत्यगात्मतया ततो भाव्यमानश्चैतन्यपर्यंततत्त्वेनावधारितः तत्र येषामेतौ पदार्थावज्ञानसंशयविपर्ययप्रतिबद्धौ
तेषां तत्त्वमसीत्येतद्वाक्यं स्वार्थे प्रमां नोत्पादयितुं शक्नोति पदार्थपूर्वकत्वाद्वाक्यार्थस्येत्यतस्तान्प्रत्येष्टव्यः पदार्थविवेकप्रयो
जनः शास्त्रन्यायाभ्यासः यद्यपि च प्रतिपत्तव्य आत्मा निरंशस्तथाप्यध्यारोपितं तस्मिन् बह्वंशत्वं देहेंद्रियमनोबुद्धिविषयवे
दनादिलक्षणं तत्रैकेनावधानेनैकमंशमपोहति अपरेणापरमित्युपपद्यते तत्र क्रमवती प्रतिपत्तिस्तत्तु पूर्वरूपमेवात्मप्रतिपत्तेः॥

सनियमः प्रमाणज्ञानस्याभ्यासायोगात् ज्ञानिनः श्रवणादिनियमायोगाच्चेत्यत आह॥ तद्विति ज्ञानात् प्रागेव श्रवणादिव्यापारनियमनं क्षिपतरत्यर्थः॥ दे॰खं॰
३

अधिकं शंकितुमुक्तमनुवदति येषामिति॥ अधिकं शंकते सत्यमिति दुःखित्वप्रत्यक्षविरोधाद्धात्माद्वैक्यधीर्नैर्देतीत्यर्थः प्रत्यक्षस्य भ्रांतित्वाद्विरोध इत्या
ह नेत्यादिना दुःखादयो नात्मधर्माः दृश्यत्वाद्देहादिवत् नाप्यात्मस्वरूपाः आत्मनि सत्यप्यननुवर्तनात् व्यतिरेके एतच्चैतन्यवदित्यर्थः निर्दुःखत्वविद्वाल

येषां पुनर्निपुणमतीनां नाज्ञानसंशयविपर्ययलक्षणः पदार्थविषयः प्रतिबंधोस्ति ते शक्नुवंति सकृदुक्तमेव तत्त्वमसि(ति)वाक्यार्थमनुभवितुमि
ति तान्प्रत्यानर्थक्यमिष्टमेव सकृदुक्तमेव ह्यात्मप्रतिपत्तिरविद्यां निवर्तयतीति नात्र कश्चिदपि क्रमोभ्युपगम्यते॥ सत्यमेवं प्रपद्यते यदि कस्या
चिदेवं प्रतिपत्तिर्भवेत् बलवती ह्यात्मनो दुःखित्वादिप्रतिपत्तिरतो न दुःखित्वाद्यभावं कश्चित्प्रतिपद्यत इति चेन्न देहाद्यभिमानवत् दुःखित्वाद्य
भिमानस्य मिथ्याभिमानत्वोपपत्तेः प्रत्यक्षं हि देहे छिद्यमाने दह्यमाने वाहं छिद्ये दह्य इति च मिथ्याभिमानो दृष्टस्तथा बाह्यतरेषु पुत्रमित्रा
दिषु संतप्यमानेष्वहमेव संतप्य इत्यध्यारोपो दृष्टस्तथा दुःखित्वाद्यभिमानोपि स्यात् देहादिवद्देवचैतन्याद्बहिः रूपलभ्यमानत्वाद् दुः
खित्वादीनां सुषुप्तादिषु चाननुवर्तेश्चैतन्यस्य तु सुषुप्तेप्यनुवृत्तिमामनंति यद्वै तन्न पश्यति पश्यन्वै तन्न पश्यतीत्यादिना तस्मात्सर्वदुःखविमु
क्तैकचैतन्यात्मकोहमित्येष आत्मानुभवः न चैवमात्मानमनुभवतः किंचित्कृत्यमवशिष्यते तथा च श्रुतिः किं प्रजया करिष्यामो येषां नोयमात्मायं लोक इत्यात्म
विदः कर्तव्याभावं दर्शयति स्मृतिरपि + नुभवो न चैवमात्मानमनु + यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः आत्मन्येव च संतुष्टस्तस्य कार्यं न
न विद्यत इति यस्य तु नैषोनुभवो झगिति जायते तं प्रत्यनुभवार्थ एवावृत्त्यभ्युपगमः॥

ति दुःखादिधियो भ्रांतित्वाद्याबाधार्थानुभवेन विरुध्यत
इत्याह तस्मादिति अनुभवे जाते व्यावृत्त्याद्यनुष्ठानं किं न स्यादित्यत आह न चैवमिति रतिः कामः आत्मकाम तयात्र तृप्तिर्विषयरसास्वादजस्तेन संतोषे आत्मानंदेनानु

नन्वावृत्तौ नियोगात्प्रवृत्तिर्वाच्या तथा च नियुक्तस्य बुद्धेरकर्त्री आत्मधीर्नस्यादित्यत आह ॥ तत्रापीति ॥ आवृत्त्यभ्युपगमेऽप्यकर्त्रात्मभूमिरसनुभवात्मसाक्षात्कारू
शा·सू० रूपो वा नियोगात्प्रवर्तयेदुक्तदोषादित्यर्थः कथं तर्हि प्रवृत्तिरित्यत आह यस्त्विति अप्रतिभानादसंभवाज्ञानादिनेत्यर्थः शिष्यबुद्ध्यनुसारेणाभ्यासो नवा
४ दिवचोभिः प्रधानविध्यर्थमावृत्त्यादेः प्रवर्त्यत इत्यर्थः ॥ आत्मेति तूपगच्छन्ति ग्राहयन्ति च ॥ पूर्वत्र ध्यानादेरावृत्तिरुक्ता तामुपजीव्यात्मत्वेनार्थे ध्याना

तत्रापि न तत्त्वमसिवाक्यार्थाभ्यासः व्याख्यावृत्तौ प्रवर्तयेत् अहि वेदान्तवाक्यान्यभ्यस्यन्ति नियुक्तस्य चास्मिन्नधिकृतोऽहं कर्तामयेदं कर्तव्यमिति
स्ववश्यं ब्रह्मप्रत्ययविपरीतप्रत्यय उत्पद्यते यस्तु स्वयमेव मन्दमतिरप्रतिभानात्तं वाक्यार्थमभिहासेत् तस्य तस्मिन्नेव वाक्यार्थे स्थिरीकारार्थ आव
त्यादिवाचोयुक्त्याभ्युपेयते तस्मात्परब्रह्मविषयेऽपि प्रत्ययेतदुपायोपदेशेष्वावृत्तिसिद्धिः आवृत्त्यधिकरणम् ॥१॥ आत्मेति तूपगच्छन्ति ग्राह
यन्ति च ॥ सूत्रं शास्त्रोक्तविशेषणः परमात्मा स किमहमिति ग्रहीतव्यः किं वा मदन्य इति एतद्विचारयति कथं पुनरात्मशब्दे प्रत्यगात्मविषयेऽप्र
यमाणे संशयः उच्यते ॥ अयमात्मशब्दो मुख्यः शक्यतेऽभ्युपगन्तुं सति जीवेश्वरयोरभेदसंभवे इतरथा तु गौण एवायमभ्युपगन्तव्य इति मन्य
ते किं तावत्प्राप्तं ॥ ॥ ॥

वृत्तिकाले किमहं ब्रह्मेति ध्यातव्यं उत मत्तो भिन्न ईश्वर इत्येव भेदमानाभ्यां संशयमाह यद्यपीति शब्दादेव प्रमितत्वेऽस्मादयमात्मा ब्रह्मेत्यादिश्रुतिभिरैक्य
निर्णयात्संशयमाक्षिपति कथमिति भेदश्रुत्यनुग्रहाद्भेदप्रसक्त्यादिप्राबल्यमालक्ष्य संशय इत्याह उच्यत इति ॥ अभेदश्रुतीनां गौणत्वमु हे.र.बं०
क्त्वा उभयत्र फलं यद्यप्ययं प्रसक्त्यादिविरोधपरिहारो द्वितीयाध्याये संगतस्तथाप्यैक्यज्ञानेरक्तिरूढत्वनिश्चयस्य समाधानं तदंगत्वादिह संगतिः ॥ ४

विरूद्धयोरैक्यदृष्टिरसिद्धेत्याह नाहमिति किं च धिमीश्वरस्य जीवमात्रत्वमैक्यो जीवस्येश्वरमात्रत्वं वेति विकल्प्य क्रमेण दूषयति ईश्वरस्य चेत्यादिना एकत्व
श्रुतिप्रामाण्यादैक्यध्यानं कार्यमिति शंकते अन्यत्वेऽपीति एकत्वध्यानमस्माद्दृष्टमेव एकत्वं तु नास्तीत्याह कामामिति अभेदश्रुतीनां फलवद्भूतार्थता

नाहमितिग्रन्थः नह्यपहतपाप्मत्वादिगुणो विपरीतगुणत्वेन शक्यते ग्रहीतुं विपरीतगुणो वापहतपाप्मत्वादिगुणत्वेनापहतपाप्मादिगुण
श्च परमेश्वरः तद्विपरीतगुणस्तु शारीरः ईश्वरस्य च संसार्यात्मत्वे ईश्वराभावप्रसंगात्ततः शास्त्रानर्थक्यमेव संसारिणोऽपीश्वरात्मत्वेऽधिका
र्यभावाच्छास्त्रानर्थक्यमेव प्रत्यक्षादिविरोधश्चान्यत्वेऽपि तादात्म्यदर्शनं शास्त्रात्कर्तव्यं प्रतिमादिष्विव विष्ण्वादिदर्शनमिति चेत्कामं भव
तु न तु संसारिण आत्मेश्वर इत्येतन्नः प्रापयितव्यमेवं प्राप्ते ब्रूमः आत्मेत्येव परमेश्वरः प्रतिपत्तव्यस्तथा हि परमेश्वरप्रक्रियायां
जाबाला आत्मत्वेनैवैनमुपगच्छन्ति त्वं वा अहमस्मि भगवो देवतेऽहं वै त्वमसि देवते इति तथान्येऽपि अहं ब्रह्मास्मीत्येवमादय आत्मत्वोपगमा
द्रष्टव्याः ग्राहयन्ति चात्मत्वेनैवेश्वरं वेदान्तवाक्यानि एष त आत्मा सर्वान्तर एष त आत्मान्तर्याम्यमृत तत्सत्यं स आत्मा तत्त्वमसीत्येवमादीनि य
दुक्तं प्रतीकदर्शनमिदं विष्णुप्रतिमान्यायेन भविष्यतीति तदयुक्तं गौणत्वप्रसंगाद्वाक्यवैरूप्याच्च यत्र हि प्रतीकदृष्टिरभिप्रेयते सकृदेव तत्र व
चनं भवति यथा मनो ब्रह्मेत्यादित्यो ब्रह्मेत्यादि इह पुनस्त्वमहमस्म्यहं च त्वमसीत्याह अतः प्रतीकश्रुतिवैरूप्यादभेदप्रतिपत्तिर्भेददृष्ट्यपवा
दाच्च तथा ह्यथ योऽन्यां देवतामुपास्तेऽन्योऽसावन्योऽहमस्मीति न स वेद मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति सर्वं तं परादाद्योऽन्यत्रात्म
नः सर्वं वेदेत्येवमाद्या भूयसी श्रुतिर्भेददर्शनमपवदति यत्तूक्तं न विरुद्धगुणयोरन्योन्यात्मत्वसंभव इति नायं दोषो विरुद्धगुणताया मिथ्यात्वोपपत्ते
सर्वेणमौ ण्यात्पो गानेंद श्रुतीनां कल्पितभेदानुवादित्वात्सहाद्यद्वैतापित्ताद्विषयत्वाद्बिम्बप्रतिबिम्बयोरिव विरुद्धधर्माणां मिथ्यात्वान्मुख्यमैक्यमिति

मयाण्क ॥ २

शा०सू० ईश्वरस्य जीवत्वं न प्रतिपाद्यं येनेश्वराभावः स्यात्किं तु जीवस्येश्वरत्वं न चैवमपि कार्याभावः एकत्वप्रबोधात्प्रागधिकारिभेदांगीकारादित्याह यत्तु पुनरुक्तं
५ मित्यादिना वेदस्य सत्वं यथा लः शंकते प्रत्यक्षाद्यभावदिति विरोधेतु क्रमस्वरयोरभावादुपलब्ध्यध्वनिस्तयोरारोपो वाच्यः स तथा चारोपितक्रमस्वर
विशिष्टवर्णात्मकवेदस्य मिथ्यात्वं दुर्वारं वादिना सत्यत्वायह त्तविद्याविज्ञे भिन्न इति वेदसत्यत्वाभावो न दोष इत्याह नेति। अविद्यामात्रेति प्रतिकस्य

यत्तु नरूकं ईश्वराभावप्रसंग इति तदसत् शास्त्रप्रामाण्यात् अनभ्युपगमाच्च नहीश्वरस्य संसारित्वं प्रतिपाद्यते इदमभ्युपगच्छामः किं तर्हि सं
सारिणः संसारित्वापोहेनेश्वरात्मत्वं प्रतिपिपादयिषितमिति एवं सत्यद्वैतेश्वरस्यापहतपाप्मत्वादिगुणता विपरीतगुणता चेतरस्य
मिथ्येति व्यवतिष्ठते यदप्युक्तमपि कार्याभावः प्रत्यक्षादिविरोधश्चेति तदप्यसत् प्राक्प्रबोधात्संसारित्वाभ्युपगमात् तद्विषयत्वाच्च प्र
त्यक्षादिव्यवहारस्य यत्रत्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येदित्यादिना हि प्रबोधे प्रत्यक्षाद्यभावं दर्शयति॥ प्रत्यक्षाद्यभावे श्रुतेरप्यभावप्र
संग इति चेन्नेष्टत्वात् अत्र पिता पिता भवतीत्युपक्रम्य वेदा इति वचनात् [illegible]ति एवास्माभिः श्रुतेरप्यभावः प्रबोधे॥ कस्य पुनरय
मप्रबोध इति चेद्यस्त्वं पृच्छसि तस्य त इति वदामः नन्वहमीश्वर एवोक्तः श्रुत्या यद्येवं प्रतिबुद्धोऽसि नास्ति कस्यचिदप्रबोधः४॥

अवेदा

निष्प्रश्नलिंगेन तत्त्वज्ञ्येव तस्याः सिद्धेस्तदाक्षेपानुपपत्तिरित्याह यस्त्वमिति॥ अज्ञानमूलत्वात्प्रश्नादेरिति भावः सर्वज्ञाभिन्नेऽपि कथमज्ञानमिति शं
कते नन्विति अभेदज्ञानात्प्राक् चिन्मात्रस्य तवैवाज्ञानाश्रयत्वमनुभवसिद्धज्ञानस्यापलापायोगात् ज्ञाने तु निर्वाच्यस्य बाधान्नाश्रयापेक्षे दै०ब०
ताह॥ यद्येवमिति॥ ॥ ५

अनिर्वाच्यत्वे न दोषोऽन्तरमपि निरस्तमित्याह योपीति न प्रतीके न हि पो[illegible]के सः। उभयथा ध्यानसंभवात्संशयः यथा ब्रह्मण एव भेदस्त्वौदहीय हठजः
एवं प्रतीकेष्वपि ब्रह्मविकारित्वया जीवाभिन्नब्रह्माभिन्नत्वाज्जीवाभेदसत्वेनाहंग्रहः कार्य इति दृष्टान्तेन पूर्वः पक्षः अत्र प्रतीकोपास्ती नामहंग्रहोपा
स्तिभिरविशेषः सिद्धान्ते तु विशेषसिद्धिरिति फलं एतदारभ्याधिकरणत्रयस्य आसंगिकी पादसंगतिः ब्रह्मैक्यध्यानप्रसंगागतत्वादिति विवेकः किं प्र

योपि दोषश्चोद्यते कश्चिद्द्विविधत्वात्मनः सद्वितीयत्वाद्द्वैतानुपपत्तिरिति सोप्यनेन प्रत्युक्तस्तस्मादात्मेत्येवेश्वरे मनो दधीत॥ आत्मेत्व
धिकरणं॥ ॥ न प्रतीके न हि सः॥ मनो ब्रह्मेत्युपासीतेत्यध्यात्ममथाधिदैवतमाकाशो ब्रह्मेति तथादित्यो ब्रह्मेत्यादेशः स यो नाम ब्रह्मेत्युपास्त
इत्येवमादिषु प्रतीकोपासनेषु संशयः किं तेष्वप्यात्मग्रहः कर्तव्यो न वेति किं तावत्प्राप्तं तेष्वात्मग्रह एव युक्तः कस्मात् ब्रह्मणः श्रुतिष्वात्मत्वे
न प्रसिद्धत्वात् प्रतीकानामपि ब्रह्मविकारत्वाद्ब्रह्मत्वे सत्यात्मत्वोपपत्तेः इत्येवं प्राप्ते ब्रूमः न प्रतीकेष्वात्ममतिं बध्नीयात् नहि स उपास
कः प्रतीकान्यात्मत्वेनाकलयेत् यत्पुनर्ब्रह्मविकारत्वात्प्रतीकानां ब्रह्मत्वं ततश्चात्मत्वमिति तदसत् प्रतीकाभावप्रसंगात्॥
विकारस्वरूपोपमर्देन हि नामादिजातस्य ब्रह्मत्वमेवाश्रितं भवति स्वरूपोपमर्दे च नामादीनां कुतः प्रतीकत्वमात्मग्रहो वा॥ ॥ ॥

प्रतीकेष्वात्मत्वानुभवबलादहंग्रहः उत्तव्यस्ततो जीवाभेदसत्वान्नाचरत्याह। नहि स इति नानुभवतीत्यर्थः। द्वितीयमप्युपाधिं दूषयति य
स्तु नामादिना विकारस्य ब्रह्मण एकस्वरूपैक्यायोगात् बाधेनैक्यं वाच्यं प्रतीकबाधे चोपास्तिविधिर्न स्यादित्यर्थः॥ ॥ ॥श्री॥

शा॰सू॰ किंचकर्तृत्वाद्यबाधेनोपास्तिविधिप्रवृत्तिर्वाच्या बाधे तदयोगात् तथा च बाधमूलब्रह्मैक्यज्ञानं द्वारि रूपप्रतीकेष्वहंग्रहोपास्तिकल्पनानुकूलाबाधविरोधादिसाहं नच ब्रह्मण इति॥ अतो जीवप्रतीकयोः स्वरूपभेदादहंग्रहे विषमत्वश्रवणाच्च नाहंग्रह इति फलितमाह अतश्चेति
६

नच ब्रह्मण आत्मत्वात् ब्रह्मदृष्टिरूपदेशेषु आत्मदृष्टिः कल्प्या कर्तृत्वाद्यनिराकरणात्॥ कर्तृत्वादिसर्वसंसारधर्मनिराकरणेन हि ब्रह्मण आत्मत्वोपदेशस्तदनिराकरणेन चोपासनविधानं अतश्चोपासकस्य प्रतीकैः समत्वादात्मग्रहो नोपपद्यते नहि रुचकस्वस्तिकयोरितरेतरात्मत्वमस्ति सुवर्णात्मनैव तु ब्रह्मात्मनैकत्वे प्रतीकाभावप्रसंगः स्वेच्छाभावो नतः प्रतीकेष्वात्मदृष्टिः क्रियते प्रतीकाधिकरणं॥ १५५॥ ब्रह्मदृष्टिरुत्कर्षात्॥ तेष्वेवोदाहरणेषु अन्यः संशयः किमादित्यादिदृष्टयो ब्रह्मण्यध्यसितव्याः किं ब्रह्मदृष्टिरादित्यादिष्विति॥ ॥ ॥

यथा रुचकस्वस्तिकयोः सुवर्णात्मनैक्योऽपि मिथो नैक्यं तथा जीवप्रतीकयोः ब्रह्मात्मनैक्येऽपि भेदः समः यदि च धर्मित्वव्यतिरेकेणानयोरभावनिश्चयाद् ऐक्यं तर्हि उपासनोच्छेद इत्यर्थः॥ ब्रह्मदृष्टिरुत्कर्षात्॥ एकविषयत्वं संगतिः॥ ॥ ॥ ॥श्री॥ हेरंब॰
६

प्रश्नपूर्वकं संशयबीजमाह कुत इत्यादिना सामानाधिकरण्ये श्रुते तत्र तावन्मुख्यं ब्रह्मविकारयोर्गवाश्वयोरिवाभेदायोगात्॥ नापि प्रकृतिविका
कारभावनिबंधनं व्याकाशस्य विकारबाधेन ब्रह्मपरत्वापातात् न चेष्टापत्तिः नाम ब्रह्मेत्युपासीतेति विधिश्रुतिविरोधात्परिमितनामग्रहणा

कुतः संशयः सामानाधिकरण्यप्रकारस्यानवधारणात्॥ अत्र हि ब्रह्मशब्दस्यादित्यादिशब्दैः सामानाधिकरण्यमुपलभ्यते आदित्यो ब्रह्म
प्राणो ब्रह्म विद्युद्ब्रह्मेत्यादि समानविभक्तिनिर्देशात् न चात्रांजसं सामानाधिकरण्यमवकल्पते अर्थान्तरवचनत्वाद्ब्रह्मादित्यादिश
ब्दानां नहि भवति गौरश्व इति गौरश्व इति सामानाधिकरण्यम्। ननु प्रकृतिविकारभावात् ब्रह्मादित्यादीनां मृच्छरावादिवत्सा
मानाधिकरण्यं स्यात् नेत्युच्यते विकारप्रविलयो ह्येवं प्रकृतिसामानाधिकरण्यात्स्यात् ततश्च प्रतीकाभावप्रसंगः परमप
रमात्मवाक्यं चेदं तदानीं स्यात्॥ ततश्चोपासनाधिकारो बाध्येत परिमितविकारोपादानं च व्यर्थं तस्माद्ब्राह्मणो ग्निर्वैश्वानर इत्या
दिवदन्यतरस्मिन्नितरदृष्ट्यध्यासे सति क्व किंदृष्टिरध्यस्यतामिति संशयस्तत्रानियमो नियमकारिणः शास्त्रस्याभावादित्येवं प्राप्ते॥ ॥

नर्थक्यापाताच्च ब्रह्मपरत्वे सर्वं ब्रह्मेति वक्तव्यत्वात् ततः परिशेषादध्यास एव सामानाधिकरण्यप्रकारः अध्यासेन च नियामकाभावात् संशय इत्यर्थः॥

शा॰सू॰
७

उत्कृष्टनिकृष्टयोः उत्कृष्टमप्युपास्यं फलवत्त्वादिति न्यायो नियामक इत्सरूचे राद्धान्तयेति । अत्र विकारदृष्टिभिर्ब्रह्मोपास्तिसिद्धिः फलं सिद्धान्ते तु वि
कारदृष्ट्या ब्रह्मण उपास्यैर्व्यबलो निकर्षप्राप्तौ सत्यां फलवत्त्वासिद्धिर्विकारा एवोत्कृष्टब्रह्मदृष्ट्योपास्या इति फलं किंच लौकिकन्यायविरुद्धार्थसं

अथवादित्यादिदृष्टय एव ब्रह्मणि कर्तव्या इत्येवं प्राप्ते एवं हि आदित्यादिदृष्टिभिर्ब्रह्मोपासितं भवति ब्रह्मोपासनं च फलवदिति शास्त्रमर्यादा तस्मा
न्न ब्रह्मदृष्टिरादित्यादिष्वेवं प्राप्ते ब्रूमः ॥ "ब्रह्मदृष्टिरेवादित्यादिषु स्यादिति कस्मादुत्कर्षादेवमुत्कर्षेणादित्यादयो दृष्टा भवंति उत्कृष्टदृष्टे
स्तेष्वध्यासात्तथा च लौकिको न्यायोनुगतो भवति" उत्कृष्टदृष्टिर्हि निकृष्टेध्यसितव्येति लौकिको न्यायः यथा राजदृष्टिः क्षत्तरि सा चानु
गंतव्यो विपर्यये प्रत्यवायप्रसंगात् "न हि क्षत्तृदृष्टिपरिगृहीतो राजा निकर्षं नीयमानः श्रेयसे स्यात् ननु शास्त्रप्रामाण्यादत्र शंकनी
योत्र प्रत्यवायप्रसंगो न च लौकिकेन न्यायेन शास्त्रीया दृष्टिर्नियंतुं युक्तेति अत्रोच्यते निर्धारिते शास्त्रार्थे एतदेवं स्यात् संदिग्धे तु तस्मि
न् तन्निर्णयं प्रति लौकिकोपि न्यायः आश्रीयमाणो न विरुध्यते तेन चोत्कृष्टदृष्ट्यध्यासे शास्त्रार्थे अवधार्यमाणे निकृष्टदृष्टिमध्यस्यन्प्र
त्यवेयादिति श्लिष्यते प्राथम्याच्चादित्यादिशब्दानां मुख्यार्थत्वमविरोधाज्जहातव्यं तैः स्वार्थवृत्तिभिरवरुद्धायां बुद्धौ पश्चादवतरतो ब्रह्मश
ब्दस्य मुख्यया वृत्त्या सामानाधिकरण्यासंभवात् ब्रह्मदृष्टिविधानार्थ्यं तैवावतिष्ठते ॥

भवेद्विरुद्धार्थो न ग्राह्यः प्रत्यवायप्रसंगात् किंच प्रथमश्रुतानां
मादित्यादिपदानामसंजातविरोधितया मुख्यार्थत्वग्रहो न्याय्यः ब्रह्मशब्दे च दृष्टिलक्षणाग्रहः तथा चादित्यादेर्ब्रह्मदृष्ट्योपास्यादेवावाकार्यैद्रसाह [illegible]

रं॰वं॰
७

ब्रह्मशब्दस्यैव दध्यर्थत्वे हेतुमाह इति परस्तादिति इति शब्दाच्छिरस्कः शब्दाच्छिरस्कः शब्दः स्वमभिव्याहृत्य कपालभ्रक इति लोके प्रसिद्धिः सर्वः हि
नीयाः कृतेभ्यादिसादीनामेवोपक्षिकर्मत्वमित्याह । वाक्यशेषोपीति । उत्कृष्टमेवोपास्यमिति न्यायमुक्तमनुवदति यत्तूक्तमिति ॥ द्वितीयेमिश्र. ति

शब्द
इति परस्तादपि ब्रह्मशब्दस्यैव एवार्थोन्वाय्यः तथाहि ब्रह्मेत्यादेशः ब्रह्मेत्युपासीत ब्रह्मेत्युपास्त इति सर्वत्रेति परं ब्रह्मशब्दमुच्चारयंतित्युक्त्वा
त्वादित्यादिशब्दाः ततश्च यथा शुक्तिकां रजतमिति प्रत्येतीत्यत्र शुक्तिवचन एव शुक्तिकाशब्दो रजतशब्दस्तु रजतप्रतीतिलक्षणा
र्थः प्रत्येत्येवं हि केवलं रजतमिति न तु तत्र रजतमस्ति एवमन्नाद्यादित्यादीनूब्रह्मेति प्रतीपादिति गम्यते वाक्यशेषोपि च द्वितीया
निर्देशेनादित्यादीनेवोपास्ति क्रियया व्याप्यमानान्दर्शयति स य एतदेवं विद्वानादित्यं ब्रह्मेत्युपास्ते योवाचं ब्रह्मेत्युपास्ते यः सं
कल्पं ब्रह्मेत्युपास्त इति च यत्तूक्तं ब्रह्मोपासनमेवान्नादरणीयं फलवत्त्वायेति तद्युक्तं उक्तेन न्यायेनादित्यादीनामेवोपास्यत्वावगमात् ॥
फलं त्वतिथ्याद्युपासन इवादित्याद्युपासनेपि ब्रह्मैव दास्यति सर्वाध्यक्षत्वात् वर्णितं चैतत्फलमत उपपत्तेरित्यत्र ईदृशं चात्र ब्रह्म
उपास्यत्वं यत्प्रतीकेषु तद्दृष्ट्याध्यारोपणं प्रतिमादिष्विव विष्ण्वादीनां ॥ ब्रह्मदृष्ट्यधिकरणं ॥ १५ ॥ ष्णां लौकिकन्यायाद्वैदिकन्यायबाध इत्या
शाह तत इति । ब्रह्मणोनुपास्यत्वे कथं फलदातृत्वं तत्राह फलं त्विति किं च दृष्ट्या विकारस्योत्कर्षस्तस्य ब्रह्मणो विशेषणत्वेप्युपास्यत्वं चासत्यसाह ईदृशं चेति ॥

शा.सू० आदित्यादि। पृथिव्यग्न्यंतरिक्षादित्यद्युसंज्ञेषु लोकेषु हिंकारप्रस्तावोद्गीथप्रतिहारनिधनैरंशैः पंचांशं साम तैरेवादिति उपद्रव्यमिति भक्तिरूपाद्धिकैः सप्तांशं
८ सामेति भेदः। अत्र विशेषफलानां संशयः पूर्ववदुत्कर्षानवधारणादनियम इति प्रसंगादाहरणे न पूर्वपक्षमाह तत्रेति सिद्धरूपादित्यादि कर्मरूपोद्गीथा

आदित्यादिमतयश्चांग उपपत्तेः। य एवासौ तपति तमुद्गीथमुपासीत लोकेषु पंचविधं सामोपासीत वाचि सप्तविधं सामोपासीत इयमेवर्गग्निः
सामेत्येवमादिष्वंगावबद्धेषु संशयः किमादित्यादिषूद्गीथादिदृष्टयो विधीयंते किं चोद्गीथादिष्वेवादित्यादिदृष्टय इति तत्रानियमः निय
मकारणाभावादिति प्राप्तं न ह्यत्र ब्रह्मण इव कस्यचिदुत्कर्षविशेषोऽवधार्यते ब्रह्म हि समस्तजगत्कारणत्वादपहतपाप्मत्वादिगुणयो
गाच्चादित्यादिभ्य उत्कृष्टमिति शक्यतेऽवधारयितुं न त्वादित्योद्गीथादीनां विकारत्वाविशेषात्किंचिदुत्कर्षविशेषावधारणे कारणमस्
ति॥ अथवा नियमेनैवोद्गीथादिमतय आदित्यादिष्वध्यस्येरन् कस्मात् कर्मात्मकत्वादुद्गीथादीनां कर्मणश्च फलप्राप्तिप्रसिद्धेः उद्गीथा
दिमतिभिरुपास्यमाना आदित्यादयः कर्मात्मकाः संतः फलहेतवो भविष्यंति तथा चेयमेवर्गग्निः सामेत्यत्र तस्यामृच्यध्यूढं सामेत्यृक्छ
ब्देन पृथिवीं निर्दिशति सामशब्देनाग्निं तच्च पृथिव्यग्न्योर्ऋक्सामदृष्टिचिकीर्षायामवकल्पते न ऋक्सामयोः पृथिव्यग्निदृष्टिचिकीर्षायां

दीनां फलसन्निकर्षेणोत्कर्षात् फलवद्विशेषणान्नियम इति दृष्टांतेन मुख्यं पूर्वपक्षमाह॥ अथवेति। ततः फलसिद्धिरेव पूर्वोक्तपक्षे पक्षफलं मत
मैं किं चानंगे ष्वेवांगदृष्टिरित्यत्र लेषु गवा विपद्प्रयोगे लिंगमाह तथा चेयमेवेति तदेतदृच्यध्यूढं साम एतस्यां पृथिव्यां रूपापाम्यध्यूढमुपरि स्थित हु.सू० ८

ऋचि सामवत्पृथिव्यामग्निर्दृश्यते अतः साम्यात्पृथिव्येवर्गग्निः सामेति ध्यानं विहितं तत्र यदि ऋक्साम्नोः त्वकयोः कर्मांगयोः कर्मांगयोः पृथिव्यग्निदृष्टिः स्यात्तदा पृथि
व्यग्न्योर्ऋक्सामपदप्रयोगो नस्यात् दृष्टिसत्त्वे दृष्टांतमाह स्त्रीति अतः प्रयोगान्यथानुपपत्त्या पृथिव्यग्न्योः ऋक्सामदृष्टिरित्यर्थः विषयसप्तम्या चैवमेवेसा
ह अपि चेति गायत्रसंज्ञं साम किंच पूर्वाधिकरणसिद्धांतन्यायेनाप्येवमित्याह प्रथमेति अनंगावबद्धान्युपासनानीति सिद्धांतयति एवमिति उपासीनां

स्तंत्रदृष्टिरांगदृष्टिकरणाशक्तशब्दउपचर्यते न राजनि क्षत्तृशब्दः। अपि च लोकेषु पंचविधं सामोपासीतेत्यधिकरणनिर्देशात् लोकेषु सामा
ध्यासो ~~आदित्योब्रह्मेत्यादेशः तस्यादिषु प्रथ~~ तस्मिन्निति सप्तमी यते एतत्प्रायत्रं प्रालोपुष्ठोतमिति चैवं दर्शयति॥ प्रथमनिर्दिष्टेषु लोकादिसाटिषु चरम
निर्दिष्टं ब्रह्माध्यस्तं आदित्योब्रह्मेत्यादेशः तस्यादिषु प्रथमनिर्दिष्टाश्च पृथिव्यादयः पश्चान्निर्दिष्टा हिंकारादयः पृथिवी हिंकार इत्यादिश्रुतिषु अ
तो न गोष्ठादित्यादिषु अंगमति क्षेपदृतिरेवं प्राप्ते ब्रूमः॥॥ आदित्यादिमतयएवांगेषु उद्गीथादिषु क्षिप्येरन् कुतः उपपत्तेः उपपद्यते ह्येवमपूर्व
संनिकर्षाद्धादित्यादिमतिभिः संस्क्रियमाणेषूद्गीथादिषु कर्मसमृद्धिः यदेव विद्यया करोतीत्युपनिषद्वा तदेव वीर्यवत्तरं भवतीति च वि
द्यायाः कर्मसमृद्धिहेतुत्वं दर्शयति भवतु कर्मसमृद्धिफलेष्वेव स्वतंत्रफलेषु तु कथं य एतदेवं विद्वान् लोकेषु पंचविधं सामोपास्ते इत्यादिषु॥

हि कर्मसमृद्धिः फलं श्रूयते आचतामिरंगेषु संक्रियमाणेषु उपपद्यते अंगानां समृद्ध्यनुकूलफलत्वं तत्कर्मापूर्वसंनिकर्षादित्यर्थः ननु फलोपात्तीनां फलत
कर्मापूर्वसंनिकर्षांगद्वारत्वे कृतं स्वफलं श्रूयत न तत्र फलोपपत्तये अंगानामुपास्यत्वं भवतु तत्र च पंचफलो कादिफलेषु तूपास्यत्वे कथमुपास्यविवेकः इति शंकते

श्रा॰सू॰ यथा स्वतंत्रपशुफलस्यापि गोदोहनस्य अंगद्वारापेक्षयैव फलमिष्टं तद्वल्लौकादिफलेष्वपासनेष्वपि कर्मापूर्वांगद्वारैव फलकल्पना युक्ता कर्माधिकृतस्यैवांगा
श्रितोपासनेष्वधिकारात् तेषांगानामेवोपास्यत्वमिति समाधत्ते तेष्वपीति उत्कर्षानवधारणात् नियमाद्गुरुत्कं निरस्यति फलात्वेतिद्वप्रक्रमवलाद्वांगमुपा
९ स्यमिति आह। अपि चेति। रसतमत्वादिगुणाद्युपसंख्यानमित्यर्थः द्वितीयं पूर्वपक्षं दूषयति यत्तूक्तमित्यादिना कर्मभूयं कर्मात्मकत्वं प्राप्ये सत्यर्थः सिद्धादिसा

तेषामधिकृताधिकारात् पक्रमात् पूर्वसन्निकर्षेणैव फलकल्पनायुक्ता गोदोहनादिनियमवत् फलात्मकत्वाच्चादित्यादीनामुद्गीथादिरूपः कर्मांश
के मयः उत्कर्षोपपत्तिः आदित्यादिप्राप्तिलक्षणं हि कर्मफलं श्रिष्यते श्रुतिषु अपि च ॐ मित्येतदक्षरमुद्गीथमुपासीत तस्यैतस्यैवाक्षरस्योपव्या
ख्यानं भवतीति चोद्गीथमेवोपास्यत्वेनोपक्रम्यादित्यादिमतीर्विदधाति। यत्तूक्तं उद्गीथादिमतिभिरुपास्यमाना आदित्यादयः कर्मभू
यं भूत्वा फलं कल्पयंतीति तदयुक्तं स्वयमेवोपासनस्य कर्मत्वात् फलवत्त्वोपपत्तेः आदित्यादिभावे नापि चदृश्यमानानामुद्गीथादीनां कर्मात्म
कत्वानपायात् तदेतस्याभ्युच्चयः दृष्टांतमाह अमेति तुल्यत्र प्रापणिक एषः पृथिव्यां स्योर्हे कृत्स्नामशब्द प्रयोगः लक्षणा चेयाख्या संभवंत्येति कृष्टेन विप्रकृष्टे
नवात्वार्थसंबंधेन प्रवर्तते॥५
धात्मनाकर्मत्वं दृष्टो कर्मत्वहानिः स्यादित्यत आह आदित्यादिभावेनेति प्रयोगानुपपत्तिमुक्तां निरस्यति तदेतदिति लक्षणाबीजं संबंधमाह ल
क्षणा चेति गंगायां घोष इत्यत्र सन्निकृष्टसंयोगसंबंधेन तीरं लक्ष्यते अग्निर्माणवक इत्यत्र अग्निनिष्ठगुणविशिष्टगुणयुक्तत्वपरंपरासंबंधेन ल हेरंब॰
क्षणा दृष्टा तथा चात्र कृत्स्नाम पोः पृथिव्यग्नि द्विपक्षोपि कृत्स्नामपदाभ्यां स्ववाच्यार्थ दृष्टव्यता स्वपरंपरासंबंधेन पृथिव्यग्नि लक्षणायुक्ते सत्यर्थः ९

ननुप्रतीकवाचिपदस्यध्येयेऽर्थेलक्षणयानमुक्तास्वतपदस्वराज्ञन्यप्रयोगादितिशंकतेतत्रपद्यपीतितथापिऋक्सामसंबंधात्पृथिव्यग्न्योरेवैतस्यात्र
चाभूरंसामेत्येषऋक्सामपदप्रयोगइत्सन्वयः ननुमुख्यार्थएवकुतोनगृह्यतेतत्राह प्रसिद्धयोरितितस्माद्दृच्यभूरंसामेतिमुख्ययोःपृथगुक्तेःस्त
देतदेतस्यामित्यत्राप्तितयोर्येहपुनरुक्तिःस्यात् अतःप्रतीकाभेदहस्यापृथिव्यग्न्योःप्रतीकसन्निधानात्तयोरेवप्रतीकपदप्रयोगःकृतस्तदभेद

तत्रपद्यपिऋक्सामयोःपृथिव्यग्निदृष्टिचिकीर्षातथापिप्रसिद्धयोर्ऋक्सामयोर्भेदनानुकीर्त्तनात्पृथिव्यग्न्यो
श्चसंन्निधानात्तयोरेवैषऋक्सामशब्दप्रयोगःऋक्सामसंबंधादितिनिश्चीयतेस्तद्शब्दोपिहिकृतश्चित्कार
णाद्राज्ञानमुपसर्पन्ननिवारयितुंपार्यतेइयमेवार्णितिचयथाश्वरन्यासम्चएवपृथिव्यांसमवधारयति॥पृथिव्यात्क
न्के॥वधार्यमाणेइयमग्नेवेसक्षरन्यासःस्यात्यएवंविद्वान्सामगायतीतिवोगाश्रयमेवविज्ञानमुपसंहरतिनपृथिव्यांश्र

र्हार्थायेस्यार्थःनर्हिखलशब्दोपिराजनिस्यादितिसतआह सत्रिनिस्थितप्रयोगस्यनिमित्तंकिमप्यवाच्यंननुनिमित्तमस्तीतिप्रयोगआपाद्यइतिभावःस्त
सत्रास्त्रतःतस्यकार्यैरथचर्यादिपदाराजैनकरोतितदाक्षतशब्दोराज्ञन्याप्यस्तीसप्तरार्थः ऋगादावेवपृथिव्यादिदृष्टिःइसत्रहेत्वंतरमाहइयमि

शा॰ सू॰ सप्तम्या लोकानामुपास्यत्वमुक्तं निरस्यति तथा लोकेष्विति। साम्यात्मना लोकाननुसीतेति द्वितीयासप्तम्योर्भंगस्तु यथा कार्यस्ततो वरं लोकात्मना
सामोपासीतेति सप्तमीमात्रभंग इत्यर्थः एतेनेति। एकविभक्तिभंगलाघवेन प्राणात्मना गायत्रं सामोपास्यमिति व्याख्यातमित्यर्थः ननु विभक्तिसा
१० म्ये कथं निर्णयस्तत्राह यत्रापीति साम्न उपासनं साध्वित्युपक्रम्य पंचविधं हिंकारादिसाद्विना हिंकारादिपंचाद्यवयवस्य साम्न उपासनमुक्तमिति तु

तथा लोकेषु पंचविधं सामोपासीतेति यद्यपि सप्तमीनिर्दिष्टा लोकास्तथापि साम्न्येव ते ध्यस्येरन् द्वितीयानिर्देशेन साम्न
उपास्यत्वावगमात् साम्नि हि लोकेष्वध्यस्यमानेषु साम लोकात्मनोपासितं भवति। अन्यथा पुनर्लोकाः सामात्मनोपासिताः स्युः
एतेनैतद्गायत्रं प्राणेषु प्रोतमित्यादि व्याख्यातं। यत्रापि तुल्यो द्वितीयानिर्देशोथ खल्वमुमादित्यं सप्तविधं सामोपासीतेति तत्रापि स
मस्तस्य खलु साम्न उपासनं साध्विति तु पंचविधस्याथ सप्तविधस्येति साम्न एवोपास्यत्वोपक्रमात्तस्मिन्नेवादित्याद्यध्या
सः एतस्मादेव च साम्न उपास्यत्वावगमात् पृथिवी हिंकार इत्यादिनिर्देशविपर्ययेपि हिंकारादिष्वेव पृथिव्यादिदृष्टिः त
स्मादंगाश्रया आदित्यादिमतयोंगेषूद्गीथादिषु क्षिप्येरन्निति सिद्धं॥ आदित्यादिमत्यधिकरणं॥ १५७॥ ॥

पंचविधस्योपासनमित्युपसंहृत्याथेति सप्तविधस्य साम्न उपासनं प्रक्रम्य प्रपंचितमतः साम्न एवोपास्यत्वमित्यर्थः पठ्यमानक्रमाप्यध्यापि व्या
देरुपास्यत्वमिति नत्राह एतस्मादेवेति। यद्यपि हिंकारो इति निर्देशेन पृथिवीत्वविधेरुद्देश्यस्य प्रथमनिर्देशो वाच्यस्तथाप्युपक्रमापवलाघवतया ग्राह्यः इति दर्थः॥ १० देव॰

आसीनः संभवात्॥ कर्मलउत्थितेनोपविष्टेन वा नेत्यनुष्ठानदर्शनात्संशयः कर्माङ्गाश्रितोपासनानामासननियमाभावेऽप्यनङ्गानुष्ठानप्रका-
कारतन्त्रत्वादङ्गानाश्रितोपासनेष्वप्यनियम इति पक्षयति तत्रेति॥ अत्रासनाभ्यासासिद्धिः सिद्धान्ते तु मनोदेहयोर्व्यापृतत्वे विदेहचांचल्येन

आसीनः संभवात्॥ कर्माङ्गसंबद्धेषु तावदुपासनेषु कर्मतन्त्रत्वान्नासनादिचिन्ता नापि सम्यग्दर्शने वस्तुतन्त्रत्वाज्ज्ञानस्य इत-
रेषु तूपासनेषु किमनियमेन तिष्ठन्नासीनः शयानो वा प्रवर्तेत उत नियमेनासीन एवेति चिन्तयति तत्र मानसत्वादुपासन-
स्यानियमः शरीरस्थितेरिति एवं प्राप्ते ब्रवीति आसीन एवोपासीतेति कुतः संभवात् उपासनं नाम समानप्रत्ययप्रवा-
हकरणं न च तद्गच्छतो धावतो वा संभवति गत्यादीनां चित्तविक्षेपकत्वात् तिष्ठतोऽपि देहधारणे व्यापृतं मनो न सूक्ष्मवस्तु-
निरीक्षणक्षमं भवति शयानस्याप्यकस्मादेव निद्रयाभिभूयेत आसीनस्य त्वेवंजातीयको भूयान्दोषः सुपरिहर इति
संभवात्तस्योपासनं॥ ध्यानाच्च। अपि च ध्यायत्यर्थ एषः यत्समानप्रत्ययप्रवाहकरणं ध्यायतिश्च प्रशिथिलाङ्गचेष्टे-
षु प्रतिष्ठितदृष्टिष्वेकविषयाक्षिप्तचित्तेषूपचर्यमाणो दृश्यते ध्यायति बको ध्यायति प्रोषितबन्धुरिति आसीनश्चाना-
यासो भवति तस्मादप्यासीनकर्मोपासनं॥ ॥

सीनस्य ध्यानस्य अनुभवसिद्धत्वान्न वा व्यापारेषूपासनेषु देहस्थैर्यार्थमासन-
नियमापेक्षेति फलभेदः तिष्ठता उत्थितस्य किंच ध्यातार आसीना भवन्तु ध्यायतिशब्दादित्याह बकादिवदित्याह ध्यानाच्चेति॥

शा·भ· अत्रैव श्रौतं दृष्टान्तमाह अचलत्वं चेति वाक्यस्य शारीरस्य वासनस्य स्मरणान्नियम इत्याह॥ स्मरन्ति चेति यत्रैकाग्रता तत्राविशेषात् तेष्वेवं गा॥ नाश्रितोपा
९१ सने पुष्पाद्यादिष्टि प्रीतीर्थादि देशप्रदोषादि काले नियमोक्तिनवेत्युभयथा संभवात्संशयः एकविषयत्वं संगति रूपासीनं विहितत्वाद्यागादिवद्दि

अचलत्वं चापेक्ष्य अपि च ध्यायतीव पृथिवी सत्रप्युपि ध्यादिष्वचलत्वमेवापेक्ष्य ध्यायतिवादो भवति॥ तत्र लिंगमुपासनत्वस्या
सीनकर्मत्वे॥ स्मरन्ति च॥ स्मरन्त्यपि चाशिष्टा उपासनांगत्वेनासनं शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मन इत्यादिना अत एव
घ वपद्मकादीनामासनविशेषाणामुपदेशो योगशास्त्रे॥ १५८॥ ॥ यत्रैकाग्रता तत्राविशेषात्॥ दिग्देशकालेषु संशयः किमा
स्ति कश्चिन्नियमो नास्ति वेति प्रायेण वैदिकेष्वारंभेषु दिगादिनियमदर्शनात्स्यादिहापि कश्चिन्नियम इति यस्य मतिस्तं प्रत्या
ह दिग्देशकालेष्वर्थलक्षण एव नियमः यत्रैवास्य दिशि देशे काले वा मनसः सौकर्येणैकाग्रता भवति तत्रैवोपासीत प्राचीदिक्
पूर्वाह्णप्राचीनप्रवणादिवद्विशेषाश्रवणात् एकाग्रताया इष्टायाः सर्वत्राविशेषात्॥

दिगादिनियम इति पूर्वपक्षः अत्र दिगादि
घाद्यद्रः फलं सिद्धान्ते त्वनादरः ध्येयो चित्तैकाग्र्यस्य प्राधान्यात्त्रयाणां सिद्धदेशादिग्रहणस्योचितत्वादिति विवेकः अर्थलक्षण एवेति एकाग्र हे·ब·
फललिंगक एवेत्यर्थः प्राचीनप्रवणे प्राग्देशनिम्नस्थलेवैश्वदेवं कुर्यादितिवदत्र दिगादिविशेषोन्नश्रूयते अतोऽनुमानमप्रयोजकमिति भावः॥ ११

विशेषाश्रवणमसिद्धमिति शंकते॥ ननु विशेषमपीति॥ शर्करा सूक्ष्मपाषाणाः जलाश्रयवर्जनं शालानिवसथे चक्षुःपीडनो मशकः वाचनिकं समदेशादिति
येषु मंगीकृत सन्निहितैकाग्र्यविरुद्धेषु देशादिगतेषु प्राचीनप्रवणत्वादिषु नादरः इति सुहृद्भावेन सूत्रवद् परिशनि देशाद्यनियमं हे। केन विशेषात्समाधिमं

ननु विशेषमपि केचिदामनन्ति समे शुचौ शर्करावह्निवालुकावर्जिते शब्दजलाश्रयादिभिः। मनोनुकूले न तु चक्षुःपीडने गुहानिवाताश्र
यणे प्रयोजयेदिति। उच्यते॥ सत्यमस्त्येवंजातीयको नियमः सति चैतस्मिंस्तद्गतेषु विशेषेषु अनियम इति सुहृद्भूत्वाचार्य आच
ष्टे मनोनुकूल इति चैषा श्रुतिर्यत्रैकाग्रता तत्रैवेत्येतदेव दर्शयति॥ एकाग्रताधिकरणं॥१५॥ आप्रायणात्तत्रापि हि दृष्टं॥१२॥ आवृत्तिः
सर्वोपासनेष्वादर्तव्येति स्थितमाद्येऽधिकरणे तत्र यानि तावत्सम्यक्दर्शनार्थान्युपासनानि तान्यवघातादिवत्कार्यपर्यवसानानि
विज्ञानमेवेषामावृत्तिपरिमाणं न हि सम्यग्दर्शने कार्ये निष्पन्ने यत्नान्तरं किंचिच्छासितुं शक्यं। अनियोज्यब्रह्मात्मत्वप्रतिपत्ते॥
शास्त्रस्याविषयत्वात्। यानि पुनरभ्युदयफलानि तेष्वेषा चिंता। किं कियंतं चित्कालं प्रत्ययमावर्त्योपरमेदुत यावज्जीवमावर्तये
दिति किं तावत्प्राप्तं किं कियंतं चित्कालं प्रत्ययमभ्यस्योत्सृजेत्॥ आवृत्तिविशिष्टस्योपासनशब्दार्थस्य कृतत्वादिति॥ ॥ ॥

भंगः स्यात्स मा भूदिति आप्रायणात्॥ प्रवृत्तेनास्य संबंधमाह। आवृत्तिरिति अनियोज्योऽब्रह्म एवात्मत्वप्रतिपत्तिर्यस्मिन्नस्य विदुषस्तत्वार्थ अयं शेषा
सनेषु अनुष्ठानस्योभयथादृष्टेः संशयमाह यानि पुनरिति। यथादृष्टि आदृष्टिनियमस्याविधेरनादरः इत्युक्तकरणमुपासावृत्तेः अविधानादनियम इति पूर्वपक्षः॥

शा सू० मरणपर्यंतमावर्त्तितव्यमिति सिद्धांतयति॥ एवमिति उपास्तीनां कर्मणां चांतकाले त्वानन्त्यफलस्फूर्त्तिद्वारा फलहेतुत्वमाह सविज्ञानइतिभावनामयं विज्ञानं फलस्फु
रणं तेन सहितः सविज्ञानो विज्ञानं स्फुरितं फलं स विज्ञानमित्यर्थः यस्मिन् लोके चित्तं संकल्पो यस्येति यच्चित्तस्तेन संकल्पेनैव सह फलस्फूर्त्त्यनंतरं मनः प्राणे लीय
१२ ते इति यावत् तेजउदानः आत्मा जीवः जल्लूकावत्तदंतःकृतेश्च भाविफलस्फूर्त्तिरस्तीत्यर्थः अस्ति हमंत्र फलविज्ञानं कर्मणामपि वा दृष्टद्वारोपास्तीनां ननु

एवं श्रुतेः क्रमः आप्रायणादावर्त्तयेत् तस्य अंतसमयवशात् दृष्टफलप्राप्तेः कर्मणः एव पि हि जन्मांतरीयभोग्ये फलमारभमाणानि तदनुरूपं भावना
विज्ञानं प्रायणकाले आक्षिपंति स विज्ञानो भवति स विज्ञानमेवान्वक्रामति यथा तस्लेनैव प्राणमायाति प्राणस्तेजसा युक्तः सहात्मना यथासं
कल्पितं लोकं नयतीति चैवमादिश्रुतिभ्यः तृणजलूकानिदर्शनाच्च प्रत्ययास्तेनैव ~~तेजसा युक्तः सहात्मना यथासंकल्पितं लोकं नयतीति~~ रूपावर्त्ति
मुक्ताः किमन्यप्रत्ययप्रायणकाले भाविभावना विज्ञानमपेक्षेरन् तस्माद् घे प्रतिपन्नफलभावनात्मकप्रत्ययावृत्त्या प्रायणादावर्त्तितः तथा च श्रुतिः
सयावत्क्रतुरयमस्माल्लोकात् प्रैतीति प्रायणकालेपि प्रत्ययान्वर्त्तिं दर्शयति स्मृतिरपि यं यं वापि स्मरन् भावं त्यजत्यंते कलेवरं तं तमेवेति
कौन्तेय सदा तद्भावभावित इति प्रयाणकाले मनसाचलेनेति च सोंते वेलायामेतत्त्रयं प्रतिपद्येतेत्यं मरणवेलायामपि कर्त्तव्यशेषं श्रावयति॥
[illegible] १२॥ आप्रयाणाधिकरणं॥
न आमरणमावृत्तिरिति न आह प्रत्ययावृत्तिरिति उपास्तिप्रत्ययानां धारावाहिकतया स्वरूपाभिव्यक्तिरेवां संविज्ञानेन तदृष्टद्वारकमन्यद्यो[illegible] क्षितेः सर्वभावा
नामिव स्वसमानजातीयद्वारानपेक्षत्वात् प्रत्ययानां प्रत्ययांतरापेक्षायोगात् कर्मणां तु दृष्टद्वारां सधापफलत्वानुपपत्तेः अदृष्टद्वारकल्पनेति भावः ननु श्री छे सू०
नेउपासकः एतत्त्रयमक्षितमस्यच्युतमसि प्राणसंशितमसीति मंत्रत्रयं मरणकाले पि स्मरेदित्यर्थः॥॥ १२

यथोपासकानां यावज्जीवं कर्त्तव्यमस्ति न तथा फलविद्यामिति कर्मक्षयलक्षणां जीवन्मुक्तिमाह तदधिगम इति ॥ ॥ ज्ञानसाधनेषु फलाधिकारार्थं फला-
ध्यायेपि साधनाविचारः ४ कृतः संप्रति फलाध्याये स्थापफलचिंता क्रियते तत्राह गतइति कर्मणां फलं तत्तच्छास्त्रात् ज्ञानस्य फलं शास्त्राच्च संशयः
पूर्वपक्षे ज्ञानिनोपि संचितनयापभोगानंतरं मुक्तिः सिद्धांते तु ज्ञानसमकालं यावन्नाशात् जीवन्मुक्तिरिति फलं नहि स्यादिसादिनिषेधकारस्य दुरितादृष्ट

तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात् ॥ गतस्तृतीयशेषः अथेदानीं ब्रह्मविद्याफलं प्रति चिंता प्रतायते ब्रह्मा-
धिगमे सति तद्विपरीतफलं दुरितं क्षीयते न क्षीयते वेति संशयः किं तावत्प्राप्तं फलार्थत्वात्कर्मणः फलमदत्त्वा न संभाव्यते क्षयः ४
फलदायिनी ह्यस्य शक्तिः श्रुता सा समाधिगता यदि तदंतरेणैव फलोपभोगमपवृज्येत कदर्थिता स्यात्स्मरंति च न हि कर्म क्षीयते
इति नन्वेवं सति प्रायश्चित्तोपदेशोऽनर्थकः प्राप्नोति नैष दोषः प्रायश्चित्तानां नैमित्तिकत्वोपपत्तेः गृहदाहेष्ट्यादिवत् ॥ ॥ ॥

स्य दुःखदायिनी शक्तिरधिगतान्नाभुक्तं क्षीयते कर्मेति च स्मरंति अतः फलांतमेव पापं न मध्ये नश्यतीति पूर्वपक्षः ननु तर्हि तन्नाशार्थप्रायश्चित्तविधिर्नैसादिनि चे-
न्न यथा आहिताग्नेर्गृहदाहे निमित्ते सति अग्नये क्षामवते पुरोडाशमष्टाकपालं निर्वपेदिति इष्टिविधिस्तद्वदेव निमित्तमात्रे सति प्रायश्चित्तविधेरपि नाशार्थत्वासिद्धिः ॥

शा॰सू॰ ननु विषम उपन्यासः युक्तं गृहदाहस्य सिद्धत्वाद्योग्यत्वाच्च फलत्वान्निमित्तत्वं दोषवान् प्रायश्चित्तं कुर्यादित्यत्र तु मलिनः स्नायादितिवद्दोषपदस्य निवृत्ति
१३ द्वारा फलपरत्वसंभवात् तरति ब्रह्महत्यां योऽश्वमेधेन यजत इति प्रायश्चित्तानां निवृत्तिश्रुतेश्च। उक्तं प्रायश्चित्तानां निवृत्तस्य नैमित्तिकत्वमिष्यतेऽ

अपि च प्रायश्चित्तानां दोषसंयोगेन विधानाद्भवेदपि दोषक्षपणार्थता न त्वेवं ब्रह्मविद्यायां विधानमस्ति ननु अनभ्युपगम्यमाने ब्रह्मविदः कर्मक्षये
तत्फलस्यावश्यंभोक्तव्यत्वादनिर्मोक्षः स्यात् नेत्युच्यते देशकालनिमित्तापेक्षो मोक्षः कर्मफलवद्भविष्यति तस्मान्न ब्रह्माधिगमे दुरितनिवृत्तिरिति
एवं प्राप्ते ब्रूमः तदधिगम इति ब्रह्माधिगमे सति उत्तरपूर्वयोरघयोरश्लेषविनाशौ भवतः उत्तरस्याश्लेषः पूर्वस्य विनाशः कस्मात् तद्व्यपदेशा
त् तथा हि ब्रह्मविद्याप्रक्रियायां संभाव्यमानसंबंधस्यागामिनो दुरितस्यानभिसंबंधं विदुषो व्यपदिशति यथा पुष्करपलाश आपो न श्लिष्यं
त एवमेवंविदि पापं कर्म न श्लिष्यत इति तथा विनाशमपि पूर्वोपचितस्य दुरितस्य व्यपदिशति तद्यथेषीकातूलमग्नौ प्रोतं प्रदूयेतैवं हास्य सर्वे पा
प्मानः प्रदूयंत इति॥ ॥ ॥

अपि चेति। स्नानस्य दोषनाशार्थतया विधानेनास्ति संभवं तेनास्य कर्मणो साद्गुण्येन स्नानवत्कर्मान्तरवत्
इत्यर्थः कर्मभोगान्नान्तरेण देशकालान्तरे मोक्षो भविष्यति शास्त्रप्रामाण्यादित्याह नेत्युच्यत इति ज्ञानात्कर्मक्षयस्यापूर्वत्वान्मानान्तराविरु
द्धत्वाच्च तस्यानेकवाक्यानां न्यायावकाशायोगात्स्यादित्विमिति सिद्धान्तयति एवमित्यादिना पापक्रियायाः तो पूर्वोत्तरयोरश्लेषः॥ ॥ श्री॥ टेख॰
१३

गुणब्रह्मविद्यायां व्यपदेशमुक्त्वा निर्गुणायां तमाह॥ अथ भपरइतिपरोक्तं क्षपयन्तीत्युक्तमित्यादि नाविधिनिषेधशास्त्रं नाभुक्तं क्षीयत इत्यादि
स्मृतिश्च कर्मणः फलशक्तौ प्रमाणमतः शक्तस्यापि कुतश्चिन्नाशांगीकारे न शास्त्रविरोध इत्यर्थः तत्वज्ञानमात्मनाशेषदुरितनाशकं

अथ भपरः कर्मक्षयव्यपदेशो भवति भिद्यते हृदयग्रंथिश्छिद्यंते सर्वसंशयाः क्षीयंते चास्य कर्माणि तस्मिन्दृष्टे परावरे इति यदुक्तं अ
नुपभुक्तफलस्य कर्मणः क्षयकल्पनायां शास्त्रकदर्थितं स्यादिति नैष दोषः नहि वयं कर्मणः फलदायिनीं शक्तिमपजानीमहे विद्यत
एव सा सा तु विद्यादिना कारणांतरेण प्रतिबध्यत इति वदामः शक्तिसद्भावमात्रे च शास्त्रं व्याप्रियते न प्रतिबंधाप्रतिबंधयोरपि न
हि कर्म क्षीयत इत्येतदपि स्मरणमौत्सर्गिकं न भोगादृते कर्म क्षीयते तदर्थत्वादिति इष्यत एव प्रायश्चित्तादिना तस्य क्षयः स
र्वपाप्मानं तरति तरति ब्रह्महत्यां योऽश्वमेधेन यजते य उ चैनमेवं वेदेत्यादिश्रुतिस्मृतिभ्यः यत्तूक्तं नैमित्तिकानि प्रायश्चित्तानि भविष्यंतीति तद्
सत्दोषसंयोगेन चोद्यमानानामेषां दोषनिर्घातफलसंभवे फलांतरकल्पनानुपपत्तेः यत्पुनरेतदुक्तं न प्रायश्चित्तवद्दोषक्षयोद्देशे
न विद्याविधानमस्तीति अत्र ब्रूमः सगुणासु तावद्विद्यासु विद्यत एव विधानं तासु च वाक्यशेषऐश्वर्यप्राप्तिः पापनिवृत्तिश्च विद्यावत
उच्यते तयोश्चाविवक्षाकारणं नास्तीत्यतः पाप्मप्रहाणपूर्वकैश्वर्यप्राप्तिस्तासां फलमिति निश्चीयते निर्गुणायां तु विद्यायां यद्यपि
विधानं नास्ति तथाप्यकर्त्रात्मत्वबोधात्कर्मप्रदाहसिद्धिः
नन्मूलाध्यासबाधकत्वात्सर्वदुरितमूलकर्तृत्वाध्यासबाधकज्ञानस्य दोषवदित्याह न थाप्यकृतीत्वबोधादिति॥

शा·सू० श्रुतार्थमेवमुक्त्वा दृढपतत्श्लेषद्इतिचेति मूलाध्यासानुसन्ततेः पापस्याश्लेषः तत्त्वज्ञानाद्विनाशादित्यर्थः॥ अध्यासाभावे विद्वदनुभवमाह पूर्वेति मोक्षशा

१७

अश्लेषादिति चागामिषु कर्मसु कर्तृत्वमेव न प्रतिपद्यते ब्रह्मविदिति दर्शयति अतिक्रान्तेषु तु यद्यपि मिथ्याज्ञानात्कर्तृत्वं प्रतिपेदे
इव तथापि विद्यासामर्थ्यान्मिथ्याज्ञाननिवृत्तेस्तान्यपि प्रविलीयन्त इत्याह विनाश इति पूर्वसिद्धकर्तृत्वभोक्तृत्वविपरीतं हि
त्रिष्वपि कालेष्वकर्तृत्वाभोक्तृत्वस्वरूपं ब्रह्माहमस्मि नेतः पूर्वमपि कर्ता भोक्ता वाहमासं नेदानीं नापि भविष्यत्काल इति ब्र
ह्मविदवगच्छति एवमेव च मोक्ष उपपद्यते॥ अन्यथा ह्यनादिकालप्रवृत्तानां कर्मणां क्षयाभावे मोक्षाभावः स्यात् न च देशकाल
निमित्तापेक्षो मोक्षः कर्मफलवद्भवितुमर्हति अनित्यत्वप्रसंगात् परोक्षत्वानुपपत्तेश्च ज्ञानफलस्य तस्माद्ब्रह्माधिगमे दुरित
क्षय इति स्थितं॥१३॥ ब्रह्माधिगमाधिक०॥ ॥इतरस्याप्येवमसंश्लेषः पाते तु॥॥ पूर्वस्मिन्नधिकरणे बंधहेतोरघस्य स्वा
भाविकस्याश्लेषविनाशौ ज्ञाननिमित्तौ शास्त्रव्यपदेशान्निरूपितौ॥ ॥ ॥ ॥

स्त्रबलाच्च ज्ञानात्कर्मक्षयसिद्धिरित्याह एवं चेवेति ज्ञानात्कर्मक्षये सत्येवेत्यर्थः मोक्षस्य कर्मफलसाम्यमुक्तं निरस्यति न चेति इतरस्यापि तु॥ अति शयानतसंगसाध्यपुण्यस्य॥ हेरंब० १७

ज्ञानात्पुण्यं क्षीयते न वेति पूर्ववत्संदेहे ज्ञानं न पुण्यनाशकं शास्त्रीयत्वात्पुण्यवदित्यधिकाशंकामुक्त्वातिदेशं व्याचष्टे धर्मस्येत्यादिना ज्ञानं पुण्य
नाशकं तत्फलाविद्याघातित्वादिति न्यायोपि तागमबाधितमनुमानमिति भावः मनु क्षीयंते चेत्सविशेषश्रुतिः पापविषया सर्वपाप्मानं तरतीति

धर्मस्य पुनः शास्त्रीयत्वाच्छास्त्रीयेण ज्ञानेनाविरोध इत्याशंक्य तन्निराकरणाय पूर्वाधिकरणन्यायातिदेशः क्रियते इतरस्यापि
पुण्यस्य कर्मणः एवं अघवद् श्लेषो विनाशश्च ज्ञानवतो भवतः कुतः तस्यापि स्वफलहेतुत्वेन ज्ञानफलप्रतिबंधित्वप्रसंगा
त् उभे उ हैवैष एते तरतीत्यादिश्रुतिषु च दुष्कृतवत्सुकृतस्यापि प्रणाशव्यपदेशात् अकर्त्रात्मत्वबोधनिमित्तस्य च कर्मक्षयस्य
सुकृतदुष्कृतयोस्तुल्यत्वात् क्षीयंते चास्य कर्माणीति चाविशेषश्रुतिः यत्रापि केवल एव पाप्मशब्दः पठ्यते तत्रापि तेनैव पु
ण्यमप्याकलितमिति द्रष्टव्यं ज्ञानफलापेक्षया निकृष्टफलत्वात्॥ अस्ति तु श्रुतौ पुण्येपि पाप्मशब्दः नैनं सेतुमहोरात्रे
तरत इत्यत्र सह दुःकृतेन सुकृतमप्यनुक्रम्य सर्वे पाप्मानोतो निवर्त्तंते इत्यविशेषेणैव प्रकृतेषु पुण्येषु पाप्मशब्दप्रयोगात् पा
ते त्विति तु शब्दोवधारणार्थः एवं धर्माधर्मयोर्बंधहेत्वोर्विद्यासामर्थ्यादश्लेषविनाशसिद्धेरवश्यंभाविनी विदुषः शरीरपा
ते मुक्तिरित्यवधारयति॥१६२॥ अनिदंशाधि० अनारब्धकार्ये एव तु पूर्वे तदवधेः॥

विशेषश्रुतेरित्युक्तं आह यत्रापि केवल इति॥ पापपुण्यक्षयपराधिकरणद्वयस्य फलमाह पाते त्विति॥ अनारब्धकार्ये एव तु॥ ॥

उक्तकर्मक्षयं विषयीकृत्य ख्याप्यंते चेत्तथापि शेषश्रुतेस्तस्य तावदेव चिरमिति श्रुतेश्च संशयमाह पूर्वयोरिति जीवन्मुक्त्यसिद्धिरस्ति सिद्धिश्चेल्लभ्यत्र फलं॥
पूर्वसिद्धांतमन्यायेन पूर्वपक्षप्राप्तौ उक्तौ। सर्गतः कर्मक्षतिः प्रारब्धाम कर्मविषये संपवादं सिद्धांतयसेवमिति सामि शब्दो ध्वंसवाचकः प्रारब्धाधावन्न
विमुच्यते तावानेव विलंबः तन्मोक्षे ब्रह्म संपद्यत इति श्रुत्यर्थः देहपातावधिलिंगात् तत्त्वविदां याज्ञवल्क्यादीनां देहधारणश्रुतिस्मृतिलिंगाच्च प्रारब्ध
पूर्वयोराधि[illegible]करणयोर्ज्ञाननिमित्तः सुकृतदुष्कृतयोर्विनाशो व्यधायि तेनः सकिमविशेषेणारब्धकार्ययोरनारब्धकार्ययोश्च भवति उत
विशेषेणानारब्धकार्ययोरेवेति विचार्यते तत्र उ भेउ त्ववैषएते नरतो सेवमादिश्रुतिष्वविशेषश्रवणाद् विशेषेणो वक्षयइति एवं प्राप्ते प्र
त्याहअनारब्धकार्य एव लिति अप्रवृत्तफले एव पूर्वजन्मांतरसंचिते अस्मिन्नपि च जन्मनि प्राक् ज्ञानोत्पत्तेः संचिते सुकृतदुष्कृते ज्ञानाधिग
मात्क्षीयेते न त्वारब्धकार्ये सामिभुक्तफले याभ्यामेतत् ब्रह्मज्ञानायतनं जन्म निर्मितं कुत एतत्तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्य इति
शरीरपातावधिकरणात् क्षेमप्राप्तेः। इतरथा हि ज्ञानादशेषकर्मक्षये सति स्थितिहेत्वभावाज्ज्ञानप्राप्त्यनंतरमेव क्षेममश्नुवीत तत्र शरी
र[illegible]तयात प्रतीक्षीना च क्षीतननुव कर्मव लेने वा यम कर्तत्वावबोधः कर्माणि क्षपयन्न कथं कानिचित्क्षपयेत् कानिचिदुपेक्षेत न हि समाने
ग्निबीजसंपर्के केषांचिद्बीजशक्तिः क्षीयते केषांचिन्न क्षीयत इति शक्यमंगीकर्तुमिति उच्यते न तावदनाश्रित्यारब्धकार्यं कर्माशयं ज्ञानो
त्पत्तिरुपपद्यते आश्रिते च तस्मिन् कुलालचक्रवत्प्रवृत्तवेगस्यांतराले प्रतिबंधासंभवात् भवति वेगक्षयप्रतिपालनं अकर्त्रात्मावबोधोपि
हि मिथ्याज्ञानबाधनेन कर्माण्युच्छिनत्ति बाधितमपि तु मिथ्याज्ञानं द्विचंद्रज्ञानवत्संस्कारवशात्कंचित्कालमनुवर्तत एव॥ ॥ ॥
कर्मणस्तत्त्वज्ञानं प्रति हेतुत्वेनोपजीव्यत्वाद्वा बाल्पसिद्धोरत्नमतिबध्यं तत्त्वज्ञानं तत्सिध्यर्थं अविद्यांशं विक्षेपशक्त्या स्वं विहाय आवरकाविद्यांशं नाशय हि भा ४ उच्यते ननावद् इति विक्षेपकाविद्या अज्ञानावस्य संस्कारः॥

शिष्याप्रति जीवन्मुक्तौ स्वानुभवमाहापि चैवैवेति ॥ अग्निहोत्रादि तु नित्यनैमित्तिकं च मंज्ञानान्नश्यति न वेति संदेहे उभे पुण्यपापे तरतीति सविशेषश्रुतेर्न
श्यतीत्याशंक्येतरस्याविद्वत्कृतस्यातिदेशस्य नित्यातिरिक्तकाम्यपुण्यविषयत्वेनात्रापवादं सिद्धांतयति । पुण्यस्येत्यादिना अत्र पूर्वपक्षेत्तानार्थमिति सा

अपि च नैवात्र विवदितव्यं ब्रह्मविदः कंचित्कालं शरीरं ध्रियते न ध्रियत इति कथं ह्येकस्य स्वहृदयप्रत्ययं ब्रह्मवेदनं देहधारणं चापरेण
प्रतिक्षेप्तुं शक्येत श्रुतिस्मृतिषु च स्थितप्रज्ञलक्षणनिर्देशेनैतदेव निरूच्यते तस्मादनारब्धकार्ययोरेव सुकृतदुःकृतयोर्विद्यासा
मर्थ्यात्क्षय इति निर्णयः ॥१६३॥ अनारब्धकार्याधिकं० अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात् । पुण्यस्याप्यश्लेषविनाश
योरघस्येवातिदिष्टः सोऽतिदेशः सर्वपुण्यविषय इत्याशंक्य प्रतिवक्ति अग्निहोत्रादित्ति तु शब्द आशंकामपनुदति यन्नित्यं क
र्म वैदिकमग्निहोत्रादि तत्कार्यायैव भवति । ज्ञानस्य यत्कार्यं तदेवास्यापि कार्यमित्यर्थः कुतः तमेतं वेदानुवचनेन ब्राह्मणा वि
विदिषन्ति यज्ञेनेत्यादिदर्शनात् ननु ज्ञानकर्मणोर्विलक्षणकार्यत्वात्कार्यैकत्वानुपपत्तिः ॥ नैष दोषः ज्वरमरणकार्ययोरपि दधि
विषयोर्गुडमंत्रसंयुक्तयोस्तृप्तिपुष्टिकार्यदर्शनात् तद्वत्कर्मणोऽपि ज्ञानसंयुक्तस्य मोक्षकार्योपपत्तेः ननु अनारभ्यो मोक्षः कथमस्य क
र्मकार्यत्वमुच्यते नैष दोषः आरादुपकारकत्वात्कर्मणः ज्ञानस्यैव हि प्रापकं सत्कर्म प्रणाड्या मोक्षकारणमित्युपचर्यते ॥ ॥ ॥

यनुष्ठानाभिसंधिपूर्वकस्याल्पत्वान्नायायात्सिद्धांते तु ज्ञानोत्पत्त्यर्थत्वात्तत्सिद्धिरिति विवेकं अत्र भाष्ये ज्ञानकर्मणोः साक्षादेककार्यत्वं परमतेनोक्तं साक्षात्पारंपर्याभ्यां मोक्षहेतुत्वं स्यमलमुक्तिसिद्धिमितिमतं ॥

शा·सू०
१६

अतएवेति। तानाहूर्ध्वकर्माभावात्पूर्वकर्मविषयमित्यर्थः निर्गुणविद्यायाः कर्मसाहित्यं संस्त्विं प्रतिभोजनस्य लांगलेनेव दर्शितं प्रतिसंगुणविद्यापरत्वेन सूत्रस्यांजस्यमाह॥

अत एव चातिक्रांतविषयमेतत्कार्यैकत्वाभिधानं नहि ब्रह्मविद आगाम्यग्निहोत्रादि संभवति अनियोज्यब्रह्मात्मत्वप्रतिपत्तेः शास्त्रस्याविषयत्वा त्सगुणासु तु विद्यासु कर्मकर्तृत्वानतिवृत्तेः संभवत्यागाम्यग्निहोत्रादि तस्यापि निरभिसंधिनः कार्यांतराभावाद्विद्यासंगत्युपपत्तिः किंविषयं पुनरिदमश्लेषविनाशवचनं किंविषयं चादो विनियोगवचनं एके शाखिनां तस्य पुत्रा दायमुपयंति सुहृदः साधुकृत्यां द्विषंतः पापकृत्यामिति अत उत्तरं पठति। अतोन्यापि ह्येकेषामुभयोः॥ अतोग्निहोत्रादेर्नित्यात्कर्मणोन्यापि ह्यस्ति साधुकृत्या या फलमभिसंधाय क्रियते। तस्या एष विनियोग उक्त एकेषां शाखिनां सुहृदः साधुकृत्यामुपयंतीति तस्या एव चेदमघवदश्लेषविनाशनिरूपणं इतरस्याप्येवमश्लेषयदृनितथाजातीयकस्य काम्यस्य कर्मणो विद्वांसं प्रत्यनुपकारकत्वे संप्रतिपत्तिरुभयोरपि जैमिनिबादरायणयोराचार्ययोः॥१७॥ अग्निहोत्राधिकरणं॥ यदेव विद्ययेति हि॥ समधिगतमेतदनंतराधिकरणे नित्यमग्निहोत्रादिकं कर्म मुमुक्षुणा मोक्षप्रयोजनोद्देशेन कृतमुपात्तदुरितक्षयहेतुत्वद्वारेण सत्त्वशुद्धिकारणतां प्रतिपद्यमानं मोक्षप्रयोजनब्रह्माधिगमनिमित्तत्वेन ब्रह्मविद्यया सहैककार्यं भवतीति तत्राग्निहोत्रादि कर्मांगव्यपाश्रयविद्यासंयुक्तं केवलं चास्ति य एवं विद्वान्यजति य एवं विद्वाञ्जुहोति य एवं विद्वाञ्छंसति य एवं विद्वानागायति तस्मादेवंविदमेव ब्रह्माणं कुर्वीत तेनोभौ कुरुतो यश्चैतदेवं वेद यश्च न वेदेत्यादि वचनेभ्यो विद्यासंयुक्तमस्ति केवलमप्यस्ति तत्रेदं विचार्यते किं विद्यासंयुक्तमेवाग्निहोत्रादिकं कर्म मुमुक्षोर्विद्याहेतुत्वेन तया सहैककार्यत्वं प्रतिपद्यते न केवलं उत विद्यासंयुक्तं केवलं वाविशेषेणेति कुतः संशयः तमेतमात्मानं यज्ञेन विविदिषंतीति यज्ञादीनामविशेषेण आत्मवेदनांगत्वेन श्रवणात् विद्यासंयुक्तस्य चाग्निहोत्रादेर्विशिष्टत्वावगमात् किं तावत्प्राप्तं॥ ॥॥

सगुणाविति उत्तरसूत्रार्थं गृह्णाति किमित्यादिना यस्मादध्वादन्यकाम्यं पुण्यं पापं च तद्वेदविद् न सुहृद्विषतोः स्वसमानजातीयं कर्म जनयति स्वयं च तानान्प्यतीति भावः॥ यदेव विद्ययेति हि॥॥

हरेवं०
१६

उक्तं नित्यादिकं विषयमुपन्यस्य बीजं संशयमुक्त्वा पूर्वपक्षमाह विद्यासंयुक्तमेवेति। पूर्वपक्षे कर्मांगोपास्तिहीनकर्मणो ज्ञानार्थत्वासिद्धिः सिद्धांते तु
सिद्धिरिति भेदः। भवतु विद्याविशिष्टस्य कर्मणो ज्ञानं प्रति शीघ्रकारित्वात् स्वतः कश्चिदतिशयो विद्यासामर्थ्यात् न तावता केवलस्य वैयर्थ्यं विविदिषाश्रुतिवि
विद्यासंयुक्तमेव कर्माग्निहोत्राद्यात्मविद्याशेषत्वं प्रतिपद्यते न विद्याहीनं विद्योपेतस्य विशिष्टत्वावगमाद्विद्याविहीनात् यदहरेव जुहोति तदहः पुन
र्मृत्युमपजयत्येवं विद्वानित्यादिश्रुतिभ्यः बुद्ध्या युक्तो यया पार्थ कर्मबंधं प्रहास्यसि दूरेण ह्यवरं कर्म बुद्धियोगाद्धनंजयेत्यादिस्मृतिभ्यश्चेति एवं
प्राप्ते प्रतिपद्यते यदेव विद्ययेति सत्यमेतत्। विद्यासंयुक्तं कर्माग्निहोत्रादिकं विद्याहीनात्कर्मणोऽग्निहोत्रादेर्विशिष्टं विद्वानिव ब्राह्मणो विद्याहीनात्
ब्राह्मणात्। तथापि नात्यंतमनपेक्षं विद्याविहीनं कर्माग्निहोत्रादिकं कस्मात् तमेतमात्मानं यज्ञेन विविदिषंतीत्यविशेषेणाग्निहोत्रादेर्विद्याहेतुत्वेन श्रुत
त्वात्। ननु विद्यासंयुक्तस्याग्निहोत्रादेर्विद्याविहीनाद्विशिष्टत्वावगमाद्विद्याविहीनमग्निहोत्राद्यात्मविद्याहेतुत्वेनानपेक्ष्यमिति युक्तं। नैतदेवं विद्या
सहायस्याग्निहोत्रादेर्विद्यानिमित्तेन सामर्थ्यातिशयेन योगादात्मज्ञानं प्रति कश्चित्कारणत्वातिशयो भविष्यति न तथा विद्याहीनस्येति
युक्तं कल्पयितुं न तु यज्ञेनेति विविदिषंतीत्यविशेषेणात्मज्ञानांगत्वेन श्रुतस्याग्निहोत्रादेरनंगत्वं शक्यमभ्युपगंतुं तथा हि श्रुतिर्द्वयोर्विद्यया
करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवतीति विद्यासंयुक्तस्य कर्मणोऽग्निहोत्रादेर्वीर्यवत्तरत्वाभिधानेन स्वकार्यं प्रति कंचिदतिश
कं पुनः पूर्वपक्षमाशंक्यायं सिद्धांतः प्रतिष्ठापितः कार्यं बादरिरित्यादिनेति॥ स इदानीं सूत्रैरेवोपप्रदर्श्यते॥ परं जैमिनिर्मुख्यत्वात्॥ जै
मिनिराचार्यः स एतान्ब्रह्म गमयतीत्यत्र परमेव ब्रह्म प्रापयतीति मन्यते॥ कुतः मुख्यत्वात्। परं हि ब्रह्म ब्रह्मशब्दस्य मुख्यमालंबनं॥ गौ
णमपरं मुख्यगौणयोश्च मुख्ये संप्रत्ययो भवति॥ ॥ दर्शनाच्च॥ ॥ तयोर्ध्वमायन्नमृतत्वमेतीति च गतिपूर्वकममृतत्वं दर्शयति। अमृत
त्वं च परस्मिन्ब्रह्मण्युपपद्यते न कार्ये विनाशित्वात्कार्यस्य अथ यत्रान्यत्पश्यति तदल्पं तन्मर्त्यमिति श्रुतिवचनात् परविषयैव चेयं गतिः कठ
वल्लीषु पठ्यते न हि तत्र विद्यांतरप्रक्रमोस्ति अन्यत्र धर्मादिति परस्यैव ब्रह्मणः प्रक्रांतत्वादिति। न च कार्ये प्रतिपत्त्यभिसंधिः। अपि च प्रजापतेः
सभां वेश्म प्रपद्य इति नायं कार्यविषयः प्रतिपत्त्यभिसंधिः नामरूपयोर्निर्वहिता ते यदंतरा तद्ब्रह्मेति कार्यविलक्षणस्य परस्यैव ब्रह्म
णः प्रकृतत्वात् यशोहं भवामि ब्राह्मणानामिति सर्वात्मत्वेनोपक्रमात् न तस्य प्रतिमा अस्ति यस्य नाम महद्यश इति च परस्यैव ब्रह्मणो य
शो नाम संप्रसिद्धिः॥ ॥

मिति शंकां निरस्यति न च कार्य इति॥ परस्य प्रकृतत्वात् यशः पदस्य परमात्मनाम संप्रतिध्याय यशः पदेनात्मोक्तेः
यश आत्मा ब्राह्मणानामहं भवामीति तथा श्रोतरि यशो विशां यश इति सर्वात्म्यलिंगाद्वा परप्राप्तिसंकल्प एवायमभिसंधिः॥ ॥ ॥ श्री॥

शा·भू० अंतःवेशप्रतिपत्तीच्छा परब्रह्मविषया तथापि सा कथं गतिपूर्विका स्यादित्यत आह सभेति तत्रेत्र ब्रह्मलोके विद्याहानैरपराजिता पूरस्ति ब्रह्मणो हिरण्मयग
र्भस्य तेनैव प्रभुणा विमितं निर्मितं हिरण्मयं वेश्म। तत्प्रतिपद्यते विद्वानिति तु हार्दविद्यायां गतिपूर्विका वेश्मप्राप्तिरुक्ता तेन परब्रह्म एवमपि वेश्मप्र
२१ तिपत्तिशब्दमात्रान्नाद्गतिपूर्वकत्वं तस्याः सिध्यतीत्यर्थः किंच पदगताविति धातुपाठात्तद्वेश्मप्रपद्ये इत्यत्र मार्गापेक्षाभाती साहपदर्शयीति

सभां वेश्मप्रतिपत्तिः गतिपूर्विका या हार्दविद्यायामुदिता तदपराजिता पूर्ब्रह्मणः प्रभुविमितं हिरण्मयं वेश्म इत्यपदेरपि च गत्यर्थत्वा
न्मार्गापेक्षतावसीयते तस्मात्परब्रह्मविषया गतिश्रुतयः इति पक्षान्तरं तावेतौ द्वौ पक्षावाचार्येण सूत्रितौ गत्युपपत्तेरादि
य: भिरेको मुख्यत्वादिभिरपरः तत्र गत्युपपत्तेः प्रभवन्ति मुख्यत्वादीनामाभासत्वं न तु मुख्यत्वादयो गत्युपपत्त्यादीनि इत्साध्य
एवाद्य सिद्धान्तो व्याख्यातो द्वितीयः पूर्वपक्षः न ह्यसत्यपि संभवे मुख्यस्यैवार्थस्य ग्रहणमिति कार्याद्वादरा पयितादिघते॥ ॥

वं पक्षमुपसंहरति तस्मादिति। आद्य एव सिद्धांतपक्ष इति हृदीकर्तुमुपक्रमते ताविति ब्रह्मशब्दमुख्यत्वादिहेतूनामाभासत्वं स्फुटयति नहीति। गंतव्य
त्वब्रह्मलोकेपि तिब कुवचनादेः संकल्पादेव गंधादिदिव्यभोगश्रुतेश्च परब्रह्म एव संभवान्मुख्यार्थासंगतस्य थे: यद्यपि तत्र द्वैससकामपरं चापरं च ब्रह्मे
ति श्रुतिषु प्रयोगसाम्याद्ब्रह्मशब्दः उभयत्र रूढतया मुख्य एव तथापि पूर्णे परस्मिन्नेव पदार्थस्य निरतिशयमहत्त्वस्य लाभाद्परब्रह्मण एव मुख्यत्वं संगच्छते हूरंब० २१

यदुक्तं कठवल्लीषु प्रकरणावलोकनात्तेः परविषयेति तत्राह यद्यपीति। यथा विद्यासंबद्धसूत्रेषु व्याख्यास्यमानतत्संबद्धनाअंतरकीर्तनं तथा परविद्याव्याख्यास-
न्नसमर्थेतत्प्रकरणेप्यपरविद्याश्रयगतिकीर्तनं युज्यते गतिं विना हि परविद्यानिरतिशयफला तस्मात्त्वपरविद्याफलं गतिसाध्यमत

परविद्याप्रकरणे तद्वक्तुमर्थं विद्यांतराश्रयगत्यनुकीर्तनमुपपद्यते विद्वगम्या उत्क्रमणे भवंतीतिवत् प्रजापतेः सभां वेश्म प्रपद्य इ-
ति तु पूर्ववाक्यविच्छेदे नकार्यविप्रतिपत्तिसंधिर्न विरुध्यते सगुणोपि च ब्रह्मणि सर्वात्मत्वसंकीर्तनं सर्वकर्मा सर्वकामः सर्वगंध इत्यादिवदवकल्प-
ते।। तस्मादपरविषया एव गतिश्रुतयः केचित्तु नः पूर्वोक्तिपूर्वपक्षसूत्राणि भवंतु नराणि केचिद्दं तस्रजालीसेनां सर्व स्थामनुरुध्य-
मानाः परविषया एव गतिश्रुतीरुपनिष्ठापयंति।। तदनुपपन्नं गंतव्यत्वानुपपत्तेर्ब्रह्मणः यत्सर्वगतं सर्वांतरं सर्वात्मकं च परं ब्र-
ह्म आकाशवत्सर्वगतश्च नित्य इति सोपलम्बात्परोक्षाद्ब्रह्मय आत्मा सर्वांतर आत्मैवेदं सर्वं ब्रह्मैवेदं विश्वमिदं वरिष्ठमित्यादिश्रुतिभ्यः
निर्धारितविशेषं तस्य तानकदाचिदप्युपपद्यते न हि गतमेव गम्यते। अन्योऽहमन्यं गच्छतीति। सिद्धं लोके।। ।। ।।

गंतव्य

भवतीति स्कृतिलाभादिस्यर्थः यद्यप्युक्तं प्राप्तिसंकल्पोपि प्रवृत्तपरविषय इति तत्रेत्याह प्रजापतेरिति प्रजापतिसभावेश्मश्रुतिमिलत्संधा-
लकवाक्ये नच प्रकरणं बाध्यं यशोहमिति सर्वात्मत्वरूपासनार्थमपरब्रह्मण्यपि युज्यत इत्यर्थः स्वपक्षमुक्त्वा परमतं दूषयति केचिदित्यादिना।। ।।

शा·भा० सर्वगतस्य स्वात्मभूतस्यापि ब्रह्मणः संसारदेशाद्देशान्तरे प्राप्तत्कालात्कालान्तरेण विशिष्टतया गन्तव्यत्वं स्यादिति पृथिवीवयोदृष्टान्ताभ्यां शंकते न
न्विति॥ पक्षेऽपि नैव प्राप्तिगमनमन्यत्वे अवस्थान्तद्वयोरभेदात्स्वात्मभूतत्वेन नतु पुनः भूवयसोः प्राप्त्योरपि देशान्तरकालान्तरविशिष्टत्वेन गन्तव्यत्वं त
३२ योर्गतमभिन्नत्वाद्ब्रह्मणस्तु गन्तृभिन्नस्य कथं गन्तव्यत्वं तत्राह सर्वशक्तीति यथाप्राप्ताभूः स्थानगन्तव्या पञ्चगन्तव्यं देशान्तरं तत्प्राप्तमिति कुतश्चा

ननु लोके गतस्यापि गन्तव्यता देशान्तरविशिष्टस्य दृष्टा यथा पृथिवीस्थ एव पृथिवीं देशान्तरद्वारेण गच्छति तथानन्यत्वेऽपि बालस्य कालान्तरविशिष्टं वार्धकं स्वात्मभूतमेव गन्तव्यं दृष्टं तद्वद्ब्रह्मणोऽपि सर्वशक्त्युपेतत्वात्कथंचिद्गन्तव्यता स्यादिति॥ न प्रतिषिद्धसर्वविशेषत्वाद्ब्रह्मणः निष्कलं निष्क्रियं शान्तं निरवद्यं निरंजनं अस्थूलमनण्वह्रस्वमदीर्घं सबाह्याभ्यन्तरो ह्यजः स वा एष महानज आत्मा ऽजरोऽमरोऽमृतोऽभयो ब्रह्म स एष नेति नेत्यादिश्रुतिस्मृतिन्यायेभ्यो न देशकालादिविशेषयोगः परमात्मनि कल्पयितुं शक्यते ये न भूप्रदेशवयोऽवस्थान्यायेनास्य गन्तव्यता स्यात् भूवयसोस्तु प्रदेशावस्थादिविशेषयोगादुपपद्यते देशकालविशिष्टा गन्तव्यता॥

तस्य गन्तव्यता वयसोऽपि कालान्तरेऽभिव्यक्तिमात्रेण गन्तव्यत्वमिति वस्तुगतिः अंगीकृत्य विशिष्टभूवयसोर्गन्तव्यतां परब्रह्मणो देशकालवै हेरंब०
शिष्ट्याभावान्न कथंचिदपि गन्तव्यत्वे साह नेत्यादिना अनादिमत्परं ब्रह्मेत्यादिस्मृतिः दृश्यविशेषस्य दृशिकल्पितत्वाद् आत्मनो निर्विशेषत्वेति न्यायः॥ ३२

समुपासिष्व ब्रह्म सत्यज्ञानात्मापेक्षया परं गन्तव्यं निर्विशेषं न तु नानास्येवेति शंकते जगदुत्पत्तीति किं निर्विशेषस्य सत्त्वे मानाभावात् सविशेषश्रुतिविरोधा
च्चानाद्यश्चाह॥ नेति छिन्नीयं शंकते उत्पत्त्यादीति सविशेषश्रुतीनां निर्विशेषश्रुतिशेषत्वान्न विरोध इत्याह नेति निर्विशेषश्रुतीनामेव

जगदुत्पत्तिस्थितिप्रलयहेतुत्वश्रुतेरनेकशक्तित्वं ब्रह्मण इति चेन्न विशेषनिराकरणश्रुतीनामनन्यार्थत्वादुत्पत्त्यादिश्रुतीनामपि समानम
नन्यार्थत्वमिति चेन्न तासामेकत्वप्रतिपादनपरत्वान्मृदादिदृष्टान्तैर्हि सतो ब्रह्मण एकस्य सत्यत्वं विकारस्य चानृतत्वं प्रतिपादयिष्य
न्नो सत्यादिपरं भवितुमर्हतीति कस्मात्पुनरुत्पत्त्यादिश्रुतीनां विशेषनिराकरणश्रुतिशेषत्वं न पुनरितरश्रुतीनामितरशेषत्वमितरासामि
तिउच्यते॥ विशेषनिराकरणश्रुतीनां निराकांक्षार्थत्वात्॥ नह्यात्मन एकत्वे नित्यशुद्धबुद्धमुक्ते ज्ञाते सर्वो भूयः काचिदाकां
क्षोपजायते॥ पुरुषार्थसमाप्तिबुद्ध्युपपत्तेः तत्र को मोहः कः शोक एकत्वमनुपश्यतः अभयं वै जनक प्राप्तोऽसि विद्वान्न बिभेति कुतश्च
नएतं ह वाव न तपति किमहं साधु नाकरवं इत्यादिश्रुतिभ्यः तथैव च विदुषां तुष्ट्यनुभवादिदर्शनाद्विकारानृताभिसंधप्रवादाच्च
मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यतीति॥ अतो न विशेषनिराकरणश्रुतीनामन्यशेषत्वमवगन्तुं शक्यं नैवमुत्पत्त्यादिश्रुतीनां निराकांक्षा
र्थप्रतिपादनसामर्थ्यमस्ति॥ ॥

सविशेषश्रुतिशेषत्वं किं न स्यादित्याह कस्मादिति तासां स्वार्थफलवत्त्वेन निराकांक्षत्वात् शेषिता विशेषश्रु
तीनां तु फलवत्त्वाभावे ध्यविशेषसमर्पणादिद्वारेण शेषत्वं फलवत्सन्निधावफलं तदंगमिति न्यायादित्याह उच्यत इत्यादिना॥ ॥ ॥

शा.भा. न केवलं मायाच्छेदकता किंतु श्रुतेरपि साह प्रसक्तं चेति। तत्र मूलकारणे ब्रह्मण्येव तन्तुशृंगं नाम दाहात्मकं कार्यं सुसन्निमित्तं पश्यतेनेन शृंगेन सन्मूलमन्विच्छेत्
प्रसंहारे सत एव दृष्टत्वमुक्तं छांदोग्ये तथा तैत्तिरीये यतोपि जगज्जन्माद्यनुवादेन ब्रह्मण एव तेषां लेदर्शितमतः स्वश्रुतीनां श्रुतेर्वृत्तिविशेषधीश्
३३ पधीश्च ब्रह्मा मातीसर्पः एवं ब्रह्मणो निर्विशेषत्वान्नगं नष्टं तेति फलितमाह एवमिति स्पष्टं निषेधाच्च परस्य नगे तत्त्वे साह न तस्येति एवं गते व्या

पसक्तं तुल्यता सामान्यार्थत्वं समनुगम्यते॥ तथाहि तत्रैतच्छुंगमुत्पतितं सोम्य विजानीहि नेदममूलं भविष्यतीत्युपन्यस्य दर्शितं सत एवैकस्यानुगामू
लस्य विज्ञेयत्वं दर्शयति यतो वा इमानि भूतानि जायंते येन जातानि जीवंति यत्प्रयंत्यभिसंविशंति तद्विजिज्ञासस्व तद्ब्रह्मेति च॥ एवमुक्तस्यादि
श्रुतीनामैकात्म्यावगमपरत्वान्नानेकशक्तियोगो ब्रह्मणो तद्विभागत्वप्रत्यानुपपत्तिः न तस्य प्राणा उत्क्रामंति ब्रह्मैव सन्ब्रह्माप्येतीति च
पर इति न ब्रह्मणि गतिं निवारयति न ह्यारब्धत्वमस्य ध्रुवो हि केषामि सत्र गतिकल्पना योऽयं गंता जीवो गंतव्यस्य ब्रह्मणोऽवयवो विका
रोऽन्यो वा ततः स्यात् असंततादात्म्येगमनानुपपत्तेः यद्येवं ततः किं स्यादुत उच्यते यद्येकदेशस्तेनैकदेशिनो नित्यप्राप्तत्वान्न पुनर्ब्रह्म
गमनमुपपद्यते एकदेशित्वकल्पना च ब्रह्मण्यनुपपन्ना निरवयवत्वप्रसिद्धेः विकारपक्षेप्येतन्तुल्यं विकारेणापि विकारिणो नित्यप्राप्त
त्वात् न हि घटो मृदात्मतां परित्यज्यावतिष्ठते परित्यागे चाभावप्राप्तेः॥

लोचनपागतिं भिरस्यगे त्वालोचनयापि निरस्यति गतिकल्पनायां चे
त्यादिना भेदाभेदे नद्यौ कल्पावसंतनभेदस्तृतीयः कल्पः न च संतामेदकल्पः किमिति नोक्तस्तत्राह असंतेति कल्पनयोः किं दूषणमिति पृच्छति॥ यद्येवमिति॥ हेरंब०
३२

कल्पद्वयेपि दोषांतरमाह। त्रिकारस्य यव पक्षयोर्ध्वेति विकारावयववरूपजीवविशिष्टस्य ब्रह्मणः स्थिरत्वात् जीवात्मांगस्यागतीनस्यात् तान्नद्यश्च लातिस्थूल
धापाणस्य यो मंडूकपार्षणवयव योऽश्र लनमस्तीत्यर्थः अस्माकं तु ब्रह्मा नान्कास्तीति मात्मिभिर्गस्यागति विभ्रम इति भावः तत्रापक्षस्य मनूबवि
कल्पद्रूपयसर्थेस्यादिना अभेदश्रुति विरोधरूपो दोषो ममनास्तीति विरोधरूपो दोषो ममनास्तीति भेदाभेदवाध्याहविकारावयवीरितिपित्रयो

विकारावयवपक्षयोश्चात एव लः स्थिरत्वाद्ब्रह्मणः संसारगमनमप्यनेव क्लृप्तं॥ अथात्म एव जीवो ब्रह्मणः सोऽणुर्व्यापी मध्यमपरिमाणो वा भवि
तुमर्हति। व्यापित्वे गमनानुपपत्तिर्मध्यमपरिमाणत्वे चानित्यत्वप्रसंगो ऽणुत्वे कृत्स्नशरीरवेदनानुपपत्तिः प्रसिद्धिदेवचाणुत्वमध्यमपरिमाणत्वे
श्री विस्तरेण पुरस्तात्सरस्मान्त्वे जीवस्य तत्त्वमसीत्यादि शास्त्र बाधप्रसंगः विकारावयवपक्षयोरपि समानोयं दोषः विकारावयवयोस्तद
तो न सत्वाद्दोष एव इति चेन्न मुख्यैकत्वानुपपत्तेः सर्वेषु चैतेषु पक्षेषु अनिर्मोक्षप्रसंगः संसारित्वानिवृत्तेः निवृत्तौ वास्वरूपना नति
शप्रसंगो ब्रह्मात्मत्वानभ्युपगमाच्च यत्तु केचिज्जल्प्यते नित्यानि नैमित्तिकानि कर्माण्यनुष्ठीयंते प्रत्यवायानुत्पत्तिकाम्यानि प्रतिषि पपत
द्धानि च परिहृत्य वर्तते स्वर्गनरकानवाप्तये साम्प्रतदेहोपभोग्यानि कर्माण्युपभोगेनैव क्षपयंत इत्यतो वर्तमानदेहपाताद्ध्वं देहांतर
प्रतिसंधानकारणाभावात् स्वरूपावस्थान लक्षणं कैवल्यं विनापि ब्रह्मात्मतया एवं वर्तमानस्य सेत्स्यतीति॥ ॥ ॥ ॥

रभेदोमुख्योनयुक्तः विरोधादिति परिहरति नेति किं च पक्षत्रयमप्युक्तं संसारित्वस्य नात्विक जीवभावस्य नाशे जीवस्वरूपनाश प्रसंगात् त
न चास्माभिरिव तथा ब्रह्मात्मत्वं जीवस्य तात्त्विकरूपमंगीकृतं यद्रूपस्य संसारनाशोपि नेनश्येदित्याह। सर्वेष्विति। ननु किं ब्रह्मत्वेन संसा
राभावः किन्तु मोक्षः सच कर्माभावमात्रे प्रासेस्यात् तो निष्कर्म जडानां मत मुद्राव्य निरस्यति॥ नित्यानीत्यादिना॥ ॥ ॥ ॥ ॥

शा॰ सू॰ ३४

तदिति एवं वृत्तं मोक्षहेतुरिति स्थिते मानाभावादित्यर्थः तर्क एवमानमित्यत आह न चेत्तत्र तर्कयितुमिति ननु तत्वाद्येतत्तर्कमात्रमेकस्मिन् जन्मन्य
नेकविरुद्धफलानां कर्मणां भोगायोगादस्त्यवशिष्टं कर्म जन्मांतरस्य निमित्तमित्याशंक्य तत्र मानमाह कर्मशेषसद्भावसिद्धेरिति तं तन्नारब्धफ
तरस्यमानाभावात् न चैतल्लोकेन विज्ञातुं चादिलं मोक्षार्थी स्वयं समाचरेदिति स्वमनीषिकया तेन तर्कितैः यस्मात् कर्मनिमित्तः संसा
रस्तस्मान्निमित्ताभावान्न भविष्यतीति। न चैतत्तर्कयितुं शक्यते निमित्ताभावस्य दुर्ज्ञानत्वात् बहूनि कर्माणि जन्मांतरसंचितानि इष्टानिष्ट
विपाकान्येकैकस्य जंतोः संभाव्यंते तेषां विरुद्धफलानां युगपदुपभोगासंभवात् कानिचिल्लब्धावसराणीदं जन्म निर्मिमते कानिचित्तु
देशकालनिमित्तप्रतीक्षाण्यासते इत्यतस्तेषामवशिष्टानां प्रतेनोपभोगेन क्षपणासंभवान्न यथावर्णितचरितस्यापि वर्तमानदे दुष्क
हपाते देहांतरनिमित्ताभावः शक्यते निश्चेतुं कर्मशेषसद्भावसिद्धिश्च तद्य इह रमणीयचरणास्ततः शेषेणेत्यादिश्रुतिस्मृतिभ्यः स्यादे
तत् नित्यनैमित्तिकानि तेषां क्षेपकाणि भविष्यंतीति चेन्न विरोधाभावात् सति हि विरोधे क्षेप्यक्षेपकभावो भवति न च जन्मां ण
तरसंचितानां सुकृतानां नित्यनैमित्तिकै[illegible]रस्ति विरोधः शुद्धिरूपत्वाविशेषात् दुरितानां त्वशुद्धिरूपत्वात्सति विरोधे भवतु क्षपणं
ननु तादेहांतरनिमित्ताभावसिद्धिः सुकृतनिमित्तत्वोपपत्तेः दुश्चरितस्याप्यशेषक्षपणानवगमात्॥ ॥ ॥

त्वात्पुण्यपापानि तेषां निःसाध्यनुष्ठानेन क्षयान्न जन्मांतरमिति शंकते स्यादेतदिति पुण्येन पुण्यस्य न नाशः अविरोधादन्यथा नित्यप्र हरबं॰
संगात् यस्यापि सर्वात्मना पुण्यनाशस्तेनानंतत्वात्तीति संचितपुण्यपापाभ्यां जन्मांतरं दुर्वारमित्याह न त्वेतदिना ॥ ॥॥ ३४

क्रियमाणानित्यादिनापिजन्मस्यात्कर्मणापितल्लोक इत्यविशेषश्रुतेः स्मृतेश्चेत्याह नचनित्येति प्रत्यवायनिरासार्थं निसाद्याचारेसत्यनुष्ठा
ष्ठानस्कृत्तांतरेष्वपधनइत्यत्रदृष्टांतमाह यथेति निमित्ते प्राप्ते विहितेसर्वोप्यर्थः तथापिकाम्यादिकर्मसत्त्वानिश्चयोनास्तीत्याह संशयीतेत्यलिवितित्यानेविनाऽदेहपा
तमोक्षएवेतिनिश्चयलाभात्तत्वक्षायं तिरितिभावः भ्रमभिन्नस्यजीवस्यकर्तृत्वादिस्वभावस्यमोक्षाशापिनयुक्तेत्याह नचेतिकर्तृत्वादिरूपंकार्यंन
भि

नचनित्यनैमित्तिकानुष्ठानात्प्रत्यवायानुत्पत्तिमात्रं नतुपुनःफलांतरोत्पत्तिरितिप्रमाणमस्तिफलांतरस्याप्यनुनिषादिदिनसंभवात्स्मरविल्लापल
वः तद्यथाम्रेनिमित्तेफलार्थेछायागंधावनूत्पद्येतेएवंधर्मेचर्यमाणमर्थाअनूत्पद्यंतेइति नचासनिसम्यग्दर्शिनिसर्वात्मनाकाम्यप्रतिषिद्धवर्जनंज्ञमसा
यणांतरत्वेकेनचित्सतिज्ञातुंशक्यंसुनिपुणानामपिसूक्ष्मापराधदर्शनात्स्रशक्यापितव्यंतुभवतितथापिनैमित्तिकाभावस्यदुर्ज्ञानत्वमेवेनैतानभ्युपग
गम्येमाभ्नेज्ञानगम्यैवलातेलेकर्तृत्वभोक्तृत्वस्वभावस्यात्मनःकैवल्यमानंकांक्षितुंशक्यमग्नेरौष्ण्यवत्स्वभावस्यापरिहार्यत्वात्स्यादेतत्कर्तृ
त्वभोक्तृत्वकार्यमनर्थोनतच्छक्तिस्तेनशक्यवस्थानेपिकार्यपरिहारादुपपन्नोमोक्षइतिनन्नशक्तिसद्भावेकार्यप्रवंस्यदुर्निवार्यत्वात्अथापिस्यान्नकेवलाश स
क्तिःकार्यमारभतेअनपेक्ष्यान्यानिनिमित्तानिअतएकाकिनीसाधितानामिनापराध्यतीतितेननननिमित्तानामपिशक्तिलक्षणेनसंबंधेननित्यसंबद्धत्वात्तत्क
र्तृत्वभोक्तृत्वस्वभावेसत्यांविद्यायांगम्यायांनकथंचनमोक्षंप्रत्याशास्तिश्रुतिश्चनान्यःपंथाविद्यतेयनायइतिज्ञानादन्यंमोक्षमार्गंवारयति ॥ ॥
ब्रह्मात्मतायां

स्वभावकिंतुतच्छक्तिरितिशंकतेस्यादेतदितिकार्यगम्याभ्यायाःशक्तेःकार्यस्यात्यंतानुत्पादेसत्त्वस्त्वयुक्तंअतःशक्तिशेसत्त्वेतद्विषयस्यकार्य
स्यादइष्टदेशकालादिनिमित्तानांचात्मनाशक्तिद्वारानित्यसंबद्धत्वान्मोक्षोनस्यादितिपरिहरतितेनेत्यादिना ॥ ॥ ॥ ॥

शा॰सू॰ ३५

मोक्षसिध्यर्थं जीवस्य ब्रह्मत्वांगीकारे संसारानुपपत्तिमाशंक्याज्ञानादुपपत्तिमसकृदुक्तां स्मारयति परस्यादित्यादिना प्रासंगिकं परिहृत्य प्रकृतमुपसंहर

परस्मादनन्योऽपि जीवः सर्वव्यवहारलोपप्रसंगः प्रत्यक्षादिप्रमाणाप्रवृत्तेरिति चेन्न प्राग्बोधात्स्वप्नव्यवहारवत्तदुपपत्तेः शास्त्रं च यत्र हि द्वैतमिव भवति तदि
तर इतरं पश्यतीत्यादिनाप्रबुद्धविषये प्रत्यक्षादिव्यवहारमुक्त्वा पुनः प्रबुद्धविषये यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येदित्यादिना तदभावं दर्शयति तदेवं परब्रह्म
विदो गन्तव्यादिविज्ञानस्य बाधितत्वान्न कथंचन गतिरुपपादयितुं शक्या किंविषयाः पुनर्गतिश्रुतय इत्युच्यते सगुणविद्याविषया भविष्यन्ति तथा हि क्व
चित्पंचाग्निविद्यां प्रकृत्य गतिरुच्यते क्वचित्पर्यंकविद्यां क्वचिद्वैश्वानरविद्यां यत्रापि ब्रह्म प्रकृत्य गतिरुच्यते यथा प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मेति अथ यदिद
मस्मिन्ब्रह्मपुरे दहरं पुंडरीकं वेश्मेति च तत्रापि वामनीत्वादिभिः सत्यकामादिभिश्च गुणैः सगुणस्यैवोपास्यत्वात्संभवति गतिर्न क्वचित्परब्रह्मवि
षया गतिः श्राव्यते यथा गतिप्रतिषेधः श्रावितो न तस्य प्राणा उत्क्रामंतीति ब्रह्मविदाप्नोति परमित्यादिषु तु सत्यप्याप्नोतेर्गत्यर्थत्वे वर्णितेन न्या
येन देशांतरप्राप्त्यसंभवात्स्वरूपप्रतिपत्तिरेवेयमविद्याध्यारोपितनामरूपप्रविलयापेक्षयाभिधीयते ब्रह्मैव सन्ब्रह्माप्येतीत्यादिवदिति
द्रष्टव्यं अपि च परविषया गतिर्व्याख्यायमाना प्ररोचनाय वा स्यादनुचिंतनाय वा तत्र प्ररोचनं तावद्ब्रह्मविदो न गत्युक्त्या क्रियते स्वसं
वेद्येनैवाव्यवहितेन विद्यासमर्पितेन स्वास्थ्येन न तु नित्यसिद्धनिःश्रेयसनिवेदनस्यासाध्यफलस्य विज्ञानस्य गत्यनुचिंतने काचिदपेक्षो
पपद्यते तस्मादपरविषया गतिः तत्र परापरब्रह्मविवेकानवधारणेनापरस्मिन्ब्रह्मणि वर्तमाना गतिश्रुतयः परस्मिन्नध्यारोप्यंते ॥ ॥ ॥

तिनदेवमिति ननु परविद्यायामप्याप्नोतिपदेन गतिः श्रुतेत्यत आह ब्रह्मविदाप्नोतीति निर्देशफलप्राप्त्यर्थं गतेर्न परविषयत्वमित्याह यदि चेत्तिमनुचिंतय
नपक्षं प्रत्याह न च नित्यसिद्धेति कथं तर्हि केचित्परविषयत्वं गतेरुक्तमित्याशंक्य भ्रांतेरित्याह

हरे॰ ३५

प्रश्नपूर्वकं परापरब्रह्मविभागं वदन्न परब्रह्मणि गतेरर्थवत्त्वमाह । किं द्वे इत्यादिना व्यापिनो जीवस्य कथं गतिस्तत्राह सर्वगतत्वेपीति एवं गतस्य

किं द्वे ब्रह्मणी परमपरं चेति बाढं द्वे एतद्वै सत्यकाम परं चापरं च ब्रह्म यदोंकार इत्यादिदर्शनात् । किं पुनः परं ब्रह्म किमपरमित्युच्यते
यत्राविद्याकृतनामरूपादिविशेषप्रतिषेधादस्थूलादिशब्दैर्ब्रह्मोपदिश्यते तत्परं तदेव यत्र नामरूपादिविशेषेण केनचिद्विशिष्ट
मुपासनायोपदिश्यते मनोमयः प्राणशरीरो भारूप इत्यादिशब्दैस्तदपरं नन्वेवमद्वितीयश्रुतिरुपरुध्येत नाविद्याकृतनाम
रूपोपाधिकतया परिहृतत्वात्तस्य त्वपरब्रह्मोपासनस्य तत्सन्निधौ श्रूयमाणं स यदि पितृलोककामो भवतीत्यादि जगदै
श्वर्यलक्षणसंसारगोचरमेव फलं भवत्यनिवर्तितत्वादविद्यायास्तस्य च देशविशेषावबद्धत्वात्तत्प्राप्त्यर्थं गमनमविरुद्धं॥
सर्वगतत्वेपि चात्मन आकाशस्येव घटादिगमने बुद्ध्याद्युपाधिगमने गमनप्रसिद्धिरित्यवादिष्म तद्गुणसारत्वादित्यत्र त
स्मात्कार्यं बादरिरित्येष एव स्थितः पक्षः परं जैमिनिरिति तु पक्षान्तरं प्रतिभामात्रप्रदर्शनेन प्रज्ञाविकाशनायेति द्रष्टव्यं॥
॥ ॥अप्रतीकालंबनान्नयतीति बादरायण उभयथा दोषात्तत्क्रतुश्च॥ स्थितमेतत्कार्यविषया गतिर्नपरविषयेति॥

निरूप्य गंतॄन्निर्धारयति॥ ॥ ॥अप्रतीकालंबनात्॥ ॥ ॥ ॥श्री॥ ॥

र० प्र० स एतान्ब्रह्म गमयतीत्यविशेषश्रुतेस्तत्क्रतुन्यायाच्च संशयमाह इदमिति। अनियमाधिकरणे तत्त्वविद्योऽन्यत्र सर्वोपासकानां मार्गोपसंहार उक्तः ४ इदानीं
मप्रतीकोपासकानामेव मार्गो न सर्वेषां विकारोपासकानामित्युभयथाभावोक्तौ पूर्वोक्तविरोधः स्यात्तस्मादुपासकमात्रस्योत्तरमार्गसिद्धिरिति पूर्वप
३६ क्षफलं सिद्धान्ते तूभयथाभावसिद्धिः अदोषादिति सूत्रे पदच्छेदः अविरोधादित्यर्थः अनियमः सर्वेषामिति सूत्रे सर्वशब्दस्याप्रतीकोपासकान्यपरत्वादिति

इदमिदानीं संदिह्यते किं सर्वान्विकारालंबनानविशेषेणैवामानवः पुरुषः प्रापयति ब्रह्मलोकमुत कांश्चिदेवेति किं तावत्प्राप्तं सर्वेषामेवैषां विदुषामन्यत्र परस्माद्ब्रह्मणो गतिः स्यात्तथा ह्यनियमः सर्वेषामित्यत्राविशेषेणैवैषां विद्यान्तरेष्ववतारित इत्येवं प्राप्ते प्रत्याह अप्रतीकालंबनानिति प्रतीकालंबनान्वर्जयित्वा सर्वानन्यान्विकारालंबनान्नयति ब्रह्मलोकमिति बादरायण आचार्यो मन्यते न ह्येवमुभयथाभावाभ्युपगमे कश्चिद्दोषोऽस्ति अनियमन्यायस्य प्रतीकव्यतिरिक्तेष्वप्युपासनेषूपपत्तेः तत्क्रतुश्चास्योभयथाभावस्य समर्थको हेतुर्द्रष्टव्यः यो हि ब्रह्मक्रतुः स ब्राह्ममैश्वर्यमासीदेदिति तं यथा यथोपासते तदेव भवतीति श्रुतेर्न तु प्रतीकेषु ब्रह्मक्रतुत्वमस्ति प्रतीकप्रधानत्वादुपासनस्य ननु अब्रह्मक्रतुरपि ब्रह्म गच्छतीति श्रूयते यथा पञ्चाग्निविद्यायां स एतान्ब्रह्म गमयतीति भवतु यत्रैवमाहत्यवाद उपलभ्यते तदभावे त्वौत्सर्गिकेण तत्क्रतुन्यायेन ब्रह्मक्रतूनामेव तत्प्राप्तिर्नेतरेषामिति गम्यते॥

भावः यद्यपि प्रतीकध्यायिनां पितृयाणतृतीयस्थानयोरप्रवेशादर्चिरादिमार्गो
वाच्यस्तथापि तेषां विद्युत्पर्यन्तमेव गमनमस्तु न ब्रह्मप्राप्तिर्ब्रह्मक्रतुत्वाभावात् यो यद्ध्यायति स तत्प्राप्नोतीति हि तत्क्रतुन्यायः श्रुतिमूलः प्रतीकेषु
च नामादिषु ध्येयेषु ब्रह्मणो गुणत्वान्न ब्रह्मध्यायित्वमस्ति अस्य च न्यायस्य पञ्चाग्निविद्यायामाहत्यवादात्संकोचवचनाद्बाध इति सूत्रभाष्यार्थः॥ ब्र० सू० ३६

किंच प्रतीकतारतम्येन फलतारतम्यश्रुतेर्न प्रतीकध्यायिनां ब्रह्मप्राप्तिरिति साहाविशेषं चेति तस्मादुक्तविवचने ब्रह्मध्यायिना एव ब्रह्मगंतार इति सिद्धं॥ इ
ति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीगोविंदभगवत्कृतौ भाष्यरत्नप्रभायां चतुर्थाध्यायस्य तृतीयपादः॥ पूर्वपादे ब्रह्मोपासकानां कार्यब्रह्मप्राप्तिरुक्ता।
संप्रति तेषामैश्वर्यविशेषं ब्राह्मलौकिकं पादस्योत्तरार्धेन प्रपंचयिष्यन्नादावभ्यर्हितपरविद्याप्राप्यं निर्विशेषब्रह्मभावमाह। संपद्याविर्भावः स्वेनश

विशेषं च दर्शयति नामादिषु प्रतीकोपासनेषु पूर्वस्मात्पूर्वस्मात्फलविशेषमुत्तरस्मिन्नुपासने दर्शयति यावन्नाम्नो गतं तत्रास्य यथाकामचा
रो भवतीति वाग्वाव नाम्नो भूयसी यावद्वाचो गतं तत्रास्य यथाकामचारो भवतीति। मनो वाव वाचो भूय इत्यादिना च। स चायं फलविशेषः प्र
तीकतंत्रत्वादुपासनानामुपपद्यते ब्रह्मतंत्रत्वे तु ब्रह्मणोऽविशिष्टत्वात्कथं फलविशेषः स्यात् तस्मान्न प्रतीकालंबनानामितरैस्तुल्यफ
लत्वमिति॥ इति श्रीमच्छारीरमीमांसाभाष्ये श्रीमच्छंकरभगवत्पादकृतौ चतुर्थाध्यायस्य तृतीयः पादः॥ संपद्याविर्भावः स्वेन शब्दात्॥१॥
एवमेष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यत इति श्रूयते तत्र संशयः किं देवलोकाद्युपभोग
स्थानेष्विवागंतुकेन केनचिद्विशेषेणाभिनिष्पद्यते आहोस्विदात्ममात्रेणेति किं तावत्प्राप्तं स्थानांतरेष्विवागंतुकेन केनचिद्रूपेणाभिनि
ष्पत्तिः स्यान्मोक्षस्यापि फलत्वप्रसिद्धेरभिनिष्पद्यत इति चोत्पत्तिपर्यायत्वात्स्वरूपमात्रेण चेदभिनिष्पत्तिः पूर्वास्वप्यवस्थासु स्वरूपा
नपायात्तद्विभाव्येत तस्माद्विशेषेण केनचिदभिनिष्पद्यत इति॥

ब्दात् निर्गुणविद्याफलवाक्यमुदाहृत्य स्वशब्दस्य स्वीयागंतुकरूपत्वात्मरूपवा
चित्वात्संशयमाह एवमिति पूर्वपक्षे मोक्षस्य स्वर्गादविशेषः सिद्धांते विशेष इति फलं तत्र मोक्ष आगंतुकः फलत्वात्स्वर्गवदित्यभिप्रायोपेतयाभिनिष्पत्तिश्रुत्या पू
र्वपक्षमाह किमिति॥

ब्र॰सू॰ स्वशब्दश्रुतिबाधितो न्यायः अभिनिष्पद्यत इति साक्षात्कारवदभिप्रायाबंधध्वंसजन्मस्यैव पचादिक्रियेवेति मत्वा सिद्धांतयति एवमिति मोक्षस्य फलत्वे नत्वागंतुक
३७ त्वतिरात्मार्थः स्वशब्द इति पुरुं स्वीयवाचित्वेत्वनर्थकानुवादः स्यादित्यर्थः स्वरूपांतरं गृहीत्वा तिष्ठतः पुनरिति जागरिते त्वांध्यादिवद्देहधर्मवान् भवति स्वप्ने तु लाद्

एवं प्राप्ते ब्रूमः केवलेनैवात्मनाविर्भवति न धर्मांतरेणेति कुतः स्वेन रूपेणाभिनिष्पद्यत इति स्वशब्दात् अन्यथा हि स्वशब्देन विशेषणमनवकॢप्तं स्यान्नन्वा
त्मीयाभिप्रायः स्वशब्दो भविष्यति नेत्युच्यते अवचनीयत्वात् येनैव हि केनचिद्रूपेणाभिनिष्पद्यते तस्यैवात्मीयत्वोपपत्तेः स्वेनेति विशेषणमनर्थकं स्यादा
त्मवचनतायां त्वर्थवदिदं स्यात् केवलेनैवात्मरूपेणाभिनिष्पद्यते नागंतुकेनापररूपेणेति कः पुनर्विशेषः पूर्वावस्थायामिह च स्वरूपानपायसाम्ये सति
तत आह मुक्तः प्रतिज्ञानात् योऽत्राभिनिष्पद्यत इत्युक्तः स सर्वबंधविनिर्मुक्तः शुद्धेनैवात्मनावतिष्ठते॥ पूर्वत्र त्वंधो भवत्यपि रोदितीव विनाश
मेवापीतो भवतीति चावस्थात्रयकलुषितेनात्मना अयं विशेषः कथं पुनरवगम्यते मुक्तोऽयमिदानीं भवतीति प्रतिज्ञानादित्याह तथा ह्येतं त्वेव
ते भूयोऽनुव्याख्यास्यामीत्यवस्थात्रयदोषविहीनमात्मानं व्याख्येयत्वेन प्रतिज्ञायाशरीरं वाव संतं न प्रियाप्रिये स्पृशत इति चोपन्यस्य स्वेना
रूपेणाभिनिष्पद्यते स उत्तमः पुरुष इति चोपसंहरति तथाख्यायिकोपक्रमेऽपि य आत्मापहतपाप्मेत्यादिर्मुक्तात्मविषयमेव प्रतिज्ञानं फलत्व
प्रसिद्धिरपि मोक्षस्य बंधनिवृत्तिमात्रापेक्षा नापूर्वोपजननापेक्षा यदप्यभिनिष्पद्यत इत्युत्पत्तिपर्यायत्वं तदपि पूर्वावस्थापेक्षं यथा रोगनिवृ नौ
त्तावरोगोऽभिनिष्पद्यत इति तद्वत् तस्माददोषः आत्मा प्रकरणात् कथं पुनर्मुक्त इत्युच्यते यावता परं ज्योतिरुपसंपद्येति कार्यगोचरमेवै
नं श्रावयति ज्योतिःशब्दस्य भौतिके ज्योतिषि रूढत्वात्॥ ॥

केनचित् अपि च तत्पुत्रादिनाशादौ रोदितीव भवति सुषुप्तौ तु विशेषाज्ञानाद्विनष्ट इवेति
बंधदशायां कलुषितात्मना तिष्ठति मोक्षे तु क्रिमिलिनाविलत्वः स्वपरितः प्रद्योतमानः पूर्णानंदात्मनावतिष्ठत इति महान्विशेष इत्यर्थः कार्यगोचरमिति हेरंब॰
३७

कार्यप्राप्तोपि मुक्तः किं न स्यादित्यत आह न चातिवृत्त इति॥ ॥अविभागेन दृष्टत्वात्॥ ॥स्वरूपाभिव्यक्तिं मुक्तमुपजीव्य वादिविवादाद्धृतभेदाभेदसंश

नचानतिवाह्नो विकारविषया तु कश्चिन्मुक्तोभिवाञ्छितुमर्हति विकारस्यानित्यत्वप्रसिद्धेरिति नैष दोषो यत आत्मैवात्र ज्योतिः शब्देनवि
द्यते प्रकरणात् य आत्मापहतपाप्मा विजरो विमृत्युरित्यादि प्रकृते परस्मिन्नात्मनि नाकस्माल्लौकिकं ज्योतिः शब्दं गृहीतुं प्रकृतहानाप्र
कृतप्रक्रियाप्रसंगात् ज्योतिः शब्दस्त्वात्मन्यपि दृश्यते तं देवा ज्योतिषां ज्योतिरिति प्रपंचितं चैतत् ज्योतिर्दर्शनादित्यत्र अविभागेन दृष्ट
त्वात् परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते यः स किं परस्मादात्मनः पृथगेव भवत्युताविभागेनैवावतिष्ठत इति वीक्षायां स त
त्र पर्येति स्वाधिकरणाधिकरणत्वनिर्देशात् ज्योतिरुपसंपद्येति च कर्तृकर्मनिर्देशात् भेदेनैवावस्थानमिति प्राप्तमभिधत्ते मुक्ताद
यति अविभक्त एव परेणात्मना मुक्तोवतिष्ठते कुतः दृष्टत्वात् तथा हि तत्त्वमसि अहं ब्रह्मास्मि यत्र नान्यत्पश्यति ननु तद्द्वितीयमस्ति त
तोन्यद्विभक्तं यत्पश्येदित्येवमादीनि वाक्यान्यविभागेनैव परमात्मानं दर्शयन्ति यथादर्शनमेव च फलं युक्तं तत्क्रतुन्यायात् यथोदकं
शुद्धे शुद्धमासिक्तं तादृगेव भवति॥ एवं मुनेर्विजानत आत्मा भवति गौतमेति चैवमादीनि मुक्तस्वरूपनिरूपणपराणि वाक्यान्यविभा
गमेव दर्शयन्ति नदीसमुद्रादिनिदर्शनानि च भेदनिर्देशस्त्वभेदेप्युपचर्यते स भगवः कस्मिन्प्रतिष्ठित इति स्वे महिम्नीति आत्मरति
रात्मक्रीड इति चैवमादिदर्शनात्॥ ब्राह्मेण जैमिनिरुपन्यासादिभ्यः स्थितमेतत् स्वेन रूपेणेति सत्तात्ममात्ररूपेणाभिनिष्पद्यते
नागन्तुकेनापररूपेणेति॥ ॥ ॥

येसत्संतभेदपूर्वपक्षमुत्क्वासिद्धान्तमाहेति यत्स्येति॥ ॥ब्राह्मेण जैमिनिः॥ ॥ ॥ ॥ ॥

शा.सू. ३८ उक्तं ब्रह्मस्वरूपमुपनीषत्सु किं सत्येन सर्वज्ञत्वादिधर्माणामुक्तास्ति प्रतिउक्तधर्मस्य शशशृंगवदसंतात्मत्वाच्चिन्मात्रात्मनावस्थितिः किं वा वस्तुतस्तद्विमात्रो
पि जीवो नरव्यवहारदृष्ट्या कल्पितसर्वज्ञत्वादिमानिति श्रुतिविप्रतिपत्तेः संशये सत्साध्यं पूर्वपक्षमाह अधुनेत्यादिना॥ तत्त्वसक्षत्सिद्धिरेवपू[illegible]

अधुना तु तद्विशेषं मुक्तावस्थायामभिधीयते। स्वमस्वरूपं ब्राह्मणमपहतपाप्मत्वादिसत्यसंकल्पत्वावसानं तथा सर्वज्ञत्वं सर्वेश्वरत्वं च तेन
स्वेन रूपेणाभिनिष्पद्यत इति जैमिनिराचार्यो मन्यते कुतः उपन्यासादिभ्यस्तथात्वावगमात् तथा हि य आत्मापहतपाप्मेत्यादिना स
त्यकामः सत्यसंकल्पः सोन्वेष्टव्यः इत्येवमंते नोपन्यासेनैवमात्मवत्तामात्मनो बोधयति। तथा स तत्र पर्येति जक्षन्क्रीडन्रममाण इत्यैश्वर्यरू
स्य पमावेदयति तेषां सर्वेषु लोकेषु कामचारो भवतीति च सर्वज्ञः सर्वेश्वर इत्यादिव्यपदेशाश्चैवमुपपन्ना भविष्यंतीति चितितन्मात्रेण
तदात्मकत्वादित्यौडुलोमिः यद्यप्यपहतपाप्मत्वादयो भेदेनैव धर्मा निर्दिश्यंते तथापि शब्दविकल्पजा एवैते पाप्मादिनिवृत्तिमात्रं हि
तत्र गम्यते चैतन्यमेव तत्स्यात्मनः स्वरूपमिति तन्मात्रेणाभिनिष्पत्तिर्युक्ता तथा च श्रुतिः एवं वा अरे यमात्मानंतरोबाह्यः कृत्स्नः प्रज्ञा
नघन एवेत्येवंजातीयका अनुगृहीता भविष्यंति॥ ॥

कं इत्येवं सोन्वेष्टव्य इति विध्यर्थ उद्देशोप आत्मेत्यादिरूपन्यासशब्दार्थः आदिपदाद्विधिव्यपदेशग्रहः तत्रा ज्ञानज्ञापको विधिस्तमाह तथा सतत्त्वे
सर्वज्ञ इत्यादिस्तु व्यपदेशः अयं हि तोद्देशः विध्यभावान्नापि विधिः सिद्धवन्निर्देशादित्यर्थः सत्यत्वादिधर्माणां सत्यत्वं दूषयन्नसत्त्वं सहेतुकमा ईस्वं॰
माह चितितन्मात्रेणेति चितिश्चैतन्यं शब्दज्ञानाद्यो विकल्पो सन्नप्रसक्तज्ञाः असंतासंतद्वृत्तियावत्॥ ॥ ॥श्रीः॥ ३८

अतस्तु भावरूपधर्माणामसत्त्वं भावधर्माणां तु सत्त्वमित्याशंक्य तेषामप्यौपाधिकत्वादसत्त्वमित्याह सत्यकामेत्यादि चिन्मात्रे मुक्ते तत्सगुणादि श्रुतिः कथं तत्रा
ह अत एवेति सर्वधर्मनिषेधाद्वैतं सर्वधर्माणां सत्त्वमसत्त्वं तासत्त्वे चेति पक्षद्वयमप्युक्तं अद्वैतलक्षणे नानां सर्वद्वैतादिरूपनिष्प्रह्य रयोश्च बाधाबाधाला
द्वत्वत्त्वनीयपक्षः श्रेयानिति सिद्धं नयति एवमपीति अत्र केचिन्मुक्तं वंति अखंडचिन्मात्रं ज्ञानानामुक्तं स्याज्ज्ञानाभावात्कुत आज्ञानिकधर्मयोग इति तद्दूषं
बोधनीयाः पईश्वरधर्मास्त एव चिदात्मनि मुक्ते जीवानां तरैर्व वड्क्रिपंत इति नच स्फुला विचेष्टा न्ते नाशे कुतो जीवा नरमिति वाच्यं नव पंतन्नाशे जीवा

सत्यकामत्वादिमत्स्वरूपत्वपि वस्तु स्वरूपे ऐव धर्मा उच्यंते सत्यकामा अस्येति तथाप्युपाधिसंबंधाधीनत्वात्तेषां नचैतन्मपवत्स्वरूपसं त
भवोनेकाकारत्वप्रतिषेधात् प्रतिबिंबद्वौ द्विजसलोनेकाकारत्वेन स्थानमतो पिपरस्योभयलिंगमित्यत्र अत एव जक्षणादि संकीर्तन
मपि दुःखाभावमात्राभिप्रायं स्त्र स्वर्थमात्मरति रित्यादि वन्माहि मुख्यान्वेवरति क्रीडामिथुनान्यात्मन निमित्तानि शक्यंते वर्णयितुं द्वि
तीयविषयत्वात्तेषां तस्मान्निरस्ताशेषप्रपंचेन प्रसन्नेनात्मपदे श्येन बोधात्मना भिनिष्पन्न इत्यौडुलोमिराचार्यो मन्यते एवम
प्युपन्यासात्पूर्वभावादविरोधं बादरायणः एवमपि पारमार्थिकचैतन्यमात्रस्वरूपाभ्युपगमेपि व्यवहारापेक्षया पूर्वस्याप्युपन्या
सादिभ्योवगतस्य ब्राह्मस्यैश्वर्यरूपस्याप्रत्याख्यानादविरोधं बादरायण आचार्यो मन्यते॥

वो न रव्यय हारं ब्रूमः किंतु तद्दर्शनाशे नांशास्य
ध्यात्मिकशरीरद्व्याभिमानिनो मुक्तावंशांतरोपाधिका जीवा व्यवहर्तार इत्यविद्यामः तर्हि नानाविद्यापक्ष एवकुतो नाश्रेयत्ने जीवभेदस्यावश्यकत्वाद्
निःश्रेयसे प्रकृति नानात्वं प्रतिजीवं प्रपंचभेद इत्युपाधिभाना प्रमाणिकानेकार्थगौरवात्प्रति सर्वाब्रह्मसंमत एका विद्यापक्ष एव श्रेयान् अंशानिर्देहस्य बंधस्तु

शा॰सू॰ एवं परविद्याफलमुक्तिमिदानीमपरविद्याफलं प्रपंचयति॥ सं संकल्पादेव तु तच्छ्रुतेः एककारस्यायोगान्ययोगव्यवच्छेद्साधारण्यात्संशयः ब्रह्मलोकं गता
३९ स्योपात्तकस्य संकल्पोपलब्धांतरसापेक्षः भोगसामग्री संकल्पत्वादस्मदादिसंकल्पवत् न चैवकार विरोधः संकल्पेनसामग्र्या अयोगव्यवच्छेदेनसो ह

संकल्पादेव चतच्छ्रुतेः हार्दविद्यायांश्रूयते स यदि पितृलोककामो भवति संकल्पादेवास्यपितरः समुत्तिष्ठंतीत्यादि तत्र संशयः किं संकल्पवके
वलंपित्रादिसमुत्थाने हेतुरुत निमित्तांतरसहितमिति तत्र सत्यपि संकल्पादेवेति श्रवणे लोकवन्निमित्तांतरापेक्षा नोपयुक्ता यथा लोके
स्मदादीनां संकल्पानामनादिभ्यश्च हेतुभ्यः पित्रादिसंपत्तिर्भवत्येवं मुक्तस्यापि स्मादेवंदृष्टविपरीतं भविष्यतीति संकल्पादेवेति तु श्रुत
इव संकल्पितार्थसिद्धिकरीसाधनांतरसामर्थ्यं मुख्यभावमपेक्ष्योच्यते न च संकल्पमात्रसमुत्थानाः पित्रादयो मनोरथविजृंभि
तवच्चंचलत्वात्पुष्कलं भोगं समर्पयितुं पर्याप्नुयुरिति एवं प्राप्ते ब्रूमः संकल्पादेव तु केवलात्पित्रादिसमुत्थानमिति कुतस्तच्छ्रुतेः
संकल्पादेवास्यपितरः समुत्तिष्ठंतीत्यादिका हि श्रुतिर्निमित्तांतरापेक्षायां पीड्येत निमित्तांतरमपि तु यदि संकल्पानुविधाय्येव स्यादुव
तुनतु प्रयत्नांतरं संपाद्यं निमित्तांतरमिति ब्रूते प्राक् संपत्तेर्वंध्यसंकल्पत्वप्रसंगात् च श्रुत्यगम्येऽर्थे लौकिकवदिति सामान्यतोदृष्टं क्रम
ते संकल्पबलादेव चैषां स्थायित्वमप्युपपत्तिः प्राकृतसंकल्पविलक्षणत्वान्मुक्तसंकल्पस्य॥
स्यार्थत्वात्स्वफलानंगीकारे भोगद्वयसि
द्धेश्चेति पूर्वपक्षार्थः अत्र लोकदृष्टानुसरणं फलं सिद्धांते तु विद्याबलेन संकल्पस्यैव भोगपुष्टिकरत्वसिद्धिरिति भेदः किंचपादि भोगसंकल्पानंतरमपि
यत्नांतरसाध्यनिमित्तापेक्षास्याच्चाहि निमित्तप्राप्तेः प्राक् ज्ञातसंकल्पस्य वंध्यत्वस्यात् भोगे विलंबात् ततः सत्यसंकल्पश्रुतेर्नयत्नांतरापेक्षेत्याह॥ निमित्तांतर हरि॰ ३९

नन्वीश्वराधीनस्य विदुषः कथं संकल्पमात्राद्भोगसिद्धिस्तत्राह अत एवेति ईश्वरधर्म एव विदुष्याविर्भूत इति न संकल्पभंग इति भावः एवकारस्त्वनन
सेति विशेषणेनान्ययोगव्यवच्छेदाद्देहाद्यभाव इति पूर्वपक्षयति ॥ ॥अभावं बादरिराह ह्येवं अत्रापि बादरिविवादात्संशयः तत्र देहाद्योग

अत एव चानन्याधिपतिः अत एव चाबाध्यसंकल्पत्वादनन्याधिपतिर्विद्वान्भवति नास्यान्योऽधिपतिर्भवति तस्यार्थः न हि प्राकृतोऽपि संकल्प
यन्नन्यस्वामिकस्तमात्मनः सत्संगत्वौ संकल्पयति ॥ श्रुतिश्चैतद्दर्शयत्यथ य इहात्मानमनुविद्य व्रजन्त्येतांश्च सत्यान्कामांस्तेषांस
र्वेषु लोकेषु कामचारो भवतीति अभावं बादरिराह ह्येवं संकल्पादेवास्य पितरः समुत्तिष्ठन्तीत्यादिश्रुतेः मनस्त्वावश्यं संकल्पसाध
नत्वेनोक्तं शरीरेन्द्रियाणि पुनः प्राप्तैश्वर्यस्य विदुषः सन्ति न वा संतीति समीक्ष्यते तत्र बादरिस्त्वाचार्यः शरीरस्येन्द्रियाणां चाभावं म
हीयमानस्य विदुषो मन्यते कस्मादेवं ह्याह ह्याह मनसैतान्कामान्पश्यन्रमते य एते ब्रह्मलोक इति यदि मनसा शरीरेन्द्रियैश्च वि
हरेत मनसेति विशेषणं न स्यात्तस्माद्भावः शरीरेन्द्रियाणां मोक्षे ॥ भावं जैमिनिर्विकल्पामननात् ॥ जैमिनिस्त्वाचार्यो मनोवच्छरीर
स्यापि सेन्द्रियस्य भावं मुक्तं प्रतिमन्यते यतः स एकधा भवति त्रिधा भवतीत्यादिनाऽनेकधाभावविकल्पमामनतीति न ह्यनेकविध
ताविना शरीरभेदेनाञ्जसी स्यात् यद्यपि निर्गुणायां भूमविद्यायां अपनेकधाभावविकल्पः पठ्यते तथापि विद्यमानमेवेदं सगुणा
वस्थायामैश्वर्यं भूमविद्यास्तुतये संकीर्त्यत इत्यतः सगुणविद्याफलभावेनोपतिष्ठत इत्युच्यते ॥ ॥ ॥

संसेवसद्वासं सेवेति च पक्षद्वयं पूर्वपक्षः कालभेदेनेच्छया संति न संतीति सिद्धान्तपक्षो द्रष्टव्यः फलं तु तत्तु नेमुख्यतमिति विवेकः ॥ ॥ ॥

शा·सू०
६०

द्वादशाहवदिति यएवंविद्वांसः सत्रमुपयन्तीत्युपायिचोदनागमत्वश्रुतेर्द्वादशाहस्य सत्रत्वं आसतेत्यादिचोपयन्तीति चोदितत्वं सत्रलक्षणमिति स्थितं । तथा द्वादशाहेन प्रजाकामं याजयेदिति यजतिचोदनादर्शनात्क्रियत्वकर्तृकत्वाद्यागमेनैकाहादिवदहीनत्वं च सर्वथा ॥ प्रदीपवदावेशः स्वकल्पमात्रात्मि

द्वादशाहवदुभयविधं बादरायणोऽतः बादरायण आचार्यः पुनरतः उभयविधं भवश्रुतिलिंगदर्शनादुभयविधत्वं साधु मन्यते यदा सशरीरतां संकल्पयति तदा सशरीरो भवति । यदा त्वशरीरत्वं तदा शरीरः इति सत्यसंकल्पत्वात् संकल्पवैचित्र्यात् । द्वादशाहवद्यथा द्वादशाहः सत्रमहीनश्च भवति उभयश्रुतिलिंगदर्शनादेवमिदमपीति । तन्वभावे संध्यवदुपपत्तेः यदा तु तनोः सेंद्रियस्य शरीरस्याभावस्तदा यथा संध्ये स्थाने शरीरेंद्रियविषयेष्वविद्यमानेष्वप्युपलब्धिमात्रा एवपित्रादिकामा भवंति एवं मोक्षेऽपि स्युरेवं हि तदुपपद्यते भावे जाग्रद्वत् ॥ भावे पुनस्तनोर्यथा जागरिते विद्यमाना एव पित्रादिकामा भवंत्येवं मुक्तस्याप्युपपद्यते प्रदीपवदावेशस्तथा हि दर्शयति भावं जैमिनिर्विकल्पामननात् सत्र सशरीरत्वं मुक्तस्योक्तं तत्र त्रिधाभावादिषु अनेकशरीरसर्गे किं निरात्मकानि शरीराणि दारुयंत्रवत् उत सात्मकानि किं वा सात्मकान्यस्मदादिशरीरवदिति भवति विचारः तत्र चात्ममनसोर्भेदानुपपत्तेरेकेन शरीरेणात्मयोगात् इतराणि निरात्मकानीत्येवं प्राप्ते उच्यते प्रदीपवदावेश इति ॥ ॥

मितरदेहानुपजीव्यत्वे शश्नयथादर्शनाल्लेशपमाह भावमिति ॥ ॥ अनादिलिंगशरीरस्यैकस्मिन्नेव शरीरे भावात् निर्मितानेकदेहेषु भोगासिद्धेर्सर्वप हेरंब०
६०

सिद्धांतेतत्सिद्धिरितिमत्वा सूत्रं व्याचष्टे यथेत्यादिना स एकधा त्रिधा पंचधेत्यादि श्रुत्या विदुष एवानेकधा भाव उक्तः विद्वांस्तु न देहिनो नाविचि
न्मात्रः लिंगोपहितात्मा न च तस्य लिंगभेदं विनानेकत्वं संभवतीत्यत आह श्रुतिबलादेकस्यैवानादिलिंगस्यानेकदेहेषु प्रवेशो न भवेदप्यशक्यः य
द्यपि मूलप्रदीपस्य वर्त्यंतरेषूत्पन्नदीपानां चात्यंतभेदोस्ति लिंगस्य तु देहभेदो न स्वतः स्वतो लिंगभेदे तदुपहितजीवभेदादनुसंधानानुप
पत्तेः आगंतुकानेकसृष्टावसत्कार्यवादापाताच्च तथापि प्रदीपत्वजात्यैक्येन व्यक्तिद्वैक्यारोपात् दृष्टांतदार्ष्टांतिकयोः साम्यं द्रष्टव्यं तथा च यथा प्रदीपो

यथा प्रदीप एकोऽनेकप्रदीपभावमापद्यते विकारशक्तियोगादेवमेकोऽपि सन् विद्वानैश्वर्ययोगादनेकभावमापद्य सर्वाण्यपि शरीराण्यावि
शति कुतस्तथा हि दर्शयति शास्त्रमेकस्यानेकभावं स एकधा भवति त्रिधा पंचधा सप्तधा नवधेत्यादिना तदारूपश्रोपमाभ्युपगमेऽत्वक
ल्पते नापि जीवात्मैवेशेन वनिरात्मकानां शरीराणां प्रवृत्तिः संभवति प्रत्यात्मं मनसो भेदानुपपत्तेरनेकशरीरयोगासंभव इति नैष
दोषः एकमनोनुवर्तीनि समनस्कान्येवापरेपि शरीराणि सत्यसंकल्पत्वात्स्रक्ष्यति सृष्टेषु चैतेषूपाधिभेदादात्मनोपि भेदेना
धिष्ठातृत्वं योक्ष्यते॥ ॥

ऽनेकवर्त्तिषु प्रविशति एवं विद्यायोगबलाद्विदुषो लिंगस्य व्यापित्वादनेकदेहेषु युगपदावेश इति सूत्रार्थः विदुषोऽनेकधात्वं श्रुतम
न्यथानुपपद्यत इत्याह नैतदिति तश्च सात्मकत्वमित्याह न चेति एकमनस्काः नामीति पदनादिमन एकदेहस्थं तदनुसारिणी देहां
तरस्थानि मनांसि भवंति तदवस्थानां तन्नियम्यत्वसंभवादिति॥ ॥ ॥ ॥ ॥ ॥ ॥

अत्रयोगशास्त्रसंमतिमाह एषैवेति निर्माणचित्तान्यस्मितामात्रात्प्रवृत्तिभेदे प्रयोजकं चित्तमेकमनेकेषामिति हि भगवत्यंतंजलिनासूत्रितं योगीनो भीमानमा
त्रान्निर्माणानि चित्तानि निर्माणदेहेषु भवंति तेषां नियामनादि चिन्त्रमित्यर्थः उत्तरस्सूत्रव्यावर्त्यशंकामाह कथं पुनरिति सलिलवत्स्वच्छलिलः स्वच्छ
इत्यर्थः ननु तद्द्वितीयमस्तीकेचित्सुषुप्तिमधिकृत्यो क्तंत्वंकेनकं मित्यादि कचित्मुक्तिप्रकृत्यो क्तं एवं विवेशज्ञानाभाववचनं सुषुप्तिमुक्तपम

एषैवचयोगसाख्येषु योगिनामनेकशरीरयोगप्रक्रियाकथं पुनर्मुक्तस्यानेकशरीरावेशादिलक्षणमैश्वर्यमभ्युपगम्यतेयावतानत्केनकं
पश्यतीति अत उत्तरपाठतिस्वाप्ययसंपत्योरन्यतरापेक्षमाविष्कृतं हि स्वाप्ययः सुषुप्तं स्वमपितो भवति विजानीयान्नत्वद्द्वितीयमस्तिततो
न्यद्विभक्तं यद्विजानीयात् ॥ सलिलएकोद्रष्टाद्वैतो भवति नीएवंजातीयकाश्रुतिर्विवेशविज्ञानं वारयति किं अतउत्तरपाठ तिस्वाप्ययसंपत्योरन्य
तरापेक्षमाविष्कृतं हि स्वाप्ययः सुषुप्तं स्वमपितो भवति तस्मादेनं स्वपितीत्याचक्षत इति श्रुतेः संपत्तिः कैवल्यं ब्रह्मैव सन्ब्रह्माप्येतीतिश्रुतेस्तयो
रन्यतरामवस्थामपेक्ष्यैतद्विशेषसंज्ञाभाववचनं क्वचित्सुषुप्तावस्थामपेक्ष्योच्यते क्वचित्कैवल्यावस्थां कथमवगम्यते यतस्तत्रैवैतदधिकारवशादाविः
कृतमेतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति न प्रेत्य संज्ञास्तियत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येद्यत्र सुप्तो न कंचन कामं कामयते न कंचन स्वप्नं
पश्यतीत्यादिश्रुतिभ्यः सगुणविद्याविपाकस्थानं त्वेतत्स्वर्गादिवदवस्थान्तरं यत्रैतदैश्वर्यमुपवर्ण्यते तस्माददोषः ॥ ॥ ॥

नन्वैश्वर्यस्य सगुणोपासकस्य भोगोक्तौ न क्लिश्यते भिन्नविषयत्वादित्याह स्वाप्ययमेति तत्रैव श्रुतौ तदधिकारवशात्सुषुप्त्यादिप्रकरणवशादु हेरंब०
क्तवचनानामन्यतरापेक्षत्वमाविष्कृतं हि यतस्ततो वगम्यत इत्यर्थः अत्र सगुणोपासनादिविद्याभुक्तिविषयं यत्रास्पष्टसुप्तिविषयमिति विभागः ॥ ॥ ४१

जगद्व्यापारवर्जं॥ संकल्पादेवेत्यादिनोक्तैश्वर्यस्य जगत्सृष्ट्यादिव्यतिरिक्तविषयत्वेनात्रापवादः। तं गतिः उभयथा दर्शनात्संशयः ईश्वरनानात्वे पूर्वपक्षफलं सिद्धान्ते तु विद्योपासिनामीश्वरनियम्यत्वादेकस्य नित्यसिद्धस्येश्वरस्यैव जगत्कर्तृत्वसिद्धिरिति विवेकः प्रत्यग्... समन्वयस्य स्थलपूर्वकं

जगद्व्यापारवर्जं प्रकरणादसंनिहितत्वाच्च॥ ये सगुणब्रह्मोपासनात्सहैव मनसेश्वरसायुज्यं व्रजन्ति तेषां निरवग्रहमैश्वर्यं भवत्याहोस्विदवग्रहमिति संशयः। किं तावत्प्राप्तं निरंकुशमेवैषामैश्वर्यं भवितुमर्हति॥ आप्नोति स्वाराज्यं सर्वेऽस्मै देवा बलिमावहन्ति तेषां सर्वेषु लोकेषु कामचारो भवतीत्यादिश्रुतिभ्यः इत्येवं प्राप्ते पठति जगद्व्यापारवर्जमिति जगदुत्पत्त्यादिव्यापारं वर्जयित्वा अन्यदणिमाद्यात्मकमैश्वर्यं मुक्तानां भवितुमर्हति जगद्व्यापारस्तु नित्यसिद्धस्यैवेश्वरस्य कुतः तस्य तत्र प्रकृतत्वात् असंनिहितत्वाच्चेतरेषां पर एव हीश्वरो जगद्व्यापारेऽधिकृतस्तमेव प्रकृत्योत्पत्त्याद्युपदेशान्नित्यशब्दनिबन्धनत्वाच्च तदन्वेषणविजिज्ञासनपूर्वकं त्वितरेषामणिमाद्यैश्वर्यं श्रूयते तेनासंनिहितास्ते जगद्व्यापारे॥ ॥ ॥ ॥

तर्हि तेषु नेतोपक्रतं तस्यैव निपतत्वादि जगद्व्यापारः नह्युपासकानां देहवियोगे ऐश्वर्यं संभवति किं चेश्वरस्य नित्यसिद्धत्वात् शब्दैकसमाधिगम्यत्वाच्च जगत्स्रष्टृत्वं युक्तं न तु तदुपासकानां जीवानामित्याह नित्यशब्दनिबन्धनत्वाच्चेति॥ ॥ ॥ ॥

ब्र॰सू॰ किं च विदुषां समप्राधान्ये मिथो विरोधः एवं प्रसज्येषां गुणाहोसेकएवेश्वरइत्याह समनस्कत्वादिति अधिकारोनि योजपसादिसाधिकारिकः सचासोमंडल
४२ स्थश्चमस्यप्राप्य लोकेदिसर्थः मनसः स्पतिः सूर्यमंडलांतरस्थ परमात्मा तस्य विलुवदेवं धियोयोनः प्रचोदयादिति श्रुते तथा चय इत्यंच नेरंकुशे स्वाराज्यम्

समनस्कत्वादेव चैतेषामनैकमत्ये कस्यचित् स्थित्यभिप्रायः कस्यचित्संहाराभिप्राय इत्येवं विरोधोपि कदाचित्स्यादथवा कस्यचित्संकल्पमन
म्यस्य संकल्प इत्यविरोधः समर्थ्येत लतः परमेश्वराकूतं तंत्रत्वमेवेतरेषामिति व्यवतिष्ठते ॥ प्रसक्तोपदेशादिति चेन्नाधिकारिकमंडल
लोकोक्तेः अथ यदुक्तमाप्नोति स्वाराज्यमित्यादि प्रसक्तोपदेशाद्विश्वयदुमैश्वर्यं विदुषो न्याय्यमिति तत्परिहर्तव्यं ॥ अत्रोच्यते नायं दोषः आधिकारि
कमंडलस्थोक्तेः आधिकारिकोयः सवितृमंडलादिषु विशेषायतनेष्ववस्थितः परईश्वरस्तदायत्तैव इयं स्वाराज्यप्राप्तिरुच्यते यत्कारणमनंतर
माप्नोति मनसस्पतिमित्याह योहि सर्वमनसां पतिः पूर्वसिद्ध ईश्वरस्तंप्राप्नोतीत्येतदुक्तं भवति तदनुसारेणैव चानंतरं वाक्पतिश्चक्षुष्पति
श्रोत्रपतिर्विज्ञानपतिश्च भवतीत्याह एवमन्यत्रापि यथासंभवं नित्यसिद्धेश्वरायत्तमेवेतरेषामैश्वर्यं योजयितव्यं विकारावर्ति च तथाहि स्थिति
माह विकारावर्तीति चनित्यमुक्तं पारमेश्वरं रूपं न केवलं विकारमात्रगोचरं सवितृमंडलाद्यधिष्ठानं तथा ह्यस्य द्विरूपां स्थितिं स्थिति
माह श्रुतिः तावानस्य महिमा ततो ज्यायांश्च पूरुषः पादोस्य सर्वा भूतानि त्रिपादस्यामृतं दिवीत्येवमादिः न च तन्निर्विकारं रूपमस्य द्विरूपं निर्विका
रं रूपमितरालंबनाः प्राप्नुवंतीति शक्यं वक्तुं अतत्क्रतुत्वात्तेषामतश्च यथैव द्विरूपे परमेश्वरे निर्गुणं रूपमनवाप्य सगुण एवावतिष्ठंते एवं सगु
णेपि निरवग्रहमैश्वर्यमनवाप्य सावग्रह एवावतिष्ठंत इति द्रष्टव्यं श्रीलक्ष्मीरामशर्मणा घस्यसमुद्धीव सहाः ० ॥ ॥ ॥

तं स्यात्तर्हि ईश्वरस्यापि प्राप्यतां न च पादतो भोगेस्वाराज्यं न जगज्जन्मादि चिचिद्विभावश्च वा व्याप्तित्वादिकमयीश्वराधीनमित्याह तदनुसारेणेति उक्तन्यायं का
मचाराश्चिवाको स्पष्टति दिशा सेवमिति जगद्व्यापार उपासक प्राप्यः तदुपास निष्ठत्वात् संकल्पसिध्यादिवद्विसांसोपासका निर्गुणब्रह्मरूपेवमिचारमाह विकारा वे॰सू॰ ४२

निर्गुणस्वरूपे प्रमाणमाह दृश्यतश्चेति यथा रत्नाभावान्निर्गुणेन प्राप्तं तथा ध्यानाभावाज्जगत्स्रष्टृत्वादि न प्राप्यते ध्यानाभावश्च विध्यभावादिति भावः त
मुपासकं ब्रह्मलोकगतमाह हिरण्यगर्भः मया खल्विमा आपो अमृतरूपा मीयंते भुज्यंते तेन वाप्यसौ लोको मत्तोदकलक्षण इत्यर्थः श्रुत्यंतरमा
ह यथेति भोगसाम्ये दृष्टांतो यथेत्यर्थः तेनो इत्युशब्दोप्यर्थः सलोकतामपीत्यन्वयः सायुज्यं समानदेहत्वं क्रमेण मुक्तिर्वशास्त्रसमाप्तिं सूच

दर्शयतश्चैवं प्रत्यक्षानुमाने ॥ दर्शयतश्च विकारावर्त्तित्वं परस्य ज्योतिषः श्रुतिस्मृती न तत्र सूर्यो भाति न चंद्रतारकं नेमा विद्यु
तो भांति कुतोयमग्निरिति ॥ न तद्भासयते सूर्यो न शशांको न पावक इति च ॥ तदेवं विकारावर्त्तित्वं परस्य ज्योतिषः प्रसिद्धमि
सभिप्रायः भोगमात्रसाम्यलिंगाच्च ॥ इतश्च न निरंकुशं विकारालंबनानामैश्वर्यं यस्माद्भोगमात्रमेवैषामनादिसिद्धेनेश्वरेण स
मानमिति श्रूयते तमाहापो वै खलु मीयंते लोकोसाविति स यथैतां देवतां सर्वाणि भूतान्यवंत्येव हैवंविदं सर्वाणि भूता
न्यवंतीति तेनो एतस्यै देवतायै सायुज्यं सलोकतां जयतीत्यादि भेदव्यपदेशलिंगेभ्यः ॥ नन्वेवं सातिशयत्वादंतवत्त्वमैश्वर्य
स्य स्यात्ततश्चैषामावृत्तिः प्रसज्येतेति अत उत्तरं भगवान्बादरायण आचार्यः पठति ॥ ॥ ॥

पन्सूत्रकारं पूजयति भगवानिति भगवत्त्वं सर्वज्ञत्वं सूत्रद्वारा शिष्याणामाचारे स्थापनात् आचार्यत्वं बादरायणपदेन बदरिकाश्रमवा
सोक्त्या नित्यसर्वज्ञस्य परमगुरोर्नारायणस्य प्रसादद्योतनात्तस्य प्रणीतशास्त्रे निरवद्यतामुद्योतयति ॥ . ॥ ॥ ॥ ॥

शा.सू० सगुणविद्यायाः सातिशयफलत्वेपि ततोनिर्गुणविद्यया नावृत्तिरिति सिद्धम्॥॥ ॐ अनावृत्तिः शब्दादनावृत्तिः शब्दात्‌ ये ब्रह्मलोकं गच्छंति तेषां पुनरावर्त्तते इति[illegible]
४३ बंधः लोकविशिष्टीनष्टियस्मिन्निति इतो स्मात्पृथिवी लोकात्‌ तृतीयस्यां दिवि यो ब्रह्मलोकस्तस्मिन्‌ अरइति ण्यइति चार्णवौ चतुर्लोको सुधाद्रुहाविति सर्थः ऐरंमद
मयं मदीयं मद्करं सरः सोमसवः अमृतवर्षी पयः पिवेषामिह न पुनरावृत्तिरिति इमं मानवमिति च श्रुतिष्विहेममिति विशेषणाद्याश्मिन्कल्पे ब्रह्मलोकं गतानां

अनावृत्तिः शब्दादनावृत्तिः शब्दात्‌। नाडीरश्मिसमन्वितेनार्चिरादिपर्वणा देवयानेन पथा ये ब्रह्मलोकं शास्त्रोक्तविशेषणं गच्छंति यस्मिन्नर ण्य
श्चार्णवौ ब्रह्मलोके तृतीयस्यामितो दिवि यस्मिन्नैरंमदीयं सरो यस्मिन्नश्वत्थः सोमसवनो यस्मिन्नपराजिता पूर्ब्रह्मणो यस्मिंश्च प्रभुवि
मितं हिरण्मयं वेश्म यश्चानेकधा मंत्रार्थवादादिप्रदेशेषु प्रपंच्यते ते तं प्राप्य न चंद्रलोकादिव भुक्तभोगा आवर्त्तंते कुतः तयोर्ध्वमायन्नमृतत्व
मेति तेषां न पुनरावृत्तिरिति एतेन प्रतिपद्यमाना इमं मानवमावर्त्तं नावर्त्तंते ब्रह्मलोकमभिसंपद्यते न च पुनरावर्त्तते इत्यादिशब्देभ्यः अंतव
त्वेप्यैश्वर्यस्य यथानावृत्तिस्तथा वर्णितं कार्यात्यये तदध्यक्षेण सहातः परमित्यत्र सम्यग्दर्शनविध्वस्ततमसां तु नित्यसिद्धनिर्वाणपराय
णानां सिद्धैवानावृत्तिः॥ ॥

कल्पांतर आवृत्तिर्भातीति तथापीश्वरोपास्तिविना पंचाग्निविद्याश्वमेधदहरब्रह्मचर्यादिसाधनैर्ये गतास्तेषां
तत्त्वज्ञाननियमाभावादावृत्तिः स्यात्‌ ये तु दहरादीश्वरोपास्त्यागतास्तेषां सगुणविद्याफलक्षयेपि निरवग्रहेश्वरानुग्रहाल्लब्धात्मज्ञानान्मुक्तिरिति
नयमद्दसमिश्रे साहि अंतवत्वेपीत्युक्तिः नन्वत्र सूत्रकृता सगुणविद्यामेवानावृत्तिक्रम उक्तो न निर्गुणविदां तत्तको हेतुरित्याशंक्य तेषामावृत्तिशंकाभावादि त्याह समाप्तिमिति॥ ॥ ४३

शा॰ रू॰ तदाश्रयत्वेऽपि सगुणविद्यामावृत्तिप्राप्तौ सम्यग्दर्शनाश्रयत्वेनैवानावृत्तिः साधिता अतः स्वत एव सम्यग्दर्शिनामावृत्तिशंकानेति किमु वाच्यमित्यर्थः य
७७ त्राध्यायसमाप्तिस्तत्र पदमात्रस्याभ्यासो दृष्टस्तदिह सूत्रस्यैवाभ्यासाच्छास्त्रसमाप्तिर्द्योत्यत इत्याह अनावृत्तिः शब्दादिति एवं समन्वयोक्त्या ब्रह्मात्मैक्यस्य वे
दांतप्रमाणकत्वं अवधारितं वाक्यार्थज्ञाने स्मृतितर्कादिसर्वप्रकारविरोधः परिहृतः साधनसंपत्तिश्च दर्शिता तस्माद्विवेकादिसाधनसंपन्नस्य श्रव
णाद्यावृत्तिनिरस्तसमस्तप्रतिबंधस्याखंडात्मसंबोधात्समूलबंधध्वंसस्याविर्भूतनिष्कलंकानंतस्वप्रकाशचिदानंदात्मनावस्थानमिति सिद्धं॥

तदाश्रयत्वेनैव हि सगुणशरणानामप्यनावृत्तिसिद्धिरिति अनावृत्तिः शब्दादिति सूत्राभ्यासः शास्त्रपरिसमाप्तिं द्योतयति
॥इति श्रीमच्छारीरकमीमांसाभाष्ये श्रीमच्छंकरभगवत्पादकृतौ चतुर्थस्याध्यायस्य चतुर्थः पादः समाप्तः॥ ॥ ॥ ४

नानाविधं ग्रंथजातं वीक्ष्य सम्यग्यथामति शारीरकस्य भाष्यस्य कृता व्याख्या सतां मुदे ॥२॥ अंतर्यामी जगत्साक्षी सर्वकर्त्ता रघूद्वहः अतोऽत्र दोषोऽशं
काः स्याद्दोषलेशो वेति शासनात् वक्षस्य सूक्ष्मणोऽश्च पार्श्वे करतलयुगले कौस्तुभाभां दधानो चसीतांको दंड हीशामभयरयुतां वीक्ष्य रामांग संगः स्वस्याः क्र
स्यादित्थं यं हृदि कृतमनना भाष्यरत्नप्रभाख्या व्याख्या नंदैकलुब्धा रघुवरचरणांभोजयुग्मे प्रपन्ना ॥३॥ ॥इति श्रीमत्परमहंसपरिव्राजकाचा हेरंब॰
र्यश्रीमद्गोपालसरस्वतीपूज्यपादशिष्यश्रीगोविंदानंदभगवत्कृतौ शारीरकमीमांसाव्याख्यायां भाष्यरत्नप्रभायां चतुर्थस्याध्यायस्य चतुर्थः पादः॥ समाप्तः॥ ७७

शारिरकसूत्रभाष्यचतुर्थोध्यायः समाप्तः